[illegible]

[illegible]वेदा

[illegible]

॥ जननी जन्मसौख्यानां वर्धनी कुलसम्पदां ॥ पदवी पूर्वे ॥
पुण्यानां लिख्यते जन्म पत्रिका ॥ श्रीसम्वत १९६३ शाके
१८२८ पौष शुक्ला १० दसमी भौमवासरे ३१॥४६ अश्व-
नी भे ३३॥२८ शिवयोगे ४६॥३३ दिनमान २५॥५० तत्रा-
र्क गतांशा० १० तत्रेष्टम् ३८॥१५ तत्समये सिंह लग्न
उदये श्री पुत्र ज्वाला प्रसाद सांठि पासराके गृहे
भार्या पुत्र जन्म शुभम् शुक्रदशा १८ साल पला०

[illegible]

जन्मांग चक्र

[illegible]


५
६ भौ०
७ भौ०
४ रा०
३ गु०
८ बु० शु०
२
९ सू०
१० के०
११ श०
१२
१ चं०

उपमन्यु गोत्र माध्यन्दिनी
वाजसनेही शाखा

श्री ~~हरनाम-ज्वालाप्रसाद~~
~~[illegible]~~
जगन्नाथ का वंश १ कात्यायनी सूत्र
जगदीश २ त्रिप्रवर
वडे. ख्यालीराम ३ ,पलल लौंगिधाक्षरीफ.

४ चैनसुख
५ मोहनलाल
६ आसाराम
चिरोंजीया → बिहैली वालोंके गोदी गयी

हरनाम ४
५ बलदेव ~~[illegible]~~
६ नाथूराम टीकाराम भगतीराम
७ ज्वालाप्रसाद बाबूराम रामलाल
८ फूलचन्द कृष्णगोपाल नारायणप्रसाद
× पादवेन्द्र वासुदेव विजेन्द्र
प्रभु
९ विश्वम्भर
↓
मनोजकुमार

श्री शुभ सम्वत १९८१ शाके १८४६
फाल्गुन शुक्ला १२ शनि वासरे
इष्ट घटी ५।।२४ दिनमान २८।।४
कुम्भार्क गतांश २३ पुष्यनक्षत्रे
चतुर्थ चरणे पंडित कृष्णगोपाल गृहे
भार्या पुत्रजन्म नाम । फूलचन्द
गुरु प्रेरित. पं. वासुदेव



॥ श्रीः ॥

श्रीमद्बृहत्पाराशरहोराशास्त्रम् ।

(पूर्वखण्डसारांशमूलम्)

उत्तरखण्डं च ।

जटाशंकरसूनुना ज्योतिर्विदा श्रीधरेण विरचितया सुबोधिन्या
संस्कृतटीकया, भाषाटीकया च समलंकृतम् ।

सोऽयं ग्रन्थः

पूर्वखण्डे अमृतसरपुरनिवासि पं०नानकचन्द्रतनयगिरिधरलालशर्मणा,
उत्तरखण्डे च खानदेशीयरावेरग्रामनिवासिपरशुरामभट्टात्मजगोविंदशर्मणा
शास्त्रिणा संशोधितः ।

स च

श्रीकृष्णदासात्मज-गंगाविष्णोः
अध्यक्ष "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे
मैनेजर पं० शिवदुलारे वाजपेयी इत्यनेन स्वाम्यर्थं
मुद्रयित्वा प्रकाशितः ।

संवत १९८०, शकाब्दाः १८४५.

कल्याण-मुंबई,

अस्य ग्रन्थस्य सर्वेऽधिकाराः यन्त्राधिकारिणा स्वायत्तीकृताः ।

॥ श्रीः ॥

विद्वदभ्यर्थना ।

स्वस्ति श्रीमदुदयद्दयदलस्खलनजनितापरिमितविततदिगन्तविश्रान्तकान्तकीर्तिषु अतीतानागतवर्तमानसमयत्रितयसमालोचननिपुणेषु न पुनःस्वल्पीयसैवाध्ययनेनानुकृततलस्पृक्खलखलायमानजलवैभवेषु श्रीमद्विद्वद्वृन्देषु सुविनीताविनीतस्य नीचैस्तनाभिधेयस्य मे परः सहस्रप्रणतिपुरःसरं प्रार्थनानिकुरम्बैकसारभूता विज्ञापना समुल्लसतात् ।

भोः पंडितप्रवराः ! इतः पूर्वं बहुलपंडितैः कालज्ञानसाधनीभूता ज्योतिःशास्त्रग्रंथा अनेके संमुद्य प्रकाशिताः परोपकारैककर्तव्यताकाः समुपलभ्यन्ते । अपि च तानेव ग्रन्थाननुसृत्यार्वाचीनपंडिताः कालचर्यामवगत्य व्यवहरन्ति । परं च होराशास्त्रस्य कश्चिदप्यार्षग्रंथोऽद्यापि केनापि न संमुद्रितः नापि प्रकाशमानीतोऽतो न क्वचिदपि व्यवहृतोऽपि दृश्यते । किंचात्र भूतले होराशास्त्रग्रन्थाश्चाष्टादशसंख्याकाः सम्प्रवृत्ताः संतीति तावत्कश्यपवचनाच्छास्त्रकर्तृनामनिर्देशनादनुमीयते । तच्च यथा—

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरंगिराः ॥
लोमशः पौलिशश्चैव च्यवनो यवनो मनुः ।
शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्तकाः ॥ इति ॥

अपरं चैतस्य ज्योतिःशास्त्रस्य काल्पनिकत्वम्, न प्रथमत उत्पत्तिरासीदिति ज्ञानलवदुर्विदग्धैरधुनातनैर्नव्यजनैर्न तिलमात्रमपि भ्रमितव्यम्, यच्चोक्तमेतस्योत्पादनप्रवर्तनपारंपर्यं वासिष्ठेन महर्षिणा—

ज्योतिःशास्त्रं समग्रं प्रथमपुरुषतः स्वर्णगर्भाद्विदित्वा
पूर्वं ब्रह्मा ततोऽयं निखिलमुनिगणप्रार्थनाद्यश्चकार ।

॥ श्रीः ॥

विद्वदभ्यर्थना ।

स्वस्ति श्रीमदुदयदवद्यदलदलनजनितापरिमितविततदिगन्तविश्रान्तकान्तकीर्तिषु अतीतानागतवर्तमानसमयत्रितयसमालोचननिपुणेषु न पुनःस्वल्पीयसैवाध्ययनेनानुकृततलस्पृक्स्खलखलायमानजलवैभवेषु श्रीमद्विद्वद्वृन्देषु सुविनीताविगीतस्य नीचैस्तनाभिधेयस्य मे परः सहस्रप्रणतिपुरःसरं प्रार्थनानिकुरम्बैकसारभूता विज्ञापना समुल्लसतात् ।

भोः पंडितप्रवराः ! इतः पूर्वं बहुलपंडितैः कालज्ञानसाधनीभूता ज्योतिःशास्त्रग्रंथा अनेके संमुद्य प्रकाशिताः परोपकारैककर्तव्यताकाः समुपलभ्यन्ते । अपि च तानेव ग्रन्थाननुसृत्यार्वाचीनपंडिताः कालचर्यामवगत्य व्यवहरन्ति । परं च होराशास्त्रस्य कश्चिदप्यार्षग्रंथोऽद्यापि केनापि न संमुद्रितः नापि प्रकाशमानीतोऽतो न क्वचिदपि व्यवहृतोऽपि दृश्यते । किंचात्र भूतले होराशास्त्रग्रन्थाश्चाष्टादशसंख्याकाः सम्प्रवृत्ताः संतीति तावत्कश्यपवचनाच्छास्त्रकर्तृनामनिर्देशनादनुमीयते । तच्च यथा—

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरंगिराः ॥
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्तकाः ॥ इति ॥

अपरं चैतस्य ज्योतिःशास्त्रस्य काल्पनिकत्वम्, न प्रथमत उत्पत्तिरासीदिति ज्ञानलवदुर्विदग्धैरधुनातनैर्नव्यजनैर्न तिलमात्रमपि भ्रमितव्यम्, यच्चोक्तमेतस्योत्पादनप्रवर्तनपारंपर्यं वासिष्ठेन महर्षिणा—

ज्योतिःशास्त्रं समग्रं प्रथमपुरुषतः स्वर्णगर्भो विदित्वा
पूर्वं ब्रह्मा ततोऽयं निखिलमुनिगणप्रार्थनाच्चकार ।

तच्चेदं सुप्रसन्नं मृदुपदनिकरैर्गृह्यमध्यात्मरूपं
शश्वद्विश्वप्रकाशं ग्रहचरितविदां निर्मलं ज्ञानचक्षुः ॥ इति ॥

तथा च सर्वेऽपि महर्षिप्रोक्ता ज्योतिःशास्त्रग्रंथाः सर्वथैव सर्वदैव सर्वेषामेव मान्या भवितुमर्हन्तीति साम्प्रतमेव । तत्रापि :प्रवर्तमानेऽस्मिंश्चतुर्थे कलियुगे श्रीमन्महामुनिश्रीपराशरमुनेरेवानुभवसिद्धत्वेन प्राधान्यमभिहितं दृश्यते यथा चोक्तम्–

कृते तु मानवं शास्त्रं त्रेतायां बादरायणिः ।
द्वापरे शंखलिखितौ कलौ पाराशरः । स्मृतः ॥ इति ॥

अपरं च–

कृते पैतामहं शास्त्रं त्रेतायां बादरायणम् ।
गार्गीयं द्वापरे प्रोक्तं कलौ तार्तीयिकं स्मृतम् ॥ इति ॥

भोः पंडिताः । अतोऽस्माभिरयमारंभः समारब्धः खलु । अस्य बृहत्पाराशरहोराशास्त्रस्य परोपकारैकतात्पर्यवत्या मत्या प्रकाशनेन तत्कार्यसिसाधयिषया च पुस्तकसंपादनेऽद्य यावद्द्वादशवर्षं प्रकृष्टप्रयत्नं समारभ्य क्वचित्क्वचित् किंचिद्यथालब्धग्रन्थान्महता प्रयासेन देशविदेशातिलङ्घनविलंघनपरिभ्रमेण संपाद्य संचित्य संपूढीकृतोऽयं ग्रंथः तत्राप्यस्य ग्रन्थस्य परिमितिश्च शताध्यायसंख्यायुता वर्तत इति तावदस्यैव ग्रन्थस्यान्तिमश्लोकार्थतो निष्पद्यते । तत्र च यथोक्तम्–

एवं होरा शताध्यायी सर्वपापप्रणाशिनी ।
युगेषु च चतुर्ष्वेव प्रत्यक्षफलदायिनी ॥ इति ॥

तत्र चास्मिन् ग्रन्थे खंडद्वयम् । पूर्वखंडमुत्तरखण्डं च । तन्मध्ये पूर्वखंडसमुदिताध्यायसंख्या चाशीतिसंख्यापरिमिता वर्तत इति तावदस्यैवोत्तरखंडस्य प्रथमश्लोकार्थत एवावगम्यते । यथोक्तं तत्र–

भगवन् सर्वमाख्यातं जातकं विस्तरण मे ।
ससहस्रायुतग्रंथैरशीत्यध्यायसंयुतैः ॥ इति ॥

किंचास्य ग्रंथस्य समुदितपद्यसंख्या च द्वादशसहस्रपरिमिता विद्यते। तत्र पूर्वखंडे तूपरितनश्लोकार्थंत एवैकादशसहस्रपरिमिता । उत्तरखंडे चैकसहस्रपरिमितेति यथायथं सर्वमवधेयं सुधीभिः। तत्र विशेषश्च-

मया बहुलतरप्रयत्नसमारंभणेऽपि समग्रशताध्यायपरिमितो ग्रन्थो नोपलंभितः अपि च समग्रमुत्तरार्धमाद्योपान्तं यथानुगतमुपलंभितम् । पूर्वार्द्धं च खंडशः खंडशः संप्राप्तं न कुत्रापि समग्रं समुपलब्धमिति यथाप्राप्तंयथाप्राप्तं संचित्यसंचित्य सम्यक्तया विषयान्समालोड्य क्वचित्क्वचिदपूर्णं दृष्ट्वाधुनातनविशेषप्रबलग्रंथकारसदुक्तिसमावेशनेन तत्स्थविषयसमीकरणेन संव्यवस्थाप्यैकपञ्चाशदाध्यायपरिणद्धं कृतम् । तच्चापूर्णं दृष्ट्वा न टीकाविषयीकृतम् । उत्तरार्द्धं च समग्रमुपलभ्य प्रवर्तमानसमये तदुपयोगं चावलोच्य टीकाद्वयेन समलंकृतं कृतम् । अस्तु श्रीः।

अथ चैतद्ग्रन्थोपलम्भने यैर्यैः पण्डितैः पुस्तकप्रदानेन मम साहाय्यं कृतं तेषां तेषामुपकृतिस्मृतिसम्पादकनामाभिधानानि तावत्प्रदर्शयामि ।

प्रथमं च पुस्तकम्-अस्मद्गुरूणां सम्प्रति वैकुंठपीठाविकुंठितलुंठनसादराणां कोटाग्रामनिवासिनां श्रीमदौदीच्यसहस्रजातीयानाम् अम्बालालशर्मणां समीपतः किंचित्पूर्वखण्डं संप्राप्तम् ।

द्वितीयं च-दाक्षिणात्यतंजावरग्रामनिवासिविष्णुपंतशर्मशास्त्रिणः सकाशाद्द्वादशशतश्लोकात्मकं पूर्वखण्डं सम्प्राप्तम् ।

तृतीयं च-मुम्बय्यां ज्योतिर्वित्पंडितहरजीवनशर्मशास्त्रिणः सकाशात् किंचित्पूर्वखण्डं समुपलब्धम् ।

तुर्यं च-श्रीमन्महामोक्षनगरीश्रीकाशीपुरीतः प्रवरपण्डितगौरीशंकरशर्मणः शास्त्रिणः सकाशात्समग्रोत्तरखंडं समुपलब्धम् ।

पंचमं च-अमृतसरनिवासिपंडितरामदत्तशर्मणः शास्त्रिणः समीपतः समग्रमुत्तरखण्डं लब्धम् ।

षष्ठं च-अस्मन्मित्रवर्यमहादेवदीक्षितसकाशात्समग्रमुत्तरखण्डं लब्धम्। एतेभ्यः शास्त्रिभ्यः एतद्ग्रन्थस्यास्माकं प्राप्तिरभूत्।

अथ चैतद्ग्रन्थोत्तरखंडस्थटीकाकरणे येषां येषां साहाय्यमासीत्तेषां तेषां चेमानि नामधेयानि-

प्रथमतः-अमृतसरनगरनिवासिपंडितगिरिधारीलालशर्मणः।

ततश्च-जयपुरनगरनिवासिपंडितशिवदत्तशर्मणः।

ततश्च-जयपुरनिवासिभगनीरामशर्मणः।

तदनंतरं च-धौरेयोपाह्वश्रीकृष्णशर्मणः।

ततश्च-औरंगाबादनिवासिज्योतिर्वित्पंडितश्रीहरिकृष्णशर्मणः।

तदुत्तरं च-खानदेशीयरोवरग्रामनिवासिपरशुरामभट्टात्मजगोविंदशर्मणः शास्त्रिणः संशोधने विषयसमीकरणे च।

द्वितीयावृत्तावेतन्मुद्रणयन्त्रालयस्थज्योतिर्विच्छ्रीबच्चूझाशर्मणातियत्नेनशोधित एतत्पुस्तकम्।

एवमुक्ताभिधेयानां च सर्वेषां शास्त्रिणां बहूनुपकारान्संस्मरामि।

विदुषामग्रतश्च प्रार्थयामि यदि समग्रपूर्वखण्डसंपादनेन मां कृतार्थमकरिष्यंस्तर्हि तेषां बहूनुपकारानहमस्मरिष्यम्।

महर्षिपराशरप्रणीतस्यास्य बृहत्पाराशरीनाम्नो होराशास्त्रशिरोमणिज्योतिषग्रन्थस्य मुद्रणविक्रयणादिसर्वाधिकारपुरस्सरं सर्वस्वत्वं श्रीमज्जटाशंकरसूनुज्योतिर्विच्छ्रीधरशर्मणो महानन्दपूर्वकं मया क्षेमराज-श्रीकृष्णदास इत्यनेन क्रीतं राजकीयपत्रे लिखित्वा च दृढीकृतम्, यतो नान्यः कश्चिद्विवादशंकापंककलंकलेशावकाशः। पुनश्चैष ग्रन्थः “श्रीवेंकटेश्वर” निजमुद्रणागारे मुद्रयित्वा प्रकटीकृतः। एतद्विज्ञापनं सर्वेषां सुविदितं भवतु यतो भ्रमादप्यस्य ग्रंथस्य मुद्रणं कोऽपि न कुर्यात्। सर्वतः शिवमिति। शुभम्।

खेमराज श्रीकृष्णदास, “श्रीवेंकटेश्वर” स्टीम् प्रेस-मुम्बई.

अथ श्रीमद्बृहत्पाराशरहोरापूर्वखंडसारांशस्थविषयानुक्रमणिका।

प्रतिपाद्यविषयाः। .... पृ० सं०

प्रथमोऽध्यायः १.

स्वकृतमंगलाचरणम् १
मैत्रेयंकृतपराशरस्तुतिपूर्वकज्योतिःशास्त्रसारप्रश्नः .... ,,
पराशरकृतमंगलाचरणम् .... ,,
ग्रंथाऽधिकारी .... ,,
ग्रंथाऽनधिकारी .... ,,
शास्त्रावतीर्णः .... ,,

द्वितीयोऽध्यायः

जन्मकुण्डलीस्वरूपम् ३
सूर्यादिग्रहाणां स्वरूपम् ४
पंचांगस्थितग्रहेषु चालनम् ६
ग्रहाणां तात्कालिकीकरणम् .... ,,
भयातभभोगसाधनम् .... ,,
चन्द्रस्पष्टीकरणम् ७
उच्चनीचग्रहाः .... ,,
ग्रहाणां मूलत्रिकोणसाधनम् .... ,,
सूर्यादिग्रहाणां मित्रादिभेदकथनम् ,,
मैत्रीचक्राणि .... ,,
अस्योदाहरणम् ९
शुभाशुभबलचक्रे .... ,,
ग्रहाणां बलानि .... ,,
धूमाद्यप्रकाशग्रहस्पष्टीकरणम् १०
अस्योदाहरणम् .... ,,
धूमादिक्षेपकचक्रम् ११
धूमादिस्पष्टचक्रम् .... ,,
किंचित्फलविचारः .... ,,

प्रतिपाद्यविषयाः .... पृ० सं०
गुलिकसाधनम् ११
गुलिकोदाहरणम् १२
गुलिकध्रुवांकचक्रम् .... ,,
प्राणपदसाधनम् .... ,,
प्राणपदस्योदाहरणम् १३

तृतीयोऽध्यायः ३.

मेषादिराशिस्वरूपम् १४
निषेकशोधनम् १५
अयनांशाः .... ,,
पलभाज्ञानम् १६
लंकोदयानुसारेण वा स्वदेशानुसारेण वा लग्नसाधनम् .... ,,
नतोन्नतसाधनम् १७
चतुर्थदशमसाधनम् १८
भावसंधिसाधनम् .... ,,
भोग्यकालोदयस्पष्टलग्नसाधनम् १९
सारणीप्रवेशश्लोकः .... ,,
लग्नपत्रम् .... ,,
भावपत्रम् .... ,,
लग्नपत्रचक्रम् २०
भावपत्रचक्रम् २१
मेषादिनामसंज्ञा २३
मेषादिस्वामिनः .... ,,
पुनर्मेषादिस्वामिनः .... ,,
षोडशवर्गनामसंज्ञा .... ,,
होरासाधनम् .... ,,
अस्योदाहरणम् .... ,,

प्रतिपाद्यविषयाः । पृ० सं०
होराचक्रम् २४
द्रेष्काणसाधनम् .... ,,
अस्योदाहरणम् .... ,,
द्रेष्काणचक्रम् .... ,,
चतुर्थांशः .... ,,
अस्योदाहरणम् .... ,,
चतुर्थांशचक्रम् २५
सप्तमांशसाधनम् .... ,,
अस्योदाहरणम् .... ,,
सप्तमांशचक्रम् २६
नवमांशसाधनम् २७
अस्योदाहरणम् .... ,,
नवमांशचक्रम् .... ,,
दशमांशसाधनम् २७
अस्योदाहरणम् .... ,,
दशमांशचक्रम् .... ,,
द्वादशांशसाधनम् .... ,,
अस्योदाहरणम् २८
द्वादशांशचक्रम् .... ,,
षोडशांशसाधनम् .... ,,
अस्योदाहरणम् .... ,,
षोडशांशचक्रम् २९
विंशांशसाधनम् .... ,,
अस्योदाहरणम् ३०
विंशांशचक्रम् .... ,,
सिद्धांशसाधनम् .... ,,
अस्योदाहरणम् ३१
चतुर्विंशांशचक्रम् .... ,,
भांशेशाः .... ,,
अस्योदाहरणम् ३२
भांशचक्रम् .... ,,

प्रतिपाद्यविषयाः । पृ० सं०
त्रिंशांशसाधनम् ३३
अस्योदाहरणम् .... ,,
विषमत्रिंशांशचक्रम् .... ,,
समत्रिंशांशचक्रम् .... ,,
खवेदांशसाधनम् ३४
अस्योदाहरणम् .... ,,
खवेदांशचक्रम् .... ,,
अक्षवेदांशसाधनम् ३५
अस्योदाहरणम् .... ,,
अक्षवेदांशचक्रम् .... ,,
षष्ठ्यंशाधिपनामसंज्ञाः ३७
अस्योदाहरणम् .... ,,
षष्ठ्यंशचक्रम् ३८
वर्गभेदसंज्ञाः ४०
किंशुकादिचक्रम् .... ,,
पारिजातादिचक्रम् ४१
भेदादिचक्रम् .... ,,
षोडशवर्गफलम् .... ,,

चतुर्थोऽध्यायः ४.

मेषादिदृष्टिभेदः ४४
दृष्टिचक्रम् .... ,,
पुनर्दृष्टिभेदः ४५

पंचमोऽध्यायः ५.

रिष्टारिष्टभंगकथनम् ४६
मातृकष्टम् ४७
पितृकष्टम् ४८
अरिष्टभंगः .... ,,

षष्ठोऽध्यायः ६.

धूमफलम् ४९
पातफलानि ५०
परिधिफलम् .... ,,

प्रतिपाद्यविषयाः । पृ० सं०
चापफलानि ५१
शिखिफलम् ५२
गुलिकफलम् ५३
प्राणपदफलम् ५४

सप्तमोऽध्यायः ७.

अर्गलाफलम् ५४
अग्रेऽर्गलाफलम् ५६

अष्टमोऽध्यायः ८.

ग्रहाणां कारकभेदे आत्मकारकम् ५६
भावकारकभेदाः ५८
चरकारकचक्रम् ५९
पुनर्ग्रहकारकभेदाः .... ,,
कारकांशकुंडली ६०
अस्योदाहरणम् .... ,,

नवमोऽध्यायः ९.

कारकांशफलम् ६१
कारकांशग्रहाणां फलम् .... ,,
कारकांशे दशमभावफलम् ६३
कारकांशे चतुर्थभावफलम् .... ,,
कारकांशे नवमभावफलम् .... ,,
कारकांशे सप्तमभावफलम् ६४
कारकांशे तृतीयभावफलम् .... ,,
कारकांशे द्वादशभावफलम् .... ,,
कारकांशे त्रिकोणादिफलम् ६५

दशमोऽध्यायः १०.

भावलग्नम् ६७
अस्योदाहरणम् ६८
होरालग्नम् .... ,,
अस्योदाहरणम् .... ,,
वर्णदलग्नम् .... ,,
प्रतिपाद्यविषयाः । पृ० सं०
अस्योदाहरणम् ६९
वर्णदविचारः .... ,,
घटीलग्नम् ७०
अस्योदाहरणम् .... ,,

एकादशोऽध्यायः ११.

आरूढलग्नम् ७१
अस्योदाहरणम् .... ,,
आरूढकुंडली .... ,,
तन्वारूढफलम् ७२
अथैकादशारूढफलम् .... ,,
द्वादशस्थानाद्यारूढफलम् .... ,,

द्वादशोऽध्यायः १२.

उपपदे ग्रहफलम् ७४
अस्योदाहरणम् ७७
उपपदकुंडली .... ,,

त्रयोदशोऽध्यायः १३.

कारकमारकादिविचारः ७८
मेषादिकारकमारकविचारः .... ,,

चतुर्दशोऽध्यायः १४.

द्वादशभावनिरीक्षणसंज्ञा ८१
प्रथमभावफलम् ८२
द्वितीयभावफलम् ८३
तृतीयभावफलम् ८५
चतुर्थभावफलम् ८६
पंचमभावफलम् ८७
षष्ठभावफलम् ८९
सप्तमभावफलम् ९१
अष्टमभावफलम् ९३
नवमभावफलम् ९४
दशमभावफलम् ९६

प्रतिपाद्यविषयाः । पृ० सं०

एकादशभावफलम् ९७
द्वादशभावफलम् ९८

पंचदशोऽध्यायः १५.

परजातादियोगः ९९
लग्नेशद्वादशभावस्थितफलम् १००
धनेशद्वादशभावस्थितफलम् १०१
तृतीयेशद्वादशभावस्थितफलम् .... ,,
चतुर्थेशद्वादशभावस्थितफलम् १०२
सुतेशद्वादशभावस्थितफलम् .... ,,
षष्ठेशद्वादशभावस्थितफलम् १०३
सप्तमेशद्वादशभावस्थितफलम् .... ,,
अष्टमेशद्वादशभावस्थितफलम् .... ,,
भाग्येशद्वादशभावस्थितफलम् १०४
दशमेशद्वादशभावस्थितफलम् .... ,,
लाभेशद्वादशभावस्थितफलम् १०५
व्ययेशद्वादशभावस्थितफलम् .... ,,

षोडशोऽध्यायः १६.

पूर्वजन्मशापद्योतकम् १०६
सर्पशापात्सुतक्षयः १०७
पितृशापात्सुतक्षयः १०८
मातृशापात्सुतक्षयः .... ,,
भ्रातृशापात्सुतक्षयः.... .... १०९
मातुलशापात्सुतक्षयः ११०
ब्रह्मशापात्सुतक्षयः .... ,,
पत्नीशापात्सुतक्षयः १११
प्रेतशापात्सुतक्षयः .... ,,
बहुपुत्रयोगाः ११२
अनपत्ययोगः ११३
चिरात्पुत्रयोगाः .... ,,
दत्तपुत्रयोगाः ११४

प्रतिपाद्यविषयाः । पृ० सं०

सप्तदशोऽध्यायः १७.

त्रिकोणशोधनम् ११५
अस्य चक्राणि .... ,,
अस्योदाहरणं सचक्रम् १२२

अष्टादशोऽध्यायः १८.

एकाधिपत्यशोधनम् १२२
अस्योदाहरणम् १२३

एकोनविंशोऽध्यायः १९.

पिंडोत्पत्तिः १२४
ध्रुवांकाः .... ,,
चक्रे १२५
अस्योदाहरणम् ,,

विंशोऽध्यायः २०.

अष्टकवर्गफलानि १२६
सूर्यफलम् .... ,,
अस्योदाहरणम् १२७
चंद्रफलम् .... ,,
अस्योदाहरणम् १२८
भौमफलम् .... ,,
अस्योदाहरणम् १२९
बुधफलम् .... ,,
अस्योदाहरणम् .... ,,
गुरुफलम् .... ,,
अस्योदाहरणम् १३०
शुक्रफलम् .... ,,
अस्योदाहरणम् १३१
शनिफलम् १३२
अस्योदाहरणम् १३३
अस्यार्थः .... ,,
पुनः भौमफलम् .... ,,

प्रतिपाद्यविषयाः पृ० सं०
अस्योदाहरणम् १३४
शुभाशुभफलम् .... ,,
अस्योदाहरणम् .... ,,
सर्वाष्टकवर्गफलम् .... ,,
भावफलम् १३५
राहुयुक्तगुरुफलम् १३७
लग्नेंदुयुतगुरौ त्रिंशत्समे द्रेष्काणफलम् ,,
निधनार्कः .... ,,
अस्योदाहरणम् १३८
निधनचंद्रः ३९
निधनलग्नम् .... ,,
अत्रोदाहरणम् .... ,,
सामुदायाष्टकवर्गफलम् १४०
मासफलम्.... .... १४१
रेखाशांतिफलम् .... ,,

एकविंशोऽध्यायः २१.

नाभसादियोगनामसंज्ञाः १४३
आश्रययोगाः .... ,,
दलयोगौ.... .... ,,
आकृतियोगाः .... ,,
सप्तसंख्यायोगनामानि.... .... १४४
एतेषां फलानि क्रमेण.... .... ,,

द्वाविंशोऽध्यायः २२.

गजकेसरीयोगफलम् १४६
अमलायोगफलम् .... ,,
शुभाशुभयोगफलम् १४७
पर्वतयोगफलम् .... ,,
काहलयोगफलम् .... ,,
मालिकायोगफलम् .... ,,
चामरयोगफलम् १४८
शखयोगफलम् .... ,,
प्रतिपाद्यविषयाः पृ० सं०
भेरीयोगफलम् १४८
मृदंगयोगफलम् १४९
श्रीनाथयोगफलम् .... ,,
शारदायोगफलम् .... ,,
मत्स्ययोगफलम् .... ,,
कूर्मयोगफलम् .... ,,
खड्गयोगफलम् १५०
लक्ष्मीयोगफलम् .... ,,
कुसुमयोगफलम् .... ,,
पारिजातयोगफलम् १५१
कलानिधियोगफलम्.... .... ,,
पारिजातादियोगाः .... ,,
लग्नाधियोगफलम् .... ,,
चद्रयोगाः .... ,,
अधियोगफलम् .... ,,
सुनफाऽनफ दुरुधराकेमद्रुमसंज्ञाः १५२
सुनफाफलम् .... ,,
अनफाफलम् .... ,,
दुरुधराफलम् .... ,,
केमद्रुमफलम् .... ,,
केमद्रुमभंगः .... ,,
रवियोगाः १५३
वेसियोगफलम् .... ,,
उभयचरीफलम् .... ,,
पुंस्त्रीनपुंसकयोगाः .... ,,
षट्क्लीवयोगाः १५४
प्राणिनां वृत्तिनिर्णयः.... .... ,,

त्रयोविंशोध्यायः २३.

अनेकविधमारकभेदाध्यायः १५५

चतुर्विंशोध्यायः २४.

आयुर्दायाध्यायः १५८

प्रतिपाद्यविषयाः । पृ० सं०
दीर्घाद्यनेकभेदानामायुष्यक्रम् १६०

पंचविंशोऽध्यायः २५.

पुनः आयुर्दायाध्यायस्य द्वितीयः प्रकारः १६६

षड्विंशोऽध्यायः २६.

रुद्रग्रहलक्षणम् १७३
माहेश्वरग्रहलक्षणम् १७८
ब्रह्मग्रहलक्षणम् १७९
ब्रह्ममाहेश्वरग्रहलक्षणम् १८०

सप्तविंशोऽध्यायः २७.

पितृनिर्याणम् १८०
मातृनिर्याणम् १८१
भ्रातृनिर्याणम् .... ,,
भगिनीपुत्रनिर्याणम् .... ,,
ज्येष्ठभ्रातृनिर्याणम् .... ,,
पितृमानिर्याणम् .... ,,
कलत्रनिधनम् १८२
अन्यनिधनम् .... ,,
मरणनिमित्तानि १८३
निधनदेशः .... ,,

अष्टाविंशोऽध्यायः २८.

राजयोगादिफलम् १८४
द्वादशयोगफलम् .... ,,
चतुर्विधसंबंधः १८५
राजामात्यादियोगफलम् .... ,,
पारिजातादिशुभाशुभविचारः .... ,,
पारिजातादिफलम् .... ,,
विशेषयोगादिफलम् १८६

एकोनत्रिंशोऽध्यायः २९.

पुना राजयोगादिफलम् १८७
राजर्षियोगः १९०
धीयोगाः १९०
मुखयोगाः १९१
सेनाधीशयोगः .... ,,
प्रधानयोगाः .... ,,
राजयोगरसायनम् १९२

त्रिंशोऽध्यायः ३०.

धनयोगविचारः १९३

एकत्रिंशोऽध्यायः ३१.

दरिद्रयोगः १९४
बंधनयोगविचारः १९५

द्वात्रिंशोऽध्यायः ३२.

पूर्वजन्मवर्णनाध्यायः १९६

त्रयस्त्रिंशोऽध्यायः ३३.

सुखदुःखादिकथनाध्यायः १९७

चतुस्त्रिंशोऽध्यायः ३४.

जाग्रदाद्यवस्थाकथनम् २००
दीप्ताद्यवस्था .... ,,
बालाद्यवस्था २०१
प्रवासाद्यवस्था .... ,,
लज्जिताद्यवस्था २०२
शयनाद्यवस्था २०३
अस्योदाहरणम् २०४
स्वरांशसूर्यादिक्षेपांकचक्रे २०५
दृष्टिभेदः.... .... ,,
सूर्यफलम् .... ,,
चन्द्रफलम् २०६
भौमफलम् २०७
बुधफलम् २०८
गुरुफलम् २०९

प्रतिपाद्यविषयाः । पृ० सं०
भृगुफलम् २१०
शनिफलम् २११
राहुफलम् २१२
केतुफलम् २१३
सर्वभावफलम् .... ,,

पंचत्रिंशोऽध्यायः ३५.

दशानां संज्ञाः २१४
विंशोत्तरी दशा २१५
षोडशोत्तरी दशा .... ,,
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् २१६
द्वादशोत्तरी दशा .... ,,
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् २१७
अष्टोत्तरीदशा .... ,,
अस्याउदाहरणम् .... ,,
अस्याश्चक्रम् २१८
पंचोत्तरीदशा .... ,,
अस्याउदाहरणम् .... ,,
अस्याश्चक्रम् २१९
शताब्दिकदशा .... ,,
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् २२०
चतुरशीत्यब्दिकादशा .... ,,
अस्याउदाहरणम् .... ,,
अस्याश्चक्रम् .... ,,
द्विसप्ततिका दशा २२१
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् .... ,,
षष्टिहायनी दशा .... ,,

प्रतिपाद्यविषयाः । पृ० सं०
अस्या उदाहरणम् २२१
अस्याश्चक्रम् २२२
षड्विंशतिका दशा .... ,,
अस्याश्चक्रम् .... ,,
नवमांशनवदशा २२३
अस्या उदाहरणम् २२५
राश्यंशकदशा .... ,,
कालदशा .... ,,
अस्या उदाहरणम् २२६
अस्याश्चक्रम् २२७
पुनःकालचक्रदशा .... ,,
चक्रदशा २२८
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् .... ,,
चरपर्यादशा २२९
अस्या उदाहरणम् २३०
अस्याश्चक्रम् २३१
नवमांशास्थिरदशा .... ,,
अस्या उदाहरणम् २३२
अस्याश्चक्रम् .... ,,
स्थिरदशा २३३
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् .... ,,
उत्तरदशाचतुर्विधा .... ,,
अस्या उदाहरणम् २३५
अस्याश्चक्रम् .... ,,
ब्रह्मग्रहाश्रितदशा .... ,,
अस्या उदाहरणम् २३८
अस्याश्चक्रम् २३९
केंद्रादिदशा .... ,,

प्रतिपाद्यविषयाः । पृ० सं०
कारककेंद्रदशा २४०
अस्या उदाहरणम् २४१
अस्याश्चक्रम् .... ,,
कारकग्रहदशा .... ,,
अस्या उदाहरणम् २४२
अस्याश्चक्रम् .... ,,
मंडूकदशा २४३
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् २४४
शूलदशा .... ,,
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् २४५
नक्षत्रदशा .... ,,
योगार्द्धदशा .... ,,
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् २४६
दृग्दशा .... ,,
अस्या उदाहरणम् २४७
अस्याश्चक्रम् २४८
त्रिकोणदशा २४९
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् २५०
नक्षत्राद्राशिदशा .... ,,
अस्याउदाहरणम् .... ,,
अस्याश्चक्रम् .... ,,
तारादशा .... ,,
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् .... ,,
वर्णदशा २५२
अस्याउदाहरणम् .... ,,

प्रतिपाद्यविषयाः । पृ० सं०
अस्याश्चक्रम् २५२
पंचस्वरदशा .... ,,
अस्या उदाहरणम् २५४
अस्याश्चक्रम् .... ,,
योगिनीदशा .... ,,
अस्या उदारणम् २५५
अस्याश्चक्रम् .... ,,
पिंडादिचतुर्दशा .... ,,
संध्यादशा .... ,,
अस्या उदाहरणम् २५६
अस्याश्चक्रम् .... ,,
पाचकदशा .... ,,
अस्याउदाहरणम् .... ,,
अस्याश्चक्रम् २५७

षट्त्रिंशोऽध्यायः ३६.

विंशोत्तरीपंचविधसंज्ञाः .... ,,
विंशोत्तरीमहादशावर्षनक्षत्रचक्रम् २५८
भुक्तभोग्यानयनम् .... ,,
अस्योदाहरणम् २५८
सूर्यदशाफलम् २५९
चन्द्रदशाफलम् २६०
भौमदशाफलम् .... ,,
राहुदशाफलम् २६१
गुरुदशाफलम् २६२
शनिदशाफलम् .... ,,
बुधदशाफलम् २६३
केतुदशाफम् २६४
शुक्रदशाफलम् .... ,,
द्वादशभावाधीशदशाफलम् २६५

प्रतिपाद्यविषयाः। पृ० सं०

सप्तत्रिंशोऽध्यायः ३७.

अंतर्दशाप्रकरणम् २७०
अस्योदाहरणम् .... ,,
विंशोत्तर्यंतर्दशाचक्राणि .... ,,
अंतर्दशाशुभाशुभविचारः २७१
द्वादशभावाधीशशुभाशुभम् २७२
रवेरंतरफलम् .... ,,
रविमध्येचंद्रांतरम् २७३
रविमध्येभौमांतरम् .... ,,
रविमध्येराह्वंतरम् २७४
रविमध्येगुर्वंतरम् २७५
रविमध्येशन्यंतरम् .... ,,
रविमध्येबुधांतरम् २७६
रविमध्येकेत्वंतरम् २७७
रविमध्येशुक्रांतरम् .... ,,

अष्टात्रिंशोऽध्यायः ३८.

चन्द्रान्तरफलम् २९७
चंद्रमध्ये भौमांतरम् २७८
चंद्रमध्येराह्वंतरम् .... ,,
चंद्रमध्येगुर्वंतरम् २७९
चंद्रमध्येशन्यंतरम् .... ,,
चंद्रमध्येबुधांतरम् २८०
चंद्रमध्येकेत्वन्तरम् .... ,,
चंद्रमध्येशुक्रांतरम् २८१
चन्द्रमध्येसूर्यांतरम् .... ,,

एकोनचत्वारिंशोऽध्यायः ३९.

कुजमध्येकुजान्तरम् २८२
कुजमध्येराह्वंतरम् .... ,,
कुजमध्येगुर्वन्तरम् २८३
कुजमध्येशन्यंतरम् .... ,,
प्रतिपाद्यविषयाः । पृ० सं०
कुजमध्येबुधांतरम् २८४
कुजमध्येकेत्वंतरम् २८५
कुजमध्येशुक्रांतरम् .... ,,
कुजमध्येसूर्यांतरम् २८६
कुजमध्येचन्द्रांतरम् .... ,,

चत्वारिंशोऽध्याय ४०.

राहुमध्येराह्वंतरम् २८७
राहुमध्येगुर्वन्तरम् .... ,,
राहुमध्येशन्यंतरम् २८८
राहुमध्येबुधांतरम् २८९
राहुमध्येकेत्वंतरम् .... ,,
राहुमध्येशुक्रांतरम् २९०
राहुमध्येसूर्यान्तरम् २९१
राहुमध्येचंद्रांतरम् .... ,,
राहुमध्येकुजांतरम् २९२

एकचत्वारिंशोऽध्यायः ४१.

गुरुमध्येगुर्वंतरम् २९३
गुरुमध्येशन्यंतरम् .... ,,
गुरुमध्येबुधांतरम् २९४
गुरुमध्येकेत्वंतरम् २९५
गुरुमध्येशुक्रांतरम् .... ,,
गुरुमध्येसूर्यांतरम् २९६
गुरुमध्येचंद्रांतरम् .... ,,
गुरुमध्येभौमांतरम् २९७
गुरुमध्येराह्वंतरम् .... ,,

द्विचत्वारिंशोऽध्यायः ४२.

शनिमध्येशन्यंतरम्.... .... २९८
शनिमध्येबुधांतरम् .... ,,
शनिमध्येकेत्वंतरम् २९९
शनिमध्येशुक्रांतरम्.... .... ,,

प्रतिपाद्यविषयाः । पृ०सं०
शनिमध्येसूर्यांतरम् ३००
शनिमध्येचंद्रान्तरम्.... .... ३०१
शनिमध्येभौमांतरम्.... .... ,,
शनिमध्येराह्वंतरम् ३०२
शनिमध्येगुर्वंतरम् .... ,,

त्रिचत्वारिंशोऽध्यायः ४३.

बुधमध्येबुधांतरम् ३०३
बुधमध्येकेत्वंतरम् ३०४
बुधमध्येशुक्रांतरम् .... ,,
बुधमध्येसूर्यांतरम् .... ,,
बुधमध्येचंद्रांतरम् ३०५
बुधमध्येकुजांतरम् .... ,,
बुधमध्येराह्वंतरम् ३०६
बुधमध्येगुर्वंतरम् ३०७
बुधमध्येशन्यंतरम् .... ,,

चतुश्चत्वारिंशोऽध्यायः ४४.

केतुमध्येकेत्वंतरम् ३०८
केतुमध्येशुक्रांतरम् .... ,,
केतुमध्येसूर्यांतरम् ३०९
केतुमध्येचंद्रांतरम् .... ,,
केतुमध्येकुजांतरम् ३१०
केतुमध्येराह्वंतरम् ३११
केतुमध्येगुर्वंतरम् .... ,,
केतुमध्येशन्यंतरम् ३१२
केतुमध्येबुधांतरम् .... ,,

पंचचत्वारिंशोऽध्यायः ४५.

शुक्रमध्येशुक्रांतरम् ३१३
शुक्रमध्येसूर्यांतरम् ३१४
शुक्रमध्यसूर्यांतरम् .... ,,
शुक्रमध्येभौमांतरम् ३१५

प्रतिपाद्यविषयाः । पृ०सं०
शुक्रमध्येराह्वंतरम् ३१५
शुक्रमध्येगुर्वंतरम् ३१६
शुक्रमध्येशन्यंतरम् .... ,,
शुक्रमध्येबुधांतरम् ३१७
शुक्रमध्येकेत्वंतरम् .... ,,

षट्चत्वारिंशोऽध्यायः ४६.

उपदशानयनम् ३१८
अस्या उदाहरणम् .... ,,
विंशोत्तर्युपदशाचक्राणि ३१९
विदशाफलम् ३३२
सूर्यफलम् ३३३
चंद्रफलम् .... ,,
भौमफलम् ३३४
राहुफलम् ३३५
गुरुफलम् .... ,,
शनिफलम् ३३६
बुधफलम् ३३७
केतुफलम् .... ,,
शुक्रफलम् ३३८

सप्तचत्वारिंशोऽध्यायः ४७.

सूक्ष्मदशाकरणम् ३३९
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् .... ,,
सूक्ष्मदशाफलम् ३४०
सूर्यफलम् .... ,,
चन्द्रफलम् ३४१
भौमफलम् .... ,,
राहुफलम् ३४२
गुरुफलम् ३४३

प्रतिपाद्यविषयाः । पृ० सं०
शनिफलम् ३४३
बुधफलम् ३४४
केतुफलम् ३४५
शुक्रफलम् .... ,,

अष्टचत्वारिंशोऽध्यायः ४८.

प्राणदशानयनम् ३४६
अस्या उदाहरणम् .... ,,
अस्याश्चक्रम् ३४७
प्राणदशाफलम् .... ,,
सूर्यफलम् ३४८
चंद्रफलम् ३४९
भौमफलम् .... ,,
राहुफलम् ३५०
गुरुफलम् ३५१
शनिफलम् .... ,,
बुधफलम् ३५२
केतुफलम् .... ,,
शुक्रफलम् ३५३

एकोनपंचाशत्तमोऽध्यायः ४९.

कालचक्रदशानयनम् ३५४
सव्यापसव्यतः मेषादिवृश्चिकाद्यंशाः
ज्ञातव्याः ३५५
अस्या उदाहरणम् ३५७
कालचक्रसव्यमार्गदशाचक्रम् ३५८
प्रतिपाद्यविषयाः पृ०सं०
कालचक्राऽपसव्यमार्गदशाचक्रम् ३५९
कालचक्रसव्याऽपसव्यातरचक्राणि ३६०
कालचक्रांशफलम् ३९६
उदयफलम् .... ,,
देहजीवफलम् .... ,,
गतिभेदाः ३९७
गतीनां फलानि .... ,,
सिंहावलोकनादिगतिफलम् .... ,,
पुनर्गतिफलम् .... ,,
महादशाफलम् ३९८
अंशायुर्निर्णयः .... ,,
अन्तर्दशाफलम् .... ,,
नवांशफलम् ४०२

पंचाशत्तमोऽध्यायः ५०.

चरदशाफलम् ४०४

एकपंचाशत्तमोऽध्यायः ५१.

दशावाहनफलम् ४०७
सुदर्शनचक्रफलम् ४०८
अस्योदाहरणम् ४०९
सुदर्शनचक्रम् ४१२
राहुदृष्टिकथनम् .... ,,
ग्रहाणांसुदयवर्षाणि .... ,,
ग्रन्थकर्तृप्रशंसा .... ,,

इति बृहत्पाराशरहोरापूर्वखंडस्थविषयानुक्रमणिका समाप्ता ।

अथ बृहत्पाराशरहोरोत्तरभागस्थ-विषयानुक्रमणिका ।

प्रतिपाद्यविषयाः । पृ० सं०

प्रथमोऽध्यायः १.

ग्रंथकर्तुर्मंगलाचरणम् ४१३
मैत्रेयमुनिकृताःपराशरमहर्षयेप्रश्नाः ४१५
पराशरमुनेःकृतप्रश्नाभिनन्दपुरःसरोत्तरदानम् ४१८
ज्योतिःशास्त्रस्यसम्यग्ज्ञानोपायवर्णनम् ४२१
ज्योतिःशास्त्रस्य वेदसाम्यम् ४२३
शुभाशुभफलकथनरीतिः .... ,,
सूर्याष्टकवर्गबिंदुविचारः ४२४
चन्द्राष्टकवर्गबिंदुविचारः ४२६
भौमाष्टकवर्गबिंदुविचारः ४२७
बुधाष्टकवर्गबिंदुविचारः ४२९
बृहस्पत्यष्टकवर्गबिंदुविचारः ४३१
शुक्राष्टकवर्गबिंदुविचारः ४३४
शनैश्चराष्टकवर्गबिंदुविचारः ४३५
अथ रेखाविचारः ४३७
सूर्याष्टकवर्गरेखाविचारः .... ,,
चंद्राष्टकवर्गरेखाविचारः ४३९
भौमाष्टकवर्गरेखाविचारः ४४०
बुधाष्टकवर्गरेखाविचारः ४४१
गुर्वष्टकवर्गरेखाविचारः ४४२
शुक्राष्टकवर्गरेखाविचारः ४४३
शनैश्चराष्टकवर्गरेखाविचारः ४४५
लग्नस्य बिंदुविचारः ४४६
लग्नस्य रेखाविचारः.... .... ४४८
करणस्थाननिर्वचनम् ४४९

प्रतिपाद्यविषयाः । पृ० सं०
सूर्यादिग्रहमेषादिराशिवर्गणांकविचारः .... ,,
करणस्थानचक्रलेखनप्रकारः ४५१

द्वितीयोऽध्यायः २.

अथभावसाधनप्रकारः .... ,,
संधिसाधनम् .... ,,
दृष्टिसाधनम् ४५४
शनिदेवेज्यभौमानां विशेषदृष्टिसंस्कारः ४५७
उच्चबलसाधनम् ४५९
सूर्यादिग्रहाणां सप्तवर्गबलविचारः ४६०
युग्मायुग्मबलविचारः ४६३
केन्द्रादिबलविचारः ४६४
द्रेष्काणबलविचारः .... ,,
दिग्बलविचारः ४६६
नतोन्नतबलविचारः ४६७
पक्षबलविचारः ४६९
दिनरात्रिभागबलविचारः ४७०
वर्षमासदिनहोरेशबलविचारः ४७१
अयनबलविचारः ४७३
चेष्टाबलक्रमप्राप्तभौमादिग्रहयुद्धबलम् ४७५
गतिबलम् ४७६
चेष्टाबलम् ४७७
नैसर्गिकबलाबलविचारः ४७९
उक्तपंचविधबलानां दृष्टिबलेन संस्कारः ४८०
भावबलानयनप्रकारः ४८२
ग्रहविशेषेण तु कालविशेषेण बलाधिक्यानयनविचारः ४८३

प्रतिपाद्यविषयाः । पृ० सं०
भावानां दिग्बलम् ४८४
बलप्रकरणोपसंहारः ४८६
ग्रहभावोभयानां प्रोक्तषड्बलैक्ये सुबलस्वपूर्णबलत्वनियतसंख्या ,,
अवांतरस्थानादिपंचबलानां पृथक्संख्यापरिगणनम् ४८७
बलानां सुगमपरिज्ञानाय नियतांकचक्रम् ,,
बहुयोगहेतुषु प्राप्तेषु विशेषयोगकर्तृत्वयाफलमदज्ञानम् .... ,,
एतच्छास्त्राधिकारिलक्षणम् ४९०

तृतीयोऽध्यायः ३.

अथोच्चरश्म्यानयनविचारः ४९१
चेष्टारश्म्यानयनसाधनीभूतचेष्टाकेन्द्रविचारः ४९२
चेष्टारश्मिशुभाशुभरश्मिविचारः ४९३
ग्रहाणामिष्टकष्टविचारः.... .... ४९४
इष्टकष्टसप्तवर्गेषु स्वोच्चादिस्थानज्ञानानि० .... ४९५
सर्ववर्गेष्टफलमध्ये शुभाशुभविभागः ४९८
शुभाशुभसहितादिक्फलादिनफलविचारः ४९९
साविस्तरादिक्फलादिनफलशुभाशुभफल विचारः ५००
सग्रहराशिफलसाधनम् ५०१
स्थानकरणविचारः ५०२

चतुर्थोऽध्यायः ४.

अथ शुभाशुभसूचकललाटाक्षरफलविचारः ५०४
द्वादशभावविचारणीयविचारः .... ,,
रश्मिविचारः ५०७
विशेषसंस्कारांतरेण रश्म्यानयनविचारः ,,
प्रतिपाद्यविषयाः । पृ० सं०
मूलत्रिकोणादिवक्ष्यमाणास्थितविशेषरश्मिसंस्कारांतरविचारः ५०९
प्रकारांतरेण रश्मिविचारः ५११
मतांतरेण गतिवशाद्रश्मिह्रासवृद्धिविचारः ५१३
ग्रहसंज्ञारूपतो रश्मिफलनिर्णयः ५१४
योगविशेषेण रश्मिह्रासवृद्धिविचारः५१५
उच्चपापरश्मिनिर्णयः .... ,,
राजयोगकारकरश्मिविचारः ५१६
द्विग्रहादियोगेरश्मिफलनिर्णयः ५१७
रश्मिप्रयोजनम् ५१८
एकादिरश्मिसंख्यातारतम्येन रश्मीनां शुभं फलम् ५१९
चतुर्दशादिरश्मिसंख्यातारतम्येन रश्मीनां शुभं फलम् ५२१
आरंभतोयावद्राशिसमापनं संतति विचारः ५२४
रश्मिवशादैश्वर्यविचारः .... ,,
बहुपोषकत्वयोगः ५२५
परलोकेशाधिपत्ययोगः ५२६
राजयोगः .... ,,
सार्वभौमपदप्राप्तियोगः ५२७
नरादिपोष्यसंख्याविचारः ५२८
कलौ शूद्राणामेव राजयोगकथनम् ,,
भाग्यादिफलानां व्यवस्था ५२९
षड्बल व्यवस्था ५३०
अध्यायोपसंहारः ५३१

पंचमोऽध्यायः ५.

अथ लेखास्थानादिविचारेण शुभाशुभफलम् ५३२
भावफलानां बलहानिफलनाशविचारः ,,

प्रतिपाद्यविषयाः । पृ० सं०
पूर्वभागोक्तयोगानां व्यवस्था ५३४
भावविचारः .... ,,
पितृमात्रारिष्टविचारः ५३५
स्थानकरणतारतम्येन त्रिकोणशोधनप्रकारः ५३६
एकाधिपत्यशोधनमाप्तरेखाकरणेष्वब्दानयनम् ५४१
सूर्यतश्चतुर्थाभ्यामायुःकथनम् ५४४
राशिभावविचारेण पितृमात्रारिष्टम् ५४५
वेश्मस्थाने रेखाभावे आयुःकथनम् ५४६
करणादिविचारेण भावविचारः ५४७

षष्ठोऽध्यायः ६.

अथाब्दचर्यया भाग्यादिवर्णनम्....५५३
भावफलज्ञाने कालचर्या ५५४
भावफलज्ञाने शुभग्रहपापग्रहभेदेन विशेषः ५५५
कारकसंज्ञग्रहविचारः ५५६
भावेषु शुभाशुभग्रहविचारः ५५७
दृग्बलसिद्धग्रहव्यवस्था ५५८
स्त्रीपुंस्वभावविचारः .... ,,
स्थानविशेषेणरव्यादीनां पाचकादिसंज्ञा ५५९
स्थानसंबंधेनपाचकादिग्रहाः ५६०
रव्यादीनां दशागोचरादिफलकालः ५६३

सप्तमोऽध्यायः ७.

अथ मासचर्यायाः शुभाशुभदिवसज्ञानम् ५६४

अष्टमोऽध्यायः ८.

पूर्वाध्यायोक्तयोगभंगपरंपरा ५६६
स्थानविशेषकरणाधिपसंभवेन भंगः ,,
शून्यानयनेन भंगांतरम् .... ,,
प्रतिपाद्यविषयाः । पृ० सं०
राशिप्रयोजनम् ५६६
प्रकारांतरेण भावभंगः ५६९
भंगयोजना ५७०

नवमोऽध्यायः ९.

अथ द्वादशभावनामानि ५७२
रविग्रहविचारः ५७४
चंद्रग्रहविचारः .... ,,
भौमविचारः ५७५
बुधविचारः ५७६
गुरुविचारः .... ,,
शुक्रविचारः ५७७
शनिविचारः .... ,,
उल्कानां फलविचारः ५७८

दशमोऽध्यायः १०.

अथ पिंडांशकादिभेदवर्णनम् ५७९
पिंडायुर्ध्रुवांकवर्णनम् ५८०
ध्रुवायुर्दायध्रुवांकविचारः ५८१
रश्म्यायुर्दायध्रुवांकविचारः .... ,,
वर्षमासाद्यायुरुत्पादनप्रकारः ५८२
नवांशायुरुत्पादनप्रकारः ५८४
प्रक्रमानुगतायुर्दायोत्पादनप्रकारः ५८६
अष्टकवर्गायुर्दायोत्पादनप्रकारः .... ,,
ध्रुवांकसहितनवांशायुर्दायकथनम्. ५८७
नक्षत्रायुर्दायः ५८८
आयुर्दायकथनहेतूपन्यासः ५८९
भावायुर्दायवर्णनम् .... ,,
आयुर्दाय य मुख्यत्वेन षाड्विध्यवर्णनम् ५९१

प्रतिपाद्यविषयाः । पृ० सं०

एकादशोऽध्यायः ११.

अथ मारकयोगविचारः ५९१
आयुर्योगविचारः ५९२
गुरुबुधशुक्रयोगायुर्मानम् ५९३
दायहरणप्रकारः ५९५
व्ययादिहरणप्रकारः ५९६
भावसंधिगतायुर्हरणम् ५९७
आयुर्हरणप्रक्रिया ५९८
अनेकग्रहयोगे विशेषकर्तव्यम् ५९९
ग्रहद्वययोगे कर्तव्यम् .... ,,
शुभद्वययोगे विशेषः .... ,,
अस्तंगतग्रहाणां दायहरणप्रकारः ६००
लग्नायुर्दायहरणरीतिः .... ,,
लग्ने क्रूरग्रहयोगे आयुर्हरणसंस्कारः ६०२
सचंद्रायुर्दायः ६०४
लग्नगतसचंद्राद्यायुर्दायः .... ,,
द्रेष्काणवशात्स्थानवृद्धिक्षयौ ६०५
अस्तंगतग्रहायुर्हानिः .... ,,
शत्रुक्षेत्रगतग्रहायुर्हानिः तत्र सुहृद्वर्गगतानां विशेषः मित्रादीनां वृद्धिः शत्र्वादीनां हरणम् ६०६
अंतर्दशाभागाः ६०७
अंतर्दशानयनप्रकारः ६०८
समच्छेदाभावस्थानानि ६०९
अंतर्दायोपभोक्तृक्रमः ६११
ग्रहेभ्यो भावेभ्यश्च द्वादशस्थानभागांशाः ६१२
अवशिष्टव्यवस्था ६१३
कालांशपत्यर्थे होरांशपतिहराः ६१४

प्रतिपाद्यविषयः । पृ०सं०

द्वादशोऽध्यायः १२.

अथ पिंडायुर्भेदगणना ६१५
ग्रहतारतम्येनांशाद्यन्वितमायुर्दायग्रहणम् ६१६
स्वोच्चाद्यधिकारतारतम्येन आयुर्दायग्रहणविशेषः ६१७
लग्नगतबलवद्ग्रहतारतम्येनायुर्ग्रहणम् ६१८
उच्चाद्याधिकारवशाल्लग्नगतानामायुःक्रमः
द्वादशभावेषु ग्रहाणां मिश्रायुर्दायग्रहणम् ६२०
उक्तायुर्दायगणना ६२२
अमिश्रायुर्दायभेदाः .... ,,
मिश्रायुर्दायदशाग्रहणरीतिः .... ,,
नक्षत्राद्यायुर्दायेषु पिंडायुर्दायग्रहणस्थलानि ६२३
प्रकारांतरेण पैंड्यायुर्ग्रहणम् ६२४
ध्रुवायुर्ग्रहणम् ६२५
योगविशेषेण बलवत्तरसप्तमगृहेषु पृथक्पृथग्दायविशेषग्रहणम् ६२९
राशिवशादायुर्ग्रहणम् .... ,,
अत्रार्थे गर्गवाक्यप्रमाणम् ६३१

त्रयोदशोऽध्यायः १३.

अथ सकलव्यवहारसाधनीभूतभाग्यादिविचारोपक्रमः ६३२
भाग्यविचाररीतिः .... ,,
स्वदेशपरदेशभाग्योदयविचारः ६३४
भावफलसमोपदेशः ६३६
प्रकारांतरेण समाद्यानयनम् ६३७
उच्चादिस्थानविशेषेण रव्यादीनां फलविशेषः .... ,,

प्रतिपाद्यविषयाः । पृ० सं०
भाग्यविचारेचन्द्रफलम् ६३९
,, भौमफलम् ६४०
,, बुधफलम् ६४१
,, गुरुफलम् ६४२
,, शुक्रफलम् ६४४
,, शनिफलम् ६४५
फलागमकालविचारः .... ,,
भ्रात्रादिसंख्याविचारः ६४७

चतुर्दशोऽध्यायः १४.

वर्षचर्योपक्रमः ६४९
लग्नविचारः .... ,,
त्रिंशन्नक्षत्रसंज्ञाः .... ,,
द्वात्रिंशद्दिनाडीद्वयमुहूर्तसंज्ञाः ६५१
षष्टिनाडीसंज्ञाः .... ,,
कलांशाः ६५२
राशिचक्रगतकलांशाः .... ,,
नित्योदयक्रमः ६५३
नक्षत्रक्रमग्रहणप्रकारभेदाः .... ,,
रात्रिदिनक्रमग्रहणप्रकारः .... ,,
मेषादिनित्योदयानां प्रत्यहं भोगकालः ६५५
दशवर्गादिषु फलानि ६५६
राहुकेतुगतिः ६६१
राहुकेतुगतिप्रयोजनम् .... ,,
पित्राद्यरिष्टविचारः ६६२
अपमृत्युकालनिर्णयः ६६६
स्वल्पायासेन चिरायुर्ज्ञानप्रकारः.... ६६७
नवचतुर्दशग्रहाणां षष्ट्यंशत्रिंशांशादयः ६६८
नक्षत्रगणनाप्रकारः ६६९
कलांशादिषूत्पन्नानां प्रियारसाः ६७०

प्रतिपाद्यविषयाः । पृ० सं०
वंध्यात्वादिज्ञानम् ६७१
संन्यासित्वयोगाः ६७२
परमहंसादियोगाः ६७३
परिव्राड्धर्मज्ञानम् ६७४
अंशविशेषजातस्य स्त्रीलक्षणयोगः ६७५
शुभाशुभकर्मरतिज्ञानम् ६७६
मेषादिराशिजातफलम् ६७९
सूर्यादीनां कलांशवशात्फलम् ६८०
षष्ट्यंशफलानि ६८१
अंशद्वयैक्येन त्रिंशत्फलानि ६८४
सूर्यकालांतिमे मरणनिमित्तानि ६८५
जन्मलग्नस्थसूर्यादिनवग्रहवशान्मृतिनिमित्तम् .... ,,
नवांशफलनिधननिमित्तानि ६८६
कालादिपर्यंतचतुर्दशग्रहवशान्मृत्युनिश्चयः ६८७
रश्मिवशेनाब्दाब्दहरक्रमः ६८८
अंशायुर्हराः ६८९
नवांशायुर्दायाङ्कानयनक्रमः ६९०
शतायुर्दायानयनम् .... ,,
उक्तयोगफलानि ६९१
योगनामानि ६९२
शुभयोगाः ६९४
लक्ष्मीयोगान्तरम् ६९५

पंचदशोऽध्यायः १५.

अथ रश्म्यंशफलम् ६९८
चतुर्दशादिरश्मिफलम् ७००
त्रयोविंशादिरश्मिफलम् ७०३
पंचविंशादिरश्मिफलानि ७०४

प्रतिपाद्यविषयाः । पृ०सं०
एकोनत्रिंशदादिरश्मिफलानि ७०६
रविस्थानफलानि ७०८
चंद्रभावफलानि .... ,,
भौमभावफलानि ७१०
भावेषु बुधफलानि ७१२
भावेषुगुरुशुक्रफलानि.... .... ,,
भावेषु मंदफलानि ७१३
अधिमित्रादिस्थानस्थितानां भावोक्तफलह्रासवृद्धिः .... ,,
दृष्टिवशाद्रविफलम् ७१४
,, चंद्रफलम् .... ,,
,, भौमफलम् ७१५
,, बुधफलम् .... ,,
,, गुरुफलम् ७१६
,, शुक्रफलम् ७१७
,, शनिफलम् .... ,,
स्थानबलवशाद्रव्यादीनां फलानि.... ७१८
कालायनचेष्टाबलान्यतमवर्तमानग्रहफलानि ७१९
इष्टकष्टबलवशाद्ग्रहाणां फलानि.... ७२१
दशाविचारः ७२३
बलग्रहणानुक्रमः ७२४

षोडशोऽध्यायः १६.

अथसंख्यादिविचारेणभावगतग्रहफलानि ७२५
ग्रहयोगभावलक्षणम् .... ,,
तिर्यङ्मुखादीनांभावानांबलकथनरीतिः ७२६
भावस्थानांकसंख्या ७२७
भावेषु करणांकसंख्याः .... ,,
प्रतिपाद्यविषयाः । पृ०सं०
स्थानकरणानां विषमसमसंख्यायाः शुभाऽशुभविचारः ७२८
समविषमराशिषु स्थानककरणसंख्याया व्याधिहानिः ७२९
विषमराशेः स्थानफलम् .... ,,
जात्यादितारतम्येन फलानि ७३०

सप्तदशोऽध्यायः १७.

अथ स्थानग्रहवशात्फलानि ७३१
उक्तशास्त्रोपसंहरणम् ७३२

अष्टादशोऽध्यायः १८.

अथ प्रश्नप्रकरणोपक्रमः ७३५
प्रश्नविचारणोपायवर्णनम् .... ,,
ज्ञानोपायवर्णनम् ७३६
सर्वमंत्राणां ऋष्यादिस्मरणं विना सिद्ध्य भाववर्णनम् ७३८
ध्यानप्रकारः .... ,,
गणकाधिकारः ७३९
प्रच्छकलक्षणम् ७४०
दैवज्ञकर्तव्यम् .... ,,
आरूढलग्नगतआयुर्निर्णयःद्रेष्काणफल चं ७४२
मृत्युयोगप्रकारः .... ,,
राहुकालयोगज्ञानम् ४४३
नक्षत्रतिथिवारेषु दिक्क्रमः ७४५
द्वितीयभावादष्टमभावपर्यन्तंरश्मयः. ७४६
मेषादिराशिषु रश्मयः .... ,,
व्याधितस्य प्रश्नकालमरणसूचककालराहु विशेषयोगांतराणि ७४७
अश्विनीक्रमान्नक्षत्रेष्ववयवाः ७४८
प्रष्टुश्चिह्नज्ञानम् ७४९

प्रतिपाद्यविषयाः । पृ० सं०
प्रश्नकालीनलग्नस्थशुभाशुभग्रहविलोकनम् ७४९
प्रश्नकाले जन्मकाले वाऽयनर्तुज्ञानविचारः ७५०
मासातिथिज्ञानम् ७५१
प्रश्नलग्नाद्द्वयोर्वर्षज्ञानम् ७५२
तिथिज्ञानं दिवारात्रिज्ञानं च .... ,,
प्राणज्ञानम् ७५३
प्रश्नकालान्मासराशिलग्नज्ञानम् .... ,,
जन्मर्क्षज्ञानंतत्रभिन्नाभिन्नप्रकाराः . ७५४
लग्नस्थबलवत्वम् ७५६
ग्रहाणां दृष्टिः ७५७
ग्रहाणां स्थानबलं दिग्बलं च .... ,,
प्रतिपाद्यविषयाः । पृ०सं०
अयनबलम् ७५८
पक्षचेष्टादिवारात्रिनिसर्गबलम् .... ,,
दशवर्गबलम् ७५९
प्रश्नलग्नाज्जन्मलग्नम् .... ,,
अध्यायोपसंहारः ७६०

एकोनविंशोऽध्यायः १९.

पूर्वार्धोक्ताऽध्यायानुक्रमः ७६१
उत्तरार्धोक्ताऽध्यायानुक्रमः ७६३

विंशोऽध्यायः २०.

शास्त्रप्रणयनफलम् ७६६
ज्योतिःशास्त्रपरंपरा ७६७

इति श्रीमद्बृहत्पाराशरहोरोत्तरभागस्थविषयानुक्रमाणिका संपूर्णा.

॥ श्रीगणेशाय नमः ॥

अथ
बृहत्पाराशरहोरासारांशः।

पूर्वखण्डम्।

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ अथ मंगलाचरणम् ॥ प्रणम्य गिरिजापतिं हरिविरिंचिदेवैः स्तुतं विलोक्य च महत्तरां सुकृतिवृद्धपाराशरीम् ॥ ततश्च कथयाम्यहं विविधभेदसारांशकं ग्रहादिफलसंग्रहं क्षितिसुरो बुधश्रीधरः ॥ १ ॥

मैत्रेय उवाच।

नमस्तस्मै भगवते बोधरूपाय सर्वदा ॥ परमानंदकंदाय गुरवेऽज्ञानध्वंसिने ॥ २ ॥ इति स्तुत्या सुसंहृष्टो मुनिस्तत्त्वविदां वरः ॥ अथादिदेश सच्छास्त्रं सारं यज्ज्योतिषां शुभम् ॥ ३ ॥

पराशर उवाच।

शुक्लांबरधरं विष्णुं शुक्लांबरधरां गिरम् ॥ प्रणम्य पांचजन्यं च वीणां याभ्यां धृतं द्वयम् ॥ ४ ॥ सूर्यं नत्वा ग्रहपतिं जगदुत्पत्तिकारणम् ॥ वक्ष्यामि वेदनयनं यथा ब्रह्ममुखाच्छ्रुतम् ॥ ५ ॥ शान्ताय गुरुभक्ताय ऋजवेऽर्चितस्वामिने ॥ आस्तिकाय प्रदातव्यं ततः श्रेयो ह्यवाप्स्यति ॥ ६ ॥ न देयं परशिष्याय नास्तिकाय शठाय च ॥ दत्ते प्रतिदिनं दुःखं जायते नात्र संशयः ॥ ७ ॥ एको व्यक्तात्मको विष्णुरनादिः प्रभुरीश्वरः ॥ शुद्धसत्त्वो जगत्स्वामी निर्गुणस्त्रिगुणान्वितः ॥ ८ ॥ संसारकारकः श्रीमान्निमित्तात्मा प्रतापवान् ॥ एकांशेन जगत्सर्वं सृजत्यवति लीलया ॥ ९ ॥ त्रिपादं तस्य देवस्य ह्यमृतं तत्त्वदर्शिनः ॥ विदंति तत्प्रमाणं च सप्रधानं

तथैकपात् ॥ १० ॥ व्यक्ताव्यक्तात्मको विष्णुर्वासुदेवस्तु गीयते ॥ यदव्यक्तात्मको विष्णुः शक्तिद्वयसमन्वितः ॥ ११ ॥ व्यक्तात्मकस्त्रिशक्तीभिः संयुतोऽनंतशक्तिमान् ॥ सत्त्वप्रधाना श्रीशक्तिर्भूशक्तिश्च रजोगुणा ॥ १२ ॥ शक्तिस्तृतीया या प्रोक्ता नीलाख्या ध्वांतरूपिणी ॥ वासुदेवश्चतुर्थोऽभूच्छ्रीशक्त्या प्रेरितो यदा ॥ १३ ॥ संकर्षणश्च प्रद्युम्नोऽनिरुद्ध इति मूर्तिधृक् ॥ तमःशक्त्याऽन्वितो विष्णुर्देवः संकर्षणाभिधः ॥ १४ ॥ प्रद्युम्नो रजसा शक्त्याऽनिरुद्धः सत्त्वया युतः ॥ महान्संकर्षणाज्जातः प्रद्युम्नाद्यदहंकृतिः ॥ १५ ॥ अनिरुद्धात्स्वयं जातो ब्रह्माहंकारमूर्तिधृक् ॥ सर्वेषु सर्वशक्तिश्च स्वशक्त्याऽधिकया युतः ॥ १६ ॥ अहंकारस्त्रिधा भूत्वा सर्वमेतद्विस्तरात् ॥ सात्त्विको राजसश्चैव तामसश्चेदहंकृतिः ॥ १७ ॥ देवा वैकारिकाज्जातास्तैजसादिंद्रियाणि च ॥ तामसाच्चैव भूतानि खादीनि स्वस्वशक्तिभिः ॥ १८ ॥ श्रीशक्त्या सहितो विष्णुः सदा पाति जगत्रयम् ॥ भूशक्त्या सृजते विष्णुर्नीलशक्त्या युतोऽत्ति हि ॥ १९ ॥ सर्वेषु चैव जीवेषु परमात्मा विराजते ॥ सर्वं हि तदिदं ब्रह्मन् स्थितं हि परमात्मनि ॥ २० ॥ सर्वेषु चैव जीवेषु स्थितं ह्यंशद्वयं क्वचित् ॥ जीवांशमधिकं तद्वत्परमात्मांशकः किल ॥ २१ ॥ सूर्यादयो ग्रहाः सर्वे ब्रह्मकामद्विषादयः ॥ एते चान्ये च बहवः परमात्मांशकाधिकाः ॥ २२ ॥ शक्तयश्च तथैतेषामधिकांशाः श्रियादयः ॥ अन्यासु स्वस्वशक्तीषु ज्ञेया जीवांशकाधिकाः ॥ २३ ॥

मैत्रेय उवाच ।

रामकृष्णादयो ये च ह्यवतारा रमापतेः ॥ तेऽपि जीवांशसंयुक्ताः किं वा ब्रूहि मुनीश्वर ॥ २४ ॥

पराशर उवाच ।

रामः कृष्णश्च भो विप्र नृसिंहः सूकरस्तथा ॥ एते पूर्णावताराश्च ह्यन्ये जीवांशकान्विताः ॥ २५ ॥ अवताराण्यनेकानि ह्यजस्य परमात्मनः ॥ जीवानां कर्मफलदो ग्रहरूपी जनार्दनः ॥ २६ ॥ दैत्यानां बलनाशाय देवानां बलवृद्धये ॥ धर्मसंस्थापनार्थाय ग्रहा जाताः शुभाः क्रमात् ॥ २७ ॥ रामोऽवतारः सूर्यस्य चंद्रस्य यदुनायकः ॥ नृसिंहो भूमिपुत्रस्य बुद्धः सोमसुतस्य च ॥ २८ ॥ वामनो विबुधेज्यस्य भार्गवो भार्गवस्य च ॥ कूर्मो भास्करपुत्रस्य सैंहिकेयस्य सूकरः ॥ २९ ॥ केतोर्मीनावतारश्च ये चान्ये तेऽपि खेटजाः ॥ परमात्मांशमाधिकं येषु ते खेचराभिधाः ॥ ३० ॥ जीवांशमधिकं येषु जीवास्ते वै प्रकीर्तिताः ॥ सूर्यादिभ्यो ग्रहेभ्यश्च परमात्मांशनिःसृताः ॥ ३१ ॥ रामकृष्णादयः सर्वे ह्यवतारा भवंति वै ॥ तत्रैव ते विलीयंते पुनः कार्योत्तरे सदा ॥ ३२ ॥ जीवांशानिःसृतास्तेषां तेभ्यो जाता नरादयः ॥ तेऽपि तत्रैव लीयंते तेऽव्यक्ते समयंति हि ॥ ३३ ॥ इदं ते कथितं विप्र सर्वं यस्मिन्भवेदिति ॥ भूतान्यापि भविष्यंति तत्तत्सर्वज्ञतामियात् ॥३४॥ विना तज्ज्योतिषं नान्यो ज्ञातुं शक्नोति कर्हिचित् ॥ तस्मादवश्यमध्येयं ब्राह्मणैश्च विशेषतः ॥ ३५ ॥ यो नरः शास्त्रमज्ञात्वा ज्योतिषं खलु निन्दति ॥ रौरवं नरकं भुक्त्वा चांधत्वं चान्यजन्मनि ॥ ३६ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे शास्त्रावतारणं नाम प्रथमोऽध्यायः ॥ १ ॥

अथ जन्मलग्नकुंडलीभावविलोकनार्थं स्वरूपमाह ।

तिर्यकपंच तथोर्ध्वगाश्च लिखिता रेखाश्च राश्यात्मकं चक्रं स्यात्पुरुहूतादिग्ग्रहमुखा लग्नादिराशिग्रहाः ॥ संलेख्योदयचंद्रकारकपदारूढात्महोराघटी वर्गाणां च दशोक्तलग्नपवशात्तत्तत्फलं वक्ष्याति ॥ १ ॥

पराशर उवाच ।

कालात्मा च दिवानाथो मनः कुमुद्बांधवः ॥ सत्त्वं कुजो विजानीयाद्बुधो वाणीप्रदायकः ॥२॥ देवेज्यो ज्ञानसुखदो भृगुर्वीर्यप्रदायकः॥ विचार्यतामिदं सर्वं छायासूनुश्च दुःखदः ॥ ३ ॥ राजानौ भानुहिमगू नेता ज्ञेयो धरात्मजः ॥ बुधो राजकुमारश्च सचिवौ गुरुभार्गवौ ॥४॥ प्रेष्यको रविपुत्रश्च सेना स्वर्भानुपुच्छकौ ॥ एवं क्रमेण वै विप्र सूर्यादीनि विचिंतयेत् ॥५॥ रक्तश्यामो दिवाधीशो गौरगात्रो निशाकरः ॥ अत्युच्चांगो रक्तभौमो दूर्वाश्यामो बुधस्तथा ॥ ६ ॥ गौरगात्रो गुरुर्ज्ञेयः शुक्रः श्यामस्तथैव च ॥ कृष्णदेहो रवेः पुत्रो ज्ञायते द्विजसत्तम ॥ ७ ॥ वह्न्यंबुशिखिकाविष्णुबिडौजशचिका द्विज ॥ सूर्यादीनां खगानां च नाथा ज्ञेयाः क्रमेण च ॥ ८ ॥ क्लीबौ द्वौ सौम्यसौरी च युवतींदुभृगू द्विज ॥ नराः शेषाश्च विज्ञेया भानुभौमो गुरुस्तथा ॥९॥ अग्निभूमिनभस्तोयवायवः क्रमतो द्विज ॥ भौमादीनां ग्रहाणां च तत्त्वास्वामी प्रकीर्तिताः ॥१०॥ गुरुशुक्रौ विप्रवर्णौ कुजार्कौ क्षत्रियौ द्विज ॥ शशिसौम्यौ वैश्यवर्णौ शनिः शूद्रो द्विजोत्तम ॥ ११ ॥ चंद्रसूर्यगुरुसौम्या भृग्वारशनयो द्विज ॥ सत्त्वं रजस्तम इति स्वभावो ज्ञायते क्रमात् ॥ १२ ॥ मधुपिंगलदृक्सूर्यश्चतुरस्रः शुचिर्द्विज ॥ पित्तप्रकृतिको धीमान्पुमानल्पकचो द्विज ॥ १३ ॥ बहुवातकफः प्राज्ञश्चंद्रो वृत्ततनुर्द्विज ॥ शुभदृङ् मधुवाक्यश्च चंचलो मदनातुरः ॥ १४ ॥ क्रूररक्तारुणो भौमश्चपलो दारमूर्तिकः ॥ पित्तप्रकृतिकः क्रोधी कृशमध्यतनुर्द्विज॥१५॥ वपुःश्रेष्ठो क्लिष्टवाक्च ह्यतिहास्यरुचिर्बुधः ॥ पित्तवान्कफवान्विप्र मारुतप्रकृतिस्तथा॥१६॥बृहद्गात्रो गुरुश्चैव पिंगलो मूर्द्धजेक्षणः॥ कफप्रकृतिको धीमान् सर्वशास्त्रविशारदः ॥ १७ ॥ सुखी कांतवपुः श्रेष्ठः सुलोचनो भृगोः सुतः ॥ काव्यकर्ता कफाधिक्यानिलात्मा वक्र-

मूर्धजः ॥ १८ ॥ कृशदीर्घतनुः शौरिः पिंगदृष्ट्यनिलात्मकः ॥ स्थूलदंतो लसत्पुंगः खररोमकचो द्विज ॥ १९ ॥ धूम्राकारो नीलतनुर्वनस्थोऽपि भयंकरः ॥ वातप्रकृतिको धीमान् स्वर्भानुः प्रतिमः शिखी ॥ २० ॥ अस्थिरक्तस्तथा मज्जा त्वक्चर्म वीर्यस्नायवः ॥ तासामीशाः क्रमेणोक्ता ज्ञेयाः सूर्यादयो द्विज ॥ २१ ॥ देवालयजलं वह्निक्रीडादीनां तथैव च ॥ कोशशय्या ह्युत्करणामीशाः सूर्यादयः क्रमात् ॥ २२ ॥ अयनक्षणवारर्तुमासपक्षसमा द्विज ॥ सूर्यादीनां क्रमाज्ज्ञेया निर्विशंकं द्विजोत्तम ॥ २३ ॥ कटुलवणतिक्तमिष्टमधुरेक्षुकषायकाः ॥ क्रमेण सर्वे विज्ञेयाः सूर्यादीनां द्विजोत्तम ॥ २४ ॥ बुधेज्यौ बलिनौ पूर्वे रविभौमौ च दक्षिणे ॥ वारुणः सूर्यपुत्रश्च सितचंद्रौ तथोत्तरे ॥ २५ ॥ निशायां बलिनश्चंद्रकुजसौरा भवंति हि ॥ सर्वदा ज्ञो बली ज्ञेयो दिनशेषा द्विजोत्तम ॥ २६ ॥ कृष्णे च बलिनः क्रूराः सौम्या वीर्ययुताः सिते ॥ सौम्यायने सौम्यखेटो बली याम्यायनेऽपरः॥२७॥स्त्रादिवससमहोरामासपर्वः कालवीर्यकम् ॥ शकुबुगुशुचराद्या वृद्धितो वीर्यवत्तराः ॥ २८ ॥ स्थूलान् जनयति सूर्यो दुर्भगान्सूर्यपुत्रकः ॥ क्षीरोपेतांस्तथा चंद्रः कटुकाद्यान्धरासुतः ॥ २९ ॥ गुरुज्ञौ सफलान्विप्र पुष्पवृक्षान् भृगोः सुतः ॥ नीरसान्सूर्यपुत्रश्च एवं ज्ञेयाः खगा द्विज ॥ ३० ॥ राहुश्चांडालजातिश्च केतुर्जात्यंतरस्तथा ॥ शिखिस्वर्भानुमंदानां वल्मीकं स्थानमुच्यते ॥ ३१ ॥ चित्रकंथा फणींद्रस्य केतोश्छिद्रयुतो द्विज ॥ सीसं राहोर्नीलमणिः केतोर्ज्ञेयो द्विजोत्तम ॥ ३२ ॥ गुरोः पीतांबरं विप्र भृगोः क्षौमं तथैव च ॥ रक्तक्षौमं भास्करस्य इंदोः क्षौमं सितं द्विज ॥ ३३ ॥ बुधस्य तु कृष्णक्षौमं रक्तचित्रं कुजस्य च ॥ वस्त्रं चित्रं शनेर्विप्र पट्टवस्त्रं तथैव च ॥ ३४ ॥ भृगोर्ऋतुर्वसंतश्च कुजभान्वोश्च ग्रीष्मकः ॥ चंद्रस्य वर्षा विज्ञेया शरच्चैव तथा विदः ॥३५॥ हेमंतोऽपि गुरोर्ज्ञेयः शनेस्तु शिशिरो

द्विज ॥ अष्टौ मासाश्च स्वर्भानोः केतोर्मासत्रयं द्विज ॥ ३६ ॥ राह्वारपंगुचंद्राश्च विज्ञेया धातुखेचराः ॥ मूलग्रहौ सूर्यशुक्रौ अपराजीवसंज्ञकाः ॥ ३७ ॥ गृहेषु मंदो वृद्धोऽस्ति आयुर्वृद्धिप्रदायकः ॥ नैसर्गिके बहुसमान्ददाति द्विजसत्तम ॥ ३८ ॥

अथ पंचांगस्थितग्रहेषु चालनमाह ।

स्वेष्टादग्रे भवेत्पंक्तिः पंक्तौ स्वेष्टं विशोधयेत् ॥ स्वेष्टात् पृष्ठे भवेत्पंक्तिः स्वेष्टे पंक्तिं विशोधयेत् ॥ ऋणं धनं तथा ज्ञेयं चालने विधिरेव हि ॥ ३९ ॥

अथ ग्रहाणां तात्कालिकीकरणमाह ।

गतगम्यदिनाहतद्युभुक्तेः खरसाप्तांशवियुग्युतो ग्रहः स्यात् ॥ तत्कालभवस्तथा घटिघ्नाः खरसैर्लब्धकलोनसंयुतः स्यात् ॥ ४० ॥

टीका ।

गतगम्येति । यस्मिन् दिवसे ग्रहसाधनं तस्माद्दिवसात् गतगम्या ये दिवसास्तैराहता गुणिता या द्युभुक्तिस्तत्सकाशात्खरसैः ६० षष्ट्याप्ता लब्धायेंऽशास्तैर्वियुक् रहितो युक् युतो ग्रहः कार्यः । गताश्चेद्दिवसास्तदा रहितः कार्यः । आगताश्चेद्दिवसास्तदा युक्तः कार्य इत्यर्थः । सः तत्कालभवस्तद्दिनजो ग्रहः स्यात् । तथा गतगम्यघटीघ्नाः गतेः सकाशात्खरसैर्लब्धः कलाभिरूनः युक्तः कार्यः स तात्कालिकः स्यादित्यर्थः ॥ ४० ॥

अथ भयातभभोगसाधनम् ।

इष्टमधिकं नक्षत्रन्यूनं तदा इष्टादित्यनेन ज्ञेयम् । इष्टाद्विहीनं च दिनर्क्षनाडी भयातसंज्ञा भवतीह तस्य दिनर्क्षनाडी खरसेषु शुद्धा निजर्क्षयुक्तः सहितं भभोगः ॥ ४१ ॥ इष्टं न्यूनं नक्षत्रमधिकं

तदा गतर्क्षनाड्येति ज्ञेयम् ॥ गतर्क्षनाडीखरसेषु शुद्धा सूर्योदयादिष्टघटीषु युक्ताः ॥ भयातसंज्ञा भवतीह तस्य निजर्क्षनाडीसहिते भभोगः ॥ ४२ ॥

अथ चंद्रस्पष्टमाह ।

गतर्क्षं षष्टिगुणितं भभोगेन च भाजितम् ॥ दस्रादिषष्टिगुणितैर्लब्धं तत्र सुयोजयेत् ॥ ४३ ॥ तच्चापि द्विगुणं कृत्वा ह्यंकेन विभजेत्पुनः ॥ मृगांकलब्धमंशादीन्सुसाधय द्विजोत्तम ॥ ४४ ॥ खखशून्याष्टवेदेन गतिर्भभोगभाजिता ॥ एवं चंद्रस्य विज्ञेया रीतिः स्पष्टतरा बुधैः ॥ ४५ ॥

अथोच्चनीचग्रहाः ।

अजो वृषो मृगः कन्याकुलीरझषतौलिकाः ॥ सूर्यादीनां क्रमादेतास्तुंगसंज्ञाः प्रकीर्तिताः ॥ नीचास्तत्सप्तमा ज्ञेया ग्रहा नीचा विनिश्चिताः ॥ ४६ ॥ सूर्यस्य भागे दशमे तृतीये चंद्रस्य जीवस्य तु पंचमेंऽशे ॥ सौरस्य विंशे त्वधिसप्तकेतोर्विद्याद्भृगोः पंचदशे बुधस्य ॥ ४७ ॥ भौमस्य विंशेऽष्टयुते परोच्चैर्विंशल्लवे सूर्यसुतस्य नीचाः ॥ ४८ ॥

अथ मूलत्रिकोणमाह ।

विंशतिरंशाः सिंहे कोणमपरे स्वभवनमर्कस्य ॥ उच्चं भागत्रितय वृषमिंदोः स्यात्त्रिकोणमपरेंशाः ॥ ४९ ॥ द्वादशभागा मेषे त्रिकोणमपरे स्वभे तु भौमस्य ॥ उच्चफलं कन्यायां बुधस्य तिथ्यंशकैः सदा चिंत्यम् ॥ ५० ॥ परतस्त्रिकोणजाते पंचभिरंशैः स्वराशिजं परतः ॥ दशभिर्भागैर्जीवत्रिकोणफलं स्वभं परं चापे ॥ ५१ ॥ शुक्रस्य तु तिथयोंऽशास्त्रिकोणमपरे तुले स्वराशिश्च ॥ कुंभे त्रिकोणनिजभ रावजस्य रविर्यथा सिंहे ॥ ५२ ॥

अथ मित्रामित्रविधिमाह ।

रवेः समो ज्ञः सितसूर्यपुत्रावरी, परे ये सुहृदो वरायः ॥ चंद्रस्य नारी, रविचंद्रपुत्रौ मित्रे, समाः शेषनभश्चराः स्युः ॥ ९३ ॥ समौ सितार्कौ, शशिजश्च शत्रुर्मित्राणि शेषाः पृथिवीसुतस्य ॥ शत्रुः शशी सूर्यसितौ च मित्रे, समाः परे स्युः शशिनंदनस्य ॥ ९४ ॥ गुरोर्ज्ञशुक्रौ रिपुसंज्ञकौ तु, शनिः समोऽन्ये सुहृदो भवंति ॥ शुक्रस्य मित्रे बुधसूर्यपुत्रौ, समौ कुजार्यावितरावरी तौ ॥ ९५ ॥ शनेः समो वाक्पतिरिंदुसूनुशुक्रौ च मित्रे, रिपवः परेऽपि ॥ ध्रुवं ग्रहाणां चतुराननेन शत्रुत्वमित्रत्वसमत्वमुक्तम् ॥ ९६ ॥ दशायबंधुसहजस्वांत्यस्थास्ते परस्परम् ॥ सुहृद्भवेदाधिसुहृत्समो मित्रं परः समः ॥ ९७ ॥ तथा त्रिकोणषष्ठाष्टसप्तैकस्थितखेचराः ॥ अन्योन्यं रिपुतां यांति तत्कालं तानि वै मुने ॥ ९८ ॥

तात्कालमैत्रीचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.
चं. मं. शु.	सू. मं. बु. शु.	बृ. श. चं. र.बु.	चं. शु. मं.	श. मं.	चं. र. बु.	मं. बृ.
बु. बृ. श.	बृ. श.	शु.	सू. बृ. श.	शु. चं. र. बु.	श. मं. बृ.	शु. चं. र. बु.
मित्र.	२।३।४।१०।११।१२।					
शत्रु.	१।५।६।७।८।९।					

निसर्गमैत्रीचक्रम्.

सू.	चं.	मं.	बु.	बृ.	शु.	श.	ग्रह
चं. मं. गु.	सू. बु.	र. चं. गु.	र. शु.	र. चं. मं.	बु. श.	बु. शु.	मित्र
बु.	मं. गु. शु. श.	शु. श.	मं. गु. श.	श.	मं. गु.	गुरु.	सम.
शु. श.	०	बु.	चं.	बु. शु.	र. चं.	र. चं. मं.	शत्रु.

अथ पंचधामैत्रीचक्रम्.

सू.	चं.	मं.	बु.	बृ.	शु.	श.	ग्रह.
चं. मं	सू. शु.	बृ. सू. चं.	शु.	मं.	बु.	०	ऽति. मि.
०	मं शु.	श.	मं.	श.	०	बृ.	मि.
शु. बृ.	०	बु.	चं. र.	चं. र.	चं. र.	मं. शु. बु.	सम.
बु.	बृ. श.	शु.	बृ. श.	०	मं. बृ.	०	शत्रु.
श.	०	०	०	०	शु. बु.	र. चं.	ऽति. शत्रु.

अस्योदाहरणम् । उक्तस्थानादभीष्टग्रहः मित्रशत्रुसंज्ञो यथा सूर्यस्य चंद्रभौमभृगवो मित्राणि, सौम्यगुरुशनयः शत्रवः एवं सर्वत्र ज्ञेयम् । तात्कालिकनैसर्गिकमैत्रीचक्रयोरुभयोः संमीलितयोर्योगो भवति तदा पंचधा मैत्री भवति । मित्रे मित्रेऽतिमित्रम् । समे मित्रे मित्रम् । शत्रुमित्रे समम् । समशत्रु शत्रुः । शत्रुशत्रुरति शत्रुः । यथा सूर्यस्य चंद्रभौमावतिमित्रे गुरुभृगू समौ, सौम्य शत्रुः, शनिरतिशत्रुः । एवं सर्वत्र ज्ञेयम् ।

अथ शुभबलचक्रम्.

उच्च.	मूल.	स्व.	मित्र.	सम.	नीच.	शत्रु.
१	०	०	०	०	०	०
०	४५	३०	१५	७	०	०
०	०	०	०	३०	०	०
०	०	०	०	०	०	०

अथाशुभबलचक्रम्.

उच्च.	मूल.	स्व.	मित्र.	सम.	नीच.	शत्रु.
०	०	०	०	०	१	१
०	७	४५	३०	४५	०	०
०	३०	०	०	०	०	०
०	०	०	०	०	०	०

अथ ग्रहाणां बलमाह ।

स्वोच्चे शुभं बलं पूर्णं, त्रिकोणे पादवर्जितम् ॥ स्वर्क्षे दलं मित्र-

गेहे पादमात्रं प्रकीर्तितम् ॥ ५९ ॥ पादार्धं समभे प्रोक्तं व्यर्थं नीचास्तशत्रुगे ॥ तद्वद्दुष्टबलं ब्रूयाद्व्यत्ययेन विचक्षणः ॥ ६० ॥

अथ धूमाद्यप्रकाशग्रहस्पष्टीकरणम् ।

नखालिप्ताधिके धूमे कृतिलिप्ताविहीनकाः ॥ केतौ कार्या गुरोर्वाक्याद्दक्षपादावसानकाः ॥ ६१ ॥ चत्वारो राशयो भानौ युक्तभागास्त्रयोदश ॥ धूमो नाममहादोषः सर्वकर्मविनाशकः ॥ ६२ ॥ धूमो मंडलतः शुद्धो व्यतीपातोत्र दोषदः ॥ स षट्भेत्र व्यतीपाते परिवेशस्तु दोषकृत् ॥ ६३ ॥ परिवेषश्च्युतश्चक्रादिंद्रचापश्च दोषदः ॥ अत्यष्टचंशयुते चापे केतुखेटः परोविषम् ॥ ६४ ॥ एकराशियुते केतौ सूर्यः स्यात्पूर्ववत्समः ॥ अप्रकाशग्रहाश्चैते दोषाः पापग्रहा स्मृताः ॥ ६५ ॥

अस्योदाहरणम् ।

सूर्य २। ४। २८। १ चतुर्भयनसाहितः सत्र्यंशैः त्रयोदशभागैरन्वितः ४। १३। २० अयं धूमः ६। १७। ४८। १ पूर्वोक्त धूमः मंडलतो १२ द्वादशराशितः शुद्धोऽयं व्यतीपातः ५। १२। ११। ५९ अयं षट्राशियुक्तः परिवेषः ११। १२। ११। ५९। अयं चक्रात् १२ च्युतः इंद्रचापः १७। ४८। १ अयं अत्यष्टचंशः सप्तदशांशा वित्र्यंशास्तैः १६। ४० भागैरन्वितोयं ध्वजः १। ४। २८। १ एकराशियुतो ध्वजः पूर्वतुल्यो रविः स्यादित्यर्थः २। ४। २८। १॥ १। २। ३। ४। ५॥

अप्रकाशिकक्षेपकाः स्युः

धूमः		व्यतीपातः	परिवेषः	इन्द्रधनुः	ध्वजः
रा.	१४	१२	६	१२	०
अंश.	१३	०	०	०	१६
क.	२०	०	०	०	४०

अप्रकाशिकग्रहाः स्पष्टाः स्युः

धूमः	व्यतीपातः	परिवेषः	इन्द्रधनुः	ध्वजः	गुलिकः	प्राणपदः
६	५	११	०	१	५	३
१७	१२	१२	१७	४	६	४
४८	११	११	४८	२८	०	०
१	५९	५९	१	१	०	०

अथ किंचिद्धूमादिकफलविचारमाह ।

भान्विंदुलग्नगेष्वेषु वंशायुर्ज्ञाननाशनम् ॥ एषां बह्वर्कदोषाणां स्थितिः पद्मासनोदिता ॥ ६६ ॥

टीका ।

भान्विति । जन्मकालीनसूर्यचंद्रलग्नानां पृथक परिवेषादिभिस्त्रिभिस्त्रिभिर्योगवशात्फलत्रयनाशनं द्वयोर्द्वयमेकस्मिन्नेकफलनाशः एवं यथा यो य आधिक्ययोगस्तथाऽनिष्टफलाधिक्यमिति भावः ॥ ६६ ॥

अथ जन्मकाल इष्टलग्ननिश्चयार्थं गुलिकसाधनमाह ।

रविवारादि शन्यंतं गुलिकादि निरूप्यते ॥ दिवसानष्टधा कृत्वा वारेशाद्गणयेत्क्रमात् ॥ ६७ ॥ अष्टमांशो निरीशः स्याच्छन्यंशो गुलिकः स्मृतः ॥ रात्रिरप्यष्टधा भक्ता वारेशात्पंचमादितः ॥ ६८ ॥ गणयेदष्टमः खंडो निष्पत्तिः परिकीर्तितः ॥ शन्यंशे गुलिकः प्रोक्तो गुर्वंशे यमघंटकः ॥ ६९ ॥ भौमांशे मृत्युरादिष्टो रव्यंशे कालसंज्ञकः ॥ सौम्यांशेऽर्द्धप्रहरकः स्पष्टकर्मप्रदेशकः ॥ ७० ॥

टीका ।

रव्यादिसप्तवारेषु दिनमानमष्टधा विभज्य तत्तद्वारेशं प्रथमखंडाधिपं कृत्वाऽग्रिमखंडेषु तत्तद्वारेशादग्रिमग्राहन् क्रमेणेशत्वेन जानीयात् । अष्टमः खंडस्तु निरीशः । एवं च सप्तसु वारेषु शन्यंशो गुलिकनामा । तथा च रविवारे सप्तमः सोमे षष्ठः भौमे पंचमः बुधे चतुर्थः गुरौ तृतीयः शुक्रे द्वितियः शनौ प्रथमः खंडो गुलिको भवति । सप्तस्वपि वारेषु रात्रिमानमष्टधा विभज्य तद्वारेशात्पंचमाद्याः खंडाधिपाः ज्ञेयाः । रात्रावप्यष्टमः खंडो निरीशः । एवं च रविरात्रौ तृतीयः खंडः, सोमे द्वितीयः भौमे प्रथमः बुधे सप्तमः गुरौ षष्ठः शुक्रे पंचमः शनौ चतुर्थः खंडो गुलिको भवति । एवं सर्वदिने रात्रौ च गुरुखंडो यमघंटनामा बुधखंडोऽर्द्धप्रहरकाख्याः रव्यंशः कालसंज्ञः भौमांशो मृत्युनामेति ज्ञेयम् स्पष्टकर्म इति ॥ ७० ॥

अस्योदाहरणम् ।

दिनमानम् २३।१४ अष्टधा विभज्य ४। ९। १५ लब्धं सौम्यादिने जन्म तर्हि सौम्यवारगुणकेन ४ गुण्यं १६। ३७ गुलिकेष्टमस्योपरि लग्नानयनरीत्या नीतं गुलिकलग्नं ५। ६ स्पष्टम् । एवं सर्वत्र ज्ञेयम् । ७।८।९।१०।

गुलिकगुणकध्रुवांकाः स्युः

रवि	चंद्र	मंगल	बुध	गुरु	शुक्र	शनि	ग्रहाः
७	६	५	४	३	२	१	दिवा.
३	२	१	७	६	५	४	रात्रिः

अथ प्राणपदसाधनमाह ।

घटी चतुर्गुणा कार्या तिथ्या १५ तैश्च पलैर्युता ॥ दिन[१२]करेणापहृतं शेषं प्राणपदं स्मृतम् ॥ ७१ ॥ शेषात्पलांताद्द्विगुणी विधाय राश्यंशसूर्यर्क्षनियोजिताय ॥ तत्रापि तद्राशिचरान् क्रमेण लग्नांशप्राणांशपदैक्यता स्यात् ॥ ७२ ॥ पुनः । कोणात् क्रमांतरादीनां तथा प्राणपदादपि ॥ स्वेष्टकालं पलीकृत्य तिथ्याप्तं भादिकं च यत् ॥ ७३ ॥ चरागद्विभगे भागे भानौ युङ्नवमे सुते ॥ स्फुटं प्राणपदं तस्मात्पूर्ववच्छोधयेत्तनुः ॥ ७४ ॥ विना प्राणपदाच्छुद्धो गुलिकाद्वा निशाकरात् ॥ तदशुद्धं विजानीयात्स्थावराणां तदैव हि ॥ ७५ ॥ द्वयोर्हीनबलेऽप्येवं गुलिकात्परिचिंतयेत् ॥ तस्मात्तत्सप्तमस्थानात्तदंशाच्च कलत्रतः ॥ ७६ ॥ तत्रैव तत्रिकोणे वा जन्मलग्नं विनिर्दिशेत् ॥ मनुष्याणां पशूनां च द्वितीये दशमे रिपौ ॥ ७७ ॥ तृतीये मदने लाभे विहंगानां विनिर्दिशेत् ॥ कीटसर्पजलस्थानां शेषस्थानेषु संस्थितः ॥ ७८ ॥ इ० बृ० हो० पू० सा० द्वितीयोऽध्यायः ॥ २ ॥

अस्योदाहरणम् ।

इष्टं ६ । १७ चतुर्गुणं २५ । ८ पंचदशभक्तशेषं । १० । ८ शेषं पलं द्विगुणीकृतं १० । १६ यदा दिनेशेनाधिष्ठितश्चरराशयस्तदा तत्रैव गणनीयम् । यदा स्थिरद्विस्वभावराशौ सूर्ये स्थिते सति तदा कोणभं सः तेषां मध्ये यो वै चरराशिस्तस्मात् क्रमगणनया पंचदशपलात्मकं प्राणपदं भवतीत्यर्थः । अत्र तु सूर्ये द्विस्वभावराशौ स्थिते सति सूर्यः २ । ४ । २८ । १ मिथुनात्पंचमं ७ कोणभं तस्माद्गणनीयम् ३ । ४ प्राणपदमागमं सूर्यांश ४ प्राणांशः द्वयोरैक्यं लग्नांशप्राणांशैक्यता तदा लग्नागमं भवति । ननु सर्वत्र ज्ञेयम् ॥ ७८ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे ग्रहप्रादुर्भूताध्यायो द्वितीयः ॥ २ ॥

पराशर उवाच ।

मेषो वृषश्च मिथुनः कर्कसिंहकुमारिकाः ॥ तुलालिधनुषो नक्रे कुंभमीनास्ततः पराः ॥ १ ॥ अहो रात्राद्यंतलोपाद्धोरेति प्रोच्यते बुधैः ॥ तस्य हि ज्ञानमात्रेण जातकर्मफलं वदेत् ॥ २ ॥ पदव्यक्तात्मको विष्णुः कालरूपो जनार्दनः ॥ तस्यांगानि निबोध त्वं क्रमान्मेषादिराशयः ॥ ३ ॥ शीर्षाननौ तथा बाहू हृत्क्रोडकटिबस्तयः ॥ गुह्योरुयुगुले जानुयुग्मे वै जंघके तथा ॥ ४ ॥ चरणौ द्वौ तथा लग्नात् ज्ञेयाः शीर्षादयः क्रमात् ॥ चरास्थिरद्विस्वभावाः क्रूराक्रूरौ नरस्त्रियौ ॥ ५ ॥ पित्तानिलत्रिधात्वैक्यं श्लेष्मिकाश्च क्रियादयः ॥ रक्तवर्णो बृहद्गात्रश्चतुष्पाद्रात्रिविक्रमी ॥ ६ ॥ पूर्ववासी नृपज्ञातिः शैलचारी रजोगुणी ॥ पृष्ठोदयी पावकी च मेषराशिः कुजाधिपः ॥ ७ ॥ श्वेतः शुक्राधिपो दीर्घश्चतुष्पाच्छर्वरीबली ॥ याम्येट् ग्राम्यो वणिग्भूमिरजीपृष्ठोदयो वृषः ॥ ८ ॥ शीर्षोदयी नृमिथुनं सगदं च सवीणकम् ॥ प्रत्यक्शमी द्विपाद्रात्रिबली ग्राम्यो व्रजोऽनिली ॥ ९ ॥ समगात्रो हरिद्वर्णो मिथुनाख्यो बुधाधिपः ॥ पाटलो वनचारी च ब्राह्मणो निशिवीर्यवान् ॥ १० ॥ बहुपटुतरः स्थौल्यतनुः सत्त्वगुणी जली ॥ पृष्ठोदयी कर्कराशिर्मृगांकोऽधिपतिः स्मृतः ॥ ११ ॥ सिंहः सूर्याधिपः सत्त्वी चतुष्पात्क्षत्रियो बली ॥ शीर्षोदयी बृहद्गात्रः पांडुः पूर्वेड् द्युवीर्यवान् ॥ १२ ॥ पार्वतीयाथ कन्याख्या राशिर्दिनबलान्विता ॥ शीर्षोदया च मध्यांगा द्विपाद्याम्यचरा च सा ॥ १३ ॥ स सस्यदहना वैश्या चित्रवर्णा प्रभंजिनी ॥ कुमारी तमसा युक्ता बालभावा बुधाधिपः ॥ १४ ॥ शीर्षोदयी द्युवीर्याढ्यस्तथा कृष्णो रजोगुणी ॥ पंचमोद्भूचरो घाती शूद्रो मध्यतनुर्द्विपात् ॥ १५ ॥ शुक्रोऽधिपोऽथ स्वल्पांगो बहुपाद्ब्राह्मणो बली ॥ सौम्यस्थो दिनवीर्याढ्यः पिशंगो जलभूवहः ॥ १६ ॥ रोमस्वाढ्योऽतितीक्ष्णांगो

वृश्चिकश्च कुजाधिपः ॥ पृष्ठद्वयी त्वथ धनुर्गुरुस्वामी च सात्त्विकः ॥ १७ ॥ पिंगलो निशिवीर्याढ्यः पावकः क्षत्रियो द्विपात् ॥ आदावंते चतुष्पादः समगात्रो धनुर्धरः ॥ १८ ॥ पूर्वस्थो वसुधाचारी तेजस्वान्पृष्ठताद्भमा ॥ मदाधिपस्तमी भौमी याम्येट् च निशि वीर्यवान् ॥ १९ ॥ पृष्ठोदयी बृहद्गात्रः कर्बुरो वनभूचरः ॥ आदौ चतुष्पादंते तु विपदो जलगो मतः ॥ २० ॥ कुंभः कुंभी नरो बभ्रुवर्णमध्यतनुर्द्विपात् ॥ द्युवीर्यो जलमध्यस्थो वातशीर्षोदयी तमः ॥ २१ ॥ शूद्रः पश्चिमदशस्य स्वामी दैवाकरिः स्मृतः ॥ मीनौ पुच्छास्यसंलग्नौ मीनराशिर्दिवा बली ॥ २२ ॥ जली सत्त्वगुणाढ्यश्च स्वस्थो जलचरो द्विजः ॥ अपदो मध्यदेही च सौम्यस्थो ह्युभयोदयी ॥ २३ ॥ सुराचार्याधिपश्चास्य राशीनां गदितं मया ॥ त्रिंशद्भगणात्मकः स्थूलसूक्ष्माकरफलाय च ॥ २४ ॥ अथातः संप्रवक्ष्याम शृणुष्व मुनिपुंगव ॥ जन्मलग्नं च संशोध्य निषेकं परिशोधयेत् ॥ २५ ॥ तदहं संप्रवक्ष्याम मैत्रेय त्वं विधारय ॥ जन्मलग्नात् परिज्ञानं निषेकं सर्वजंतुयत् ॥ २६ ॥ यस्मिन् भाते भानावस्थस्तस्य मांदेर्यदंतरम् ॥ लग्नभाग्यांतरं योज्यं यच्च राश्यादि जायते ॥ २७ ॥ मासादिस्तन्मितं ज्ञेयं जन्मतः प्राक् निषेकजम् ॥ यद्यद्दृश्यदलेंगेशस्तदेंदोर्भुक्तभागयुक् ॥२८॥ तत्काले साधयेल्लग्नं शोधयेत्पूर्ववत्तनुः ॥ तस्मात्फलात्फलं वाच्यं गर्भस्थस्य विशेषतः ॥ २९ ॥ शुभाशुभं वदेत् पित्रोर्जीवनं मरणं तथा ॥ एवं निषेकलग्नेन सम्यक् ज्ञेयं स्वकल्पनात् ॥ ३० ॥

अथ लग्नचतुर्थादिद्वादशभावसाधनमाह ।

अयनांशाः ॥ वेदाब्ध्यब्ध्यूनः खरसहृतः शकोऽयनांशाः

टीका ।

शालिवाहनाख्यः इष्टशकः चतुश्चत्वारिंशदधिकचतुःशत ४४४ हीनः । ततः खरस ६० हृतः षष्टिभक्तः फलमयनांशाःस्युः ।

अथ पलभाज्ञानं चरखंडसाधनमाह ।

मेषो रविरयनांशयुतो भवति यद्दिने ॥ शंकुच्छायादिनार्द्धे तु पलभेत्युच्यते बुधैः ॥ ३१ ॥ स्थानत्रये च सा स्थाप्या गुण्या दिग्वसुपालकैः ॥ अंते गुणोद्धृते सद्भिश्चरखण्डः प्रकीर्तितः ॥ ३२ ॥

टीका ।

अयनस्य भागा अयनांशाः पूर्ववक्ष्यमाणास्तैः सहवर्तमानो युक्तः यः सूर्यस्तस्मिन्सूर्ये मेषादिगे राशिभागकलादिना शून्यमिते सति तस्मिन् दिने दिनार्द्धे मध्याह्ने समभुविमध्ये समतलमस्तकपरिधिः सम सिद्धो दंतिदंतजः द्वादशांगुलशंकुर्निवेश्यः । तस्य शंकोर्मध्याह्ने भा छाया या भवति सा पलभा भवेदित्यर्थः । सा पलभा त्रिस्था त्रिषु स्थानेषु तिष्ठतीति त्रिस्था, दशभिः १० वसुभिः अष्टभिः ८ दिक्पालैः १० हता गुणिता ततोऽन्तिमांकः गुणैः त्रिभिः ३ उद्धृता भक्ता सती त्रीणि चरखंडकानि भवंति ।

अथ लंकोदयमाह ।

वसुसागरनेत्राणि पलानि लंकोदये मेषराशौ ॥ शंकोंकनेत्रे वृषभे मिथुनेऽग्नियुङ्नेत्रसंख्यातम् ॥ ३३ ॥ विपर्ययमाग्रिमात्रितये षड्लग्नेष्वेवमेव निर्दिष्टम् ॥ हीनं खंडत्रितयं युक्तःस्वदेशलग्नोऽयम् ॥ ३४॥

अथ लग्नसाधनमाह ।

यस्मिन्काले लग्नं साध्यं च यदा तदा भवेद्द्विज्ञैः ॥ तात्कालिकसूर्यो वै युक्तः कार्योऽथ सायनांशेन ॥ ३५ ॥ तद्राशेर्यत्स्वादेश्य उदयस्तेनाथ भोग्यांशाः ॥ निघ्नेश्च भागास्त्रिंशच्युतास्तथा भुक्तभागाश्च गुण्याः ॥ ३६ ॥ भूताग्न्युद्धृतास्ते च ह्यंकाग्निभाजिता यदि ॥ भोग्यकालोऽथ द्युमणेर्विज्ञेयश्च द्विजोत्तम ॥ ३७ ॥ इति सायनयातांशैर्भुक्तकालो विधीयते ॥ इष्टघट्याः पलैः शोध्यो भोग्य

काल इति स्थितिः ॥ ३८ ॥ हातव्या राश्युदयकालात्तावंत शोधयेदथ । यच्छेषं खगुणघ्नं तद्धृतमशुद्धोदयेनाथ ॥ ३९ ॥ यल्लब्धं च लवाद्यं चायनांशहीनैर्लग्नं स्यात् ॥ जानीहि द्विजसत्तम नतोन्नत प्रकारमेवैतत् ॥ ४० ॥

अस्यार्थः--

यस्मिन्काले लग्नं साध्यते तत्कालीनः सूर्यः सायन अयनांशयुक्तः कार्यः । सूर्यस्य राशिवशाद्यः स्वदेशीयः उदयस्तेन भोग्यांशाः रवेः त्रिंशत् च्युताः भुक्तभागा गुण्याः ते खत्र्युद्धृतास्त्रिंशद्भक्ताः संतः कलाद्यो रवेः भोग्यकालः स्यात् । एवम् अमुनैव प्रकारेण सायनयातांशैः भुक्तभागैः यातको भुक्तकालः स्यात् । स यथा–उदयगुणः भुक्तभागास्त्रिंशद्भक्ताः इति लग्नभुक्तकालार्थमिदमुक्तम् । भोग्यकालः इष्टघटीनां पलेभ्यः शोध्यः । ततः किं विधेयमित्यत आह । तदनु तदनंतरं ग्रहोदयान् तदग्रराश्युदयात्तस्मात्कालाद्धातव्याः हीनाः कार्याः । यावंतः शुद्धयांति तावन्तः शोधयेदित्यर्थः । यच्छेषं तद्गगनगुणघ्नं त्रिंशद्गुणम् अशुद्धेनोदयेन हृतं भक्तं लवाद्यं भागाद्यं यल्लब्धं तदजादिगृहैः अशुद्धपूर्वैः सहितम् अशुद्धोदयतः पूर्वं यावन्तो मेषादयो राशयस्ते तस्य ऊर्ध्वस्थाने स्थाप्याः तदयनांशहीनं सत् तात्कालिकं राश्यादिकं लग्नं भवतीति व्याख्या ।

अथ नतोन्नतसाधनमाह ।

दिनगतघटीभिर्हीनं कार्य्यं मुनिभिश्च दिवसार्द्धम् ॥ पूर्वनतं तद्रात्रौ लक्षणमेतद्धि विज्ञेयम् ॥ ४१ ॥ यदा दिनार्द्धादुपरीष्टकालो भगोदयादिष्टघटीषु शोध्यम् ॥ तदा दिनार्द्धस्य नतं परं तद्धयमुं च सर्वं खलु बोधहेतुम् ॥ ४२ ॥ रात्र्यर्द्धादुपरिचेत्स्यादिष्टकालो विचक्षण ॥ सूर्यास्तेष्टघटीशुद्धं रात्र्यर्द्धं पाश्चिमं नतम् ॥ ४३ ॥

अस्यार्थः--

दिनखंडम् दिनार्द्धं दिनगतघटीभिर्हीनम् कार्यम् रात्रौ पूर्वनतं स्यात् एतल्लक्षणम् दिनार्द्धपूर्वमिष्टकाले सति यदा दिनार्द्धादुपरीष्टकालस्तदा सूर्योदयादिष्टघटीषु शुद्धं शोध्यम् द्युखंडं दिनार्द्धदिवसे अपरं नतं पश्चिमनतं स्यात् तथा रात्र्यर्द्धादुपरीष्टकाले सति सूर्यास्तादिष्टघटीषु शोध्यं रात्र्यद्ध रात्रौ पश्चिमं नतं स्यात् ॥ ४१ ॥ ४२ ॥ ४३ ॥

अथ चतुर्थदशमसाधनमाह ।

एवं लंकोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात् ॥ पूवपश्चान्नताद्न्यत्प्राग्वत्तद्दशमं भवत् ॥ ४४ ॥

अस्यार्थः--

एवमनया रीत्या लंकोदयैः कृत्वा रवेर्भुक्तं भोग्यं शोध्यं तत्पलीकृतात् ॥ पूर्वपश्चिमनताच्छोध्यम् अन्यदवशिष्टं यत्कर्म तत्प्राग्वत्पूर्वरीत्या लग्नवत्साध्य तद्दशमं भवेत् लग्नखे षड्युक्ते सति जायातुर्यौ भवतः ॥ ४४ ॥

अथ भावसंधिमाह ।

लग्नं सुखात्सुखं कामात्कामं खात्खं च लग्नतः ॥ अंशमेकं द्विगुणितं युञ्ज्याल्लग्नादिषु क्रमात् ॥ ४५ ॥ पूर्वापरयुतेरर्द्धं साधः स्याद्भावयोर्द्वयोः ॥ एवं द्वादशभावाः स्युर्भवन्ति हि ससंधयः ॥ ४६ ॥

अस्यार्थः--

लग्नतः खं खात् कामं कामात् सुखं सुखात् लग्नं चकारात्सर्वत्रैव ऊनं कार्यम् यथा सुखाल्लग्नमूनं तस्य शेषांकस्य त्र्यंशः त्रिभागो ग्राह्यस्त-

देकेन गुणितं यदंकं तल्लग्ने योज्यं तदा द्वितीयभावो भविष्यति पुनः त्र्यशं द्विगुणितं कृत्वा लग्ने योज्यं तदा तृतीयभावो भविष्यति एवं सर्वत्र बोध्यम् एवं द्वादश भावाः स्युः । पूर्वापरयुते लग्नद्वितीययोर्योगस्तस्यार्द्धं द्वयोर्भावयोः संधिः स्यात् हि इति निश्चयेन संधयो भवंतीत्यर्थः ॥ ४५ ॥ ४६ ॥

अथ भोग्यकालादल्पेष्टकाले सति लग्नसाधनम् ।

भोग्यतोऽल्पेष्टकालात्खरामाहतात्स्वोदयाप्तांशयुग्भास्करः स्यात्तनुः ॥

अस्यार्थः--

भोग्यतो भोग्यकालतः अल्पेष्टकालात्खरामाहतात्त्रिंशद्गुणितात्स्वोदयेन स्वराश्युदयेन हतात् तस्माद्ये आप्तांशा लग्नभास्तद्युक्तो भास्करस्तनुर्लग्नं स्यात् ।

अथ लग्नपत्रभावपत्रमाह ।

सूर्यराश्यंशमानेन फलं ग्राह्यं च कोष्ठकम् ॥ इष्टघट्या समायुक्तं लग्नं तात्कालिकं भवेत् ॥ ४७ ॥

लग्नपत्रस्योदाहरणम् ।

यथा सूर्यः २ । ४ लग्नपत्रकोष्ठाङ्कः १२ । ५४ इष्टघटी ६ । १७ उभयोर्योगः १९ । ११ पुनः लग्नपत्रमवलोकनेन ३ । ८ लग्नमागतम् ॥

भावपत्रस्योदाहरणम् ।

सूर्यः २ । ४ भावपत्रकोष्ठांकः १४ । १७ पूर्वनतं १० । २० अयं त्रिंशच्च्युतोन्नतांकं १९ । ४० उभयोर्योगः ३३ । ५७ पुनः भावपत्रमवलोकनेन ६ । ३ जातं चतुर्थभवनमेवं सर्वत्र बोध्यम् ॥ ४७ ॥

अथ लग्नपत्रमिदमाह.

अंश	म. १	वृ. २	मि. ३	क. ४	सिं. ५	क. ६	तु. ७	वृ. ८	ध. ९	म. १०	कुं. ११	मी. १२
१	२ ५४	७ १४	१२ १२	१७ ४१	२३ १४	२८ ३५	३३ ५३	३९ २१	४४ ५५	५० १२	५४ ५१	५८ ५७
२	३ २	७ २३	१२ २३	१७ ५३	२३ २५	२८ ४६	३४ ४	३९ ३२	४५ ६	५० २३	५५ ०	५९ ४
३	३ १०	७ ३२	१२ ३३	१८ ४	२३ ३४	२८ ५६	३४ १४	३९ ४३	४५ १८	५० ३३	५५ ९	५९ १२
४	३ १८	७ ४१	१२ ४३	१८ १५	२३ ४७	२९ ७	३४ २५	३९ ५४	४५ २९	५० ४३	५५ १८	५९ २०
५	३ २६	७ ४९	१२ ५४	१८ २६	२३ ५८	२९ १८	३४ ३६	४० ५	४५ ४०	५० ५४	५५ २६	५९ २८
६	३ ३४	७ ५८	१३ ४	१८ ३७	२४ ९	२९ २८	३४ ४६	४० १६	४५ ५१	५१ ४	५५ ३५	५९ ३६
७	३ ४२	८ ७	१३ १४	१८ ४९	२४ २०	२९ ३९	३४ ५७	४० २७	४६ ३	५१ १४	५५ ४४	५९ ४४
८	३ ५०	८ १६	१३ २५	१९ ०	२४ ३१	२९ ४९	३५ ७	४० ३८	४६ १४	५१ २४	५५ ५३	५९ ५२
९	३ ५८	८ २५	१३ ३५	१९ ११	२४ ४२	३० ०	३५ १८	४० ४९	४६ २५	५१ ३५	५६ २	६० ०
१०	४ ७	८ ३५	१३ ४६	१९ २२	२४ ५३	३० ११	३५ २९	४१ ०	४६ ३५	५१ ४४	५६ १०	० ८
११	४ १६	८ ४६	१३ ५७	१९ ३३	२५ ३	३० २१	३५ ४०	४१ ११	४६ ४५	५१ ५३	५६ १८	० १६
१२	४ २५	८ ५६	१४ ९	१९ ४४	२५ १९	३० ३२	३५ ५१	४१ २३	४६ ५६	५२ २	५६ २६	० २४
१३	४ ३४	९ ६	१४ २०	१९ ५५	२५ २९	३० ४३	३६ २	४१ ३४	४७ ६	५२ ११	५६ ३४	० ३२
१४	४ ४३	९ १७	१४ ३१	२० ६	२५ ३५	३० ५३	३६ १३	४१ ४५	४७ १७	५२ २०	५६ ४२	० ४०
१५	४ ५१	९ २७	१४ ४२	२० १७	२५ ४६	३१ ४	३६ २४	४१ ५६	४७ २७	५२ २८	५६ ५०	० ४८
१६	५ ०	९ ३७	१४ ५३	२० २८	२५ ५६	३१ १४	३६ ३५	४२ ७	४७ ३७	५२ ३७	५६ ५८	० ५६
१७	५ ९	९ ४८	१५ ५	२० ३९	२६ ७	३१ २५	३६ ४६	४२ १९	४७ ४८	५२ ४६	५७ ५	१ ३
१८	५ १८	९ ५८	१५ १६	२० ५०	२६ १७	३१ ३५	३६ ५७	४२ ३०	४७ ५८	५२ ५५	५७ १३	१ ११
१९	५ २७	१० ८	१५ २७	२१ १	२६ २८	३१ ४६	३७ ८	४२ ४१	४८ ८	५३ ४	५७ २१	१ १९

९	४ ३८	९ ३७	१५ ०	२० २३	२५ २२	३० ०	३४ ३८	३९ ३७	४५ ०	५० २३	५२ २२	० २
१०	४ ४८	९ ४४	१५ ११	२० ३३	२५ ३१	३० ९	३४ ४८	३९ ४८	४५ ११	५० ३३	५२ ३१	० ९
११	४ ५८	९ ५९	१५ २२	२० ४३	२५ ४१	३० १९	३४ ५८	३९ ५९	४५ २२	५० ४३	५५ ४१	० १९
१२	५ ८	१० ९	१५ ३२	२० ५३	२५ ५०	३० २८	३५ ८	४० ९	४५ ३२	५० ५३	५५ ५०	० २८
१३	५ १८	१० २०	१५ ४३	२१ ३	२५ ५९	३० ३७	३५ १८	४० २०	४५ ४३	५१ ३	५५ ५९	० ३७
१४	५ २८	१० ३१	१५ ५४	२१ १३	२६ ८	३० ४६	३५ २८	४० ३१	४५ ५४	५१ १३	५६ ८	० ४६
१५	५ ३८	१० ४२	१६ ५	२१ २३	२६ १८	३० ५६	३५ ३८	४० ४२	४६ ५	५१ २३	५६ १८	० ५६
१६	५ ४८	१० ५२	१६ १५	२१ ३३	२६ २७	३१ ५	३५ ४८	४० ५२	४६ १५	५१ ३३	५६ २७	१ ५
१७	५ ५८	११ ३	१६ २६	२१ ४३	२६ ३६	३१ १४	३५ ५८	४१ ३	४६ २६	५१ ४३	५६ ३६	१ १४
१८	६ ८	११ १४	१६ ३७	२१ ५३	२६ ४५	३१ २३	३६ ८	४१ १४	४६ ३६	५१ ५३	५६ ४१	१ २३
१९	६ १८	११ २५	१६ ४८	२२ ३	२६ ५५	३१ ३३	३६ १८	४१ २५	४६ ४८	५२ ३	५६ ५१	१ ३३
२०	६ २८	११ ३५	१६ ५८	२२ १३	२७ ४	३१ ४२	३६ २८	४१ ३५	४६ ५८	५२ १३	५७ ३	१ ४३
२१	६ ३८	११ ४६	१७ ९	२२ २३	२७ १२	३१ ५१	३६ ३८	४१ ४५	४७ ९	५२ २३	५७ १३	१ ५१
२२	६ ४६	११ ५७	१७ २०	२२ ३३	२७ २२	३२ ०	३६ ४८	४१ ५७	४७ २०	५२ ३३	५७ २२	२ ०
२३	६ ५८	१२ ८	१७ ३१	२२ ४३	२७ ३२	३२ १०	३६ ५८	४२ ८	४७ ३१	५२ ४३	५७ ३२	२ १०
२४	७ ८	१२ १९	१७ ४२	१२ ५३	२७ ४१	३२ १९	३७ ८	४२ १९	४७ ४२	५२ ५३	५७ ४१	२ १९
२५	७ १७	१२ २९	१७ ५२	२३ २	२७ ५०	३२ २८	३७ १७	४२ २९	४७ ५२	५३ २	५७ ५०	२ २८
२६	७ २७	१२ ४०	१८ ३	२३ १२	२८ ०	३२ ३८	३७ २७	४२ ४०	४८ ३	५३ १२	५८ ०	२ ३८
२७	७ ३७	१२ ५१	१८ १४	२३ २२	२८ ९	३२ ४७	३७ ३७	४३ ५१	४८ १४	५३ २२	५८ ९	२ ४७
२८	७ ४७	१३ २	१८ २५	२३ ३२	२८ १८	३२ ५६	३७ ४८	४२ २	४८ २५	५३ ३२	५८ १८	२ ५६
२९	७ ५७	१३ १२	१८ ३५	२३ ४२	२८ २७	३३ ५	३७ ५७	४३ १२	४८ ३५	५३ ४२	५८ २८	३ ५
३०	८ ८	१३ २३	१८ ४६	२३ ५२	२८ ३७	३३ १५	३८ ७	४३ २४	४८ ४७	५३ ५२	५८ ३७	३ १५

२०	५ ३६	१० १९	१५ ३८	२१ १२	२६ ३९	३१ ५७	३७ १९	४२ ५२	४८ १९	५३ १३	५७ २९	१ २७
२१	५ ४५	१० २९	१५ ४९	२१ २३	२६ ४९	३२ ७	३७ ३०	४३ ३	४८ २९	५३ २२	५७ ३७	१ ३५
२२	५ ५४	१० ३९	१६ ५	२१ ३४	२७ ०	३२ १८	३७ ४१	४३ १५	४८ ३९	५३ ३१	५७ ४५	१ ४३
२३	६ ३	१० ५०	१६ १२	२१ ४६	२७ १०	३२ २८	३७ ५३	४३ २६	४८ ५०	५३ ४०	५७ ५३	१ ५१
२४	६ १२	११ ०	१६ २३	२१ ५७	२७ २१	३२ ३९	३८ ४	४३ ३७	४९ ०	५३ ४९	५८ १	१ ५९
२५	६ २०	११ १०	१६ ३४	२२ ८	२७ ३२	३२ ५०	३८ १५	४३ ४८	४९ १०	५३ ५७	५८ ९	२ ७
२६	६ २९	१६ २१	१६ ४५	२२ १९	२७ ४२	३३ ०	३८ २६	४३ ५९	४९ २१	५४ ६	५८ १७	२ १५
२७	६ ३८	११ ३१	१६ ५७	२२ ३०	२७ ५३	३३ ११	३८ ३७	४४ ११	४९ ३१	५४ १५	५८ २५	० २३
२८	६ ४७	११ ४१	१७ ८	२२ ४१	२८ ३	३३ २१	३८ ४८	४४ २२	४९ ४१	५४ २४	५८ ३३	२ ३१
२९	६ ५६	११ ५२	१७ १९	२२ ५२	२८ १४	३३ ३२	३८ ५९	४४ ३३	४९ ५२	५४ ३३	५८ ४१	२ ३९
३०	७ ५	१२ २	१७ ३०	२३ ३	२८ २५	३३ ४३	३९ १०	४४ ४४	५० २	५४ ४२	५८ ४९	२ ४७

अथ भावपत्रमिदमाह.

अंश	मे. १	वृ. २	मि. ३	क. ४	सिं. ५	क. ६	तु. ७	वृ. ८	ध. ९	म. १०	कुं. ११	मी. १२
१	३ ३४	८ १७	१३ ३४	१८ ५७	२४ २	२८ ४६	३३ २४	३८ १७	४३ ३४	४८ ५७	५४ २	५८ ४६
२	३ ३३	८ २७	१३ ४५	१९ ८	२४ १२	२८ ५५	३३ ३३	३८ २७	४३ ४५	४९ ८	५४ १२	५८ ५५
३	३ ४२	८ ३७	१३ ५५	१९ १८	२४ २२	२९ ४	३३ ४२	३८ ३७	४३ ५५	४९ १८	५४ २२	५९ ४
४	३ ५२	८ ४७	१४ ६	१९ २९	२४ ३२	२९ १४	३३ ५२	३८ ४७	४४ ६	४९ २९	५४ ३२	५९ १४
५	४ १	८ ५७	१४ १७	१९ ४०	२४ ४२	२९ २३	३४ १	३८ ५७	४४ १७	४९ ४०	५४ ४२	५९ २३
६	४ १०	९ ७	१४ २८	१९ ५१	२४ ५२	२९ ३२	३४ १०	३९ ७	४४ २८	४९ ५०	५४ ५२	५९ ३२
७	४ १९	९ १७	१४ ३८	२० १	२५ २	२९ ४१	३४ १९	३९ १७	४४ ३८	५० १	५५ २	५९ ४१
८	४ २९	९ २७	१४ ४९	२० १२	२५ १२	२९ ५१	३४ २९	३९ २७	४४ ४९	५० १२	५५ १२	५९ ५१

अथ मेषादीनां संज्ञामाह ।

क्रियताबुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः ॥ तौक्षिक आकोकेरोहृद्रोगश्चांत्यभं चेत्थम् ॥ ४८ ॥

अथ मेषादिराशीनां स्वामिनः ।

मेषवृश्चिकयोर्भौमस्तुलावृषभयोर्भृगुः ॥ कन्यामिथुनयोर्ज्ञः स्याद्धनुर्मीनाधिपो गुरुः ॥४९॥ शनिर्मकरकुंभे च कुलीरस्य तु चन्द्रमाः ॥ सिंहस्याधिपतिः सूर्यो राशीनामधिपा मताः ॥ ५० ॥

पुनः राशीशाः ।

चंद्रज्ञशुक्रधूमार्कपरिवेषारकार्मुकाः ॥ गुरुपातः शनिः केतुर्ग्रहाः स्युर्द्वादशक्रमात् ॥ ५१ ॥

अथाग्रे षोडशवर्गानाह ।

वर्गान् षोडशसंख्याकान् ब्रह्मा लोकपितामहः ॥ तानहं संप्रवक्ष्यामि मैत्रेय श्रूयतामिति ॥ ५२ ॥ क्षेत्रं होरा च द्रेष्काणस्तुर्यांशः सप्तमांशकः ॥ नवांशो दशमांशश्च सूर्यांशः षोडशांशकः ॥५३ ॥ विंशांशो वेदवान्हंसो भांशात्त्रशांशकस्ततः ॥ खवेदांशोऽक्षवेदांशः षष्ठ्यंशश्च ततः परम् ॥ ५४ ॥ तत्क्षेत्रं तस्य खेटस्य राशेर्यो यस्य नायकः ॥ सूर्येन्द्वोर्विषमे राशौ समे तद्विपरीतकम् ॥५५॥ पितरश्चन्द्रहोरेशा देवाः सूर्यस्य कीर्तिताः ॥ राशेरर्द्धम्भवेद्धोरा ताश्चतुर्विंशतिः स्मृताः॥ मेषादि तासां होराणां परिवृत्तिद्वयं भवेत् ॥ ५६ ॥

अस्योदाहरणम् ।

यदा यदा विषमराशिः तदा तदा सूर्यमारभ्य गणनीयं यदा समराशिस्तदा तदा चंद्रात्प्रथमं गणनीयं लग्नं ३।८ अस्य होरा चंद्राद्गणनीयं पंचदशांशपरिमितं ४ चंद्रहोरा सूर्यं २।४ विषमराशिः अत एव सिंहहोरायामेव सर्वत्र ज्ञेयम् ॥

होराचक्रमिदम्.

स्वा.	राशि.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मीन.
दे.	१५	र. ५	चं. ४	सू. ५	चं. ४	सू. ५	चं. ४	सू. ५	चं. ४	र. ५	चं. ४	सू. ५	चं. ४
पितरः	३०	चं.४	सू. ५	चं. ४	सू. ५	चं. ४	सू. ५	चं. ४	सू. ५	च.४	सू. ५	चं. ४	सू. ५

अथ द्रेष्काणमाह ।

राशित्रिभागा द्रेष्काणास्ते च षट्त्रिंशदीरिताः ॥ परिवृत्तित्रयं तेषां मेषादेः क्रमशो भवेत् ॥५७ ॥ स्वपंचनवमानां च विषमेषु समेषु च ॥ नारदागस्तिदुर्वासाद्रेष्काणेशाश्चरादयः ॥ ५८ ॥

अस्योदाहरणम् ।

त्रिंशदंशात्मको राशिस्तस्य त्रिभागं कार्यम् । प्रथमभागे यस्मिन् राशिर्वर्तते स एव द्रेष्काणः यदा द्वितीयभागे तदा स्वराशेः पंचमराशिद्रेष्काणः तृतीयभागे सति तदा स्वराशेर्नवमराशिद्रेष्काणो ज्ञेयः यथा लग्नं ३ । ८ प्रथमभागे अत एव स्वद्रेष्काणे एवं सर्वत्र ज्ञेयम् ॥

द्रेष्काणचक्रम्.

स्वामि.	राशी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.
नारदः	अंश. १०	१	२	३	४	५	६	७	८	९	१०	११	१२
अगस्तिः	२०	५	६	७	८	९	१०	११	१२	१	२	३	४
दुर्वासाः	३०	९	१०	११	१२	१	२	३	४	५	६	७	८

अथ चतुर्थांशमाह ।

स्वर्क्षादिकेंद्रपतयस्तुर्यांशेशाः क्रियादयः ॥ सनकश्च सनंदश्च कुमारश्च सनातनः ॥ ५९ ॥

अस्योदाहरणम् ।

स्वर्क्षादिकेंद्रपतय इति स्वर्क्षे यद्ग्रहसंबंधी सराशिस्तदादिकेंद्राणि

तत्पतयः चतुर्थांशस्वामिनः तद्यथाः राशेस्त्रिंशदंशास्तस्य चतुर्थांशः सार्द्धाः सप्त ७ । ३० तत्र प्रथमविभागमध्ये ७ । ३० स्वर्क्षस्वराशिस्वामिन एवाधिपत्यं द्वितीयविभागमध्ये १५ । ० केंद्रपतयः स्वराशेः सकाशाच्चतुर्थो यो राशिः तत्स्वामिनः । एवाधिपत्यं तृतीयविभागमध्ये २२ । ३० स्वराशेः सकाशात्सप्तमो यो राशिस्तत्स्वामिन एवाऽधिपत्यं चतुर्थविभाग ३० । ० मध्ये स्वराशेः सकाशाद्दशमो राशिस्तत्स्वामिन एवाऽधिपत्यं यथालग्नं ३ । ८ द्वितीभागमध्ये ७० आगतमेवं सर्वत्र ज्ञेयम् ॥ ५९ ॥

चतुर्थांशचक्रम्.

स्वामी	अंश	१	२	३	४	५	६	७	८	९	१०	११	१२
सनकः	७ ३०	१ मं.	२ शु.	३ बु.	४ चं.	५ सू.	६ बु.	७ शु.	८ मं.	९ बृ.	१० श.	११ श.	१२ बृ.
सनंदनः	१५ ०	४ चं.	५ सू.	६ बु.	७ शु.	८ मं.	९ बृ.	१० श.	११ श.	१२ बृ.	१ मं.	२ शु.	३ बु.
कुमारः	२२ ३०	७ शु.	८ मं.	९ बृ.	१० श.	११ श.	१२ बृ.	१ मं.	२ शु.	३ बु.	४ चं.	५ सू.	६ बु.
सनातनः	३० ०	१० श.	११ श.	१२ बृ.	१ मं.	२ शु.	३ बु.	४ चं.	५ सू.	६ बु.	७ शु.	८ मं.	९ बृ.

अथ सप्तमांशमाह ।

सप्तांशपास्त्वोजगृहे गणनीया निजेशतः युग्मराशौ ॥ तु विज्ञेयाः सप्तमर्क्षादिनायकात् ॥ ६० ॥ क्षारक्षीरौ च दध्याज्यौ तथेक्षुरससंभवः ॥ मद्यशुद्धजलावोजे समे शुद्धजलादिकाः ॥ ६१ ॥

अस्योदाहरणम् ।

ओजराशौ ग्रहे साते निजराशितो गणनीयम् यदा समराशेः तदा सप्तमराशितो गणनीयम् यथा लग्नम् ३ । ८ चेत्समराशिः अत एव मकरात्तृतीयं सप्तांशमध्ये मीन १२ एवं सर्वत्र ज्ञेयम् ॥ ६० ॥ ६१ ॥

सप्तमांशचक्रम्.

स्वामी	लग्न.	मे.१	वृ.२	मि.३	क.४	सिं.५	क.६	तु.७	वृ.८	ध.९	म.१०	कुं.११	मी.१२
क्षार	४ १७	१	८	३	१०	५	१२	७	२	९	४	११	६
क्षीर	८ ३४	२	९	४	११	६	१	८	३	१०	५	१२	७
दधि	१२ ५१	३	१०	५	१२	७	२	९	४	११	६	१	८
आज्य	१७ ८	४	११	६	१	८	३	१०	५	१२	७	२	९
इक्षुरस	२१ २५	५	१२	७	२	९	४	११	६	१	८	३	१०
मद्य	२५ ४२	६	१	८	३	१०	५	१२	७	२	९	४	११
शुद्धजलम्.	३० ०	७	२	९	४	११	६	१	८	३	१०	५	१२

अथ नवमांशम् ।

नवांशेशाच्चरस्तस्मात्स्थिरे तन्नवमादितः ॥ उभये तत्पंचमादेरितिचिंत्यं विचक्षणैः ॥ देवानृराक्षसाश्चैव चरादिषु ग्रहेषु च ॥ ६२ ॥

अस्योदाहरणम् ।

नवमांशगणनया यदा चरराशिस्तदा तत्रैव गणना यदा स्थिरराशेः सकाशान्नवमराशेर्गणनीयाः यदा द्विस्वभावस्तदा पंचमराशेर्गणनीयाः यथा लग्नं ३।८।४।९ चरराशैस्तत्रव गणना कर्कात्तृतीयं कन्यानवमांश एवं सर्वत्र विलोकनीयम् ॥ ६२ ॥

नवमांशचक्रम्.

स्वामी.	रा.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.	अंशाः	
देव.	१	मं.	श.	शु.	चं.	मं.	श.	शु.	चं.	मं.	श.	शु.	चं.	३	२०
नृ.	२	शु.	श.	मं.	र.	शु.	श.	मं.	र.	शु	श.	मं.	र.	६	४०
राक्षस.	३	बु.	बृ.	बृ.	बु.	बु.	बृ.	बृ.	बु.	बु.	बृ.	बृ.	बु.	१०	०
देव.	४	चं.	मं.	श.	शु.	चं.	मं.	श.	शु.	च.	म.	श.	शु.	१३	२०
नृ.	५	र.	शु.	श.	मं.	र.	शु.	श.	मं.	र.	शु.	श.	मं.	१६	४०
राक्षस.	६	बु.	बु.	बृ.	बृ.	बु.	बु.	बृ.	बृ.	बु.	बु.	बृ.	बृ.	२०	०
देव.	७	शु.	चं	मं.	श.	शु.	चं.	मं.	श.	शु.	चं.	मं.	श.	२३	२०
नृ.	८	म	र.	शु.	श.	मं.	र.	शु.	श.	मं.	र.	शु.	श.	२६	४०
राक्षस.	९	बृ.	बु.	बु.	बृ.	बृ.	बु.	बु.	बृ.	बृ.	बु.	बु.	बृ.	३०	०

अथ दशमांशमाह ।

दिगंशया ततश्चौजे युग्मे तन्नवमाद्वदेत् ॥ पूर्वादिदशदिक्पाला इंद्राग्नियमराक्षसाः ॥ ६३ ॥ वरुणो मारुतश्चैव कुबेरेशानपद्मजाः ॥ अनंतश्चक्रमादोजे समे वा व्युत्क्रमेणतु ॥ ६४ ॥

अस्योदाहरणम् ।

अथ विषमराशिदशमांशे विषममेव गणनीयं समराशिदशमांशे तस्मान्नवमराशितो गणनीयम् । यथा लग्नं ३।८।४।५। मीनाद्गणनीयम् । वृषभं दशमांशमेवं सर्वत्र चिंतनीयम् ॥ ६४ ॥

अथ दशांशचक्रम्.

विषमाः स्वामिनः		मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कु.	मी.	समाः स्वामि०
इंद्रः	३	मं. १	श. १०	बु. ३	बृ. १२	सू. ५	शु. २	शु. ७	चं. ४	बृ. ९	बु. ६	श. ११	मं. ८	अनंतः
अग्निः	६	शु. २	श. ११	चं. ४	मं. १	बु. ६	बु. ३	मं. ८	र. ५	श. १०	शु. ७	बृ. १२	बृ. ९	पद्मजः
यमः	९	बु. ३	बृ. १२	र. ५	शु. २	शु. ७	चं. ४	बृ. ९	बु. ६	श. ११	मं. ८	मं. १	श. १०	ईशानः
राक्षसः	१२	चं. ४	मं. १	बु. ६	बु. ३	मं. ८	सू. ५	श. १०	शु. ७	बृ. १२	बृ. ९	शु. २	श. ११	कुबेरः
वरुणः	१५	सू. ५	शु. २	शु. ७	चं. ४	बृ. ९	बु. ६	श. ११	मं. ८	मं. १	श. १०	बु. ३	बृ. १२	मारुतः
मारुतः	१८	बु. ६	बु. ३	मं. ८	र. ५	श. १०	शु. ७	बृ. १२	बृ. ९	शु. २	श. ११	चं. ४	मं. १	वरुणः
कुबेरः	२१	शु. ७	चं. ४	बृ. ९	बु. ६	श. ११	म. ८	मं. १	श. १०	बु. ३	बृ. १२	सू. ५	शु. २	राक्षसः
ईशानः	२४	मं. ८	सू. ५	श. १०	शु. ७	बृ. १२	बृ. ९	शु. २	श. ११	चं. ४	मं. १	बु. ६	बु. ३	यमः
पद्मजः	२७	बृ. ९	बु. ६	श. ११	मं. ८	मं. १	श. १०	बु. ३	बृ. १२	सू. ५	शु. २	शु. ७	चं. ४	आग्निः
अनंतः	३०	श. १०	शु. ७	बृ. १२	बृ. ९	शु. २	श. ११	चं. ४	मं. १	बु. ६	बु. ३	मं. ८	र. ५	इंद्रः

अथ द्वादशांशमाह ।

द्वादशांशस्य गणना तत्तत्क्षेत्राद्विनिर्दिशेत् ॥ तेषामधीशाः क्रमशो गणेशाऽश्वियमाहयः ॥६५ ॥

अस्योदाहरणम् ।

द्वादशांशं स्वभात् सर्वत्र ज्ञेयम् । यथा लग्नं ३।८।४।५। एवं प्रकारेण कर्काद्गणितं तुलाद्द्वादशांशम् अमुना प्रकारेण ज्ञेयम् ॥ ६५॥

अथ द्वादशांशचक्रमिदम्.

स्वामिनः	अं०	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.
गणेशः	२ ३०	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	गु. ९	श. १०	श. ११	गु. १२
अश्विनी-कुमारौ	५ ०	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	गु. ९	श. १०	श. ११	गु. १२	मं. १
यमः	७ ३०	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	मं ८	गु. ९	श. १०	श. ११	गु. १२	मं. १	शु. २
अहिः	१० ०	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	गु. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३
गणेशः	१२ ३०	र. ५	बु. ६	शु. ७	मं. ८	गु. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	चं. ४
अश्विनी-कुमारौ.	१५ ०	बु. ६	श. ७	मं. ८	गु. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	चं. ४	र. ५
यमः	१७ ३०	शु. ७	मं. ८	गु. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६
अहिः	२० ०	मं. ८	गु. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७
गणेशः	२२ ३०	गु. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	म. ८
अश्विनी-कुमारौ.	२५ ०	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	गु. ९
यमः	२७ ३०	श. ११	गु. १२	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	गु. ९	श. १०
अहिः	३० ०	गु. १२	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	गु. ९	श. १०	श. ११

अथ षोडशांशमाह ।

अजसिंहाश्वितो ज्ञेया नृपांशाः क्रमशः सदा ॥ अजविष्णू हरः सूर्यो ह्योजे युग्मे प्रतीपकम् ॥ ६६ ॥

अस्योदाहरणम् ।

यदा लग्नादेर्विषमराशिस्तदा स्वराशेः सकाशात् क्रमेण गणना । यदा च विषमराशिस्तदा स्वाद्विपरीतगणनया विज्ञेयाः षोडशांशाः यथा लग्नं ३ । ८ । ४ । ९ मेषाद्गणनीयं सिंह आगत एवं विवेचनीयम् ॥ ६६ ॥

षोडशांशचक्रम्.

संख्या.	विषम स्वा.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.	सम स्वा.	अं.	क.	वि.
१	ब्र.	१	५	९	१	५	९	१	५	९	१	५	९	सू.	१	५२	३०
२	वि.	२	६	१०	२	६	१०	२	६	१०	२	६	१०	ह.	३	४५	०
३	ह.	३	७	११	३	७	११	३	७	११	३	७	११	वि.	५	३७	३०
४	सू.	४	८	१२	४	८	१२	४	८	१२	४	८	१२	ब्र.	७	३०	०
५	ब्र.	५	९	१	५	९	१	५	९	१	५	९	१	सू.	९	२२	३०
६	वि.	६	१०	२	६	१०	२	६	१०	२	६	१०	२	ह.	११	१५	०
७	ह.	७	११	३	७	११	३	७	११	३	७	११	३	वि.	१३	७	३०
८	सू.	८	१२	४	८	१२	४	८	१२	४	८	१२	४	ब्र.	१५	०	०
९	ब्र.	९	१	५	९	१	५	९	१	५	९	१	५	सू.	१६	५२	३०
१०	वि.	१०	२	६	१०	२	६	१०	२	६	१०	२	६	ह.	१८	४५	०
११	ह.	११	३	७	११	३	७	११	३	७	११	३	७	वि.	२०	३७	३०
१२	सू.	१२	४	८	१२	४	८	१२	४	८	१२	४	८	ब्र.	२२	३०	०
१३	ब्र.	१	५	९	१	५	९	१	५	९	१	५	९	सू.	२४	२२	३०
१४	वि.	२	६	१०	२	६	१०	२	६	१०	२	६	१०	ह.	२६	१५	०
१५	ह.	३	७	११	३	७	११	३	७	११	३	७	११	वि.	२८	७	३०
१६	सू.	४	८	१२	४	८	१२	४	८	१२	४	८	१२	ब्र.	३०	०	०

अथ विंशांशमाह ।

अथ विंशतिभागानामधिपा ब्रह्मणोदिताः ॥ क्रियाच्चरे स्थिरे चापान्मृगेंद्राद्द्विस्वभावके ॥ ६७ ॥ काली गौरी जया लक्ष्मीर्विजया विमला सती ॥ तारा ज्वालामुखी श्वेता ललिता बगलामुखी ॥ ६८ ॥ प्रत्यंगिरा शची रौद्री भवानी वरदा जया ॥ त्रिपुरा सुमुखी चेति विषमे परिचिंतयेत् ॥ ६९ ॥ समराशौ दया मेधा छिन्नशीर्षा पिशाचिनी ॥ धूमावती च मातंगी बाला भद्राऽरुणाऽनला ॥ ७० ॥

पिंगला छुछुका घोरा वाराही वैष्णवी सिता ॥ भुवनेशी भैरवी च मङ्गला ह्यपराजिता ॥ ७१ ॥

अस्योदाहरणम् ।

यथा लग्नं ३।८।४।९ मेषादेगणनया कन्या आगतम् । एवम् सर्वत्र ज्ञेयम्—

विंशांशचक्रम्.

सं.	वि० स्वा०	मे. १	वृ. २	मि. ३	क. ४	सिं. ५	क. ६	तु. ७	वृ. ८	ध. ९	म. १०	कुं. ११	मी. १२	स०स्वा०	अंशा	संख्या
१	काली	१	९	५	१	९	५	१	९	५	१	९	५	दया	१ ३०	१
२	गौरी	२	१०	६	२	१०	६	२	१०	६	२	१०	६	मेधा	३।०	२
३	जया	३	११	७	३	११	७	३	११	७	३	११	७	छिन्नशी.	४।३०	३
४	लक्ष्मी	४	१२	८	४	१२	८	४	१२	८	४	१२	८	पिशाचि	६।०	४
५	विजया	५	१	९	५	१	९	५	१	९	५	१	९	धूमाव.	७।३०	५
६	विमला	६	२	१०	६	२	१०	६	२	१०	६	२	१०	मातंगी	९।०	६
७	सती	७	३	११	७	३	११	७	३	११	७	३	११	बाला	१०।३०	७
८	तारा	८	४	१२	८	४	१२	८	४	१२	८	४	१२	भद्रा	१२।०	८
९	ज्वालामु०	९	५	१	९	५	१	९	५	१	९	५	१	अरुणा	१३।३०	९
१०	श्वेता	१०	६	२	१०	६	२	१०	६	२	१०	६	२	अनला	१५।०	१०
११	ललिता	११	७	३	११	७	३	११	७	३	११	७	३	पिंगला	१६।३०	११
१२	बगला	१२	८	४	१२	८	४	१२	८	४	१२	८	४	छुछुका	१८।०	१२
१३	प्रत्यंगिरा	१	९	५	१	९	५	१	९	५	१	९	५	घोरा	१९।३०	१३
१४	शची	२	१०	६	२	१०	६	२	१०	६	२	१०	६	वाराही	२१।०	१४
१५	रौद्री	३	११	७	३	११	७	३	११	७	३	११	७	वैष्णवी	२२।३०	१५
१६	भवानी	४	१२	८	४	१२	८	४	१२	८	४	१२	८	सिता	२४।०	१६
१७	वरदा	५	१	९	५	१	९	५	१	९	५	१	९	भुवनेश्व.	२५।३०	१७
१८	जया	६	२	१०	६	२	१०	६	२	१०	६	२	१०	भैरवी	२७।०	१८
१९	त्रिपुरा	७	३	११	७	३	११	७	३	११	७	३	११	मंगला	२८।३०	१९
२०	सुमुखी	८	४	१२	८	४	१२	८	४	१२	८	४	१२	अपराजि.	३०।०	२०

अथ सिद्धांशकमाह ।

सिद्धांशकानामधिपाः सिंहादोजभगे गृहे ॥ कर्काद्युग्मभगे खेटे स्कंदः पर्शुधरोऽनलः ॥ ७२ ॥ विश्वकर्मा भगो मित्रो मयोऽतक-

वृषध्वजाः ॥ गोविंदो मदनो भीमः सिंहादौ विषमे क्रमात् ॥ कर्कादौ समभे भीमाद्विलोमेन विचिंतयेत् ॥७३ ॥

अस्योदाहरणम् ।

यथा लग्नं ३।८।४९ कर्कादिगणनीयं मकरमागतम् एवं सर्वत्र ज्ञेयम् ।

चतुर्विंशांशचक्रम् ।

सं.	वि० स्वा०	१	२	३	४	५	६	७	८	९	१०	११	१२	स० स्वा०	अं क०	सं
१	स्कंदः	५	४	५	४	५	४	५	४	५	४	५	४	भीमः	१।१५	१
२	पशुधरः	६	५	६	५	६	५	६	५	६	५	६	५	मदनः	२।३०	२
३	अनलः	७	६	७	६	७	६	७	६	७	६	७	६	गोविन्दः	३।४५	३
४	विश्वकः	८	७	८	७	८	७	८	७	८	७	८	७	वृषध्वजः	५।०	४
५	भगः	९	८	९	८	९	८	९	८	९	८	९	८	अन्तकः	६।१५	५
६	मित्रः	१०	९	१०	९	१०	९	१०	९	१०	९	१०	९	मयः	७।३०	६
७	मयः	११	१०	११	१०	११	१०	११	१०	११	१०	११	१०	मित्र	८।४५	७
८	अन्तकः	१२	११	१२	११	१२	११	१२	११	१२	११	१२	११	भगः	१०।०	८
९	वृषध्वजः	१	१२	१	१२	१	१२	१	१२	१	१२	१	१२	विश्वकः	११।१५	९
१०	गोविंदः	२	१	२	१	२	१	२	१	२	१	२	१	अनलः	१२।३०	१०
११	मदनः	३	२	३	२	३	२	३	२	३	२	३	२	पशुधरः	१३।४५	११
१२	भीमः	४	३	४	३	४	३	४	३	४	३	४	३	स्कंदः	१५।०	१२
१३	स्कंदः	५	४	५	४	५	४	५	४	५	४	५	४	भीमः	१६।१५	१३
१४	पशुधरः	६	५	६	५	६	५	६	५	६	५	६	५	मदनः	१७।३०	१४
१५	अनलः	७	६	७	६	७	६	७	६	७	६	७	६	गोविंदः	१८।४५	१५
१६	विश्वकः	८	७	८	७	८	७	८	७	८	७	८	७	वृषध्वजः	२०।०	१६
१७	भगः	९	८	९	८	९	८	९	८	९	८	९	८	अंतकः	२१।१५	१७
१८	मित्रः	१०	९	१०	९	१०	९	१०	९	१०	९	१०	९	मयः	२२।३०	१८
१९	मयः	११	१०	११	१०	११	१०	११	१०	११	१०	११	१०	मित्रः	२३।४५	१९
२०	अन्तकः	१२	११	१२	११	१२	११	१२	११	१२	११	१२	११	भगः	२५।०	२०
२१	वृषध्व०	१	१२	१	१२	१	१२	१	१२	१	१२	१	१२	विश्वकः	२६।१५	२१
२२	गोविंदः	२	१	२	१	२	१	२	१	२	१	२	१	अनलः	२७।३०	२२
२३	मदनः	३	२	३	२	३	२	३	२	३	२	३	२	पशुधरः	२८।४५	२३
२४	भीमः	४	३	४	३	४	३	४	३	४	३	४	३	स्कंदः	३०।०	२४

अथ भांशेशानाह ।

नक्षत्रेशाः क्रमाद्दस्रयमवह्निपितामहाः ॥ चंद्रेशादितिजीवा हि पितरो भगसंज्ञिताः ॥ ७४ ॥अर्यमार्कस्त्वष्टमरुच्छक्राग्निमित्रवा-

सवाः ॥ निर्ऋत्युदकविश्वेजगोविंदो वसवोंबुपः ॥ ७५ ॥ ततोऽजपादहिर्बुध्न्यः पूषा चैव प्रकीर्तितः ॥ नक्षत्रेशास्तु भांशेशा भांशसंख्यस्वभात् क्रमात् ॥ ७६ ॥

अस्योदाहरणम् ।

यथा लग्नं ३।८।४।९ मकराद्गणनीयं सिंहलग्नमागतम् एवं सर्वत्र ज्ञेयम् ।

भांशचक्रम्.

सं.	स्वामिनः	मे. १	वृ. २	मि.३	क.४	सिं५	क.६	तु. ७	वृ. ८	ध.९	म.१०	कुं.११	मी१२	अंशादि
१	आश्विनीकु	१	४	७	१०	१	४	७	१०	१	४	७	१०	१ ६ ४०
२	यमः	२	५	८	११	२	५	८	११	२	५	८	११	२ १३ २०
३	वह्निः	३	६	९	१२	३	६	९	१२	३	६	९	१२	३ २० ०
४	ब्रह्मा	४	७	१०	१	४	७	१०	१	४	७	१०	१	४ २६ ४०
५	चन्द्रमाः	५	८	११	२	५	८	११	२	५	८	११	२	५ ३३ २०
६	ईशः	६	९	१२	३	६	९	१२	३	६	९	१२	३	६ ४० ०
७	अदितिः	७	१०	१	४	७	१०	१	४	७	१०	१	४	७ ४६ ४०
८	जीवः	८	११	२	५	८	११	२	५	८	११	२	५	८ ५३ २०
९	अहिः	९	१२	३	६	९	१२	३	६	९	१२	३	६	१० ० ०
१०	पितरः	१०	१	४	७	१०	१	४	७	१०	१	४	७	११ ६ ४०
११	भगः	११	२	५	८	११	२	५	८	११	२	५	८	१२ १३ २०
१२	अर्यमा	१२	३	६	९	१२	३	६	९	१२	३	६	९	१३ २० ०
१३	सूर्यः	१	४	७	१०	१	४	७	१०	१	४	७	१०	१४ २६ ४०
१४	त्वष्टा	२	५	८	११	२	५	८	११	२	५	८	११	१५ ३३ २०
१५	मरुत्	३	६	९	१२	३	६	९	१२	३	६	९	१२	१६ ४० ०
१६	शक्राग्निः	४	७	१०	१	४	७	१०	१	४	७	१०	१	१७ ४६ ४०
१७	मित्रः	५	८	११	२	५	८	११	२	५	८	११	२	१८ ५३ २०
१८	वासवः	६	९	१२	३	६	९	१२	३	६	९	१२	३	२० ० ०
१९	राक्षसः	७	१०	१	४	७	१०	१	४	७	१०	१	४	२१ ६ ४०
२०	वरुणः	८	११	२	५	८	११	२	५	८	११	२	५	२२ १३ २०
२१	विश्वेदेवाः	९	१२	३	६	९	१२	३	६	९	१२	३	६	२३ २० ०
२२	गोविंदः	१०	१	४	७	१०	१	४	७	१०	१	४	७	२४ २६ ४०
२३	वसुः	११	२	५	८	११	२	५	८	११	२	५	८	२५ ३३ २०
२४	वरुणः	१२	३	६	९	१२	३	६	९	१२	३	६	९	२६ ४० ०
२५	अजपात्	१	४	७	१०	१	४	७	१०	१	४	७	१०	२७ ४६ ४०
२६	अहिर्बुध्न्य	२	५	८	११	२	५	८	११	२	५	८	११	२८ ५३ २०
२७	पूषा	३	६	९	१२	३	६	९	१२	३	६	९	१२	३० ० ०

अथ त्रिंशांशमाह ।

त्रिंशांशेशाश्च विषमे कुजार्कीज्यज्ञभार्गवाः ॥ पंचपंचाष्टसप्ताक्ष भागा व्यत्ययतः समे ॥ ७७ ॥ वह्निः समीरशक्रौ च धनदो जलदस्तथा ॥ विषमेषु क्रमाज्ज्ञेयाः समराशौ विपर्ययम् ॥ ७८ ॥

अस्योदाहरणम् ।

यदा समत्रिंशांशे शुक्रज्ञेज्यार्किभूपुत्रा ज्ञेयं यथा लग्नं ३।८।४।९ शुक्राद्गणनीयं द्वितयिं बुधः आगत एवं ज्ञेयम्.

विषमत्रिंशांशचक्रम्.

स्वामिनः	अंशाः	मेषः	मिथुनः	सिंहः	तुला	धनु.	कुंभः
वह्निः	५ ०	मं.	मं.	मं.	मं.	मं.	मं.
वायुः	१० ०	श.	श.	श.	श.	श.	श.
शक्रः	१८ ०	गु.	गु.	गु.	गु.	गु.	गु.
धनदः	२५ ०	बु.	बु.	बु.	बु.	बु.	बु.
जलदः	३० ०	शु.	शु.	शु.	शु.	शु.	शु.

समत्रिंशांशचक्रम्.

स्वामिनः	अंशाः	वृषभ	कर्क.	कन्या	वृश्चिक.	मकर.	मीन.
जलदः	५ ०	शु.	शु.	शु.	शु.	शु.	शु.
धनदः	१२ ०	बु.	बु.	बु.	बु.	बु.	बु.
शक्रः	२० ०	गु.	गु.	गु.	गु.	गु.	गु.
वायुः	२५ ०	श.	श.	श.	श.	श.	श.
वह्निः	३० ०	मं.	मं.	मं.	मं.	मं.	मं.

अथ खवेदांशमाह ।

चत्वारिंशतिभागानामधिपा विषमे क्रियात् ॥ विष्णुश्चंद्रो मरीचिश्च त्वष्टा धाता शिवोरविः ॥ ७९ ॥ यमो यक्षेशगंधर्वः कालो वरुण एव च ॥ समभे तुलतो ज्ञेयाः स्वस्वाधिपसमन्विताः ॥ ८० ॥

अस्योदाहरणम् ।

यथा लग्नं ३ । ८ । ४ । ९ तुलादिगणनीयं कन्याराशिरागतः एवं सर्वत्र ज्ञेयम् ॥

खवेदांशचक्रमिदम्.

सं.	स्वामिनः	मे०	वृ.१	मि२	क.३	सिं.४	क.५	तु.६	वृ.७	ध.८	म.९	कुं.१०	मी.११	अ.	क.
१	विष्णुः	१	७	१	७	१	७	१	७	१	७	१	७	०	४५
२	चन्द्रः	२	८	२	८	२	८	२	८	२	८	२	८	१	३०
३	मरीचिः	३	९	३	९	३	९	३	९	३	९	३	९	२	१५
४	त्वष्टा	४	१०	४	१०	४	१०	४	१०	४	१०	४	१०	३	०
५	धाता	५	११	५	११	५	११	५	११	५	११	५	११	३	४५
६	शिवः	६	१२	६	१२	६	१२	६	१२	६	१२	६	१२	४	३०
७	रविः	७	१	७	१	७	१	७	१	७	१	७	१	५	१५
८	यमः	८	२	८	२	८	२	८	२	८	२	८	२	६	०
९	यक्षेशः	९	३	९	३	९	३	९	३	९	३	९	३	६	४५
१०	गन्धर्वः	१०	४	१०	४	१०	४	१०	४	१०	४	१०	४	७	३०
११	कालः	११	[illegible]	११	५	११	५	११	५	११	५	११	५	८	१५
१२	वरुणः	१२	६	१२	६	१२	६	१२	६	१२	६	१२	६	९	०
१३	विष्णुः	१	७	१	७	१	७	१	७	१	७	१	७	९	४५
१४	चन्द्रः	२	८	२	८	२	८	२	८	२	८	२	८	१०	३०
१५	मरीचिः	३	९	३	९	३	९	३	९	३	९	३	९	११	१५
१६	त्वष्टा	४	१०	४	१०	४	१०	४	१०	४	१०	४	१०	१२	०
१७	धाता	५	११	५	११	५	११	५	११	५	११	५	११	१२	४५
१८	शिवः	६	१२	६	१२	६	१२	६	१२	६	१२	६	१२	१३	३०
१९	रविः	७	१	७	१	७	१	७	१	७	१	७	१	१४	१५
२०	यमः	८	२	८	२	८	२	८	२	८	२	८	२	१५	०
२१	यक्षेशः	९	३	९	३	९	३	९	३	९	३	९	३	१५	४५
२२	गन्धर्वः	१०	४	१०	४	१०	४	१०	४	१०	४	१०	४	१६	३०
२३	कालः	११	५	११	५	११	५	११	५	११	५	११	५	१७	१५
२४	वरुणः	१२	६	१२	६	१२	६	१२	६	१२	६	१२	६	१८	०

२५	विष्णुः	१	७	१	७	१	७	१	७	१	७	१	७	१८	४५
२६	चन्द्रः	२	८	२	८	२	८	२	८	२	८	२	८	१९	३०
२७	मरीचिः	३	९	३	९	३	९	३	९	३	९	३	९	२०	१५
२८	त्वष्टा	४	१०	४	१०	४	१०	४	१०	४	१०	४	१०	२१	०
२९	धाता	५	११	५	११	५	११	५	११	५	११	५	११	२१	४५
३०	शिवः	६	१२	६	१२	६	१२	६	१२	६	१२	६	१२	२२	३०
३१	रविः	७	१	७	१	७	१	७	१	७	१	७	१	२३	१५
३२	यमः	८	२	८	२	८	२	८	२	८	२	८	२	२४	०
३३	यक्षेशः	९	३	९	३	९	३	९	३	९	३	९	३	२४	४५
३४	गन्धर्वः	१०	४	१०	४	१०	४	१०	४	१०	४	१०	४	२५	३०
३५	कालः	११	५	११	५	११	५	११	५	११	५	११	५	२६	१५
३६	वरुणः	१२	६	१२	६	१२	६	१२	६	१२	६	१२	६	२७	०
३७	विष्णुः	१	७	१	७	१	७	१	७	१	७	१	७	२७	४५
३८	चन्द्रः	२	८	२	८	२	८	२	८	२	८	२	८	२८	३०
३९	मरीचिः	३	९	३	९	३	९	३	९	३	९	३	९	२९	१५
४०	त्वष्टा	४	१०	४	१०	४	१०	४	१०	४	१०	४	१०	३०	०

अथाक्षवेदांशमाह ।

तथाक्षवेदभागानामाधिपाश्चरभे क्रियात् ॥ स्थिरेसिंहाद्विस्वभावे
चापाद्ब्रह्मेशकेशवाः ॥ ईशाच्युतसुरज्येष्ठविष्णुकेशाश्चरादिषु ॥ ८१ ॥

अस्योदाहरणम् ।

यथा लग्नं ३।८।४।५ मेषाद्गणनीयं वृषभ आगत एवं सर्वत्र ज्ञेयम् ।

अक्षवेदांशचक्रमिदम्.

सं.	स्वा. ब्रह्मा शंकर विष्णु मे०	स्वा. शंकर विष्णु ब्रह्मा वृ. १	स्वा. विष्णु ब्रह्मा शंकर मि.२	स्वा. ब्रह्मा शंकर विष्णु क. ३	स्वा. शंकर विष्णु ब्रह्मा सिं. ४	स्वा. विष्णु ब्रह्मा शंकर क. ५	स्वा. ब्रह्मा शंकर विष्णु तु. ६	स्वा. शंकर विष्णु ब्रह्मा वृ. ७	स्वा. विष्णु ब्रह्मा शंकर ध. ८	स्वा. ब्रह्मा शंकर विष्णु म. ९	स्वा. शंकर विष्णु ब्रह्मा कुं.१०	स्वा. विष्णु ब्रह्मा शंकर मी.११	अं.	क.
१	१	५	९	१	५	९	१	५	९	१	५	९	०	४०
२	२	६	१०	२	६	१०	२	६	१०	२	६	१०	१	२०
३	३	७	११	३	७	११	३	७	११	३	७	११	२	०
४	४	८	१२	४	८	१२	४	८	१२	४	८	१२	२	४०
५	५	९	१	५	९	१	५	९	१	५	९	१	३	२०
६	६	१०	२	६	१०	२	६	१०	२	६	१०	२	४	०
७	७	११	३	७	११	३	७	११	३	७	११	३	४	४०

८	८	१२	४	८	१२	४	८	१२	४	८	१२	४	५	२०
९	९	१	५	९	१	५	९	१	५	९	१	५	६	०
१०	१०	२	६	१०	२	६	१०	२	६	१०	२	६	६	४०
११	११	३	७	११	३	७	११	३	७	११	३	७	७	२०
१२	१२	४	८	१२	४	८	१२	४	८	१२	४	८	८	०
१३	१	५	९	१	५	९	१	५	९	१	५	९	८	४०
१४	२	६	१०	२	६	१०	२	६	१०	२	६	१०	९	२०
१५	३	७	११	३	७	११	३	७	११	३	७	११	१०	०
१६	४	८	१२	४	८	१२	४	८	१२	४	८	१२	१०	४०
१७	५	९	१	५	९	१	५	९	१	५	९	१	११	२०
१८	६	१०	२	६	१०	२	६	१०	२	६	१०	२	१२	०
१९	७	११	३	७	११	३	७	११	३	७	११	३	१२	४०
२०	८	१२	४	८	१२	४	८	१२	४	८	१२	४	१३	२०
२१	९	१	५	९	१	५	९	१	५	९	१	५	१४	०
२२	१०	२	६	१०	२	६	१०	२	६	१०	२	६	१४	४०
२३	११	३	७	११	३	७	११	३	७	११	३	७	१५	२०
२४	१२	४	८	१२	४	८	१२	४	८	१२	४	८	१६	०
२५	१	५	९	१	५	९	१	५	९	१	५	९	१६	४०
२६	२	६	१०	२	६	१०	२	६	१०	२	६	१०	१७	२०
२७	३	७	११	३	७	११	३	७	११	३	७	११	१८	०
२८	४	८	१२	४	८	१२	४	८	१२	४	८	१२	१८	४०
२९	५	९	१	५	९	१	५	९	१	५	९	१	१९	२०
३०	६	१०	२	६	१०	२	६	१०	२	६	१०	२	२०	०
३१	७	११	३	७	११	३	७	११	३	७	११	३	२०	४०
३२	८	१२	४	८	१२	४	८	१२	४	८	१२	४	२१	२०
३३	९	१	५	९	१	५	९	१	५	९	१	५	२२	०
३४	१०	२	६	१०	२	६	१०	२	६	१०	२	६	२२	४०
३५	११	३	७	११	३	७	११	३	७	११	३	७	२३	२०
३६	१२	४	८	१२	४	८	१२	४	८	१२	४	८	२४	०
३७	१	५	९	१	५	९	१	५	९	१	५	९	२४	४०
३८	२	६	१०	२	६	१०	२	६	१०	२	६	१०	२५	२०
३९	३	७	११	३	७	११	३	७	११	३	७	११	२६	०
४०	४	८	१२	४	८	१२	४	८	१२	४	८	१२	२६	४०
४१	५	९	१	५	९	१	५	९	१	५	९	१	२७	२०
४२	६	१०	२	६	१०	२	६	१०	२	६	१०	२	२८	०
४३	७	११	३	७	११	३	७	११	३	७	११	३	२८	४०
४४	८	१२	४	८	१२	४	८	१२	४	८	१२	४	२९	२०
४५	९	१	५	९	१	५	९	१	५	९	१	५	३०	०

अथ षष्ट्यंशमाह ।

घोरश्च राक्षसो देवः कुबेरो यक्षकिन्नरौ ॥ भ्रष्टः कुलघ्नो गरलो
वह्निर्माया पुरीषकः ॥ ८२ ॥ अपांपतिर्मरुत्वांश्च कालः सर्पामृतेन्दुकाः
॥ मृदुः कोमलहेरंबब्रह्मविष्णुमहेश्वराः ॥ ८३ ॥ देवाद्रीं
कालिनाशश्च क्षितीशकमलाकरौ ॥ गुलिको मृत्युकालश्च दावाग्निघोंरसंज्ञकः
॥ ८४ ॥ यमश्च कण्टकसुधाऽमृतौ पूर्णनिशाकरः ॥
विषदग्धकुलांतश्च मुख्यो वंशक्षयस्तथा ॥ ८५ ॥ उत्पातकालसौम्याख्या
कोमलः शीतलाभिधः ॥ करालदंष्ट्रचंद्रास्यौ प्रवीणः
कालपावकः ॥ ८६ ॥ दंण्डभृन्निर्मलः सौम्यः क्रूरोऽतिशीतलोमृतः
॥ पयोधिं भ्रमणाख्यौ च चंद्ररेखा स्वयुग्मपौ ॥ ८७ ॥ समेभे
व्यत्ययाज्ज्ञेयाः षष्ट्यंशाश्च प्रकीर्तिताः ॥ षष्ट्यंशस्वामिनस्त्वोजे
तदीशाद्व्यत्ययः समे ॥ ८८ ॥ शुभषष्ट्यंशसंयुक्ताः ग्रहाः शुभफलप्रदाः
॥ क्रूरषष्ट्यंशसंयुक्ता नाशयन्ति स्वचारिणः ॥ ८९ ॥ राशीन्
विहाय खेटस्य द्विघ्नमंशाद्यमर्कहृत् ॥ शेषं सैकं च तद्राशिनाथषष्ट्यंशपाः
स्मृताः ॥ ९० ॥

अस्योदहरणम् ।

राशीन्विहाय त्यक्त्वा अंशाद्यं द्विगुणं कृत्वा अंशस्थाने द्वादशतष्टं शेषं सैकं योज्यं तद्राशिपः षष्ट्यंशपातिर्ग्रहो भवति अयं षष्ट्यंशः विषमराशिक्रमाद्गणनीयः समराशेर्व्युत्क्रमो ज्ञेयः यथा लग्नं ३ । ८ । ४५ समे अष्टादशांशमध्ये उत्पातांश आगतः सूर्य अंशादि ४ । २८ । १ द्विगुणांकाः ८ । ५६ । २ यदा अंशादि द्वादशाधिकं तदा द्वादशभक्तं कलादि त्रिंशद ३० धिकं त्रिंशद्भक्तमुपरि योज्यम् अत्रतु कला ५६ त्रिंशद्भक्ते लब्धम् १ उपरि योज्यम् ८ शेषं सैकम्. अत्र तु शेषं ९ सैकं १ योज्यं १० मिथुनादिगणनीयम् तुलायां रविः ७ अग्न्यंशमध्ये समे तु षष्टि ६० मध्ये हीनं कार्यम् एवं सर्वत्र ज्ञेयम्.

अथ षष्ट्यंशचक्रमिदम्.

सं.	विषमषष्ट्यंशाः	मि. ०	वृ. १	मि. २	क. ३	सिं. ४	क. ५	तु. ६	वृ. ७	ध. ८	म. ९	कु. १०	मी. ११	समषष्ट्यंशाः	अं०	कला
१	घोरांशः	१	२	३	४	५	६	७	८	९	१०	११	१२	इन्दुरेखांशः	०	३०
२	राक्षसांशः	१	२	३	४	५	६	७	८	९	१०	११	१२	भ्रमणांशः	१	०
३	देवांशः	२	३	४	५	६	७	८	९	१०	११	१२	१	पयोधीशांशः	१	३०
४	कुबेरांशः	२	३	४	५	६	७	८	९	१०	११	१२	१	सुधांशः	२	०
५	यक्षांशः	३	४	५	६	७	८	९	१०	११	१२	१	२	आतेशीतलांश	२	३०
६	किन्नरांशः	३	४	५	६	७	८	९	१०	११	१२	१	२	क्रूरांशः	३	०
७	भ्रष्टांशः	४	५	६	७	८	९	१०	११	१२	१	२	३	सौम्यांशः	३	३०
८	कुलघ्नांशः	४	५	६	७	८	९	१०	११	१२	१	२	३	निर्मलांशः	४	०
९	गरलांशः	५	६	७	८	९	१०	११	१२	१	२	३	४	दंडायुधांशः	४	३०
१०	अग्न्यंशः	५	६	७	८	९	१०	११	१२	१	२	३	४	कालाग्न्यंशः	५	०
११	मायांशः	६	७	८	९	१०	११	१२	१	२	३	४	५	प्रवीणांशः	५	३०
१२	पुरीषांशः	६	७	८	९	१०	११	१२	१	२	३	४	५	इन्दुमुखांशः	६	०
१३	अपांपत्यंशः	७	८	९	१०	११	१२	१	२	३	४	५	६	दंष्ट्राकरालांशः	६	३०
१४	मरुत्वदंशः	७	८	९	१०	११	१२	१	२	३	४	५	६	शीतलांशः	७	०
१५	कालांशः	८	९	१०	११	१२	१	२	३	४	५	६	७	कोमलांशः	७	३०
१६	अहिभागांशः	८	९	१०	११	१२	१	२	३	४	५	६	७	सौम्यांशः	८	०
१७	अमृतांशः	९	१०	११	१२	१	२	३	४	५	६	७	८	कालरूपांशः	८	३०
१८	चन्द्रांशः	९	१०	११	१२	१	२	३	४	५	६	७	८	उत्पातांशः	९	०
१९	मृद्वंशकः	१०	११	१२	१	२	३	४	५	६	७	८	९	वंशक्षयांशः	९	३०
२०	कोमलांशः	१०	११	१२	१	२	३	४	५	६	७	८	९	कुल नाशांशः	१०	०
२१	हेरम्बांशः	११	१२	१	२	३	४	५	६	७	८	९	१०	विषप्रदग्धांशः	१०	३०
२२	ब्रह्मांशः	११	१२	१	२	३	४	५	६	७	८	९	१०	पूर्णचन्द्रांशः	११	०
२३	विष्ण्वंशः	१२	१	२	३	४	५	६	७	८	९	१०	११	अमृतांशः	११	३०
२४	महेश्वरांशः	१२	१	२	३	४	५	६	७	८	९	१०	११	सुधांशः	१२	०
२५	देवांशः	१	२	३	४	५	६	७	८	९	१०	११	१२	कपटकांशः	१२	३०
२६	आर्द्रांशः	१	२	३	४	५	६	७	८	९	१०	११	१२	यमांशः	१३	०
२७	कलिनाशांशः	२	३	४	५	६	७	८	९	१०	११	१२	१	घोरांशः	१३	३०
२८	क्षितीश्वरांशः	२	३	४	५	६	७	८	९	१०	११	१२	१	दावाग्न्यंशः	२४	०
२९	कमलाकरांशः	३	४	५	६	७	८	९	१०	११	१२	१	२	कालांशः	१४	३०
३०	गुलिकांशः	३	४	५	६	७	८	९	१०	११	१२	१	२	मृत्यारंशः	१५	०
३१	मृत्योरंशः	४	५	६	७	८	९	१०	११	१२	१	२	३	कुलिकांशः	१५	३०
३२	कालांशः	४	५	६	७	८	९	१०	११	१२	१	२	३	कमलाकरांशः	१६	०
३३	दावाग्न्यंशः	५	६	७	८	९	१०	११	१२	१	२	३	४	क्षितीश्वरांशः	१६	३०

३४	घोरांशः	५	६	७	८	९	१०	११	१२	१	२	३	४	कालिनाशांशः	१७	०
३५	यमांशः	६	७	८	९	१०	११	१२	१	२	३	४	५	आर्द्रांशः	१७	३०
३६	कण्टकांशः	६	७	८	९	१०	११	१२	१	२	३	४	५	देवांशः	१८	०
३७	सुधांशः	७	८	९	१०	११	१२	१	२	३	४	५	६	महेश्वरांशः	१८	३०
३८	अमृतांशः	७	८	९	१०	११	१२	१	२	३	४	५	६	विष्ण्वंशः	१९	०
३९	पूर्णचन्द्रांशः	८	९	१०	११	१२	१	२	३	४	५	६	७	ब्रह्मांशः	१९	३०
४०	विषप्रदग्धांशः	८	९	१०	११	१२	१	२	३	४	५	६	७	हेरम्बांशः	२०	०
४१	नाशांशः	९	१०	११	१२	१	२	३	४	५	६	७	८	कोमलांशः	२०	३०
४२	वंशक्षयांशः	९	१०	११	१२	१	२	३	४	५	६	७	८	मृद्वंशकः	२१	०
४३	उत्पातांशः	१०	११	१२	१	२	३	४	५	६	७	८	९	चंद्रांशः	२१	३०
४४	कालरूपांशः	१०	११	१२	१	२	३	४	५	६	७	८	९	अमृतांशः	२२	०
४५	सौम्यांशः	११	१२	१	२	३	४	५	६	७	८	९	१०	अहिभागांशः	२२	३०
४६	कोमलांशः	११	१२	१	२	३	४	५	६	७	८	९	१०	कालांशः	२३	०
४७	शीतलांशः	१२	१	२	३	४	५	६	७	८	९	१०	११	मरुत्वदंशः	२३	३०
४८	दंष्ट्राकरालांशः	१२	१	२	३	४	५	६	७	८	९	१०	११	अपांपत्यंशः	२४	०
४९	इंदुमुखांशः	१	२	३	४	५	६	७	८	९	१०	११	१२	पुरीषांशः	२४	३०
५०	प्रवीणांशः	१	२	३	४	५	६	७	८	९	१०	११	१२	मायांशः	२५	०
५१	कालाग्न्यंशः	२	३	४	५	६	७	८	९	१०	११	१२	१	अग्न्यंशः	२५	३०
५२	दंडायुधांशः	२	३	४	५	६	७	८	९	१०	११	१२	१	गरलांशः	२६	०
५३	निर्मलांशः	३	४	५	६	७	८	९	१०	११	१२	१	२	कुलघ्नांशः	२६	३०
५४	सौम्यांशः	३	४	५	६	७	८	९	१०	११	१२	१	२	भ्रष्टांशः	२७	०
५५	क्रूरांशः	४	५	६	७	८	९	१०	११	१२	१	२	३	किन्नरांशः	२७	३०
५६	अतिशीतलांशः	४	५	६	७	८	९	१०	११	१२	१	२	३	यक्षांशः	२८	०
५७	सुधांशः	५	६	७	८	९	१०	११	१२	१	२	३	४	कुबेरांशः	२८	३०
५८	पयोधीशांशः	५	६	७	८	९	१०	११	१२	१	२	३	४	देवांशः	२९	०
५९	भ्रमणांशः	६	७	८	९	१०	११	१२	१	२	३	४	५	राक्षसांशः	२९	३०
६०	इन्दुरेखांशः	६	७	८	९	१०	११	१२	१	२	३	४	५	घोरांशः	३०	०

अथ वर्गभेदानाह ।

वर्गभेदानहं वक्ष्ये मैत्रेय त्वं विधारय ॥ षड्वर्गाः सप्तवर्गाश्च दिग्वर्गा नृपवर्गकाः ॥ ९१ ॥ भवंति वर्गसंयोगे षड्वर्गे किंशुकादयः ॥ द्वाभ्यां किंशुकनामा च त्रिभिर्व्यंजनमुच्यते ॥ ९२ ॥ चतुर्भिश्चामराख्यं च छत्रं पंचभिरेव च ॥ षड्भिः कुंडलयोगः स्यान्मुकुटाख्यं च सप्तभिः ॥ ९३ ॥ सप्तवर्गेऽथ दिग्वर्गे पारिजातादिसंज्ञकाः ॥ पारिजातं भवेद्द्वाभ्यामुत्तमं त्रिभिरुच्यते ॥ ९४ ॥ चतुर्भिर्गोपुराख्यं स्याच्छरैः सिंहासनं तथा ॥ पारावतं भवेत्षड्भिर्देवलोकं च सप्तभिः ॥ ९५ ॥ वसुभिर्ब्रह्मलोकाख्यं नवभिः शक्रवाहनम् ॥ दिग्भिः श्रीधामयोगं स्यादथषोडशवर्गके ॥ ९६ ॥ भेदकं च भवेद्द्वाभ्यां त्रिभिः स्यात्कुसुमाख्यकम् ॥ चतुर्भिर्नागपुष्पं स्यात्पंचाभिः कंदुकाह्वयम् ॥ ॥ ९७ ॥ केरलाख्यं भवेत्षड्भिः सप्ताभिः कल्पवृक्षकम् ॥ अष्टभिश्चंदनवनं नवभिः पूर्णचंद्रकम् ॥ ९८ ॥ दिग्भिरुच्चैः श्रवानाम रुद्रैर्धन्वंतरिर्भवेत् ॥ सूर्यकान्तं भवेत्सूर्यैर्विश्वैः स्याद्विद्रुमाख्यकम् ॥ ९९ ॥ शक्रासिंहासनं शक्रैर्गोलोकं तिथिभिर्भवेत् ॥ भूपैः श्रीवल्लभाख्यं स्याद्वर्गा भेदैरुदाहृताः ॥ १०० ॥ स्वोच्चमूलत्रिकोणस्वभवनाधिपतिं तथा ॥ स्वारूढात्केंद्रनाथानां वर्गा ग्राह्याः सुधीमता ॥ १०१ ॥ अस्तंगता ग्रहजिता नीचगा दुर्बलास्तथा ॥ शयनादिवयादुस्था उत्पन्ना योगनाशकाः ॥ १०२ ॥

किंशुकादिसप्तकवर्गसंज्ञाचक्रमिदमाह.					
२	३	४	५	६	७
किंशुकाख्यम्	व्यंजनाख्यम्	चामराख्यम्	छत्रम्	कुंडलाख्यम्	मुकुटाख्यम्

पारिजातादिदशवर्गसंज्ञाचक्रमिदम्.

२	३	४	५	६	७	८	९	१०
पारिजातं	उत्तमम्	गोपुराख्यं	सिंहासनं	पारावतं	देवलोकं	ब्रह्मलोकं	शक्रवाहनं	श्रीधाम

भेदादिषोडशवर्गसंज्ञाचक्रमिदम्.

२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६
भेदकम्	कुसुमाख्यम्	नागपुष्पम्	कंदुकाह्वयम्	केरलाख्यम्	कल्पवृक्षकम्	चंदनवनम्	पूर्णचंद्रकम्	उच्चैः श्रवा	धन्वंतरिः	सूर्यकान्तम्	विद्रुमाख्यम्	शक्रसिंहासनं	गोलोकम्	श्रीवल्लभाख्यं

अथ षोडशवर्गेषु चिंता लग्नं वदाम्यहम् ॥ लग्नं देहस्य विज्ञानं होरायां संपदादिकम् ॥१०३॥ द्रेष्काणे भ्रातृजं सौख्यं तुर्यांशे भाग्य चिंतनम् ॥ पुत्रपौत्रादिकानां वै चिंतनं सप्तमांशके ॥ १०४ ॥ नवमांशे कलत्राणां दशमांशे महत्फलम् ॥ द्वादशांशे तथा पित्रोश्चितनं षोडशांशके ॥ १०५ ॥ सुखाऽसुखस्य विज्ञानं वाहनानां तथैव च ॥ उपासनाया विज्ञानं साध्यं विंशतिभागके ॥ १०६ ॥ विद्याया वेदबाह्वंशे भांशे चैव बलाऽबलम् ॥ त्रिंशांशके रिष्टफलं खवेदांशे शुभाऽशुभम् ॥ १०७ ॥ अक्षवेदांशभागे च षष्ट्यंशेऽखिलमीक्षयेत ॥ यत्र कुत्रापि सम्प्राप्तः क्रूरषष्ट्यंशकाधिपः ॥ १०८ ॥ तत्र नाशो न संदेहो मैत्रेयस्य वचो यथा ॥ यत्र कुत्रापि संप्राप्तः कलांशाधिपतिः शुभः ॥१०९॥ यत्र वृद्धिश्च पुष्टिश्च मैत्रेयस्य वचो यथा ॥ इति षोडशवर्गाणां भेदास्ते प्रतिपादिताः ॥११०॥ उदयादिषु भावेषु खेटस्य भवनेषु वा ॥ वर्गविश्वाबलं वीक्ष्य तेषां तेषां शुभाशुभम् ॥१११॥अथातः संप्रवक्ष्यामि वर्गं विश्वाबलं द्विज ॥ यस्य विज्ञानमा-

त्रेण विपाकं दृष्टिगोचरम्॥ ११२ ॥ गृहविश्वाबलं वीक्ष्य सूर्यादीनां
खचारिणाम् ॥ स्वगृहोच्चे बलं पूर्णं शून्यं तत्सप्तमास्थिते ॥ ११३ ॥
ग्रहस्थितिवशाज्ज्ञेयं द्विराश्याधिपतिस्तथा ॥ मध्ये तु पाततो ज्ञेया
ओजयुग्मर्क्षभेदतः ॥ ११४ ॥ सूर्यहोराफलं दद्युर्जीवार्कवसुधात्मजाः
॥ चंद्रास्फूर्जिदर्कपुत्राश्चंद्रहोराफलप्रदाः ॥ ११५ ॥ फलद्वयं
बुधो दद्यात्समे चांद्रतदन्यके ॥ रवेः फलं स्वहोरादौ फलहीनं विरामके
॥ ११६ ॥ मध्येऽनुपातात्सर्वत्र द्रेष्काणेपि विचिंतयेत् ॥ गृहवत्तुर्यभागेऽपि
नवांशादावपि स्वयम् ॥ ११७ ॥ सूर्यः कुजफलं धत्ते
भार्गवस्य निशापतिः ॥ त्रिंशांशके विचिंत्यैवमत्रापि गृहवत्स्मृतः
॥ ११८ ॥ लग्नहोरादृक्काणांकभागसूर्यांशका इति ॥ सर्वे त्रिंशांशसाहिताः
षड्वर्गा विश्वकाः क्रमात् ॥ ११९ ॥ रसनेत्राब्धिपंचाश्विभूमयः
सप्तवर्गके ॥ स्थूलं फलं च संस्थाप्य तत्सूक्ष्मं च ततस्ततः
॥ १२० ॥ ससप्तमांशकं तत्र विश्वका पंचलोचनम् ॥ त्रय सार्द्धद्वयं
सार्द्धवेदं द्वौ रात्रिनायकाः ॥ १२१ ॥ दशवर्गादिरंशाढ्याः कलांशाः
षष्टिभागकाः ॥ त्रयं क्षेत्रस्य विज्ञेयाः पंचषष्ट्यंशकस्य च ॥ १२२ ॥
सार्द्धैकभागाः शेषाणां विश्वकाः परिकीर्तिताः ॥ अथ वक्ष्ये विशेषेण
विश्वकां मम संमताम् ॥ १२३ ॥ क्रमात् षोडशवर्गाणां क्षेत्रा
दीनां पृथक् पृथक्॥होरांशाभागदृक्काणकुचंद्रशशिनः क्रमात् ॥ १२४ ॥
कलांशस्य द्वयं ज्ञेयं त्रयं नंदांशकस्य च ॥ क्षेत्रे सार्द्धं च त्रितयं
चतुःषष्ट्यंशकस्य हि ॥ १२५ ॥ अर्द्धमर्धं तु शेषाणां ह्येतत्स्वीयमुदाहृतम्
॥ पूर्णं विश्वाबलं विंशे धृतिः स्यादाधिमित्रके ॥ १२६ ॥
मित्र पंचदश प्रोक्तं समे दश प्रकीर्तितम् ॥ शत्रौ सप्ताधिशत्रौ च पंचविश्वा
बलं भवेत् ॥ १२७ ॥ वर्गविश्वाः स्वविश्वघ्नाः पुनर्विंशतिभाजिताः ॥
विश्वाफलोपयोग्यं तत्पंचोनं फलदो न हि ॥ १२८ ॥ तदूर्ध्वं स्वल्पफलदं
दशोर्ध्वं मध्यमं स्मृतम् ॥ तिथ्यर्धे पूर्णफलदं बोध्यं सर्वं

खचारिणाम् ॥ १२९ ॥ अथान्यदपि वक्ष्येऽहं मैत्रेय त्वं विधारय ॥ खेटाः पूर्णफलं दद्युः सार्पात्सप्तमके स्थिताः ॥ १३० ॥ फलाभावं विजानीयात्समे सूर्यनभश्चरे ॥ मध्येऽनुपातात्सर्वत्र ह्युदयास्तविशोपकाः ॥ १३१ ॥ वर्गविश्वासमं ज्ञेयं फलमस्य द्विजर्षभ ॥ यच्च यत्र फलं बुद्ध्वा तत्फलं परिकीर्तितम् ॥ १३२ ॥ वर्गविश्वा फलं चादावुदयास्तमतः परम् ॥ पूर्णं पूर्णेति पूर्णं स्यात्सर्वदैवं विचिंतयेत् ॥ १३३ ॥ हीनं हीनेति हीनं स्यात्स्वल्पाल्पेत्यल्पकं स्मृतम् ॥ मध्यं मध्येति मध्यं स्याद्यावत्तस्य दशास्थितिः ॥ १३४ ॥ अथान्यदपि वक्ष्यामि मैत्रेय शृणु सुव्रत ॥ लग्नतुर्यास्तवियतां केंद्रसंज्ञा विशेषतः ॥ १३५ ॥ द्विपंचरंध्रलाभाख्यं ज्ञेयं पणफरादिकम् ॥ त्रिषड्भाग्यव्ययादीनामापोक्लिमामिति द्विज ॥ १३६ ॥ लग्नात्पंचमभाग्यस्य कोणसंज्ञा विधीयते ॥ षष्ठाष्टव्ययभावानां दुःसंज्ञास्त्रिकसंज्ञकाः ॥ १३७ ॥ चतुरस्रं तुर्यरंध्रं कथयन्ति द्विजोत्तम ॥ स्वस्थादुपचयर्क्षाणि त्रिषडायांबराणि हि ॥ १३८ ॥ तनुर्धनं च सहजो बंधुपुत्रारयस्तथा ॥ युवती रंध्रधर्माख्यं कर्मलाभव्ययाः क्रमात् ॥ १३९ ॥ संक्षेपेणैतदुदितमन्यद्बुद्ध्यनुसारतः ॥ किंचिद्विशेषं वक्ष्यामि यथा ब्रह्ममुखाच्छ्रुतम् ॥ १४० ॥ नवमेपि पितुर्ज्ञानं सूर्याच्च नवमेऽथवा ॥ यत्किंचिद्दशमे लाभे तत्सूर्याद्दशमे शिवे ॥ १४१ ॥ तुर्ये तनौ धने लाभे, भाग्ये यच्चिंतनं च तत् ॥ चंद्रात्तुर्ये तनौ लाभे भाग्ये तच्चिंतयेद्ध्रुवम् ॥ १४२ ॥ लग्नाद्दुश्चिक्यभवने यत्कुजाद्विक्रमेऽखिलम् ॥ विचार्यं षष्ठभावस्य बुधात्षष्ठे विलोकयेत् ॥ १४३ ॥ पंचमस्य गुरोः पुत्रे जायायाः सप्तमे भृगोः ॥ अष्टमस्य व्ययस्यापि मन्दान्मृत्यौ व्यये तथा ॥ १४४ ॥ यद्भावाद्यत्फलं चिंत्यं तदीशात्तत्फलं विदुः । ज्ञेयं तस्य फलं ताद्वि

तत्र चिंत्यं शुभाशुभम् ॥ १४५ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे राशिस्वभावषोडशवर्गादिकथनं नाम तृतीयोऽध्यायः ॥ ३ ॥

पराशर उवाच ।



मेषादीनां च राशीनां द्वादशानां पृथक्पृथक् ॥ दृष्टिभेदं प्रवक्ष्यामि शृणु त्वं द्विजसत्तम ॥ १ ॥ राशयोभिमुखान्विप्र पश्यंऽति पार्श्वभं तथा ॥ रंध्रे षष्ठे तथा द्यूनेऽभिमुखो राशिरुच्यते ॥ २ ॥ पार्श्वभं त्वामहं वक्ष्ये चरास्थिरद्विस्वभावकैः ॥ पंचमैकादशौ विप्र चरः पश्येत् क्रमेण हि ॥ ३ ॥ व्युत्क्रमेण स्थिरो विप्र पंचमैकादशौ पुनः ॥ क्रमेण च तृतीयाङ्कौ पश्याति द्विजसत्तम ॥ ४ ॥ उभयोर्व्योमपातालौ पश्यंति सप्तमं तथा ॥ एवं क्रमेण वै विप्र पार्श्वभं राशिरुच्यते ॥ ५ ॥ चरः स्थिरान्पश्याति स्म स्थिरः पश्याति वै चरान् ॥ उभयानुभये विप्र पश्यंतीत्ययमागमः ॥ ६ ॥ समीपराशिं संत्यंक्त्वा राशींस्त्रीननु पश्याति ॥ सर्वोदाहरणं वक्ष्ये शृणु त्वं द्विजनंदन ॥ ७ ॥ मेषो वृषं परित्यज्य सिंहवृश्चिकघटान्द्विज ॥ अनेनैव क्रमेणैव पश्याति स्म द्विजोत्तम ॥८॥ कर्कः सिंहं परित्यक्त्वा वृश्चिकं च घटं वृषम् ॥ तुलापि वृश्चिकं त्यक्त्वा कुंभं सिंहं तथा वृषम् ॥९॥ नक्रो घटं परित्यज्य वृषसिंहौ च वृश्चिकम् ॥ एवंचराणां दृष्टिश्च ज्ञायते द्विजसत्तम॥१०॥वृषो मेषं परित्यज्य मृगं कर्कं तुलां द्विज ॥ सिंहः कर्कं परित्यज्य नक्रं मेषं तुलां द्विज ॥११॥ वृश्चिकस्तु तुलां त्यक्त्वा कर्कं मेषं मृगं तथा ॥ कुंभश्च मकरं त्यक्त्वा मेषं कर्कं तुलां द्विज ॥ १२ ॥ युग्मः कन्याधनुर्मीनान् पश्यतीति द्विजोत्तम ॥ कन्याधनुर्मीनयुग्मान् पश्यत्येवं न संशयः ॥ १३ ॥ धनुर्झषयुग्मकन्याः पश्याति

द्विजसत्तम ॥ मीनो युग्मांगकोदंडान् पश्यति सुमते द्विज ॥ १४ ॥
द्वितीये द्वादशे राशौ पार्श्वभत्वं न चिंतयेत् ॥ श्लोकोक्तपूर्वरीत्या
तु संग्राह्यं द्विजसत्तम ॥ १५ ॥ सूर्यादयः क्रमेणैव पश्यंति च पर-
स्परम् ॥ राशित्रयं त्रयं विप्र सर्वराशिगता ग्रहाः ॥ १६ ॥ चरेषु
संस्थिताः खेटाः पश्यंति स्थिरसंभवान् ॥ स्थिरेषु संस्थिताः
खेटाः पश्यंति चरसंस्थितान् ॥ १७ ॥ उभयस्थस्तु भान्वादिः
पश्यत्युभयसंस्थितान् ॥ निकटस्थं विना खेटा निरीक्षंते
द्विजोत्तम ॥ १८ ॥ चक्रन्यासमहं वक्ष्ये यथावद्ब्रह्मणोदितम् ॥ यस्य
विज्ञानमात्रेण दृष्टिभेदः प्रकाश्यते ॥ १९ ॥ पूर्वं मेषवृषौ लेख्यौ
कर्कसिंहौ च दक्षिणे ॥ तुलालिवारुणे विप्र नक्रकुंभे तथोत्तरे ॥ २० ॥
आग्निकोणे तु मिथुनं नैर्ऋत्यामंगनां द्विजः ॥ वायव्यां धनुषं लेख्य-
मीशान्यां च झषं लिखेत् ॥ २१ ॥ चतुरस्त्रं च विन्यासं ज्ञायते
द्विजसत्तम ॥ वृत्ताकारं विशेषेण ब्रह्मणा चोदितं पुरा ॥ २२ ॥
होराशास्त्रे भिन्नदृष्टिः खेटानां च परस्परम् ॥ त्रिदशे च त्रिकोणे
च चतुरस्त्रे च सप्तमे ॥ २३ ॥ शनिर्देवगुरुर्भौमः परे च क्षमिते-
क्षिताः ॥ पदों द्वं त्रिपदं पूर्णं वदंति गणका जनाः ॥ २४ ॥
शनिपादं त्रिकोणेषु चतुरस्त्रे द्विपादकम् ॥ त्रिपादं सप्तमे विप्र
त्रिदशे पूर्णमेवहि ॥ २५ ॥ चतुरस्त्रे गुरुः पादं सप्तमे च द्विपा-
दकम् ॥ त्रिपादं त्रिदशे विप्र पूर्णं पश्यति कोणभे ॥ २६ ॥ सप्तमे
पादमेकं च द्विपादं त्रिदशे द्विज ॥ त्रिपादं च त्रिकोणेषु भौमः पूर्णं
चतुरस्त्रगे ॥ २७ ॥ अन्येषां त्रिदशे पादं द्विपादं च त्रिकोणगे ॥
चतुरस्त्रे त्रिपादं च पूर्णं पश्यति सप्तमे ॥ २८ ॥ एवं रीत्या निरी-
क्ष्यन्ते ग्रहाख्यादयो द्विज ॥ पूर्वं पंक्तिर्यथा ग्राह्या तथा ग्राह्यं च
पूर्णकम् ॥ २९ ॥ इति बृहत्पाराशरहोरापूर्वखंडसारांशे दृष्टिभेद-
कथनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

अथरिष्टारिष्टभंगाध्यायः ।

चतुर्विंशतिवर्षाणि यावद्गच्छंति जन्मनः ॥ जन्मारिष्टं तु तावत्स्यादायुर्दायं न चिंतयेत् ॥ १ ॥ षष्ठाष्टरिष्टगश्चंद्रः क्रूरैश्च सह वीक्षितः ॥ जातस्य मृत्युदः सद्यस्त्वष्टवर्षैः शुभेक्षितः ॥ २ ॥ शनिवन्मृत्युदः ६ । ८ । १२ सौम्याश्चेद्वक्राः क्रूरवीक्षिताः ॥ शिशोर्जातस्य मासेन लग्ने सौम्यविवर्जिते ॥ ३ ॥ यस्य जन्मानि धीस्थाः स्युः सूर्यार्कीन्दुकुजाभिधाः ॥ तस्य त्वाशु जनित्री च भ्राता च निधनं लभेत् ॥ ४ ॥ पापेक्षितो युतो भौमो लग्नगो न शुभेक्षितः ॥ मृत्युदस्त्वष्टमस्थोपि सौरेणार्केण वा पुनः ॥ ५ ॥ चंद्रसूर्यग्रहे राहुश्चन्द्रसूर्ययुतो यदि ॥ सौरिभौमेक्षितं लग्नं पक्षमेकं स जीवति ॥ ६ ॥ कर्मस्थाने स्थितः सौरिः शत्रुस्थाने कलानिधिः ॥ क्षितिजे सप्तमस्थाने समात्रा म्रियते शिशुः ॥ ७ ॥ लग्ने भास्करपुत्रश्च निधने चंद्रमा यदि ॥ तृतीयस्थो यदा जीवः स यातियममंदिरम् ॥ ८ ॥ होरायां नवमे सूर्यः सप्तमस्थः शनैश्चरः ॥ एकादशे गुरुः शुक्रो मासमेकं स जीवति ॥ ९ ॥ व्यये सर्वे ग्रहा नेष्टा सूर्यशुक्रेंदुराहवः ॥ विशेषान्नाशकर्तारो दृष्ट्या वा भंगकारिणः ॥ १० ॥ पापान्वितः शशी धर्मे द्यूनलग्नगतो यदि ॥ शुभैरवेक्षितयुतस्तदा मृत्युप्रदः शिशोः ॥ ११ ॥ संध्यायां चन्द्रहोरायां गण्डांते निधानाय वै ॥ प्रत्येकं चंद्रपापैश्च केन्द्रगैः स्याद्विनाशनम् ॥ १२ ॥ रवेस्तु मण्डलार्द्धास्तात्सायंसंध्या त्रिनाडिका ॥ तथैवार्द्धोदयात्पूर्वम्प्रातः सन्ध्या त्रिनाडिका ॥ १३ ॥ चक्रपूर्वापरार्द्धेषु क्रूरसौम्येषु कीटभे ॥ लग्नगे निधनं यांति नाऽत्रकार्या विचारणा ॥ १४ ॥ व्ययशत्रुगतैः क्रूरैर्मृत्यु द्रव्यगतैरपि ॥ पापमध्यगते लग्ने सत्यमेव मृतिं वदेत् ॥ १५ ॥ लग्नसप्तमगौ पापौ चंद्रोऽपि क्रूरसंयुतः ॥ यदा त्ववीक्षितः सौम्यैः शीघ्रान्मृत्युर्भवेत्तदा ॥ १६ ॥ जीर्णे शशिनि लग्नस्थे पापैः केन्द्रा

ष्टसंस्थितैः ॥ यो जातो मृत्युमाप्नोति स विप्रेश न संशयः ॥ १७ ॥
पापयोर्मध्यगश्चन्द्रोलग्नाष्टाद्यंतसप्तमः ॥ अचिरान्मृत्युमाप्नोति यो जातः
साशिशुस्तदा ॥ १८ ॥ पापद्वयमध्यगते चन्द्रे लग्नसमाश्रिते ॥
सप्ताष्टमेन पापेन मात्रा सह मृतः शिशुः ॥ १९ ॥ शनैश्चरार्कभोमेषु
रिष्फधर्माष्टमेषु च ॥ शुभैरवीक्ष्यमाणेषु यो जातो निधनं
गतः ॥ २० ॥ यद्द्रेष्काणे च यामित्रे यस्य स्याद्दारुणो ग्रहः ॥
क्षीणचन्द्रो विलग्नस्थाः सद्यो हरति जीवितम् ॥ २१ ॥ आपोक्लिमस्थिताः
सर्वे ग्रहा बलविवर्जिताः ॥ षण्मासं वा द्विमासं वा तस्यायुः
समुदाहृतम् ॥ २२ ॥

अथ मातृकष्टम् ।

चन्द्रमा यदि पापानां त्रितये न प्रदृश्यते ॥ मातृनाशो भवेत्तस्य
शुभदृष्टे शुभं वदेत् ॥ २३ ॥ धने राहुर्बुधः शुक्रः सौरिः सूर्यो
यदा स्थितः ॥ तस्य मातुर्भवेन्मृत्युर्मृते पितरि जायते ॥ २४ ॥
पापात्सप्तमरन्ध्रस्थे चन्द्रे पापसमन्विते ॥ बलिभिः पापकैर्दृष्टे जाते
भवति मातृहा ॥ २५ ॥ उच्चस्थो वाऽथ नीचस्थः सप्तमस्थो यदा
रविः ॥ पानहीनो भवेद्बाल अजाक्षीरेण जीवति ॥ २६ ॥ चन्द्राच्चतुर्थगः
पापो रिपुक्षेत्रे यदा भवेत् ॥ तदा मातृवधं कुर्यात्केंद्रे यदि
शुभो न चेत् ॥ २७ ॥ द्वादशे रिपुभावे च यदा पापग्रहो भवेत् ॥
तदा मातुर्भयं विंद्याच्चतुर्थे दशमे पितुः ॥ २८ ॥ लग्ने क्रूरो व्यये
क्रूरो धने सौम्यस्तथैव च ॥ सप्तमे भवने क्रूरः परिवारक्षयंकरः ॥
॥ २९ ॥ लग्नस्थे च गुरौ सौरौ धने राहौ तृतीयगे ॥ इति चेज्जन्मकाले
स्यान्माता तस्य न जीवति ॥ ३० ॥ क्षीणचन्द्रात्त्रिकोणस्थैः
पापैः सौम्यविवर्जितैः ॥ माता परित्यजेद्बालं षण्मासाच्च न
संशयः॥ ३१ ॥ एकांशकस्थौ मंदारौ यत्र कुत्र स्थितौ यदा ॥शशिकेन्द्रगतौ
तौ वा द्विमातृभ्यां न जीवति ॥ ३२ ॥

अथ पितृकष्टम् ।

लग्ने सौरिर्मदे भौमः षष्ठस्थाने च चंद्रमाः ॥ इति चेज्जन्मकाले स्यात्पिता तस्य न जीवति ॥ ३३ ॥ लग्ने जीवो धने मंदरविभौमबुधास्तथा ॥ विवाहसमये तस्य बालस्य म्रियते पिता ॥ ३४ ॥ सूर्यः पापेन संयुक्तः सूर्यो वा पापमध्यगः ॥ सूर्यात्सप्तमगः पापस्तदापितृवधोभवेत् ॥ ३५ ॥ सप्तमेभवने सूर्यः कर्मस्थोभूमिनंदनः ॥ राहुर्व्यये न यस्यैव पिता कष्टेन जीवति ॥ ३६ ॥ दशमस्थोयदाभौमः शत्रुक्षेत्रसमाश्रितः ॥ म्रियते तस्य जातस्य पिता शीघ्रं न संशयः ॥ ३७ ॥ रिपुस्थाने यदा चंद्रो लग्नस्थाने शनैश्चरः ॥ कुजश्च सप्तमे स्थाने पिता तस्य न जीवति ॥ ३८ ॥ भौमांशकस्थिते भानौ स्वपुत्रेण निरीक्षिते ॥ प्राग्जन्मनो निवृत्तिः स्यान्मृत्युर्वापि शिशोः पितुः ॥ ३९ ॥ पाताले चांबरे पापौ द्वादशे च यदा स्थितौ ॥ पितरं मातरं हत्वा देशाद्देशांतरं व्रजेत् ॥ ४० ॥ राहुजीवौ रिपुक्षेत्रे लग्ने वाथ चतुर्थके ॥ त्रयोविंशतिमे वर्षे पुत्रस्तातं न पश्यति ॥ ४१ ॥ भानुः पिता च जंतूनां चंद्रो माता तथैव च ॥ पापदृष्टियुतो भानुः पापमध्यगतोऽपि वा ॥ ॥ ४२ ॥ पित्ररिष्टं विजानीयाच्छिशोर्जातस्य निश्चितम् ॥ भानोः षष्ठाष्टमर्क्षस्थैः पापैः सौम्यविवर्जितैः ॥ चतुरस्रगतैर्वापि पित्ररिष्टंविनिर्दिशेत् ॥ ४३ ॥

अथारिष्टभंगमाह ।

एकोऽपि ज्ञार्यशुक्राणां लग्नात्केंद्रगतोयदि ॥ अरिष्टं निखिलं हंति तिमिरं भास्करो यथा ॥ ४४ ॥ एक एव बली जीवो लग्नस्थो रिष्टसंचयम् ॥ हंति पापक्षयं भक्त्या प्रणाम इव शूलिनः ॥ ४५ ॥ एक एव विलग्नेशः केंद्रसंस्थो बलान्वितः ॥ अरिष्टं निखिलं हंति पिनाकी त्रिपुरं यथा ॥ ४६ ॥ शुक्लपक्षे क्षपाजन्म लग्ने सौम्यानि-

रीक्षिते ॥ विपरीतं कृष्णपक्षे तथारिष्टविनाशनम् ॥ ४७ ॥ व्ययस्थाने यदा सूर्यस्तुलालग्ने तु जायते ॥ जीवेत्स शतवर्षाणि दीर्घायुर्बालको भवेत् ॥ ४८ ॥ गुरुभौमौ यदा युक्तौ गुरुदृष्टोऽथ वा कुजः ॥ हत्वारिष्टमशेषं च जनन्याः शुभकृद्भवेत् ॥ ४९ ॥ चतुर्थदशमे पापः सौम्यमध्ये यदा भवेत् ॥ पितुः सौख्यकरो योगः शुभैः केंद्रत्रिकोणगैः ॥ ५० ॥ लग्नाच्चतुर्थे यदि पापखेटः केंद्रत्रिकोणे सुरराजमंत्री ॥ कुलद्वयानंदकरे प्रसूतौ दीर्घायुरारोग्यसमन्वितश्च ॥ ५१ ॥ सौम्यान्तरगतैः पापैः शुभैः केंद्रत्रिकोणगैः ॥ सद्योनाशयतेरिऽष्टं तद्भावोत्थफलं न तत् ॥ ५२ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे रिष्टारिष्टभंगाऽध्यायः ॥ ५ ॥

अथ प्रकाशकग्रहफलाध्यायः ।

शूरो विमलनेत्रांशः सुस्तब्धो निर्घृणः खलः ॥ मूर्तिस्थे धूमसंप्राप्ते गाढरोषो नरः सदा ॥ १ ॥ रोगी धनी तु हीनांगो राज्यापहतमानसः ॥ द्वितीये धूमसंप्राप्ते मंदप्राज्ञो नपुंसकः ॥ २ ॥ मतिमान् शौर्यसंग्रामे इष्टचित्तः प्रियंवदः ॥ धूमे सहजभावस्थे धनाढ्यो धनवान् भवेत् ॥ ३ ॥ कलत्रांगपरित्यक्तो नित्यं मनसि दुःखितः ॥ चतुर्थे धूमसंप्राप्ते सर्वशास्त्रार्थचिंतकः ॥ ४ ॥ स्वल्पापत्यो धनैर्दीनो धूमे पंचमसंस्थिते ॥ गुरुता सर्वभक्षं च सुहृन्मंत्रविवर्जितः ॥ ५ ॥ बलवाञ्छत्रुवधको धूमे च रिपुभावगे ॥ बहुतेजोयुतः ख्यातः सदा रोगविवर्जितः ॥ ६ ॥ निर्धनः सततं कामी परदारेषु कोविदः ॥ धूमे सप्तमगे प्राप्तो निस्तेजः सर्वदा भवेत् ॥ ७ ॥ विक्रमेण परित्यक्तः सोत्साही सत्यसंगरः ॥ अप्रियो निष्ठुरः स्वामी धूमे मृत्युगते सति ॥ ८ ॥ सुतसौभाग्यसंपन्नो धनी मानी दयान्वितः ॥ धर्मस्थाने स्थिते धूमे धनवान्बंधुवत्सलः ॥ ९ ॥ सुतसौभाग्यसंयुक्तः संतोषी

मतिमान् सुखी ॥ कर्मस्थे मानवो नित्यं धूमे सत्यपदास्थितः ॥ १० ॥ धनधान्यहिरण्याढ्यो रूपवांश्च कलान्वितः धूमे लाभगते चैव विनीतो गीतकोविदः ॥ ११ ॥ पतितः पापकर्मा च द्वादशे धूमसंगते ॥ परदारेषु संसक्तो व्यसनी निर्घृणः शठः ॥ १२ ॥ इति धूमफलम् ॥

अथ पातफलानि ।

मूर्तौ च पाते संप्राप्ते दुःखेनांगप्रपीडितः ॥ क्रूरो घातकरो मूर्खो द्वेष्यो बंधुजनस्य च ॥ १३ ॥ जिह्मोऽतिपित्तवान् भोगी धनस्थे पातसंज्ञके ॥ निर्घृणश्च कृतघ्नश्च दुष्टात्मा पापकृत्तथा ॥ १४ ॥ स्थिरप्रज्ञो रणी दाता धनाढ्यो राजवल्लभः ॥ सहजे पातसंप्राप्ते सेनाधीशो भवेन्नरः ॥ १५ ॥ बंधव्याधिसमायुक्तः सुतसौभाग्यवर्जितः ॥ चतुर्थगो यदा पातस्तदा स्यान्मनुजश्च सः ॥ १६ ॥ दरिद्रो रूपसंयुक्तः पाते पंचमगे यदि ॥ कफपित्तानिलैर्युक्तो निष्ठुरो निरपत्रपः ॥ १७ ॥ शत्रुहन्ता सुपुष्टश्च सर्वास्त्राणां च ग्राहकः ॥ कलासु निपुणः शांतः पाते शत्रुगते सति ॥ १८ ॥ धनदारसुतैस्त्यक्तः स्त्रीजितः सप्तमास्थितः ॥ पाते कलत्रगे कामी निर्लज्जः परसौहृदः ॥ १९ ॥ विकलाक्षो विरूपश्च दुर्भगो द्विजनिंदकः ॥ मृत्युस्थाने स्थिते पाते रक्तपीडापरिप्लुतः ॥ २० ॥ बहुव्यापारको नित्यं बहुमित्रो बहुश्रुतः ॥ धर्मभे पातसंप्राप्तो स्त्रीप्रियज्ञः प्रियंवदः ॥ २१ ॥ सश्रीको धर्मकृच्छान्तो धर्मकार्येषु कोविदः ॥ कर्मस्थे पातसंप्राप्ते महाप्राज्ञो विचक्षणः ॥ २२ ॥ प्रभूतधनवान्मानी सत्यवादी दृढव्रतः ॥ अश्वाढ्यो गीतसंसक्तः पाते लाभगते सति ॥ २३ ॥ कोपी च बहुकर्माढ्यो व्यंगो धर्मस्य दूषकः ॥ व्ययस्थाने गते पाते विद्वेषी निजबंधुभिः ॥ २४ ॥ इति पातफलानि ॥

अथ परिधिफलम् ।

विद्वान्सत्यरतः शांतो धनवान् पुत्रवाञ्छुचिः ॥ दाता च परिधौ

मूर्तौ जायते गुरुवत्सलः ॥ २५ ॥ ईश्वरो रूपवान् भोगी सुखी धर्मपरायणः ॥ धनस्थे परिधौ प्राप्ते प्रभुर्भवति मानवः ॥ २६ ॥ स्त्रीवल्लभः सुरूपांगो देवस्वजनसंगतः ॥ तृतीये परिधौ भृत्यो गुरुभक्तिसमन्वितः ॥ २७ ॥ परिधौ सुखभावस्थे विस्मितं त्वरिमङ्गलम् ॥ अक्रूरं त्वथ सम्पूर्णं कुरुते गीतकोविदः ॥ २८ ॥ लक्ष्मीवान् शीलवान् कांतः प्रियवान् धर्मवत्सलः ॥ पंचमे परिधौ जाते स्त्रीणां भवति वल्लभः ॥ २९ ॥ व्यक्तोर्थपुत्रवान् भोगी सर्वसत्त्वहिते रतः ॥ परिधौ रिपुभावस्थे शत्रुहा जायते नरः ॥ ३० ॥ स्वल्पापत्यसुखैर्हीनो मंदप्रज्ञः सुनिष्ठुरः ॥ परिधौ द्यूनभावस्थे स्त्रीणां व्याधिश्च जायते ॥ ३१ ॥ अध्यात्मचिंतकः शांतो दृढकायो दृढव्रतः ॥ धर्मवांश्च ससत्त्वश्च परिधौ रंध्रसंज्ञिते ॥ ३२ ॥ पुत्रान्वितः सुखी कांतो धनाढ्यो लौल्यवर्जितः ॥ परिधौ धर्मगे मानी अल्पसंतुष्टमानसः ॥ ३३ ॥ क्वचिदज्ञस्तथा भोगी दृढकायो ह्यमत्सरः ॥ परिधौ दशमे प्राप्ते सर्वशास्त्रार्थपारगः ॥ ३४ ॥ स्त्रीभोगी गुणवांश्चैव मतिमान्स्वजनप्रियः ॥ लाभपे परिधौ जाते मंदाग्निः संसुपद्यते ॥ ३५ ॥ व्ययस्थे परिधौ जाते गुरुनिंदापरायणः ॥ ३६ ॥ इति परिधिफलम् ॥

अथ चापफलानि ।

धनधान्यहिरण्याढ्यः कृतज्ञः संमतः सताम् ॥ सर्वदोषपरित्यक्तश्चापे तनुगते नरः ॥ ३७ ॥ प्रियंवदः प्रगल्भाढ्यो विनीतो विद्याधिकः ॥ धनस्थे चापसंप्राप्ते रूपवान् धर्मतत्परः ॥ ३८ ॥ कृपणोऽतिकलाभिज्ञश्चौर्यकर्मरतः सदा ॥ सहजे धनुषि प्राप्ते हीनांगो मत्तसौहृदः ॥ ३९ ॥ सुखी गोधनधान्यादिराजसन्मानपूजितः ॥ धनुषि सुखसंस्थे तु नीरोगो ननु जायते ॥ ४० ॥ रुचिमान् दीर्घदर्शी च देवभक्तः प्रियंवदः ॥ चापे पंचमभे जातो विवृद्धः सर्वक-

र्मणि ॥४१॥ शत्रुहंताऽतिनिर्धूर्तः सुखी प्रीतिरुचिः शुचिः॥ अरिस्थानगते चापे सर्वकर्मसमृद्धिभाक् ॥ ४२ ॥ ईश्वरो गुणसंपूर्णः शास्त्रविद्धार्मिकः प्रियः ॥ चापे सप्तमभावस्थे भवतीति न संशयः ॥ ४३ ॥ परकर्मरतः क्रूरः परदारपरायणः ॥ अष्टमस्थानगे चापे करोति विकलांऽतिकः ॥ ४४ ॥ तपस्वी व्रतचर्यासु निरतो विद्ययाऽधिकः ॥ धर्मस्थे यदि चापे च मानज्ञो लोकविश्रुतः ॥ ४५ ॥ बहुपुत्रधनैश्वर्यो गोमहिष्यादिमान् भवेत् ॥ कर्मस्थे चापसंयुक्ते जायते लोकविश्रुतः ॥ ४६ ॥ लाभगे चापसंपाते लाभयुक्तो भवेन्नरः ॥ नीरोगो दृढकोपाग्निर्मंत्रस्त्रीपरमास्त्रवित् ॥४७॥ खलेऽतिमानी दुर्बुद्धिर्निर्लज्जो व्ययसंस्थितः चापे परस्त्रीसंयुक्तो जायते निर्धनः सदा ॥ ४८ ॥ इति चापफलानि ॥

अथ शिखिफलम् ।

कुशलः सर्वविद्यासु सुखी वाङ्निपुणः प्रियः ॥ मूर्तिस्थे शिखिसंपाते सर्वकामान्वितो भवेत् ॥ ४९ ॥ वक्ता प्रियंवदः कांतो धनस्थानगते शिखी ॥ काव्यकृत्पंडितो मानी विनीतो वाहनान्वितः ॥ ५० ॥ कंदर्पक्रूरकर्मा च कृशांगो धनवर्जितः ॥ शिखिनि सहजस्थे तु तीव्ररोगी प्रजायते ॥ ५१ ॥ रूपवान् गुणसंपन्नः सात्त्विको विश्रुतिप्रियः ॥ सुखस्थे तु शिखिनि सदा भवति सौख्यभाक् ॥ ५२ ॥ सुखी भोगी कलाविच्च पंचमस्थानगः शिखी ॥ युक्तिज्ञो मतिमान् वाग्मी गुरुभक्तिसमन्वितः ॥ ५३ ॥ मातृपक्षक्षयकरः पीठगो बहुबांधवः ॥ रिपुस्थाने शिखिप्राप्ते शूरः कांतो विचक्षणः ॥ ५४ ॥ रक्तपीडाविचरतः कामी भोगसमन्वितः ॥ शिखी तु सप्तमस्थाने वेश्यासु कृतसौहृदः ॥ ५५ ॥ नीचकर्मरतः पापो निर्लज्जो निंदकः सदा ॥ मृत्युस्थाने शिखिप्राप्ते गतरूप्यपरपक्षकः ॥ ५६ ॥ लिंगधारी प्रसन्नात्मा सर्वभूतहिते रतः ॥ धर्मभे

शिखिनि प्राते धर्मकार्येषु कोविदः ॥ ५७ ॥ सुखसौभाग्यसंपन्नः कामिनीनां च वल्लभः ॥ दाता द्विजसमायुक्तः कर्मस्थे शिखिनि भवेत् ॥ ५८ ॥ नित्यलाभसुधर्मी च लाभे शिखिनि पूज्यते ॥ धनाढ्यः सुभगः शूरः सुयज्ञश्चातिकोविदः ॥ ५९ ॥ पापकर्मरतः शूरः श्रद्धाहीनोऽघृणो नरः ॥ परदाररतो रौद्रः शिखिनि व्ययगे सति ॥ ६० ॥ इति शिखिफलम् ॥

अथ गुलिकफलम् ।

रोगार्त्तः सततं कामी पापात्माधिगतः शठः ॥ मूर्तिस्थे गुलिके मंदे खलभावोऽतिदुःखितः ॥ ६१ ॥ विकृतो दुःखितः क्षुद्रो व्यसनी च गतत्रपः ॥ धनस्थे गुलिके जातो निःस्वो भवति मानवः ॥ ६२ ॥ चार्वंगो ग्रामपः पुण्यः संयुक्तः सज्जनप्रियः ॥ मंदे तृतीयगे जातो जायते राजपूजितः ॥ ६३ ॥ रोगी सुखपरित्यक्तः सदा भवति पापकृत् ॥ यमात्मजे सुखस्थे तु वातपित्ताधिको भवेत् ॥ ६४ ॥ विस्तुतिर्विधनोऽल्पायुर्द्वेषी क्षुद्रो नपुंसकः ॥ सुतस्थानगते पापे स्त्रीजितो नास्तिको भवेत् ॥ ६५ ॥ वीतशत्रुः सुपुष्टांगो रिपुस्थाने यमात्मजे ॥ सुदीप्तः सम्मतः स्त्रीणां सोत्साहः सुदृढो हितः ॥ ६६ ॥ स्त्रीजितः पापकृज्जारः कृशांगो गतसौहृदः ॥ जीवितः स्त्रीधनेनैव सप्तमस्थे रवेः सुते ॥ ६७ ॥ क्षुधालुर्दुःखितः क्रूरस्तीक्ष्णरोषोऽतिनिर्घृणः ॥ रंध्रे प्राणहरो निःस्वो जायते गुणवर्जितः ॥ ६८ ॥ बहुक्लेशी कृशतनुर्दुष्टकर्मातिनिर्घृणः ॥ मंदे धर्मस्थिते मंदः पिशुनो बहिराकृतिः ॥ ६९ ॥ पुत्रान्वितः सुखी भोक्ता देवाग्न्यर्चनवत्सलः ॥ दशमे गुलिके जातो योगधर्माश्रितः सुखी ॥ ७० ॥ सुस्त्रीभोगी प्रजाध्यक्षो बंधूनां च हिते रतः ॥ लाभे यमानुजे जातो नीचांगः सार्वभौमकः ॥ ७१ ॥ नीचकर्माश्रितः पापो हीनांगो दुर्भगोऽलसः ॥ व्ययगे गुलिके जातो नीचेषु कुरुते रतिम् ॥ ७२ ॥ इति गुलिकः ॥

अथ प्राणपदफलम्।

मूकोन्मत्तो जडांगस्तु हीनांगो दुःखितः कृशः ॥ लग्ने प्राणपदे
क्षीणो रोगी भवति मानवः ॥ ७३ ॥ बहुधान्यो बहुधनो बहुभृत्यो
बहुप्रजः ॥ धनस्थानास्थिते प्राणे सुभगो जायते नरः ॥ ७४ ॥ हिंस्रो
गर्वसमायुक्तो निष्ठुरोऽतिमलिम्लुचे ॥ तृतीयगे प्राणपदे गुरुभक्तिविवर्जितः
॥ ७५ ॥ सुखस्थे तु सुखी कांतः सुहृद्रामासु वल्लभः ॥
गुरौ परायणः शीलः प्राणे वै सत्यतत्परः ॥ ७६ ॥ सुखभाक् च
क्रियोपेतस्त्वपचारदयान्वितः ॥ पंचमस्थे प्राणपदे सर्वकामसमन्वितः
॥ ७७ ॥ बंधुशत्रुवशस्तीक्ष्णो मंदाग्निर्निर्दयः खलः ॥ षष्ठे प्राणोऽल्परोगश्च
वित्तपोऽल्पायुरेव च ॥ ७८ ॥ ईर्षालुः सततं कामी तीव्ररौद्रवपुर्नरः
॥ सप्तमस्थे प्राणपदे दुराराध्यः कुबुद्धिमान् ॥ ७९ ॥
रोगसंतापितांगश्च प्राणपदेऽष्टमे सति ॥ पीडितः पार्थिवैर्दुःखैर्भृत्यबंधुसुतोद्भवैः
॥ ८० ॥ पुत्रवान् धनसंपन्नः सुभगः प्रियदर्शनः ॥
प्राणे धर्मस्थिते भृत्यः सदाऽदुष्टो विचक्षणः ॥ ८१ ॥ वीर्यवान् मतिमान्
दक्षो नृपकार्येषु कोविदः ॥ दशमे वै प्राणपदे देवार्चनपरायणः
॥ ८२ ॥ विख्यातो गुणवान् प्राज्ञो भोगी धनसमन्वितः ॥
लाभस्थानस्थिते प्राणे गौरांगो मानवत्सलः ॥ ८३ ॥ क्षुद्रो दुष्टस्तु
हीनांगो विद्वेषी द्विजबंधुषु ॥ व्यये प्राणे नेत्ररोगी काणो वा जायते
नरः ॥ ८४ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे धूमादिगुलिकप्राणपदफलनिरूपणं
नाम षष्ठोऽध्यायः ॥ ६ ॥

पराशर उवाच।

अथातः संप्रक्ष्यामि अर्गलाफलमुत्तमम् ॥ यस्य विज्ञान मात्रेण
ग्रहाणां च फलं वदेत् ॥ १ ॥ चतुर्थे द्वितीये लाभे च विद्यमानग्रहार्गला
॥ तस्य दृष्ट्यात्मकं ज्ञेयं निर्विशंकं द्विजोत्तम ॥ २ ॥ एक-

ग्रहार्गलाल्पं च द्विग्रहा मध्यमा भवेत् ॥ त्रयेण ग्रहयोगेन अर्गला पूर्णमुच्यते ॥ ३ ॥ राश्यर्गलापि सा ज्ञेया ग्रहयुक्ता विशेषतः ॥ तुर्यवित्तैकादशेषु यस्य कस्यार्गला भवेत् ॥ ४ ॥ द्विविधा साऽर्गला विप्र ब्रह्मणा चोदिता पुरा ॥ शुभकृत् पापकृच्चैव तन्वादिनां विचिन्तयेत् ॥ ५ ॥ भिन्नार्गलां पुनर्वक्ष्ये चतुर्थार्गलपापयुक् ॥ तृतीये तु यदा विप्र बहुपापयुते यदि ॥ ६ ॥ बहुपापा तृतीयस्था पापषड्वर्गयोगतः ॥ पापार्जितः पापदृष्ट्या संयुक्तार्गलकारकः ॥ ७ ॥ तृतीये शुभसंबंधे शुभक्षेत्रे शुभेक्षिते ॥ शुभवर्गे ज षड्वर्गे विज्ञेयं तुर्यमर्गला ॥ ८ ॥ तुर्यवित्तैकादशे च पापयुग्वा शुभोऽपि वा ॥ उभयक्षेत्रसंबंधे अर्गलां कारयेद्विज ॥ ९ ॥ तृतीये बहुपापस्थे बहुयुक्तार्गला भवेत् ॥ निर्बाधिका तु सा ज्ञेया निर्विशंकं द्विजोत्तम ॥ १० ॥ एकेन द्वितयेनापि अर्गला या भवेद्विज ॥ साऽर्गला नैव विज्ञेया बहुपापयुतिं विना ॥ ११ ॥ चतुर्थे धनलाभस्था शुभपापकृतार्गला ॥ तस्यापि बाधकाः खेटा व्योमारिः फतृतीयगाः ॥ १२ ॥ क्रमेण ज्ञायते विप्र चतुर्थे व्योमबाधकम् ॥ धने च व्ययभावे च भयं ज्ञेयं तृतीयकम् ॥ १३ ॥ निर्बाधका च फलदा न दातव्या सबाधका ॥ चिंतनीयं प्रयत्नेन तत्फलं द्विजपुंगव ॥ १४ ॥ अर्गलाया बाधकानां बाधकान् कथयेऽधुना॥नूनं सा विबला खेटा ज्ञायते गणकैस्तदा॥ १५॥ वित्तलाभचतुर्थानां यः पश्यति शुभार्गलाम् ॥ व्ययभ्रातृनभस्थाश्चेद्विपरीताऽर्गला द्विज ॥ १६ ॥ पुनर्योगार्गलं ज्ञेयं त्रिकोणे पूर्ववद्विज ॥ पंचमे चार्गलास्थानं नवमस्तद्विरोधकः ॥ १७ ॥ विपरीतेन केतुश्च नवमेऽर्गलकारकः ॥ पंचमस्थस्तद्विरोधो ज्ञायते गणकैर्द्विज ॥ ॥ १८ ॥ क्रमेण पंचमे केतुः प्रकरोत्यर्गलां द्विज ॥ नवमस्थस्तद्विरोधो लग्नार्गलमिदं विदुः ॥ १९ ॥ राश्यर्गलं च खेटानां चिंतयेद्विधार्गलम् ॥ यस्या यस्या दशा प्राप्ता तस्यां तस्यां फलं भ-

वेत् ॥ २० ॥ यत्र राशिस्थितः खेटस्तस्य पाकांतरे दृशा ॥ तत्र कालं फलं वाच्यं निर्विशंकं द्विजोत्तम ॥ २१ ॥

अथाग्रेऽर्गलाफलमाह ।

पदे लग्ने सप्तमे वा निराभासार्गला द्विज ॥ निर्बन्धा चार्गला तत्र दिष्ट्या भाग्यं भवेन्नरः ॥ २२ ॥ अर्गला प्रतिबंधं च प्रथमांग्रेर्विचिंतयेत् ॥ धनधान्यपुत्रपशुदाराबंधुकुलैर्युतः ॥ २३ ॥ शरीरारोग्यमैश्वर्यभृत्यवाहनसंयुतः ॥ हरभक्तः सुधर्मज्ञो दिष्ट्याभाग्यस्य लक्षणम् ॥ २४ ॥ शुभग्रहार्गला विप्र बहुद्रव्यप्रदायका ॥ पापेन स्वल्पवित्तः स्यान्निर्विशंकं द्विजोत्तम ॥ २५ ॥ उभयार्गला भवेत्तत्र कदाचिद्धनवान् भवेत् ॥ कदाचिद्वित्तचिंतार्तिर्जायते द्विजसत्तम ॥ ॥ २६ ॥ यत्र जन्मानि सोऽपि स्याच्छुभदृष्टे शुभार्गला ॥ तेन दृष्टेक्षिते लग्ने प्राबल्याद्योगकल्पने ॥ २७ ॥ यदि पश्येद्ग्रहस्तत्र विपरीतार्गलास्थितः ॥ प्रथमां तु विजानीयाद्विपरीतार्गलां द्विज ॥ २८ ॥ लग्नसप्तमयोगेन भाग्ययोगं विचिंतयेत् ॥ भाग्यप्रबलता ज्ञेया लग्नसप्तशुभार्गला ॥ २९ ॥ शुभार्गले स्ववृद्धिः स्यात्पापे स्वल्पधनं वदेत् ॥ उभयार्गले तु तत्रैव क्वचिद्वृद्धिः क्वचित् क्षयम् ॥ ३० ॥ तत्तद्राशिदशायां तु अर्गला फलसिद्धये ॥ शुभो वाऽप्यशुभो वापि ह्यर्गलाफलदायकः ॥ ३१ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे अर्गलाफलकथनं नाम सप्तमोऽध्यायः ॥ ७ ॥

कारकाध्यायः ८.

अथाग्रे संप्रक्ष्यामि ग्रहाणां कारकान् द्विज ॥ आत्मादिकारकान् सप्त यथावत् कथयामि ते ॥ १ ॥ रव्यादिशनिपर्यंता भवंति सप्तकारकाः ॥ अंशैः साम्यौ ग्रहौ द्वौ च राह्वंतान् गणयेद्द्विज ॥ २ ॥ रव्यादिपंगुपर्यंतमंशाधिकग्रहोऽपि चेत् ॥ कारकेन्द्रोऽपि

स ज्ञेय आत्मा कारक उच्यते ॥ ३ ॥ अंशसाम्यग्रहो यत्र कलाधिक्यं च पश्यति ॥ कलासाम्ये पलाधिक्यमात्मा कारक ईर्यते ॥ ४ ॥ तत्र राशिकलाधिक्ये नैव ग्राह्यः प्रधानकः ॥ अंशाधिक्ये कारकः स्यादल्पभागोंतकारकः ॥ ५ ॥ मध्यांशो मध्यखेटः स्यादुपखेटः स एव हि ॥ अधोऽधः कारका ज्ञेयाश्चराणि सप्त कारकाः ॥ ६ ॥ तेषां मध्ये प्रधानं तु आत्मकारक उच्यते ॥ जातकराट् स विज्ञेयः सर्वेषां मुख्यकारकः ॥ ७ ॥ यथा भूमौ प्रसिद्धोऽस्ति नराणां क्षितिपालकः ॥ सर्ववार्ताधिकारी च बंधकृन्मोक्षकृत्तथा ॥ ८ ॥ पुत्रामात्यप्रजानां तु तत्तद्दोषगुणैस्तथा ॥ बंधकृन्मोक्षकृद्विप्र तथा सन्मानकारकः ॥ ९ ॥ तथैव कारको राजन् ग्रहाणां फलकारकः ॥ आत्मेत्यादिफलं तत्ते चान्यथा स्थापयेद्द्विज ॥ १० ॥ यथा राजाज्ञया विप्र पुत्रामात्यादयोऽपि च ॥ समर्था लोककार्येषु तथैवान्योपकारकः ॥ ११ ॥ कारकराजवश्येन फलदातान्यकारकः ॥ यथा राजनि क्रुद्धे च सर्वेऽमात्यादयो द्विज ॥ १२ ॥ स्वजनानां कार्यकर्तुमसमर्था भवंति हि ॥ स्निग्धे भूपे ह्यमात्यादिः स्वशत्रूणां द्विजोत्तम ॥ १३ ॥ अकार्यं कर्तुं नो शक्तस्तथैवान्योऽपकारकः ॥ आत्मकारकवश्येन ह्यमात्यादिफलं ददुः ॥ १४ ॥ इत्यात्मकारकः ॥

आत्मकारकखेटेन न्यूनभागो हि तद्ग्रहः ॥ अमात्यसंज्ञा तस्यैव ज्ञायते द्विजसत्तम ॥ १५ ॥ अमात्यन्यूनो भ्राता च भ्रातृन्यूनं च मातृकम् ॥ मातृकारकखेटेन न्यूनभागो हि यो ग्रहः ॥ १६ ॥ स पुत्रकारको ज्ञेयस्तद्धीनो ज्ञातिकारकः ॥ ज्ञातिकारकखेटेन हीनभागो हि यो ग्रहः ॥ १७ ॥ दारकारकाविज्ञेयो निर्विशंकं द्विजोत्तम ॥ चराश्च कारकाः सप्त ब्रह्मणा चोदिताः पुरा ॥ १८ ॥ अंशसाम्यौ ग्रहौ द्वौ च जायेतां यस्य जन्मनि ॥ स्वकारकं विना विप्र लुप्याति चांत्यकारकः ॥ १९ ॥

तत्कारको लुप्यति चेदन्यन्नैवास्ति कारकम् ॥ कारकाणां स्थिराणां च मध्ये संचिंतयेद्द्विज ॥ २० ॥ अधुना संप्रक्ष्यामि खेटान् कारकसंज्ञकान् ॥ यस्य जन्मनि भावानां यथास्थाने च वै द्विज ॥ २१ ॥ स्वर्क्षे तुंगे च मित्रर्क्षे कंटके संस्थिता ग्रहाः ॥ अन्योन्यकारका विप्र कर्मगास्तु विशेषतः ॥ २२ ॥ लग्ने सुखे तथा लाभे ग्रहभाववशेन च ॥ भवंति कारका विप्र विशेषेण च भैरवौ ॥ २३ ॥ स्वमित्रर्क्षोच्चगे हेतुरन्योऽस्य यदि कर्मगः ॥ स सुहृद्गुणसंपन्नः सोऽपि कारक एव वै ॥ २४ ॥ नीचान्वये यस्य जन्म बभूव द्विजसत्तम ॥ पतंति कारका लग्ने प्रधानं च न वाप्नुयात् ॥ २५ ॥ राज्ञां कुले समुत्पन्नो राजा भवति निश्चितम् ॥ एवं कुलानुसारेण कारकाणां फलं भवेत् ॥ २६ ॥ अधुना संप्रक्ष्यामि कारकाणि स्थिराणि च ॥ सूर्यादीनां ग्रहाणां च वीर्यवान् कारको भवेत् ॥ २७ ॥ वीर्यवान् जायते विप्र जन्मनि रविशुक्रयोः ॥ स पितृकारको ज्ञेयो निर्विशंकं द्विजोत्तम ॥ २८ ॥ चंद्रारयोश्च बलवान् मातृकारक उच्यते ॥ भौमद्वयं विशेषेण भगिनीदारभ्रातृकौ ॥ २९ ॥ बुधान्मातुलतो ज्ञेयो मातृतुल्यानपि द्विज ॥ गुरुणाऽत्र च विज्ञेयाः पुत्रस्वामिपितामहाः ॥ ३० ॥ स्वभार्यामातृपितरौ तथा मातामही द्विज ॥ भृगुद्वारा विजानीयादेतेषां शुक्रकारकः ॥ ३१ ॥ अर्यम्णः पुण्यभे तात इंदोर्माता च तुर्यतः ॥ कुजात्तृतीयतो भ्राता मातुलो रिपुभाद्बुधात्॥ ३२॥ देवेज्यात्पंचमात्पुत्रो दैत्येज्याद्द्यूनभात्स्त्रियः॥ मंदादष्टमतो मृत्युस्तातादीनां विचिन्तयेत्॥ ३३॥

अथ भावकारकमाह ।

अधुना संप्रवक्ष्यामि विशेषं भावकारकान् ॥ जनुर्लग्नं च विद्याद्वै आत्मा कारकमेव च ॥ ३४ ॥ धनभावं विजानीयाद्दारकारकमेव च ॥ एकादशे ज्येष्ठभ्रातुस्तृतीये तु कनिष्ठकः ॥ ३५ ॥ सुते

सुतं विजानीयात्तथा सप्तमभावतः ॥ सुतस्थाने ग्रहस्तिष्ठेत्सोऽपि कारक उच्यते ॥ ३६ ॥ सूर्यो १ गुरुः २ कुजः ३ सोमो ४ गुरु ५ भौमः ६ सितः ७ शनिः ८ ॥ गुरु ९ श्चंद्रसुतो १० जीवो ११ मंदश्च १२ भावकारकाः ॥ ३७ ॥ पुनस्तन्वादयो भावाः स्थाप्यास्तेषां शुभाऽशुभम् ॥ लाभं तृतीयं रंध्रं च शत्रुस्वस्त्रीव्ययं तथा ॥ एषां योगेन यो भावस्तन्नाशं प्राप्नुयाद्ध्रुवम् ॥ ३८ ॥ चत्वारो राशयो भद्राः केंद्रकोणशुभावहाः ॥ तेषां संयोगमात्रेण ह्यशुभोऽपि शुभा भवेत् ॥ ३९ ॥

चरकारकग्रहाः स्युः ।

सर्वग्रहेभ्योधिकांशादिनात्मकारकस्तत्क्रमेण ज्ञेयः । आत्माऽमात्यभ्रातृमातृपुत्रज्ञातिदाराँ इत्यादिचरकारकग्रहाः स्युः ।

चरकारकग्रहाणां चक्रम्.

शुक्रः	बृहस्पतिः	शनिः	चंद्रमाः	मंगलः	बुधः	सूर्यः	ग्रहाः
आत्मकारक	अमात्यकारक	भ्रातृकारक	मातृकारक	पुत्रकारक	ज्ञातिकारक	दाराकारक	चरकारकग्रह

अथ सूर्यादिग्रहकारकमाह.

राज्यविद्रुमरक्तवस्त्रमाणिक्यराजवनपर्वतक्षेत्रापितृकारको रविः ॥ ॥ ४० ॥ मातृमनःपुष्टिगंधरसेक्षुगोधूमक्षारकद्विजशक्तिकार्यसस्यरजतादिकारकश्चंद्रः ॥ ४१ ॥ सत्त्वसद्मभूमिपुत्रशीलचौर्यरोगब्रह्मभ्रातृपराक्रमाग्निसाहसराजशत्रुकारकः कुजः ॥ ४२ ॥ ज्योतिर्विद्यामातुलगणितकार्यनर्तनवैद्यहासभीश्रीशिल्पविद्यादिकारको बुधः ॥ ॥ ४३ ॥ स्वकर्मयजनदेवब्राह्मणधनगृहकांचनवस्त्रपत्रामित्रांदोलनादिकारको गुरुः ॥ ४४ ॥ कलत्रकार्मुकसुखगीतशास्त्रकाव्यपुष्पसुकुमारयौवनाभरणरजतयानगर्वलोकमौक्तिकाविभवकवितारसादिकारकः शुक्रः ॥ ४५ ॥ महिषहयगजतैलवस्त्रशृंगारप्रयाणसर्वराज्यदा-

वायुधगृहयुद्धसंचारशूद्रनीलमणिविघ्नकेशशल्यशूलरोगदासदासीजनायुष्यकारकः शनिः ॥ ४६ ॥ प्रयाणसमयसर्परात्रिसकलसुतार्थद्यूतकारको राहुः ॥ ४७ ॥ व्रणरोगचर्मातिशूलस्फुटक्षुधार्तिकारकः केतुः ॥ ४८ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे कारकाध्यायकथनं नामाष्टमोऽध्यायः ॥ ८ ॥

अथ कारकांशोदाहरणम् ।

कारकांशकुंडली.



अत्र तु आत्मकारको भृगुः स च तुलानवमांश अतएव तुलालग्नस्थापितसर्वे ग्रहाः यथा यथा नवमांशस्थितास्तत्र तत्र स्थापिताः ।

कारकग्रहाः स्फुः									
र.	चं.	मं.	बु.	बृ.	शु.	श.	रा.	के.	गु.
८	१२	३	९	११	७	७	७	१	११

अथ कारकांशग्रहफलमाह ।

अधुना संप्रवक्ष्यामि कारस्याधिपान् ग्रहान् ॥ योगसंबंधमात्रेण यथावद्वदतो मम ॥ १ ॥ स्वांशकारककुंडल्यां नवमांशाधिपोऽथवा ॥ यस्मिन्राशौ स्थितो विप्र तद्राशिफलमुच्यते ॥ २ ॥ मेषादिमीनपर्यन्तं सर्वेषां फलमादिशेत् ॥ यथावद्भाषितं शूलिप्रोक्तं यद्रुद्रयामले ॥ ३ ॥ अजांशकारकांशेषु तिष्ठंति च यदा ग्रहाः ॥ तथा मूषकमार्जारौ दुःखदौ भयकारकौ ॥ ४ ॥ सुयोगे च यदा विप्र मार्जारादिप्रसिद्धिदौ ॥ वृषे च कारकांशे च भयार्ती च चतुष्पदात् ॥ ५ ॥ शुभे चतुष्पदात्सिद्धिरिति तत्त्वं द्विजोत्तम ॥ युग्मकारकांशके खेटे कंड्वादिरोगसंभवः ॥ ६ ॥ कर्कांशे च जलादुःखं जलभीतिर्न संशयः ॥ कुष्ठादिरोगसंभूतिः शुभे फलविपर्ययः ॥ ७ ॥ सिंहांशे कारके खेटे तिष्ठत्येव द्विजोत्तम ॥ शुनकादिभयं दद्याच्छुभे

सिद्धिप्रदायकः ॥ ८ ॥ कन्यायां कारकांशे च तिष्ठत्येव यदा ग्रहः ॥ मृत्युवत्कंडुरोगार्तिर्वह्निदोषेण दुःखभाक् ॥ ९ ॥ तुलाख्यकारकांशे च व्यापारेषु रतोऽधिकः ॥ क्रयविक्रयकर्ता च यदि जातो नृपालये ॥ १० ॥ वृश्चिके कारकांशे च सर्पादिभयकारकः ॥ मातुः पयोधरे पीडा जायते द्विजसत्तम ॥ ११ ॥ धनुर्धरकारकांशे वाहनाद्भयमादिशेत् ॥ उच्चात्प्रपतनं वापि कोपि वस्तुसमन्वितः ॥ १२ ॥ नक्रकारकांशे विप्र सिद्धिर्जलचरादयः ॥ शंखमुक्ताप्रवालादिमत्स्यखेचरदेवताः ॥ १३ ॥ कुंभाख्यकारकांशे च तडागादीनि कारयेत् ॥ कीर्तिमान्धर्मवान्सोऽपि जायते द्विजसत्तम ॥१४॥ पश्यति कंडुरोगादि भवतीह न संशयः ॥ मीने च कारकांशे वै सायुज्यमुक्तिभाग्भवेत् ॥ १५ ॥

अथ कारकांशग्रहाणां फलमाह ।

शुभराशौ शुभांशे वा कारके धनवान् भवेत् ॥ तदंशकेंद्रे शुभो नूनं राजा प्रजायते ॥ १६ ॥ कारके शुभराश्यंशे लग्नांशस्थे शुभग्रहे ॥ उपग्रहस्य यश्चांत्ये स्वोच्चस्वर्क्षे शुभर्क्षगे ॥ १७ ॥ पापदृग्योगरहिते कैवल्यं तस्य निर्दिशेत् ॥ मिश्रे मिश्रं विजानीयाद्विपरीते विपर्ययम् ॥ १८॥ चंद्रभृगुवारवर्गस्थे कारके पारदारिकः ॥ वृषतौल्यंशकगते तस्मिन्वाणिज्यवान्भवेत् ॥ १९ ॥ मेषसिंहांशके तस्मिन्ब्रूयान्मूषकदंशकः ॥ कारके कार्मुकांशस्थे वाहनात्पतनं भवेत् ॥ २० ॥ अथैकः कारकांशेषु रव्यादिस्तिष्ठति ग्रहः ॥ तेषां फलं प्रवक्ष्यामि शृणु त्वं द्विजसत्तम ॥ २१ ॥ कारकांशे यदा सूर्यस्तिष्ठति द्विज वीर्ययुक् ॥आदावंते पुमान्सोऽपि राजकार्येषु तत्परः ॥२२॥ कारकांशे तु पूर्णेन्दुर्दैत्याचार्येण वीक्षितः ॥ शतभोगी भवेत्सोऽथ विद्याजीवी भवेद्द्विज ॥ २३ ॥ कारकांशे यदा भौमे बलाढ्येन युतेक्षिते ॥ रसवादी कुंतधारी वह्निकृज्जीवनं भवेत् ॥ २४ ॥ कार-

कांशे यदा सौम्ये तिष्ठत्येव बलाढ्यकः ॥ शिल्पको व्यवहारी च
वणिक्कृत्यपरो द्विज ॥ २५ ॥ कारकांशे गुरौ विप्र कर्मनिष्ठापरो
भवेत् ॥ सर्वशास्त्राधिकारी च विख्यातः क्षितिमंडले ॥ २६ ॥
कारकांशे यदा शुक्रे राजमानी सदा भवेत् ॥ सादिंद्रियः शताब्दायुः
कथनीयं द्विजोत्तम ॥ २७ ॥ कारकांशे यदा सौरिर्मृत्युलोके
प्रसिद्धिवान् ॥ महतां कर्मणां वृत्तिः क्षितिपालेन पूजितः ॥ २८ ॥
कारकांशे यदा राहुर्धनुर्धारी प्रजायते ॥ जांगल्यलोहयंत्रादिकारक-
श्चौरसंगमी ॥ २९ ॥ कारकांशे यदा केतुस्तिष्ठति द्विजसत्तम ॥
व्यवहारी गजादीनामुशंति परद्रव्यके ॥ ३० ॥ कारकांशे यदा
विप्र संस्थितौ रविसैंहिकौ ॥ सर्पाद्भीतिर्भवेन्मृत्युः शुभदृष्ट्या
निवर्तते ॥ ३१ ॥ कारकांशे भानुतमौ शुभषड्वर्गसंयुतौ ॥ विष-
वैद्यो भवेन्नूनं विषहर्ता विचक्षणः ॥ ३२ ॥ भौमेक्षिते कारकांशे
भानुस्वर्भानुसंयुते ॥ अन्यग्रहा न पश्यंति स्ववेश्मपरदाहकः ॥ ३३ ॥
यदि सौम्येक्षिते विप्र ह्यग्निदो नैव जायते ॥ पापर्क्षे च गुरौ दृष्टे
समीपगृहदाहकः ॥ ३४ ॥ सगुलिके कारकांशे पूर्णेन्दुवीक्षिते
द्विज ॥ सति चौरैर्नीतधनः स्वयं चोरोऽथ वा भवेत् ॥ ३५ ॥
सगुलिके कारकांशे अन्यग्रहयुतेक्षिते ॥ बुधदृष्टियुते वापि अंडवृद्धिः
प्रजायते ॥ ३६ ॥ कारकांशे केतुयुक्ते पापग्रहनिरीक्षिते ॥ श्रोत्रच्छेदो
भवेन्नूनं कर्णरोगार्तिना द्विज॥ ३७ ॥ कारकांशे स्थिते केतौ भृगुणा
च समीक्षिते ॥ युते वा जायते विप्र क्रियाकर्मसमन्वितः ॥ ३८ ॥
कारकांशे स्थिते केतौ शनिसौम्यनिरीक्षिते ॥ बलवीर्येण
रहितो जायते सोऽपि मानवः ॥ ३९ ॥ सकेतौ कारकांशे च
बुधशुक्रनिरीक्षिते ॥ जायते योनियुतिको दासीपुत्रोऽथ वा भवेत् ॥
॥ ४० ॥ सकेतौ कारकांशे च अन्यग्रहनिरीक्षिते ॥ शनिदृष्टि-
विहीने च सत्याच्च रहितो भवेत् ॥ ४१ ॥ कारकांशे यदा विप्र भृ-
गुभास्करवीक्षिते ॥ राजप्रेष्यो भवेद्बालो जायते नात्र संशयः ॥ ४२॥

अथ कारकांशदशमफलमाह ।

दशमे कारकांशे च बुधेन समवीक्षिते ॥ व्यापारे बहुलाभश्च महत्कर्मविचक्षणः ॥ ४३ ॥ कारकांशे च दशमे रविणा च युते यदि ॥ गुरुदृष्टे तथा विप्र जायते योगकारकः ॥ ४४ ॥ कारकांशे च दशमे शुभखेटनिरीक्षिते ॥ स्थिरचित्तो भवेद्बालो गंभीरो बहुवीर्यवान् ॥ ४५ ॥

अथ कारकांशे चतुर्थस्थानफलम् ।

पाताले कारकांशे च शशिशुक्रयुतेक्षिते ॥ प्रासादवान् भवेद्बालो विचित्रहर्म्यवान्द्विज ॥ ४६ ॥ कारकांशे च पाताले तुंगखें कोऽपि संस्थितः ॥ हर्म्यमंदिरसंयुक्तो ह्यत्युच्चो बहुदीप्तिमान् ॥ ४७ ॥ कारकांशे च पाताले शनिराहुयुतेक्षिते ॥ विप्रेच्छाटनपट्टीयुग्जायते मंदिरं द्विज ॥ ४८ ॥ कारकांशे च पाताले कुजकेतुशनीक्षिते ॥ ऐष्टिकं मंदिरं तस्य जायते नात्रसंशयः ॥ ४९ ॥ कारकांशे च पाताले गुरुयुक्तानिरीक्षिते ॥ ऐष्टिकं मंदिरं तस्य जायते नात्र संशयः ॥५० ॥ करकांशे च पाताले गुरुयुक्तनिरीक्षिते ॥ कणवेष्टितसंयुक्तं जायते तस्य मंदिरम् ॥ ५१ ॥

अथ कारशांशे नवमभावफलमाह ।

कारकांशे च नवमे शुभखेटयुतेक्षिते ॥ सत्यवादी गुरौ भक्तः स्वधर्मनिरतो भवेत् ॥ ५२ ॥ कारकांशे च नवमे पापग्रहयुतेक्षिते ॥ स्वधर्मनिरतो बाल्ये मिथ्यावादी भवेद्द्विजः ॥ ५३ ॥ कारकांशे च नवमे शनिराहुयुतेक्षिते ॥ गुरुद्रोही भवेद्विप्र शास्त्रेषु विमुखो नरः ॥ ५४ ॥ कारकांशे च नवमे गुरुभानुयुतेक्षिते ॥ तदाऽपि च गुरुद्रोही गुरुवाक्यं न मन्यते ॥ ५५ ॥ कारकांशे च नवमे भृगुभौमयुतेक्षिते ॥ षड्वर्गाधिकयोगे च मरणं पारदारिकः ॥ ५६ ॥ कारकांशे च नवमे क्षतयुक्तेक्षिते द्विज ॥ परस्त्रीसंगमाद्बालो बंधको

भवति ध्रुवम् ॥ ५७ ॥ कारकांशे च नवमे गुरुयुक्तेक्षिते द्विज ॥ स्त्रीलोलुपो भवेद्बालो विषयी नैव जायते ॥ ५८ ॥

अथ कारकांशसप्तमभावफलमाह ।

कारकांशे च द्यूनस्थे गुरुचंद्रयुते द्विज ॥ सुंदरी गेहिनी तस्य पातिभक्तिपरायणा ॥ ५९ ॥ राहुणा विह्वला बाला जायते चांगना द्विज ॥ शनिना च वयोधिक्या रोगिणी वा तपस्विनी ॥ ६० ॥ भौमेन विकलांगी च तथा कांताद्यलक्षणा ॥ रविणा स्वकुले गुप्ता आसक्ता परवेश्मानि ॥ ६१ ॥ बुधे कलावती ज्ञेया कलाभिज्ञा प्रजायते ॥ शुक्रेण तद्वज्ज्ञेया च निर्विशंकं द्विजोत्तम ॥ ६२ ॥

अथ कारकांशे तृतीयभावफलमाह ।

कारकांशे तृतीये च पापखेटयुतेक्षिते ॥ स शूरो जायते बालो वीर्यवान्बहुविक्रमी ॥ ६३ ॥ कारकांशे तृतीयेऽपि शुभखेटयुतेक्षिते ॥ जायते तत्त्वहृदयः कातरोऽपि विशेषतः ॥ ६४ ॥ कारकांशे तृतीये च षष्ठे पापयुतेक्षिते ॥ कृषिकर्मरतो नित्यं जायते च न संशयः ॥ ६५ ॥

अथ कारकांशे द्वादशभावफलमाह ।

कारकांशे व्ययस्थाने उच्चस्थेऽपि शुभग्रहे ॥ सद्गतिर्जायते तस्य शुभलोकमवाप्नुयात् ॥ ६६ ॥ कारकांशे व्यये केतौ शुभखेटैर्युतेक्षिते ॥ तदापि जायते मुक्तिः सायुज्यपदमाप्नुयात् ॥ ६७ ॥ मेषेऽथ धनुषि वापि कारकांशे व्यये शिखी ॥ शुभग्रहेण संदृष्टे कैवल्यपदमाप्नुयात् ॥ ६८ ॥ केवलेऽपि व्यये केतुः पापग्रहयुतेक्षितः ॥ न मुक्तिर्जायते तस्य शुभलोकं न पश्यति ॥ ६९ ॥ रविणा संयुते केतौ कारकांशे व्ययस्थिते ॥ गौर्यां भक्तिर्भवेत्तस्य शाक्तिको जायते नरः ॥ ७० ॥ रविभक्तिर्भवेत्तस्य निर्विशंकं द्विजोत्तम ॥ चंद्रेण संयुते केतौ कारकांशे व्ययस्थिते ॥ ७१ ॥ शुक्रेण संयुते केतौ कारकांशे

व्ययस्थिते ॥ समुद्रतनयाभक्तिर्जायतेऽसौ समृद्धिमान् ॥ ७२॥कुजेन स्कंदभक्तो वा जायते द्विजसत्तम ॥ वैष्णवो बुधशौरिभ्यां गुरुणा शिवभक्तिमान् ॥ ७३ ॥ राहुणा तामसीं दुर्गां भूतप्रेतादिसेवकृत् ॥ हेरंबभक्तः शिखिना स्कंदभक्तोथ वा भवेत् ॥ ७४ ॥ कारकांशे व्यये शौरिः पापराशौ यदा भवेत् ॥ तदैव क्षुद्रदेवस्य भक्तिस्तस्य न संशयः ॥ ७५ ॥ पापर्क्षेपि व्यये शुक्रस्तदापि क्षुद्रसेवकः ॥ कारकान्न्यूनभागो हि अमात्यो जायते ग्रहः ॥ ७६ ॥ कारके च फलं ब्रूयादमात्येऽनुचरो भवेत् ॥ आदित्येंदुधरापुत्राद्गणनीयोऽष्टमो ग्रहः ॥ ७७ ॥ तस्मिन् ग्रहेऽप्येव फलं वक्तव्यं नात्र संशयः ॥ अमात्याद्द्वादशे राशौ पापर्क्षे पापसंयुते ॥ तथापि क्षुद्रदेवस्य भक्तिर्भवति निश्चितम् ॥ ७८ ॥ अमात्यो वर्तते यत्र तन्वादौ द्विजसत्तम ॥ सूर्यादिग्रहसंयुक्ते तत्फलं पूर्ववद्द्विज ॥ ७९ ॥

अथ कारकांशे त्रिकोणफलमाह ।

कारकांशे त्रिकोणस्थे खेटे च तांत्रिको भवेत् ॥ पापेन क्षुद्रदेवस्य शुभेन शुभसेवकः ॥ ८० ॥ कारकांशे त्रिकोणस्थे पापयुक् पापवीक्षिते ॥ भूतानुग्रहकर्ता स्यान्निर्विशंकं द्विजोत्तम ॥ ८१ ॥ कारकांशे त्रिकोणस्थे पापयुक् शुभवीक्षिते ॥ पुत्रैश्वर्यप्रदो नित्यं राजानुग्रहकारकः ॥ ८२ ॥ कारकांशे लये चंद्रे कुजराहुनिरीक्षिते ॥ क्षयरोगो भवेत्तस्य श्वासकासादिरोगयुक् ॥ ८३ ॥ लग्ने वित्ते प्रबंधे च पापद्वययुते द्विज ॥ तांत्रिको जायते विप्र निर्विशंकं कुले द्विज ॥ ८४ ॥ पापैर्निरीक्षितौ तत्र तंत्रनिग्राहको भवेत् ॥ शुभैर्निरीक्षितौ वापि तंत्रानुग्रहकारकः ॥ ८५ ॥ कारकांशेंदुशुक्रौ च शुभदृष्टिनिरीक्षितौ ॥ रसवादी भवेद्बालो धातूनां भस्मकारकः ॥ ८६ ॥ शुक्रेंदुबुधसंदृष्टौ सद्वैद्यो हि भवेन्नरः ॥ पीयूषपाणिः कुशलः सर्वरोगहरो द्विज ॥ ८७ ॥ कारकांशेंदुतुर्यस्थो दैत्याचार्यनिरीक्षितः ॥ श्वेतकुष्ठी भवेन्नूनं निर्विशंकं द्विजोत्तम ॥ ८८ ॥ कारकांशेंदुचापस्थे

यदि शुक्रयुतेक्षिते ॥ पांडुश्वित्री भवेद्बालः श्वेतकुष्ठांगपीडितः॥ ८९ ॥ कारकांशेंदुचापस्थे धरापुत्रेण वीक्षिते ॥ राजरोगो भवेत्तस्य रक्तपित्तार्तिको द्विज ॥ ९० ॥ कारके चंद्रधनुषि शिखिना वीक्षिते सति ॥ नीकुलष्ठं भवेत्तस्य निर्विशंकं द्विजोत्तम ॥ ९१ ॥ चतुर्थे पंचमे रंध्रे धने राहुकुजौ यदि ॥ क्षयरोगो भवेत्तस्य चंद्रदृष्ट्या विशेषतः ॥ ९२ ॥ कारकांशे लयस्थाने केवलः संस्थितः कुजः ॥ पिटकादि भवेत्तस्य निर्विशंकं द्विजोत्तम ॥ ९३ ॥ कारकांशे लये केतौ ग्रहणीरोगपीडितः ॥ स्वर्भानुतुलकौ रंध्रे विषवैद्यः प्रजायते ॥ ९४ ॥ कारकांशे धने तुर्ये केवले संस्थिते शनौ ॥ धनुर्विद्याधरो बालो जायतेऽपि न संशयः॥ ९५ ॥ कारकांशे सुखे वित्ते केवले संस्थिते शिखी ॥ घटिकायंत्रवादी स्यादिष्टशोधनतत्परः ॥ ९६ ॥ उक्तस्थाने स्थिते सौम्ये तद्यत्परमहंसके ॥ तथा संन्यस्तके ज्ञेयो निर्विशंकं द्विजोत्तम ॥ ९७ ॥ उक्तस्थानस्थिते राहौ लोहयंत्रादिकारकः ॥ शिखिना खड्गकारी च कुजेन कुंतधारकः ॥ ९८ ॥ चंद्रेज्यौ कारकांशे च लग्ने वा नवपंचमे ॥ ग्रंथकर्ता भवेन्नूनं सर्वविद्याविशारदः ॥ ९९ ॥ उक्तस्थानगते शुक्रे स्वल्पग्रंथकरो द्विजः ॥ उक्तस्थानगते सौम्ये किंचिद्ग्रंथकरो ह्यसौ ॥ १०० ॥ शुक्रेण काव्यकर्त्ता च प्राकृतग्रंथतत्परः ॥ गुरुणा सर्वग्रंथानां कारको द्विजसत्तम ॥ १ ॥ वाक्यहीनो भवेद्बालः सभाक्षोभो न जायते ॥ वैयाकरणश्च वेदांती जायते तर्कशास्त्रकृत् ॥ २ ॥ उक्तस्थानगतः शौरिः सभाजाड्यो भवेन्नरः ॥ मीमांसको भवेन्नूनमुक्तस्थानगते बुधे ॥ ३ ॥ कारकांशे धरासूनुर्लग्ने वा नवपंचमे ॥ नैयायिको भवेन्नूनं सुष्ठुकाव्यकरो नरः ॥ ४ ॥ कारकांशे निशानाथे त्रिकोणे चाथ लग्नगे ॥ सांख्यशास्त्रज्ञानिपुणो जायते मतिमान्नरः ॥ ५ ॥ भाग्ये लब्धे प्रबंधे वा कारकांशे शिखी तथा ॥ गणितज्ञो भवेन्नूनं ज्योतिशास्त्रविशारदः ॥ ६ ॥ सुराचार्येण संबन्धे सांप्रदायिकशास्त्रधृक् ॥ ये योगा

भाग्यभावे तु यथावद्भाषितं मया ॥ ७ ॥ वित्तस्थानेऽपि ते ज्ञेयाः पूर्ववज्ज्ञायते फलम् ॥ कोऽपि तृतीयभागे तु कथयंति पुरा द्विज ॥ ॥ ८ ॥ कारकांशे धने केतौ तथा भाग्यालये गते ॥ पापग्रहेण संदृष्टे वाचालश्च भवेन्नरः ॥ ९ ॥ कारकांशे तथारूढे धने रंध्रे स्थिते द्विजे ॥ ग्रहसाम्येतिविज्ञेयो योगः केमद्रुमो भवेत् ॥ ११० ॥ उक्तस्थाने ग्रहो नास्ति तदा केमद्रुमो भवेत् ॥ चंद्रदृष्टे विशेषेण दारिद्र्यार्तियुतो भवेत् ॥ ११ ॥ आरूढाज्जन्मलग्नाद्वा पापाः स्त्रीहानिगा यदि ॥ केवले संग्रहत्वेऽपि समसौख्यौ शुभाशुभौ ॥ १२ ॥ चंद्रदृष्टिविशेषेण योगः केमद्रुमो मलः ॥ द्वितीयाष्टमभावाभ्यां योगोऽयं कथ्यते द्विज ॥ १३ ॥ कारकांशेषु ये योगाः पूर्वोक्ता गदिता मया ॥ तत्तद्राशिदशापाके सर्वेष फलमादिशेत् ॥ १४ ॥ एवं दशाप्रदो राशिर्द्वितीयाष्टमयोर्द्विज ॥ ग्रहसाम्योति विज्ञेयः केमद्रुः शशिनेक्षिते ॥ १५ ॥ दशाप्रारंभसमये शोधयेज्जन्मलग्नवत ॥ सूर्यादिखेचरान्स्पष्टान् साधयेज्जन्मवद्द्विज ॥ १६ ॥ तत्र वित्ताष्टमे भावे ग्रहसाम्ये तु यद्भवेत् ॥ तदा केमद्रुमो ज्ञेयश्चंद्रदृष्ट्या विशेषतः ॥ १७ ॥ एवं तन्वादिभावानां दशारंभेषु योजयेत् ॥ तत्तद्ग्रहानुसारेण फलं वाच्यं बुधैः सदा ॥ ११८ ॥ इति बृहत्पाराशरहोरापूर्वखंडसारांशे कारकांशफलकथनं नाम नवमोऽध्यायः ॥ ९ ॥

अथ भावलग्नमाह।

वर्णाद्दशोति नाम्ना वै कथयामि तवाग्रतः ॥ यस्य विज्ञानमात्रेण आयुर्दायफलं वदेत् ॥ १ ॥ तत्रादौ लग्नभावस्य साधयेद्द्विजसत्तम ॥ सूर्योदयात्समारभ्य कलापंचप्रमाणतः ॥ २ ॥ जन्मेष्टकालपर्यन्तं गणनीयं प्रयत्नतः ॥ ओजलग्ने यदा लग्नं सूर्यराश्यनुसारतः ॥ ३ ॥ समलग्ने जन्मलग्नाद्यत्संख्या प्राप्यते द्विज ॥ भावलग्ने विजानीयाद्धोरालग्ने तदोच्यते ॥ ४ ॥

अथ भावलग्नोदाहरणमाह ।

सूर्योदयादिष्टम् ६ । १७ जन्मलग्नम् ३ । ८ पंचघटी ८ प० ९ पर्यंतमेकभावलग्नम् । अत्र तु समलग्नं जन्मकर्काद्गणनीयं सिंहभावलग्नमागतम् एवम् ओजलग्ने जन्मसूर्यराशिमारभ्य गणनीयम् ॥ ४ ॥

अथ होरालग्नमाह !

द्विसार्धघटिका विप्र कालादिति विलग्नभात् ॥ प्रयांति लग्नात्तन्नाम होरालग्नं द्विजोत्तम ॥५॥ यज्जन्म ओजलग्नेषु सूर्यादि गणयेत् क्रमात् ॥ समलग्ने यदा जन्म गणयेज्जन्मभाद्द्विज ॥ ६ ॥ केचिल्लग्नाद्वदंत्येव होरालग्नं विचिंतयेत् ॥ भावलग्नांतहोरांतं चिंतयेद्द्विजसत्तम ॥ ७ ॥

अस्योदाहरणम् ।

यथा लग्ने ३।८। ४५ । इष्टम् ६ । १७ अत्र तु समलग्नम् अत एव सार्द्धद्विघटिकापरिमितात् लग्नाद्गणनीयं तृतीयं कन्यालग्नम् ॥ ७ ॥

अथ वर्णदलग्नमाह ।

जन्महोराख्यलग्नर्क्षसंख्या ग्राह्या पृथक्पृथक् ॥ ओजे लग्ने तु युग्मे तु चक्रशुद्धैकसंयुता ॥ ८ ॥ युग्मौजसाम्ये संयोज्य वियोज्यान्योन्यमन्यथा ॥ मेषादितः क्रमादोजे मीनादेरुत्क्रमात्समे ॥ ९ ॥ एवं यल्लग्नमायातं वर्णदं तत् प्रकीर्तितम् ॥ एवं द्वादशभावानां वर्णदं लग्नमानयेत् ॥ १० ॥

टीका ।

ओजलग्नप्रसूतानां मेषादितो जन्मलग्नांतं होरालग्नान्तं च गणयित्वा तयोर्द्वयोरोजत्वेन युग्मत्वेन वा साजात्ये संख्याद्वयं संयोजनीयम् । एकस्य ओजत्वेन अपरस्य युग्मत्वेन वा वैजात्येऽधिकसंख्यानां न्यूनसंख्या शोधनीया एवं च यद्योजनोत्तरं वा तन्मेषादितो गणनीयं तत्र यो राशिरंतिमो लभ्यते स वर्णदराशिर्भवति युग्मलग्नप्रसूतानां मीनाद्यपसव्यक्रमेण जन्मलग्नांतं होरालग्नांतं च गणयित्वा

तयोः संख्या पृथक् ग्राह्या तयोरोजत्वेन युग्मत्वेन वा साजात्ये संख्याद्वयं योजनीयं एवमोज अपरं युग्ममिति वैजात्ये परस्परं वियोजनीयं ततश्च मीनाद्यपसव्यमार्गेण गणनायां यो यो राशिर्लभ्यते स वर्णद इति वेदितव्यम् ।

अथ वर्णदलग्नोदाहरणम् ।

अत्र तु युग्मलग्नमध्ये जन्म जन्मलग्नम् ३ । ८ अतएव मीनादि विपरीतमार्गं गणनीयं जन्मलग्नांतं ८ संख्या एवं होरालग्नांतं ६ संख्या द्वयोः साजात्य एवं योजनीयम् । द्वयोर्योगसंख्या १४ द्वादशाधिकं द्वादशतष्टं शेषं २ मीनाद्यपसव्यं गणनीयं कुंभं वर्णदलग्नम् एवं सर्वत्र ओजलग्नजन्ममेषादि क्रमाद्गणनीयम् ॥ १० ॥

अथ वर्णदविचारमाह ।

यदि द्वावोजराशौ वा समराशौ यदा द्विज ॥ द्वयं संयोजनीयं वै संज्ञे या वर्णदा दशा ॥ ११ ॥ एकस्थाने ओजराशावपरे समभे द्विज ॥ वैजात्येधिकसंख्याया न्यूनसंख्यां विशोधयेत् ॥ १२ ॥ मेषादिकेन गणयेत्सव्यमार्गेण वै द्विज ॥ यल्लब्धमंतिमो राशिः स राशिर्वर्णदो भवेत् ॥ १३ ॥ युग्मलग्नेषु यज्जन्म मीनादिरपसव्यतः ॥ क्रमेण लग्नहोरांतं गणयेद्द्विजसत्तम ॥ १४ ॥ ओजराशौ द्वयं लब्धं तथा द्वौ समराशिगे ॥ साजात्ये योजनं कार्यं जायते वर्णदो दशा ॥ १५ ॥ अजात्ये पूर्ववत्कार्याधिक्ये न्यूनं विशोधयेत् ॥ मेषाद्यपसव्यमार्गेण गणनीयं प्रयत्नतः ॥ १६ ॥ यल्लब्धमंतिमो राशिस्तद्राशिर्वर्णदो भवेत् ॥ वर्षसंख्या विजानीयाच्चरपर्याप्रमाणतः ॥ १७ ॥ होरालग्नभयोर्नेया दुर्बला वर्णदा दशा ॥ यत्संख्या वर्णदा लग्नात्तत्र संख्या क्रमेण तु ॥ १८ ॥ क्रमव्युत्क्रमभेदेन दशा स्यात्पुरुषस्त्रियोः ॥ वर्णदा राशिमेषादि मीनादि गणयेत्क्रमात् ॥ १९ ॥ वर्णदा स्यात्त्रिकोणे च पापयुक् पापराशि-

कः ॥ पापयोगकृते विप्र दशापर्यंतजीवनम् ॥ २० ॥ रुद्रशूले यथा वायुर्निर्विशंकं द्विजोत्तम ॥ वर्णदा सप्तमाद्राशेः कलत्रायुर्विचिंतयेत् ॥ २१ ॥ पंचमे तनयस्यायुर्मातुः स्यात्तुर्यपंचके ॥ तृतीये भ्रातुरायुः स्याज्ज्येष्ठभ्रातुर्भवेद्द्विज ॥ २२ ॥ पितुस्तु नवमान्मातुः पंचमाद्वर्णदस्य तु ॥ शूलराशिदशायां वै प्रबलायामरिष्टकम् ॥ २३ ॥ एवं तन्वादिभावानां कारयेद्वर्णदा दशा ॥ पूर्ववच्च फलं ज्ञेयं शुभाशुभं द्विजोत्तम ॥ २४ ॥ ग्रहाणां वर्णदा नैव राशीनां वर्णदा दशा ॥ ग्रहारूढपदत्वेन चिंतयेद्ग्रहवर्णदा ॥ २५ ॥ दशाया अंतरं कार्यं भानुभागं प्रदापयेत् ॥ चरस्थिरदशायां वै वर्णदायास्तथैवच ॥ २६ ॥ यल्लब्ध्वा पूर्वमब्दानां भानुभागं च कारयेत् ॥ क्रमव्युत्क्रमभेदेन संलिखेद्वै दशांतरम् ॥ २७ ॥ पूर्णायां कारकस्यैव केंद्रस्थानां दशा भवेत् ॥ ततः पणफरस्थानामापोक्लिमदशां ततः ॥ जन्मांगं जन्मलग्नं च कालं होरा प्रशस्यते ॥ २८ ॥

अथ घटीलग्नमाह ।

घटीलग्नं प्रवक्ष्यामि शृणु त्वं द्विजसत्तम ॥ सूर्योदयात्समारभ्य जन्मकालावधि क्रमात् ॥ २९ ॥ या चित्या घटिका जाता तन्मध्ये चार्कभाजिता ॥ एकैकघटिका विप्र एकैकं लग्नसंज्ञकः ॥ ३० ॥ भानुस्तिष्ठेच्छिष्टघटीर्गणयेज्जन्मलग्नतः ॥ यावंतिमो राशिलब्धं तद्राशिघटिकातनुः ॥ सूर्यादि यत्र ऋक्षे च जन्मवत्संलिखेद्द्विज ॥ ३१ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे भावहोरावर्णदघटीलग्नफलकथनं नाम दशमोऽध्यायः ॥ १० ॥

अथ घटीलग्नोदाहरणम् ।

यथा लग्नं ३ । ८ । ४५ इष्टम् ६ । १७ कर्कलग्नाद्गणनीयम् मकरलग्नं भवतीत्यर्थः ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे भावेहारावर्णदघटीलग्नादिकथनं नाम दशमोऽध्यायः ॥ १० ॥

अथाऽऽरूढमाह ।

अधुना संप्रवक्ष्यामि राश्यारूढपदं द्विज ॥ राशीनां द्वादशानां तु यावदीशाश्रयो भवेत् ॥ १ ॥ सख्या त्वीशोदयादग्रे समाता तत्पदं वदेत् ॥ राशिवद्ग्रह आरूढं ज्ञायते गणकैर्जनैः ॥ २ ॥ यावद्दूरं यस्य राशिस्तावत्संख्या क्रमेण वै ॥ अग्रे खगारूढपदं ज्ञायते द्विजसत्तम ॥ ॥ ३ ॥ जनुर्लग्नाल्लग्नस्वामी यावद्दूरं हि तिष्ठति ॥ तावद्दूरं तदग्रे च लग्नारूढं च कथ्यते ॥ ४ ॥ यदि लग्नेश्वरः स्वर्क्षे कलत्रे संस्थितोऽथवा ॥ आरूढलग्नमित्याहुर्जन्मलग्नं द्विजोत्तम ॥ ५ ॥ एवं तन्वादिभावानां भावारूढपदं भवेत् यत्र यत्र ग्रहा लग्ने तत्र तत्र सुसंलिखेत् ॥ ६ ॥

उदाहरणार्थमारूढकुंडलीमाह.


धनारूढ. १
शु.
११
भाग्यारूढ.
पुत्रारूढ.
चं. २
के. १२
लग्नारूढ.
लाभारूढ.
पराक्रमारूढ.
१०
व्यापारारूढ.
सूर्य. बुध.
३
९
कर्मारूढ,
६
रा.
जायारूढ.
श. ८
४
मं ५
मातुलारूढ.
निधनारूढ.
बृ. ७
सुखारूढ.

अथारूढोदाहरणम् ।

यथा कर्कलग्नस्वामिनि चंद्रे एकादशस्थिते तस्मादेकादशगणनान्मीनलग्नमारूढं भवतीत्यर्थः ॥

पराशर उवाच ।

अधुना संप्रवक्ष्यामि तन्वारूढफलं द्विज ॥ यस्य विज्ञानमात्रेण जायते कर्मसूचकः ॥ ७ ॥ यावदीशात्त्वयं राशिरित्युक्तं मुनिभिः पुरा ॥ पदमारूढसंज्ञं हि तदारब्धविधिं द्विज ॥ ८ ॥

अथैकादशस्थानमाश्रित्य फलमाह ।

पदादेकादशे स्थाने शुभग्रहयुतेक्षिते ॥ लक्ष्मीवाञ्जायते बालः प्रजावाञ्छीलसंयुतः ॥ ९ ॥ वित्तोपार्जनन्यायेन नीतिवाञ्जायते सदा ॥ नरो न नास्तिको नूनं न तु शास्त्रविरुद्धकृत् ॥ १० ॥ पदादेकादशे विप्र पापखेटयुतेक्षिते ॥ अन्यायोपार्जितं वित्तं विरुद्धं शास्त्रमार्गतः ॥ ११ ॥ मिश्रैर्मिश्रफलं ज्ञेयमुच्चामित्रादिक्षेत्रगः ॥ बहुधा जायते लाभो यत्र यत्र द्विजोत्तम ॥ १२ ॥ आरूढाल्लाभभवनं ग्रहः पश्येत्तु न व्ययम् ॥ यस्य जन्मानि सोऽपि स्यात्प्रबलो धनवानापि ॥ १३ ॥ दृष्टग्रहाणां बाहुल्ये तदा दृष्टचरितुंगगे ॥ सार्गले चापि तत्रापि बह्वर्गलसमागमे ॥ १४ ॥ शुभग्रहार्गले तत्र तत्राप्युच्चग्रहार्गले ॥ सुखानि स्वामिना दृष्टे लग्नभाग्यादिकेन वा ॥ १५ ॥ जातस्य पुंसः प्राबल्यं निर्दिशेदुत्तरोत्तरम् ॥ उक्तयोगेषु ये खेटा द्वादशं तु न पश्याति ॥ १६ ॥

अथ द्वादशराशिमाश्रित्य फलमाह ।

पदारूढे व्यये विप्र शुभपापयुतेक्षिते ॥ बाहुल्यव्ययमित्येवं विशेषोपार्जनात्सदा ॥ १७ ॥ शुभग्रहे सुमार्गेषु कुमार्गात्पापखेचरैः ॥ मिश्रैर्मिश्रफलं वाच्यं यथालाभेषु पूर्ववत् ॥ १८ ॥ पदारूढे व्यये शुक्रे भानुस्वर्भानुवीक्षिते ॥ राजमूलाद्व्ययं वाच्यं चंद्रदृष्ट्या विशेषतः ॥ १९ ॥ पदारूढे व्यये सौम्ये शुभखेटयुतेक्षिते ॥ ज्ञातिमध्ये व्ययो नित्यं पापदृक्कलहाद्व्ययः ॥ २० ॥ पदव्यये सुराचार्ये वीक्षिते चान्यखेचरैः ॥ करमूलाद्व्ययं वाच्यं कर-

व्याजेन वै द्विज ॥ २१ ॥ आरूढे द्वादशे सौरौ धरापुत्रेण संयुते अन्यग्रहोक्षिते विप्र भ्रातृमूलाद्धनव्ययम् ॥ २२ ॥ पदेषु द्वादशे स्थाने ये योगास्तान्वदाम्यहम् ॥ लाभभावेषु ये योगा लाभयोगकराः सदा ॥ २३ ॥ पदेषु सप्तमे राहुरथवा संस्थितः शिखी ॥ उदरव्यथायुतो बालः शिखिना पीडितेधिकम् ॥ २४ ॥ पदे च सप्तमे केतुः पापखेटयुतेक्षिते ॥ साहसी श्वेतकेशी च दीर्घलिंगी भवेन्नरः ॥ २५ ॥ पदे च सप्तमे स्थाने गुरुशुक्रनिशाकराः ॥ एको द्वयं त्रयं तत्र लक्ष्मीवान्कारयेद्ध्रुवम् ॥ २६ ॥ तुंगर्क्षे सप्तमे खेटे शुभो वाप्यशुभः पदे ॥ श्रीमान्सोऽपि भवेन्नूनं सत्कीर्तिसहितो द्विज ॥ २७ ॥ ये योगाः सप्तमे भावे राह्वादिकथिता मया ॥ ते योगा द्यूनवच्चिन्त्या वित्तभावे च साद्विज ॥ २८ ॥ उच्चो वाथ हिरण्यं वा जीवो वा शुभ एव वा ॥ एको बली धनगतः श्रियं दिशति देहिनः ॥२९॥ ये योगाश्च पदे लग्ने यथावद्वदतो मम ॥ कारकांशस्य कुंडल्यां निर्बाधका विचिंतयेत् ॥ ३० ॥ आरूढादष्टमे पापे सौरेः स्याच्छुभवर्जितः ॥ तथा वित्तालये पापे पूर्ववज्ज्ञायते फलम् ॥ ३१ ॥ आरूढाद्वित्तभे सौम्ये सर्वदेशाधिपो भवेत् ॥ सर्वज्ञो यदि चेन्न स्यात्कविर्वादी च भार्गवः ॥ ३२ ॥ आरूढात्केंद्रकोणेषु तथा लाभपदे द्विज ॥ लग्नसप्तमराशिपदे सबले खेटसंयुते ॥ ३३ ॥ श्रीमांश्च जायते नूनं देशे विख्यातिवान् भवेत् ॥ षष्ठाष्टमे व्यये स्थाने श्रीमान्स न भवेत्कदा ॥ ३४ ॥ पदाल्लग्ने सप्तमे वा केंद्रे त्रिकोणोपचये सुवीर्यसंस्थिते खेटे भार्याभर्तृसुखप्रदः ॥ ३५ ॥ एवं लग्नपदाद्विप्र पुत्रभावादि चिंतयेत् ॥ मित्रामित्रे विजानीयाद्व्ययभावेषु वै द्विज ॥ ३६ ॥ षष्ठाष्टमे व्यये खेटस्तत्तद्भावेषु तिष्ठति ॥ यद्यद्भावेषु यद्वैरं लग्नारूढे विचिंतयेत् ॥ ३७ ॥ लग्नारूढं दारपदं मिथः केंद्रगतं यदि ॥ लाभे वापि त्रिकोणे वा तथा राजधराधिपः ॥ ३८ ॥ आरूढः पुत्रमित्रैस्तु त्रिलाभकेंद्रगो यदि ॥

द्वयोर्मैत्री त्रिकोणेषु साम्यं द्वेषोऽन्यथा भवेत् ॥ ३९ ॥ एवं दारादि भावानामर्जयित्वारिमित्रता ॥ जातकद्वयमालोक्य चिंतनीयं विचक्षणैः ॥ ४० ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे आरूढफलकथनं नाम एकादशोऽध्यायः ॥ ११ ॥

पराशर उवाच ।

अधुना संप्रवक्ष्याम्युपपदं च द्विजोत्तम ॥ यस्य विज्ञानमात्रेण जायते फलसूचकः ॥ १ ॥ पदारूढाद्व्ययस्थाने पदं चोपपदं स्मृतम् ॥ लग्नानुचरसंज्ञोपपदं च द्विजसत्तम ॥ २ ॥

उपपदस्थोपपदद्वितीये वा गुणविशेषफलमाह ।

पापाक्रांते पापयुते पापर्क्षे पापवीक्षिते ॥ पापसंबंधसंयोगे उपपदद्वितीयके ॥ ३ ॥ प्रव्रज्यायोगो विज्ञेयः संन्यासो भवाति ध्रुवम् ॥ तथा भार्याविरोधी स्यादथवा स्त्रीविनाशकृत् ॥ ४ ॥ रविपापत्वनाद्यैव सिंहर्क्षे पापदे साति ॥ पूर्वोक्तं नो फलं ज्ञेयं जायते गृहिणीसुखम् ॥ ५ ॥ मेषादिपापराशौ च संस्थिते दिवसाधिपे ॥ पूर्वोक्तं च फलं ज्ञेय प्रव्रज्यादारनाशकः ॥ ६ ॥ उपपदे द्वितीये वा शुभसंबंधदृष्टियुक् ॥ शुभर्क्षे शुभसंयोगे पूर्वोक्तफलदो भवेत् ॥ ७ ॥ उपपदे द्वितीये वा नीचांशे नीचखेटयुक् ॥ नीचसंबंधयोगे वा प्रणीता दारनाशकृत् ॥ ८ ॥ उच्चांशे उच्चसंस्थे वा उच्चसंबंधदृष्टियुक् ॥ बहुदारा भवेयुश्च रूपलक्षणसंयुताः ॥ ९ ॥ उपपदद्वितीयेपि युग्मर्क्षे मेषराशितः ॥ मिथुनेऽपि स्थिते विप्र बहुदारयुतो भवेत् ॥ १० ॥ उपपदे द्वितीयेपि स्वस्वामिखेटसंयुते ॥ उत्तरायुषि निर्दारो भवत्येव न संशयः ॥ ११ ॥ वृषस्थे वा तुले वापि दैत्येज्ये दारकारके ॥ अन्यराशौ च वा विप्र निर्दार उत्तरायुषि ॥ १२ ॥ स्वराशौ संस्थिते खेटे नित्याख्ये दारकारके ॥ उत्तरायुषि निर्दारो भवत्यैव

न संशयः ॥ १३ ॥ उपपदेशोपि तुंगर्क्षे नित्याख्ये दारकारके ॥ उत्तमकुलाद्दारलाभो नीचस्थेऽपि विपर्ययः ॥ १४ ॥ शुभसंबंधयुक् दृष्टे उपपदे दारकारके ॥ सुंदरी लभ्यते भार्या भव्या रूपवती द्विज ॥ १५ ॥ संबंधे शनिराहुभ्यामुपपदे च शनिर्द्विज ॥ निर्दारकारके वापि शनिराहुयुतेक्षिते ॥ १६ ॥ अथ वादयुतो विप्र भार्यया सहितो द्विज ॥ स्त्रीविनाशो भवेन्नूनं तथा स्त्रीपारित्यागवान् ॥ १७ ॥ उपपदे च संयुक्तौ शिखिशुक्रौ द्विजोत्तम ॥ रक्तप्रदररोगार्ता जायते तस्य भामिनी ॥ १८ ॥ उपपदादिषु संयोगे बुधकेत्वोर्द्विजोत्तम ॥ अस्थिस्रावयुता बाला गृहे तस्य न संशयः ॥ १९ ॥ रवी राहुस्तथा पंगुरुपपदे योगकारकः ॥ अस्थिज्वरवती बाला तप्तांगा च दिवानिशम् ॥ २० ॥ उपपदे बुधकेतुभ्यां योगसंबंधके द्विज ॥ स्थूलांगी गृहिणी तस्य जायते नात्र संशयः ॥ २१ ॥ उपपदे बुधक्षेत्रे भौमर्क्षे चाथवा द्विज ॥ मंदारौ संस्थितौ तत्र घ्राणरोगार्तिपित्तयुक् ॥ २२ ॥ सौम्यारौ चान्यक्षेत्रे वा उपदिश्ये शनिर्युते ॥ कर्णरोगवती बाला नेत्ररोगयुता तथा ॥ २३ ॥ कुजसौम्यौ चान्यक्षेत्रे उपपदे द्विजोत्तम ॥ योगे स्वर्भानुदेवेज्यौ दंतार्ता गृहिणी भवेत् ॥ २४ ॥ उपपदे तु कन्यास्थे अन्यर्क्षेऽपि तथा द्विज ॥ शनिस्वर्भानुयोगश्च पंग्वंगी तस्य भामिनी ॥ २५ ॥ ये योगाः पूर्वकथिता मया ते विप्रसत्तम ॥ शुभयुक् दृष्टिसंयोगे न भवेयुः फलप्रदाः ॥ २६ ॥ लग्नादुपपदाद्वापि यो राशिः सप्तमो द्विज ॥ तन्नवांशा राशयोंशाः स्वसप्तमतदंशकाः ॥ २७ ॥ तत्र पापे स्थिते दृष्टे उक्त योगफलं विदुः ॥ शनिः शुक्रस्तथा चांद्रः सप्तमांशग्रहेषु च ॥ त्रिकयोगकृते विप्र अपत्यरहितो नरः ॥ २८ ॥ पदोपपदलग्नेषु पुत्रकारकके द्विज ॥ पंचमस्थे गुरौ भानौ तत्र स्वर्भानुयोगकृते ॥ २९ ॥ बहुपुत्रो भवेन्नूनं प्रतापी बलवीर्ययुक् ॥ प्रचंडविजयी विप्र

रिपुनिग्रहकारकः ॥ ३० ॥ उक्तस्थाने निशानाथे एकपुत्रो भवेद्विज
॥ उक्तस्थाने शुभे पापे पुत्रसौख्यं विलंबितम् ॥ ३१ ॥ उक्तस्थाने
कुजश्चांद्रिर्जायते च ह्यपुत्रवान् ॥ परपुत्रयुतो वापि सहोढसुतवान्
भवेत् ॥ ३२ ॥ उक्तस्थाने चोजराशौ बहुपुत्रप्रदो भवेत् ॥
मिथुने युग्मराशौ चेत्स्वल्पापत्यो भवेन्नरः ॥ ३३ ॥ ग्रहक्रमात्कुक्षिसंज्ञे
तदीशं पंचमांशतः ॥ सिंहाधीशे रवौ विप्र स्वल्पापत्यो भवेन्नरः
॥ ३४ ॥ उपपदे सिंहलग्ने निशानाथयुतेक्षितः ॥ स्वल्पप्रजो
भवेद्विप्र तथा कन्याप्रजो भवेत् ॥ ३५ ॥ सुतभावनवांशाच्च तथापि
पुत्रकारकात् ॥ यद्वा त्रिंशांशकुंडल्यां पंचमांशात्तदा द्विज ॥ ३६ ॥
तदीशाच्चिंतयेद्विप्र संततेर्योगमुत्तमम् ॥ एवं सर्वप्रकारेण चिंतनीयं
सदा बुधैः ॥ ३७ ॥ उपपदे शनी राहुर्भ्रातृस्थौ भ्रातृनाशदौ ॥
एकादशे ज्येष्ठभ्रातुस्तृतीये च कनिष्ठकम् ॥ ३८ ॥ उपपदैकादशस्थाने
तृतीये दानवेज्यके ॥ व्यवहितार्थनाशः स्याद्यथा संभवति
द्विज ॥ ३९ ॥ लग्ने वापि लये वापि दैत्याचार्ययुतेक्षिते ॥ व्यवहितांगनाशः
स्यान्निर्विशंकं द्विजोत्तम ॥ ४० ॥ तृतीयैकादशे विप्र
कुजेज्यबुधचंद्रमाः ॥ भ्रातृबाहुल्यता वाच्या प्रतापी बलवत्तरः
॥ ४१ ॥ शनेरसंयुते दृष्टे तृतीयैकादशे द्विज ॥ कनिष्ठज्येष्ठयोर्नाशं
भिन्नस्थे भिन्नभावहृत् ॥ ४२ ॥ भ्रातृस्थाने युते सौरौ लाभस्थे
वा तृतीयगे ॥ स्वस्य माता स्वास्त्रमती अन्यन्नश्याति वै द्विज
॥ ४३ ॥ तृतीयैकादशे केतुर्बाहुल्यं भगिनीसुतम् ॥ भ्रातृस्वल्पसुखं
तस्य निर्विशंकं द्विजोत्तम ॥ ४४ ॥ सप्तमे द्वादशे स्थाने सैंहिकेययुतेक्षिते
॥ ज्ञानवांश्च भवेद्बालो बहुभाग्ययुतो द्विज ॥ ४५ ॥ सप्तमेशाद्द्वितीयस्थे
पुच्छनाथयुतेक्षिते ॥ स्तब्धवाग् जायते बालस्तथा
स्खलितवाग् द्विज ॥ ४६ ॥ आरूढे शत्रुभावस्थे पापस्थे शुभवर्जिते
॥ शुभसंबंधरहिते चोरो भवति निश्चितम् ॥ ४७ ॥ आरूढे
वाऽपि सौम्ये तु सर्वदेशाधिपो भवेत् ॥ सर्वज्ञस्तत्र जीवः स्यात्कवि-

वांदी च भार्गवः ॥ ४८ ॥ आरूढेऽपि पदे वापि धनस्थे शुभखेचरे ॥ सर्वद्रव्याधिपो धीमाञ्जायते द्विजसत्तम ॥ ४९ ॥ उपपदाद्धनपो यत्र वर्तते तस्य वित्तभे ॥ पापखेचरसंयुक्ते चौरो भवति निश्चितम् ॥ ५० ॥ सप्तमेशाद्वितीये च राहुस्थे मूक एव च ॥ खलस्थिते यदा विप्र दंतानामधिकं भवेत् ॥ ५१ ॥ शिखिना वातव्याधिः स्याद्यद्वा स्यादस्फुटोक्तिवान् ॥ तत्र नानाग्रहैर्योगे सिद्धं फलमुदाहरेत् ॥ ५२ ॥ सप्तमेशाद्वितीये च छायासूनुयुते द्विज ॥ गौरः श्यामो नीलपीतो जायते बुद्धिमान्नरैः ॥ ५३ ॥ अमात्यानुचराद्विप्र देवभक्तिं विचिंतयेत् ॥ नीचत्वादेव नीचत्वं शुभपापाच्छुभाशुभम् ॥ ५४ ॥ कारकांशे पापखगैः पापांशे पापयोगकृत् ॥ पापवर्गे शुभैर्हीने जायते परजातवान् ॥ ५५ ॥ कारकांशे भवेत्पापो न ज्ञेयः परजातकः ॥ अन्येषां पापखेटानां योगं घटत्वमाप्नुयात् ॥ ५६ ॥ अथवा रंध्रभे पापे नायं योगो विचिंत्यते ॥ शनिराहुयुतौ यत्र शनिराह्वोः क्षेत्रके द्विज ॥ ५७ ॥ परजातः प्रसिद्धोस्ति ह्यन्येभ्यो गुप्त एव च ॥ शुभवर्गे यदा खेटो वर्गोक्तानां यथा द्विज ॥ ५८ ॥ जारजः कथनमात्रे न तु जारज इत्यपि ॥ यत्र कुत्रापि स्वोच्चे द्वौ कुलमुख्यो भवेन्नरः ॥ ५९ ॥ आदिषट्कं च पर्यन्ता ग्रहाः सौख्यं विचिंतयेत् ॥ सारं सारमहं वक्ष्ये तवाग्रे द्विजसत्तम ॥ ६० ॥

अस्योदाहरणम् ।

जन्मलग्नारूढाद्द्वादशस्थानाधिपतिर्बुधः तस्य पदमुपपदसंज्ञम् । अत्र तु मिथुनलग्नमागतं एवं सर्वत्र ज्ञेयम्.

उपपदकुंडलीमाह.



इति श्रीबृहत्पाराशरहोरापूर्वखंडे सारांशे उपपदफलकथनं नाम द्वादशोध्यायः ॥ १२ ॥

अथ कारकमारकादिविचारमाह ।

पंचमं नवमं चैव विशेषधनमुच्यते ॥ चतुर्थं दशमं चैव विशेषं सुखमुच्यते ॥ १ ॥ चंद्रभानू विना सर्वे मारके मारकाधिपाः ॥ षष्ठाष्टमव्ययेशास्तु राहुः केतुस्तथैव च ॥ २॥ केंद्राधिपतयः सौम्याः शुभं नैव दिशंति च ॥ क्रूरा नैवाशुभं कुर्युः कोणपौ शुभदायकौ ॥ ३ ॥ धनेशो हि व्यये यश्च संयोगात्फलदौ मतौ ॥ लाभारि अधिपाः पापा रंध्रेशो न शुभप्रदः ॥ ४ ॥ जायाकुटुंबकाधीशौ मारकौ परिकीर्तितौ ॥ क्रूराः केंद्राधिपा भूपात्क्षीणचंद्रो रविस्तथा ॥ ५ ॥ शनिर्भौमश्च विज्ञेयाः प्रबला ह्युत्तरोत्तराः ॥ लग्नांबुद्यूनकर्माणि प्रबलान्युत्तराणि हि ॥ ६ ॥ सुतधर्मा तथा स्थानौ प्रबलौ चोत्तरोत्तरौ ॥ लाभारित्रितयस्थाने त्वधोधः प्रबलं भवेत् ॥ ७ ॥ पुनर्मारकयोर्मध्ये ह्युत्तरं प्रबलं मतम् ॥ भाग्यस्थानाद्व्ययं रंध्रं तस्माच्चैवाशुभं वदेत् ॥ ८ ॥ एतत्स्थानानुसारेण ग्रहाणां मानमालिखेत् चंद्रचांद्री गुरुक्षितौ केन्द्रदोषो यथोत्तरम् ॥ ९ ॥ तथैव च ग्रहाः क्रूरा बलं चैवोत्तरोत्तरम् ॥ भाग्येशः सर्वदा सौम्यो न क्रूरः फलदायकः ॥ १० ॥ पुत्राधिपोऽपि शुभदः क्रूरोपि सुखदः स्मृतः ॥ त्रिलाभरिपुमृत्यूनां पतयो दुःखदायकाः ॥ ११ ॥ शुभोपि शुभदो नैव दशायोगे चरोपि वा ॥ अष्टमाधिपतिर्दोषस्तुला मेषे न हि क्वचित् ॥ अलौ षष्ठाष्टदोषो न वृषभोपि न दोषभाक् ॥ १२ ॥ यद्यद्भावगतो राहुः केतुश्च जनने नृणाम् ॥ यद्यद्भावेशसंयुक्तस्तत्फलं प्रदिशेदलम् ॥ १३ ॥

अथ मेषलग्नम् ।

मंदसौम्यासिताः पापाः शुभौ गुरुदिवाकरौ ॥ न शुभं योगमात्रेण प्रभवेच्छनिजीवयोः ॥ १४ ॥ परतंत्रेण जीवस्य पापकर्मापि

निश्चितम् ॥ कविः साक्ष्यनिहंता स्यान्मारकत्वेन लक्षितः ॥ १५ ॥ मंदादयो निहंतारो भवेयुः पापिनो ग्रहाः ॥ शुभाशुभफलान्येवं ज्ञातव्यानि क्रियोद्भवैः ॥ १६ ॥

अथ वृषलग्नम् ।

जीवशुक्रेंदवः पापाः शुभौ शनिदिवाकरौ ॥ राजयोगकरः साक्षादेक एव रवेः सुतः ॥ १७ ॥ जीवादयो ग्रहाः पापाः संति मारकलक्षणाः ॥ बुधस्तत्र फलान्येवं ज्ञेयानि वृषजन्मनः ॥ १८ ॥

अथ मिथुनलग्नम् ।

भौमजीवारुणाः पापा एक एव कविः शुभः ॥ शनैश्वरेण जीवस्य योगो मेषभवो यथा ॥ १९ ॥ नायं शशी निहंता स्याल्लक्षणं पापनिष्फलम् ॥ ज्ञातव्यानि द्वंद्वजस्य फलान्येतानि सूरिभिः ॥ २० ॥

अथ कर्कलग्नम् ।

भार्गवेंदुसुतौ पापौ भूसुतांगिरसौ शुभौ ॥ एक एव ग्रहः साक्षाद्भूसुतो योगकारकः ॥ २१ ॥ निहंता रविजोऽन्ये तु मानिनो मारकाह्वयाः ॥ कुलीरसंभवस्यैव फलान्युक्तानि सूरिभिः ॥ २२ ॥

अथ सिंहलग्नम् ।

रौहिणेयः सुतौ पापौ कुजजीवौ शुभावहौ ॥ प्रभवेद्योगमात्रेण न शुभं गुरुशुक्रयोः ॥ २३ ॥ घ्नंति सौम्यादयः पापा मारकत्वेन लक्षिताः ॥ एवं फलानि वेद्यानि सिंहे यस्य जनुर्भवेत् ॥ २४ ॥

अथ कन्यालग्नम् ।

कुजजीवेंदवः पापा एक एव भृगुः शुभः ॥ भार्गवेंदुसुतावेव भवेतां योगकारकौ ॥ २५ ॥ निहंता कविरन्ये तु मारकास्तु कुजादयः ॥ प्रतीक्षेत फलान्युक्तान्येवं कन्याभवे बुधैः ॥ २६ ॥

अथ तुलालग्नम् ।

जीवार्कमहिजाः पापाः शनैश्चरबुधौ शुभौ ॥ भवेतां राजयोगस्यकारकौ चंद्रतत्सुतौ ॥ २७ ॥ कुजो निहंति जीवाद्याः परे मारकलक्षणाः ॥ निहंतारः फलान्येवं काव्यो न तु तुलाभवः ॥ २८ ॥

अथ वृश्चिकलग्नम् ।

सौम्यभौमाः सिताः पापाः शुभौ गुरुनिशाकरौ ॥ सूर्यचंद्रमसावेवं भवेतां योगकारकौ ॥ २९ ॥ जीवो निहंता सौम्याद्या हंतारो मारकाह्वयाः ॥ तत्तत्फलानि विज्ञेयान्येवं वृश्चिकजन्मनः ॥ ३० ॥

अथ धनुर्लग्नम् ।

एक एव कविः पापः शुभौ सौम्यदिवाकरौ ॥ योगो भास्करसौम्याभ्यां निहंता भास्वतः सुतः ॥ ३१ ॥ घ्नंति शुक्रादयः पापा मारकत्वेन लक्षिताः ॥ ज्ञातव्यानि फलान्येवं चापजस्य मनीषिभिः ॥ ३२ ॥

अथ मकरलग्नम् ।

कुजजीवेंदवः पापाः शुभौ भार्गवचंद्रजौ ॥ स्वयं चैव निहन्ता स्यान्मंदो भौमादयः परे ॥ ३३ ॥ तल्लक्षणानि हंतारः कविरेकः सुयोगकृत् ॥ ज्ञातव्यानि फलान्येवं विबुधैर्मृगजन्मनः ॥ ३४ ॥

अथ कुंभलग्नम् ।

जीवचंद्रकुजाः पापा एको दैत्यगुरुः शुभः ॥ राजयोगकरो भौमः कविश्चैव बृहस्पतिः ॥ ३५ ॥ निहंता घ्नंति भौमाद्या मारकत्वेन लक्षिताः ॥ एवमेव फलान्यूह्यान्येतानि घटजन्मनः ॥ ३६ ॥

अथ मीनलग्नम् ।

मंदशुक्रांशवः पापाः सौम्यो भौमविधू शुभौ ॥ महीसुतगुर्वोर्योगे कारणेनैव भूसुतः ॥ ३७ ॥ मारकान्कारकान्वीक्ष्य मंदज्ञौ

घ्नंति पापिनः ॥ इत्यूह्यानि फलान्येवं बुधैस्तु झषजन्मनः ॥ ३८ ॥ एतच्छास्त्रानुसारेण मारकान्निर्दिशेद्बुधः ॥ चंद्रसूर्यौ विना सर्वे मारकाः परिकीर्तिताः ॥ ३९ ॥ स्वदशायां स्वभुक्तौ च नराणां निधनं नहि ॥ क्वचिद्दशायामिच्छंति स्वभुक्तौ न कदाचन ॥ ४० ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे कारकमारकादिविचारकथनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

अथ द्वादशभावनिरीक्षणमाह ।

तनो रूपं च ज्ञानं च वर्णं चैव बलाबलम् ॥ शीलं वै प्रकृतिं चाथ तनुस्थानान्निरीक्षयेत् ॥ १ ॥ धनस्यापि कुटुंबस्य मृत्युजालमामित्रकम् ॥ धातुरत्नादिकं सर्वं धनस्थानान्निरीक्षयेत् ॥ २ ॥ विक्रमं भृत्यभ्रात्रादि चोपदेशप्रयाणकम् ॥ पित्रोर्वै मरणं विद्याद्दुश्चिक्याच्च निरीक्षयेत् ॥ ३ ॥ वाहनस्याथ बंधूनां मातृसौख्यादिकानपि ॥ निधिक्षेत्रगृहं चापि हर्म्यारामादिकानपि ॥ ४ ॥ धर्मस्य विमलस्थानं पातालाच्च निरीक्षयेत् ॥ यंत्रमंत्रौ तथा विद्या बुद्धेश्चैव प्रबंधकाः ॥ पुत्रराज्यापभ्रंशादि पश्येत्पुत्रालयाद्बुधः ॥ ५ ॥ मातुलांतकशंकानां शत्रूंश्चैव व्रणादिकान् ॥ सपत्नीमातरश्चापि ह्यरिस्थानान्निरीक्षयेत् ॥ ६ ॥ जाया मध्यप्रयाणं च व्ययभावं तथा निशि ॥ मरणं च स्वदेहस्य जायाभावान्निरीक्षयेत् ॥ ७ ॥ ऋणदानग्रहणयोर्गुदे चैवांकुरादयः ॥ गत्यनुक्तादिकं सर्वं पश्येद्रंध्राद्विचक्षणः ॥ ८ ॥ हर्म्यं धर्मं च श्यालं च भ्रातृपत्न्यादिकांस्तथा ॥ तीर्थयात्रादिकं सर्वं धर्मस्थानान्निरीक्षयेत् ॥ ९ ॥ राज्यं चाकाशवृत्तिं च मानं चैव पितुस्तथा ॥ प्रवासस्य ऋणस्यापि व्योमस्थानान्निरीक्षणम् ॥ १० ॥ नानावस्तुभवस्यापि पुत्रजायादिकस्य च ॥ रिपूणां रिपवश्चैव भवस्थानान्निरीक्षणम् ॥ ११ ॥ व्ययं च वैरिवृत्तांतं रिःफमंत्यादिकं तथा ॥ एवं भावफलं सम्यक् तत्त-

त्संज्ञानपूर्वकम् ॥ १२ ॥ व्ययाच्चैव हि ज्ञातव्यं वेत्ति सर्वत्र बुद्धिमान् ॥
यो यो भावपतिर्नष्टस्त्रिकेशाद्यैश्च संयुतः ॥ भावं न वीक्षते सम्यग्ग्रहो
वापि मृतो यदा ॥ १३ ॥ स्थविरो वा भवेत्खेटः सुप्तो वापि
प्रपीडितः ॥ तदा तद्भावजं सौख्यं नष्टं ब्रूयाद्विशंकितः ॥ १४ ॥
यदा सौम्यग्रहैर्दृष्टो भावो भावेशसौम्ययुक् ॥ युवा प्रबुद्धराजस्थः
कुमारो वापि तद्भवेत् ॥ १५ ॥ ईशेक्षणवशात्तत्र भावसौख्यं
वदेद्बुधः ॥ शुक्रः शुक्रश्च नेत्रं च चंद्रमा मनसस्तथा ॥ १६ ॥ आत्मा
वै दिनकृत्तत्र जीवो जीवितसौख्यकम् ॥ क्रोधः पराक्रमो भौमो
बुधो बालत्वधीमतः ॥ १७ ॥ शनिर्दुःखप्रदानाच्च प्रपदः पार्श्वकस्तथा
॥ १८ ॥ राहुरैश्वर्यकं विद्धि मुखनाभिपदस्तलः ॥ शिरो
नेत्रे तथा कर्णौ नासा चापि कपोलकौ ॥ १९ ॥ हनू मुखं तथा वाच्यं
कंठांसौ बाहुकौ तथा ॥ पार्श्वे बाहुद्वये चैव क्रोडे नाभौ तथैव
च ॥ २० ॥ बस्तिलिंगगुदे वृष्णावूरू जानू च जंघके ॥ पदेति चैव
सर्वांगे संस्थां ब्रूयुर्विचक्षणाः ॥ २१ ॥ लग्ने तत्कालद्रेष्काणे शिरादि
परिकल्पयेत् ॥ तस्माद्यस्मिन्स्थितः खेटस्तत्र चिह्नं स्फुटं वदेत्
॥ २२ ॥ एवं भेदानुभेदेन सर्वत्रैवोपलक्षयेत् ॥ संक्षेपेणैतदुदितमन्यबुद्ध्यनुसारतः
॥ २३ ॥

अथ प्रथमभावफलम् ।

देहाधिपः पापयुतोऽष्टमस्थो व्ययारिगो वांगसुखं निहन्ति ॥
सर्वत्र भावेषु च योजनीयमेवं बुधैर्भाववशात्फलं हि ॥ २४ ॥ एवं
तृतीयेपि च सप्तमेऽपि फलं विमृश्यं कृतिभिः प्रयत्नात् ॥ तथा
व्यये मित्रगृहे रिपौ मृते स्थिते विलग्नाधिपतौ फलं स्यात् ॥ २५ ॥
पापो विलग्नाधिपतिर्विलग्ने चंद्रे विलग्ने यदि बालकः स्यात् ॥ तदाऽतिरोगं
स हि केंद्रसंस्थत्रिकोणलाभेषु गदं निहंति ॥ २६ ॥ बलोन्नतामेव
तु पापवत्तामेतस्य वित्तं फलमानुरूप्यताम् ॥ नीचारि-

सूर्यस्य गृहेषु तिष्ठन् स्वर्क्षादिगृक्षादिगृहत्रये च ॥ २७ ॥ देहाधिपश्चंद्रगृहाधिपो वा तृतीयरिःफारिगतो बलः स्यात् ॥ नीचास्तगद्वयष्टगृहे स्थितो वा कार्श्यं शरीरेऽतिगदं करोति ॥ २८ ॥ लग्नाधिपो वा जीवो वा शुक्रो वा यदि केंद्रगः ॥ तस्य पुत्रस्य दीर्घायुर्धनवान्राजवल्लभः ॥ २९ ॥ लग्नाधिपोन्नतबलैश्च शुभैर्नवकेन दृष्टस्य ॥ केंद्रस्थिते शुभावलोक्ये मृत्युहीनेऽपि दीर्घायुः ॥ ३० ॥ केन्द्रत्रिकोणेषु न यस्य पापा लग्नाधिपो सुरगुरुश्चतुरष्टमस्थः ॥ भुक्त्वा सुखानि विविधानि च पुण्यकर्मा जीवेत्तु वर्षशतमेव विमुक्तरोगः ॥ ३१ ॥ लग्नेशे चरराशिस्थे शुभग्रहनिरीक्षिते ॥ कीर्तिश्रीमान्महाभोगी देहपुष्टिसमान्वितः ॥ ३२ ॥ जीवः शुक्रो बुधश्चंद्रो लग्ने शशिसमन्वितः ॥ लग्नात्केंद्रगतश्चैव राजलक्षणसंयुतः ॥ ३३ ॥ लग्ने राहुसमायुक्ते तथा सोमनिरीक्षिते ॥ लग्नांशे मंदसूरी चेज्जातश्च यमलो भवेत् ॥ ३४ ॥ जातो नरो बालविवेष्टितांगो लग्ने फणिर्मन्दसमन्वितश्च ॥ लग्ने च पार्श्वे द्वितये च पापैर्निरीक्षिते जीवबुधेंदुशुक्रैः ॥ ३५ ॥ रविचंद्रौ च ह्येकस्थावेकांशकसमन्वितौ ॥ त्रिमात्रा च त्रिभिर्मासैर्भ्रात्रा पित्रा च पोषितः ॥ ३६ ॥

अथ द्वितीयभावफलम् ।

शुक्रेण युक्तो यदि नेत्रनाथः शुक्रस्य वार्क्षादिग्रहत्रयस्य ॥ संबंधवान्स्याद्यदि देहपेन नेत्रं विधत्ते विपरीतभावम् ॥ ३७ ॥ तत्र स्थितौ चंद्ररवी निशांध्यं जात्यंधतां नेत्रपदेहपाकाः ॥ पैत्रर्क्षनाथेन युतास्तदांध्यं कुर्वन्ति मात्रादिफलं तथेदृक् ॥ ३८ ॥ दोषकृन्न च सर्वत्र स्वोच्चस्वर्क्षगतो ग्रहः ॥ षडादित्रयसंस्थश्चेत्तद्विना दोषकृच्छुभः ॥ ३९ ॥ वागीशवाग्गृहाधीशौ षडादित्रयसंस्थितौ ॥ मूकतां कुरुतोऽप्येवं पितृमातृगृहाधिपाः ॥ ४० ॥ वागीशवाग्गृहाधीशा युतास्ते त्रयसंस्थिताः ॥ कुर्वंति तेषां मूक-

त्वमेवमूह्यं मनीषिभिः ॥ ४१ ॥ कुटुंबकारकाः केन्द्रत्रिकोणेषु गता ग्रहाः ॥ सकुटुंबकलत्रेशा कलत्रं वा कुटुम्बकम् ॥ ४२ ॥ पश्यंति च द्वयस्था वा यावत्तावत्प्रमाणकम् ॥ कलत्रं निर्दिशेत्प्राज्ञोऽतवा तेषां च नो वदेत् ॥ ४३ ॥ विद्याधिपौ जीवबुधावविद्यामीरित्रयस्थौ कुरुतोऽथ तौ चेत् ॥ केंद्रत्रिकोणस्थगृहोच्चसंस्थौ प्रयच्छतां द्रागनवद्यविद्याम् ॥ ४४ ॥ एवं बुधस्यांगिरसः षडादित्रयस्थितौ नीचग्रहोऽरिनाथः ॥ केंद्रत्रिकोणस्थगृहोच्चसंस्थो धनाभिवृद्धिं कुरुतस्तदैव ॥ ४५ ॥ धनाधिपो गुरुर्यस्य धनराशिस्थितो यदि ॥ भौमेन सहितो वापि धनवान् स नरो भवेत् ॥ ४६ ॥ धनेशे लाभराशिस्थे लाभेशे वा धनं गते ॥ तावुभौ केंद्रराशिस्थौ धनवान्स नरो भवेत् ॥ ४७ ॥ धनेशे केंद्रराशिस्थे लाभेशे तात्रिकोणगे ॥ गुरुशुक्रयुते दृष्टे धनलाभमुदीरयेत् ॥ ४८ ॥ वित्तेशे रिपुभावस्थे लाभेशे तद्गते यदि ॥ वित्तलाभौ पापयुक्तौ दृष्टे निर्धन एव सः ॥ ४९ ॥ वित्तलाभाधिपौ द्विस्थै पापखेचरसंयुतैः ॥ जन्मप्रभृतिदारिद्र्यं भिक्षान्नं लभते नरः ॥ ५० ॥ षष्ठाष्टमव्ययस्थेषु धनलाभाधिपौ स्थितौ ॥ लाभे कुजे धने राहौ राजदंडाद्धनक्षयः ॥ ५१ ॥ लाभे जीवे धने शुक्रे तद्दीशे शुभसंयुते ॥ व्यये शुभग्रहयुते धर्ममूलाद्धनव्ययः ॥ ५२ ॥ कुटुंबराशेरधिपः स सौम्ये केंद्रेऽथ सौम्ये च सुहृद्गृही वा ॥ सौम्यर्क्षयुक्तो यदि जातपुण्यः कुटुंबसंरक्षणवाग्विभूतः ॥ ५३ ॥ कुटुंबनाथे परमोच्चयुक्ते देवेंद्रपूज्ये च समीक्षिते वा ॥ तथाविधे तद्भवनेऽभिजातः सहस्ररक्षो भुवनप्रतापी ॥ ५४ ॥ तन्नाथे भृगुणा बुधेन सहिते पारावतांशे तथा स्वोच्चे चाथ सुहृद्गृहे धनपतौ स्वस्थानकोलाहलः ॥ ॥ ५५ ॥ कुटुंबराशिस्थपतौ यदि स्याद्भृगौ बुधे तादृशभावनाथे ॥ स्वोच्चे सुहृत्क्षेत्रगतेऽथवा स्यात्परोपकारी जनरक्षकः स्यात् ॥ ५६ ॥

नेत्रेशे बलसंयुक्ते शोभनाक्षो भवेन्नरः ॥ षष्ठाष्टमव्यये युक्ते नेत्रे वैकल्य
मादिशेत् ॥ ५७ ॥ धनेशे पापसंयुक्ते धने पापसमन्विते ॥ असत्यवादी
पिशुनः पवनव्याधिसंयुतः ॥ ५८ ॥

अथ तृतीयभावफलम् ।

सभौमो भ्रातृभावेशः षडादित्रयसंस्थितः ॥ भ्रातृक्षेत्रगतो
वापि भ्रातृभावं विनिर्दिशेत् ॥ ५९ ॥ तौ पापयोगतः पापक्षेत्रयोगेन
वा पुनः ॥ उत्पाट्य सहजान्सद्यो निहंता शास्त्रनिश्चयात् ॥ ६० ॥
स्त्रीग्रहो भ्रातृभावेशः स्त्रीग्रहो भ्रातृगोऽपि वा ॥ भगिनी स्यात्तदा भ्राता
पुंगृहे पुंग्रहो यदि ॥ मिश्रे मिश्रफलं चात्र बलाबलविनिर्णयः ॥ ६१ ॥
नाशस्थितौ सोदरनाथभौमौ पापेक्षितौ सोदरनाशमाहुः ॥ पापेक्षितौ
पापसमन्वितौ वा त्रिसप्तविद्याप्रविनाशहेतू ॥६२॥ भ्रातृभे कारके वापि
शुभयुक्तनिरीक्षिते ॥ भावे वा बलसंपूर्णे भ्रातृणांवर्धनं भवेत् ॥ ६३ ॥
केंद्रत्रिकोणगे वापि स्वोच्चमित्रस्ववर्गगे ॥ नाथे वा कारके वापि भ्रातृलाभं
वदेद्बुधः ॥ ६४ ॥ भ्रातृभे बुधसंयुक्ते तदीशे चंद्रसंयुते ॥
कारके मंदसंयुक्ते भगिन्येकाग्रतो भवेत् ॥ ६५ ॥ पश्चात्सहोदरेप्येतत्तृतीयस्तु
मृतौ भवेत्॥ कारके राहुसंयुक्ते विक्रमेशस्तु नीचगः
॥ ६६ ॥ पश्चात्सहोदराभावात्पूर्वस्तु त्रयकृद्भवेत् ॥ भ्रातृस्थानाधिपे
केन्द्रे कारके तात्रिकोणगे ॥ ६७ ॥ जीवेन सहितश्चोच्चे संख्या द्वादश
सोदराः ॥ ६८ ॥ अयं तृतीयगर्भश्च प्रथमाच्च तृतीयके ॥ सप्तमश्चैव
नवमो द्वादशश्च मृतिप्रदः ॥ ६९ ॥ शेषाः सहोदरा दीर्घाः षड्भार्या
यमलो भवेत् ॥ व्ययेशेन युते भौमे गुरुणा सहितोऽपि वा ॥७०॥
भ्रातृस्थाने शशियुते सप्तसंख्यास्तु सोदराः ॥ एतेषां द्विप्रजानाथः
शुक्रयुक्तेक्षितेन हि ॥ ७१ ॥

अथ चतुर्थभावफलम् ।

गेहाधिनाथेन युते तु गेहे देहाधिपेनापि गृहाभिलब्धिः ॥ युते षडादौ तु विपर्ययः स्याद्गृहाधिपे देहपतौ च तद्वत् ॥ ७२ ॥ केंद्रत्रिकोणे च शुभग्रहेण युते समीचीनगृहाभिलब्धिः ॥ क्षेत्रस्य चिंता सदनाधिपेन जीवेन चिंता तु सुखस्य कार्या ॥ ७३ ॥ द्विव्यांगनावाहनवस्तुभूषाचिंता तु कार्या भृगुणा बुधेन्द्रैः ॥ तमःशनिभ्यामभिचिंत्यमायुरर्केण तातः शशिनात्र माता ॥ ७४ ॥ बुधेन बुद्धिः सदनर्क्षसंस्थां गतेन सप्तेशयुतेन च स्यात् ॥ केंद्रत्रिकोणेषु गतेषु सप्त प्रपश्यता वापि स्वतुंगगेन ॥ ७५ ॥ स्वकीयस्वांशगे स्वोच्चे सुतस्थानस्थितो यदि ॥ सुखवाहनवृद्धिः स्याच्छंखभेर्यादिवाद्ययुक् ॥ ७६ ॥ विचित्रसौधप्राकारं मंडितं गृहमादिशेत् ॥ कर्माधिपने सहिते नाथे चंद्रार्कसूनुना ॥ ७७ ॥ बंधुस्थानेश्वरे सौम्यशुभग्रहनिरीक्षिते ॥ शशिजे लग्नसंयुक्ते बुधपूज्यो भवेन्नरः ॥ ७८ ॥ मातुः स्थाने शुभयुते तदीशे स्वोच्चराशिगे ॥ कारके बलसंयुक्ते मातृदीर्घायुरादिशेत् ॥ ७९ ॥ स्वतुंगसंस्थे हिबुकाधिनाथे स्वर्क्षे त्रिभे मित्रगृहे स्थिते च ॥ शुभेन दृष्टे शुभसंयुते च क्षेत्राभिवृद्धिं प्रवदेन्नराणाम् ॥८० ॥ सुखेशे केंद्रभावस्थे तथा केंद्रे स्थितो भृगुः ॥ शशिजे स्वोच्चराशिस्थे विद्वान्पंडित एव सः ॥ ८१ ॥ सुखे मंदे रवियुते चंद्रो भाग्यगतो यदि ॥ लाभस्थानगते भौमे गोमहिष्यादिलाभकृत् ॥ ८२ ॥ चरग्रहसमायुक्ते सुखे तद्राशिनायके ॥ षष्ठे भौमे व्ययगते मूकत्वं प्राप्नुते नरः ॥ ८३ ॥ लग्नस्थानाधिपे सौम्ये सुखेशे नीचराशिगे ॥ कारके व्ययराशिस्थे सुखेशे लाभसंयुते ॥ ८४ ॥ द्वादशे वत्सरे प्राप्ते नरवाहनलाभकृत् ॥ वाहने रविसंयुक्ते स्वोच्चे तद्राशिनायके ॥ ८५ ॥ युते शुक्रेण संयुक्ते द्वात्रिंशे वाहनं भवेत् ॥

कर्मेशेन युते बंधुनाशे तुंगांशसंयुते ॥ ८६ ॥ द्विचत्वारिंशके प्राप्ते नरो वाहनभाग्भवेत् ॥ लाभेशे सुखराशिस्थे सुखशे लाभसंयुते ॥ द्वादशे वत्सरे प्राप्ते नरवाहनलाभकृत् ॥ ८७ ॥

अथ पंचमभावफलम् ।

षडादित्रयसंस्थे तु सुताधीशे त्वपुत्रता ॥ केंद्रत्रिकोणसंस्थे तु पुत्रलाभाभिसम्भवः ॥ ८८ ॥ सत्पुत्रलाभः सुतपे सुरेज्ये शुभेषु गेहेषु गते च भानौ ॥ एकः स्थिरः स्यात्सुत एक एव स्थितः शुभः केंद्रनवात्मजस्थे ॥ ८९ ॥ पितापि चिंत्यो नवमे सुतर्क्षे एवंविधं चिंतनमूहनीयम् ॥ ९० ॥ क्षेत्रस्य कारको भौमः कर्मस्थानेऽप्ययं विधिः ॥ अस्तंगते पंचमेशे पापाक्रांते च दुर्बले ॥ ९१ ॥ षष्ठे नीचे सुताधीशे काकवंध्या विशेषतः ॥ षष्ठस्थाने सुताधीशे लग्नेशे कुजवेश्मनि ॥ म्रियते प्रथमापत्यं काकवंध्यात्वमाप्नुयात् ॥ ९२ ॥ सुताधीशो हि नीचस्थः षडादित्रयसंस्थितः ॥ काकवंध्या भवेन्नारी सुते केतुबुधौ यदि ॥ ९३ ॥ सुतेशो नीचगो यत्र सुतस्थानं न पश्यति ॥ तत्र सौरिबुधौ स्यातां काकवंध्यात्वमाप्नुयात् ॥ ९४ ॥ भाग्येशो मूर्तिवर्ती च सुतेशो नीचगो यदि ॥ सुते केतुबुधौ स्यातां सुतं कष्टाद्विनिर्दिशेत् ॥ ९५ ॥ षडादित्रयसंस्थोऽपि नीचो वाऽप्यारिसंस्थितः ॥ पापाक्रांते सुतस्थाने पुत्रं कष्टाद्विनिर्दिशेत् ॥ ९६ ॥ पुत्रस्थाने बुधक्षेत्रे मंदक्षेत्रेऽथवा पुनः ॥ मंदे मांद्ययुते दृष्टे तदा दत्तादयः सुताः ॥ रविचन्द्रौ यदैकस्थावेकांशकसमन्वितौ ॥ ९७ ॥ त्रिमात्राभिरसौ भ्राता द्विपित्राऽपि च पोषकः ॥ पंचमे षड्गृहे युक्ते तदीशे व्ययराशिगे ॥ लग्नेशेंदुबलो यस्य दत्तपुत्रभवादयः ॥ ९८ ॥ सुतभवने भृगुजीवसौम्यनाथे बलसहिते रविलोकिते युते वा ॥ बहुसुतजननं वदंति संतः सुतभवनेशबलेन चिंत्यमेतत् ॥ ९९ ॥ सुतेशे शशियुक्ते च त्रिराश्यंशगतेऽपि च ॥

तथैव कन्यकालाभं प्रवदेन्मतिमान्नरः ॥ १०० ॥ सुतेशे नरराशिस्थे राहुणा सहितः शशी ॥ पुत्रस्थानं गते मंदे परजातं वदेच्छिशुम् ॥ ॥ १०१ ॥ सुतेशे राहुसंयुक्ते सुतस्थानं समाश्रितम् ॥ न वीक्ष्यतेन्दुगुरुणा परजातो भवेन्नरः ॥ १०२ ॥ न लग्नमिंदुं च गुरुर्निरीक्षते न वा शशांको रविणा समागतः ॥ सपापकार्केण युते नवांशके परेण जातं प्रवदंति निश्चितम् ॥ १०३ ॥ लग्नाद्द्वादशगे चंद्रे लग्नादष्टमगो गुरुः ॥ पापयुक्तेन संदृष्टे अन्यबीजं न संशयः ॥ १०४ ॥ पुत्रस्थानाधिपे स्वोच्चे लग्नाच्चेद्द्वित्रिकोणगे ॥ गुरुणा संयुते दृष्टे पुत्रभाग्यमुपैति सः ॥ १०५ ॥ त्रिचतुःपापसंयुक्ते सुतेशेनाधिपे तु युक् ॥ सुतेशे नाशराशिस्थे नीचसंस्थो भवेच्छिशुः ॥ १०६ ॥ पुत्रस्थानं गते जीवे तदीशे भृगुसंयुते ॥ द्वात्रिंशे च त्रयस्त्रिंशे वत्सरे पुत्रलाभकृत् ॥ १०७ ॥ सुतेशे केंद्रभावस्थे कारकेण समन्विते ॥ षट्त्रिंशे त्रिंशदब्दे च पुत्रोत्पातिं विनिर्दिशेत् ॥ १०८ ॥ लग्नाद्भाग्यगते जीवे जीवाद्भाग्यगते भृगौ ॥ लग्नेशे भृगुसंयुक्ते चत्वारिंशे सुतं लभेत् ॥ १०९ ॥ पुत्रस्थानं गतो राहुस्तदीशे पापसंयुते ॥ नीचराशिगते जीवे द्वात्रिंशे पुत्रमृत्युदः ॥ ११० ॥ जीवात्पंचमगे पापे लग्नात्पुत्रं गतेऽपि च ॥ षड्विंशे च त्रयास्त्रिंशे चत्वारिंशे सुतक्षयः ॥ १११ ॥ लग्ने मांदिसमायुक्ते लग्नेशे नीचराशिगे ॥ षट्पंचाशद्दशाब्देषु पुत्रशोकसमाकुलः ॥ ११२ ॥ चतुर्थे पापसंयुक्ते षष्ठे पापसमन्विते ॥ सुतेशे परमोच्चस्थे लग्नेशेन समन्विते ॥ ११३ ॥ कारके शुभसंयुक्ते दशसंख्यास्तु सूनवः ॥ परमोच्चगते जीवे धनेशे राहुसंयुते ॥ ११४ ॥ भाग्येशे भाग्यसंयुक्ते संख्याता नवसूनवः ॥ पुत्रभाग्यगते जीवे सुतेशे बलसंयुते ॥ ११५ ॥ धनेशे कर्मराशिस्थे वसुसंख्यास्तु सूनवः ॥ पंचमात्पंचमे मंदे सुतस्थे च तदीश्वरे ॥ ११६ ॥ सूनवः सप्तसंख्याश्च द्विगर्भे यमलं भवेत् ॥ वित्तेशे

पंचमस्थे च सुतस्थे पंचमाधिपे ॥ ११७ ॥ षट्संख्या च सुतप्राप्तिस्तेषां च त्रिप्रजामृतिः ॥ लग्नात्पंचमगे जीवे जीवात्पंचमगे शनौ ॥ ११८ ॥ मंदात्पंचमगे राहौ पुत्रमेकं विनिर्दिशेत् ॥ पंचमे पापसंयुक्ते गुरोः पंचमगः शनिः ॥ ११९ ॥ कलत्रान्तरे पुत्रलाभं कलत्रत्रयभाग् भवेत् ॥ पंचमे पापसंयुक्ते गुरोः पंचमगे शनौ ॥ १२० ॥ पंचमे भौमसंयुक्ते लग्नेशे धनसंगते ॥ जातं जातं विनाशं च दीर्घायुश्चैव मानवः ॥ १२१ ॥

अथ षष्ठभावफलम् ।

षष्ठाधिपोऽपि पापश्चेद्देहे वाप्यष्टमे स्थितः ॥ तदा व्रणो भवद्देहे कर्मस्थानेऽप्ययं विधिः ॥ १२२ ॥ एवं पित्रादिभावेशास्तत्तत्कारकसंयुताः ॥ व्रणाधिपयुताश्चापि षष्ठाष्टमयुता यदि ॥ १२३ ॥ तेषामपि व्रणं वाच्यमादित्येन शिरोव्रणम् ॥ इंदुना च मुखे कंठे भौमेन ज्ञेन नाभिषु ॥ १२४ ॥ गुरुणा नासिकायां च भृगुणा नयने पदे ॥ शनिना राहुणा कुक्षौ केतुना च तथा भवेत्॥१२५॥ लग्नाधिपः कुजक्षेत्रे बुधस्य यदि संस्थितः ॥ यत्र कुत्र स्थितो ज्ञेन वीक्षितो मुखरुक्प्रदः ॥ १२६ ॥ लग्नाधिपौ कुजबुधौ चंद्रेण यदि संस्थितौ ॥ राहुर्वा शनिना सार्द्धं कुष्ठं तत्र विनिर्दिशेत् ॥ १२७ ॥ लग्नाधिपं विना लग्ने स्थितश्चेत्तमसा शशी ॥ श्वेतकुष्ठं तदा कृष्णकुष्ठं च शनिना सह ॥ १२८ ॥ कुजेन रक्तकुष्ठं स्यात्तत्तदेवं विचारयेत् ॥ लग्ने षष्ठाष्टमाधीशौ रविणा यदि संस्थितौ ॥ १२९ ॥ ज्वरगंडुः कुजे ग्रंथिः शस्त्रव्रणमथापि वा ॥ बुधेन पित्तं गुरुणा रोगाभावं विनिर्दिशेत् ॥ १३० ॥ स्त्रीभिः शुक्रेण शनिना वायुना संयुतो यदि ॥ गण्डश्चाण्डालतो नाभौ तमः केत्वोर्गृहे भयम् ॥ १३१ ॥ चंद्रेण गण्डसलिलैः कफश्लेष्मादिना भवेत् ॥ एवं पित्रापि भावानां तत्तत्कारक-

योगतः ॥ १३२ ॥ गण्डे तेषां भवेदेवमूह्यमत्र मनीषिभिः ॥ हतशत्रुग्रहादाप्तिगजवाजिधनाधिपाः
॥ १३३ ॥ श्रीपतिः स्वोच्चतेजस्वी
गृहारामसुखी भवेत् ॥ दीप्ते विरचितं पुंसां प्रभावरिपुनीचयोः ॥
॥ १३४ ॥ लक्ष्म्या संलिंगितो देहे गजभूमिसहस्रभृत् ॥ रोगस्थानगते
पापे तदीशे पापसंयुते ॥ १३५ ॥ राहुणा संयुते मंदे
सर्वदा रोगसंयुतः ॥ रोगस्थानगते भौमे तदीशे रंध्रसंयुते ॥ १३६ ॥
षड्वर्षद्वादशे वर्षे ज्वररोगी भवेन्नरः ॥ षष्ठस्थानगते जीवे तद्गृहे चंद्रसंयुते
॥ १३७ ॥ द्वाविंशैकोनविंशेब्दे कुष्ठरोगं विनिर्दिशेत् ॥ रोगस्थानं
गतो राहुः केंद्रे मांदिसमान्वितः ॥ १३८ ॥ लग्नेशे नाशराशिस्थे
षड्विंशे क्षयरोगता ॥ व्ययेशे रोगराशिस्थे तदीशे व्ययराशिगे
॥ १३९ ॥ त्रिंशद्वर्षैकोनवर्षे गुल्मरोगं विनिर्दिशेत् ॥ रिपुस्थानगते
चंद्रे शनिना संयुते यदि ॥ १४० ॥ पंचपंचाशताब्देषु रक्तकुष्ठं
विनिर्दिशेत् ॥ लग्नेशे लग्नराशिस्थे मंदे शत्रुसमन्विते ॥ १४१ ॥ एकोनषष्टिवर्षे
तु वातरोगार्दितो भवेत् ॥ रंध्रेशे रिपुराशिस्थे व्ययेशे
लग्नसंस्थिते ॥ १४२ ॥ चन्द्रे षष्ठेशसंयुक्ते वसुवर्षे मृगाद्भयम् ॥
षष्ठाष्टमगतो राहुस्तस्मादष्टगते शनौ ॥ १४३ ॥ वत्सराग्निभयं
तस्य त्रिवर्षे पक्षिदोषभाक् ॥ १४४ ॥ षष्ठाष्टमगते सूर्ये तद्व्यये चंद्रसंयुते
॥ पंचमे नवमेऽब्दे तु जलभीतिं विनिर्दिशेत् ॥ १४५ ॥ अष्टमेमंदसंयुक्ते
रंध्राद्वौ द्वादशे कुजः ॥ त्रिंशाब्दं च दशेऽष्टे तु स्फोटकादिविनिर्दिशेत्
॥ १४६ ॥ रंध्रांशे राहुसंयुक्ते तदंशे रंध्रकोणगे ॥ द्वाविंशेऽष्टादशे
वर्षे ग्रंथिमेहादिपीडनम् ॥ १४७ ॥ लाभेशे रिपुभावस्थे
तदीशे लाभराशिगे ॥ एकात्रिंशैकचत्वारि शत्रुमूलाद्धनव्ययः ॥
॥ १४८ ॥ सुतेशे रिपुभावस्थे षष्ठेशे गुरुसंयुते ॥ व्ययेशे लग्नभावस्थे
तस्य पुत्रो रिपुर्भवेत् ॥ १४९ ॥ लग्नेशे षष्ठराशिस्थे तदंशे
षष्ठराशिगे ॥ दशमैकोनविंशेऽब्दे शुनकाद्भीतिरुच्यते ॥ १५० ॥

अथ सप्तमभावफलम् ।

कलत्रपो विना स्वर्क्षं षडादित्रयसंस्थितः ॥ रोगिणीं कुरुते
नारीं तथा तुंगादिकं विना ॥ १५१ ॥ स्त्रीपुत्रयात्राफलचिंतनानि
कार्याण्यनेनापि सहाधिपेन ॥ शुभेन कार्यं शुभभं तथैव पापेन
पापं फलमूहनीयम् ॥ १५२ ॥ सप्तमे तु स्थिते शुक्रेऽतीवकामी
भवेन्नरः ॥ यत्रकुत्रस्थिते पापयुते स्त्रीमरणं भवेत् ॥ १५३ ॥ दाराधिपः
पुण्यग्रहेण युक्तो दृष्टोऽपि वा पूर्णबलः प्रसन्नः ॥ सौभाग्ययुक्तो
गुणवान्प्रभुश्च दाता विभोग्यं बहुधान्यमाहुः ॥ १५४ ॥ कलत्रेशे
बहुगुणे तुंगवक्रादिहेतुभिः ॥ बहुभार्यान्तरं विद्याच्छत्रुनीचास्तगेषु
च ॥ १५५ ॥ परमोच्चगते मंदाधिनाथे मंदराशौ शुभखेचरेण
दृष्टे ॥ अथवा भृगुसदने तुंगे बहुभार्यं प्रवदंति बुद्धिमंतः ॥ १५६ ॥
वंध्यासंगो मदे भानौ चंद्रराशिसमः स्त्रियः ॥ कुजे रजस्वलासंगो
वंध्यासंगश्च कीर्तितः ॥ १५७ ॥ बुधे वेश्या च हीना च वणिक्स्त्री
वा प्रकीर्तिता ॥ गुरोर्ब्राह्मणभार्या स्याद्गर्भिणी संग एव
च ॥ १५८ ॥ हीना च पुष्पिणी वाच्या मन्दराहुफणीश्वरैः ॥
कुजोक्ते सुस्तना मन्दा व्याधिदौर्बलिनस्तथा ॥ १५९ ॥ कठिनोर्ध्वकुजाचार्यैं
श्रेष्ठस्थूलोत्तमस्तना ॥ पापे द्वादशकामस्थे क्षीणचंद्रस्तु
पंचमे ॥ १६० ॥ जातश्च भार्यावश्यः स्यादिति जातिविरोधकृत्
॥ जामित्रे मंदभौमस्थे तदंशे मंदभूमिजे ॥ १६१ ॥
वेश्या वा जारिणी वापि तस्य भार्या न संशयः ॥ भौमांशकगते
शुक्रे भौमक्षेत्रगतेऽथवा ॥ १६२ ॥ भौमयुक्ते च दृष्टे वा भगचुंबनभाग्
भवेत् ॥ मंदांशकगते शुक्रे मन्दक्षेत्रगतेऽपि च ॥ १६३ ॥
मंदयुक्ते च दृष्टे च शिश्नचुंबनतत्परः ॥ दारेशे स्वोच्चराशिस्थे
दारे शुभसमन्विते ॥ १६४ ॥ लग्नेशे बलसंयुक्ते स कलत्रसमन्वितः
॥ १६५ ॥ कलत्रनाथे रिपुनीचसंस्थे मूढेऽथवा पापनिरी-

क्षिते वा ॥ कलत्रभे पापयुते च दृष्टे कलत्रहानिं प्रवदंति संतः ॥ १६६ ॥ षष्ठाष्टमव्ययस्थेषु मंदेशो दुर्बलो यदि ॥ नीचराशिगते युक्ते दारनाशं विनिर्दिशेत् ॥ कलत्रस्थानगे चंद्रे तदीशे व्ययराशिगे ॥ १६७ ॥ कारको बलहीनश्च दारसौख्यं न विद्यते ॥ भार्याधिपे नीचगृहे च पापपापर्क्षगे वा बहुपापयुक्ते ॥ १६८ क्लीबे ग्रहे सप्तमराशिसंस्थे तस्योदयांशे द्विकलत्रसिद्धिः ॥ कलत्रस्थानगे भौमे शुक्रे जामित्रगे शनौ ॥ १६९ ॥ लग्नेशे रंध्रराशिस्थेकलत्रत्रयवान् भवेत् ॥ द्विस्वभावगते शुक्रे स्वोच्चतद्राशिनायके ॥ १७० ॥ दारेशे बलसंयुक्ते बहुदारसमन्वितः ॥ दारेशे शुभराशिस्थे स्वोच्चस्वर्क्षगतो भृगुः ॥ १७१ ॥ पंचमे नवमेऽब्दे तु विवाहः प्रायशो भवेत् ॥ दारस्थानं गते सूर्ये तदीशे भृगुसंयुते ॥ १७२ ॥ सप्तमैकादशे वर्षे विवाहः प्रायशो भवेत् ॥ कुटुंबस्थानगे शुक्रे दारेशे लाभराशिगे ॥ दशमे षोडशाऽब्दे च विवाहः प्रायशो भवेत् ॥ १७३ ॥ लग्नकेन्द्रगते शुक्रलग्नेशे मंदराशिगे ॥ वत्सरैकादशे प्राप्ते विवाहं लभते नरः ॥ १७४ ॥ लग्नात्केन्द्रगते शुक्रे तस्मात्कामगते शनौ ॥ द्वादशैकोनविंशे च विवाहः प्रायशो भवेत् ॥ १७५ ॥ चंद्राज्जामित्रगे शुक्रे शुक्राज्जामित्रगे शनौ ॥ वत्सरेऽष्टादशे प्राप्ते विवाहं लभते नरः ॥ १७६ ॥ धनेशे लाभराशिस्थे लग्नेशे कर्मराशिगे ॥ अब्दे पंचदशे वर्षे विवाहं लभते नरः ॥ १७७ ॥ धनेशे लाभराशिस्थे लाभेशे धनराशिगे ॥ अब्दे त्रयोदशे प्राप्ते विवाहं लभते नरः ॥ १७८ ॥ रन्ध्राज्जामित्रगे शुक्रे तदीशे भौमसंयुते ॥ द्वाविंशे सप्तविंशाब्दे विवाहं लभते नरः ॥ १७९ ॥ दारांशकगते लग्ने नाथे दारेश्वरे व्यये ॥ त्रयोविंशे च षड्विंशे विवाहं लभते नरः ॥ ॥ १८० ॥ रंध्रांशे दारराशिस्थे लग्नांशे भृगुसंयुते ॥ पंचविंशे त्रयस्त्रिं-

शे विवाहं लभते नरः ॥ १८१ ॥ भाग्याद्भाग्यगते शुक्रे तद्वये राहुसंयुते ॥ एकत्रिंशात्त्रयस्त्रिंशे दारलाभं विनिर्दिशेत् ॥ १८२ ॥ भाग्याज्जामित्रगे शुक्रे तद्द्यूने दारनायके ॥ त्रिंशे वा सप्तविंशाब्दे विवाहं लभते नरः ॥ १८३ ॥ दारे च नीचराशिस्थे शुक्रे रंध्रारिसंयुते ॥ अष्टादशे त्रयस्त्रिंशे वत्सरे दारनाशनम् ॥ १८४ ॥ मंदेशे नाशराशिस्थे व्ययेशे मंदराशिगे ॥ तस्य चैकोनविंशाब्दे दारनाशं विनिर्दिशेत् ॥ १८५ ॥ कुटुंबस्थानगो राहुः कलत्रे भौमसंयुते ॥ पाणिग्रहे च त्रिदिने सर्पदष्टे वधूमृतिः ॥ १८६ ॥ रंध्रस्थानगते शुक्रे तदीशे सौरिराशिगे ॥ द्वादशैकोनविंशाब्दे दारनाशं विनिर्दिशेत् ॥ १८७ ॥ लग्नेशे नीचराशिस्थे धनेशे निधनं गते ॥ त्रयोदशे तु संप्राप्ते कलत्रस्य मृतिर्भवेत् ॥ १८८ ॥ शुक्राज्जामित्रगे चंद्रे चंद्राज्जामित्रगे बुधे॥रंध्रेशे सुतभावस्थे प्रथमं दशमाब्दिकम्॥१८९॥ द्वाविंशे च द्वितीये च त्रयस्त्रिंशे तृतीयके ॥ विवाहं लभते मर्त्यो नात्र कार्या विचारणा ॥ १९० ॥

अथाष्टमभावफलम् ।

आयुःस्थानाधिपः पापैः सहैव यदि संस्थितः ॥ करोत्यल्पायुषं जातं लग्नेशोऽप्यत्र संस्थितः ॥ १९१ ॥ एवं हि शनिना चिंता कार्या तर्कैर्विचक्षणैः ॥ कर्माधिपेन च तथा चिंतनं कार्यमायुषः ॥ १९२ ॥ षष्ठे व्ययेऽपि षष्ठेशो व्ययाधीशो रिपौ व्यये ॥ लग्नेष्टमे स्थितो वापि दीर्घमायुः प्रयच्छति ॥ १९३ ॥ स्वस्थाने स्वांशकेनापि मित्रेशे मित्रमंदिरे ॥ दीर्घायुषं करोत्येव लग्नेशोऽष्टमपः पुनः॥ १९४ ॥ लग्नाष्टमपकर्मेशमंदाः केंद्रत्रिकोणयोः ॥ लाभे वा संस्थितास्तद्वद्दिशेयुर्दीर्घमायुषम् ॥ येषु यो बलवांस्तस्यानुसारादायुरादिशेत् ॥१९५॥ अष्टमाधिपतौ केंद्रे लग्नेशे बलवर्जिते ॥ विंशद्वर्षाण्यसौ जीवेद्द्वात्रिंशत्परमायुषम् ॥ १९६ ॥ रंध्रेशे नीचराशिस्थे रंध्रे पापग्रहैर्युते ॥ लग्नेशे

दुर्बले यस्या अल्पायुर्भवति ध्रुवम् ॥ १९७॥ रन्ध्रेशे पापसंयुक्ते रंध्रे पापग्रहैर्युते ॥ व्यये क्रूरग्रहैर्जाते जातमात्रं मृतिर्भवेत् ॥ १९८ ॥ केंद्रत्रिकोणपापस्थाः षष्ठाष्टसु भगा यदि ॥ लग्ने रंध्रेशनीचस्थे जातः सद्योमृतो भवेत् ॥ १९९ ॥ पंचमे पापसंयुक्ते रंध्रेशे पापसंयुते ॥ रंध्रे पापग्रहैर्युक्ते अल्पायुष्यः प्रजायते ॥ २०० ॥ रंध्रेशे रंध्रराशिस्थे चन्द्रे पापसमन्विते ॥ शुभदृष्टेन सफलं मासांते च मृतिर्भवेत् ॥ ॥ २०१ ॥ लग्नेशे स्वोच्चराशिस्थे चंद्रे लाभसमन्विते ॥ रंध्रस्थानगते जीवे दीर्घायुष्यं न संशयः ॥ २०२ ॥

अथ नवमभावफलम्

भाग्याधिनाथोऽपि च भाग्यकर्ता शुक्रोपि पापैः सह चेत्रिषु स्यात् ॥ त्रिषडादिभावेषु च भाग्यहीनं केंद्रत्रिकोणोपगतोऽतिभाग्यम् ॥ २०३ ॥ अनेन धर्मः परिकल्पनीयः पिता तु चिंत्यो निजमातुलस्य ॥ शुभे शुभस्थानगते शुभं स्याद्विपर्यये तत्र विपर्ययः स्यात् ॥ २०४ ॥ भाग्यस्थिते वाहनराशिसंस्थे शुक्रे च जीवे शुभराशियुक्ते ॥ भाग्याधिपे कोणचतुष्टये वा बहुत्वदेशाभरणं न यानम् ॥ २०५ ॥ गुरुस्थानगते जीवे तदीशे केंद्रसंस्थिते ॥ लग्नेशे बलसंयुक्ते बहुभाग्याधिपो भवेत् ॥ २०६ ॥ भाग्येशे बलसंयुक्ते भाग्ये भृगुसमन्विते ॥ बलात्केंद्रगते जीवे पितृभाग्यसमन्वितः ॥ २०७ ॥ भाग्यस्थानाद्द्वितीये वा सुखे भौमसमन्विते ॥ भाग्येशे नीचराशिस्थे पिता निर्धन एव सः ॥ २०८ ॥ भाग्येशे परमोच्चस्थे भाग्यांशे जीवसंयुते ॥ लग्नाच्चतुष्टये शुक्रे पिता दीर्घायुरादिशेत् ॥२०९॥ भाग्येशे केंद्रभावस्थे गुरुणा च निरीक्षते ॥ तत्पिता वाहनैर्युक्तो राजा वा तत्समो भवेत्॥२१०॥भाग्येशे कर्मभावस्थे कर्मेशे भाग्यराशिगे॥ कर्मेशाच्च धनाढ्यश्च कीर्तिमांस्तत्पिता भवेत् ॥ २११ ॥ परमोच्चांशगे सूर्ये भाग्येशे लाभसंस्थिते ॥ धार्मिष्ठो नृपवात्सल्यः पितृ-

पुण्यो भवेन्नरः ॥२१२॥लग्नात्त्रिकोणगे सूर्ये भाग्येशे सप्तमस्थिते ॥ गुरुणा सहिते दृष्टे पितृभक्तिसमन्वितः ॥२१३ ॥ भाग्येशे धनभावस्थे धनेशे भाग्यराशिगे ॥ द्वात्रिंशात्परतो भाग्यं वाहनं कीर्तिसंभवः ॥ २१४ ॥ लग्नेशे भाग्यराशिस्थे षष्ठेशे भाग्यराशिगे ॥ अन्योन्यवैरं ब्रुवते जनकः कुत्सितो भवेत् ॥ २१५ ॥ कर्मज्ञे रिपुरंध्रारिःफभवने जीवेच्च भिक्षाशनः ॥ भाग्येशे यदि जन्मकालसमये प्राप्नोति दीक्षां रविः ॥ २१६ ॥ कर्माधिपेन सहितो विक्रमेशो विधिर्बलः ॥ नीचराशिविमूढस्थो योगो भिक्षाशनात्प्रभुः ॥ २१७ ॥ षष्ठाष्टमव्यये भानू रंध्रेशे भाग्यसंयुते ॥ व्ययेशे लग्नराशिस्थे षष्ठांशपंचमे स्थिते ॥ २१८ ॥ जातस्य जननात्पूर्वं जनकस्य मृतिर्भवेत् ॥ रंध्रस्थानगते सूर्ये रंध्रेशे भाग्यनायके ॥ २१९ ॥ जातस्य प्रथमाब्दे तु पितुर्मरणमादिशेत् ॥ व्ययेशे भाग्यराशिस्थे नीचांशे भाग्यनायके ॥ २२० ॥ तृतीये षोडशे वर्षे जनकस्य मृतिर्भवेत् ॥ लग्नेशे नाशराशिस्थे रन्ध्रेशे भानुसंयुते ॥ २२१ ॥ द्वितीये द्वादशे वर्षे पितुर्मरणमादिशेत् ॥ भाग्याद्रंध्रगते राहौ भाग्याद्भाग्यगते रवौ ॥ २२२ ॥ षोडशेऽष्टादशे वर्षे जनकस्य मृतिर्भवेत् ॥ भाग्याद्रंध्रगते राहौ भाग्याद्भाग्यगते रवौ ॥ ॥ २२३ ॥ राहुणा सहिते सूर्ये चंद्राद्भाग्यगते शनौ ॥ २२४ ॥ सप्तमैकोनविंशाब्दे तातस्य मरणं ध्रुवम् ॥ २२५ ॥ भाग्येशे व्ययराशिस्थे व्ययेशे भाग्यराशिगे ॥ चतुश्चत्वारिवर्षाच्च पितुर्मरणमादिशेत् ॥ २२६ ॥ रव्यंशे च स्थिते चंद्रे लग्नेशे रंध्रसंयुते ॥ पंचत्रिंशैकचत्वारिवत्सरे पितृनाशनम् ॥ २२७ ॥ पितृस्थानाधिपे सूर्ये मंदभौमसमन्विते ॥ पंचाशद्वत्सरे प्राप्ते जनकस्य मृतिर्भवेत् ॥ २२८ ॥ भाग्यात्सप्तमगे सूर्ये भ्रातृसप्तमगस्तमः ॥ षष्ठभे पंचविंशाब्दे पितुर्मणमादिशेत् ॥ २२९ ॥ रंध्रजामित्रगे मंदे मंदाज्जामित्रगे रवौ ॥

त्रिंशैकविंशे षाड्विंशे जनकस्य मृतिर्भवेत् ॥ २३० ॥ भाग्येशे नीचराशिस्थे तदीशे भाग्यराशिगे ॥ षाड्विंशगे त्रयस्त्रिंशे पितुर्मरणमादिशेत् ॥ २३१ ॥ रव्यंशकस्थिते चंद्रे लग्नेशे रंध्रसंयुते ॥ पंचत्रिंशैकचत्वारिवत्सरे पितृनाशनम् ॥ २३२ ॥ पितृस्थानाधिपे सूर्ये चंद्रभौमसमन्विते ॥ पंचाशद्वत्सरे प्राप्ते जनकस्य मृतिर्भवेत् ॥ २३३ ॥ परमोच्चांशगे शुक्रे भाग्येशेन समन्विते ॥ भ्रातृस्थाने शनियुते बहुभाग्याधिपो भवेत् ॥ २३४ ॥ गुरुणा संयुते भाग्ये तदीशे केंद्रराशिगे ॥ विंशद्वर्षात्परं चैव बहुभाग्यं विनिर्दिशेत् ॥ २३५ ॥ परमोच्चांशगे सौम्ये भाग्येशे भाग्यराशिगे ॥ षट्त्रिंशाच्च परं चैव बहुभाग्यं विनिर्दिशेत् ॥ २३६ ॥ लग्नेशे भाग्यराशिस्थे भाग्येशे लग्नसंयुते ॥ गुरुणा संयुते द्यूने धनवाहनलाभकृत् ॥ २३७ ॥ भाग्याद्भाग्यगतो राहुर्भाग्यस्थे निधनं गते ॥ भाग्येशे नरराशिस्थे भाग्यहीनो भवेन्नरः ॥ २३८ ॥ भाग्यस्थानगते मंदे शशिना च समन्विते ॥ लग्नेशे नीचराशिस्थे भिक्षाशी च नरो भवेत् ॥ २३९ ॥

अथ दशमभावफलम् ।

कर्माधिपो बलोनश्चेत्कर्मवैकल्यमादिशेत् ॥ सैंहिः केंद्रत्रिकोणस्थो ज्योतिष्टोमादियागकृत् ॥ २४० ॥ अत्रायुषश्चिंतनं च कार्यं स्यात्कर्मणस्तथा ॥ शत्रुनीचगृहं त्यक्त्वा षष्ठाष्टमगृहं तथा ॥ २४१ ॥ दशमे पापसंयुक्ते लाभे पापसमन्विते ॥ दुष्कृतिं लभते मर्त्यः स्वजनानां विदूषकः ॥ २४२ ॥ कर्मेशे नाशराशिस्थे कर्मेशे राहुसंयुते ॥ जनद्वेषी महामूर्खो दुष्कृतिं लभते नरः ॥ कर्मेशे द्यूनराशिस्थे मंदभौमसमन्विते ॥ २४३ ॥ द्यूनेशे पापसंयुक्ते शिश्नोदरपरायणः ॥ तुंगराशिं समाश्रित्य कर्मेशे गुरुसंयुक्ते॥ २४४ ॥ भाग्येशे कर्मराशिस्थे मानैश्वर्यप्रतापवान् ॥ लाभेशे कर्मराशिस्थे

कर्मेशे लग्नसंयुते ॥ तावुभौ केंद्रगौ वापि सुखजीवनभाग् भवेत् ॥
॥ २४५ ॥ कर्मेशे बलसंयुक्ते मीने गुरुसमन्विते ॥ वस्त्राभरणसौख्यादि
लभते नात्र संशयः ॥ २४६ ॥ लाभस्थानगते सूर्ये राहुभौमसम-
न्विते ॥ रविपुत्रेण संयुक्ते कर्मच्छेत्ता भवेन्नरः ॥ २४७ ॥ मीने च
राहौ यदि चोच्चकांशे भागीरथीस्नानफलं लभेन्नरः ॥ माने च मीने
यदि वार्कपुत्रे संन्यासयोगं प्रवदंति तस्य ॥ २४८ ॥ मीने जीवे
भृगुयुते लग्नेशे बलसंयुते ॥ स्वोच्चराशिगते चंद्रे सम्यग्ज्ञानार्थवान्
भवेत् ॥ २४९ ॥ कर्मेशे लाभराशिस्थे लाभेशे लग्नसंस्थिते ॥
कर्मराशिस्थिते शुक्रे रत्नवान् स नरो भवेत् ॥ २५० ॥ केंद्रत्रिकोणगे
कर्मनाथे स्वोच्चसमाश्रिते ॥ गुरुणा सहिते दृष्टे स कर्मसहितो
भवेत् ॥ २५१ ॥ कर्मेशे लग्नभावस्थे लग्नेशेन समन्विते ॥ केंद्र-
त्रिकोणगे चंद्रे सत्कर्मनिरतो भवेत् ॥ २५२ ॥ कर्मस्थानगते मंदे
नीचखेचरसंयुते ॥ कर्मांशे पापसंयुक्ते कर्महीनो भवेन्नरः॥ २५३ ॥
कर्मेशे वांशराशिस्थे रंध्रेशे कर्मसंस्थिते ॥ पापग्रहेण संयुक्ते दुष्कर्मनि-
रतो भवेत् ॥ २५४ ॥ कर्मेशे नीचराशिस्थे कर्मस्थे पापखेचरे ॥ कर्म-
भात्कर्मगे पापे कर्मवैकल्यमादिशेत् ॥ २५५ ॥ कर्मस्थानगते चंद्रे
तदीशे तत्त्रिकोणगे ॥ लग्नेशे केंद्रभावस्थे सत्कीर्तिसहितो भवेत्
॥ २५६ ॥ लाभेशे कर्मभावस्थे कर्मेशे बलसंयुते ॥ देवेंद्रगुरुणा दृष्टे
सत्कीर्तिसहितो भवेत् ॥ २५७ ॥ कर्मस्थानाधिपे भाग्ये लग्नेशे
कर्मसंयुते ॥ लग्नात्पंचमगे चंद्रे ख्यातिकीर्तीं विनिर्दिशेत् ॥ २५८ ॥

अथैकादशभावफलम् ।

लाभाधिपो यदा लाभे तिष्ठेत्केंद्रत्रिकोणयोः ॥ बहुलाभं तदा
कुर्यादुच्चसूर्यांशगोऽपि वा ॥ २५९ ॥ लाभेशे धनराशिस्थे धनेशे
केंद्रसंस्थिते ॥ गुरुणा सहिते भावे गुरुलाभं विनिर्दिशेत् ॥ २६० ॥
षट्त्रिंशे वत्सरे प्राप्ते सहस्रद्वयनिष्कभाक् ॥ केंद्रत्रिकोणगे भावे

नाथे शुभसमन्विते ॥ चत्वारिंशे तु संप्राते सहस्रार्धं च निष्कभाक् ॥ २६१ ॥ लाभस्थाने गुरुयुते धने चंद्रसमन्विते ॥ भाग्यस्थानगते शुक्रे षट्सहस्राधिपो भवेत् ॥ २६२ ॥ लाभाच्च लाभगे जीवे गुरुचंद्रेण संयुते ॥ धनधान्याधिपः श्रीमान्रत्नाद्याभरणैर्युतः ॥ २६३ ॥ लाभेशे लग्नभावस्थे लग्नेशे लाभसंयुते ॥ त्रयास्त्रिंशे तु संप्राप्ते सहस्रनिष्कभाग्भवेत् ॥ २६४ ॥ धनेशे लाभराशिस्थे तदीशे धनराशिगे ॥ विवाहात्परतश्चैव बहुभाग्यं समादिशेत् ॥ २६५ ॥ धैर्येशे लाभराशिस्थे लाभेशे भ्रातृसंस्थिते ॥ भ्रातृभावाद्धनप्राप्तिर्दिव्याभरणसंयुतः ॥ २६६ ॥ लाभे पापे च व्यये पापयुक्ते दृष्टे पापे क्षेत्रयुक्तेन युक्ते ॥ लाभात्कामे लाभविघ्ने निरर्थं सौम्यार्थं यो वीक्षणं विघ्ननाशः ॥ २६७ ॥

अथ द्वादशभावफलम् ।

चंद्रो व्ययाधिपो धर्मलाभमंत्रेषु संस्थितः ॥ स्वोच्चस्वर्क्षनिजांशे वा लाभधर्मात्मजांशके ॥ दिव्यागारादिपर्यंको दिव्यगंधैकभोगवान् ॥ २६८ ॥ परार्घ्यरमणो दिव्यवस्त्रमाल्यादिभूषणः ॥ परार्घ्यसंयुतो वित्तो दिनानि नयति प्रभुः ॥ २६९ ॥ एवं स्वशत्रुनीचांशे अष्टांशे वाष्टमे रिपौ ॥ संस्थिताः कुरुते जातं कांतासुखविवर्जितम् ॥ २७० ॥ व्ययाधिक्यपरिक्लांतं दिव्यभोगनिराकृतम् ॥ स हि केंद्रत्रिकोणस्थः स्वास्त्रियालंकृतः स्वयम् ॥ २७१ ॥ एवं भ्रात्रादिभावेषु तत्तसर्वं विचारयेत् ॥ लग्नस्य पूर्वार्द्धे १० । ११ । १२ । १ । २ । ३ । गता नभोगाः फलं प्रदद्युस्त्वपरोक्षकं ते ॥ परार्द्धे ४ । ५ । ६ । ७ । ८ । ९ । षट्कोपगताः परोक्षं फलं वदंतीति बुधाः पुराणाः ॥ २७२ ॥ व्ययस्थानगतो राहुभौमार्करविसंयुतः ॥ तदीशेनार्कसंयुक्ते नरके पतनं भवेत् ॥ २७३ ॥ व्ययस्थानगते सौम्ये तदीशे स्वोच्चराशिगे ॥ शुभयुक्ते शुभैर्दृष्टे

परोक्षः स्यान्न संशयः ॥ २७४ ॥ व्ययेशे पापसंयुक्ते व्यये पापसमन्विते ॥ पापग्रहेण संदृष्टे देशाद्देशांतरं गतः ॥ २७५ ॥ व्ययेशे शुभराशिस्थे व्ययर्क्षे शुभसंयुते ॥ शुभग्रहेण संदृष्टे स्वदेशात्संचरो भवेत् ॥ २७६ ॥ व्यये मंदादिसंयुक्ते भूमिजेन समन्विते ॥ शुभदृष्टैश्च संप्राप्तिः पापमूलाद्धनार्जनम् ॥ २७७ ॥ लग्नेशे व्ययराशिस्थे व्ययेशे लग्नसंयुते ॥ भृगुपुत्रेण संयुक्ते धर्ममूलाद्धनव्ययम् ॥ २७८ ॥ अग्रे जातं रविर्हन्ति पृष्ठे जातं शनैश्चरः ॥ अग्रजं पृष्ठजं हंति सहजस्थो धरासुतः ॥ २७९ ॥ पत्नीस्थाने यदा राहुः पापयुग्मेन वीक्षितः ॥ पत्नी योगस्थिता तस्य भूतापि म्रियतेऽचिरात् ॥ २८० ॥ षष्ठे च भवने भौमः सप्तमे राहुसंभवः ॥ अष्टमे च यदा सौरिस्तस्य भार्या न जीवति ॥२८१ ॥ इति श्रीबृहत्पाराशरहोरासारांशे पूर्वखंडे द्वादशभावविचारकथनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥

मैत्रेय उवाच ।

परजातः कथं ज्ञेयः कथं ज्ञेयं शुभाशुभम् ॥ एतत्सर्वं समाचक्ष्व ग्रहराशिफलं शुभम् ॥ १ ॥

पराशर उवाच ।

तुर्यचन्द्रेक्षितः खेटः शत्रुभिर्वा युतेक्षितः ॥ परेण जायते बालो निश्चितं च यथा पशुः ॥ २ ॥ त्रिषष्ठद्विसुताधीशो यदा लग्ने स्थितस्तदा ॥ तथापि परजातः स्याद्भृत्याद्यन्यसुतादिभिः ॥ ३ ॥ लग्ने क्रूरोऽस्तगः सौम्यः कर्मस्थो रविनंदनः ॥ अस्मिन्योगे च यो जातो जायते वर्णसंकरः ॥ ४ ॥ मूर्तौ चेन्दुश्च दुश्चिक्ये भूमिनंदनभार्गवौ ॥ यदा पंचदशावर्णे तदापि परबालकः ॥ ५ ॥ ग्रहराजे स्थिते लग्ने चतुर्थे सिंहिकासुतः ॥ स्वदेवरात्सुतोत्पत्ति-

र्जाता तस्या न संशयः ॥ ६ ॥ लग्ने राहुधरापुत्रौ सप्तमे चंद्रभास्करौ ॥ नीचेन जायते बालो यदि राज्ञी भवेदपि ॥ ७ ॥ सूर्ययुक्तेंदुलग्नस्थे सप्तमे भौमभास्करौ ॥ अस्मिन्योगे यदा जन्म परेणैव हि जायते ॥ केंद्रं शून्यं भवेद्यस्य सोपि जातः परेणहि ॥ ८ ॥ द्विषष्ठाष्टमरिःफेषु ग्रहास्तिष्ठंति यस्य सः ॥ परजातो भवेत्सत्यमन्यत्रापि च संस्थितः ॥ ९ ॥ एकस्थाने यदाऽस्तेशलग्नेशौ सोपि जारजः ॥ १० ॥ जीवो निशाकरं लग्नं नेक्षेतापि स जारजः ॥ जीववर्गविहीनांशे तदा योगः पराज्जनेः ॥ ११ ॥ द्विशत्रू चैक केन्द्रस्थावन्यग्रहविवर्जितौ ॥ तदापि परजातः स्यात्स्थिरलग्ने विशेषतः ॥ १२ ॥ चतुर्थे दशमे लग्ने पापयुग्विधुसंस्थितः ॥ लग्नेशेनेक्षितं लग्नं तदापि परबालकः ॥ १३ ॥ लग्नेशे संस्थिते लग्ने परजातः कदाचन ॥ भंगोऽयं सर्वयोगानामिति ते कथितं मया ॥ १४ ॥

अथ लग्नेशद्वादशभावस्थितफलमाह ।

लग्नेशे लग्नगे पुंसः स्वदेहस्वभुजाक्रमी ॥ मनस्वी चातिचांचल्यो द्विभार्यः परगोपि वा ॥ १५ ॥ लग्नेशे धनगे लाभे सलाभः पीडितो नरः ॥ सुशीलो धर्मविन्मानी बहूदारगुणैर्युतः ॥ १६ ॥ लग्नेशे सहजे षष्ठे सिंहतुल्यपराक्रमी ॥ सर्वसंपद्युतो मानी द्विभार्यो मतिमान्सुखी ॥ १७ ॥ लग्नेशे दशमे तुर्ये पितृमातृसुखान्वितः ॥ बहुभ्रातृयुतः कामी गुणसौंदर्यसंयुतः ॥ १८ ॥ लग्नेशे पंचमे मानी सुतसौख्यं च मध्यमम् ॥ प्रथमापत्यनाशः स्यात्क्रोधी राजप्रवेशकः ॥ १९ ॥ लग्नेशः सप्तमे यस्य भार्या तस्य न जीवति ॥ विरक्तो वा प्रवासी वा दरिद्रो वा नृपोपि वा ॥ २० ॥ लग्नेशे व्ययगेऽष्टस्थे सिद्धविद्याविशारदः ॥ द्यूती चौरो महाक्रोधी परनार्यतिभोगकृत् ॥ २१ ॥ लग्नेशे नवमे पुंसो भाग्यवान् जनवल्लभः ॥ विष्णुभक्तः पटुर्वाग्मी पुत्रदारधनैर्युतः ॥ २२ ॥

अथ धनेशद्वादशभावस्थितफलमाह ।

धनेशे धनगे सोऽथ धनवान् गर्वसंयुतः ॥ भार्याद्वयं त्रयं चापि सुतहीनः प्रजायते ॥ २३ ॥ धनेशे सहजे तुर्ये विक्रमी मतिमान् गुणी ॥ परदाराभिगामी च लोभी वा देवनिंदकः ॥ २४ ॥ धनेशे रिपुगे शत्रोर्धनं प्राप्नोति निश्चितम् ॥ शत्रुतो वित्तनाशः स्याद्गुदे चोर्वोर्भवेच्च रुक् ॥ २५ ॥ धनेशे सप्तमे वैद्यः परजायाभिगामिकः ॥ जाया तस्य भवेद्वेश्या मातापि व्यभिचारिणी ॥ २६ ॥ धनेशे मृत्युगेहस्थे भूमिद्रव्यं लभेद्ध्रुवम् ॥ जायासौख्यं भवेत्स्वल्पं ज्येष्ठभ्रातृसुखं न हि ॥ २७ ॥ धनेशे नवमे लाभे धनवानुद्यमी पटुः ॥ बाल्यरोगी सुखी पश्चाद्यावदायुः समाप्यते ॥ २८ ॥ धनेशो दशमे यस्य कामी मानी च पंडितः ॥ बहुदारधनैर्युक्तः सुतहीनोपि जायते ॥ २९ ॥ धनेशे व्ययगे मानी साहसी धनवर्जितः ॥ जीविका नृपगेहाच्च ज्येष्ठपुत्रसुखं न हि ॥ ३० ॥ धनेशे च तनौ पुत्री स्वकुटुंबस्य कंटकः॥ धनवान्नि रः कामी परकार्येषु तत्परः ॥ ३१ ॥

अथ तृतीयेशद्वादशभावस्थितफलमाह ।

तृतीयेशे तृतीयस्थे विक्रमी सुतसंयुतः ॥ धनयुक्तो महाहृष्टो भुनक्ति सुखमद्भुतम् ॥ ३२ ॥ तृतीयेशे सुखे कर्मे पंचमे वा सुखी सदा ॥ अतिक्रूरा भवेद्भार्या धनाढ्यो मतिमान्भवेत् ॥ ३३ ॥ तृतीयेशो रिपौ यस्य भ्राता शत्रुर्महाधनी ॥ मातुलानां सुखं न स्यान्मातुल्या भोगमिच्छति ॥ ३४ ॥ तृतीयेशे व्यये भाग्ये स्त्रीभिर्भाग्योदयो भवेत् ॥ पिता तस्य महाचोरः सुखेपि दुःखदर्शकः ॥ ३५ ॥ तृतीयेशेऽष्टमे द्यूने राजद्वारे मृतिर्भवेत् ॥ चौरो वा परगामी वा बाल्ये कष्टं दिने दिने ॥ ३६ ॥ तृतीयेशे तनौ लाभे स्वभुजार्जितवित्तवान्॥ मूर्खः कृशो महारोगी साहसी परसेवकः ॥ ३७ ॥ गुदाभंजनिकः स्थूलः परभार्याधने रुचिः ॥ स्वल्पारंभी सुखी न स्यात्तृतीयेशे धने गते ॥ ३८ ॥

अथ चतुर्थेशद्वादशभावस्थितफलमाह ।

तुर्येशे तुर्यगे मंत्री भवेत्सर्वधनाधिपः ॥ चतुरः शीलवान् मानी धनाढ्यः स्त्रीप्रियः सुखी ॥ ३९ ॥ तुर्येशे पंचमे भाग्ये सुखी सर्वजनप्रियः ॥ विष्णुभक्तिरतो मानी स्वभुजार्जितवित्तवान् ॥ ४० ॥ सुखेशे शत्रुगेहस्थे तदा स्याद्बहुयातृकः ॥ क्रोधी चौरोऽभिचारी च दुष्टचित्तो मनस्व्यपि ॥ ४१ ॥ सुखेशे सप्तमे लग्ने बहुविद्यासमन्वितः ॥ पित्रार्जितधनत्यागी सभायां मूकवद्भवेत् ॥ ४२ ॥ सुखेशे व्ययरंध्रस्थे सुखहीनो भवेन्नरः ॥ पितृसौख्यं भवेदल्पं क्लीबो वा जारजोपि वा ॥ ४३ ॥ सुखेशे कर्मगेहस्थे राजमान्यो भवेन्नरः ॥ रसायनी महाहृष्टो भुनक्ति सुखमद्भुतम् ॥ ४४ ॥ सुखेशे सहजे लाभे नित्यरोगी भवेन्नरः ॥ उदारो गुणवान्दाता स्वभुजार्जितवित्तवान् ॥ ॥ ४५ ॥ सर्वसंपद्युतो मानी साहसी कुहकान्वितः ॥ कुटुंबसंयुतो भोगी सुखेशे च धने गते ॥ ४६ ॥

अथ सुतेशद्वादशभावस्थितफलमाह ।

सुतेशः पंचमे यस्य तस्य पुत्रो न जीवति ॥ क्षणिकः क्रूरभाषी च धार्मिको मतिमान् भवेत् ॥ ४७ ॥ सुतेशे षष्ठरिःफस्थे पुत्रः शत्रुत्वमाप्नुयात् ॥ मृतापत्यो ग्राह्यपुत्रो धनपुत्रोऽथवा भवेत् ॥ ४८ ॥ सुतेशे कामगे मानी सर्वधर्मसमान्वितः ॥ तुगयष्टिस्तनुस्वामी भक्तियुक्तैकतेजसा ॥ ४९ ॥ सुतेशे चायुषि धने बहुपुत्री न संशयः ॥ कासश्वासी सुखी न स्यात् क्रोधयुक्तो धनान्वितः ॥ ५० ॥ सुतेशे नवमे कर्मे पुत्रो भूपसमो भवेत् ॥ अथवा ग्रंथकर्त च विख्यातः कुलदीपकः ॥ ५१ ॥ सुतेशे लाभभवने पंडितो जनवल्लभः ॥ ग्रंथकर्ता महादक्षो बहुपुत्रधनान्वितः ॥ ५२ ॥ सुतेशे लग्नसहजे मायावी पिशुनो महान् ॥ लोष्टं तु दत्तवान्नैव काचिद्द्रव्यस्य का कथा ॥ ५३ ॥ सुतेशे मातृभवने चिरं मातृसुखं भवेत् ॥ लक्ष्मीयुक्तः सुबुद्धिश्च सचिवोऽप्यथवा गुरुः ॥ ५४ ॥

अथ षष्ठेशद्वादशभावस्थितफलमाह ।

षष्ठेशे रिपुभावस्थे स्वज्ञातिः शत्रुवद्भवेत् ॥ परजातिर्भवेन्मित्रं भूमौ न चलति ध्रुवम् ॥ ५५ ॥ षष्ठेशे सप्तमे लाभे लग्ने वा कीर्तिमान् भवेत् ॥ धनवान् गुणवान् मानी साहसी पुत्रवर्जितः ॥ ५६ ॥ षष्ठेशेऽष्टमरिःफस्थे रोगी शत्रुर्मनीषिणाम् ॥ परजायाभिगामी च जीवहिंसासु तत्परः ॥ ५७ ॥ षष्ठेशो नवमे यस्य काष्ठपाषाणविक्रयी ॥ व्यवहारे क्वचिद्धानिः क्वचिद्वृद्धिर्भवेत्किल ॥ ५८ ॥ षष्ठेशे कर्मवित्तस्थे साहसी कुलविश्रुतः ॥ परदेशसुखी वक्ता स्वकर्मे चैकनिष्ठिकः ॥५९॥ षष्ठेशे सहजे तुर्ये क्रोधेनारक्तलोचनः ॥ मनस्वी पिशुनो द्वेषी चलचित्तोऽतिवित्तवान् ॥ ६० ॥ षष्ठेशे पंचमे यस्य चलमित्रधनादिकम् ॥ दयायुक्तः सुखी सौम्यः स्वकार्ये चतुरो महान् ॥६१ ॥

अथ सप्तमेशद्वादशभावस्थितफलमाह ।

सप्तमेशे तनौ चास्ते परजायासु लंपटः ॥ दुष्टो विचक्षणो धीरो वातरुक् स्थीयते हृदि ॥ ६२ ॥ जायेशे चाष्टमे षष्ठे रोगिणीं कामिनीं लभेत् ॥ क्रोधयुक्तो भवेद्वापि न सुखं लभते क्वचित् ॥ ६३ ॥ द्यूनेशे नवमे वित्ते नानास्त्रीभिः समागमः ॥ आरंभी दीर्घसूत्री च स्त्रीषु चित्तं हि केवलम् ॥ ६४ ॥ द्यूनेशे दशमे तुर्ये नास्य जाया पतिव्रता ॥ धर्मात्मा सत्यसंयुक्तः केवलं दंतरोगवान् ॥ ६५ ॥ द्यूनेशे सहजे लाभे मृतपुत्रः प्रजायते ॥ कदाचिज्जीवति सुता यत्नात्पुत्रोऽपि जायते ॥ ६६ ॥ द्वादशस्थे सप्तमेशे दरिद्रः कृपणो महान् ॥ चारुकन्या भवेद्भार्या वस्त्राजीवी च निर्धनी ॥६७ ॥ सर्वगुणयुतो मानी भवेत्सर्वधनाधिपः ॥ सदैव हर्षसंयुक्तः सप्तमेशे सुते स्थिते ॥ ६८ ॥

अथाष्टमेशद्वादशभावस्थितफलमाह ।

द्यूती चोरोऽन्यथावादी गुरुनिंदासु तत्परः ॥ अष्टमे ह्यष्टमस्थाने भार्या पररता भवेत् ॥ ६९ ॥ अष्टमेशे तपःस्थाने महापापी च

नास्तिकः ॥ सुतहा ह्यथवा वंध्या परभार्याधने रुचिः ॥ ७० ॥ अष्टमेशे सुखे कर्मपिशुनो बंधुवर्जितः ॥ मातापित्रोर्भवेन्मृत्युः स्वल्पकालेन भीतियुक् ॥ ७१ ॥ अष्टमेशे सुते लाभे तस्य वृद्धिर्न जायते ॥ द्रव्यं न स्थीयते गेहे स्थिरबुद्धिर्भवेज्जनः ॥ ७२ ॥ अष्टमेशे व्यये षष्ठे नित्यं रोगी प्रजायते ॥ जलसर्पादिकाद्घातो भवेत्तस्य च शैशवे ॥ ७३ ॥ अष्टमेशे तनौ कामे भार्यायुग्मं समादिशेत् ॥ विष्णुद्रोहरतो नित्यं व्रणरोगी प्रजायते ॥ ७४ ॥ धनं तस्य भवेत्स्वल्पं गतं वित्तं न लभ्यते ॥ अष्टमेशे धने बाहुबलहीनः प्रजायते ॥ ७५ ॥

अथ भाग्येशद्वादशभावस्थितफलमाह ।

धनधान्ययुतो नित्यं गुणसौंदर्यसंयुतः ॥ बहुभ्रातृसुखं युक्तं भाग्येशे नवमे स्थिते ॥ ७६ ॥ भाग्येशे दशमे तुर्ये मंत्री सेनापतिर्भवेत् ॥ पुण्यवान्सुयशा वाग्मी साहसी क्रोधवर्जितः ॥ ७७ ॥ भाग्येशे पंचमे लाभे भाग्यवान् जनवल्लभः ॥ गुरुभक्तिरतो मानी धीरो धीरगुणैर्युतः ॥ ७८ ॥ भाग्येशे तु तुले रिःफे भाग्यहीनो भवेद्ध्रुवम् ॥ मातुलस्य सुखं न स्याज्ज्येष्ठभ्रातृसुखं तथा ॥ ७९ ॥ भाग्येशे च मदे कल्पे गुणवान्कीर्तिमान् भवेत् ॥ कदाचिन्न भवेत्सिद्धं यत्कार्यं कर्तुमिच्छाति ॥ ८० ॥ भाग्येशे सहजे वित्ते सदा भाग्यानुचिंतकः ॥ धनवान् गुणवान्कामी पंडितो जनवल्लभः ॥ ८१ ॥

अथ दशमेशद्वादशभावस्थितफलमाह ।

दशमेशे सुखे कर्मे ज्ञानवान्सुखविक्रमी ॥ गुरुदेवार्चनरतो धर्मात्मा सत्यसंयुतः ॥ ८२ ॥ दशमेशे सुते लाभे धनवान्पुत्रवान् भवेत् ॥ सर्वदा हर्षसंयुक्तः सत्यवादी सुखी नरः ॥ ८३ ॥ कर्मेशोऽरिव्यये यस्य शत्रुभिः परिपीडितः ॥ चातुर्यगुणसंपन्नः क्वचिच्च न सुखी नरः ॥ ८४ ॥ दशमाधिपतौ लग्ने कविताग्गुणसंयुतः ॥ बाल्ये रोगी

सुखी पश्चादर्थवृद्धिर्दिने दिने ॥८५॥ धने मदे च सहजे कर्मेशो यदि संस्थितः ॥ मनस्वी गुणवान्वाग्मी सत्यधर्मसमन्वितः ॥ ८६ ॥

अथ लाभेशद्वादशभावस्थितफलमाह ।

लाभेशे संस्थिते लाभे स वाग्मी जायते ध्रुवम् ॥ पांडित्यं कविता चैव वर्द्धते च दिने दिने ॥ ८७ ॥ प्राप्तिस्थानाधिपे रिःफे म्लेच्छसंसर्गकारकः ॥ कामुको बहुकांतश्च क्षणिको लम्पटः सदा ॥ ८८ ॥ लाभेशे संस्थिते लग्ने धनवान्सात्त्विको महान् ॥ समदृष्टिर्महान्वक्ता कौतुकी च भवेत्सदा ॥ ८९ ॥ लाभेशे च धने पुत्रे नानासुखसमन्वितः ॥ पुत्रवान्धार्मिकश्चैव सर्वसिद्धिप्रदायकः ॥ ॥ ९० ॥ लाभेशे सहजे वित्ते तीर्थेषु तत्परो महान् ॥ कुशलः सर्वकार्येषु केवलं शूलरोगवान् ॥ ९१ ॥ लाभेशे षष्ठभवने नानारोगसमन्वितः ॥ सर्वं सुखं भवेत्तस्य प्रवासी परसेवकः ॥ ९२ ॥ लाभेशे सप्तमे रंध्रे भार्या तस्य न जीवति ॥ उदारो गुणवान्कर्मी मूर्खो भवति निश्चितम् ॥ ९३ ॥ लाभेशे गगने धर्मे राजपूज्यो धनाधिपः ॥ चतुरः सत्यवादी च निजधर्मसमन्वितः ॥ ९४ ॥

अथ व्ययेशद्वादशभावस्थितफलमाह

व्ययेशेऽरिव्यये पापी मातृमृत्युविचिंतकः ॥ क्रोधी संतानदुःखी च परजायासु लंपटः ॥ ९५ ॥ व्ययेशे मदने लग्ने जायासौख्यं भवेन्नहि ॥ दुर्बलः कफरोगी च धनविद्याविवर्जितः ॥ ९६ ॥ व्ययेशे द्वितीये रंध्रे विष्णुभक्तिसमन्वितः ॥ धार्मिकः प्रियवादी च सम्पूर्णगुणसंयुतः ॥ ९७ ॥ भार्याद्वेषी प्रियद्वेषी गुरुद्वेषी भवेन्नरः ॥ व्ययेशे सहजे धर्मे स्वशरीरस्य पोषकः ॥ ९८ ॥ व्ययेशे दशमे लाभे पुत्रसौख्यं भवेन्नहि ॥ मणिमाणिक्यमुक्तादि धत्ते किंचित्समालभेत् ॥ ९९ ॥ एतत्ते कथितं विप्र भावानां च फलाफलम् ॥ बलाबलविवेकेन सर्वेषां फलमादिशेत् ॥ १०० वक्री चेत्स्वच-

तुर्थः स्यात्फलं भौमो ददाति च ॥ बुधतुर्येऽथ देवेज्ये पंचमे शशिभार्गवौ ॥ १०१ ॥ सप्तमस्य तमध्वंसी पुत्रस्य नवमस्य च ॥ वित्तस्य विषुवत्यर्के ददाति स्वफलं विधुः ॥ १०२ ॥ ग्रहे पूर्णफले प्राप्ते फलं पूर्वं समादिशेत् ॥ अर्द्धमर्द्धं पादहीने तत्रेदं पादमंत्रिणा ॥ ॥ १०३ ॥ भावानां द्वादशानां च सर्वेषां फलमादिशेत् ॥ भावस्थानां ग्रहाणां च फलं ते कथितं मया ॥ १०४ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे भावस्थग्रहाणां फलकथनं नाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥

अथ प्राणिनां पूर्वजन्मशापद्योतकम् ।

पार्वत्युवाच ।

देवदेव जगन्नाथ शूलपाणे वृषध्वज ॥ केन योगेन मर्त्यानां जायते शिशुनाशनम् ॥ १ ॥ तत्सर्वमत्र योगेन ब्रूहि मे शशिशेखर ॥ शापमोक्षं च कृपया प्राणिनामल्पमेधसाम् ॥ २ ॥

शङ्कर उवाच ।

साधु पृष्टं त्वया देवि कथयामि सविस्तरात् ॥ शृणुष्वैकमना भूत्वा बलाबलवशादपि ॥ ३ ॥ ज्ञेयं सुनिश्चितं सर्वं राशिचक्रे विशेषतः ॥ मेषादिमीनपर्यन्तं मूर्त्यादिद्वादशक्रमात् ॥ ४ ॥ भावं च भावजं ज्ञात्वा फलं ब्रूयाद्विचक्षणः ॥ तनुर्वित्तं बंधुमातृपुत्रशत्रुस्मरो मृतिः ॥ ५ ॥ पितृकर्म च लाभं च व्ययांता भावसंज्ञकाः ॥ गुरुर्लग्नेशदारेशपुत्रस्थानाधिपेषु च ॥ ६ ॥ सर्वेषु बलहीनेषु वक्तव्या त्वनपत्यता ॥ रव्यारराहुशनयः पुत्रस्था बलसंयुताः ॥ ७ ॥ कारकाद्यात्क्षीणबलादनपत्यत्वमादिशेत् ॥ पुत्रस्थानगते राहौ कुजेनापि निरीक्षिते ॥ कुजक्षेत्रगते वापि सर्पशापात्सुतक्षयः ॥ ८ ॥ पुत्रेशे राहुसंयुक्ते पुत्रस्थे भानुनन्दने ॥ चंद्रदृष्टे युते वापि सर्पशापात्सु-

तक्षयः ॥ ९ ॥ कारके राहुसंयुक्ते पुत्रेशे बलवर्जिते ॥ विलग्नेशे भौमयुते
सर्पशापात्सुतक्षयः ॥ १० ॥ कारके भौमसंयुक्ते लग्ने च राहुसंयुते
॥ पुत्रस्थानेश्वरे दुःस्थे सर्पशापात्सुतक्षयः ॥ ११ ॥ भौमांशे
भौमसंयुक्ते पुत्रेशे सोमनंदने ॥ राहुमांदियुते लग्ने सर्पशापात्सुतक्षयः
॥ १२ ॥ पुत्रस्थाने कुजक्षेत्रे पुत्रे राहुसमन्विते ॥ सौम्यदृष्टे
युते वापि सर्पशापात्सुतक्षयः ॥ १३ ॥ पुत्रस्था भानुमंदाराः
स्वर्भानुः शशिजांगिराः ॥ निर्बलौ पुत्रलग्नेशौ सर्पशापात्सुतक्षयः
॥ १४ ॥ लग्नेशे राहुसंयुक्ते पुत्रेशे भौमसंयुते ॥ कारके
राहुसंदृष्टे सर्पशापात्सुतक्षयः ॥ १५ ॥ तद्दोषपरिहारार्थं नागपूजां
समारभेत् ॥ १६ ॥ स्वगृह्योक्तविधानेन प्रतिष्ठां कारयेत्सुधीः ॥
नागमूर्तिं सुवर्णेन कृत्वा पूजां समाचरेत् ॥ १७ ॥ गोभूतिलहिरण्यादि
दद्याद्वित्तानुसारतः ॥ एवं कृते तु नागेंद्रप्रसादाद्वर्धते
कुलम् ॥ १८ ॥ पुत्रस्थानं गते भानौ नीचे मंदांशकस्थिते ॥
पार्श्वयोः क्रूरसंबंधे पितृशापात्सुतक्षयः ॥ १९ ॥ पुत्रस्थानाधिपे
भानौ त्रिकोणे पापसंयुते ॥ क्रूरेन्तरे पापदृष्टे पितृशापात्सुतक्षयः
॥ २० ॥ भानुराशिस्थिते जीवे पुत्रेशे भानुसंयुते ॥ पुत्रे लग्ने पापयुते
पितृशापात्सुतक्षयः ॥ २१ ॥ लग्नेशे दुर्बले पुत्रे पुत्रेशे भानुसंस्थिते
॥ पुत्रे लग्ने पापयुते पितृशापात्सुतक्षयः ॥ २२ ॥ पितृस्थानाधिपे
पुत्रे पुत्रेशे वा तथा स्थिते ॥ लग्ने पुत्रे पापयुते पितृशापात्सुतक्षयः
॥ २३ ॥ पितुः स्थानाधिपो भौमः पुत्रेशेन समन्वितः
॥ लग्ने पुत्रे पितृस्थाने पापात्संततिनाशनम् ॥ २४ ॥
पितृस्थानाधिपे दुःस्थे कारके पापराशिगे ॥ पुत्रे लग्नेश्वरे पापे
पितृशापात्सुतक्षयः ॥ २५ ॥ लग्नपंचमभावस्था भानुभौमशनैश्चराः ॥
रन्ध्रे रिःफे राहुजीवौ पितृशापात्सुतक्षयः ॥ २६ ॥ लग्नादष्टमगो भानौ
पुत्रस्थे भानुनंदने ॥ पुत्रेशे राहुसंयुक्ते लग्ने पापे सुतक्षयः ॥ २७ ॥

व्ययेशे लग्नभावस्थे रंध्रेशे पुत्रराशिगे ॥ पितृस्थानाधिपे रंध्रे पितृशापात्सुतक्षयः ॥ २८ ॥ रोगेशे पुत्रभावस्थे पितृस्थानाधिपे तथा ॥ कारके राहुसंयुक्ते पितृशापात्सुतक्षयः ॥ २९ ॥ तद्दोषपरिहारार्थं गयाश्राद्धं च कारयेत् ॥ ब्राह्मणान् भोजयेदत्र अयुतं वा सहस्रकम् ॥३०॥ कन्यादानं ततः कृत्वा गां च दद्यात्सवत्सकाम्॥एवं कृते पितुः शापान्मुच्यते नात्र संशयः ॥ ३१ ॥ वर्द्धते च कुलं तस्य पुत्रपौत्रादिभिस्तदा ॥ दृष्टियोगपदैः सर्वं फलं ब्रूयाद्विचक्षणः ॥३२ ॥ पुत्रस्थानाधिपे चन्द्रे नीचे वा पापमध्यगे ॥ हिबुके पंचमे पापे मातृशापात्सुतक्षयः ॥ ३३ ॥ लाभे मंदसमायोगे मातृस्थाने शुभेतरे ॥ नीचे पंचमगे चन्द्रे मातृशापात्सुतक्षयः ॥ ३४ ॥ पुत्रस्थानाधिपे दुःस्थे लग्नेशे नीचराशिगे ॥ चंद्रपापसमायोगे मातृशापात्सुतक्षयः ॥ ३५ ॥ पुत्रस्थानाधिपे दुःस्थे चंद्रे पापांशसंयुते ॥ लग्ने पुत्रे पापयुते मातृशापात्सुतक्षयः ॥ ३६ ॥ पुत्रस्थानाधिपे चन्द्रे मंदराह्वारसंयुते ॥ भाग्ये वा पुत्रराशौ वा कारके पुत्रनाशनम् ॥ ३७ ॥ मातृस्थानाधिपे भौमे शनिराहुसमन्विते ॥ भानुचंद्रयुते पुत्रे लग्ने संततिनाशनम् ॥ ३८ ॥ लग्नात्मजेशौ शत्रुस्थौ रंध्रे मात्राधिपे स्थितौ ॥ पितृनाशाधिपौ लग्ने मातृशापात्सुतक्षयः ॥ ३९ ॥ षष्ठाष्टमेशौ लग्नस्थौ व्यये मात्राधिपे सुते ॥ चंद्रे जीवे पापयुते मातृशापात्सुतक्षयः ॥ ४० ॥ पापमध्यगते लग्ने क्षीणे चंद्रे च सप्तमे ॥ मातृपुत्रे राहुमंदौ मातृशापात्सुतक्षयः ॥ ४१ ॥ नाशस्थानाधिपे पुत्रे पुत्रेशे नाशराशिगे ॥ चंद्रमातृपतौ दुःखे मातृशापात्सुतक्षयः ॥ ४२ ॥ चंद्रक्षेत्रे यदा लग्ने कुजराहुसमन्विते ॥ चंद्रमंदौ पुत्रसंस्थौ मातृशापात्सुतक्षयः ॥ ४३ ॥ लग्ने पुत्रे रंध्ररिःफौ आरराहुरविः शनिः ॥ मातृलग्नाधिपौ दुःस्थौ मातृशापात्सुतक्षयः ॥ ४४ ॥ नाशस्थानं गते जीवे कुजराहुसमन्विते ॥ पुत्रस्थाने मन्दचंद्रौ मातृशापात्सुतक्षयः ॥ ४५ ॥ ग्रह-

योगपदैः सर्वं फलं ब्रूयाद्विचक्षणः ॥ शुभे सौख्यं विनिर्दिष्टं मिश्रे
मिश्रं प्रकीर्तितम् ॥ ४६ ॥ सेतुस्नानं प्रकुर्वीत गायत्रीलक्षसंज्ञके ॥
ग्रहदानं च कर्तव्यं रौप्यपात्रे पयःस्थितिः ॥ ४७ ॥ ब्राह्मणान्
भोजयेत्तद्वदश्वत्थस्य प्रदक्षिणम् ॥ कर्तव्यं भक्तियुक्तेन चाष्टविंशत्सहस्रकम् ॥ ४८ ॥ एवं कृते यदा देवि शापान्मोक्षो भविष्यति ॥ सत्पुत्रं लभते पश्चाद्वृद्धिः स्यात्तस्य संततेः ॥ ४९ ॥ अतः
परं प्रवक्ष्यामि भ्रात्रादौ शापकारणम् ॥ पापयोगेन भावेन कारकेण बलाबले ॥ ५० ॥ भ्रातृस्थानाधिपे पुत्रे कुजराहुसमन्विते ॥
पुत्रलग्नेश्वरौ रंध्रे भ्रातृशापात्सुतक्षयः ॥ ५१ ॥ लग्ने सुते कुजे मंदे
भ्रातृपे भाग्यराशिगे ॥ कारके नाशराशिस्थे भ्रातृशापात्सुतक्षयः॥५२॥
भातृस्थाने गुरौ नीचे मंदः पंचमगो यदि ॥ नाशस्थौ न तु पुण्यारौ
भ्रातृशापात्सुतक्षयः ॥ ५३ ॥ मूर्तिस्थानाधिपे रिःफे भौमः पंचमगो यदि ॥ पुत्रेशे रंध्रपापस्थे भ्रातृशापात्सुतक्षयः ॥ ५४ ॥ पापमध्यगते लग्ने सुतभे पापमध्यगे ॥ नाथौ च कारकौ दुःस्थे भ्रातृशापात्सुतक्षयः ॥ ५५ ॥ कर्मेशे भ्रातृभावस्थे पापयुक्ते सुते शुभे ॥
पुत्रे च कुजसंयुक्ते भ्रातृशापात्सुतक्षयः ॥ ५६ ॥ पुत्रस्थाने बुधक्षेत्रे शनिराहुसमन्विते ॥ रिःफे विदारौ शापत्वाद् भ्रातृशापात्सुतक्षयः ॥ ५७ ॥ लग्नेशे भ्रातृराशिस्थे भ्रातृस्थानाधिपे सुते ॥ लग्ने
भ्रातृसुते पापे भ्रातृशापात्सुतक्षयः ॥ ५८ ॥ भ्रात्रीशे नाशराशिस्थे
पुत्रस्थे कारके तथा ॥ राहुमांदियुते दृष्टे भ्रातृशापात्सुतक्षयः॥५९॥
नाशस्थानाधिपे पुत्रे भ्रातृनाथेन संयुते ॥ रंध्रे आरार्किसंयुक्ते
भ्रातृशापात्सुतक्षयः ॥ ६० ॥ भातृशापविमोक्षार्थं श्रवणं विष्णुकीर्तनम् ॥ चांद्रायणं चरेत्पश्चात्कावेर्यां विष्णुसन्निधौ ॥ ६१ ॥
अश्वत्थस्थापनं कार्यं दश धेनूः प्रदापयेत् ॥ प्राजापत्यं चरेत्तत्र भूमिं दद्यात्फलान्विताम् ॥ ६२ ॥ एवं यः कुरुते भक्त्या

पुत्रवृद्धिः प्रजायते ॥ ६३ ॥ पुत्रस्थाने बुधे जीवे कुजराहुसमन्विते
॥ लग्ने मंदसमायोगे मातुलात्सुतनाशनम् ॥ ६४ ॥
लग्नपुत्रेश्वरौ पुत्रे बुधभौमसमन्विते ॥ मंदे मातुलशापत्वात्पुत्रसंततिनाशनम्
॥ ६५ ॥ लुप्ते पुत्राधिपे लग्ने सप्तमे भानुनन्दने ॥
लग्नेशे बुधसंयुक्ते तस्य संततिनाशनम् ॥ ६६ ॥ ज्ञातिस्थानाधिपे
लग्ने व्ययेशेन समन्विते ॥ शशिसौम्यकुजे पुत्रे तस्य संततिनाशनम्
॥ ६७ ॥ पुत्रलग्नाधिपौ युक्तावन्योन्यं वाथ वीक्षितौ ॥ पुत्रे
परस्परस्थौ वा पुत्रयोगा इमे स्मृताः ॥ ६८ ॥ तद्दोषपरिहारार्थं
विष्णुस्थापनमुच्यते ॥ वापीकूपतडागादिबंधनं सेतुदर्शनम् ॥ ६९ ॥
पुत्रवृद्धिर्भवेत्तस्य संपद्वृद्धिः प्रजायते ॥ इदं योगग्रहेणैव फलं ब्रूयाद्विचक्षणः
॥ ७० ॥ गुरुक्षेत्रे यदा राहुः पुत्रे जीवारभानुजाः ॥ धर्मस्थानाधिपे
नाशे ब्रह्मशापात्सुतक्षयः ॥ ७१ ॥ विद्यागर्वेण यो मर्त्यो
ब्राह्मणानवमन्यते ॥ तद्दोषाद्ब्रह्मशापत्वात्संततेस्तस्य नाशनम्
॥ ७२ ॥ धर्मेशे पुत्रभावस्थे पुत्रेशे नाशराशिगे ॥ जीवारराहुमृत्युस्थे
ब्रह्मशापात्सुतक्षयः ॥ ७३ ॥ धर्माधिपे नीचगते व्ययेशे पुत्रराशिगे
राहुयुक्तेक्षिते वापि ब्रह्मशापात्सुतक्षयः ॥ ७४ ॥ जीवे
नीचगते राहुर्लग्ने वा पुत्रराशिगे ॥ पुत्रस्थानाधिपे दुःखे ब्रह्मशापात्सुतक्षयः
॥ ७५ ॥ पुत्रस्थानाधिपे जीवे रंध्रे पापसमन्विते ॥ पुत्रेशावर्कचंद्रौ
वा ब्रह्मशापात्सुतक्षयः ॥ ७६ ॥ मंदांशे मंदसंयुक्ते जीवे
भौमसमन्विते ॥ पुत्रेशे व्ययराशिस्थे ब्रह्मशापात्सुतक्षयः ॥ ७७ ॥
लग्ने गुरुयुते मंदे भाग्ये राहुसमन्विते ॥ व्यये गुरुसमायोगे ब्रह्मशापात्सुतक्षयः
॥ ७८ तस्य दोषस्य शांत्यर्थं कुर्याच्चांद्रायणं नरः ॥
ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणाम् ॥ ७९ ॥ पंचरत्नानि
देयानि सुवर्णेन समन्वितम् ॥ अन्नदानं ततः कुर्यादयुतं वा सहस्रकम्
॥ ८० ॥ एवं कृते तु सत्पुत्रं लभते नात्र संशयः ॥ मुक्तशापो

विशुद्धात्मा स पुमान्सुखमेधते ॥ ८१ ॥ दारेशे पुत्रभावस्थे दारेशस्थांशपे
शनौ ॥ पुत्रेशे नाशराशिस्थे पत्नीशापात्सुतक्षयः ॥ ८२ ॥
कलत्रेशे नाशसंस्थे रिःफेशे पुत्रराशिगे ॥ कारके पापसंयुक्ते पत्नीशापात्सुतक्षयः
॥ ८३ ॥ पुत्रस्थानगते शुक्रे कामपे रंध्रमाश्रिते ॥
कारके पापसंयुक्ते पत्नीशापात्सुतक्षयः ॥ ८४ ॥ कुटुंबे पापसंबंधे
कामेशे नाशराशिगे ॥ पुत्रे पापग्रहैर्युक्ते पत्नीशापात्सुतक्षयः
॥ ८५ ॥ भाग्यस्थानगते शुक्रे दारेशे नाशराशिगे ॥ लग्ने पापे सुते
पापे पत्नीशापात्सुतक्षयः ॥ ८६ ॥ भाग्यस्थानाधिपे शुक्रे पुत्रेशे
शत्रुराशिगे ॥ गुरुलग्नेशदारेशा दुःस्थाः संततिनाशनम् ॥ ८७ ॥
पुत्रस्थाने भृगुक्षेत्रे राहुचंद्रसमन्विते ॥ व्यये लग्ने धने पापे स्त्रीशापात्सुतनाशनम्
॥ ८८ ॥ सप्तमे मंदशुक्रौ च रंध्रेशे पुत्रभैरवौ ॥
लग्ने राहुसमायोगे पत्नीशापात्सुतक्षयः ॥ ८९ ॥ धने कुजे व्यये
जीवे पुत्रस्थे भृगुनंदने ॥ राहुयुक्तेक्षिते वापि पत्नीशापात्सुतक्षयः ॥
॥ ९० ॥ नाशस्थौ वित्तदारेशौ पुत्रे लग्ने कुजे शनौ ॥ कारके पापसंयुक्ते
पत्नीशापात्सुतक्षयः ॥ ९१ ॥ लग्नपंचमभाग्यस्था राहुमन्दकुजाः
क्रमात् ॥ रंध्रस्थौ पुत्रदारेशौ पत्नीशापात्सुतक्षयः ॥ ९२ ॥
तस्य दोषस्य शांत्यर्थं कन्यादानं समाचरेत् ॥ लक्ष्मीनारायणं देवं
सर्वाभरणभूषितम् ॥ ९३ ॥ मूर्तिदानं च कर्तव्यं दशधेनूः प्रदापयेत्
॥ शय्यां च भूषणं चैव दंपत्योर्दापयेत्सुधीः ॥ ९४ ॥ पुत्रं प्रसूयते
तस्य भाग्यवृद्धिश्च जायते ॥ मंत्रशापमिदं मर्त्यः पिशाचं
बाध्यते सदा ॥ ९५ ॥ कर्मलोपं पितृभ्यश्च तच्छापाद्वंशनाशनम् ॥
पुत्रस्थितो मंदसूर्यौ क्षीणचंद्रस्तु सप्तमे ॥ लग्ने व्यये राहुजीवौ प्रेतशापात्सुतक्षयः
॥ ९६ ॥ पुत्रस्थानाधिपे मंदे नाशस्थे लग्नगे कुजे ॥
कारके नाशराशिस्थे प्रेतशापात्सुतक्षयः ॥ ९७ ॥ लग्ने पापे व्यये भानौ
सुते चारार्किसोमजाः ॥ पुत्रेशे रंध्रभावस्थे प्रेतशापात्सुतक्षयः ॥ ९८ ॥

लग्ने पापा व्यये भानौ सुते चारार्किसोमजाः ॥ पुत्रेशे रंध्रभावस्थे
प्रेतशापात्सुतक्षयः ॥ ९९ ॥ लग्ने राहुसमायोगे पुत्रस्थे भानुनंदने ॥
कारके नाशराशिस्थे प्रेतशापात्सुतक्षयः ॥ १०० ॥ लग्ने राहौ च
शुक्रेज्ये चंद्रे मंदयुते तथा ॥ लग्नेशे मृदुराशिस्थे प्रेतशापात्सुतक्षयः
॥ १०१ ॥लग्ने राहुसमायोगे पुत्रस्थे भानुनंदने ॥ कुजदृष्टे युते
वापि प्रेतशापात्सुतक्षयः ॥ १०२ ॥ कारके नीचराशिस्थे पुत्रस्थानाधिपे
स्थिते ॥ नीचदृष्टे नीचयुते प्रेतशापात्सुतक्षयः ॥ १०३ ॥
लग्ने मंदे सुते राहौ रंध्रे भानुसमन्विते ॥ व्यये भौमसमायोगे प्रेतशापात्सुतक्षयः
॥ १०४ ॥ कामस्थानाधिपे दुःस्थे पुत्रे चंद्रसमन्विते
॥ मंदमांदियुते लग्ने प्रेतशापात्सुतक्षयः ॥ १०५ ॥ बाधस्थानाधिपे
पुत्रे शनिशुक्रसमन्विते ॥ कारके नाशराशिस्थे प्रेतशापात्सुतक्षयः
॥ १०६ ॥ तद्दोषस्य प्रशांत्यर्थं विष्णुश्राद्धं च कारयेत्
॥ रुद्रस्नानं प्रकुर्वीत ब्रह्ममूर्तिं प्रदापयेत् ॥ १०७ ॥ धेनू रजतपात्रं
च नीलं चैव प्रदापयेत् ॥ एतत्कर्म कृते तत्र शापमोक्षः प्रजायते
॥ १०८ ॥ पुत्रप्राप्तिर्भवेत्तस्य विप्रेभ्यो दक्षिणां दिशेत् ॥ पुत्रे
राहुरविसौम्याः कारके शुभसंयुते ॥ शुभेन वीक्षिते वापि बहुपुत्रं
समादिशेत् ॥ १०९ ॥ पुत्रेशे शुभराशिस्थे शुभदृष्टिसमन्विते ॥
कारके केन्द्रभावस्थे बुहुपुत्रं समादिशेत् ॥ ११० ॥ लग्नेशे पुत्रराशिस्थे
पुत्रेशे लग्नमाश्रिते ॥ केंद्रत्रिकोणगे जीवे बहुपुत्रं समादिशेत्
॥ १११ ॥ पुत्रस्थानगते राहौ मंदांशकविवर्जिते ॥ बहुपुत्रं नरं
विद्याच्छुभग्रहनिरीक्षिते ॥ ११२ ॥ पुत्रस्थानाधिपे स्वोच्चे लग्नेशे
शुभसंयुते ॥ कारके शुभसंयुक्ते बहुपुत्रं समादिशेत् ॥ ११३ ॥ पुत्रस्थाने
तदीशे वा गुरौ वा शुभवीक्षिते ॥ शुभेन सहिते वापि बहुपुत्रं
समादिशेत् ॥ ११४ ॥ परिपूर्णबले जीवे लग्नेशे पुत्रराशिगे ॥ पुत्रेशे
बलसंयुक्ते बहुपुत्रं समादिशेत् ॥ ११५॥ पुत्रस्थानगते जीवे परि-

पूर्णबलान्विते ॥ लग्नेशे बलसंयुक्ते पुत्रयोगा इमे स्मृताः ॥ ११६ ॥ वर्गोत्तमांशगे जीवे लग्नेशस्यांशपे शुभे ॥ पुत्रेशेन युते दृष्टे पुत्रयोगा इमे स्मृताः ॥ ११७ ॥ वित्तेशे पुत्रभावस्थे परिपूर्णबलान्विते ॥ वैशेषिकांशके जीवे पुत्रयोगा इमे स्मृताः ॥ ११८ ॥ लग्नात्पुत्राधिपे स्वोच्चे अन्योन्यत्वादिवीक्षिते ॥ परस्परस्थानगते पुत्रयोगा इमे स्मृताः ॥ ११९ ॥ पुत्रस्थानाधिपस्यांशराशीशे शुभसंयुते ॥ शुभेन वीक्षिते वापि पुत्रयोगा इमे स्मृताः ॥ १२० ॥ लग्नपुत्राधिपौ केन्द्रे शुभग्रहसमन्विते॥कुटुंबेशे बलाढ्ये तु पुत्रयोगा इमे स्मृताः॥ १२१ ॥ लग्नेशे दारभावस्थे दारेशे लग्नमाश्रिते ॥द्वितीयेशे विलग्नस्थे पुत्रयोगा इमे स्मृताः ॥ १२२ ॥ दारेशे ग्रहसंयुक्ते नवांशभवनाधिपे ॥ पुत्रवित्तविलग्नेशे पुत्रयोगा इमे स्मृताः ॥ १२३ ॥ इति बहुपुत्रयोगः ॥ पुत्रवित्तकलत्रेशाः संयुक्ता नवभागपाः ॥ पापांशकाः पापयुता अनपत्यत्वमादिशेत् ॥ १२४ ॥ गुरुर्लग्नेशदारेशपुत्रस्थानाधिपेषु वा ॥ सर्वेषु बलहीनेषु वक्तव्या त्वनपत्यता ॥ १२५ ॥ व्ययेशसंयुतांशेशे मृत्युराशौ स्थिते यदि ॥ पुत्रेशे क्रूरषष्ट्यंशे अनपत्यत्वमादिशेत् ॥ १२६ ॥ लग्नपुत्रेश्वरौ दुःस्थे कारके नीचराशिगे ॥ अनपत्यग्रहे पुत्रे अनपत्यत्वमादिशेत् ॥ १२७ ॥ क्रूरषष्ट्यंशके जीवे पुत्रस्थे नाशराशिगे ॥ पुत्रेशे नाशराशिस्थे अनपत्यत्वमादिशेत् ॥ १२८ ॥ लग्नाधिपे कुजे स्वोच्चे रंध्रे मंदयुते रवौ ॥ शुभदृष्टिसमायोगे चिरात्पुत्रमुपैति सः ॥ १२९ ॥ लग्ने मंदे गुरौ रंध्रे व्यये भौमसमान्विते ॥ शुभदृष्टे स्वतुंगे वा चिरात्पुत्रमुपैति सः ॥ ॥ १३० ॥ पुत्रस्था मंदजविज्ञा लग्ने पुत्राधिपे शुभे ॥ पुत्रेशे शुभराशिस्थे चिरात्पुत्रमुपैति सः ॥ १३१ ॥ लग्ने मंदे गुरौ रंध्रे व्यये भौमसमन्विते ॥ शुभदृष्टे स्वतुंगे वा चिरात्पुत्रमुपैति सः ॥ १३२ ॥ सुते राह्वर्कशुक्रेज्याः शुभर्क्षे शुभवीक्षिते ॥ पुत्रेशे शुभराशिस्थे

चिरात्पुत्रमुपैति सः ॥ १३३ ॥ लग्ने सौम्ये धने पापे तृतीये पापखेचरे ॥ पुत्रेशे शुभराशिस्थे चिरात्पुत्रमुपैति सः ॥ १३४ ॥ इति पुत्रयोगाः ॥ पुत्रस्थाने कुजे मंदे बुधक्षेत्रे विलग्नपे ॥ बुधदृष्टे युते वापि तदा दत्ताः सुतादयः ॥ १३५ ॥ पुत्रस्थाने बुधक्षेत्रे मंदक्षेत्रेऽथवा भवेत् ॥ मंदमांदियुते दृष्टे तदा दत्ताः सुतादयः ॥ १३६ ॥ पुत्रस्थाने बुधक्षेत्रे बुधसंस्थोक्षितेऽपि वा ॥ लग्नाधिपे शनौ वापि दत्तपुत्रा भवंति हि ॥ १३७ ॥ पुत्रेशे मंदसंयुक्ते कुजे सौम्यनिरीक्षिते ॥ लग्नाधिपे बुधांशे वा दत्तपुत्रा भवंति हि ॥ १३८ ॥ कामेशे लाभभावस्थे पुत्रेशे शुभसंयुते ॥ पुत्रे मंदे बुधे वापि दत्तपुत्रा भवंति हि ॥ १३९ ॥ पुत्रेशे भाग्यभावस्थे भाग्येशे कर्मराशिगे ॥ पुत्रे मंदजदृष्टे तु दत्तपुत्रेण संततिः ॥ १४० ॥ लग्नाधिपे भृगोश्चोच्चे पुत्रे मंदसमन्विते ॥ कारके बलसंयुक्ते दत्तपुत्रात्तु संततिः ॥ १४१ ॥ पुत्रस्थानाधिपे चंद्रे लग्ने पुत्रे शनैश्चरे ॥ परिपूर्णबले जीवे-दत्तपुत्रात्सुती भवेत् ॥ १४२ ॥ पुत्राधिपे रवौ लग्ने पुत्रस्थौ शनिसोमजौ॥पुत्राधिपे बलयुते दत्तपुत्रात्सुती भवेत् ॥१४३॥ लग्नाधिपे बुधे पुत्रे कुजदृष्टिसमन्विते ॥ कारके लाभराशिस्थे दत्तपुत्रात्सुती भवेत् ॥ १४४ ॥ लग्नाधिपे गुरौ पुत्रे शनिदृष्टिसमन्विते ॥ पुत्रेशे भौमराशिस्थे दत्तपुत्रा भवंति हि ॥ १४५ ॥ वंशान्तो हरिकृष्णगौ त्रिपुरहाब्जे भूसुते रुद्रियं सौम्ये संपुटकांस्यपात्रविधिवज्जीवे च पैत्र्यातिथिः ॥ शुक्रे गोप्रतिपालनं च कथितं मंदे च मृत्युंजयः कन्यादानभुजंगकेतुकपिलाः संतानसौख्यप्रदाः ॥ १४६ ॥ यावत्संख्या भवेद्राशिस्तावद्वारं विनिर्दिशेत् ॥ शिवविष्णुस्थापनाद्वा लक्षयोगात्सुखं भवेत् ॥ १४७ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे संतानभावफलादेशवर्णनं नाम षोडशोध्यायः ॥ १६ ॥

---

१ हरिवंशग्रन्थः ।

अथ त्रिकोणशोधनमाह ।

राशिचक्रं यथामार्गं निक्षिप्याष्टग्रहस्य च ॥ त्रिकोणशोधनं कुर्यादादौ सर्वेषु राशिषु ॥ १ ॥

उदाहरणार्थमिमानि चक्राणि ।

अथ रवेरष्टकवर्गः ४८ ।

सू.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
१	३	१	३	५	६	१	३
२	६	२	५	६	७	२	४
४	१०	४	६	९	१२	४	६
७	११	७	९	११	०	७	१०
८	०	८	१०	०	०	८	११
९	०	९	११	०	०	९	१२
१०	०	१०	१२	०	०	१०	०
११	०	११	०	०	०	११	०
०	०	०	०	०	०	०	०

चंद्राष्टकवर्गः ४९ ।

सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.
३	१	२	१	१	३	३	३
६	३	३	३	२	४	५	६
७	६	५	४	४	५	६	१०
८	७	६	५	७	७	११	११
१०	९	१०	७	८	९	०	०
११	१०	११	८	१०	१०	०	०
०	११	०	१०	११	११	०	०
०	०	०	११	०	०	०	०
०	०	०	०	०	०	०	०

भौमस्याष्टकवर्गः ३९ ।

र.	च.	म.	बु.	गु.	शु.	श.	ल.
३							
५	३	१	३	६	६	१	१
६	६	२	५	१०	८	४	३
१०	११	४	६	११	११	७	६
११	०	७	११	१२	१२	८	१०
०	०	८	०	०	०	९	११
०	०	१०	०	०	०	१०	०
०	०	११	०	०	०	११	०

बुधस्याष्टकवर्गः ५४ ।

र.	चं.	मं.	बु.	गु.	शु.	श.	ल.
		१	१		१	१	
५	२	२	३	६	२	२	१
६	४	४	५	८	३	४	२
९	६	७	६	११	४	७	४
११	८	८	९	१२	५	८	६
१२	१०	९	१०	०	८	९	८
०	११	१०	११	०	९	१०	१०
०	०	११	१२	०	११	११	११

गुरोरष्टकवर्गः ५६ ।

र.	चं.	मं.	बु.	गु.	शु.	श.	ल०
१	२	१	१	१	२	३	१
२	५	२	२	२	५	५	२
३	६	४	४	३	६	६	४
४	९	७	५	४	९	१२	५
७	११	८	६	७	१०	०	६
८	०	१०	९	८	११	०	७
९	०	११	१०	१०	०	०	८
१०	०	०	११	११	०	०	१०
११	०	०	०	०	०	०	११
०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०

शुक्रस्याष्टकवर्गः ५२ ।

र.	चं.	मं.	बु.	गु.	शु.	श.	ल०
८	१	३	३	५	१	३	१
११	२	४	५	८	२	४	२
१२	३	६	६	९	३	५	३
०	४	९	९	१०	४	८	४
०	५	११	११	११	५	९	५
०	८	१२	०	०	८	१०	८
०	९	०	०	०	९	११	९
०	११	०	०	०	१०	०	११
०	१२	०	०	०	११	०	०
०							
०							
०							

शनेरष्टकवर्गः ३९ ।							
र.	चं.	मं.	बु.	गु.	शु.	श.	ल०
१	३	३	६	५	६	३	१
२	६	५	८	६	११	५	३
४	११	६	९	११	१२	६	४
७	०	१०	१०	१२	०	११	६
८	०	११	११	०	०	०	१०
१०	०	१२	१२	०	०	०	११
११	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०

लग्नाष्टकवर्गः ४९ ।							
र.	चं.	मं.	बु.	गु.	शु.	श.	ल०
३	३	१	१	१	१	१	३
४	६	३	२	२	२	३	६
६	१०	६	४	४	३	४	१०
१०	११	१०	६	५	४	६	११
११	१२	११	८	६	५	१०	०
१२	०	०	१०	७	८	११	०
०	०	०	११	९	९	०	०
०	०	०	०	१०	०	०	०
०	०	०	०	११	०	०	०

अथ सूर्यरेखाचक्रम् ।

राशयः	कुं.	मीं.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.
ग्रहाः	र. बृ.	शु.मं.	ल.								चंद्र.	श.बु.
रवि.	।	।	०	।	०	०	।	।	।	।	।	०
चन्द्र.	।	०	०	।	०	०	०	।	।	०	०	०
मंगल.	०	।	।	०	।	०	०	।	।	।		।
बुध.	०	।	०	।	।	०	०	।	।	।	।	०
गुरु.	०	०	०	०	।	।	०	०	।	०	।	०
शुक्र.	।	०	०	०	०	०	।	।	०	०	०	०
शनि.	।	०	।	०	०	।	।	।	०	।	०	।
ल०	।	।	०	०	।	।	०	।	।	०	०	।
या. रे.	५	४	२	३	४	३	३	७	६	४	४	३
या. बि	३	४	६	५	४	५	५	१	२	४	४	५

अथ सूर्यत्रिकोणैकाधिपत्यशोधनम् ।

ग्रहाः	र. बृ.	शु.म.	ल.								चन्द्र.	श.बु.
राशयः	कुं.	मि.	मे.	वृ.	मीं.	क.	सिं.	क.	तु.	वृ.	ध.	म.
रेखा.	५	४	२	३	४	३	३	७	६	४	४	३
त्रि. शो.	१	१	०	०	०	०	१	४	२	१	२	०
ए. शो.	१	१	०	०	०	०	१	०	०	०	२	०

ग्रहपिंडः ४० राशिपिंडः ५१ उभयोर्योगपिंडः ९१

अथ चंद्ररेखाचक्रम् ।

राशयः	ध.	म.	कुं.	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.
ग्रहाः	चं.	श.बु.	र.गु.	शु.मं.	ल.							
रविः	।	०	०	०	।	०	०	।	।	।	०	।
चन्द्रः	।	०	।	०	०	०	।	०	।	।	।	०
मंगलः	।	।	०	०	।	०	०	।	।	०	०	०
बुधः	०	।	०	।	।	०	०	।	।	०	।	।
गुरुः	।	०	।	।	०	०	०	०	।	।	०	।
शुक्रः	।	।	०	०	।	०	।	०	।	०	।	०
शनिः	०	०	०	।	०	०	।	०	०	०	०	।
लग्नं.	०	।	।	०	०	०	।	०	०	।	०	०
रेखाः	५	४	३	३	३	६	४	४	५	५	२	५
बिंदवः	३	४	५	५	५	२	४	४	३	३	६	३

अथ चंद्रत्रिकोणैकाधिपत्यशोधनम् ।

ग्रहाः	चं.	श.बु.	र.बृ.	शु.मं.	ल.							
राशयः	ध.	म.	कुं.	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृश्चि.
रेखा.	५	४	३	३	३	६	४	४	५	५	२	५
त्रिशो.	२	०	१	०	०	२	२	१	२	१	०	२
ए. शो.	२	०	१	०	०	०	१	१	२	१	०	०

ग्रहपिंडः २५ राशिपिंडः ६६ उदाहरणयोगः ९१

अथ भौमरेखाचक्रम् ।

राशयः	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.
ग्रहाः	मं. शु.	ल.								चं.	श. बु.	र. बृ.
रविः	०	।	०	०	।	०	०	०	।	।	०	०
चंद्रः	०	०	।	०	०	०	०	।	०	०	०	।
भौमः	।	।	०	।	०	०	।	।	०	।	।	०
बुधः	।	०	।	।	०	०	०	०	।	०	०	०
गुरुः	०	०	०	०	।	०	०	०	।	।	।	०
शुक्रः	०	०	०	०	०	।	०	।	०	०	।	।
शनिः	०	।	०	०	।	।	।	।	।	०	।	०
लग्नम्	०	।	०	।	०	०	।	०	०	०	।	।
रेखाः	२	४	२	३	३	२	३	४	४	३	५	३
बिंदवः	६	४	६	५	५	६	५	४	४	५	३	५

अथ भौमत्रिकोणैकाधिपत्यशोधनम् ।

ग्रहाः	मं. शु.	ल.								चंद्र	श. बु.	सू. गु.
राशयः	मी.	मे.	वृ.	मि.	क.	सिं	क.	तु.	वृ.	ध.	म.	कुं.
रेखाः	२	४	२	३	३	२	३	४	४	३	५	३
त्रिं. शो.	०	२	०	०	१	०	१	१	२	१	३	०
ए. शो.	०	०	०	०	१	०	०	०	०	१	३	०

ग्रहपिंडः ३१ राशिपिंडः २८ योगपिंडः ५९

अथ बुधरेखाचक्रम्..

राशयः	म.	कुं.	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.
ग्रहाः	बु. श.	र. गु.	मं. शु.	ल.								चंद्रः
रविः	।	०	०	०	०	।	।	०	०	।	०	।
चंद्रः	।	०	।	०	।	०	।	०	।	।	०	०
मंगलः	।	०	।	।	०	।	०	०	।	।	।	।
बुधः	।	०	।	०	।	।	०	०	।	।	।	।
गुरुः	।	०	०	०	०	०	।	०	।	०	०	।
शुक्रः	।	०	।	।	।	।	।	०	०	।	।	०
शनिः	।	।	०	।	०	०	।	।	।	।	।	०
लग्नम्	।	।	०	।	।	०	।	०	।	०	।	०
रेखाः	८	२	४	४	४	४	६	१	६	१	५	४
बिंदवः	०	६	४	४	०	०	२	७	२	२	३	४

अथ बुधत्रिकोणैकाधिपत्यशोधनम् ।

ग्रहाः	बु. श.	र. गु.	शु. मं	ल.								चंद्रः
राशयः	म.	कुं.	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.
रेखा	८	२	४	४	४	४	६	१	६	३	५	४
त्रिं. शो.	४	०	०	३	०	२	२	०	२	४	१	३
ए. शो.	४	०	०	२	०	०	२	०	०	०	१	३

ग्रहपिंडः ५५ राशिपिंडः ७७ योगः १३२

अथ गुरोः रेखाचक्रम् ।

राशयः	कुं.	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.
ग्रहाः	गु. र.	मं. शु.	ल.								चंद्र.	श. बु.
रविः	।	।	।	०	०	०	।	।	।	।	।	०
चंद्रः	०	०	।	०	।	०	।	०	।	०	०	।
भौमः	०	।	।	०	।	०	०	।	।	०	।	।
बुधः	।	०	।	।	।	०	०	।	।	।	०	।
गुरुः	।	।	।	।	०	०	।	।	०	।	।	०
शुक्रः	०	०	।	०	०	।	।	०	०	।	।	।
शनिः	०	।	०	।	।	०	०	०	०	०	।	०
लग्नम्	।	०	।	।	०	।	।	।	।	०	।	।
रेखाः	४	४	७	५	४	२	५	५	५	४	६	५
बिन्दवः	४	४	१	३	४	६	३	३	३	४	२	३

अथ गुरुत्रिकोणैकाधिपत्यशोधनम् ।

ग्रहाः	गु. र.	शु.मं.	ल.								चं.	श.बु.
राशयः	कुं.	मी.	मे.	वृ.	मि.	कर्क.	सिं.	क.	तु.	वृ.	ध.	म.
रेखाः	४	४	७	५	४	२	५	५	५	४	६	५
त्रि०शो०	०	२	३	०	०	०	०	०	१	२	१	०
ए० शो०	०	२	१	०	०	०	०	०	०	२	१	०

ग्रहपिण्डः २० राशिपिण्डः २१ उ० योगपिण्डः ४१

अथ भृगुरेखाचक्रम् ।

राशयः	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.
ग्रहाः	शु.मं.	ल.								चं.	श.बु.	र.गु.
रविः	०	०	०	०	०	०	।	०	०	।	।	०
चन्द्रः	।	।	०	०	।	।	०	।	।	।	।	।
मंगलः	०	०	।	।	०	।	०	०	।	०	।	।
बुधः	।	०	।	।	०	०	।	०	।	०	०	०
गुरुः	०	०	०	।	०	०	।	।	।	।	०	०
शुक्रः	।	।	।	।	।	०	०	।	।	।	।	०
शनिः	।	।	।	०	०	।	।	।	।	०	०	०
लग्नम्.	०	।	।	।	।	।	०	०	।	।	०	।
रेखाः	४	४	५	५	३	४	४	४	७	५	४	३
बिंदवः	४	४	३	३	५	४	४	४	१	३	४	५

अथ भृगुत्रिकोणैकाधिपत्यशोधनम् ।

ग्रहाः	शु.म.	ल.								चं.	श.बु.	गु.र.
राशयः	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.
रेखाः	४	४	५	५	३	४	४	४	७	५	४	३
त्रि.शो.	१	०	१	२	०	०	०	१	४	१	०	०
ए०शो०	१	०	०	०	०	०	०	०	०	१	०	०

ग्रहपिण्डः ३५ राशिपिण्डः ५६ योगपिण्डः ९१

अथ शनिरेखाचक्रम् ।

<table>
<tr><th>मे</th><th>वृ.</th><th>मि.</th><th>क.</th><th>सिं.</th><th>क.</th><th>तु.</th><th>वृ.</th><th>ध.</th><th>म.</th><th>कुं.</th><th>मी.</th><th>राशयः</th></tr>
<tr><td>ल.</td><td></td><td></td><td></td><td></td><td></td><td></td><td></td><td>चं.</td><td>श. बु.</td><td>र. गु.</td><td>शु. मं.</td><td>ग्रहाः</td></tr>
<tr><td>|</td><td>|</td><td>०</td><td>|</td><td>०</td><td>०</td><td>०</td><td>|</td><td>|</td><td>|</td><td>०</td><td>०</td><td>रविः</td></tr>
<tr><td>०</td><td>|</td><td>०</td><td>०</td><td>०</td><td>|</td><td>|</td><td>|</td><td>०</td><td>०</td><td>|</td><td>०</td><td>इन्दुः</td></tr>
<tr><td>०</td><td>|</td><td>०</td><td>०</td><td>|</td><td>०</td><td>०</td><td>०</td><td>|</td><td>|</td><td>०</td><td>|</td><td>भौमः</td></tr>
<tr><td>०</td><td>|</td><td>|</td><td>|</td><td>|</td><td>०</td><td>|</td><td>|</td><td>|</td><td>०</td><td>|</td><td>|</td><td>बुधः</td></tr>
<tr><td>|</td><td>|</td><td>|</td><td>|</td><td>०</td><td>०</td><td>|</td><td>|</td><td>०</td><td>०</td><td>०</td><td>|</td><td>गुरुः</td></tr>
<tr><td>|</td><td>|</td><td>|</td><td>|</td><td>०</td><td>०</td><td>|</td><td>|</td><td>०</td><td>०</td><td>०</td><td>|</td><td>शुक्रः</td></tr>
<tr><td>|</td><td>०</td><td>|</td><td>०</td><td>०</td><td>०</td><td>|</td><td>|</td><td>०</td><td>|</td><td>०</td><td>|</td><td>शनिः</td></tr>
<tr><td>०</td><td>०</td><td>|</td><td>०</td><td>०</td><td>|</td><td>०</td><td>०</td><td>०</td><td>|</td><td>|</td><td>०</td><td>लग्नम्</td></tr>
<tr><td>४</td><td>५</td><td>५</td><td>३</td><td>३</td><td>२</td><td>५</td><td>६</td><td>३</td><td>५</td><td>४</td><td>४</td><td>रेखाः</td></tr>
<tr><td>४</td><td>३</td><td>३</td><td>५</td><td>५</td><td>६</td><td>३</td><td>२</td><td>५</td><td>३</td><td>४</td><td>४</td><td>बिंद०</td></tr>
</table>

अथ शनेस्त्रिकोणैकाधिपत्यशोधनम् ।

श.बु.	सू.बृ	शु.मं.	लग्न								चं.	ग्रहाः
मकर.	कुं.	मी.	मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	राशयः
४	५	२	१	४	४	३	४	३	२	३	४	रेखाः
१	३	०	०	१	२	१	३	०	०	१	३	त्रि० शो.
१	३	०	०	०	०	१	३	०	०	०	३	ए० शो.

ग्रहपिं० ७० राशि पिं० ९९ उ० यो० पिं० १६९

अथ लग्नरेखाचक्रम् ।

मकर	कुंभ	मीन	मेष.	वृ.	मिथु.	कर्क	सिंह	कन्या	तुल	वृश्चि.	धन	राशयः
श. बु.	र. गु.	शु. भं.	लग्न.								चंद्रः	ग्रहाः
०	।	।	०	।	०	०	।	।	०	।	।	रविः
०	।	०	०	।	०	०	०	०	।	०	०	चंद्रमाः
।	।	०	०	।	०	।	।	०	०	०	।	भौमः
०	०	०	०	०	।	०	।	।	०	।	।	बुधः
।	०	०	०	०	।	।	०	०	।	०	।	बृहस्पतिः
।	।	०	०	०	०	०	।	०	०	०	०	शुक्रः
०	०	।	०	।	।	०	०	०	०	।	०	शनिः
।	।	०	।	०	।	।	०	।	०	०	०	लग्नम्
४	५	२	१	४	४	३	४	३	२	३	४	रेखाः
४	३	६	७	४	४	५	४	५	६	५	४	विंदवः

अथ लग्नत्रिकोणैकाधिपत्यशोधनम् ।

ल.								चं.	श.बु.	सू.गु.	शु.मं.	ग्रहाः
मे.	वृ.	मि.	क.	सिं.	क.	तु.	वृ.	ध.	म.	कुं.	मी.	राशयः
४	५	५	३	३	२	५	६	३	५	४	४	रेखाः
१	३	१	२	२	२	१	३	०	३	०	१	त्रि० शो.
१	२	०	०	०	०	१	२	०	३	०	१	ए० शो.

ग्रहपिंडः ४५ रा. पिंडः ७७ उ० योग पिंडः २२

त्रिकोणं तु कथं प्रोक्तं मेषसिंहादयः ॥ क्रमात् वृषकन्यामृगाख्येषु तुलाकुंभयुगेषु च ॥ २ ॥ कर्कवृश्चिकमीनास्ते त्रिकोणाःस्युः परस्परम् ॥ त्रिकोणेषु च यन्न्यूनं तत्तुल्यं त्रिषु शोधयेत् ॥ ३ ॥ एकस्मिन् भवने शून्यं तत्रिकोणं न शोधयेत् ॥ समत्वे सर्वगेहेषु सर्वं संशोध्य बुद्धिमान् ॥ ४ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे त्रिकोणशोधनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ ० ॥

अथ त्रिकोणशोधनोदाहरणमाह ।

जन्मांग चक्रम् ।



त्रिकोणत्रयस्थानेषु यन्न्यूनं फलं तत्स्थानत्रयेषु शोध्यम् तद्यथा सूर्याष्टकवर्गे मेषाधो रेखाफलं २, सिंहाधः फलं ३, धनाधः फलं ४, एतदूनं फलं त्रिषु शोधिते जातम् धनाधः २, मेषाधः०, सिंहाधः १, तथा वृषाधः ३, कन्याधः ७, मकराधः३, इदं त्रिषु शोधिते मकराधः ०, वृषाधः०, कन्याधः ४, तथा कुंभाधः ५, मिथुनाधः ४, तुलाधः ६, एवं त्रिषु शोधिते तुलाधः २, मिथुनाधः०, कुंभाध १, तथा मीनाधः ४, कर्काधः ३, वृश्चिकाधः ४, इदं त्रिषु शोधिते कर्काधः ०, वृश्चिकाधः १, मीनाधः१, इत्येकः प्रकारः ॥ त्रिषु त्रिकोणेषु एकस्थाने शून्यं भवति तदा त्रिकोणशोधनं तत्र न कार्यम् त्रिषु स्थानेषु यथास्थितरेखाफलं स्थाप्यम् अत्र तु कल्पितोदाहरणम् वृषाधो रेखाफलं ३, कन्याधः ५, मकराधः०, अत एव यथास्थितं फलं स्थापितम् तात्रिकोणशोधनाभावः एवं सर्वत्र ज्ञेयम् इति द्वितीयः प्रकारः ॥ त्रिषुत्रिकोणेषु रेखाफलं समानं भवति तदा स्थानत्रयेषु सर्वं शोधयेदित्यर्थात् त्रिषु शून्यमेव स्थाप्यम् तद्यथा गुरोरष्टकवर्गे वृषाधो रेखाफलं ५ , कन्याधः ५,मकराधः५, अत्र फलसाम्यत्वात्त्रिषु स्थानेषु शून्यं स्थापितम् एवं सर्वत्र ज्ञेयम् । इति तृतीयः प्रकारः ॥ इति श्री बृहत्पाराशरहोरापूर्वखंडसारांशे त्रिकोणशोधनं नाम सप्तदशोऽध्यायः ॥ १७ ॥

अथैकाधिपत्यशोधनमाह ।

एवं त्रिकोणं संशोध्य पश्चादेकाधिपत्यता ॥ क्षेत्रद्वयं फलानि स्युस्तदा संशोधयेद्बुधः ॥ १ ॥ क्षीणेन सह चान्यस्मिञ्छोधये-

द्ग्रहवर्जिते ॥ ग्रहयुक्ते फले हीने ग्रहाभावे फलाधिके ॥ २ ॥ अनेन सह चान्यस्मिञ्छोधयेद्ग्रहवर्जिते ॥ फलाधिके ग्रहैर्युक्ते चान्यस्मिन्सर्वमुत्सृजेत् ॥ ३ ॥ उभयोर्ग्रहसंयुक्ते न संशोध्यः कदाचन ॥ उभयोर्ग्रहहीनाभ्यां समत्वं सफलं त्यजेत् ॥ ४ ॥ सग्रहा ग्रहतुल्यत्वात्सर्वं संशोध्यमग्रहात् ॥ कुलीरसिंहयो राश्योः पृथक् क्षेत्रं पृथक् फलम् ॥ ५ ॥ इति बृहत्पाराशरहोरापूर्वखंडसारांशे एकाधिपत्यशोधनं नामाऽष्टादशोऽध्यायः ॥ १८ ॥

अथैकाधिपत्यशोधनोदाहरणम् ।

भौमादीनां क्षेत्रद्वयमस्ति तत्र विचारः क्षेत्रद्वये एकं ग्रहयुक्तं फलं हीनं भवति, द्वितीयं ग्रहहीनं फलाधिकं भवति तदा ऊनं फलम् अन्यत्र ग्रहहीने अधिकफलं क्षेत्रे शोध्यमिति भावः शोध्यावशिष्टग्रहहीने क्षेत्रे स्थाप्यम् अत्र तु कल्पितोदाहरणमाह यथा मिथुनो ग्रहसहितः त्रिकोणशोधनफलेनानेन ३ हीनः कन्याग्रहरहितस्त्रिकोणशोधनफलेनानेन ४ अधिकं तेन मिथुनाधस्त्रिकोणशोधनेन १ कन्याधःस्थिताधिकफले शोधिते शेषं ३ स्थापितं मिथुनाधः १, कन्याधः ३, पुनः एकत्र राशौ फलाधिके ग्रहयुक्ते अन्यत्र ग्रहाभावे फले हीने सति तदा फलाधिके ग्रहयुक्ते राशौ तस्याधो यत्त्रिकोणफलं तत् स्थाप्यम् ग्रहवर्जिते फलहीने राशौ सर्वमुत्सृजेदित्यत्र तस्याधः शून्यं स्थाप्यम् अत्र तु कल्पितोदाहरणम् मीनो ग्रहयुक्तः फलाधिकः ४ धनग्रहरहितस्त्रिकोणशोधनफलेन हीनः तेन मीनाधो यथास्थितफलं स्थापितं ४, धनाधः शून्यं स्थापितं पुनः उभयक्षेत्रे ग्रहसंयुक्ते सति तत्रशोधनं न कार्यम् तद्यथा सूर्याष्टक वर्गे मीनो ग्रहसहितः फलं १, धनुरपि ग्रहसहितं फलं २ अत्र शोधनं नास्ति तेन यथास्थितफलं स्थापितम् पुनः क्षेत्रद्वये ग्रहहीने फलसाम्ये सकलं यजेदिति स्थान-

द्वये शून्यं स्थाप्यं तद्यथा भृगोरष्टकवर्गे वृषाधः फलं १, तुलाधः त्रिकोणशोधनफलम् १, वृषतुलौ ग्रहरहितौ फलेन तुल्यौ तेनात्र स्थानद्वये शून्यं स्थापितं अथवा एकत्र फलं १, अन्यस्मिन् शून्यम् ०, तदा फलाधः शून्यं, शून्याधः०, शून्यं स्थाप्यं तद्यथा शनेरष्टकवर्गे मेषाधः त्रिकोणशोधनफलं ०, वृश्चिकाधः फलं १ अत्रोभयस्थाने शून्यं स्थापितं यदा एकत्र फलमधिकं अन्यत्र फलमूनं तदा ऊनफलेनाधिकफलं संशोध्यावशेषं संस्थाप्य तद्यथा लग्नाष्टकवर्गे त्रिकोणशोधितफलम् वृषाधः ३, तुलाधः १, अत्र शोध्यं वृषाधः २, तुलाधः १, स्थाप्यं पुनः यदेको राशिर्ग्रहसहितः अन्यो ग्रहरहितः द्वयोः फलं तुल्यं भवति तदा सग्रहराशौ यथास्थितं फलं स्थाप्यम् ग्रहरहिते राशौ शून्यं स्थाप्यं अत्र तु कल्पितोदाहरणं मेषो ग्रहरहितस्तत्रस्थं फलं ३ वृश्चिको ग्रहरहितस्तत्रस्थं फलं ३ अत्र फलतुल्यत्वात्सग्रहमेषाधः यथास्थितं फलं स्थापितं ३, वृश्चिकाधः शून्यं ०, स्थाप्यं पुनः कुलीरसिंहयोः सर्वत्र यथास्थितं फलं स्थाप्यं एकाधिपत्यशोधनाभावः एवं सर्वत्र ज्ञेयम् । इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे एकाधिपत्यशोधनं नाम अष्टादशोऽध्यायः ॥ १८ ॥

अथ पिंडोत्पत्तिमाह ।

शोध्यावशेषं संस्थाप्य राशिमानेन वर्द्धयेत् ॥ ग्रहयुक्तेऽपि तद्राशौ ग्रहमानेन वर्द्धयेत् ॥ १ ॥

अथ गुणकध्रुवांकानाह ।

गोसिंहौ दशगुणितौ वसुभिर्मिथुनालिनौ ॥ वणिग्मेषौ तु मुनिभिः कन्यकामकरौ शरैः ॥ शेषाः स्वमानगुणिता राशिमाना इमे क्रमात् ॥ १ ॥ जीवारशुक्रसौम्यानां दशवसुमुनीन्द्रियैः क्रमाद्गुणकाः ॥

बुधस्य संख्या शेषाणां ग्रहगुणैर्गुणयेत् पृथक् पृथक्कार्याः ॥ २ ॥
इति बृहत्पाराशरहोरापूर्वखंडसारांशे पिंडोत्पत्तिकथनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

अथ राशिगुणकचक्रम्.													अथ ग्रहगुणकचक्रम्.							
मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी	रा	सू	च	मं	बु	गु	शु	श	ग्रहाः
७	१०	८	४	१०	५	७	८	९	५	११	१२	गु	५	५	८	५	१०	७	५	गुणकाः

अथ ग्रहराशिपिंडानयनोदाहरणम् ।

एकाधिपत्यशोधितसिद्धांकेषु तत्तद्ग्रहाश्रितराश्यधःस्थितानंकान् तत्तद्ग्रहगुणकैर्गुणयित्वा गुणितांकानां योगे ग्रहपिंडो भवति पुनः राशिगुणकगुणितराश्यंको राशिपिंडो भवति । तद्यथा कुंभस्थौ रविगुरू कुंभाधःस्थांक १ रविगुणकाः ५ गुरौ गुणांकाः १० गुणयेत् गुणितांकाः ५ । १० मीनाश्रितौ शुक्रभौमौ तयोः राशेरधःस्थांक १ शुक्रगुणकाः७, भौमगुणकाः८ गुण्येन गुणितांकाः७।८ धनराशिसहितश्चंद्रस्तस्य राशेरधःस्थांकौ २, चंद्रगुणितौ ५, गुणितांकाः १०, मकराश्रितौ शनिबुधौ तयो राशेरधःस्थांकः०, गुणितानां योगे ग्रहपिंडः ४० पुनः राशिपिंडः कुंभाधः १ कुंभगुणकाः ११ गुणितांकाः ११ मीनाधःस्थांकाः १ मीनगुणकाः १२ गुणितांकाः १२, सिंहाधः १, सिंहगुणकाः १० गुणितांकाः १० धनाधः २ धनगुणकाः ९ गुणितांकाः १८, गुणितानां योगे राशिपिंडः ५१ उभयोर्योगे योगपिंडः ९१ एवं सूर्याष्टकवर्गे पिंडम् अनया रीत्या सर्वत्र ज्ञेयम् । इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे पिंडोत्पत्तिकथनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

अथाष्टकवर्गफलमाह ।

आत्मप्रभावशक्तिश्च पितृचिंता रवेः फलम् ॥ मनोबुद्धिप्रसादश्च
मातृचिंता मृगांकतः ॥ १ ॥ भ्रातृसत्त्वं गुणं भूमिं भौमेन तु विचिंतयेत्
॥ २ ॥ वाणिज्यकर्मवृत्तिश्च बुधेन तु विचिंतयेत् ॥ गुरुणा
देहपुष्टिं च बुद्धिपुत्रार्थसंपदः ॥ ३ ॥ भृगोर्विवाहकर्माणि भोगस्थानं
च वाहनम् ॥ वेश्यास्त्रीजनगात्राणि शुक्रेणैव निरीक्षयेत् ॥ ४ ॥
आयुष्यं जीवनोपायं दुःखशोकमहद्भयम् ॥ सर्वक्षयं च मरणं मंदेनैव
निरीक्षयेत् ॥ ५ ॥ रविः पिता शशी माता भ्राता भौमो बुधः
सुहृत् ॥ मातुलेयः स्मृतो जीवो ज्ञानपुण्ये स्त्रियः सितः ॥ एषामृक्षे
च तत्काले मरणं कुरुते शनिः ॥ ६ ॥ तत्तत्कारकभावकर्णगुणितं
शोध्यावशिष्टं फलं विंशत्या सह सप्तभिश्च विहृतं तच्छेषतारा शनौ ॥
तातः स्याज्जननी सहोदरजवो बंधुः सुतः स्त्री स्वयं तत्तुल्यं
विलयं प्रयाति विपुलं श्रीनाथहेतुश्च वा ॥ ७ ॥ आदित्याष्टकवर्गं
च निक्षिप्याकाशचारिषु ॥ अर्कस्थितस्य नवमो राशिः पितृगृहं
स्मृतम् ॥ ८ ॥ तद्राशिफलसंख्याभिर्वर्द्धयेद्योगपिंडकम् ॥ सप्तविंशोद्धृतं
शेषं नक्षत्रं याति भानुजम् ॥ ९ तस्मिन्काले तस्य तस्य
भावस्यार्तिं विनिर्दिशेत् ॥ तस्मिन्काले पितृक्लेशो भवतीति न
संशयः ॥ १० ॥ तत्रिकोणगते वापि पितापितृसमोऽपि वा ॥ मरणं
तस्य जानीयाद्दशाछिद्रेषु कल्पयेत् ॥ ११ ॥ अर्कात्तु तुर्यगे राहौ
मंदे वा भूमिनंदने ॥ गुरुशुक्रेक्षणमृते पितृहा जायते नरः ॥ १२ ॥
लग्नाच्चंद्राद्गुरुस्थाने याते सूर्यसुते यदि ॥ पित्रोर्नाशं तदा काले
वीक्षिते पापसंयुते ॥ १३ ॥ दशानुकूलकालेन योजयेत्कालवित्तमः॥
लग्नात्सुखेशराशीशदशायां च पितृक्षयः ॥ १४ ॥ सुखनाथदशायां
तु बहुप्राप्तेश्च संशयः ॥ पितृजन्माष्टमे जातस्तदीशे लग्नगेपि वा ॥
॥ १५ ॥ तेनैव पितृकार्याणि कारयेन्नात्र संशयः ॥ सुखेशे लाभल-

ग्रस्थे चंद्रलग्नाद्विशेषतः ॥ १६ ॥ पितृगृहं समायुक्ते जातः पितृवशानुगः ॥ तेनैव पितृकार्याणां कर्मशेषं समापयेत् ॥ १७ ॥ पितृजन्मतृतीयर्क्षे जातः पितृधनाश्रितः ॥ पितृकर्मगृहे जातः पितृतुल्यगुणान्वितः ॥ १८ ॥ तदीशे लग्नसंस्थेपि पितृश्रेष्ठो भवेत्सुतः ॥ सूर्याष्टवर्गे यच्छून्यं मासं संवत्सरं प्रति ॥ १९ ॥ विवाहव्यवहारादि मासेऽस्मिन्वर्जयेत्सदा ॥ कलहो मासदुःखानि शून्यमासे भवंति च ॥ २० ॥ एवमादिफलं ज्ञात्वा मासं प्रति समाचरेत् ॥ संशोध्य पिंडं सूर्यस्य रंध्रमानेन वर्द्धयेत् ॥ २१ ॥ द्वादशादिहृताच्छेषं मेषादि गणयेत्पुनः ॥ तास्मिन्मासे मृतिं विंद्यात्तात्रिकोणगतेपि वा ॥ २२ ॥ सूर्या दिकल्पयेत्त्वन्ये परतो भास्करे स्मृतिः ॥ विशेषं भावसूत्रेऽग्रे पितुर्दायादिकं दिशेत् ॥ २३ ॥

अस्योदाहरणम् ।

अर्कास्थितस्य नवमो राशिः पितृगृहं अत्र सूर्यः कुंभस्थः अस्मान्नवमो राशिः तुला तत्रस्थं फलं ६ सूर्यस्य संशुद्धिः पिंडयोगः ९१ अयं तुलायां फलस्य गुणितांकाः ५४६ इदं सप्तविंशाति २७ भक्तेर्लब्धम् २० व्यर्थं शेषं ६ आर्द्रानक्षत्रगते शनौ पितृकष्टम् तात्रिकोणगते कष्टम् आर्द्रास्वातिशताभिषानक्षत्रगते शनौ पितृकष्टम् अथवा संशोध्य सूर्यपिंडः ९१ तुलायां रंध्रमानेन ३ गुणितांकाः २७३ द्वादश १२ भक्तेर्लब्धं व्यर्थं २२ शेषं ९ धनराशिः तात्रकाणगे ९ । १ । ५ धनमेषासिंहराशिगते शनौ पितृकष्टम् पितुरभावे पितृसमस्य कष्टम् ॥ २३ ॥

अथ चंद्रफलम् ।

चंद्राच्चतुर्थगे मातुः प्रासादग्रामचिंतनम् ॥ चंद्राष्टवर्गे शून्यं च शून्यराशिगते विधौ ॥ २४ ॥ तन्नक्षत्रं परित्यज्य शुभकर्माणि कारयेत् ॥ चंद्राष्टमे शनिक्षेत्रे त्रितयेषु विशेषतः ॥ २५ ॥ आयामव्या-

धिदुःखानि लभते नात्र संशयः ॥ चन्द्रात्सुखफलात्पिण्डं वर्धयेच्छोध्यपूर्ववत् ॥ २६ ॥ शेषे मृगे शनौ याते मातृहानिं विनिर्दिशेत् ॥ तत्रिकोणेषु वा केचिद्दशाछिद्रेषु कल्पयेत् ॥ २७ ॥ चन्द्राल्लग्नात्सुतस्थाने भौमे वा भास्करात्मजे ॥ दृश्यते वा तयोः स्थानं पूर्वोक्ते कालसंगते ॥ २८ ॥ तदभावे स्वयं मृत्युर्दशान्तरगतेऽपि वा ॥ चन्द्रात्सुखेष्टमे राशेस्त्रिकोणे दिवसाधिपे ॥ २९ ॥ मात्रावियोगश्चास्तीति निर्दिशेल्लग्नतः पितुः ॥ पितुर्वा मातृचिन्ताया भास्करादीन् प्रकल्पयेत् ॥ ३० ॥

अस्योदाहरणम् ।

चंद्रो धनराशावस्ति, अष्टमः सिंहराशिस्तस्येशः सूर्यः, अयं धनिष्ठानक्षत्रेऽस्ति अतः धनिष्ठा ज्येष्ठा रेवती एतेषु नक्षत्रेषु आयामो व्याधिदुःखादि लभेत् । तस्मादेतेषु नक्षत्रतृतीयेषु शोभनं न कुर्यात् । तथा चंद्रात्सुखस्थानं मीनः १२ अत्रस्थफल ३ चंद्रस्य शुद्धयोगपिंडः ९१ फलेन गुणितांकाः २७३ सप्तविंशतिः २७ भक्तेर्लब्धं १० व्यर्थं शेषं ३ कृत्तिकानक्षत्रं तत्रिकोणे कृत्तिकाउत्तराफाल्गुनीउत्तराषाढानक्षत्रगते शनौ मातृकष्टम् । अथवा योगपिंडः ९१ रंध्रमानेन २ गुणितांकाः १८२ द्वादशभक्तेर्लब्धं १५ व्यर्थं शेषं २ वृषभकन्यामकरराशिगते शनौ मातृकष्टं मात्रभावे तत्समानस्य कष्टम् ॥ ३० ॥

अथ भौमफलमाह ।

भौमाष्टवर्गे संचिंत्यं भ्रातृविक्रमधैर्यकम् ॥ भौमास्थितस्य सहजो राशिर्भ्रातृगृहं स्मृतम् ॥ ३१ ॥ त्रिकोणे शोधनं कृत्वा यत्र भूयांसि तत्र च ॥ भूमिर्भवति भार्या वा ग्रहगेहोऽथवा यदि ॥ ३२ ॥ भौमो बलविहीनश्चेद्दीर्घायुर्भ्रातृको भवेत् ॥ फलानि यत्र क्षीयंते तत्र भूमितराः स्मृताः ॥ ३३ ॥ तद्राशिफलसंख्यैश्च वर्धयेच्छोध्यपूर्ववत् ॥ शेषमृक्षं शनौ याते भ्रातृहानिं विनिर्दिशेत् ॥ ३४ ॥

अस्योदाहरणम् ।

भौमः मीनराशिस्थः अस्मात्तृतीयराशिः वृषभः तस्य फलं २ भौमस्य योगपिंडः ५९ फलेन गुणितांकाः ११८ सप्तविंशाति २७ भक्तेर्लब्धं ४ व्यर्थं शेषं १० मघा तत्रिकोणमघामूलाश्विनीनक्षत्रगते शनौ भ्रातृकष्टं अथवा भौमयोगपिंडः ५९ रंध्रमानेन ३ वर्द्धितः १७७ द्वादश १२ भक्तेर्लब्धं १४ व्यर्थं शेषं ९ धनराशिः तत्रिकोणे धनुर्मेषसिंहराशिगते शनौ भ्रातृकष्टम् ॥ ३४ ॥

अथ बुधफलम् ।

बुधात्तुर्यं कुटुंबं च धनपुत्रादिमातुलाः ॥ तत्पंचमे मंत्रविद्यालिपिबुद्ध्यादि चिंतयेत् ॥ ३५ ॥ बुधाष्टवर्गं संशोध्य शेषमृक्षगते शनौ बंधुमित्रविनाशादील्लँभते नात्र संशयः ॥ ३६ ॥

अस्योदाहरणम् ।

बुधो मकरेऽस्ति, अस्माच्चतुर्थः मेषः १, तत्रस्थं फलं ४, बुधस्य योगपिंडः १३२ फलेन गुणितांकाः ५२८ सप्तविंशाति २७ भक्तेर्लब्धं १९ व्यर्थं शेषं १५ स्वातीशतभिषाआर्द्रानक्षत्रगते शनौ बंधुमित्रादिकष्टम् अथवा योगपिंडः १३२ रंध्रमानेन ५ गुणितांकाः ६६० द्वादशभक्तेर्लब्धम् ५५ व्यर्थं शेषं० मीनकर्कवृश्चिकराशिगते शनौ बंधुमित्रादिकष्टम् । एवं पंचमस्थानाद् बुद्ध्यादि विचारणीयम् ॥ ३५ ॥ ३६ ॥

अथ गुरुफलम् ।

जीवात्पंचमतो ज्ञानं पुत्रधर्मधनादिकम् ॥ गुरोरष्टकवर्गेषु संतानमपि कल्पयेत् ॥ ३७ ॥ गुरुस्थितसुतस्थाने यावच्च विद्यते फलम् ॥ शत्रुनीचग्रहं त्यक्त्वा तावंतश्च सुताः स्मृताः ॥ ३८ ॥ संख्या नवांशतुल्या वा तदीशस्थाऽथ वा पुनः ॥ सुतभेशतवांशैश्च समानावाये

कल्पयेत् ॥ ३९ ॥ गुरोरष्टकवर्गेषु शोध्यशेषफलानि च ॥ क्रूराश्रितफलं त्यक्त्वा शेषास्तस्यात्मजाः स्मृताः ॥ व्ययार्थसुतसंस्थैश्च पापैः स्यात्क्षीणसंततिः ॥ ४० ॥ गुरोरष्टकवर्गेषु सुतराशिस्थितं समम् ॥ अल्पात्मजः सविज्ञेयो गुरौ पंचमगेऽपि वा ॥ तदीशयोगदृष्टे वा तदा पुत्रान्समादिशेत् ॥ ४१ ॥ एतैर्बहुप्रकारैश्च कल्पयेत्कालवित्तमः ॥ बहुलक्षणसंयोगे तदा तस्मिन्समादिशेत् ॥ ४२ ॥ वंशक्षयादियोगश्च पुरस्ताद्वक्ष्यते मया ॥ पूर्वोक्तलक्षणेनात्र वंशभर्तुः समादिशेत् ॥ ४३ ॥

अस्योदाहरणम् ।

गुरुः कुंभराशिस्थः, अस्मात्पंचमो राशिर्वृषोस्ति तस्य फलं ४ गुरोर्योगपिंडः ९१ । फलेन गुणितांकाः ३६४ सप्तविंशति २७ भक्तेर्लब्धं १३ व्यर्थं शेषं ११ पूर्वाफाल्गुनीपूर्वाषाढाभरणीनक्षत्रगते शनौ संतानकष्टम् अथवा योगपिंडः ९१ रंध्रमानेन ५ गुणितांकाः ४५५ द्वादश १२ भक्तेर्लब्धं ३७ व्यर्थं शेषं ११ कुंभमिथुनतुलाराशिगते शनौ संतानकष्टम् ॥ ४३ ॥

अथ शुक्रफलम् ।

भृगोरष्टकवर्गं च निक्षिप्याकाशचारिषु ॥ येषु येषु फलानि स्युर्भूयांसि किल तत्र तु ॥ ४४ ॥ भूमिं कलत्रं वित्तं च तद्देशे निर्दिशेन्नृणाम् ॥ शुक्रज्जामित्रतो लब्धिर्दारेशान्विताद्दिग्भवा ॥ ४५ ॥ दाराधिपस्थितं क्षेत्रं दाराजन्मर्क्षकं विदुः ॥ तस्योच्चनीचराशौ वा केचिदिच्छंति तद्विदः ॥ ४६ ॥ तस्यांशकात्रिकोणे वा भार्याया जन्म संभवेत् ॥ लग्नेन्द्रोर्भाग्यभं जन्म लग्नभं परिकीर्तितम् ॥ ४७ ॥ तयोः समागमर्क्षं च कल्पयेत्तत्र बुद्धिमान् ॥ स्वक्षेत्रस्वोच्चगो वापि स्वभिन्नर्क्षगतोऽपि वा ॥ ४८ ॥ स्वमित्रांशगतो वापि वक्तव्यं दारलक्षणम् ॥ शुक्रजामित्रतो लब्धिस्त्रिकोणाद्देशदिक् स्त्रियः ॥ ४९ ॥ प्रोक्तराशिर्यदा

द्दारा जन्मर्क्षं संततिस्तदा ॥ अनुक्तराशिर्जन्मर्क्षमास्ति चेन्नास्ति संततिः ॥ ५० ॥ भृगुर्दारेशयुक्तर्क्षं फलं संख्याः स्त्रियो विदुः ॥ क्षेत्रस्त्रीग्रहणे साम्यं नृपस्य द्विगुणं तथा ॥ ५१ ॥ मंदांशे मंदसंयुक्ते मंदक्षेत्रेऽथ वा भृगौ ॥ नीचांशे पापसंयुक्ते नीचस्त्रीभोगमिच्छति ॥५२॥ मेदिनीतनयभोगनिवासी मेदिनीभवसदालययुक्तः ॥ मंगलेक्षणयुतः सितस्तदाऽत्यंतसुंदरपराङ्गनारतः ॥ ५३ ॥ भौमांशकगते शुक्रे भौमक्षेत्रगतेपि वा ॥ भौमेन युतदृष्टे च परस्त्रीभोगमिच्छति ॥ ५४ ॥ दारागारे मंदभांशे कुजांशे मंदाराभ्यां वीक्षिते यस्य पुंसः ॥ स्यात्तद्दारा जारिणी चंचला वा वेश्यादासी स्वामिसंतोषनिघ्नी ॥ ५५ ॥ जामित्रे मंदभौमांशे तदीशे मंदभौमगे ॥ वेश्या वा जारिणी वापि तस्य भार्या न संशयः ॥ ५६ ॥ पापारूढांशगे चंद्रे जामित्रे व्ययगेऽपि वा ॥ पापग्रहान्विते शुक्रे स्त्रीहेतोः शुचमावहेत् ॥ ५७ ॥ शुक्रांशकसमाना स्त्री वर्णरूपगुणान्विता ॥ भवेच्छशांकतुल्या वा दारेशस्य गुणान्विता ॥ ५८ ॥ सपापभागगे विधौ व्ययेंगना लयेऽपि चेत् ॥ सपापभार्गवेंगनानिमित्ततः शुचां पदम् ॥ ५९ ॥ सितांशकप्रमाणिकाः स्त्रियो भवंति सद्गुणाः ॥ चरांशसंमितास्तथाः स्वनाथतुल्यसद्गुणाः ॥ ६० ॥ शुक्रान्मंदे त्रिकोणस्थे नेष्टं जीवे सुखप्रदम् ॥ तेषां बलाबलत्वेन भार्याया लक्षणं वदेत् ॥ ६१ ॥ एवमादि फलं ज्ञात्वा निर्दिशेच्छुक्रवर्गतः ॥ ६२ ॥

अस्योदाहरणम् ।

भृगोर्योगपिंडः ४१ शुक्रात्सप्तमः कन्या तस्य फलेन ४ गुणितांकाः १६४ सप्तविंशति २७ भक्तेर्लब्धं ६ व्यर्थं शेषं २ भरणीपूर्वाफाल्गुनीपूर्वाषाढानक्षत्रगते शनौ जायाकष्टम् अथवा योगपिंडः ४३ रंध्रमानेन ४ गुणितांकः १६४ द्वादश १२ भक्तेर्लब्धम् १३ व्यर्थं शेषम् ८ वृश्चिकमीनकर्कराशिगते शनौ जायाकष्टम् ॥ ६२ ॥

अथ शनिफलम्।

शनैश्चरास्थितस्थानादष्टमं मृतिरुच्यते ॥ शनेरष्टकवर्गे च स्वदेस्यायुष्यं विनिर्दिशेत् ॥ ६३ ॥ लग्नात्प्रभृति मंदांतं फलान्येकत्र कारयेत् ॥ लग्नादिफलतुल्याब्दे व्याधिवैरं समादिशेत् ॥ ६४ ॥ मंदादिलग्नपर्यंतं फलान्येकत्र संयुतम् ॥ मंदादिफलतुल्याब्दे व्याधिं तस्य समादिशेत् ॥ ६५ ॥ तयोर्योगसमाब्दे तु मृत्युयोगं प्रचक्षते ॥ शोध्यादिगुणनं कृत्वा पिंडं संस्थाप्य यत्नतः ॥ ६६ ॥ अष्टमस्थफलैर्हत्वा सप्तविंशतिभाजितम् ॥ शतादूर्ध्वं तु तत्पिंडं शतमेवाग्रतस्त्यजेत् ॥ ६७ ॥ आयुः पिंडं तु जानीयात्प्राग्वद्वेलां तु कल्पयेत् ॥ त्रिकोणैकाधिपत्यर्क्षशोधनं विरचय्य च ॥ ६८ ॥ पिंडं संस्थाप्य गुणयेल्लग्नादष्टमगैः फलैः ॥ सप्तविंशतिहृच्छेषं मृत्युकालं वदेद्बुधः ॥ ६९ ॥ समूलाष्टकवर्गे च यत्र नास्ति फलं गृहे ॥ तत्र नास्ति फलं तस्य यदा याति शनैश्चरः ॥ ७० ॥ तद्गृहे रविचंद्रौ चेद्दशाछिद्रे मृतिं वदेत् ॥ दशाछिद्रसमायोगे मृत्युरेव न संशयः ॥ ७१ ॥ मंदाष्टवर्गराशीनां हीनराशौ क्षयो भवेत् ॥ तद्गृहे भास्करे मंदे तस्मिन्काले मृतिं वदेत् ॥ ७२ ॥ मंदाष्टवर्गाद्यथारिष्टयोगे दुष्टानि वर्षाणि विचारयांति ॥ पूर्वोक्तसंशोधनतो हि शुद्धं पिण्डं सुधीमान्विलिखेत्पृथक्स्थम् ॥ ७३ ॥ लग्नात्तु मंदान्तमथो फलानामैक्यं शनेर्लग्नमुपांत्यमेव ॥ तद्योगतुल्ये शरदीहकाले व्याधिं मृतिं वा परदेशयानम् ॥ ७४ ॥ धनक्षयं तत्प्रातितुल्यवर्षे तद्योगयोगाब्दसमे तु कष्टम्॥ सामर्थ्यहीनग्रहपाककाले प्राप्ते तदा निश्चयतो मृतिः स्यात् ॥ ७५॥ विलग्नशनिमध्यगानि च फलानि संताडयेन्नगैर्भविहृतानि शेषमितभे खले याति चेत् ॥ तदा धनसुखक्षतिं तदनु चांगभादष्टमास्थितैर्विगुणयेद्गुणं भंपरिशेषभस्थे शनौ ॥ ७६ ॥

अत्रोदाहरणम् ।

लग्नप्रभृति मंदांतं फलानि १४४३४३२३४ एतेषामैक्यं २८ एतत्तुल्ये वर्षे शरीरे व्याधिं वा मृतिं परदेशयानं धनक्षयं लभते तथा मंदप्रभृति लग्नांतं फलानि ४, ५, २ एतेषां योगः ११ एतत्तुल्याऽब्दे पूर्ववत्कष्टं उभयोर्योगसमानाऽब्दे ३९ पूर्ववद्धनक्षयादियोगो भवति मृत्युयोगाभावः पुनः विलग्नाच्छनिमध्ये यानि फलानि २८ नगै ७ स्ताडितानि १९६ भ २७ विहृतावशेषं ७ एतन्मितभे पुनर्वसुनक्षत्रगते खले सुखक्षतिः स्यात् अथवा शनेः योगपिंडः १६९ लग्नादष्टमस्थफलेन ३ गुणितः ५०७ भ २७ परिशेषः २१ उत्तराषाढाकृत्तिकाउत्तराफाल्गुनीनक्षत्रगते शनौ सुखधनक्षतिः स्यात्॥ ७६॥

प्रयाति वियदब्दके सति दशाद्यरिष्टे सति भृशं मरणनिश्चयं निगदितं तदा नो मृषा ॥ त्रिकोणभवने ततोपि सति दुष्टपाकोदये प्रयाति मरणं पुमानपि च रक्षकश्चेच्छिवः ॥ ७७ ॥

अस्यार्थः ।

मंदाष्टकवर्गे यस्मिन् राशौ वियच्छून्यं भवति तस्मिन्राशौ याते शनौ दशारिष्टे सति वा दुष्टपाकोदये दुष्टदशायां तस्मिन्नब्दके मरणनिश्चयो वाच्यः ततोपि कोणे दुष्टदशायां वा मरणं भवति यदि शिवो रक्षिता तदापि मृत्युः स्यात् ॥ ७७ ॥

पुनः भौमफलम् ।

भौमांतं तनुतः कुजात्तनुलयं योगे फलानां तथा तत्तुल्यं शरदीह कष्टमनिशं शस्त्रानलोत्थं भयम् ॥ मंदारांगभयोः फलैक्यकमिते सौम्योज्झिते शस्त्रभीर्मन्दारैक्यमिते फलक्षतिभयं राहोः सुखानां क्षतिः ॥ ७८ ॥

अस्योदाहरणम् ।

भौमाष्टकवर्गे तनुतः लग्नात् भौमांतं फलैक्यं ३६ अथवा भौमात् लग्नांतं फलं २ उभयोर्योगफलम् ३८ एतत्तु २ । ३६ । ३८ तुल्यवर्षे शरीरे व्याध्यादि कष्टम् ॥ ७८ ॥

अथ शुभाशुभफलमाह ।

शुभखचरफलैक्यं प्राप्तवर्षे नितांतं धनतनयसुखानां भाजनं स्यान्मनुष्यः ॥ धरणितनयवर्गे बिंदुसंज्ञांतयोगे तत्तुल्यमिह वर्षे पापगे मृत्युभीतिः ॥ ७९ ॥ मार्तण्डपुत्राष्टकवर्गमध्ये यद्यद्गृहे शून्यफलं भवेच्च ॥ तत्तद्गमध्ये रविजेऽथ सूर्ये तदा शरीरामयपीडनं स्यात् ॥ ८० ॥

अस्योदाहरणम् ।

चंद्राष्टकवर्गे चंद्राल्लग्नांतं फलैक्यं १९ लग्नाच्चद्रांतं फलैक्यं ३४ एतत्तुल्याब्दे १९३४ धनादिसौख्यं बुधाष्टकवर्गे बुधाल्लग्नांतं फलैक्यं १४ लग्नाद्बुधांतं फलैक्यं ४२ एतत्तुल्याब्दे १४४२ धनतनयादिसौख्यं गुरोर्लग्नांतं फलैक्यं ८ लग्नाद्गुर्वन्तं फलैक्यं ४८ एतत्तुल्याब्दे धनादिसौख्यं शुक्राष्टकवर्गे शुक्राल्लग्नांतं फलैक्यं ४ एतत्तुल्याब्दे धनतनयादिसौख्यं भविष्यति एवं लग्नाष्टकवर्गेऽपि बोद्धव्यम् ॥ ७९॥ शनेरष्टकवर्गे शून्यं नास्ति इति शनेरष्टकवर्गः ॥ ८० ॥

अथ सर्वाष्टकवर्गफलमाह ।

सर्वाष्टकग्रहफलैश्च वियोज्य चक्रं मूर्त्यादिशुण्यमशुभं शुभमेव तत्र ॥ जन्मादितः फलसमानदशाः समीक्ष्य यात्राविवाहसमये बहुमृत्युयुक्तः ॥ ८१ ॥ ॥ मेषादिभानां सकलाष्टवर्ग उत्पन्नरेखागणमेव कुर्यात् ॥ धृत्यादि १८ तत्त्वांतमितं कनिष्टं त्रिंशावसानं किल मध्यवीर्याः ॥ ८२ ॥ त्रिंशाधिकं तूत्तमवीर्यदाः स्युः शरीरसौख्यार्थय-

शोविशेषाः ॥ स्वस्वाष्टवर्गे यदि वेदहीनाः क्लेशाय सौख्याय च वेदपुष्टाः ॥ ८३ ॥ दशमभवनरेखाभ्योदिकं लाभमानं भवति यदि विहीनं स्याद्व्ययाख्यं ततोपि ॥ अधिकतरविलग्नं भोगसंपत्तिभग्नविनिमयवशतस्तद्वैपरीत्यं जनस्य ॥ ८४ ॥ मध्या १० त्फलाधिके लाभो मध्यात्क्षीणफले व्ययः ॥ यस्य रेखाधिकं लग्नं भोगवानर्थवान् भवेत् ॥ ८५ ॥ प्रादक्षिण्यादिभानां सकलफलयुतिं दिक्चतुष्कक्रमेण कृत्वा तद्भागतो यः समधिकफलतः शोभनं हानिमल्पात् ॥ सौम्याः स्वोच्चस्वगेहोदितखचरयुते दिग्विभागे स्वकार्ये वित्तेशाशासु वित्तं मृतिपतिगतादिग्भागगे देहनाशः ॥ ८६ ॥

टीका ।

भानां लग्नादिद्वादशराशीनां प्राग्दक्षिणेन सव्यमार्गेण दिक्चतुष्कमेण पूर्वादिदिक्षु राशित्रयं त्रयं ज्ञेयं तत्र लग्नद्वादशैकादशराशयः पूर्वा दिक् तथा दशमनवमाष्टमराशयो दक्षिणा दिक् सप्तमषष्ठपंचमराशयः पश्चिमा दिक् चतुर्थतृतीयद्वितीयराशयः उत्तरा दिक् पूर्वादिदिक्चतुष्कस्य प्रत्येकं राशित्रयस्य सकलफलयुतिं योगं कृत्वा तद्भागैर्यद्यत्र समधिकफलं तद्दिशि शोभनं वाच्यं यत्राल्पफलं तद्दिशि हानिर्वाच्या ॥ ८६ ॥

अथ भावफलमाह ।

भावं विलोक्य सदसत्फलदायकं यत्तद्राशिसंभवफलैश्च तदुक्तपिंडम् ॥ ८७ ॥ पिंडे रेखाताडिते भावषेशे १२ राशौ तस्मिन्याति सौरिः समायाम् ॥ यस्यां तत्तद्भावहानिं च विद्यात्प्राहुर्वंशे वाऽथवा तत्त्रिकोणे ॥ कृत्वा बिंदुभ्यस्तु कालं सुधीमांस्तस्माद्वाच्यः प्राप्तिकालः शुभत्वे ॥ ८८ ॥

टीका ।

भावमिति लग्नपिंडं संगुण्य भैः संप्तविंशतिभि[२७] र्विभज्य शेषभे यदा सौरिः प्रयाति तदा तस्य भावफलस्य नाशः स्यात् ॥ ८७ ॥ पिंडे इति पिंडे लग्नपिंडे ताडिते भावफलेन गुणयेत् द्वादशभक्ते शेषे यस्यां समायां वर्षे सौरिर्याति तस्मिन्वर्षे तद्भावहानिं विद्यात् ज्ञातव्येत्यर्थः अथ वा तत्रिकोण इति एवं सुधीमान् बिंदुभ्यस्तत्कालं शुभस्थे तस्मात्प्राप्तिकालो वाच्यः ॥ ८८ ॥

मृत्युभावेशभात्कोणनिघ्नं फलं मृत्युजं सूर्य[१२] शेषर्क्षयुक्ते रवौ ॥
तत्रिकोणेऽथवारिष्टमासं वदेत्तातमातृगृहाद्येऽथवा कल्पयेत् ॥ ८९ ॥
सूर्यजाल्लग्नमृत्य्वीश्वरांतं च तत्पिंडकं ताडितं मृत्युमानेन च ॥
सूर्यशेषर्क्षगे भास्करे नाशनं तत्रिकोणेऽथ वा स्याद्विधिः सर्वत ॥९०॥

टीका ।

मृत्युभावेश्वरो यस्मिन् राशावस्ति. तत्रिकोणं त्रिकोणजशोधितफलेन मृत्युभावस्थितं फलं गुणयेत् सूर्यशेषे द्वादशभक्ते शेषर्क्षयुक्ते शेषराशियुक्ते रवौ तत्रिकोणे वारिष्टमासं वदेदित्यर्थः अथवा तातमातुर्गृहात्कल्पयेदिति ॥ ८९ ॥ ९० ॥

मीनाद्यं मिथुनांतकं प्रथमकं प्रोक्तं वयः प्राक्तनैः कर्काद्यं वणिजान्तकं तरुणताख्यं च मध्यं बुधैः ॥ कुंभांतं स्थविराह्वयं च बहुभिर्यत्तत्फलैः संयुतं तत्सौख्यार्थविशेषकं बलयुते नैतद्विशेषाच्छुभम् ॥ ९१ ॥

टीका ।

मीनाद्यमिति अत्र वयास्त्रिधा मीनाद्यं मिथुनांतकं मीनमेषवृषामिथुना एते राशयः प्रथमवयो ज्ञेयाः कर्काद्यं वणिजांतकं कर्कसिंहकन्यातुला एते राशयः तरुणवयो ज्ञेयाः तथावृश्चिक धनुर्मकरकुंभा

एते राशयः स्थविराह्वयं वृद्धवयो ज्ञेयाः यद्यद्बहुभिः फलैः संयुतं तत्तद्वयसि सौख्यार्थविशेषकं ज्ञेयम् बलयुतेनायं बलयुतग्रहेण युक्तं विशेषाच्छुभं ज्ञेयम् ॥ ९१ ॥

अथ राहुयुक्तगुरुफलम् ।

राहुयुक्तगुरुराशिगे ९ । १२ गुरौ तत्रिकोणमथ रिष्टकारकम् ॥
अल्पमृत्युरिपुभावनायको योगकृत्तादिह मृत्यु संभवः ॥ ९२ ॥

टीका ।

इयं राहुयुक्तगुरुरिति यस्य जन्मलग्ने धनुर्मीनराशौ राहुरस्ति तत्रराशिगते गुरौ रिष्टसंभवो वाच्यः तत्रिकोणे वा अथवा यत्र कुत्र राशौ राहुयुक्तो गुरुरस्ति तत्र राशिगते शनावरिष्टसंभवो वाच्यः तत्रिकोणे वा ॥ ९२ ॥

लग्नेंदुतस्त्रिंशतिमे दृक्काणे गुरौ त्रिकोणेपि तदीश्वरस्य ॥ वर्षे
विवादो परदेशयानं शरीरपीडा मृतिसन्निभा स्यात् ॥ ९३ ॥

टीका ।

चेद्यदा चंद्रस्य लग्नस्य च त्रिंशतिमे द्रेष्काणे गुरुरस्ति यस्य जन्मनि प्रतिराशौ द्रेष्काणत्रयमस्ति एवं गणनया चंद्रस्य त्रिंशतिमे द्रेष्काणे गुरौ सति तदीश्वरस्य तस्य द्रेष्काणस्य योऽधिपतिस्तस्य त्रिकोणे शनैश्चरे याते तस्मिन्वर्षे विवादः परदेशयानं शरीरपीडा मृतिसान्निभा स्यात् मृत्युतुल्या स्यादित्यर्थः ॥ ९३ ॥

अथ निधनार्कमाह ।

मृत्युपद्वादशांशात्रिकोणेऽसुरो मृत्युनाथस्त्रिकोणस्थसूर्ये मातिः ॥
अर्कलिप्ताहतो राहुलिप्तागणश्चक्रलिप्ता २१६०० मयुक्तो रविर्मृत्युदः ॥ ९४ ॥ भौममार्तंडलिप्ताहतिः कारयेच्चक्रलिप्ताहताल्लब्धयुक्तो रविः ॥ याति यस्मिंस्तदा तात्रिकोणेपि वा क्लेशमाहुः स्वयं
मासि धीमान्वदेत् ॥ ९५ ॥

टीका ।

मृत्युपेति । मृत्युभावस्वामी यस्मिन्द्वादशांशेऽस्ति ततस्तस्मात्त्रिकोणेऽसुरो राहुर्याति तदा मृत्युनाथत्रिकोणस्थे सूर्ये मृतिर्वाच्या पुनः राहोर्लिप्तागणः कार्यः अर्कलिप्तागणेन संगुण्य चक्रलिप्ता विहृत्य यल्लभ्यते तेनार्कलिप्तागणो युक्तः कार्यस्तं राश्यादिकं कृत्वा तत्समोऽर्को यदा भवति तदा मृत्युकालो वाच्यः ॥ ९५ ॥

अथ निधनार्कोदाहरणम् ।

यथा सूर्यः १० । ४ । १४ । २२ अस्य कलापिंडः १८२५४ । २२ । राहुः ७ । २८ । २१ । ३९ अस्य कलापिंडः १४३०१ । ३९ अनेन गुणितांकाः २६१०५०४५४ चक्रलिप्ताः २१६०० भक्तेर्लब्धांकाः कला १२०९५ शेषं षष्टि ६० गुणनचक्रलिप्ताः २१६०० भागे लब्धा विकला ४० अत्र पूर्वं आनाताऽर्कलिप्ता १८२५४ । २२ मध्ये योजिता जाता जातांका ३०३४० । २ अयं ६० भक्तेर्लब्धं ५०५ । ४०२ अस्य ३० भागो १६ । २५ । ४० । २ अस्य राशि १२ भागे शेषराश्यादिनिधनार्कः ४ । २५ । ४० । २ ॥ अर्कलिप्ताः १८२५४ भौमलिप्ताः २१४२४ अनयोराहतिः ३८१२७३६९६ चक्रलिप्ताभक्ते २१६०० लब्धं १७६५१ शेषम् १२०९६ षष्टि ६० घ्नं ७२५७६० चक्रलिप्ताः २१६०० भक्तेर्लब्धम् ३३ अनेनार्कलिप्तांकयुक्ता ३५९०५ । ५५ अयं राश्यादि ५ १८ एतत्तुल्येऽर्के मासि क्लेशक्षयो भवति तत्त्रिकोणे वा ॥ ९५ ॥

अथ श्लोकद्वयं लग्नविषयकमाह ।

निधने द्वादशांशत्रिकोणे भास्करे मृतिः ॥ निधनेशत्रिकोणे वा सूर्यादिष्वागतेष्वपि ॥ ९६ ॥ षष्ठाष्टमव्ययेशानां स्फुटयोगगते शनौ ॥ मृतिं तत्र विजानीयात्तत्त्रिकोणगतेपि वा ॥ ९७॥

अथ निधनचंद्रमाह ।

अष्टमेशात्रिकोणे विधुःस्याद्यदा योगमिंदौ तथा तन्नवांशेऽपि वा ॥
तत्रिकोणे प्रयाते मृतिं निर्दिशेन्निश्चयात्स्वल्परेखोद्भवे वासरे ॥ ९८ ॥

टीका ।

यो अष्टमभावेशो ग्रहोऽस्ति तस्य त्रिकोणे यदा विधुर्योगं याति अथ वा अष्टमेशो यस्मिन्नवांशेऽस्ति तस्य त्रिकोणे यदा विधुः प्रयाति तदा स्वल्पस्वल्परेखोद्भवे वासरे निश्चयान्मृतिं निर्दिशेदित्यर्थः ॥९८॥

अथ निधनलग्नमाह ।

जन्मलग्नेंदुगा नन्द ९ भागाः क्रमाद्वेदषष्ट्यंश ६४ राशौ प्रयाते
तनौ ॥ मृत्युजन्मांगनीचोदये शून्यगे दुष्टपाकोदये देहमुक्तिर्भवेत्॥ ९९॥

टीका ।

जन्मलग्नेंदुगाः जन्मलग्नस्य चंद्रस्य च नंदभागाः नवांशाः क्रमद्वेदषष्ट्यंशराशौ चतुःषष्टिनवांशतुल्यराशौ तनौ लग्ने वा चंद्रे याति सति देहमुक्तिर्भवेदित्यर्थः अथ वा मृत्युजन्मांगनीचोदये उच्चान्नीचं सप्तममित्युक्तत्वात् मृत्युनीचोदयं सिंहः जन्मांगनीचोदयं सप्तमभं प्रकरस्तत्र प्रयाते तनौ लग्ने शून्यग्ने शून्यगे लग्नाष्टकवर्गे तत्र शून्यं फलं चेत्तदा दुष्टपाकोदये दुष्टग्रहस्य दशायां देहमुक्तिर्भवेदित्यर्थः ॥ ९९ ॥

अत्रोदाहरणम् ।

लग्नात्० । ६ । ३ । ४ । २ चन्द्रः ८ । २५ । २९ । ३८ नवांशमानं ३२० त्रिषष्ट्या ६३ गुणिते जातः २१० अंशास्त्रिंशद्भक्ते जाता राशयः ७ एभिर्युक्तौ लग्नचंद्रौ लग्नम् ७ । ६ । ३ । ४२ चंद्रः ३ । २ । ५ । २ । ९ । ३८ लग्नस्य चतुः षष्टितुल्ये नवांशे वृश्चिकलग्ने चंद्रस्य चतुः षष्टितुल्ये नवांशे कर्कलग्ने देहमुक्तिकालः एवं सर्वत्र विचारणीयम् ॥ ९९ ॥

अथ समुदायाष्टकवर्गफलमाह ।

सर्वाष्टकग्रहफलैर्विनियोगचक्रं मूर्त्यादिगुण्यमशुभं शुभमेव तत्र ॥ जन्मादितः फलसमेतदशाः समीक्ष्य यात्राविवाहसमये बहुमृत्युयुक्तः ॥ १०० ॥ सर्वकर्मफलोपेते ह्यष्टवर्गक उच्यते ॥ अन्यथा फलविज्ञानं दुर्ज्ञेयं गुणदोषजम् ॥ १०१ ॥ त्रिंशाधिकफला ये स्यू राशयस्ते शुभप्रदाः ॥ त्रिंशांतं पंचविंशादि राशयो मध्यमाः स्मृताः ॥ १०२ ॥ अतिक्षीणफला ये च राशयः कष्टदुःखदाः ॥ श्रेष्ठराशिषु सर्वेषु शुभकार्याणि कारयेत् ॥ १०३ ॥ श्रेष्ठात्राशीन्मुहूर्तेषु योजयेन्मतिमान्नरः ॥ तत्तज्जन्मप्रभावास्तु पुंसस्तैः सार्द्धमाचरेत् ॥ १०४ ॥ कष्टराशिमुहूर्तेषु वर्जयेन्मतिमान्नरः ॥ मध्यात्फलाधिके लाभो मध्यात्क्षीणफले चयः ॥ १०५ ॥ लग्नं फलाधिकं यस्य भोगवानर्थवान् हि सः ॥ विपरीतेन दारिद्र्यं भविष्यति न संशयः ॥ १०६ ॥ लग्ने यावत्फलं चास्ति तद्दशायाः फलं वदेत् ॥ मूर्त्यादिव्ययपर्यंतं दृष्ट्वा भावफलानि वै ॥ १०७ ॥ अधिके शोभनं विद्यात्क्षीणे हीने च मृत्यवे ॥ मध्यमे मध्यमं याति विचार्य भावसंमतम् ॥ १०८ ॥ खंडत्रयं विनिक्षिप्य दशानयनवत्तथा ॥ पापग्रहसमारूढं खंडं क्लेशकरं स्मृतम् ॥ १०९ ॥ सौम्यैर्जुष्टं शुभं ज्ञेयं मिश्रैर्मिश्रफलं वदेत् ॥ खंडत्रयफलं ज्ञात्वा दशाफलमुदीरयेत् ॥ ११० ॥ लग्नात् प्रभृति मंदांतमेकीकृत्य फलानि वै ॥ सप्तभिर्गुणयेत्पश्चात्सप्तविंशोद्धृतात्फलम् ॥ १११ ॥ तत्समानगते पापे दुःखं वा रोगमादिशेत् ॥ मन्दात्प्रभृति लग्नान्तमेवमेवं प्रकल्पयेत् ॥ ११२ ॥ भौमाच्च लग्नपर्यंतमेकीकृत्य तु बिन्दवः ॥ पूर्ववद्गुणितं कृत्वा वर्षमेवं प्रकल्पयेत् ॥ ॥ ११३ ॥ तद्वर्षे पापसंयुक्ते व्याधिमृत्युभयं भवेत् ॥ वर्षेषु हीनभागेषु तद्भावं वर्जयेत्तदा ॥ ११४ ॥ गोष्ठं क्षेत्रं कृषिं वापि षष्ठराशौ स्थितं शुभम् ॥ क्षीणराशौ स्थितं द्रव्यं तद्द्रव्यं नाशतां व्रजेत् ॥ ११५ ॥

वित्तेश्वरस्य दिग्भागे वित्तमाप्नोति निश्चितम् ॥ रंध्रेश्वरस्य दिग्भागे देहस्तत्र विनश्यति ॥ ११६ ॥ मेषादियद्गृहगता वसुसंख्यया तास्तद्भावपुष्टिबलबुद्धिकरा भवंति ॥ षट्पंचसप्तसहितानि शुभप्रदानि त्रिष्वेककर्णयुतभानि न शोभनानि ॥ ११७ ॥ मिश्रं फलं भवति सागरकर्णयोगे रोगापवादभयदा यदि शून्यभावाः ॥ एकादिकर्णयुतभानुमुखग्रहाणां भिन्नाष्टवर्गजानि सर्वफलं प्रवच्मि ॥ ११८ ॥

अथ मासफलमाह ।

संक्रमादिने ग्रहाणामष्टकवर्गेषु चारवशात् ॥ रेखैक्याच्छुभमशुभं मासफलं तद्वशाद्दिनफलं च ॥ ११९ ॥

टीका ।

जन्मकालिकमष्टकवर्गं संपाद्य यस्मिन्नेव राश्यंतरसंक्रमो भवति तस्मिन्दिने सर्वेषामष्टकवर्गरेखासु सकलफलं वाच्यम् ॥ ११९ ॥

अथ रेखाशांतिफलमाह ।

रेखाभिः सप्तभिर्युक्ते मासे मृत्युर्नृणां भवेत् ॥ सुवर्णं विंशतिपलं दद्याद्द्वौ तिलपर्वतौ ॥ १२० ॥ वसुभिर्जातिहीनः स शीघ्रं मृत्युवशो नरः ॥ असत्फलविनाशाय दद्यात्कर्पूरजां तुलाम् ॥ १२१ ॥ रेखाभिर्नवभिः सर्पान्म्रियते मनुजो ध्रुवम् ॥ अश्वैश्चतुर्भिः संयुक्तं रथं दद्याच्छुभाप्तये ॥ १२२ ॥ रेखाभिर्दशभिः शस्त्रात्प्राणांस्त्यजति मानवः ॥ दद्याच्छुभफलावाप्त्यै कवचं वज्रसंयुतम् ॥ १२३ ॥ रुद्रैः प्राप्याभिशापं च प्राणैर्मुक्तो भवेन्नरः ॥ दिक्पलैः स्वर्णघटितां प्रदद्यात्प्रतिमां विधोः ॥ १२४ ॥ आदित्यैर्जलदोषेण मानवस्य मृतिं वदेत् ॥ भूमिं दद्याद्ब्राह्मणाय दद्याच्छुभफलं भवेत् ॥ १२५ ॥ त्रयोदशमितैर्व्याघ्रान्मानवो मृत्युमाप्नुयात् ॥ विष्णोर्हिरण्यगर्भस्य दानं कुर्याच्छुभाप्तये ॥ १२६ ॥ अचिराज्जीवितं जह्याच्छक्रैः

कालेन भक्षितः ॥ वराहप्रतिमां दद्यात्कनकेन विनिर्मिताम् ॥ १२७॥
राज्ञो भयं तिथिमितैस्तत्र हस्ती प्रदीयते ॥ रिष्टभूपैः कल्पतरोः
प्रतिमां च निवेदयेत् ॥ १२८ ॥ ऋषिचंद्रैर्व्याधिभयं गुडधेनुं निवेदयेत्
॥ कलहोष्टेंदुभिर्दद्याद्रत्नगोभूहिरण्यकम् ॥ १२९ ॥ देशत्यागोऽर्कचंद्रैः
स्याच्छांतिं कुर्याद्विधानतः ॥ विंशत्या बुद्धिनाशः
स्यात्कुर्याल्लक्षमितं जपम् ॥ १३० ॥ भूमिपक्षै रोगपीडा दद्याद्धान्यस्य
पर्वतम् ॥ यमाश्विभिर्बन्धुपीडा दद्यादादर्शकं बुधः ॥ १३१ ॥
रामपक्षयुते मासे नानाक्लेशान्प्रपद्यते ॥ सौवर्णीं प्रतिमां दद्याद्रवेः
सप्तपलैः क्रमात् ॥ १३२ ॥ वेदाश्विभिर्बन्धुहीनो दद्याद्गोदानकं
दश ॥ सर्वरोगादिनाशार्थं जपहोमादि कारयेत् ॥ १३३ ॥ ऋतुपक्षैर्बुद्धिहीनः
पूज्या वागीश्वरी तथा ॥ धनक्षयः स्यान्नक्षत्रैः श्रीसूक्तं
तत्र संजपेत् ॥ १३४ ॥ वसुपक्षे युते मासे न लाभो हानिखेचरैः ॥
सूर्यहोमश्च विधिना कर्तव्यः शुभकांक्षिभिः ॥ १३५ ॥ एकोनात्रिंशता
चापि चिंताव्याकुलितो भवेत् ॥ घृतवस्त्रसुवर्णानि तत्र दद्याद्विचक्षणः
॥ त्रिंशता धनधान्याप्तिरिति जातकनिर्णयः ॥ १३६ ॥
भूवह्निभिर्महोद्योगः पुत्रसंपद्गुणाग्निभिः ॥ सहेमवस्त्रलाभश्च चतुस्त्रिंशत्समन्विते
॥ १३७ ॥ पंचरामैर्भवेद्धीमान्षट्त्रिंशत्सुतावित्तदा
॥ १३८ ॥ सप्तत्रिंशद्धनस्याप्तिरष्टत्रिंशत्सुखार्थदा ॥ द्रव्यरत्नाप्तिरेकोनचत्वारिंशद्धि
विद्यते ॥ १३९ ॥ धनवान्कीर्तिमांश्चैव
चत्वारिंशति वर्द्धते ॥ अत ऊर्ध्वं यशोर्थाप्तिः पुण्यश्रीरुपचीयते
॥ १४० ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशेऽष्टकवर्गफलकथनं
नाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ छ ॥

अथ नाभसयोगमाह ।

अधुना वै विस्तरतः काथिता योगास्तु नाभसा नाम्ना ॥ अष्टादशशतगुणितास्तेषां संक्षेपतो वक्ष्ये ॥ १ ॥ आश्रयाख्यास्त्रयो योगा दलयोगद्वयं ततः ॥ आकृतिर्विंशतिः संख्या योगानां सप्तकं स्मृतम् ॥ २ ॥ रज्जुयोगो मूशलश्च नलो मालाभुजंगमौ ॥ ३ ॥ गदायोगश्च शकटः शृंगाटकविहंगमौ ॥ हलवज्रयवाश्चैव कमलो वापियूपकौ ॥ ४ ॥ शरशक्तिदंडनौकाकूटछत्रधनूंषि च ॥ अर्द्धेन्दुयोगश्चक्राख्यः समुद्रश्चेति विंशतिः ॥ ५ ॥ वीणादामनिकायागेः पाशकेदारशूलकाः ॥ युगगोलौ ततः प्रोक्तौ योगा द्वात्रिंशका इमे ॥ ६ ॥

अथाश्रययोगत्रयमाह ।

सर्वे चरस्था अपि वा स्थिरस्था द्विदेहसंस्था यदि वा भवंति ॥
क्रमेण रज्जुर्मुशलं नलश्च योगत्रयं स्यादिदमाश्रयाख्यम् ॥ ७ ॥

अथ दलाख्ययोगद्वयमाह ।

केंद्रत्रये सौम्यखगैस्तु माला खलग्रहैर्व्यालसमाह्वयः स्यात् ॥
इदं तु योगाद्वितयं दलाख्यं मुनीश्वरेण प्रतिपादितं हि ॥ ८ ॥

अथाकृतियोगविंशतिमाह ।

आसन्नकेंद्रद्वयगैर्गदाख्यो लग्नास्तसंस्थैः शकटः समस्तैः ॥ खबंधुयातैर्विहगः प्रदिष्टः शृंगाटकं लग्नवात्मजस्थैः ॥ ९ ॥ धनारिखस्थैस्त्रिमदायगैर्वा चतुर्थरन्ध्रव्ययसंस्थितैर्वा ॥ नभस्तलस्थैर्हलनामयोगः किलोदितोयं निखिलागमज्ञैः ॥ १० ॥ लग्नस्मरस्थानगतैः शुभाख्यैः पापैश्च मेषूरणबंधुयातैः ॥ वज्राभिधस्तैर्विपरीतसंस्थैर्यवश्च मिश्रैः कमलाभिधानः ॥ ११ ॥ त्यक्त्वा केंद्राणि चेत्खेटा शेषस्थानेषु संस्थिताः ॥ वापीयोगो भवेदेवं गदितः पूर्वसूरिभिः ॥ १२ ॥ लग्नाच्चतुर्थात्स्मरतः खमध्याच्चतुर्गृहस्थैर्गगनेचरेंद्रैः ॥ क्रमेण यूपश्च

शरश्च शक्तिर्दण्डः प्रदिष्टः खलु जातकज्ञैः ॥ १३ ॥ लग्नाच्चतुर्थात्स्मरतः खमाद्यात्सप्तर्क्षगैर्नौरथकूटसंज्ञः ॥ छत्रं धनुश्चान्यगृहप्रवृत्तैर्नौपूर्वकैर्योग इहार्द्धचंद्रः ॥ १४ ॥ तनोर्धनाद्येकगृहांतरेण स्युः स्थानषट्के गगनेचरेंद्राः ॥ चक्राभिधानश्च समुद्रनामा योगा इतीहाकृतिजाश्च विंशत् ॥ १५ ॥

अथ सप्तसंख्यायोगनामान्याह ।

ये योगाः कथिताः पुरा बहुतरास्तेषामभावे भवेद्गोलश्चैकगतैर्युगं द्विगृहगैः शूलस्त्रिगेहोपगैः ॥ केदारश्च चतुर्थसर्वखचरैः पाशस्तु पंचस्थितैः षट्स्थैर्दामनिका च सप्तगृहगैर्वीणेति संख्या इमे ॥ १६ ॥

अथैतेषां फलानि क्रमेणाह ।

अटनप्रयासरूपाः परदेशस्वास्थ्यभागिनो मनुजाः ॥ क्रूराः खलस्वभावा रज्जुप्रभवाः सदा कथिताः ॥ १७ ॥ मानज्ञानयुतांकस्थैर्युक्ता नृपप्रियाः ख्याताः ॥ बहुपुत्राः स्थिरचित्ता मुसलसमुत्था भवंति नराः ॥ १८ ॥ न्यूनातिरिक्तदेहा धनसंचयभागिनोऽतिनिपुणाश्च ॥ बंधुहिताश्च सरूपा नलयोगे संप्रसूयंते ॥ १९ ॥ नित्यं सुखप्रधाना वाहनवस्त्रान्नभोगसंपन्नाः ॥कांताः सुबहुस्त्रीका मालायां संप्रसूताः स्युः ॥२० ॥ विषमाः क्रूरा निःस्वा नित्यं दुःखार्दिताः सुदीनाश्च ॥ परभक्षपाननिरताः सर्पप्रभवा भवन्ति नराः ॥ २१ ॥ सततोद्युक्तार्थवशा यज्वानः शास्त्रगेयकुशलाश्च ॥ धनकनकरत्नसंपत्संयुक्ता मानवा गदायां तु ॥ २२ ॥ रोगार्ताः कुनखा मूर्खाः शकटानुजीविनो निःस्वाः ॥ मित्रस्वजनविहीनाः शकटे जाता भवंति नराः ॥ २३ ॥ भ्रमणरुचयो विकृष्टा दूताः सुरतानुजीविनो धृष्टाः ॥ कलहप्रियाश्च नित्यं विहगे योगे सदा जाताः ॥ २४ ॥ प्रियकलहाः समरसहाः सुखिनो नृपतेः प्रियाः शुभकलत्राः ॥ आढ्या युवतिद्वेष्याः शृंगाटकसंभवा मनुजाः ॥ २५ ॥ बह्वाशिनो दरिद्राः कृषीवला

दुःखिताश्च सोद्वेगाः ॥ बंधुसुहृद्भिः सक्ताः प्रेष्या हलसंज्ञके सदा
पुरुषाः ॥ २६ ॥ आद्यंतवयः सुखिनः शूराः सुभगा निरीहाश्च ॥
भाग्यविहीना वज्रे जाता खला विरुद्धाश्च ॥ २७ ॥ व्रतनियममंगलपरा
वयसो मध्ये सुखार्थपुत्रयुताः ॥ दातारः स्थिरचित्ता
यवयोगभवाः सदा पुरुषाः ॥ २८ ॥ विभवगुणाढ्याः पुरुषाः
स्थिरायुषो विपुलकीर्तयः शुद्धाः ॥ शुभशतकाः पृथ्वीशाः कमलभवा
मानवा नित्यम् ॥ २९ ॥ निधिकरणे निपुणधियः स्थिरार्थसुखसंयुताः
सुतयुताश्च ॥ नयनसुखसंप्रहृष्टा वापीयोगेन राजानः
॥ ॥३०॥ आत्मविदिज्यानिरतः स्त्रिया युतः सत्त्वसंपन्नः ॥ व्रतनियमनिरतो
यूपे जातो विशिष्टश्च ॥ ३१ ॥ इष्टं करणे दस्युबंधनमृगया
धनसेवितोऽपि मांसादः ॥ हिंस्राः कुशिल्पकाराः शरयोगे
मानवाः प्रसूयंते ॥ ३२ ॥ धनरहितविफलदुःखितनीचालसाश्चिरायुषः
पुरुषाः ॥ संग्रामबुद्धिनिपुणाः सत्यां जाताः स्थिराः सुभगाः
॥ ३३ ॥ हतपुत्रदारनिःस्वाः सर्वत्र च निर्घृणाः स्वजनबाह्याः ॥
दुःखितनीचप्रेष्या दंडप्रभवा भवंति नराः ॥ ३४ ॥ सलिलोपजीविविभवाः
बह्वाशाः ख्यातकीर्तयो दुष्टाः ॥ कृपणा मलिना लुब्धा
नौसंजाताः खलाः पुरुषाः ॥ ३५ ॥ अनृतकथनवधपापा निष्किंचनाः
शठाः क्रूराः ॥ कूटसमुत्था नित्यं भवंति गिरिदुर्गवासिनो
मनुजाः ॥ ३६ ॥ स्वजनाश्रयो दयावान्नाना नृपवल्लभः प्रकृष्टमतिः ॥
प्रथमेंऽत्ये वयसि नरः सुखवान्दीर्घायुरातपत्री स्यात् ॥ ३७ ॥ आनृत्तिकगुप्तपालाश्चौराः
कितवाश्च कानने निरताः ॥ कार्मुकयोगे जाता
भाग्यविहीनाः शुभा वयोमध्ये ॥ ३८ ॥ सेनापतयः सर्वे कांतशरीरा
नृपप्रिया बलिनः ॥ मणिकनकभूषणयुता भवंति योगे वार्धचंद्राख्ये
॥ ३९ ॥ प्रणताशेषनराधिपकिरीटरत्नप्रभास्फुरितपादः ॥
भवति नरेंद्रो मनुजश्चक्रे यो जायते योगे ॥ ४० ॥ बहुरत्नधनसमृद्धा

भोगयुता धनजनप्रियाः ससुताः ॥ उदधिसमुत्थाः पुरुषाः स्थिरविभवा
साधुशीलाश्च ॥ ४१ ॥ प्रियगीतनृत्यवाद्यनिपुणाः सुखिनश्च
धनवन्तः ॥ नेतारो बहुभृत्या वीणायां कीर्तिताः पुरुषाः ॥ ४२ ॥
दामिन्यामुपकारी नयधनयुक्तो महेश्वरः ख्यातः ॥ बहुसुतरत्नसमृद्धो
धीरो जायेत विद्वांश्च ॥ ४३ ॥ पाशे बंधनभाजः कार्ये दक्षाः
प्रपंचकाराश्च ॥ बहुभाषिणो विशीला बहुभृत्याः संप्रतानाश्च ॥ ४४ ॥
सुबहूनामुपयोज्याः कृषीवलाः सत्यवादिनः सुखिनः ॥ केदारे
संभूताश्चलस्वभावा धनैर्युक्ताः ॥ ४५ ॥ ताक्ष्णालस नहीना हिंस्राः
सुबहिष्कृता महाशूराः ॥ संग्रामे लब्धशब्दाः शूले योगे भवंति
नराः ॥ ४६ ॥ पाखंडवादिनो वा धनरहिता वा बहिष्कृता लोके ॥
सुतमातृधर्मरहिता युगयोगे ये नरा जाताः ॥ ४७ ॥ बलसंयुक्ता
विधना विद्याविज्ञानवर्जिता मलिनाः ॥ नित्यं दुःखितदीना गोले
योगे भवंति नराः ॥ ४८ ॥ सर्वास्वपि दशास्वेते भवेयुः फलदायिनः
॥ प्राणिनामिति विज्ञेयाः प्रवदंति तवाग्रजाः ॥ ४९ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे नाभसयोगादिफलकथनं नाम एकविंशोऽध्यायः ॥ २१ ॥

अथ गजकेसरियोगमाह ।

केंद्रस्थिते देवगुरौ मृगांकाद्योगस्तदाहुर्गजकेसरीति ॥ दृष्टे सुते
वेंदुसुतः शशांके नीचास्तहीनैर्गजकेसरी स्यात् ॥ १ ॥ गजकेसरिसंजातस्तेजस्वी धनवान् भवेत् ॥ मेधावी गुणसंपन्नो राजप्रियकरो
भवेत् ॥ २ ॥

अथाऽमलायोगमाह ।

यस्य जन्मसमये शशिलग्नात्सद्ग्रहे यदि च जन्मनि संस्थः ॥
तस्य कीर्तिरमला भुवि तिष्ठेदायुषोन्तमविनाशनसंपत् ॥ ३ ॥

लग्नाद्वा चन्द्रलग्नाद्वा दशमे शुभसंयुते ॥ योगोयममला नाम कीर्तिराचन्द्रतारकी ॥ ४ ॥ राजपूज्यो महाभोगी दाता बन्धुजनप्रियः ॥ परोपकारी गुणवानमलायोगसंभवः ॥ ५ ॥

अथ शुभाशुभयोगमाह ।

शुभाशुभाख्ये यदि जन्मलग्ने शुभाशुभाख्यौ भवतस्तदानीम् ॥ व्ययस्वगैः पापशुभैर्विलग्नात्पापाख्यसौम्यग्रहकर्तरी च ॥ ॥ ६ ॥ शुभयोगभवो वाग्मी रूपशीलगुणान्वितः ॥ पापयोगोद्भवः कामी पापकर्मपरार्थयुक् ॥ ७ ॥

अथ पर्वतयोगमाह ।

सौम्येषु केंद्रगृहगेषु सपत्नरंध्रे शुद्धेऽथवा शुभयुते यदि पर्वतः स्यात् ॥ लग्नांत्यपौ यदि परस्परकेन्द्रयातौ मित्रेक्षितौ भवति पर्वतनामयोगः ॥ ८ ॥ भाग्यान्वितः पर्वतयोगजातो विद्याविनोदाभिरतः प्रदाता ॥ कामी परस्त्रीजनकेलिलोलस्तेजोयशस्वी पुरनायकः स्यात् ॥ ९ ॥

अथ काहलयोगमाह ।

अन्योन्यकेंद्रगृहगौ गुरुबंधुनाथौ लग्नाधिपे बलयुते यदि काहलः स्यात् ॥ कर्मेश्वरेण सहिते तु विलोकिते वा स्वोच्चे स्वके सुखपतौ यदि तादृशः स्यात् ॥ १० ॥ ओजस्वी साहसी मूर्खश्चतुरंगबलैर्युतः ॥ यत्किंचिद्ग्रामनाथस्तु जातः स्यात्काहले नरः ॥ ११ ॥

अथ मालिकायोगमाह ।

लग्नादिसप्तगृहगा यदि सप्तखेटा जातो महीपतिरनेकगजाश्वनाथः ॥ वित्तादिगे निधिपतिः पितृभक्तियुक्तो धीरोग्ररूपधनवान्नरचक्रवर्ती ॥ १२ ॥ जातो यदा विक्रममालिकायां भूपः स शूरो धनिकश्च रोगी ॥ सुखादिका चेद्बहुदेशभाग्यभोगी महादानपरो

महीपः ॥ १३ ॥ पुत्राद्या यदि मालिका नरपतिर्यज्वाथ वा कीर्तिमान् जातः षष्ठगृहाद्धनं च सुखभृत्प्राप्तो दरिद्रो भवेत् ॥ कामादिं गृहमालिका यदि बहुस्त्रीवल्लभो भूपतिर्दीर्घायुर्धनवर्जितो नरवरः स्त्रीनिर्जितश्चाष्टमात् ॥ १४ ॥ धर्मादिग्रहमालिकागुणनिधिर्यज्वा तपस्वी विभुः कर्माद्यो यदि धर्मकर्मनिरतः संपूजितः सज्जनैः ॥ लाभाद्राजवरांगनामणिपतिः सर्वक्रियादक्षको जातो रिःफगृहाद्बहुव्ययकरः सर्वत्र पूज्यो भवेत् ॥ १५ ॥

अथ चामरयोगमाह ।

लग्नेश्वरे केंद्रगते स्वतुंगे जीवेक्षिते चामरनामयोगः ॥ सौम्यद्वये लग्नगृहे कलत्रे नवास्पदे वा यदि चामरः स्यात् ॥ १६ ॥ योगे जातश्चामरे राजपूज्यो विद्वान्वाग्मी पंडितो वा महीपः ॥ सर्वज्ञः स्याद्वेदशास्त्राधिकारी जीवेद्वर्षं सप्ततिर्वत्सराणाम् ॥ १७ ॥

अथ शंखयोगमाह ।

अन्योन्यकेंद्रगृहगौ सुतशत्रुनाथौ लग्नाधिपे बलयुते यदि शंखयोगः ॥ लग्नाधिपे च गगनाधिपतौ चरस्थे भाग्याधिपे बलयुते तु तथा वदंति ॥ १८ ॥ शंखे जातो भोगशीलो दयालुः स्त्रीपुत्रार्थक्षेत्रवान्पुण्यकर्मा ॥ शास्त्रज्ञानाचारसाधुक्रियावान् जीवेद्वर्षं वत्सराणामशीतिम् ॥ १९ ॥

अथ भेरीयोगमाह ।

स्वांत्योदयास्तभवनेषु वियच्चरेषु कर्माधिपे बलयुते यदि भेरियोगः ॥ केंद्रे गते सुरगुरौ सितलग्ननाथौ भाग्येश्वरे बलयुते तु तथैव वाच्यम् ॥ २० ॥ दीर्घायुषो विगतरोगभया नरेंद्रा बह्वर्थभूमिसुतदारयुताः प्रसिद्धाः ॥ आचारभूरिसुखशौर्य्यमहानुभावा भेरीप्रजातमनुजा निपुणाः कुलीनाः ॥ २१ ॥

अथ मृदंगयोगमाह ।

उच्चग्रहांशकपतौ यदि केंद्रकोणे तुंगस्वकीयभवनोपगते बलाढ्ये ॥ लग्नाधिपे बलयुते तु मृदंगयोगः कल्याणरूपनृपतुल्ययशः प्रदः स्यात् ॥ २२ ॥

अथ श्रीनाथयोगमाह ।

कामेश्वरे कर्मगते स्वतुंगे कर्माधिपे भाग्यपसंयुते च ॥ श्रीनाथयोगः शुभदस्तदानीं जातो नरः शक्रसमो नृपालः ॥ २३ ॥

अथ शारदायोगमाह ।

योगः शारदसंज्ञकः सुतगते कर्माधिपे चंद्रजे केन्द्रस्थे दिननायके निजगृहप्राप्तेतिवीर्य्यान्विते ॥ चंद्रात्कोणगते पुरंदरगुरौ सौम्यत्रिकोणे कुजे लाभे वा यदि देवमंत्रिणि बुधास्तच्छारदासंज्ञकः॥२४॥ स्त्रीपुत्रबंधुसुखरूपगुणानुरक्ता भूपप्रियागुरुमहीसुरदेवभक्ताः ॥ विद्याविनोदरतिशीलतपोबलाढ्या जाताः स्वधर्मनिरताः भुवि शारदाख्ये ॥ २५ ॥

अथ मत्स्ययोगमाह ।

लग्नधर्मगते पापे पंचमे सदसद्युते ॥ चतुरस्रं गते पापे योगोऽयं मत्स्यसंज्ञकः ॥ २६ ॥ कालज्ञः करुणासिंधुर्गुणधीर्बलरूपवान् ॥ यशोविद्यातपस्वी च मत्स्ययोगसमुद्भवः ॥ २७ ॥

अथ कूर्मयोगमाह ।

कलत्रपुत्रारिगृहेषु सौम्याः स्वतुंगामित्रांशकराशियाताः ॥ तृतीयलाभोदयगास्त्वसौम्या मित्रोच्चसंस्थो यदि कूर्मयोगः ॥ २८ ॥ विख्यातकीर्तिर्भुवि राज्यभोगी धर्माधिकः सत्वगुणप्रधानः ॥ धीरः सुखी वागुपकारकर्ता कूर्मोद्भवो मानवनायको वा ॥ २९ ॥

अथ खड्गयोगमाह ।

भाग्येशे धनभावस्थे धनेशे भाग्यराशिगे ॥ लग्नेशे केंद्रकोणस्थे खड्गयोग इतीरितः ॥ ३० ॥ वेदार्थशास्त्रनिखिलागमतत्त्वयुक्तिबुद्धिप्रतापबलवीर्यसुखानुरक्ताः ॥ निर्मत्सराश्च निजवीर्यमहानुभावाः खड्गे भवंति पुरुषाः कुशलाः कृतज्ञाः ॥ ३१ ॥

अथ लक्ष्मीयोगमाह ।

केंद्रमूलत्रिकोणस्थे भाग्येशे परमोच्चगे ॥ लग्नाधिपे बलाढ्ये च लक्ष्मीयोग इतीरितः ॥ ३२ ॥ गुणाभिरामो बहुदेशनाथो विद्यामहाकीर्तिरनंगरूपः ॥ दिगंतविश्रांतनृपालवंद्यो राजाधिराजो बहुदारपुत्रः ॥ ३३ ॥

अथ कुसुमयोगमाह ।

स्थिरलग्ने भृगौ केंद्रे त्रिकोणेंदौ शुभेतरे ॥ मानस्थानगते सौरे योगोयं कुसुमो भवेत् ॥ ३४ ॥ दाता महीमंडलनाथवंद्यो भोगी महावंशजराजमुख्यः ॥ लोके महाकीर्तियुतः प्रतापी नाथो नराणां कुसुमोद्भवः स्यात् ॥ ३५ ॥

अथ पारिजातयोगमाह ।

विलग्ननाथस्थितराशिनाथस्थानेशराशीशतदंशनाथः ॥ केंद्रत्रिकोणोपगतो यदि स्यात्स्वतुंगगो वा यदि पारिजातः॥ ३६॥ मध्यांतसौख्यः क्षितिपालवंद्यो युद्धप्रियो वारणवाजियुक्तः ॥ स्वकर्मधर्माभिरतो दयालुर्योगो नृपः स्याद्यदि पारिजातः ॥ ३७ ॥

अथ कलानिधियोगमाह ।

द्वितीये पंचमे जीवे बुधशुक्रयुतेक्षिते ॥ क्षेत्रे तयोर्वा संप्राप्ते योगः स्यात्स कलानिधिः ॥॥ ३८ ॥ कामी कलानिधिभवः सुगुणाभिरामः संस्तूयमानचरणो नरपालमुख्यैः ॥ सेनातुरंगमदवारणशंखभेरीवाद्यान्वितो विगतरोगभयारिसंघः ॥ ३९ ॥

अथ पारिजातादियोगानाह ।

स पारिजातद्युचरः सुखानि नीरोगतामुत्तमवर्गयातः ॥ सगोपुरांशे यदि गोधनानि सिंहासनस्थः कुरुते विभूतिम् ॥४०॥ करोति पारावतभागयुक्तो विद्या यशः श्रीविपुलं नराणाम् ॥ स देवलोके बहुयानसेनामैरावतस्थो यदि भूपतित्वम् ॥ ४१॥

अथ लग्नाधियोगमाह ।

लग्नाच्च दाराष्टमगेहसंस्थैः शुभैर्न पापग्रहयोगदृष्टैः ॥ लग्नाधियोगो भवति प्रसिद्धः पापैः सुखस्थानविवर्जितैश्च ॥ ४२ ॥ लग्नाधियोगे बहुशास्त्रकर्ता विद्याविनीतश्च बलाधिकारी ॥ मुख्यस्तु निष्कापटिको महात्मा लोके यशोवित्तगुणाधिकः स्यात् ॥ ४३ ॥

अथ चंद्रयोगादीनाह ।

सहस्ररश्मितश्चंद्रे कंटकादिगते सति ॥ न्यूनमध्यवरिष्ठानि धनधीनैपुणानि च ॥ ४४ ॥ स्वांशोधिमित्रस्यांशे वा स्थिते वा दिवसे शशी ॥ गुरुणा दृश्यते तत्र जातो वित्तसुखान्वितः ॥ ४५ ॥ स्वाधिमित्रांशगश्चंद्रो दृष्टो दानवमंत्रिणा ॥ निशासु कुरुते लक्ष्मीं छत्रध्वजसमाकुलाम् ॥ विपर्ययस्थे शीतांशो जायंतेऽल्पधना नराः ॥ ४६ ॥

अथाऽधियोगमाह ।

शशिनः सौम्याः षष्ठे द्यूने वा निधनसंस्थिता वा स्युः ॥ स्यादधियोगे जाताः सौम्यैः सबलैर्धराधीशः ॥ मध्यबलैर्मंत्री स्यादधमबलैः सैन्यनायकः स स्यात् ॥ ४७ ॥ चंद्राद्वृद्धिगतैः सौम्यो धर्मशीलो महाधनी ॥ द्वाभ्यां समोल्पवसुमानेकेन परिकीर्तितः ॥ चंद्राल्लग्नाद्ग्रहाभावे दरिद्रो दुःखितो भवेत् ॥ ४८ ॥

अथ सुनफाऽनफादुरधराकेमद्रुमयोगानाह ।

शीतांशोर्द्रविणस्थितैश्च सुनफायोगोऽनफांत्यस्थितैः स्वांत्यस्थैः खचरैर्भवेद्दुरधरा पंकेरुहेशोऽज्झितैः ॥ चेद्वित्तव्ययगा न चेद्दिविचराः केमद्रुमः स्यात्तदा प्राचीनैर्मुनिभिः स्मृताः श्रुतिमिता योगाः शशांकोद्भवाः ॥ ४९ ॥

अथ सुनफायोगफलमाह ।

भूमीपतेश्च सचिवः सुकृती कृती च नूनं भवेन्निजभुजार्जितवित्तयुक्तः ॥ ख्यातः सदाखिलजनेषु विशालकीर्त्या बुद्ध्याधिकश्च मनुजः सुनफाभिधाने ॥ ५० ॥

अथाऽनफायोगफलमाह ।

प्रभुर्विनीतः शुभवाग्विलासः सच्छीलशाली गुणपूर्तियुक्तः ॥ उदारकीर्तिः स्मरतुष्टचित्तो नित्यं नरः स्यादनफाभिधाने ॥ ५१ ॥

अथ दुरधरायोगफलमाह ।

सद्वित्तसद्वारणवाहधात्रीसौख्याभियुक्तः सततं हतारिः ॥ कांतासुनेत्रांचललालसः स्याद्योगे सदा दौरधरे मनुष्यः ॥ ५२ ॥

अथ केमद्रुमफलमाह ।

सद्वित्तसूनुवनितात्मजनैर्विहीनः प्रेष्यो भवेत्तु मनुजो हि विदेशवासी ॥ नित्यं विरुद्धाधिषणो मलिनः कुवेषः केमद्रुमे च मनुजाधिपतेः सुतोऽपि ॥ ५३ ॥

अथ केमद्रुमभंगमाह ।

चंद्रचतुर्थैः सुनफा दशमास्थितैः कीर्तितोऽनफा विहगैः ॥ उभयस्थितैर्दुरधराकेमद्रुमसंज्ञितोन्यथा योगः ॥५४॥ यद्राशिसंज्ञे शीतांशुर्नवांशे जन्मनि स्थितः ॥ तद्द्वितीयस्थितैर्योगः सुनफाख्यः प्रकी-

तितः ॥ ५५ ॥ द्वादशैरनफा ज्ञेयो ग्रहैर्द्विर्द्वादशास्थितैः ॥ प्रोक्तो दुरधरायोगोऽन्यथा केमद्रुमो मतः ॥ ५६ ॥ प्रालेयांशुः सूतिकाले यदा वा सर्वैः खेटैर्वीक्ष्यमाणः करोति ॥ दीर्घायुष्यं राजयोगं मनुष्यं सत्कोशाढ्यं हंति केमद्रुमे च ॥ ५७ ॥ सर्वे खेटाः केन्द्रतुर्येषु संस्था दुष्टो योगश्चापि केमद्रुमोऽयम् ॥ दुष्टं सर्वं स्वं फलं संविहाय कुर्युः पुंसां सत्फलं वै विचित्रम् ॥ ५८ ॥ सर्वेषु चंद्रयोगेषु चेदं यत्नाद्विचिंतयेत् ॥ केमद्रुमादिका योगाः संभवेऽस्य लयं ययुः ॥ ५९ ॥

अथ रवियोगानाह ।

वेसिश्चांत्यगतैर्ग्रहैर्द्रविणगैर्वोशिः शशांकोज्झितैर्भानोस्तूभयगैस्तदोभयचरीयोगः स्मृतः प्राक्तनैः ॥ किंचित्तद्वचनेषु नैव नियमोऽवश्यं नरश्चानृतोऽत्यंते कष्टकरो नरश्च मृदुदृक् स्याद्वेसियोगोद्भवः ॥ ६० ॥

अथ वेसियोगफलम् ।

तिर्यग्दृष्टिः सत्त्वसत्यानुकंपी मर्त्योऽत्यर्थं दीर्घकायोऽलसश्च ॥ सूतौ यस्य स्याद्यदा वेसियोगस्त्वल्पद्रव्यो वाग्विलासाधिशाली ६१

अथोभयचरीफलमाह ।

यस्य स्याज्जनने किलोभयचरीयोगस्य चेत्संभवः सोत्यंतं समवायवानपि तदा मर्त्यो भवेत्सद्यशः ॥ नात्युच्चः प्रबलामलाऽब्धितनयायुक्तः समृद्धः सदा ह्यत्यर्थं स्थिरमानसः सरलदृक् सर्वं सहः सन्मातिः ॥ ६२ ॥

अथ पुरुषस्त्रीनपुंसकजन्मज्ञानमाह ।

बलाबलं विलोक्यैषां ग्रहाणां योगकारिणाम् ॥ ६३ ॥ स्त्रीपुंसनिर्णयः क्लीबयोगास्तु तदसंभवाः ॥ ६४ ॥ ओजभे च विषमांशकोपगैर्लग्नचंद्रगुरुभास्करैर्नरः ॥ स्यात्तथापि समभे समांशगैः स्त्रीनि-

षेकसमये प्रसूतिषु ॥ ६५ ॥ लग्नं त्यक्त्वा च विषमे पुत्रदो भास्करात्मजः ॥ समे कन्याप्रदः प्रोक्तो नान्यग्रहनिरीक्षितः ॥ ६६ ॥

अथ षट्क्लीबयोगानाह ।

अन्योन्यं रविशशिनौ विषमाविषमर्क्षगौ निरीक्ष्येते ॥ इंदुजरविपुत्रौ वा तथैव हि नपुंसकं कुरुतः ॥ ६७ ॥ वक्रो विषमे सूर्यः समगश्चैवं परस्परालोकात् ॥ विषमर्क्षे लग्नेंदुसमराशिगः कुजोऽवलोकयति ॥ ६८ ॥ बुधचंद्रौ कुजदृष्टौ विषमर्क्षसमर्क्षगौ तथैवोक्तौ ॥ ओजनवांशकसंस्था लग्नेन्दुसितास्तथैवोक्ताः ॥ ६९ ॥

अथ प्राणिनां वृत्तिनिर्णयमाह ।

अर्थाप्तिं कथयेद्विलग्नशशिनौ प्राबल्यतः खेचरैर्मानस्थैः पितृमातृशत्रुससुहृद्भ्रात्रादिभिः स्याद्धनम् । भृत्याद्वा दिननाथलग्नशशिनां मध्ये बली यस्ततः कर्मेशस्थनवांशराशिपवशाद्वृत्तिं जगुस्तद्विदः ॥ ७० ॥ भैषज्यचामीकरतोयपानपण्येन मुक्तामणिविप्रलंभात् ॥ अन्योऽन्यदूतागमवृत्तिमार्गाज्जिवत्यसौ वासरनायकांशे ॥ ७१ ॥ मंत्रोपदेशरसवादविनोदमार्गैर्वृत्तिं जगुः सकलशास्त्रपुराणमार्गैः ॥ ज्ञानोपदेशपाथिभिः क्षितिपालपूज्यो जीवत्यसौ खलु पुमान्दिननाथकांशे ॥ ७२ ॥ जलोद्भवानां क्रयविक्रयेण कृषेश्च मृद्वादविनोदमार्गात् ॥ राजांगनासंशयवृत्तिरूपान्निशाकरांशे वसनक्रयाद्वा ॥ ७३ ॥ धातोर्विवादेन रणप्रहारात्स्तब्धाग्निवादात्कलहप्रवृत्त्या ॥ जीवत्यसौ साहसमार्गरूपया धरासुतांशे यदि चौरवृत्त्या ॥ ७४ ॥ शिल्पादिकाव्यागमशास्त्रमार्गाज्ज्योतिर्गणज्ञानवशाद्बुधांशे ॥ वेदार्थवेदाध्ययनाज्जपाच्च पुरोहितव्याजवशात्प्रवृत्तिः ॥ ७५ ॥ जीवांशके भूसुरदेवतानामुपासकाध्यापकमार्गरूपात् ॥ पुराणशास्त्रागमनीतिमार्गाद्धर्मोपदेशेन कुसीदमाहुः ॥ ७६ ॥ सुवर्णमाणिक्यगजाश्वमूलाद्गवां क्रयाज्जीवनमाहुरार्याः ॥ गुडोदनक्षीरदधिक्रयेण स्त्रीणां प्रलोभेन

भृगोः सुतांशे ॥ ७७ ॥ शन्यंशके कुत्सितमार्गवृत्त्या शिल्पादिभिर्दारुमयैर्वधाद्यैः ॥ विन्यस्तभाराज्जनविप्रलंभादन्योन्यवैरोद्भवमूलमार्गात् ॥ ७८ ॥ स्वक्षेत्रे स्वनवांशके सुहृदि वा स्वात्युच्चभागे यदा स्वद्रेष्काणचतुष्टयेषु सहिता मूलत्रिकोणेषु वा ॥ तत्तत्कालबलान्वितास्तु खचरा वगोत्तमांशेऽपि वा ते सर्वे शुभदा भवंति हि तदा स्वांतर्दशादावपि ॥ ७९ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे बहुयोगफलकथनं
नाम द्वाविंशोऽध्यायः ॥ २२ ॥

अथ मारकभेदाध्यायः ।

त्रिविधाश्चायुषो योगाः स्वल्पायुर्मध्यमोत्तमाः ॥ द्वात्रिंशात्पूर्वमल्पायुर्मध्यमायुस्ततो भवेत् ॥ चतुःषष्ट्याः पुरस्तात्तु ततो दीर्घमुदाहृतम् ॥ १ ॥ उत्तमायुः शतादूर्ध्वं ज्ञातव्यं मुनिसत्तम ॥ चतुर्विंशतिवर्षाणामायुर्ज्ञातुं न शक्यते ॥ २ ॥ जपहोमचिकित्साद्यैर्बालरक्षां तु कारयेत् ॥ पित्रोर्दोषैर्मृताः केचित्केचिन्मातृग्रहैरपि ॥ ३ ॥ अपरेऽरिष्टयोगाच्च त्रिविधा बालमृत्यवः ॥ अल्पायुर्योगजातस्य विपत्तारां मृतिं वदेत् ॥ ४ ॥ जातस्य मध्यमे योगे प्रत्यारिस्तु मृतिर्भवेत् ॥ दीर्घायुर्योगजातानां वधभे तु मृतिर्भवत् ॥ ५ ॥ त्रिषु योगेषु सर्वेषु प्रत्येकं त्रिविधं भवेत् ॥ ६ ॥ अल्पायुरल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् ॥ मध्यमादल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् ॥ ७ ॥ दीर्घायुषोल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् ॥ एवं बहुविधः प्रोक्त आयुषस्तु विनिर्णयः ॥ ८ ॥ अष्टमर्क्षं तृतीयं च लग्नादायुरुदाहृतम् ॥ द्वितीयं सप्तमस्थानं मारकस्थानमुच्यते ॥ ९ ॥ लग्नेशरंध्रपत्योश्च लग्नेन्द्वोर्लग्नहोरयोः ॥ पूर्वाण्येवं प्रयुंजीयात्संवादादायुषां त्रये ॥ १० ॥ चरे चरस्थिरद्वंद्वाः स्थिरे द्वंद्वचरस्थिराः ॥ द्वंद्वे स्थिरोभयचरा दीर्घमध्याल्पकायुषः ॥ ११ ॥

टीका ।

चरेति चरराश्योर्यदि लग्नेशाष्टमेशौ भवतस्तदा दीर्घमायुः स्थिरद्विःस्वभावयोर्वा लग्नेशाष्टमेशौ यदि तदापि दीर्घायुः । चरस्थिरयोर्यदि लग्नेशाष्टमेशौ तदा मध्यमायुः स्थिरद्विःस्वभावयोर्यदि लग्नेशाष्टमेशौ तदापि मध्यमायुः । स्थिरयोर्यदि लग्नेशाष्टमेशौ तदाऽल्पायुः चरद्विःस्वभावयोर्यदि लग्नेशाष्टमेशौ तदाल्पायुः एवं मंदचंद्राभ्यां लग्नहोराभ्यां निश्चितमिति ॥ ११ ॥

अल्पमध्यमपूर्णायुः प्रमाणमिह योगजम् ॥ विज्ञाय प्रथमं पुंसां ततो मारकचिन्तनम् ॥ १२ ॥ वृश्चिके मकरे जन्म नृणां राहुर्मृतिप्रदः ॥ ग्रहस्थितावंशभेदे शनिः स्यान्मारको ध्रुवम् ॥ १३ ॥ महामारकसंज्ञौ तौ मांदिकेतू इति स्मृतौ ॥ जायाकुटुंबकाधीशौ मारकावष्टमेश्वरौ ॥ १४ ॥ प्रायेण मारको राशिदशास्वत्राविशेषतः ॥ षष्ठभे पापभूयिष्ठे षष्ठेशो मुख्यमारकः ॥ १५ ॥ षष्ठत्रिकोणगो वापि मुख्यमारक इष्यते ॥ मध्यायुषि मृतिः षष्ठदशायामष्टमस्य वा ॥ १६ ॥ षष्ठात्रिकोणस्य पुनर्दीर्घाल्पविषयो भवेत् ॥ षष्ठे बलयुते तस्य त्रिकोणे मृतिमादिशेत् ॥ १७ ॥ षष्ठेशश्चेद्बलाढ्यः स्यात्तत्त्रिकोणे मृतिं वदेत् ॥ व्यवस्थेयं समस्तापि कारकादिदशास्वतु ॥ १८ ॥ चरे चरस्थिरद्वंद्वा इति यो राशिरागतः ॥ स एव मारको राशिर्भवतीति विनिर्णयः ॥ १९ ॥ मारकेशदशाकाले मारकस्थस्य पापिनः ॥ पाके पाकयुजां पाके संभवे निधनं दिशेत् ॥ २० ॥ असंभवे व्ययाधीशदशायां मरणं नृणाम् ॥ अभावे व्ययभावेशसंबंधिग्रहभुक्तिषु ॥ २१ ॥ तदभावेऽष्टमेशस्य दशायां निधनं पुनः ॥ मंदश्चेत्पापसंयुक्तो मारकग्रहयोगतः ॥ २२ ॥ तिरस्कृत्य ग्रहान्सर्वान्निहंता पापकृच्छ्रदः ॥ २३ ॥ मारकग्रहसंबंधी पापकर्ता शनिस्तदा ॥ तिरस्कृत्य ग्रहान्सर्वान्निहंता भवति ध्रुवम् ॥ २४ ॥

एतद्दशांतभुक्त्यादौ विचार्यैव मृतिं वदेत् ॥ षष्ठद्रेष्काणपश्चैव
तथा वै नाशकाधिपः ॥ २५ ॥ विपत्ताराप्रत्यरीशौ वधभेशस्तथैव
च ॥ आद्यंतपौ च विज्ञेयौ चंद्राक्रांतग्रहाधिपः ॥ २६ ॥
दशाक्षिप्तेषु कालेषु मारको मरणप्रदः ॥ दुष्टतारापतेः पाके निर्याणं
कथितं बुधैः ॥ २७ ॥ चेदंगपो यदि गृहेह्यरिरेव हीनं पूर्णं सुहृद्यतिसमः
सममायुराहुः ॥ वा लग्नपो हितसमारिपदेऽपि पूर्णं मध्यं च
हीनमिह जातकतत्त्वविज्ञाः ॥ २८ ॥ अधुना संप्रवक्ष्यामि मारकाख्यं
ग्रहं द्विज ॥ तस्मात्फलप्रभेदेन कथयामि तवाग्रतः ॥ २९ ॥
स्वात्मकारकलग्नाच्च चिंतयेद्द्विजसत्तम ॥ भ्रातृषष्ठाष्टमं रिष्फं धनं
द्यूनांतरेष्वपि ॥ ३० ॥ सर्वेषां बलवान्खेटो मारको ग्रह उच्यते ॥
सर्वैर्बलसमानत्वे मारकः संज्ञको ग्रहः ॥ ३१ ॥ षष्ठाधिपस्तु प्रायेण
बहुधा मारकः स्मृतः ॥ तेषां मध्येधिकारी च षष्ठेशो मुख्यमारकः ३२॥
मारकग्रहाश्रितो राशिर्मारकस्वामिनोऽथवा ॥ ताभ्यां महादशाकाले
विंशोत्तर्याः स्थिरादिकः ॥ ३३ ॥ पापे मृत्युर्विजानीयान्निर्विशंकं
द्विजोत्तम ॥ मारका बहवः खेटा यदि वीर्यसमन्विताः ॥ ३४ ॥
तत्तद्दशांतरे विप्ररोगकष्टादिसंभवः ॥ षष्ठाधिपदशायां च निधनं
भवति ध्रुवम् ॥ ३५ ॥ न्यूनातिरिक्तभेदेन बहुखेटास्तु मारकाः ॥
दुर्बला श्रयराशीशदशास्वल्पार्तिदा भवेत् ॥ ३६ ॥ प्रबलस्य
दशायां च महारोगार्तिमृत्युवत् ॥ भयशोकमृताद्भीतिस्तस्कराग्निभयं
भवेत् ॥ ३७ ॥ मारकस्य दशायां च महत्या निधनाश्रयी ॥ भूतामंतर्दशामाह
तवाग्रे कथयामि भोः ॥ ३८ ॥ मारकग्रहाश्रयीभूतमहापाके
विचिंतयेत् ॥ कारकाच्च विलग्नाद्वा सप्तमाद्वा द्वितीयकम् ३९॥
षष्ठाष्टारिःफनाथानामपहाराष्टके मृतिः ॥ तेषामंतर्दशाधीशास्तेषां
मध्ये बलाढ्यकः ॥ ४० ॥ तदीयांतर्दशाकाले निधनं
भवति ध्रुवम् ॥ अपरा पापकाले तु रोगदुःखार्तिवान्द्विज ॥ ४१ ॥
बालिशुक्रस्य च शनेर्ग्राह्यं षष्ठाष्टमादिकम् ॥ द्वितीयद्यूननाथेन ज्ञेयं

चैवोत्तरोत्तरम् ॥ ४२ ॥ लग्नसप्तमयोर्मध्ये बलवांस्तद्विधीयते ॥
षष्ठाष्टमेशौ द्वौ मुख्यौ स्वं व्ययेशमुपलक्षणम् ॥ ४३ ॥ द्वाभ्यांमध्ये
ह्यभिप्रायः अष्टमेशो हि मारकः ॥ षष्ठस्थे पापबाहुल्ये षष्ठेशो
मुख्यमारकः ॥ ४४ ॥ मध्यायुषि समायोगे चिंतयेद्द्विजसत्तम ॥
षष्ठेशाश्रयराशीशदशायां निधनं भवेत् ॥ ४५ ॥ षष्ठात्षष्ठेतराद्वापि
त्रिकोणगोपि मारकः ॥ दीर्घायुषोहि योगेन चिंतनीयं द्विजोत्तम
॥ ४६ ॥ षष्ठस्य वा तदीशस्य त्रिकोणे संस्थितो ग्रहः ॥ तस्याश्रितस्वामिराशेर्दशायां
निधनं ध्रुवम् ॥ ४७ ॥ षष्ठे बलवति विप्र
तत्त्रिकोणे विचिंतयेत् ॥ तदीशे वा त्रिकोणेषु प्रायेणापि मृतिं
वदेत् ॥ ४८ ॥ राहुराशिस्तमोवेशाद्बलवान्मारकः स्मृतः ॥ लग्नरंध्रद्वयं
मध्ये नाश्रयीभूतमस्ति चेत् ॥ ४९ ॥ स राशिर्मारको ज्ञेयो
ग्रहरीत्या विचिंतयेत्॥तत्तद्राशिदशायां तु तदीशाश्रयराशि च ॥ ५० ॥
दशायां निधनं वाच्यं पुरा शंभुप्रणोदितम् ॥ अपरे तु चरेत्यादि
पूर्ववत्तत्समाप्य च ॥ ५१ ॥ यो राशिः स तु विज्ञेयो मारकश्चेति
संमतः ॥ तद्दशायां च निधनं निर्विशंकं द्विजोत्तम ॥ ५२ ॥ अत्राध्यायेच
सर्वेषां ये योगा गदिता मया ॥ तेषां सर्वं समालोच्य जातस्य
च मृतिं वदेत् ॥ ५३ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे
मारकभेदकथनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

अथायुर्दायाध्यायप्रारंभः ।

मैत्रेय उवाच ।

कर्मवेत्ता महाभाग आयुर्दागहने गतिः ॥ निर्विशंकं ममाग्रे च
कथयस्व कृपानिधे ॥ १ ॥

पराशर उवाच ।

अधुना संप्रवक्ष्यामि आयुर्दायां गतिं तव ॥ यस्या विज्ञानमात्रेण
कालज्ञो भवति ध्रुवम ॥ २ ॥ लग्नेशाष्टमनाथाभ्यामायुर्दायं विचिंत-

येत् ॥ दीर्घमध्याल्पयोगत्वं यथावद्वदतो मम ॥ ३ ॥ चरेऽचरे स्थिते द्वौ च लग्नरंध्राधिपौ यदि ॥ पूर्णायुर्योगो विज्ञेयो निर्विशंकं द्विजोत्तम ॥ ४ ॥ स्थिरर्क्षे लग्ननाथो हि लयेशो द्वंद्वभे स्थिते ॥ तदायुः पूर्णयोगश्च सभवेद्गणिताग्रणीः ॥ ५ ॥ तन्वधीशे स्थिते द्वंद्वे स्थिरे स्थिते लयाधिपे ॥ पूर्णायुर्योगो विज्ञेयो निर्विशंकं द्विजोत्तम ॥ ६ ॥ अथातः संप्रवक्ष्यामि मध्यायुर्योगमुत्तमम् ॥ चरे लग्नाधिपे विप्र स्थिरे रंध्रपतिर्यदि ॥ ७ ॥ तदा मध्यायुषं विंद्याद् द्वौ द्वंद्वे मध्यमायुषः ॥ अधुनाल्पायुर्योगं च तवाग्रे कथयाम्यहम् ॥ ८ ॥ अंगाधीशश्चरे यस्य द्वंद्वभे रंध्रनायके ॥ तस्याल्पायुर्महाप्राज्ञ निर्विशंकं द्विजोत्तम ॥ ९ ॥ स्थिरेऽस्थिरे स्थिते द्वौ च लग्नरंध्राधिपौ द्विज ॥ स्वल्पायुस्तत्र विज्ञेयं सृष्टिकर्त्रा प्रणोदितम् ॥ १० ॥ पूर्ववत्तनुचंद्राभ्यामायुर्योगं विचिंतयेत् ॥ जन्मेंदौ वा स्थिते द्यूने चान्यस्थे मंदचंद्रयोः ॥ ११ ॥ त्रिधा योगः समः प्रोक्तश्चिंतयेद्गणिताग्रणीः ॥ एकरूपास्त्रयो योगा आयुषि सुविचिंतयेत् ॥ १२ ॥ एकरूपत्वयोगौ द्वौ तृतीयो भिन्नरूपक ॥ द्वयोर्योगेन संग्राह्यं न ग्राह्यं चैकरूपतः १३ योगत्रयं त्रयं रूपं भिन्नं भिन्नं भवेद्द्विज ॥ होरालग्नविलग्नाभ्यां प्राप्तायुर्योगनिश्चितम् ॥ १४ ॥ लग्नेशादष्टमेशाच्च योगैकः कथितो द्विज ॥ होरालग्नाभ्यां द्वितीयं योगमेवं विचिंतयेत् ॥ १५ ॥ तृतीयं शनिचंद्राभ्यां चिंतनीयं सदा द्विज ॥ लग्नेंदुमदने वापि चिंतयेल्लग्नचंद्रतः ॥ १६ ॥ यंत्रोद्धारमहं वक्ष्ये शृणु त्वं तं द्विजोत्तम ॥ चतूरेखालिखेत्तिर्यक् चतुरूर्ध्वं लिखेत्पुनः ॥ १७ ॥ नव कोष्ठे त्रयो योगा दीर्घमल्पाल्पमायुषि॥ आद्यत्रये चरं लेख्यं तदधस्थे क्रमेण च॥ १८॥ चरं स्थिरं द्विःस्वभावं संलिखेद्द्विजसत्तम ॥ मध्ये स्थिरत्रयं कोष्ठे तदधो द्विःस्वभावतः ॥ १९ ॥ द्वंद्वं चरं स्थिरं लेख्यं निर्विशंकं द्विजोत्तम ॥ अंतत्रये द्विःस्वभावं तदधः स्थिरमादिशेत् ॥ २० ॥ स्थिरं द्वंद्वं चरं विप्र क्रमेण संलिखेत्सुधीः ॥ तिर्यक्कोष्ठानुसारेण

दीर्घमध्याल्पमायुषि ॥ २१ ॥ एवं पंक्तित्रये विप्र आदौ पंक्तित्रयेण च ॥ चराधः स्थिरपंक्तिश्च स्थिरपंक्तिरथोभयम् ॥ २२ ॥ चतुरस्रं लिखेद्यंत्रं नवकोष्ठांतरे द्विज ॥ प्रथमांकेन संलेख्यमूर्ध्वकोष्ठत्रयात्मके ॥ २३ ॥ तिर्यक्पंक्तौ च द्वित्रीणि तिर्यक्पंक्तित्रयेष्वपि ॥ तदधोप्यूर्ध्वपंक्तौ च लिखेदेकं त्रयं द्वयम् ॥ २४ ॥ मध्यपंक्त्यूर्ध्वं संलेख्यं द्वयं चैकं त्रयं पुनः ॥ अंतपंक्त्यूर्ध्वके लेख्यं त्रयं द्वैकं द्विजोत्तम ॥ २५ ॥ एवं क्रमेण वै विप्र प्रतिकोष्ठत्रिपंक्तिषु ॥ दीर्घमध्याल्पआयुष्याद्विज्ञेयानि भवंति हि ॥ २६ ॥ अधरोत्तरक्रमेणैव वामभागत्रिकोष्ठके ॥ दीर्घायुश्च विजानीयान्निर्विशंकं द्विजोत्तम ॥ २७ ॥ मध्यकोष्ठत्रयं मध्यं दक्षिणकोष्ठत्रयेल्पकम् ॥ सप्तविंशतिका भेदा भाषिता द्विजसत्तम ॥.२८ ॥ लग्नाष्टमेशयोर्विप्र दीर्घादौ च त्रयं त्रयम् ॥ नवकोष्ठं विजानीयादायुः साधनहेतवे ॥ २९ ॥ तदैव संविजानीयात्कोष्ठांकलग्नचंद्रयोः ॥ नव कोष्ठा महाप्राज्ञ विज्ञेया लग्नहोरयो ॥ ३० ॥ एवं चरादिराशीनां भेदेनापि पृथक्पृथक् ॥ नानाभेदादिसंयुक्ते तवाग्रे कथयाम्यहम् ॥ ३१ ॥

अथ दीर्घाद्यनेकभेदानामायुश्चक्रम् ।

दीर्घायुः चरः १ लग्नेशः चरः १ अष्टमेशः	मध्यायुः चरः १ लग्नेशः स्थिरः २ अष्टमेशः	अल्पायुः चरः १ लग्नेशः द्विःस्वभावः ३ अष्टमेशः
दीर्घायु' स्थिरः २ लग्नेशः द्विःस्वभावः ३ अष्टमेशः	मध्यायुः स्थिरः २ लग्नेशः चरः १ अष्टमेशः	अल्पायुः स्थिरः २ लग्नेशः स्थिरः २ अष्टमेशः
दीर्घायुः द्विःस्वभावः ३ लग्नेशः स्थिरः २ अष्टमेशः	मध्यायुः द्विःस्वभावः ३ लग्नेशः द्विःस्वभावः ३ अष्टमेशः	अल्पायुः द्विःस्वभावः ३ लग्नेशः चरः १ अष्टमेशः

कदाचित्काश्चिद्भवति इत्युक्तं द्विजसत्तम ॥ लग्नाष्टमेशयोरेकत्वपरं लग्नचंद्रयोः ॥ ३२ ॥ विलग्नहोरयोरन्यदतिपक्षत्रयं द्विज ॥ तदेभिः प्रेत्य संवादादित्यादियोगसंकथम् ॥ ३३ ॥ दीर्घमध्याल्पभेदेषु चरेत्यादि निरूप्यते ॥ द्वात्रिंशच्च चतुःषष्टिं षण्णवति स्वरूपके ॥ ३४ ॥ षट्त्रिंशद्वा द्विसप्ताद्वे अष्टोत्तरशताब्दके ॥ चत्वारिंशत्तथाशीतिर्विंशोत्तरशतात्मके ॥ ३५ ॥ योगान्यग्रहमायुष्यं वा शेषेषु समानतः ॥ समागतेषु आयुर्दास्पष्टीकरणसंकथाम् ॥ ३६ ॥ पूर्णमादौ हानिरंतेऽनुपाते मध्यमो भवेत् ॥ राशिद्वयस्य योगार्द्धं वर्षाणां स्पष्टमुच्यते ॥ ३७ ॥ एवं द्विकानां संचिंत्य त्रयाणां योगविन्मते ॥ यत्रास्यायुर्यन्निर्णीतं योगजालेन यत्कृतम् ॥ ३८ ॥ तत्रायुर्दीर्घसंलब्धा सिद्धिमध्यावधिर्भवेत् ॥ निर्विशंकं महाप्राज्ञ स्फुटीपातानुपाततः ॥ ३९ ॥ लब्धाब्दमनुपातेन मध्यमध्येपि योजयेत् ॥ दीर्घायुषा विजानीयात्संस्फुटी चपलात्मका ॥ ४० ॥ मध्यमायुर्लभेत्तत्र अल्पायुः सिद्धिसंभवम् ॥ पूर्ववदनुपातेन यत्र युङ्मध्यमायुषि ॥ ४१ ॥ कदाचित्सर्वयोगेन अल्पायुः सममागते ॥ यत्र भावानुपातस्य तत्रैकः खंडः सिद्ध्याति ॥ ४२ ॥ खंडत्रयप्रयोगेण आयुर्दा कथिता मया ॥ द्वात्रिंशत्षष्ठत्रिंशाब्दा चत्वारिंशत्तमेद्विज ॥ ४३ ॥ किं ग्राह्यं कियतो ग्राह्यं कदाचिद्ग्राह्यमाणकः ॥ इति संशयनिवृत्त्यर्थं कथयामि पृथक् पृथक् ॥ ४४ ॥ लग्नेशाष्टमनाथाभ्यां तदायुर्योगसंभवः ॥ चत्वारिंशात्मकं खंडं संग्राह्यं द्विजसत्तम ॥ ४५ ॥ योगत्रयेषु चागत्य अल्पायुर्द्विजसत्तम ॥ द्वात्रिंशाब्दकखंडं च संज्ञेयं ब्रह्मणोदितम् ॥ ४६ ॥ कदाचिदनुपातेन युक्ते सिद्धिः प्रजायते ॥ दंताब्देन तु संदेहो रुद्रशूलं विचिंतयेत् ॥ ४७ ॥ अधुना संप्रवक्ष्यामि ह्यनुपातविधिं द्विज ॥ पृथक् स्पष्टं च संस्थाप्य विलग्नेशाष्टमेशयोः ॥ ४८ ॥ गतराशींस्त्यजेद्विप्र विद्यमानेन संगु-

गेत् ॥ त्रैराशिकैकखंडस्य यदाप्तं वर्षमादिशेत् ॥ ४९ ॥ लग्नेशस्याष्टमेशस्य आयुरागतयोर्द्विज ॥ वर्षादिपिंडयोर्योगं तदर्धं स्पष्टकारितम् ॥ ५० ॥ दीर्घमायुर्लभेद्विप्र द्विसप्ताब्देषु योजयेत् ॥ तदाचाशीतमे योज्यं दीर्घसंज्ञा स्फुटा भवेत् ॥ ५१ ॥ मध्यमायुषि यत्रैवं षट्त्रिंशन्नभवेद्‌यो: ॥ अनुपातेन चागत्य युक्तेऽब्दे मध्यमायुषि ॥ ५२ ॥ त्रैराशिकमहं वक्ष्ये तवाग्रे द्विजसत्तम ॥ प्रमाणमिच्छातुल्यं च स्थाप्यमाद्यं तयोर्द्वयोः ॥ ५३ ॥ मध्ये फलेन्यजाती च संगुणेदिच्छया द्विज ॥ प्रमाणासंस्फुटफलं तस्याख्यमनुपातकम् ॥ ५४ ॥ दीर्घमध्यायुषोर्विप्र अनुपातान्नियोजयेत् ॥ अल्पायुषि यदा लब्धमभावमनुपातकम् ॥ ५५ ॥ प्रवर्तमानमायुः स्याज्जन्मप्रभृतिचैव हि ॥ विलग्नहोरयोरेवं तदेवं लग्नचंद्रयोः ॥ ५६ ॥ समागतायुषस्तस्याश्चांतखंडे स्फुटीकृतम् ॥ सर्वयोगेषु वै विप्र संस्कारमनुपाततः ॥ ५७ ॥होरालग्नादिमांशे तु पूर्णमंते च किंचन ॥ स्पष्टीकरणमेतत्स्याद्दीर्घमध्याल्पकायुषि ॥ ५८ ॥ होरालग्नं स्फुटीकृत्य विकलादि द्विजोत्तम ॥ तस्य त्रैराशिकं स्पष्टं पूर्ववद्योजयेत्पुनः ॥ ॥ ५९ ॥ अंतखंडेषु संयोज्यमायुषो निर्णयो भवेत् ॥ द्विसार्धघटिकामध्ये त्रिंशदंशस्फुटी द्विज ॥ ६० ॥ आनीय पूर्वरीत्याब्दात्सूर्यराशेश्च लग्नभात् ॥ पूर्वाध्यायेऽप्यहं वक्ष्ये तवाग्रे द्विजसत्तम ॥ ॥ ६१ ॥ अधुना संप्रवक्ष्यामि आयुःसाधनहेतवे ॥ कक्ष्याह्रासं तथा वृद्धिः शनियोगेन वै द्विज ॥ ६२ ॥ लग्नाधीशः शनियुतो होराधीशो यथा द्विज ॥ ६३ ॥ कक्ष्याह्रासो भवेत्तत्र यत्र सौरिश्च निर्बलः ॥ ६४ ॥ आयुर्दायसमापन्ने कक्ष्यात्रयमिहोच्यते ॥ दीर्घमध्याल्परूपं चेत्तत्प्रमाणं वदाम्यहम् ॥ ६५ ॥ षट्त्रिंशेऽब्देन कक्ष्यैका तस्या ह्रानिः प्रजायते ॥ मध्यमायुर्भवेत्तत्र निर्विंशकं द्विजोत्तम ॥ ६६ ॥ मध्यमायुः समागत्य स्वल्पायुर्जायते ध्रुवम् ॥

योगेल्पायुः समायातः शनिर्योगं करोत्यपि ॥ ६७ ॥ षट्त्रिंशाब्दश्च रूपेण कक्ष्याह्रासो भवेद्द्विज ॥ अत्यल्पायुर्विजानीयाद्बाल्ये च निधनं भवेत् ॥ ६८ ॥ अथ योगत्रये विप्र शनिर्योगं करोति च ॥ एकएकादशाह्रासः कक्ष्याह्रासस्त्रयं क्रमात् ॥ ६९ ॥ ततः फलविशेषार्थं गुणदोषौ वदाम्यहम् ॥ गुणैः प्रपूरितः सौरिः कक्ष्यावृद्धिं करोति च ॥ ७० ॥ दोषयुक्ता भवेद्धानिस्ताभ्यां निर्णय उच्यते ॥ स्वर्क्षतुंगादिगुणिभिर्युक्तो मार्तंडवंशज ॥ ७१ ॥ कक्ष्यावृद्धिकरो विप्र विभागेनायुर्वृद्धिकृत् ॥ अत्यल्पायुर्भवेदल्पमल्पान्मध्यं प्रजायते ॥ ७२ ॥ मध्यमाज्जायते दीर्घं कक्ष्यावृद्धेश्च लक्षणम् ॥ एवं नीचारिगः सौरिः पापदृष्टिसमन्वितः ॥ ७३ ॥ कक्ष्याह्रासकृते विप्र त्रिभागेनायुर्हानिकृत् ॥ वृद्धाद्भवति मध्यायुर्मध्यादल्पायुरेव च ॥ ७४ ॥ अल्पादत्यल्पकं याति बाल्ये निधनसंभवः ॥ लग्नेशे वापि होरेशे केवले शनिसंयुते ॥ ७५ ॥ पापर्क्षे पापयुक्ते वा पापदृष्टिसमन्विते ॥ कक्ष्याह्रासं न कुर्वीत विना नीचारिगे द्विज ॥ ७६ ॥ एवं तुंगादिरहितः कक्ष्यावृद्धिं न कारयेत् ॥ शुभर्क्षे शुभसंयुक्ते शुभदृष्टौ च तुंगगे ॥ ७७ ॥ पापयोगेन रहिते कक्ष्यावृद्धिकरः शनिः ॥ एवं नीचादिदोषेण कक्ष्याह्रासः प्रजायते ॥ ७८ ॥ साधारण्ये स्थिते युक्ते कष्टं चातितरां भवेत् ॥ अधुना संप्रवक्ष्यामि कक्ष्यावृद्धिद्वितीयकम् ॥ ७९ ॥ गुरुणा स्थानसंबंधे भविष्याति द्विजोत्तम ॥ लग्ने वा सप्तमे वापि तुंगादिगुणसंयुते ॥ ८० ॥ शुभर्क्षे शुभदृग्युक्ते कक्षावृद्धिकरे गुरौ ॥ जीवने संशयो यस्य अल्पायुर्वृद्धिकारकम् ॥ ८१ ॥ अल्पायुषि च मध्यायुर्मध्यात्ते दीर्घमायुषि ॥ एवं भेदानुभेदेन कथयामि तवाग्रतः ॥ ८२ ॥ अथायुर्बाधकं विप्र दर्शयामि तवाग्रतः ॥ दीर्घायुर्योगं संप्राप्य प्रकारशकलेष्वपि ॥ ८३ ॥ किं दशायां च

निधनमिति कर्तुमपेक्षया ॥ निर्णयं तस्य कुर्वीत तवाग्रे कथयाम्यहम् ॥ ८४ ॥ यस्य दीर्घायुषं लब्ध्वा पर्यंतं मध्यमायुषि ॥ निरपवादता ज्ञेया तदग्रे निधनमुच्यते ॥ ८५ ॥ मध्यमायुषः समायोगं लब्ध्वा पूर्वप्रकारतः ॥ निर्विंशंकालपपर्यंतं तदग्रे मृतिचिंतनम् ॥ ८६ ॥ योगेऽल्पायुः समागत्य स्वयं खंडे विचिंतयेत् ॥ किंस्विद्दशायां निधनं भविष्यति द्विजोत्तम ॥ ८७ ॥ दीर्घे द्विसप्ततिवर्षे तदूर्ध्वं चिंतयेन्मृतिम् ॥ षट्त्रिंशदब्दादूर्ध्वं च चिंतयेन्मध्यमायुषि ॥ ८८ ॥ अथ स्पष्टं प्रवक्ष्यामि मलिने द्वारबाह्ययोः ॥ नवांशे निधनं तस्य त्रिशूलिभाषितं पुरा ॥ ८९ ॥ द्वारद्वारेशयोर्विप्र मालिन्यं तन्नवांशके ॥ जातस्य हि भवेन्मृत्युः सत्यमेव न संशयः ॥ ९० ॥ पाकभोगद्वये विप्र चिंतनीयं प्रयत्नतः ॥ स्वयं पापः पापदृष्टे पापखेटसमन्विते ॥ तन्नवांशदशाकाले निधनं च भवेद्ध्रुवम् ॥ ९१ ॥ निर्विंशंकं महाप्राज्ञ तदंतरगते मृतिः ॥ ९२ ॥ द्वारे च बाह्यराशेर्वा नवांशे निधनं भवेत् ॥ पापयोगे नवांशेशात्तदंतर्गते द्विज ॥ ९३ ॥ यदा दशाप्रदो राशिः पापसंज्ञः प्रजायते ॥ लग्नाद्यावति यो दूरं तावद्दूरं विभोगकाः ॥ ९४ ॥ अधुना संप्रवक्ष्यामि नवांशकपदेन च ॥ प्रतिराशिनवांशेन नवाब्देन दशास्थिरम् ॥ ९५ ॥ विशेषरूपं मे प्रोक्तं नवाब्दाद्द्वारबाह्ययोः ॥ राशिसंबंधिनो ग्राह्याश्चरदशायां विचिंतयेत् ॥ ९६ ॥ भावानां स्पष्टकृत्यैवं द्वारबाह्यं विचिंतयेत् ॥ यद्भावस्पष्टता सग्रहनवांशेषु भो द्विज ॥९७॥ रीत्याब्दे च समानीते मरणं भवति ध्रुवम् ॥ एवं तन्वादयो भावाः स्पष्टीकार्या यथार्थतः ॥ ९८ ॥ ग्रहनवांशवैपरीत्याद्द्वादशानां नवांशके ॥ नवांशायुःसमानेन विशेषं च समादिशेत् ॥ ९९ ॥ एवं विचिंतयेद्विप्र द्वारबाह्यद्वयोरपि ॥ मलिनत्वमथैवेदं निधनं न तु कथ्यते ॥ १०० ॥ अन्ये नरस्य

मलिने सर्वत्रेति विचिंतयेत् ॥ पापराश्याक्रांतराशौ पाकांशे निधनं
द्विज ॥ १०१ ॥ एवं चरदशाकाले द्वारेशस्य मलिम्लुचे ॥
तदीशाश्रयराशेरप्यंशपाके भवेन्मृतिः ॥ १०२ ॥ एवं चरदशामध्ये
चिंत्यते द्वारबाह्ययोः ॥ त्रिकोणोत्तरदशाप्राप्ते निधनं जातकस्य
च ॥ १०३ ॥ अथ वा योगायुर्दायसमाप्तिसमयेष्वपि ॥
प्रोक्ते मृत्य्वाश्रयीभूते चिंतनीयं द्विजोत्तम ॥ १०४ ॥ खंडे वा यदि
पाकस्य बाह्यस्य मलिने यदि ॥ दशा न हि समाप्येत तत्त्रिकोणाब्दके
मृतिः ॥ १०५ ॥ अधुना संप्रवक्ष्यामि मृत्युयोगापवादकम्
॥ शुभदृष्ट्या शुभयोगे शुभखेचरसंयुते ॥ १०६ ॥ न च
द्वारे न बाह्ये च द्वारेशे चोपलक्षिते ॥ द्वारेशाश्रयनवांशे दशायां
निधनं भवेत् ॥ १०७ ॥ अथैव शुभदृग्योगाभावेष्वपि द्विजोत्तम
॥ नवांशकालेषु दशा ह्यपवादं वदाम्यहं ॥ १०८ ॥ लग्नेशे
तुंगगे विप्र यस्य जन्मनि जायते ॥ द्वारे द्वारेशबाह्यानां मालिन्येपि
यदा भवेत् ॥ शुभदृग्योगभावे च नवांशे निधनं भवेत्
॥ १०९ ॥ न तु मृत्युर्भवेत्तस्य नवाब्दाद्वृद्धिमादिशेत् ॥ ११० ॥
द्वारबाह्यनवांशे च दशान्तमपि च द्विज ॥ पुनर्नवाब्दपर्यन्तं द्वारबाह्यं
करोत्यपि ॥ १११ ॥ द्वितीयराशिसंबंधे नवाब्दे ग्रहरीतितः
॥ समागते तदाप्यायुर्वृद्धिर्भवति निश्चितम् ॥ ११२ ॥ वृद्धानंतर्यदा
मृत्युस्तस्य विश्वात्मकोऽच्युतः ॥ सर्वात्मना मृत्युयोगः शुभदृग्योगसंभवः
॥ ११३ ॥ लयेशे तुंगराशिस्थे इत्याकांक्षा द्विजोत्तम
॥ तस्या विनिर्णयं कर्तुं स्पष्टमुक्तेन भाषितम् ॥ ११४ ॥
यस्य वृद्धिकरे विप्र पदेशस्य दशांतरे ॥ निधनं च भवेत्तस्य निर्विशंकं
वदाम्यहम् ॥ ११५ ॥ पदेशस्य नवांशे वा लग्नाष्टमत्रिकोणगे
॥ दशायां निधनं तस्य यस्य वृद्धिपदं भवेत् ॥ ११६ ॥
यदि वृद्धाब्दमादाय निधनं न भवेत्कदा ॥ दशात्रयाणामंते तु

मृत्युर्भवति निश्चितम् ॥ ११७ ॥ पदेशस्य दशा तत्र लग्नारूढे पदस्य च ॥ रंध्रारूढे तदा ग्राह्यं तदीशस्य यदा द्विज ॥ ११८ ॥ तदाश्रये राशिदशा ग्राह्यमाणा द्विजोत्तम ॥ अत्र केवलखेटानां दशायां चिंतयेत्सुधीः ॥ ११९ ॥ यद्वा पदेशस्य दशा निसर्गबललक्षणा ॥ विंशोत्तरी दशा रीत्या दशा चाष्टोत्तरी मता ॥ १२० ॥ तदा पददशायां च निधनं गणिताग्रणीः ॥ अक्षपदं तदीशस्य पदशौचं तयोर्दशा ॥ १२१ ॥ नाथांतेन समारीत्या राशिखेटाद्वयोर्दशा ॥ निवर्तिता दशा विप्र तदैतेषु विचिंतयेत् ॥ १२२ ॥ चरपर्यादशारीत्या पदेशस्य दशांतरे ॥ अवश्यं निधनं तस्य निर्विशंकं द्विजोत्तम ॥ १२३ ॥ तथापदेशस्य च तात्रिकोणं चाथ भो द्विज ॥ नवांशकदशारीत्या समानीय दशांतरे ॥ १२४ ॥ पुनः पदत्रिकोणाभ्यामनंतरगते द्विज ॥ दशायां निधनं वाच्यं जातकस्य न संशयः ॥ १२५ ॥ नवांशकदशा प्रोक्ता द्विधा ग्राह्या द्विजोत्तम ॥ ताभ्यां लग्नाष्टमाधीशा अथ वा राशिकोणपाः ॥ १२६ ॥ दशायां निधनं वाच्यं त्रिशूलिभाषितं पुरा ॥ इत्येषां निधनं योगादवश्यं चिंतयेद्विज ॥ १२७ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे आयुर्दायकथनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

पराशर उवाच

अथातः संप्रवक्ष्यामि प्रकारं वै द्वितीयकम् ॥ यस्य विज्ञानमात्रेण आयुर्दासूचको भवेत् ॥ १ ॥ विलग्नात्मदशा विप्र अष्टमेशात्तयोर्द्वयोः ॥ मध्ये चैको बली चिंत्यः सोऽपि ह्यायुःप्रदो ग्रहः ॥ २ ॥ केंद्रादित्रिकयोगेन दीर्घमध्याल्पतायुषि ॥ सा विज्ञेया महाप्राज्ञ तवाग्रे प्रवदाम्यहम् ॥३॥ केंद्रे स्थितेऽपि दीर्घायुर्मध्यायुः पणफरे स्थिते ॥ आपोक्लिमे स्थिते स्वल्पमायुर्भवति निश्चितम् ॥ ४ ॥

कर्कलग्नेतु कुंडल्यां तदैवं चिंतयेद्द्विज ॥ लग्ने वा मदने वापि वाष्टमेशे तयोर्द्वयोः ॥ ५ ॥ ताभ्यां मध्ये बली चैकः स्थितः केंद्रादिपूर्ववत् ॥ दीर्घामध्याल्पभेदेन आयुर्निश्चित्य पूर्ववत् ॥ ६ ॥ पूर्ववद्द्वंद्वखंडस्य त्रैराशिकक्रमेण च ॥ आयुर्दाये कृते स्पष्टं प्रवक्ष्यामि इदं वचः ॥ ७ ॥ स्वस्मिन्समबले खेटेऽनाधिके च बले द्विज ॥ न वीर्यतायां दीर्घादि विपरितायुषी भवेत् ॥ ८ ॥ दीर्घमध्ये च वाल्पं च ह्यल्पं वा किंचिदेव च ॥ विपरीतं योगभंगे सत्यमेव न संशयः ॥ ९ ॥ सप्तमात्सप्तमे विप्र नवमे कारके स्थिते ॥ विपरीतं च दीर्घादि योगायुर्न तु संशयः ॥ १० ॥ अथाग्रेऽनेकभेदानामायुषो निर्णयः कृतः ॥ दीर्घादित्रयरूपेण इत्युक्तं ब्रह्मणोदितम् ॥ ११ ॥ जन्मलग्नाष्टमेशौ द्वौ चिंतयेज्जन्मपत्रके ॥ पंचमैकादशे विप्र दीर्घायुश्च प्रजायते ॥ १२ ॥ लाभे तृतीयगे मध्य आयुर्दायं विचिन्तयेत् ॥ लाभे वित्ते त्रिकोणे वा ह्यायुरल्पं भवेद्द्विज ॥ १३ ॥ गतायुर्लभगौ द्वौ च जातकोपि न जीवति ॥ एवं समस्तजन्तूनामीदृग्योगं विचितयेत् ॥ १४ ॥ क्षपाकरांशमारभ्य वारिभिश्च करादिभिः ॥ उदयादि विना गर्भिरायुर्लग्नं प्रकल्पयेत् ॥ १५ ॥ गणनायां च भावानामायात्यष्टविनाडिका ॥ त्रैराशिकक्रमेणैवं त्रिंशदंशं प्रकल्पयेत् ॥ १६ ॥ राश्यंशककलादीनां शुद्धस्पष्टं द्विजोतम ॥ कृतायुः स्पष्टलग्नस्य अवश्यांकामिदं मतम् ॥ १७ ॥ अथैव भिन्नमार्गेण आयुर्दायं निरूपितम् ॥ तनुतन्वीशतद्राशिपत्युर्भानां त्रिकोणके ॥ १८ ॥ अल्पमध्याचिरायुष्ये रूपवर्षप्रमाणतः ॥ अष्टमेशादियोगेन निर्याणं कारयेद् ग्रहः ॥ १९ ॥ लग्नत्रिकोणगेल्पायुर्लग्नेशस्य त्रिकोणगे ॥ मध्यमायुर्विजानीयान्निर्विशंके द्विजोत्तम ॥ २० ॥ लग्नेशात्स्वीयराशीशे त्रिकोणे रंध्रनायकं ॥ दीर्घायुषि प्रदातव्यं पुरा शंभुप्रणोदितम् ॥ २१ ॥ तेषां मध्ये त्रिकोणानां विभागे च नवं कथम् ॥ स्वल्पमध्याचिरायुष्यं

द्वादशाब्दाधिकेन च ॥ २२ ॥ अल्पायुषस्त्रयो भेदास्त्रयस्थाने पृथक् पृथक् ॥ विलग्नेशाष्टमेशादि लग्नस्थोपि द्विजोत्तम ॥ २३ ॥ द्वादशाष्ट भवेदायुश्चतुर्विंशतिपंचमे ॥ नवमे च षट्त्रिंशाब्दमित्येवं न तु संशयः ॥ २४ ॥ लग्नेशराशिकोणेषु लग्नरंध्राधिपादि चेत् ॥ तत्र स्थितेष्टवेदाब्दे षष्ट्यब्दं पंचमे स्थिते ॥ २५ ॥ नवमस्थे द्विसप्ताब्दं तन्नवकमिदं मतम् ॥ लग्नेशाश्रितराशीशे त्रिकोणेषु स्थिते द्विज ॥ २६ ॥ लग्नेशादष्टमेशादि त्रिभागं दीर्घमायुषि ॥ लग्नस्थे चतुरशीतिः पंचमे षट्नवांशके ॥ २७ ॥ नवमेष्टोत्तरशतं वर्णेष्वायुर्विनिर्णयः ॥ द्वादशाब्दानुपाते च ह्येतच्छंभुप्रणोदितम् ॥ २८ ॥ तुलामेषविलग्नेषु प्रायः शुक्रो भवेद्बली ॥ स दशादौ स्वरूपं स्यादंते च स्यात्स्वभावतः ॥ २९ ॥ पूर्वार्द्धं च स्पष्टदशा मेषस्यापि तुलस्य च ॥ चरपर्यासमानीते अब्दे चैकाब्दयोजिते ॥ ३० ॥ द्वादशाब्दाधिके कृत्वा पूर्वमायुः समागते ॥ नाथांताब्दसमूहे च मेलनीयं द्विजोत्तम ॥ ३१ ॥ तत्र चायं विभागश्च तवाग्रे कथितो द्विज ॥ लग्नेशादौ समारंभे प्रथमांशादिसंख्यया ॥ ३२ ॥ योजयेद्द्वादशाब्दं च ह्यायुः साधनहेतवे ॥ अंते त्रिंशत्तमांशांते लग्ने स्पष्टे सति द्विज ॥ ३३ ॥ स्वभावतद्भवाच्छून्ये द्वादशाब्दं तु योजयेत् ॥ मध्ये तथानुपाते च विधाय च यदागतम् ॥ ३४ ॥ तद्योजनं तु कर्तव्यं निर्विंशंकं स्वभावतः ॥ इत्येवं नाथांताब्दा ये स्वभावजा भवंति च ॥ ३५ ॥ नाधिके चैव नाब्देन शुक्रो लयास्थितो यदि ॥ भानुतष्टे च शून्याप्ते न युक्तं द्वादशात्मकः ॥ ३६ ॥ एकोष्टमेशः स्वोच्चस्थे पर्यायार्धं प्रयच्छति ॥ नात्रस्थो नाशयेत्पर्या ह्यधमायुषि निश्चितम् ॥ ॥ ३७ ॥ नीचरन्ध्रेशसंयुक्ताः पर्यायार्द्धं पृथक्पृथक् ॥ ग्रहा विनाशयंत्येव निर्णीते परमायुषि ॥ ३८ ॥ उच्चरंध्रेशसंयुक्ते ग्रहैः प्रत्येकमुन्नयेत् ॥ एकं हि मध्यपर्यायं परमायुर्विनिश्चितम् ॥ ३९ ॥ रविः

कुजः शनी राहुर्मरणे बलिनः क्रमात् ॥ विशेषदुर्बलं हित्वा गृह्णीया-
द्बलिनं सुधीः ॥ ४० ॥ केतुश्च शनिवन्मृत्युनाथनैमित्यमादिशेत् ॥
शनिना राहुणा वापि युक्ते सौम्ये रवीक्षिते ॥ पर्यायमेकं तन्मध्य
एकराशौ मृतिं वदेत् ॥ ४१ ॥ तयोस्तु शुभयोगेन तदाशामृति-
मादिशेत् ॥ ४२ ॥ भोगराशौ दुर्बले वा प्रबले वा ग्रहे स्थिते ॥
तथापि निर्दिशेत्काले मरणं तन्न संशयः ॥ ४३ ॥ केतौ चैवाव-
सानस्थे नाथे वाऽशुभवीक्षिते ॥ केतोर्दशान्ते मृत्युः स्याच्छुभदृष्टेन
किं च न ॥ ४४ ॥ तन्वधीशाष्टमेशाभ्यां योगेनायुः कृते द्विज ॥
अष्टमेशात्तदुच्चस्थे चर्पर्याब्दप्रमाणके ॥ ४५ ॥ अर्धाधिकाब्दं
दत्त्वैव योजयेत्पूर्वमायुषि ॥ एवं नाथांतरीत्या च चरपर्यातिरिक्तकः
॥ ४६ ॥ मर्यादयापि यद्यायुरष्टमेशेन दीयते ॥ तत्सर्वमर्धाधिक्ये
च विधेयं द्विजसत्तम ॥ ४७ ॥ एवं रंध्रपतिर्विप्र नीचराशिगतोपि
च ॥ दीयमानायुरर्द्धं चेन्नाशयेत्तु न संशयः ॥ ४८ ॥एवं रंध्रपति-
र्विप्र नीचखेटेन संयुत ॥ तद्ग्रहेण दीयमानमायुरर्द्धं विनश्यति
॥ ४९ ॥ एवं रंध्रपतिर्विप्र तुंगखेटेन संयुतः ॥ तद्ग्रहेण दीयमान-
मायुरर्द्धं च वर्द्धति ॥ ५० ॥ एवमुक्तं च विप्रेंद्र परमायुर्विनिश्चितम् ॥
लग्नेश्वराष्टमेशाभ्यां योगायुर्दायमागते ॥ ५१ ॥ तेषु संस्कारमाज्ञे-
यमिदं पूर्वोक्तसंकथाम् ॥ लग्नेशादायुरित्येवं तत्तद्योगकलात्मकम्
॥ ५२ ॥ संयुक्ताश्च ग्रहा उच्चनीचादिगुणदोषतः ॥ वृद्धिर्ह्रासावुक्त-
रीत्या कार्या वै संप्रदायतः ॥ ५३ ॥ द्वित्र्यादिमृत्युयोगश्च प्रबलः
पूर्वभाषितः ॥ नैसर्गिकोपि वीर्याय तस्य पाके मृतिर्भवेत् ॥ ५४ ॥
रव्याचरराहुपंगूनां चतुःखेटांतरे बली ॥ तस्य योगानुसारेण जात-
कस्य मृतिं वदेत् ॥ ५५ ॥ अष्टमेशेन संयुक्ताः शनी राहुः कुजो रविः ॥
न वीक्ष्यंते ग्रहैर्वाथ तस्य मृत्युं विनिर्दिशेत् ॥ ५६ ॥ एषां मध्येषु
प्रबला सा तत्स्वामिकराशिगे ॥ पाके मृत्युं विजानीयान्निर्विशंकं

द्विजोत्तम ॥ ५७ ॥ एतेषां चतुःखेटानां मध्ये चैको बली क्वचित् ॥ तस्य राशिदशाकाले मृतिस्थानं विनिर्दिशेत् ॥ ५८ ॥ मृत्युस्थानाभिभूतायां सिद्धायां च महादशा ॥ तत्तस्यापि क्रमेणैव तदनंतदशाप्रदा ॥ ५९ ॥ राशिषु मारकत्वेन जलवदागमेपि च ॥ शूलाद्याधिष्ठातृगृहदशांतरगते मृतिः ॥ ६० ॥ शुभग्रहेण संबंधे शनिराह्वोस्तयोरपि ॥ तत्तत्स्वामिदशाकाले मरणं च विनिर्दिशेत् ॥ ६१ ॥ तदाश्रयाद्राशिपाके मृत्युर्भवति निश्चितम् ॥ निर्विशंकं महाप्राज्ञ पुरा शंभुप्रणोदितम् ॥ ६२ ॥ सुखदुःखादि संब्रूयात्पाकराशौ विचिंतयेत् ॥ भोगांतरगता तत्तु तत्तद्वीर्यानुसारतः ॥ ६३ ॥ सबलायां सुखं ब्रूयाद्दुर्बला दुःखदायिका ॥ वैषम्येन फलं वाच्यं तथा मरणमेव च ॥ ६४ ॥ द्वादशे दशमे वापि संस्थिते पुच्छनायके ॥ पापदृष्टे दशाप्राप्ते तदंतरगते मृतिः ॥ ६५ ॥ द्वादशे दशमे केतुः शुभग्रहनिरीक्षितः ॥ नायं योगो महाप्राज्ञ न कष्टं न तु मृत्युकृत् ॥ ६६ ॥ प्राणिनीत्युक्तं विप्रेन्द्र प्राणानयनमुच्यते ॥ राश्यधीनं बलं ज्ञेयं तदुक्तं कथ्यतेऽधुना ॥ ६७ ॥ अग्रहात्सग्रहो ज्यायान्सग्रहे त्वधिकग्रहः ॥ सोमे चरस्थिरद्वंद्वाः क्रमात्स्युर्बलशालिनः ॥ ६८ ॥ अधुना संप्रवक्ष्यामि मध्यायुर्योगनिश्चितम् ॥ मारकांतरतो विप्र तवाग्रे कथयाम्यहम् ॥ ६९ ॥ विलग्नात्मदशा वा चेदुभयोरष्टमेशयोः ॥ संस्थितेऽन्यतरे विप्र मध्यायुर्योग उच्यते ॥ ७० ॥ अस्मिन्योगे स्थिते सेवा दीर्घस्य मध्यपादके ॥ बालस्य मध्यता पादे केचिदिति विवेचनम् ॥ ७१ ॥ अथ दीर्घादियोगेषु त्रिषु च द्विजसत्तम ॥ कक्षाह्रासकृते योगान्दर्शयामि तवाग्रतः ॥ ७२ ॥ लग्नसप्तमयोर्विप्र द्विर्द्वादशकयोरपि ॥ षष्ठरंध्राधिपस्यापि जनुर्लग्ने विचिन्तयेत् ॥ ७३ ॥ पापाक्रांते पापयोगे पापमध्यत्वमागते ॥ कक्षाह्रासौ विजानीयान्निर्विशंकं द्विजोत्तम ॥ ७४ ॥ दीर्घस्य मध्यमा याता भवेदायुषि

मध्यमे ॥ अल्पादल्पं च विज्ञेयं कक्षाह्रासस्य लक्षणम् ॥ ७५ ॥
कक्षाह्रासे यदाऽर्थोऽपि पूर्ववज्जायते ध्रुवम् ॥ अथैवं लग्नकुंडल्यां
पापयोगात्रिकोणगे ॥ ७६ ॥ लग्नपंचमभाग्येषु पापयोगकृते द्विज ॥
कक्षाह्रासो भवेद्विप्र निर्विशंकं विधेः सुत ॥ ७७ ॥ अत्राऽस्मिन्कारके
लग्ने चिन्तयेज्जनिलग्नवत् ॥ कारकांशे द्यूनराशेः पापमध्यत्वमेव
हि ॥ ७८ ॥ एको योगः स विज्ञेयः कक्षाह्रासं च पूर्ववत् ॥
अथैककक्षाह्रासस्य चापवादं वदाम्यहम् ॥ ७९ ॥ एकस्य कक्षाह्रासं
च वित्तपे चान्यथा भवेत् ॥ पूर्ववच्छुभयोगेन कक्षावृद्धिर्भविष्यति
॥ ८० ॥ जनुर्लग्ने कारके च चिंतयेत्पूर्ववाद्विज ॥ लग्ने द्यूने
धने रिष्फे षष्ठे रंध्रे स्थलत्रये ॥ ८१ ॥ शुभखेटकृते योगे कक्षावृद्धिर्भवत्यपि
॥ चिंतयेत्पूर्ववाद्विप्र त्रिकोणेषु स्थलद्वये ॥ ८२ ॥
जनुर्लग्ने कारके च शुभयोगं करोति च ॥ कक्षावृद्धिर्न संदेहो भविष्यति
द्विजोत्तम ॥ ८३ ॥ कारके च त्रिकोणस्थे नीचस्थाः पापखेचराः
॥ कक्षाह्रासो महाप्राज्ञ द्वितयेन भविष्यति ॥ ८४ ॥ कारकांशे
त्रिकोणेषु शुभखेटे शुभस्थले ॥ कक्षावृद्धिर्भवेत्तत्र न संदेहो
द्विजोत्तम ॥ ८५ ॥ कारके पापखेटाच्च चांतगे पापसंयुते ॥ कक्षाह्रासो
भवेत्तत्र प्रणीते द्विजसत्तम ॥ ८६ ॥ कारके शुभसंयुक्ते स्वतुंगे
शुभखेचराः ॥ कक्षावृद्धिर्भवेत्तत्र निर्विशंकं द्विजोत्तम ॥ ८७ ॥
पापकारकगैर्ह्रासो वृद्धिर्वा कथिता द्विज ॥ अथैव गुरुणा कक्षा
ह्रासवृद्धिं वदाम्यहम् ॥ ८८ ॥ वित्ते व्यये लग्नषष्ठे त्रिकोणे पापयोर्द्विज
॥ कक्षाह्रासो भवेत्तत्र पूर्ववाद्विजसत्तम ॥ ८९ ॥ गुरौ नीचे
ह्यतुंगे च संयुक्तेऽशुभखेचरैः ॥ कक्षाह्रासो भवत्येव निर्विशंकं द्विजोत्तम
॥ ९० ॥ वित्तगे च गुरौ ज्ञेयं पूर्ववद्योजनं द्विज ॥ प्रागुक्तार्थकृतेयं
च कक्षा सर्वा प्रकथ्यते ॥ ९१ ॥ तथैव शुभयोगेषु
चापवादं वदाम्यहम्॥ उत्कस्थाने शुभैर्योगे पूर्णेन्दुशुक्रयोर्द्विज ॥९२॥

योगप्रकरणे कक्षाह्रासाय न तु वृद्धये ॥ तत्रैकराशिवृद्धिश्च
भवत्येव न संशयः ॥ ९३ ॥ पूर्ववच्चोक्तपापेषु शनिना योगकारकः
॥ कक्षाह्रासश्च तत्रैव यत्रैको राशिर्ह्रासकृत् ॥ ९४ ॥ अधुना
संप्रवक्ष्यामि विशेषेण द्विजोत्तम ॥ आलंब्य स्थिरदशायां योगान्निधनमेव
च ॥ ९५ ॥ शशिनंदपावकाश्चेदित्युक्ता च दशा स्थिरा ॥
चरे स्थिरं द्विःस्वभावे भानुना राशिषु द्विज॥ ९६॥ त्रिभिस्त्रिभी राशिरेकं
खंडाश्चत्वार एव च ॥ कस्मिन्खंडे च निधनं तस्य योगं विचिन्तयेत्
॥ ९७ ॥ यस्मिन्खण्डे मृत्युयोगस्तस्मिन्खंडे विचिंतितम् ॥
मरणं भवतीत्यर्थं निर्विशंकं वदाम्यहम् ॥ ९८ ॥ योगत्रयमहं वक्ष्ये
दीर्घमध्याल्पभेदतः ॥ चतुःखंडेषु यत्रायुरागतं तत्र चिंतयेत् ॥
॥ ९९ ॥ दीर्घायुर्योगवत्तत्तु यस्मिन्खंडे समागते ॥ तस्मिन्खंडे च
निधनं भवत्यपि न संशयः ॥ १०० ॥ वक्ष्यमाणप्रकारेण मध्यमल्पायुषि
द्विज ॥ निधनाश्रयखंडेषु लक्षणाक्रांतया दशा ॥ १०१ ॥
तद्दशायां च निधनं भवत्येव द्विजोत्तम ॥ कदाचिन्न मृतिस्तत्र क्लेशदुःखभयानि
च ॥ १०२ ॥ भवंति तत्र संस्कार्यं पुनरित्थं वदाम्यहम् ॥
पापद्वयमध्यगते राशिपाके मृतिर्भवेत् ॥ १०३ ॥ लग्नाद्वा कारकाद्विप्र
पापाक्रांते त्रिकोणगे ॥ द्वादशाष्टमराश्येवं पापाक्रांतं भवेदपि ॥
॥ १०४ ॥ तद्दशायां च निधनं जातकस्य न संशयः ॥ खंडे स्थिरदशायां
च चिंतनीयं प्रयत्नतः ॥ १०५ ॥ पापराशेस्त्रिकोणेषु द्वादशाष्टमराशिषु
॥ पापाक्रांते तद्दशायां निधनं भवति ध्रुवम् ॥ १०६ ॥
शुभमध्ये मृतिर्नैव पापमध्ये मृतिर्भवेत् ॥ भूयोपि निधनार्थाय
राशिदोषं वदाम्यहम् ॥ १०७ ॥ द्वादाशाष्टमयोः पत्योर्दृष्टौ क्षीणेंदुशुक्रयोः
॥ तद्दशायां च निधनं सत्यमेव न संशयः ॥ १०८ ॥
क्षीणेंदोः केवलं दृष्टिः शुक्रदृष्टिश्च केवलम् ॥ दृष्टिमात्रेण
निधनं स्थिरदशायां विचिन्तयेत् ॥ १०९ ॥ मृत्युस्थानेन या

दृष्टिः पापमध्यर्क्षं पश्याति ॥ तस्य दशां समालोक्य व्योमषष्ठाधि-
पाद्द्विज ॥ ११० ॥ निरीक्षिते नवांशेषु द्वयोः स्थाने द्विजोत्तम ॥
तत्रैव निधनं ज्ञेयं भाषितं च तवाग्रके ॥ १११ ॥ पूर्वोक्तनिधनस्थाने
महापाकं नरेष्वपि ॥ व्योमषष्ठाधिपौ विप्र तयोरंशे निरीक्षिते ॥
॥ ११२ ॥ राशेरंतर्दशाकाले निधनं भवाति ध्रुवम् ॥ अंतर्दशायां
रूपे द्वे निधनस्थानमेव च ॥ ११३ ॥ इति श्रीबृहत्पाराशरहोरा-
पूर्वखण्डसारांशे आयुर्दायकथनं नाम पंचविंशोऽध्यायः ॥ २५ ॥

पराशर उवाच ।

अथातः संप्रवक्ष्यामि निधनार्थे विशेषतः ॥ प्रकारांतर्दशा-
यास्तच्च रुद्राद्द्विजसत्तम ॥ १ ॥ लग्नद्यूनाष्टमे शौचे तयोर्मध्ये च
यो बली ॥ प्राणी रुद्रः स विज्ञेयः सूर्यादिखेचरोऽपि च ॥ २ ॥
तयोर्मध्ये बली चिंत्यः शुभदृष्टेन संयुते ॥ दुर्बलः सोपि गौणा-
ख्यो रुद्रग्रह इतीर्यते ॥ ३ ॥ तत्रैव प्राणिरुद्रस्य विशेषं गणयेत्फ-
लम् ॥ प्रवक्ष्यामि तवाग्रे च शृणुष्व त्वं महामते ॥ ४ ॥ शुभै-
र्युक्ते शुभैर्दृष्टे शुभसंबंधकारकः ॥ प्राणी रुद्रः स विज्ञेयस्तस्य-
धीनायुरेव च ॥ ५ ॥ रुद्रशूलान्तमायुः स्यात्त्रिकोणांते तथा पुनः ॥
लग्नांते पञ्चमान्ते च नवमांते त्रयस्थले ॥ ६ ॥ चिंतनीयं महाप्राज्ञ
तत्तद्राशिदशांतरे ॥ अल्पमध्यं च दीर्घायुर्योगभेदा न संशयः ॥७॥
यत्राल्पायुः समायोगे त्रिकोणमध्यमान्तरे ॥ आयुस्तत्रैव विज्ञेयं-
तदग्रे च क्रमेण च ॥ ८ ॥ योगे मध्यायुषं प्राप्ते त्रिकोणे
मध्यमांतगे ॥ आयुर्दायसमाप्तिश्च निर्विशंकं द्विजोत्तम ॥ ९ ॥
दीर्घायुयोगसंलब्धे त्रिकोणे नवमांतगे ॥ दशांतरे महाप्राज्ञ आयु-
र्दायसमाप्तये ॥ १० ॥ अथैव लग्नद्यूनादि आरभ्य च दशा-
क्रमः ॥ प्रवृत्तिर्जन्मतो ज्ञेया निर्विशंकं द्विजोत्तम ॥ ११ ॥ यत्र
रुद्रग्रहस्यापि शुभदत्वं न भाव्यते ॥ तत्र जीवस्य नष्टत्वान्नेदं फल-

मिति स्थितिः ॥१२॥ अथैव रुद्रशूलांतमायुर्दायेतिकारणे॥ योगेस्मिंश्च समुत्कर्षात्किंचिद्दर्शयति द्विज ॥ १३ ॥ प्राणीरुद्रशुभे दृष्टे पूर्वोक्तफलदायकः ॥ शुभयोगे न संदेहो रुद्रे शूलांतमायुषि ॥ १४ ॥ स्थित एव फलं जन्म कथितं कारणांतरे ॥ निरुक्ते शुभसंयोगे किं कीर्तयति भो द्विज ॥ १५ ॥ पूर्वमेव फलं साधो समुत्कृष्टे तदेव चेत् ॥ सुतरां तदेव वक्तव्यं निर्विशंकं द्विजोत्तम ॥ १६ ॥ अनेन पूर्वयोगेन फलं किंचिद्धि न्यूनता ॥ अद्योतितादुक्तकालात्पूर्वं पश्चान्मृतिर्यदि ॥ १७ ॥ निरुक्तयोगश्च तदा ह्यपवादं वदाम्यहम् ॥ रविं विहाय नितरां पापयोगो भवेद्द्विज ॥ १८ ॥ योगोऽयं निष्फलो वाच्यः पुरा ब्रह्मप्रणोदितः ॥ इदं फलं न भवति योगेस्मिन्द्विजसत्तम ॥ १९ ॥ नाशयोगस्य वक्तव्यं फलं वापि भयंकरम् ॥ अधुना संप्रवक्ष्यामि गौणरुद्रस्य वै द्विज ॥ २० ॥ गुणप्रकर्षेण फलं विशेषेण तवाग्रतः ॥ गौणरुद्रे महाप्राज्ञ मंदारेन्दुनिरीक्षिते ॥ २१ ॥ अभावे शुभयोगस्य पापयोगांतरे तथा ॥ शूलान्तात्फलं विप्रेंद्र आयुर्दायं भवत्यपि ॥ २२ ॥ शुभदृष्टे वा शूलांतात्परश्चायुर्भवेदपि ॥ योगद्वय परत्वेन योजनीयं न संशयः ॥ २३ ॥ एतद्योगद्वयं किंचिन्न्यूनतायामपि द्विज ॥ नेदं फलं प्रवक्तव्यं मैत्रेयाभाषितं पुरा ॥ २४ ॥ शुभदृष्टिभवे चैव योगे च परपूर्ववत् ॥ शुभदृष्टवसंत्या च पापयोगाद्यभावतः ॥ २५ ॥ कृत एको हि योगश्च पूर्वयोजनमेव च ॥ अशुभयोगे शुभौ दृष्टौ योगोऽयमपरो द्विज ॥ २६ ॥ पापयोगैरभावे च शुभदृष्टौ च संयुते ॥ कैमुतिकाख्यन्यायेन सिद्धो योगस्तृतीयकः ॥ २७ ॥ पुरा प्रोवाच यच्छंभुस्तवाग्रे कथयाम्यहम् ॥ द्वितीययोजनायां तु शुभदृष्टिसमन्विते ॥ २८ ॥ पापयोगस्य चाभावे च योगः प्रथम उच्यते ॥ पापयोगे महाप्राज्ञ शुभदृष्टे प्रभावके ॥ २९ ॥ द्वितीययोगपक्षेऽहं पूर्वस्मिन् द्विजसत्तम ॥ पाप-

योगस्य चाभावे चाशुभदृष्टिविवर्जितः॥ ३०॥ कैमुतिकाख्यन्यायेन तृतीयो योग उच्यते ॥ अथैव प्राणिरुद्रस्य ह्युक्ता पक्षांतरे कथा ॥ ॥ ३१ ॥ तत्रैव प्रथमे योगे शुभदृष्टिविवर्जिते ॥ शुभयोगादियोगश्च द्वितीयोक्तेन योगकृत् ॥ ३२ ॥ तृतीयेन द्वयस्यापि योगभंगं करोत्यपि ॥ अधुनोक्तत्रयाभावे मंदादिदृष्टिमात्रतः ॥ ३३ ॥ एवं स्थिते सुयोगश्च निःशंकं प्रतिपद्यते ॥ अशुभैः खेचरैर्दृष्टे पापयोग इति स्थितिः ॥ ३४ ॥ शुभयोगविहीने च मन्दारेन्दुनिरीक्षिते ॥ तदायुः परतो विप्र समानादिति योजयेत् ॥ ३५ ॥ प्रथमद्वितीये संतः पापयोगैरभावतः ॥ योगो भंगमपेक्षा च तृतीयोक्तमिदं वदेत् ॥ ३६ ॥ पापदृष्टिमात्रमेवं योगानिर्वाहकारणे ॥ अपवादविहीनेन इत्येवोक्तं तृतीयके ॥ ३७ ॥रुद्राभ्यां प्राणिगौणाभ्यां ताभ्यामाश्रितमेव च ॥ गुणविशेष आयुरंतं वक्ष्यामीह महामते ॥ ३८ ॥ गौणरुद्रशुभैर्योगे शुभदृष्टिसमन्विते ॥ रुद्रशूलांतमायुश्च योजनीयं द्विजोत्तम ॥ ३९ ॥ पूर्वोक्तप्राणिरुद्रेण द्वियोगप्राणकेन च ॥ द्वाभ्यां शूलांतमायुश्च तवाग्रे कथितं मया ॥ ४० ॥ अधुना संप्रवक्ष्यामि द्वयोर्निर्वाहकारणे ॥तयो रूपं भिन्नाभिन्नं शृणुष्व मुनिपुंगव ॥४१ ॥ प्राणिरुद्रे शुभैर्दृष्टे योगोऽयं द्विजसत्तम॥शुभयोगेति का वार्ता शूलांतायुर्विनिश्चितम् ॥४२॥ गौणरुद्रे शुभैर्दृष्टे योगोऽयं क्लेशदायकः॥ रोगशोकभयं कर्ता मृत्युं नैव करोति च ॥ ४३ ॥ शुभयोगे महाप्राज्ञ योगोऽयं बलवत्तरः ॥ तस्य शूलांतमायुश्च निर्विशंकं न संशयः ॥ ॥ ४४ ॥ उभौ रुद्रौ शुभग्रहैर्योगदृष्टौ द्वयोरपि ॥ शुभग्रहेण क्लेशश्च रुद्रशूलांतमायुषि ॥ ४५ ॥ प्राणी चाप्राणिरुद्राभ्यां कृतयोगद्वयेन च ॥ तयोर्वा संप्रवक्ष्यामि तवाग्रे द्विजसत्तम ॥ ४६ ॥ मार्तंडरहिते चान्यः पापयोगकृते द्विज ॥ योगद्वयं न भवति पापयुक्तं द्वयोरपि ॥ ४७ ॥ शुभयोगः शुभैर्दृष्टैरुभयेपि विना रविम् ॥ पाप-

योगकृते विप्र भययोगो विनश्यति ॥ ४८ ॥ शुभयोगः शुभैर्दृष्टिरभावे न भवत्यपि ॥ यत्रायुः कथयांचक्रुर्वक्तव्यं द्विजसत्तम ॥ ४९ ॥ उभयोः पापयोगे च कश्चिद्रोगार्तिको भवेत् ॥क्लेशः शोको नृपाद्भीतिर्देशपर्यटनं द्विज ॥ ५० ॥ शुभदृष्टेरभावे च शुभयोगविवर्जिते ॥ पापयोगप्रभावेण मरणं सारणं दृशा ॥ ५१ ॥ शुभयोगदृष्ट्यभावे पापयोगे द्विजोत्तम ॥ पुष्टदशाचलेनैव सप्रसादो न संशयः ॥ ५२ ॥ अस्मिन्प्रकरणे चैवमुपपत्तौ द्विजोत्तम ॥ शुभवर्गौ पापवर्गौ तवाग्रे कथायाम्यहम् ॥ ५३ ॥ अर्कारमंदफणिनः क्रमात्क्रूरा अथाश्रयम् ॥ चन्द्रोपि क्रूर एवात्र क्वचिदंगारकाश्रयात् ॥ ५४ ॥ गुरुः शिखिकविज्ञाश्च यथापूर्वं शुभग्रहाः ॥ क्रूरखेटा महाप्राज्ञ चार्काद्या उत्तरोत्तरम् ॥५५॥ क्रूराः क्रूरखेटगाश्च क्रूराणि ह्यपवादकम् ॥ शुभक्षेत्रगतैः क्रूरैः क्रूरता ह्युपशाम्याति ॥५६॥गुर्वादयः शुभग्रहा यथापूर्वं बुधः कविः ॥ कवितः केतुर्विज्ञेयः केतुतो वाक्पतिर्द्विज ॥ ५७ ॥ क्रमेणैव विजानीयाच्छुभखेटोत्तरोत्तरम् ॥ यथापूर्वं क्रूरग्रहाः क्रूराश्रयसमागते ॥ ५८ ॥ एवं क्रौर्यं समापन्नं क्रौर्यं तु शोभनाश्रयः ॥ एवं गुर्वादिसौम्याश्च शुभाः श्रेयातिशोभनाः ॥ ५९ ॥ क्रूराश्रये सौम्यखेटाः सौम्यता नश्यते क्वचित् ॥ एवमेवापरामुक्तिं कथयामि द्विजोत्तम॥६०॥ प्रत्येकं शुभराशिः स उच्चस्थो वा बुधः शुभः ॥ गुरुशुक्रौ च सौम्यस्थौ ततोऽन्ये च शुभाः स्मृताः ॥ ६१ ॥ पूर्वस्मिन्पापयोगेन योगभंगद्वये द्विज ॥ निरूपितं तवाग्रे च निर्विशंकं न संशयः ॥ ६२ ॥ योगद्वयेपि भंगार्थे पापदृष्टौ विशेषकम् ॥ न दर्शयाति कदापि स्यात्तवाग्रे कथयामि वै ॥ ६३ ॥ शुभग्रहाणामभावे मंदारेन्दुनिरीक्षिते ॥ पापयोगे शुभैर्दृष्टे परतश्चायुषि द्विज ॥ ६४ ॥ प्राणिरुद्रेप्यगौणेन शुभयोगविवर्जिते ॥ पापयोगेऽथवा दृष्टे तथा शुभनिरीक्षिते ॥ ६५ ॥ व्यापारतानुविज्ञेया पूर्ववद्द्विजसत्तम ॥ अत्रोपपदपापाच्च राहोरप्यु-

पलक्षणम् ॥ ६६ ॥ एवं सूर्यातिरिक्तोपि पापयोगस्तथैव च ॥ तस्यैवेहानुवादाच्च
राहोश्चिदुपबृंहणात् ॥ ६७ ॥ परिग्रहदर्शनाच्च परतो
रुद्रपाश्रयात् ॥ शुभस्थाने आयुरंतः शूलत्रयमलंघनात् ॥ ६८ ॥ न
तु शूलदशायां च आयुरंतं द्विजोत्तम ॥ एवं शूले चेत्तदंतशूलरीत्योति
वाधके ॥ ६९ ॥ पूर्वोक्तपापयोगेन शुभयोगेन दृष्टितः ॥ कृतयोगद्वयस्यापि
भंगार्थे च वदाम्यहम् ॥ ७० ॥ शुभयोगेन वै विप्र पापयोगोऽतिदुर्बलः
॥ शुभदृष्टिकृतो योगः पापदृष्टेः कथं क्षमः ॥ ७१ ॥
न भंजनसमर्थश्च कोटियत्ने कृते द्विज ॥ शुभकृद्योगभंगार्थे पापयोगमपेक्षितम्
॥ ७२ ॥ शुभयोगे दृष्टिकृते पापयोगेपि भंजकः ॥
शुभदृष्टिकृते योगः पापयोगो विनश्यति ॥ ७३ ॥ यदायुर्दायमध्यस्थं
वेदितव्यं द्विजोत्तम ॥ पापमात्रस्य शूलत्वे प्रथमर्क्षे मृतिं
वदेत् ॥ ७४ ॥ द्वौ रुद्रौ पूर्वं वक्ष्येऽहं यदि चैकत्र संस्थिते ॥
मित्रमध्यमशूलर्क्षे शुभमात्रेऽन्तिमे मृतिः ॥ ७५ ॥ द्वयोः पापी च
प्रथमे शूले मृत्युर्भवत्यापि ॥ यद्येकरुद्रः पापी च द्वितीयः शुभखेचरः
॥ ७६ ॥ मध्ये शूले मृतिर्विप्र निर्विशंकं भविष्यति ॥ शुभग्रहद्वयं
विप्र एकत्र यदि तिष्ठति ॥ ७७ ॥ अंतशूले मृतिर्ज्ञेया शूलिना
भाषितं पुरा ॥ एवं भेदानुभेदेन विद्यात् सर्वत्र बुद्धिमान् ॥ ७८ ॥
शूलक्षेत्रे च रुद्रौ द्वौ यदि पापोऽथवा शुभः ॥ मिश्रग्रहोथ वा विप्र
चिंतयेद्बलवत्तरः ॥ ७९ ॥ दीर्घायुरायुर्योगेन भंगाभावे द्विजोत्तम ॥
मृत्युशूलदशायां च पापयोगं विना रविः ॥ ८० ॥ क्रूराश्च येषु क्षेत्रेषु
शुभनामाश्रयेषु च ॥ निर्याणमितरेषां तु शूलर्क्षे निर्दिशेदयम् ॥
॥ ८१ ॥ शुभानामत्र पक्षे तु तथा क्रूराश्रयेषु च ॥ तस्मिञ्जातकशूलक्ष
मृतिं ब्रूयान्न संशयः ॥ ८२ ॥ यद्यप्राणी रुद्रयोगे यत्किंचिन्यूनता
द्विज ॥ तर्हि रुद्राश्रयं तच्च त्रिधा न परतोऽपि च ॥ ८३ ॥
रुद्राश्रयेपि चायुर्दा समाप्तिर्भवति ध्रुवम् ॥ प्रायेण चिन्तयेद्विप्र

पूर्वापरप्रयत्नतः ॥ ७४ ॥ यद्वाह्यप्राणिरुद्रस्य योगे पूर्णे भवत्यपि ॥ रुद्रशूले परत्वेन आयुर्दायसमाप्तये ॥ ८५ ॥ रुद्राश्रयेण प्रायेण शूलमेकद्वयं त्रयम् ॥ उल्लंघनं कृतं विप्र यदि योगविशेषतः ॥ ८६ ॥ तर्हि रुद्राश्रयेप्येवं प्रायेणायुर्भवेद्ध्रुवम् ॥ तावद्वर्षेण कथनं जीवनं जातकस्य च ॥ ८७ ॥ इत्युक्ते च प्रयाणे च पूर्वे रुद्राश्रयाद्द्विज ॥ आयुर्दायसमाप्तिश्च कष्टयोगादिकारके ॥ ८८ ॥ रुद्राश्रयात्तु ह्येवं हि निरुक्ते चायुषि द्विज ॥ किं भवेद्विशेषरूपं तवाग्रे दर्शयामि च ॥ ८९ ॥ मेषलग्ने विशेषेण आयूरुद्राश्रयांतके ॥ कुष्टरोगादि कुर्वीत पूर्णायुर्न समाप्यते ॥ ९० ॥ द्वंद्वराशौ स्थितौ रुद्रौ प्राणी गौणद्वयेपि वा ॥ रुद्राश्रयं तदन्ते वा आयुर्दायं भवत्यपि ॥ ९१ ॥ आयुर्दा योगभेदेन प्रथमे मध्यमोत्तमे ॥ दर्शयामि तवाग्रे च कथां शंभुप्रणोदिताम् ॥ ९२ ॥ स्वल्पमध्यमदीर्घायुर्योगादिकं वदेद्द्विज ॥ तदायुर्दायमल्पादि यथोक्तं कथितं मया ॥ ९३ ॥ स्वल्पायुः प्रथमे शूले मध्यमायुर्द्वितीयके ॥ दीर्घायुश्च तृतीयांते शूलांते निधनं भवेत् ॥ ९४ ॥ अधुना संप्रवक्ष्यामि तवाग्रे द्विजनंदन ॥ मृत्युर्मुख्याश्रयीभूतदशायां तद्दशास्वपि ॥ ९५ ॥ ततः फलविशेषार्थं माहेश्वरग्रहं द्विज ॥ लक्षयंति तदाग्रे च तस्मादायुर्विनिश्चितम् ॥ ९६ ॥ चिंतयेत्कारके लग्ने ह्यष्टमेशो महेश्वरः ॥ अथवाऽन्यप्रकारेण माहेश्वरं वदाम्यहम् ॥ ९७ ॥ कारके तुंगराशिस्थे स ग्रहो बलवत्तरः ॥ रिःफरंध्राधिपौ मध्ये सोऽपि माहेश्वरो ग्रहः ॥ ९८ ॥ कारकाच्च ग्रहाभावे नाथो माहेश्वरो भवेत् ॥ रिष्फरंध्राधिपौ विप्र बले सामान्यतां यदि ॥ ९९ ॥ द्वयं माहेश्वरं यातो यथा रुद्रग्रहौ द्वयम् ॥ ताभ्यां च निर्णयार्थाय प्रकारान्यं वदाम्यहम् ॥ १०० ॥ स्वकारकस्य योगश्चेद्राहुकेतुरवीन्विना ॥ माहेश्वरो भवत्येव विकल्पेन द्विजोत्तम ॥ १ ॥ कारकस्याष्टमे पापग्रहो माहेश्वरो भवेत् ॥ रविचंद्रौ च चांद्रिश्च

गुरुः शुक्रः शनिस्तमः ॥ २ ॥ शिखिना गणनायां च यः षष्ठः कारकग्रहात् ॥ सोऽपि माहेश्वरो ज्ञेयो नवभागसमुच्चयात् ॥ ३ ॥ एवं चार्कविभागश्च राशिव्यवहारोच्चता ॥ तदयं तृतीयः खेटो रव्यादीनां महेश्वरः ॥ ४ ॥ यद्वा कारकस्थानाच्च षष्ठाधिपलये स्थिते ॥ सोऽपि माहेश्वरो ज्ञेयो निर्विशंकं द्विजोत्तम ॥ ५ ॥ माहेश्वरग्रहस्यापि ब्रह्मसाहित्यकेन च ॥ ततो ब्रह्मग्रहं वक्ष्ये विशेषेण फलाय वै ॥ ६ ॥ लग्नाद्वा सप्तमाद्वापि रिपुरंध्रव्ययाधिपाः ॥ एतेषु बलवान्विप्र मेषादिविषमस्थिते ॥ ७ ॥ लग्नसप्तमयोर्मध्ये राश्योश्च बलवान्भवेत् ॥ उच्चैरपृष्टभागाद्यसंयोगो विद्यमानतः ॥ ८ ॥ एतद्गुणत्रयाद् युक्तः सोपि ब्रह्मा ग्रहः स्मृतः ॥ लग्नस्य पृष्ठभागं च षट्कं च द्यूनवादिकम् ॥ ९ ॥ सप्तमस्य पृष्ठभागं षट्कलग्नादिकं द्विज ॥ बलवान्विषमस्थोपि ब्रह्मा खेटः स उच्यते ॥ ११० ॥ ब्रह्मणा लक्षणाक्रांते बलवान्वापि पातयोः ॥ शनिराहुरथो केतुर्यदि षष्ठो ग्रहो द्विज ॥ ११ ॥ रव्यादिगणनायां च शन्यादौ तृतीयो ग्रहः ॥ स्थानात्षष्ठराशिगे च षष्ठराश्यधिपोऽथवा ॥ १२ ॥ सोऽपि ब्रह्मा ग्रहो ज्ञेयो निर्विशंकं द्विजोत्तम ॥ बहुना ब्रह्मणाक्रांते को ग्रहो ग्राह्यमाणकः ॥ १३ ॥ संदेहे निर्णयं चात्र तवाग्रे कथयामि च ॥ द्वित्र्यादिकः ग्रहाणां च योगो ब्रह्मेति लक्षितः ॥ १४ ॥ योगः स्वजातियों ग्राह्यः कारकं याति यो ग्रहः ॥ बहूनामधिको भागः सोऽपि ब्रह्मा ग्रहोच्यते ॥ १५ ॥ राहोर्ब्रह्मत्वयोगेन अधिकारी यदा भवेत् ॥ विपरीतं विजानीयात्सर्वेषु न्यूनभागकम् ॥ १६ ॥ इत्येकपापे पूर्वोक्तं ब्रह्मणा ग्रहकारकात् ॥ रन्ध्राधीशोष्टमस्थो वा जात्यप्राणैक्यवाक्यतः ॥ १७ ॥ द्वौ ब्रह्मा विपरीतार्थे ह्यथवा बहुब्रह्मणा ॥ सामान्यभागांतरे हि कतमो ग्राह्यमाणकः ॥ १८ ॥ सर्वे भागसमानास्तु अग्रहात्सग्रहो बली ॥ इति न्यायेन विज्ञेयं बलवान् ब्रह्म-

णोच्यते ॥ १९ ॥ ब्रह्मत्वेन प्रधानेन ब्रह्मकार्यं करोत्यपि ॥ स च ब्रह्मा ग्रहो ग्राह्यः पुरा शंभुप्रणोदितः ॥ १२० ॥ अधुना संप्रवक्ष्यामि ब्रह्ममाहेश्वरौ ग्रहौ ॥ विशेषेण फलं ब्रूयात्तवाग्रे द्विजनंदन ॥ २१ ॥ ब्रह्मग्रहाश्रितेशस्य दशादि परिचिंतयेत् ॥ माहेश्वरर्क्षपर्यन्तं जातकस्यायुषि द्विज ॥ २२ ॥ तत्तद्राशित्रिकोणेषु राशिरंतर्गते मृतिः ॥ चरश्च स्थिरपर्यन्तं दशायां चिंतयेद्द्विज ॥ २३ ॥ तथा महादशायां च आयुर्दायं विलोकयेत् ॥ विंशोत्तर्यादिकं चैव यथान्यायेषु योजयेत् ॥ २४ ॥ माहेश्वरश्च यो राशिरष्टमेशाश्रयी द्विज ॥ तत्तद्राशित्रिकोणेषु राशावंतर्गते मृतिः ॥२५॥ अत्राब्द इति निर्देशात्तत्तद्राशिदशाक्रमः ॥ अब्दो द्वादशधा भागे अंतरैकैकराशि च ॥ ॥ २६ ॥ एकैकाब्दांतरदशा विज्ञेया गणितागमे ॥ द्वादशाल्पे तथाधिक्ये भानुना भागं दापयेत् ॥ २७ ॥ प्राप्तेंतरदशा ज्ञेया न्यूनाधिक्यं न जायते ॥ अब्दानां द्वादशाधिक्ये भानुराश्यंतरं दशा ॥ २८ ॥ दशाब्दे द्वादशं न्यूनं यस्मिन् राशौ दशा द्विज ॥ भागद्वादशमध्ये च समासं तदनंतरम् ॥ २९ ॥ महादशाक्रमेणैव चालनीयेति ज्ञापितम् ॥ अर्कभागेंतरदशानयनं द्विजसत्तम ॥ १३० ॥

इति श्रीबृहत्पाराशरहोरापूर्वखण्डसारांशे रुद्रमाहेश्वरब्रह्मग्रहलक्षणकथनं नाम षड्विंशोऽध्यायः ॥ २६ ॥

अथ पित्रादिनिर्याणमाह ।

अधुना संप्रवक्ष्यामि पित्रादेश्च द्विजोत्तम ॥ योगं निर्याणकाख्यातं यथा शंभुप्रणोदितम् ॥ १ ॥ लग्नसप्तमयोर्मध्ये यो राशिर्बलवान्द्विज ॥ तस्य राशेः समारभ्य क्रमेण पूर्ववद्द्विज ॥ २ ॥ प्रवर्तकदशारीत्या रुद्रशूलदशांतरे ॥ भविष्याति पितुर्मृत्युर्निर्विशंकं द्विजोत्तम ॥ ३ ॥

अथ मातुर्निर्याणम् ।

लग्नाद्वा सप्तमाद्वाऽपि बली राशिचतुर्थकः ॥ तस्याः शूलदशायां च मातुर्मृत्युर्न संशयः ॥ ४ ॥

भ्रातृनिर्याणम् ।

लग्नाद्वा सप्तमाद्वापि बली वीक्षेत्तृतीयकम् ॥ तस्याः शूलदशायां च भ्रातृनिर्याणमेव च ॥ ५ ॥

भगिनीभगिनीपुत्रनिर्याणमाह ।

लग्नाद्वा सप्तमाद्वापि राशिपंचमके बली ॥ तस्याः शूलदशायां च निर्याणं भगिनीपुत्रयोः ॥ ६ ॥

ज्येष्ठभ्रातुर्निर्याणम् ।

लग्नाद्वा सप्तमाद्वापि एकादशे बली द्विज ॥ तस्याः शूलदशायां च निर्याणं ह्यग्रजस्य च ॥ ७ ॥ लग्नाद्वा सप्तमाद्वापि नवराशिर्बली द्विज ॥ निर्विशङ्कं भवेत्तस्य शंभुना कथितं पुरा ॥ ८ ॥ मातापित्रोः कारकाभ्यां चिंतयेत्पूर्ववद्द्विज ॥ तदायुर्निधनं चापि दीर्घादीनां प्रभेदतः ॥ ९ ॥ भानुभार्गवयोर्मध्ये सद्वीर्याधिक्यतो द्विज ॥ ग्रहादित्यादिरीत्या च स खेटः पितृकारकः ॥ १० ॥ चंद्रमंगलयोर्मध्ये तथैव रविशुक्रयोः ॥ बलेन रहितः सोऽपि पापग्रहनिरीक्षितः ॥ ११ ॥ पित्रादिकतां भजते यथाक्रमं द्विजोत्तम ॥ उभयोर्बलसाम्ये च उभौ पुत्रादिकारकौ ॥ १२ ॥ द्विविधं चिंतयेत्तत्र प्राण्यप्राणिविभेदतः ॥ पित्रादिकारकस्यैवं प्राणिफलं वदाम्यहम् ॥ १३ ॥ पित्रादिकारके विप्र शुभग्रहनिरीक्षिते ॥ मातृकारकाश्रयीभूतराशिरेतत्त्रिकोणगे ॥ १४ ॥ दशायां निधनं वाच्यं मातापित्रोरथ त्रयम् ॥ इति प्राणिकारकस्य तवाग्रे कथितं फलम् ॥ १५ ॥ अप्राणिकारकस्यैवमष्टमेशो बलान्वितः ॥ तस्याश्रयीभूतराशित्रिकोणे निधनं भवेत् ॥ १६ ॥

यदा रंध्रेश वीर्याढ्यं तच्छूले निधनं द्विज ॥ पितृमातृकारके
च शूले निधनमेव च ॥ १७ ॥ यद्वा प्राणिकारकस्य ह्येवं ऋक्षांतरेपि
च ॥ फलं वै निर्दिशेद्विप्र परं तद्भावनायके ॥ अप्राणिकारकफलं
निर्दिशेद्व्ययगे द्विज ॥१८॥ सर्वान् प्रकारानित्येवं चिंतयेद्रुद्रशूलवत्
॥ १९ ॥ अल्पाद्यायुर्योगके चेदायुर्दानयनं द्विज ॥ दशासंचारभेदेन
ह्यायुर्दायं च पूर्ववत् ॥ २० ॥ राश्यादौ निर्णयं चादौ तद्विशेषफलाय
वै ॥ तन्वादिव्ययभावेषु भावं तत्तत्समुच्चितम् ॥ २१ ॥ तत्तत्कारकमाश्रित्य
राश्यारूढं विचिंतयेत् ॥ द्वारबाह्यादिकं सर्वं राश्याद्यं
द्विजसत्तम ॥ २२ ॥ अधुना संप्रवक्ष्यामि पितुर्निधनहेतवे ॥ विशेषकं
दर्शयंति पुनरुक्तं च वै द्विज ॥ २३ ॥ रविर्ज्ञेयः क्रियायोगे
लग्नाद्रिष्फर्क्षगे स्थितौ ॥ बुधसूर्याश्रयीभूतलग्नमेषे दशान्तरे ॥ २४ ॥
लग्नभूतस्य मेषस्य सिंहस्यापि दशांतरे ॥ वक्तव्यं पितृनिधनं
निर्विशंकं द्विजोत्तम ॥ २५ ॥ यदि लग्ने पापखेटा मेषराशौ रविस्तथा
॥ योगे मेषमहापाके वापिरंतर्गते मृतिः ॥ २६ ॥ अधुना
संप्रवक्ष्यामि तवाग्रे द्विजनंदन ॥ बाल्ये च पित्रोर्मरणं मयोक्तं च
विशेषतः ॥ २७ ॥ पित्रोः कारकयोर्विप्र प्राण्यप्राणिहीनोऽपि वा ॥
व्यक्रांते पापयोगे च शुभयोगविवर्जिते ॥ २८ ॥ दशाब्दान्न्यूनमित्येवं
पित्रोर्मृत्युर्यथाक्रमम् ॥ रविदृष्टाशुभं दृष्टौ नायं योगो द्विजोत्तम ॥२९॥
रव्यारूढविलग्नास्मिन्पित्रोर्भावं विचारयेत् ॥ तद्दशायां फलं वाच्यं
पित्रोर्दुःखसुखादिकम् ॥ ३० ॥

अथ कलत्रनिधनमाह ।

कलत्रकारकः खेटस्तदा स्त्रीराशिचिंतनम् ॥ तत्त्रिकोणदशायां च
कलत्रनिधनं भवेत् ॥ ३१ ॥

अथान्यनिधनमाह ।

तत्तत्कारकाश्रये च त्रिकोणर्क्षदशांतरे ॥ तेषां च मातुलादीनां

निधनं भवति ध्रुवम् ॥ ३२ ॥ एवं भावकलत्रादितद्दशारूढयंत्रके ॥ चिंतयेदायुःसामर्थ्यं सर्वं फलसमानकम् ॥ ३३ ॥ लग्नाच्च कारकाद्वापि तृतीये पापखेचरे ॥ युते दृष्टेऽथ वा विप्र दुष्टं मरणमुच्यते ॥ ॥ ३४॥ तत्तत्कारकतदीशात्तृतीये पापयोगकृत् ॥ तेषां तेषां प्रवक्तव्यं दुष्टं मरणमेव च ॥ ३५॥ तत्तद्भावात्कारकेशात्तृतीये शुभदृष्टियुक् ॥ तेषां तेषां शुभैर्योगैर्मरणं भवति द्विज ॥ ३६ ॥ शुभाशुभद्वये योगे दृष्टौ वापि तृतीयगे ॥ शुभाऽशुभात्मकं विप्र मरणं भवति ध्रुवम् ॥ ३७ ॥

अथ मरणनिमित्तान्याह ।

तृतीये भानुना दृष्टे तथा युक्ते बलाढ्यके ॥ राजहेतोश्च मरणं निर्विशंकं द्विजोत्तम ॥ ३८ ॥ तृतीयचंद्रेण युते षष्ठे वा पश्यतो मृतिः ॥ तृतीयशनिराहुभ्यां दृष्टे वापि युतेथ वा ॥ ३९ ॥ विषार्तिमरणं वाच्यं जलाद्वा वह्निपीडनात् ॥ गर्तादुच्चात्प्रपतनं बंधनाद् वा मृतिर्भवेत् ॥ ४० ॥ तृतीये चंद्रमांदी च षष्ठे वापि युते द्विज ॥ कृमिकुष्ठादिना सत्त्वमरणं च विनिर्दिशेत् ॥ ४१ ॥ तृतीये गुरुणा दृष्टे युक्ते शोकादिना मृतिः ॥ तृतीये भृगुयुग्दृष्टे मेहरोगेण वै मृतिः ॥ ४२ ॥ बहुयुक्ते तृतीये च बहुरोगयुता मृतिः ॥ तृतीयके तु सत्खेटैर्योगे दृष्टियुतेथ वा ॥ ४३ ॥ तथैव चन्द्रयोगे च तत्तद्रोगेण वै मृतिः ॥ अनेन योगभावेन तस्य मृत्युः सुनिश्चितः ॥ ४४ ॥

अथ निधनदेशभेदमाह ।

तृतीये शुभयोगेन शुभदेशे मृतिर्भवेत् ॥ पापेन कीकटे देशे मिश्रे मिश्रस्थले मृतिः ॥४५॥ तृतीये गुरुशुक्राभ्यां योगे ज्ञानेन वै मृतिः ॥ गुरुशुक्रातिरिक्तान्ययोगे· शिथिलता मृतौ ॥ ४६ ॥ मिश्रे मिश्रा मृतिरिति एवं कर्माणि विप्र भोः ॥ कर्मभावे विशेषेण फलदाता द्विजोत्तम ॥ ४७ ॥ लग्नद्वादशमध्ये च शन्यादित्रितयं यदि ॥ स्थित

पित्रोर्न संस्कारं कुर्वीत निजहस्ततः ॥ ४८ ॥ लग्नादीनां च भावानां पूर्वार्द्धे द्वादशादिकम् ॥ परार्द्धे स्थितमन्यादि वीक्षितोपि न संशयः ॥ ४९ ॥ लग्नादि यस्य मध्ये तु शुभग्रहनिरीक्षितम् ॥ नामयोगं विजानीयात्पुरा शंभुप्रणोदितम् ॥ ५० ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे निधनकथनं नाम सप्तविंशतितमोऽध्यायः ॥ २७ ॥

पराशर उवाच ।

अथातः संप्रवक्ष्यामि राजयोगादिकं परम् ॥ ग्रहाणां स्थानभेदेन राशिदृष्टिवशात्फलम् ॥ १ ॥ तपःस्थानाधिपो मंत्री मंत्राधीशो विशेषतः ॥ उभावन्योन्यसंदृष्टौ जातश्चेदिह राज्यभाक् ॥ २ ॥ यत्र कुत्रापि संयुक्तौ तौ वापि समसप्तमौ ॥ राजवंशोद्भवो बालो राजा भवति निश्चितम् ॥३॥ वाहनेशस्तथा माने मानेशो वाहने स्थितः ॥ बुद्धिधर्माधिपाभ्यां तु दृष्टश्चेदिह राज्यभाक् ॥ ४ ॥ सुतेशकर्मेशसुखेशलग्ननाथा यदा धर्मपसंयुताश्चेत् ॥ नृपोन्तरश्चेदिह वारणाढ्यः स्वतेजसा व्याप्तादिगंतरालः ॥ ५ ॥ सुखकर्माधिपौ चैव मंत्रिनाथेन संयुतौ ॥ धर्मेशेनाथ वा युक्तौ जातश्चेदिह राज्यभाक् ॥ ६ ॥ सुतेश्वरो धर्मपसंयुतश्चेल्लग्नेश्वरेणापि युतो विलग्ने ॥ सुखेऽथ वा मानगृहेऽथ वा स्याद्राज्याभिषिक्तो यदि राजवंश्यः ॥ ७ ॥ धर्मस्थाने गुरुक्षेत्रे स्वगृहे भृगुसंयुते ॥ पंचमाधिपसंयुक्ते जातश्चेदिह राज्यभाक् ॥ ८ ॥ निशार्द्धाच्च दिनार्द्धाच्च परं सार्द्धद्विनाडिका ॥ शुभो तदुद्भवो राजा धनी वा तत्समोपि वा ॥ ९ ॥ चंद्रः कविं कविश्चन्द्रं पश्यत्यपि तृतीयगः ॥ शुक्राच्चंद्रे ततः शुक्रे तृतीये वाहनार्थवान् ॥ १०॥

अथ द्वादशयोगमाह ।

लग्नवित्तौ स्वदुश्चिक्यौ त्रितुर्यौ तुर्यपंचमौ ॥ द्विपात्मजौ षष्ठमारौ स्त्रीरन्ध्रौ मृतिभाग्यकौ ॥ ११ ॥ धर्मकर्मौ खलाभौ च रिष्फलाभौ

तनुव्ययौ ॥ पुष्कला लाभयोगाद्यं राजभृत्यं चमूपकम् ॥ १२ ॥ अमात्यं दारुणं कर्म राजयोगं प्रियामृतिम् ॥ भाग्यव्ययं राजयोगं भूमिद्रव्यमृणव्ययम् ॥ १३ ॥ वित्तहानिर्द्वादशैते योगा वै सर्वदा स्मृताः ॥ १४ ॥

अथ चतुर्विधसंबंधमाह ।

प्रथमः स्थानसंबंधो दृष्टिजस्तु द्वितीयकः ॥ तृतीयस्त्वेकतो दृष्टिः स्थित्येकत्र चतुर्थकः ॥ १५ ॥ अन्योन्यगौ तथा स्वे स्वे संयुतावन्यभे स्थितौ ॥ पूर्णेक्षितौ मिथो वापि चैकवर्गगतौ यदा ॥ १६ ॥

अथाग्रे राजाऽमात्ययोगादिबाधकमाह ।

तदा योगो भवेत्तत्र विबलो नैव योऽसकृत् ॥ शत्रुयुक्तेक्षितो पापवीक्षितो नैव योगकृत् ॥ व्ययमृत्युषडायस्थावथवा समसंयुतौ ॥ १७ ॥ यदाऽधीशौ तदाप्यत्र भवतो नैव योगदौ ॥ राजामात्यादियोगानां वक्रगौ नाशकारकौ ॥ १८ ॥

अथ पारिजातादिशुभाशुभविचारमाह ।

त्रिषडायाष्टरिष्फेशाः पारिजाते व्यवस्थिताः दायिकान्यभवे भावे यत्र ये ये विचारिताः ॥ १९ ॥ द्वितीये चोत्तमास्ते ते तृतीये चान्यदा मताः ॥ चतुर्थे ते च राजानः पंचमे गुरवो मताः ॥ २० ॥ भूदेवाश्च तथा षष्ठे देवा ज्ञेयाश्च सप्तमे ॥ अष्टमे पशवो ज्ञेया दुःखदाश्चात्र जन्मनि ॥ २१ ॥ दुःस्था ६ । ८ । १२ । श्चैव भवंत्येते तदा तेनैव बाधकाः ॥ केंद्रकोणस्थिताश्चैव बाधकाश्चात्र जन्मनि ॥ २२ ॥ विषमे च भवेत्स्त्रीणां समे वै पुरुषो मतः ॥ षष्ठे वै चोरितं द्रव्यं ह्यष्टमे हननं कृतम् ॥२३॥ हननं हरणं रिष्फे तृतीये कैतवं कृतम् ॥ पौंश्चल्यं बंधने प्रोक्तं कृतघ्नत्वं भवेत्कृतम् ॥ २४ ॥

अथ पारिजातादिफलमाह ।

तन्वीशः पारिजातस्थस्तदा दाता भवेन्न हि ॥ उत्तमे चोत्तमो दाता

गोपुरे पुरुषत्वयुक् ॥ २५ ॥ सिंहासने भवेन्मान्यः शूरः पारावतांशके ॥
सभासदो देवलोके द्वितीये च मुनिर्मतः ॥ २६ ॥ ऐरावते
गजे दुष्टो दिग्योगो न भवेद्ध्रुवम् ॥ रथे ४ शो वापि जायेशो राज्येशोप्येवमेव
हि ॥ २७ ॥ पारिजाते सुताधीशो विद्या चैव कुलोचिता
॥ उत्तमे चोत्तमा विद्या गोपुरे भवनांकिता ॥ २८ ॥ सिंहासने
तथा वाच्या साचिव्येन युता तथा ॥ पारावते तथा वाच्यं ब्रह्मविद्यासमन्वितम्
॥ २९ ॥ सुतेशे देवलोकस्थे कर्मयोगान्वितो भवेत् ॥
उपासना द्वितीये स्याद्भक्तिस्त्वैरावते भवेत् ॥ ३० ॥ धर्मेशे पारिजातस्थे
तीर्थकृत्त्वत्र जन्मनि ॥ पूर्वेंपि मनुजो वाच्यो ह्युत्तमे चोत्तमो
भवेत् ॥ ३१ ॥ गोपुरे मखकर्ता च परे चैवात्र जन्मनि ॥ सिंहासने
भवेद्वीरः सत्यवादी जितेंद्रियः ॥ ३२ ॥ सर्वधर्मपरित्यागी धर्मैकपदमाश्रितः
॥ पारावते परे चैव हंसश्चैवात्र जन्मनि ॥ ३३ ॥ लगुडी
पितृदंडी स्याद्देवलोके न संशयः ॥ द्वितीये चेंद्रपदं गच्छेत्कृत्वा वै
हयमेधकम् ॥ ३४ ॥ ऐरावते तु धर्मात्मा स्वयं धर्मो भविष्यति ॥
श्रीरामः कुंतिपुत्रो वा द्वितीयो न भविष्यति ॥ ३५ ॥ पारिजातादिकानांच
फलमेवैकसंस्थितम् ॥

अथ विशेषयोगफलमाह ।

अथ योगफलं ब्रूमो ज्ञातव्यं च विशेषतः ॥ ३६ ॥ लक्ष्मीस्थानं
त्रिकोणं च विष्णुस्थानं च केन्द्रकम् ॥ तयोः संबंधमात्रेण
राजयोगादिकं भवेत् ॥ ३७ ॥ केन्द्रपुत्रेशयोर्योगे योगोऽमात्याभिधो
भवेत् ॥ पारिजातादिके तौ च तदा सप्रबलो भवेत् ॥ ३८ ॥
लग्नेशेन धनेशाद्यान्नैव योगः सुखाधिपात् ॥ मंत्रेशोऽमात्यतां
याति सप्तमाधीशयोगतः ॥ ३९ ॥ कर्मेशस्य तु योगेन राजा
साचिव्यतामियात् ॥ केंद्रधर्मेशयोर्योगे राजा वै राजवंदितः ॥ ४० ॥
धर्मकर्माधिपौ चैव व्यत्यये तावुभौ स्थितौ ॥ युक्तश्चेद्वै तदा वाच्यः

सर्वसौख्यसमन्वितः ॥ ४१ ॥ पारिजाते स्थितौ तौ तु नृपो लोकानुशिक्षकः ॥ उत्तमे चोत्तमो भूपो गजवाजिरथादिमान् ॥ ४२॥ गोपुरे नृपशार्दूलो पूजितांघ्रिर्नृपैर्भवेत् ॥ सिंहासने चक्रवर्ती सर्वक्षोणीप्रपालकः ॥ ४३ ॥ अस्मिन्योगे हरिश्चंद्रो मानवश्चोत्तमस्तथा ॥ बलिर्वैश्वानरो राजा अन्ये चैव तु चक्रपाः ॥ ४४ ॥ कलौ युगे च भविता तथा राजा युधिष्ठिरः ॥ भविता शालिवाहश्च तथा विजयाभिनंदनः ॥ ४५ ॥ नागार्जुनस्तथा भूपस्तदन्ये चैव गोपुरे ॥ पारावतांशकेन्ये च जाता मन्वादयस्तथा ॥ ४६ ॥ देवलोके तु प्रथमे हरेश्चवावतारणम् ॥ मत्स्यादिकल्किपर्यन्ताः सर्वे वर्गोद्भवा मताः ॥ ४७ ॥ द्वितीये देवलोके तु ज्ञेयाश्चेंद्रादयः परे ॥ ऐरावते च प्रथमे जातः स्वायंभुवो मनुः ॥ ४८ ॥ एवं सर्वप्रकारेण ज्ञात्वा चैव विचक्षणः ॥ कोणकेन्द्रादिनाथानां योगः सर्वविधायकः ॥ ४९ ॥ चतुःकेन्द्राधिपौ द्वौ च कोणपौ च धनाधिपः ॥ ऐरावतादिसंस्थास्तेऽकुर्वंल्लोकोत्तरोत्तरम् ॥ अनेनैव प्रकारेण वेत्ति सर्वत्र बुद्धिमान् ॥ ५० ॥

इति श्रीबृहत्पाराशरहोरापूर्वखण्डसारांशे राजयोगादिविचारकथनं नामाऽष्टाविंशोऽध्यायः ॥ २८ ॥

पराशर उवाच ।

अथातः संप्रवक्ष्यामि राजयोगान्द्विजोत्तम ॥ येषां विज्ञानमात्रेण नृपपूज्यो जनो भवेत् ॥ १ ॥ ये ये योगाः पुरा शंभुभाषिताः शैलजाग्रतः ॥ तेषां सारमहं वक्ष्ये तवाग्रे द्विजनन्दन ॥ २ ॥ चिंतयेत्कारके लग्ने जनुर्लग्नेथ वा द्विज ॥ राजयोगप्रदातारौ लग्नौ द्वौ प्रणतोदितौ ॥ ३ ॥ आत्मकारकपुत्राभ्यां राजयोगं प्रकल्पयेत् ॥

तनुपंचमनाथाभ्यां तथैव द्विजसत्तम ॥ ४ ॥ विलग्नात्पंचमाधीशः पुत्रात्माकारको द्वयोः ॥ विप्रसंबंधयोगेन ज्ञेया वीर्यबलान्विताः ॥५॥ लग्नेऽथ सप्तमे वापि लग्नेशे सप्तमाधिपे ॥ पुत्रात्मकारकौ विप्र लग्ने वा सप्तमेपि च ॥ ६ ॥ संबंधे वीक्षिते तत्र दृष्टैवं पंचमाधिपे ॥ उच्चता च नवांशस्थे शुभग्रहनिरीक्षिते ॥ ७ ॥ महाराजेति योगोयं सोत्रजातः सुखी नरः ॥ गजवाजिरथैर्युक्तः सेनासंगमनेकधा ॥ ८ ॥ भाग्येशात्कारके लग्ने पंचमे सप्तमेऽपि वा ॥ राजयोगप्रदातारौ गजवाजिधनैरपि ॥ ९ ॥ कारकाद्धिचतुर्थे च पंचमे भावगे द्विज ॥ शुभखेटौ न संदेहो राजयोगं ददाति च ॥ १० ॥ कारकात्रितये षष्ठे राश्योरुभयपापयुक् ॥ राजवंशोद्भवो विप्र राजयोगस्तथा भवेत् ॥ ११ ॥ लग्नाधीशाद्द्यूननाथाद्धने तुर्ये च पंचमे ॥ शुभखेटयुते विप्र राजा च भवति ध्रुवम् ॥ १२ ॥ तृतीये षष्ठभे पापे राजा च भवति ध्रुवम् ॥ योगद्वये शुभे पापे कथं स्यात्फलनिश्चयः ॥ १३ ॥ न दरिद्री भवेज्जीवो न राजा जायते द्विज ॥ समानकुलजः प्राज्ञ प्रतिष्ठा गौरवान्विता ॥ १४ ॥ कारके पंचमे शुक्रः सितेन्दुयुतवीक्षितः ॥ तन्वारूढपदे लग्ने राजवर्गी भवेन्नरः ॥ १५ ॥ जन्मांगे वापि कालांगे लिप्तांगे खेचरेक्षिते ॥ रव्यादयस्त्रयस्थाने राजयोगप्रदायकाः ॥ १६ ॥ जन्मांगे च हि होरांगे कुलांगे येन केन चित् ॥ रव्यादिदृष्टिमात्रेण स राजा भवति ध्रुवम् ॥ १७ ॥ स्वक्षेत्रे तु नवांशे वा द्रेष्काणे भानुजादयः ॥ लग्नं च सप्तमं विप्र पश्यंति राजयोगदाः ॥ १८ ॥ पूर्णदृष्टे पूर्णयोगमर्द्धं चार्द्धे विधीयते ॥ पादेन पादयोगं च राजयोगमिदं क्रमात् ॥ १९ ॥ षट्कुंडल्यंतरे विप्र पश्यंति भास्करादयः ॥ राजयोगप्रदातारौ निर्विशंकं द्विजोत्तम ॥ २० ॥ लग्नस्थाने पूर्णदृष्ट्या सप्तमे स्वल्पवीक्षिते ॥ स्वल्पराज्यप्रदो विप्र षड्लग्नेषु विचिंतयेत् ॥ २१ ॥ एवं नवांशकुं-

डल्यां द्रेष्काणेपि विचिन्तयेत् ॥ लग्नसप्तमयोः खेटो राजयोगप्रदायकः ॥ २२ ॥ उच्चग्रहे राजयोगो लग्नद्वयमथापि चेत् ॥ राशेर्द्रेष्काणतोंऽशाच्च राशेरंशादथापि वा ॥ २३ ॥ यद्वा राशिदृकाणाभ्यां लग्ने दृष्टे तु योगतः ॥ प्रायेणेदं जातकं तु प्रभूणामेव दृश्यते ॥ २४ ॥ जन्मकालघटीलग्न एकेनैव निरीक्षिते ॥ उच्चारूढे तु संप्राप्ते चंद्राक्रांते विशेषतः ॥ २५ ॥ क्रांते वा गुरुशुक्राभ्यां केनाप्युच्चग्रहेण वा ॥ दुष्टार्गलाग्रहाभावे राजयोगो न संशयः ॥ २६ ॥ शुभारूढे तत्र चंद्रे धने देवगुरुस्तथा ॥ उच्चदृष्टे ग्रहे वाथ ह्युच्चखेटे तथा ग्रहे ॥ २७॥ राजयोगप्रदाता च निर्विशंकं द्विजोत्तम ॥ यत्र येपि शुभारूढे चंद्रे साति समानकम् ॥ २८ ॥ उच्चग्रहे राजयोगो लग्नद्वयमथापि वा ॥ आरूढमवलंबाश्च योगा वाहनदाः स्मृताः ॥ २९ ॥ शुक्राच्चंद्रे ततः शुक्रे तृतीये वाहनार्थवान् ॥ अन्योन्यं पश्यतो विप्र दैत्याचार्यनिशाधिपौ ॥ ३० ॥ आरूढेपि तृतीयस्थे तथा संबंधकारकः ॥ जन्मलग्नेपि संयोगे जायते वाहनार्थवान् ॥ ३१ ॥ शुभे लग्ने शुभे त्वर्थे तृतीये पापखेचरैः ॥ चतुर्थे तु शुभे प्राप्ते राजा वा तत्समोपि वा ॥ ३२ ॥ उच्चो वा हरिणांको वा जीवो वा शुक्र एव वा ॥ एको बली धनगतः श्रियं दिशति देहिनः ॥ ३३ ॥ लग्नं पश्यंति ये खेटास्ते सर्वे शुभदायिनः ॥ नीचखेटोपि लग्ने चेत्पश्येद्राजाप्रकीर्तितः ॥ ३४ ॥ षष्ठाष्टमे तृतीये च लाभे संबंधनीचकृत् ॥ यो ग्रहः पश्यते लग्नं राजयोगप्रदायकः ॥ ३५ ॥ राजयोगो जन्मलग्नं पश्येदुच्चग्रहो यदि ॥ षष्ठाष्टमगते नीचे लग्ने पश्यति योगकृत् ॥ ३६ ॥ षष्ठाष्टमाधिपे नीचे लग्नं पश्यति वाथ वा ॥ तृतीये लाभगे नीचे लग्नं पश्यति राज्यदः ॥ ३७ ॥ षष्ठाष्टमाधिपौ खेटौ शुभौ यौ कौ च नाश्रितौ ॥ पश्यतो जन्मलग्नं च राजयोग उदाहृतः ॥ ३८ ॥ चरे तु पंचमे षष्ठे स्थिरेतु नवमे द्विज ॥ उभये केंद्रसंदृष्टे राजयोगप्र-

दायकः ॥ ३९ ॥ चतुर्थे शुभखेटश्चेद्राजयोगः प्रकीर्तितः ॥ बलयुक्तचतुर्थोंपि राजादिषु यथोत्तरम् ॥ ४० ॥ चरे तुर्ये स्वल्पफलं स्थिरे तुर्ये च मध्यमम् ॥ द्विःस्वभावे पूर्णफलं राजयोगप्रदायकः ॥ ४१ ॥ अग्रहात्सग्रहो ज्यायानिति रीत्या विचिंतयेत् ॥ उच्चयुक्तो ग्रहः कश्चिल्लाभगो वा चतुर्थगः ॥ ४२ ॥ धनास्थितो वा लग्नं चेत्पश्येद्वाहनकारकः ॥ राजयोगाद्यभावे तु धनधान्यविनिर्णयः ॥ ४३ ॥ शुभपापदृशा लग्ने ततः केन्द्रादियोगतः ॥ यस्य लग्नांशके सौम्याः प्राबल्यं तस्य निश्चितम् ॥ ४४ ॥ कुबेरश्च पतंगश्च हालांशश्च किरीटकः ॥ विह्वलांशसमायांशमोहनः किन्नरांशकः ॥ ४५ ॥ भुजंगेन्द्रांशकौ लीलाकोकिलांशोत्तमः स्मृतः ॥ राशीनां द्वादशांशेषु ग्रहस्थित्या फलं वदेत् ॥ ४६ ॥ केन्द्रांशाश्चैषु शुभदा राजयोगफलप्रदाः ॥ द्विषडष्टैकादशांशामध्यमाः परिकीर्तिताः ॥ ४७ ॥ अन्येशास्त्वधमा ज्ञेया एवमंशविनिर्णयः ॥ ग्रहाणां चैव लग्नानामंशगत्या फलं वदेत् ॥ ४८ ॥ लग्नगेष्वंशगेष्वेषु जायते यदि मानवः ॥ यस्य जन्मानि चंद्रो वा युक्तः स्वांशेषु संस्थितः ॥ ४९ ॥ तस्यैते कथिता योगा सफलाः परिकीर्तिताः ॥ पूर्णं न्यूनफलं विप्र ग्रहयुक्तानुसारतः ॥ ५० ॥

अथ राजचिह्नयोगानाह ।

कारकात्तूर्यभावस्थौ सितेंदू द्विजसत्तम ॥ आदावंते विशेषश्च राजचिह्नेन संयुतः ॥ ५१ ॥ ध्वजा वा दुंदुभेर्नादास्तिष्ठंति च दिवानिशम् ॥ सर्वेषां चैव योगानामविरुद्धान् विचिंतयेत् ॥ ५२ ॥

अथ धीयोगानाह ।

कारके वा तथारूढे त्रिषष्ठे चागता ग्रहाः ॥ वीक्षंति कारकाल्लग्नं मातृनाथेन दृष्टियुक् ॥ ५३ ॥ बुद्धिमाञ्जायते बालस्तीव्रबुद्धिर्विच-

क्षणः ॥ तथा तृतीयखेटेशो कारकलग्नौ वीक्षते ॥ ५४ ॥ तथापि पूर्ववद्योगात्सुधीमाञ्जायते नरः ॥ शास्त्रवेत्ता कविर्दक्षो भवत्यत्र न संशयः ॥ ५५ ॥

अथ सुखयोगमाह ।

लग्नाच्च कारकाद्वापि चतुर्थे यस्य वै द्विज ॥ लग्नकारकयोर्दृष्ट्या भवंति सुखिनो नराः ॥ ५६ ॥

अथ सेनाधीशयोगमाह ।

कारके वा तथा रूढे लग्नाद्वा सप्तमाद्विज ॥ तृतीये षष्ठभे पापाः सेनाधीशो भवेन्नरः ॥ ५७ ॥

अथ प्रधानयोगानाह ।

राज्येशोपि जनुर्लग्नादमात्येशयुतेक्षिते ॥ अमात्यकारकेणापि प्रधानत्वं नृपालये ॥ ५८ ॥ लाभेचवीक्षिते लाभे पापदृष्टिविवर्जिते ॥ तथा राज्यालये विप्र प्रधानत्वं कुलेपि च ॥ ५९ ॥ अमात्यकारकेणापि कारकेन्द्रेशसंयुते ॥ तीव्रबुद्धियुतो बालः सेनाधीशोऽपि जायते ॥ ६० ॥ स्वक्षेत्रेऽथ च मध्ये वा वार्द्धके द्विजसत्तम ॥ ॥ ६१ ॥ क्रमेण भाग्यवृद्धिः स्यान्नृपवेशोथ वा भवेत् ॥ ६२ ॥ पंचमात्कारके लग्ने सप्तमे नवमेपि वा ॥ राजयोग इति प्रोक्तो विख्यातो विजयी भवेत् ॥ ६३ ॥ कारकात्केंद्रकोणेषु तुंगर्क्षे चापि संस्थिते ॥ भाग्यपेन युतो दृष्टो राजमंत्री प्रजायते ॥ ६४ ॥ कारके यस्य राशीशे लग्नगे संयुतेक्षिते ॥ मंत्रित्वमुख्ययोगोऽयं वार्द्धके नात्र संशयः ॥ ६५ ॥ कारके शुभसंयुक्ते पंचमे सप्तमेपि वा ॥ यत्कारके यदा प्राप्ते तत्कारकधनं लभेत् ॥ ६६ ॥ नीचखेटबलैर्युक्ते उक्तस्थानगतैर्द्विज ॥ तदा शुभफलं वाच्यं कारकेशेन दृष्टियुक् ॥ ६७ ॥ भाग्यारूढपदे लग्ने कारकान्नवमेपि वा ॥ राज्ययोग-

प्रदातारौ निर्विशंकं द्विजोत्तम ॥ ६८ ॥ लाभेशो लाभभवने पापदृष्टिविवर्जितः ॥ कारके शुभसंयुक्ते लाभं तस्य नृपालये ॥ ६९ ॥ शुभर्क्षे शुभसंयुक्ते शुभदृष्टेथ राज्यभाक् ॥ धनुर्लग्ने तथा रूढे एतस्मिन्राज्यभाग्भवेत् ॥ ७० ॥

अथ राजयोगरसायनमाह ।

स्वांशे वर्गोत्तमे केंद्रे पुण्येशः कारकोऽथ वा ॥ राज्यारूढपदे वापि तदा सिध्येद्रसायनम् ॥ ७१ ॥ कारके कारकारूढे धने स्वक्षौंच्चगे खगे ॥ ऋद्धिर्वा सिद्धिसंयुक्ते तथा तंत्ररसायनम् ॥ ७२ ॥ धर्मकर्माधिपौ स्वोच्चे तथा वर्गोत्तमे यदि ॥ नवमे पंचमे लाभे राज्याप्तिर्वा रसायनम् ॥ ७३ ॥ मूलत्रिकोणगे लग्ने कारकेशो द्विजोत्तम ॥ मंत्रनाथेन संयुक्तः कीर्तियुक्तरसायनम् ॥ ७४ ॥ धर्मेशो धर्मलाभस्थः पंचमेशोपि पंचमे ॥ कारकेंद्रयुते दृष्टे स्वेच्छापूर्णधनानि च ॥ ७५ ॥ सोच्चादि पदसंयुक्ते कारकेशः शुभालये ॥ सततं सुखमाप्नोति धातुभस्मरसायनात् ॥ ७६ ॥ सुखेशो मानभावस्थे मानेशे सुखसंयुते ॥ लग्नकारकयोर्दृष्टे भिषग्योगोतिसंमतः ॥ ७७ ॥ कर्मेशो नवमे यस्य सुखेशः पचमेपि वा ॥ परस्परं तदीशो वा स्वर्णाप्तिस्तत्र कर्मतः ॥ ७८ ॥ वागीशः कारके लग्ने स्वोच्चादिपदसंयुते ॥ भौमांशो मृत्युरादित्यः सौख्येशः कालसंज्ञकः ॥ ७९ ॥ सौम्यांशेर्द्धप्रहरकः स्पष्टकर्म स्वदेशतः ॥ एवं प्राणपदस्पष्टे पूर्वाध्याये मया कृतम् ॥ ८० ॥ गुलिके कारकांशे च पूर्णेन्दुवीक्षिते द्विज ॥ सत्यं चौर्याद्यनीतिश्च स चौरो जायतेऽथवा ॥ ८१ ॥ सगुलिके कारकांशे ह्यन्यग्रहयुतेक्षिते ॥ बुधदृष्टियुते वापि अंडवृद्धिः प्रजायते ॥ ८२ ॥ कारकांशे स्थिते केतौ रविसोमनिरीक्षिते ॥ बलवीर्येण रहितो जायते सोपि मानवः ॥ ८३ ॥ सकेतौ कारकांशेतु बुधशुक्रानिरीक्षिते ॥ राजयोनौ जन्म चेत्स्या-

ह्वासीपुत्रोथ वा भवेत् ॥ ८४ ॥ सकेतौ कारकांशे वा भृगुभास्करवीक्षिते ॥ सिद्धं शास्त्रांतरे ग्राह्यं विशेषं राजयोगकम् ॥ ८५ ॥ रुद्रेण यत्पुरा प्रोक्तं तन्मया गदितं द्विज ॥ देयं स्वशिष्यपुत्रेभ्यो न देयं यस्य कस्यचित् ॥ ८६ ॥ कुपुत्राय कुशिष्याय प्राणांते न प्रकाशयेत् ॥ गुह्याद्गुह्यमिदं शास्त्रं प्राप्तं शंभुप्रसादतः ॥ ८७ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे राजयोगादिकथनं
नामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

पराशर उवाच ।

अथातः संप्रवक्ष्यामि धनयोगं विशेषतः ॥ पंचमे तु भृगुक्षेत्रे तस्मिन् शुक्रेण संयुते ॥ १ ॥ लाभे शनैश्चरयुते बहुद्रव्यस्य नायकः ॥ पंचमे सौम्यक्षेत्रे तस्मिन्सौम्ययुते यदि ॥ २ ॥ लाभे च चंद्रभौमौ तु बहुद्रव्यस्य नायकः ॥ पंचमे तु शनिक्षेत्रे तस्मिन्सूर्यसुतो यदि ॥ ३ ॥ लाभे सोमात्मजस्थे वा बहुद्रव्यस्य नायकः ॥ पंचमे तु रविक्षेत्रे तस्मिन्नवियुते यदि ॥ ४ ॥ लाभे रवींदुपूज्यस्थे बहुद्रव्यस्य नायकः ॥ पंचमे तु शनिक्षेत्रे तस्मिन् शनियुते यदि ॥ लाभे भौमेन संयुक्ते बहुद्रव्यस्य नायकः ॥ ५ ॥ पंचमे तु गुरुक्षेत्रे तस्मिन् गुरुयुते यदि ॥ लाभे तु चंद्रभौमौ चेद्बहुद्रव्यस्य नायकः ॥ ६ ॥ भानुक्षेत्रगते तस्मिल्लँग्ने भानौ स्थिते यदि ॥ भौमेन गुरुणा युक्ते दृष्टौ वा स्याद्युतो धनैः ॥ ७ ॥ चंद्रक्षेत्रगते लग्ने तस्मिंश्चंद्रयुते यदि ॥ जीवभौमयुते यस्तु दृष्टे जातो धनी भवेत् ॥ ८ ॥ भौमक्षेत्रगते लग्ने तस्मिन्भौमयुते यदि ॥ सोमशुक्रार्कजैर्युक्ते दृष्टे श्रीमान्नरो भवेत् ॥ ९ ॥ गुरुक्षेत्रगते लग्ने तस्मिन्गुरुयुते यदि ॥ सौम्यभौमयुते दृष्टे जातो यस्तु धनीश्वरः ॥ १० ॥ बुधक्षेत्रयुते तस्मिन् दृष्टे सौम्ययुते यदि ॥ शनिशुक्रयुते दृष्टे जातो यस्तु धनी नरः ॥ ११ ॥ भृगुक्षेत्रे गते लग्ने

तस्मिन् भृगुयुते यदि ॥ शनिसौम्ययुते दृष्टे जातो यस्तु धनी नरः ॥ ॥ १२ ॥ ये ये ग्रहा धर्मप ९ बुद्धिपाभ्यां युक्ताश्च दृष्टाश्च सुखप्रदास्ते ॥ रंध्रेश्वरादिव्ययपैर्युताः स्युः शोकप्रदा मारकनायकैश्च ॥ १३ ॥ क्रूरसौम्यविभागेन स्वस्थानाद्दिवसास्तथा ॥ ग्रहाणां स्थानभेदेन राशिदृष्टिवशात्फलम् ॥ १४ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे धनयोगविचारकथनं
नाम त्रिंशोऽध्यायः ॥ ३० ॥

अथ दरिद्रयोगाध्यायमाह ।

लग्नेशे वै रिष्फगते रिष्फेशे लग्नमागते ॥ मारकेशयुते दृष्टे जातः स्यान्निर्धनो नरः ॥ १ ॥ लग्नाधिपे शत्रुगृहं गते वा षष्ठेश्वरे लग्नगतेपि वा चेत् ॥ विलग्नपे मारकनाथदृष्टे जातो भवेन्निर्धनकोपि मुख्यः ॥ २ ॥ लग्नेंदू केतुयुक्तौ वा लग्नेशे निधनं गते ॥ मारकेशयुते दृष्टे जातो वै निर्धनो भवेत् ॥ ३ ॥ षष्ठाष्टमव्ययगते लग्नेशे पापसंयुते ॥ मारकेशयुते दृष्टे राजवंश्योऽपि निर्धनः ॥ ४ ॥ विलग्ननाथेरिविनाशरिष्फनाथेन युक्ते यदि पापदृष्टे ॥ मित्रात्मजेनाथयुतेपि दृष्टे शुभैर्न दृष्टे स भवेद्दरिद्रः ॥ ५ ॥ मित्रेशो धर्मनाथश्च षष्ठकर्मस्थितौ क्रमात् ॥ दृष्टौ चेन्मारकेशेन जातः स्यान्निर्धनो नरः ॥ ६ ॥ पापग्रहे लग्नगते राज्यधर्माधिपौ विना ॥ मारकेशयुते दृष्टे जातः स्यान्निर्धनो नरः ॥ ७ ॥ यद्भावेशो रंध्ररिष्फारिसंस्थो यद्भावस्था रंध्ररिष्फारिभेशाः ॥ पापैर्दृष्टो मंददृष्टोऽथ वा चेद्दुःखाक्रांतश्चंचलो निर्धनः स्यात् ॥ ८ ॥ चंद्राक्रांतनवांशेशो मारकेशयुतो यदि ॥ मारकस्थानगो वापि जातोऽसौ निर्धनो नरः ॥ ९ ॥ विलग्नेशनवांशेशौ रिष्फषष्ठाष्टगौ यदि ॥ मारकेशयुतौ दृष्टौ जातोऽसौ निर्धनो नरः ॥ १० ॥ धनसंस्थौ च भौमेंदू

कथितौ धननाशकौ ॥ बुधेक्षितौ महावित्तं कुरुतस्तत्रगः शनिः ॥ ११ ॥ निःस्वतां कुरुते तत्र रविर्नित्यं यमेक्षितः ॥ महाधनयुतं ख्यातं शन्यदृष्टः करोत्यसौ ॥ १२ ॥ धनभावगताः सौम्याः कुर्वंत्येव धनं बहु ॥ बुधदृष्टो गुरुस्तत्र निर्धनं कुरुते नरम् ॥ १३ ॥ बुधश्चंद्रेक्षितस्तत्र सर्वस्वं हंति निश्चितम् ॥ क्रूरखेटादियोगैश्च दारिद्र्यं संभवेन्नृणाम् ॥ १४ ॥ ये ये ग्रहा धर्मपबुद्धिपाभ्यां युक्ता न दृष्टा बहुदुःखदास्ते ॥ रंध्रे चरादिव्ययपैर्युतास्ते व्ययप्रदा मारकनायकेन ॥१५॥ प्रोक्तयोगे यदा भावे दरिद्रो जायते ध्रुवम् ॥ शुभस्थानगताः पापाः पापस्थाने गताः शुभाः ॥ १६ ॥ धनार्तिर्जायते बाला भोजनेन प्रपीडितः ॥ कदापि लभतेऽन्नं च वस्त्राथ चिंतयान्वितः ॥ १७ ॥ कारकाद्वा विलग्नाद्वा रंध्रे रिष्फे द्विजोत्तम ॥ लग्नकारकयोर्दृष्ट्या दरिद्रार्तियुतो नरः ॥ १८ ॥ लग्नाद्वा कारकाद्वापि द्वादशे यस्य वै द्विज ॥ लग्नकारकयोर्दृष्ट्या व्ययशीलो भवेन्नरः ॥ १९ ॥ लग्नेशो वीक्षते लग्नं कारकेशोपि कारकम् ॥ प्राबल्यव्ययशीलोऽपि जायते द्विजसत्तम ॥ २० ॥

अथ बंधनयोगमाह ।

पश्चाल्लग्नात्कारकाद्वा यदा वा वित्तद्वादशे ॥ पंचमे नवमे वापि तथा षष्ठेपि द्वादशे ॥ २१ ॥ तृतीयैकादशे विप्र चतुर्थे दशमेपि वा ॥ ग्रहसाम्ये तथा विप्र एकमेकं द्वयं द्वयम् ॥ २२ ॥ तथा त्रयं त्रयं तिष्ठेदिति रीत्या नभश्चराः ॥ वित्ते द्वौ द्वादशे द्वौ च तथा स्याच्च त्रये त्रयम् ॥ २३ ॥ इति क्रमेण साम्येन बंधकारक उच्यते ॥ शृंखलाबंधयोगोऽपि जायते द्विजसत्तम ॥ २४ ॥ राशीनां राशिनाथानां शुभसंबंधके द्विज ॥ तदा निरोधः संजातस्तनुपीडा विधीयते ॥ २५ ॥ द्वादशे द्वितये वापि त्रिकोणे रिष्फषष्ठगे ॥ लाभे त्रये व्योमतुर्ये पापा वै बंधकारकाः ॥ २६ ॥ तथा तत्तद्-

शानां च संबंधं खलखेटतः ॥ प्रहारशृंखलाद्विप्र बंधयोगो न संशयः ॥ २७ ॥ भार्गवात्कारकाद्वापि लग्नारूढपदाद्विज ॥ त्रिकोणस्थो यदा राहुः सूर्यदृष्टोऽपि नेत्ररुक् ॥ २८ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखण्डसारांशे दरिद्रयोगकथनं नामैकात्रिंशोऽध्यायः ॥ ३१ ॥

अथ पूर्वजन्मवर्णनाध्यायः ।

अथ वक्ष्ये विशेषेण पूर्वपापस्य निश्चयम् ॥ नवांशान्मेषमारभ्य मेषादौ हि क्रमाद्वदेत् ॥ १ ॥ निशाकरनवांशाधिपापं निश्चित्य सर्वशः ॥ २ ॥ मेषे मेषनवांशकेषु च क्रमान्मेषस्य भूयाद्वध उक्षण्येवमपराधकं च सुधियो निश्चित्य गोसंज्ञकम् ॥ द्वंद्वे चांशवधस्तथा सुनियतं गर्भेण युक्तो वदेत्कर्के सर्पवधस्तथा सुनियतं सिंहे चतुष्पाद्वधः ॥ ३ ॥ वन्यानां मृगजातीनां वधो दावानलेन हि ॥ सिंहे निश्चित्य मतिमान्वदेच्चांशोपरि द्विज ॥ ४ ॥ कन्यायां च वदेद्विद्वान्पापं स्त्रीत्यागजं मुने ॥ धनस्याहरणं व्याजात्तुलायां च वदेद्बुधः ॥ ५ ॥ वृश्चिके ग्रामचटके वधं चैवांडजस्य हि ॥ मित्रद्रोहकृते ब्रूयाद्धन्विन्यथ विशंकितः ॥ ६ ॥ फलानां वृक्षजातीनां मकरे चौर्यभेदनम् ॥ कुंभे चैवानुसूयंतं वाच्यं विप्र विपाश्चितः ॥ ७ ॥ ब्रूयाद्विप्रधनं मीने पूर्वार्द्धे तु विपाश्चितः ॥ उत्तरार्धे धनादानं तद्वधं परिकल्पितम् ॥ ८ ॥ एकांशे चैकजन्मस्याद्व्यंशे चैव द्विजन्मनी ॥ त्र्यंशे चैव त्रिजन्म स्याच्छेषे जन्मचतुष्टयम् ॥ ९ ॥ एवं सर्वत्र निश्चित्य लग्ने चैवेह जन्मनि कर्काद्या विप्र जन्माद्यं वदेत्सर्वत्र निश्चयम् ॥ १० ॥ अन्यथा जारजो भूयाल्लग्नेन्दुं नेक्षते गुरुः ॥ एवं चाष्टोत्तरशतं नवांशाः परिकीर्तिताः ॥ ॥ ११ ॥ क्षात्रिये क्षत्रियादीनां वैश्ये चैव विडादिकान् ॥ शूद्रे शूद्रादिकान्वाच्यं विप्रे वै ब्राह्मणादिकान् ॥ १२ ॥ परे जन्मनि

जन्म स्याद्बुद्ध्या चैवैहिकं वदेत् ॥ तदीशे स्वोच्चतां प्राप्ते मृते
स्वर्गे गतो भवेत् ॥ १३ ॥ तदीशे नीचतां प्राप्ते नरकादागत्य
जज्ञिवान् ॥ यमत्वे च समाल्लोकान्मित्रे तीर्थे तनुं त्यजेत् ॥ १४ ॥
तदीशे वारिवेश्मस्थे मृतः प्रेतत्वमाप्नुयात् ॥ तस्मादागत्य यज्ञोऽसौ
पापं पुण्यं भुनक्ति हि ॥ १५ ॥ तदीशे पापसंयुक्ते नीचे वापि
स्थिते सति ॥ वृजिनं तामसं पूर्वं कृतं तामसनिश्चितम् ॥ १६ ॥
कुजकेतुसमायुक्ते समस्थे राजसं वदेत् ॥ शुभेष्वुच्चस्थिते वाच्यं
सात्त्विकं वृजिनं बुधैः ॥ १७ ॥ अनेनैव प्रकारेण लग्ने निश्चित्य
बुद्धिमान् ॥ इह जन्मनि संयोज्यं क्रूरसाम्यं समत्वकम् ॥ १८ ॥ सर्वस्य
मानवस्यापि नक्षत्रत्रयमीरितम् ॥ जन्मनक्षत्रमेकं तु द्वितीयं मनुजन्म
च ॥ १९ ॥ त्रिजन्म च तृतीयं स्याद्भ्रातृण्यं मुनिसत्तम ॥ २० ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे पूर्वजन्मवर्णनं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

सुजन्मोवाच ।

आजन्ममृत्युपर्यन्तं जगतः सुखदुःखकम् ॥ ब्रूहि मे कृपया
सौम्य विवाहादि सुतादिकम् ॥ १ ॥

लोमश उवाच ।

सूर्यांगाराग्गुमंदानामंशान्संयोज्य संस्कृतः ॥ तदायुःशरदाद्यस्य
भागं कृत्वा वदेत्फलम् ॥ २ ॥ तद्भागे दुर्व्रतं वाच्यं द्यूनाप्ते पीडनं
क्वचित् ॥ वेदोनाप्ते सुखं किंचित्षडूनाप्ते स्त्रिया भयम् ॥ ३ ॥
दशोनाप्ते हि हृत्पीडा भूपोनाप्ते हि भेषजम् ॥ विंशोनाप्ते स्फुटतनुं
तत्त्वोनाप्ते श्रुतौ व्यथा ॥ ४ ॥ त्रिंशोनाप्ते शीतलादीन् द्विवेदोनाप्ते
भयं मृतेः ॥ पंचाशद्न्यूनकेनाप्ते वारिभीतिर्निगद्यते ॥ ५ ॥ षष्ट्यूनाप्ते

ह्रतं चौरैर्वाह्निं सप्ततिन्यूनह्रत् ॥ खाष्टोनाप्तेऽल्पघातादि नवतिन्यूनाप्तकेषु च ॥ ६ ॥ शतोनाप्ते सुतोत्पत्तिं व्याधिमष्टोत्तरोनके ॥ षोडशोत्तरशतेनाप्तं विवाहं परिकल्पितम् ॥ ७ ॥ विंशाधिकशतेनाप्ते पक्षद्वयंते मृतिर्भवेत् ॥ एवं भागप्रभेदेन जीवानां सुखदुःखकम् ॥ ८ ॥ न्यूनांको भाग्यन्यूनेन शुभाशुभफलं दिशेत् ॥ तेषां योगो द्विभक्ते वा द्वौ बाणप्रयुतौ दलौ ॥ ९ ॥ पूर्वोत्तरौ हि भवतः समाऽसमसुखासुखौ ॥ त्रिभागे तत्त्रिभागे वा घातादल्पान्व्रणान्वदेत् ॥ १० ॥ विस्फोटकं तत्त्रिभागे कल्प्यास्तुल्याः समीक्षिते ॥ तुर्यांशे तच्चतुर्थांशे मरणं मातृकादयः ॥ ११ ॥ धनांशे वित्तहरणं सहजांशे तनोर्मृतिः ॥ मातृमृत्युः सुखांशे तु सुतांशे सुतमृत्युदः ॥ १२ ॥ रिपुभागे रिपोर्मृत्युर्जायांशे स्वस्त्रियो मृतिः ॥ रंध्रांशे ऋणदो मृत्युं भाग्यांशे च प्रभोर्मृतिः ॥ १३ ॥ कर्मांशे पितरं हन्ति लाभांशे नष्टजीविकाम् ॥ व्ययांशे पशुवाहादिमृत्युः स्यान्नियतं द्विज ॥ १४ ॥ लग्नांशे मित्रमृत्युस्याद्गुरूणां सहचारिणाम् ॥ पंचमांशे प्रातिकरस्तत्पंचांशे धनं लभेत् ॥ १५ ॥ षष्ठांशो दुःखदस्तस्य तत्षष्ठांशं च वा दिशेत् ॥ सप्तांशे तद्दशांशे वा घाता वाच्याः शिलादितः ॥ १६ ॥ लग्ने वित्ते शिलाघातो जलघातस्त्रितुर्ययोः ॥ पुत्रे षष्ठे वृक्षघातो मन्दे मृत्यौ चतुष्पदात् ॥ १७ ॥ धर्मे कर्मे कर्कघातो व्यये लाभे सरीसृपात् ॥ एवं स्थितिः स्याद्ग्रहाणां सप्तांशकफलं वदेत् ॥ १८ ॥ आशांशे पुण्यदानादि रुद्रांशे समदुःखकम् ॥ अष्टमांशे मित्रयोगो नवमांशे गुरोर्वदेत् ॥ १९ ॥ अर्कांशेतिव्ययो वाच्यो विश्वांशो १३ मानहानिदः॥ शक्रांशे १४ कलहं वाच्यं तिथ्यंशे १५ चौरकान्वदेत् ॥ २० ॥ भूपांशे १६ परजायादिसंगावाप्तिर्निगद्यते ॥ अत्यष्ट्यंशे १७ हि नोद्वेगो धृत्यंशे १८ शुचमादिशेत् ॥ २१ ॥ अतिधृत्यं १९ शके यात्रा विंशांशे बंधनादिकान् ॥ अर्कौ व्यवहितो यत्र तत्रैव पितृजं

सुखम् ॥ २२ ॥ यत्र चंद्रः स्थितस्तत्र विवाहं परिकल्पितम् ॥ भ्रातृयोगो भवेत्तत्र यत्रांगारकसंस्थितिः ॥ २३ ॥ स्वसायोगो हि यत्र ज्ञो यत्र वाचस्पतिः स्थितः ॥ तत्र पुत्रो यत्र शुक्रस्तत्र कन्या प्रकीर्तिता ॥ २४ ॥ यत्र मंदः स्थितस्तत्र मातृजं सुखमादिशेत् ॥ एवं ग्रहानुसारेण सुखादि परिचिंतयेत् ॥ २५ ॥ लग्नाधीशमदाधीशौ भागादिवेद ४ संगुणौ ॥ कृत्वा तदंतरमिते वर्षे वाच्यो विवाहकः ॥ ॥ २६ ॥ तत्पौ यत्र स्थितौ भावयोगे चांतरके तथा ॥ राशिं विवाहद्विगुणौ तद्वर्षे वा विवाहकम् ॥ २७ ॥ तत्पत्योरंतरं कार्यं राशिभागादिकान्हरेत् ॥ लब्धांकतुल्यमुद्वाहमेषांके वा विनिर्दिशेत् ॥ ॥ २८ ॥ एवं सुतर्क्षलाभाभ्यां पुत्रकन्ये विचिंतयेत् ॥ तथैव भ्रातृभागाभ्यां भ्रातृभगिनीं विचिंतयेत् ॥ २९ ॥ व्ययलाभांतरं कार्यं तत्पत्योरपि चांतरम् ॥ भावांतरं व्ययं ज्ञेयं लाभं स्वाम्यंतरक्रमात् ॥ ३० ॥ सूर्येन्द्वारज्ञेज्यशुक्रमंदानां भार्गवादयः ॥ तत्तत्संस्थितभावानां राशिभागादिका युतिः ॥ ३१ ॥ तद्योगे द्वादशे तष्टे जन्ममासे मृतिं वदेत् ॥ त्रिंशद्गुण्यं दिनं ज्ञेयमेवं नाडीपलादिकम् ॥ ३२ ॥ लग्नचंद्रांतरं कार्यं तत्कला तत्पलादिकम् ॥ जन्मकाले विहीने तु जलप्रसव उच्यते ॥ ३३ ॥ सूर्यचंद्रांतरं कार्यं तनुयुक्तं तथोत्तरम् ॥ तत्तत्प्रमितिके वर्षे लाभं वै पुष्कलं वदेत् ॥ ३४ ॥ राशिलग्नपयोर्योगे मृत्युयुक्ते विनिंदिते ॥ ऋणं वा ऋणमुक्तं वा भवेद्वै चंद्रयोगके ॥ ३५ ॥ सूर्येन्दुलग्नसंयोगे राशीशस्पष्टसंयुते ॥ तद्वर्षे महती पीडा हीने सौख्यं न संशयः ॥ ३६ ॥ सुतभाग्यांतरं कार्यं तद्वर्षे शीतलादिकम् ॥ लग्नस्वांतरसंयोगे पितुर्मृत्युर्न संशयः ॥३७॥ राशीशकर्मसंयोगे तदा कर्मोदयं वदेत् ॥ धर्मव्ययसमायोगे तद्वर्षे व्ययनिश्चयः ॥ ३८ ॥ मदनांतरभावेषु सर्वत्रैवं विलक्षयेत् ॥ भाग्यादि-

मृत्युपर्यंतं ग्रहाणां फलमुच्यते ॥ ३९ ॥ यत्त्वया खलु मे पृष्टं तदिदं कथितं मया ॥ यस्मै कस्मै न दातव्यं स्ववाक्यपरिसिद्धये ॥ ४० ॥

इति श्रीबृहत्पाराशरहोरापूर्वखण्डसारांशे जीवानां सुखदुःखवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

मैत्रेय उवाच ।

आदित्यादिग्रहाणां च ह्यवस्था च पृथक्पृथक् ॥ भेदाः कतिविधाः संति कथय त्वं कृपानिधे ॥ १ ॥

पराशर उवाच ।

भास्करादिग्रहाणां च ह्यवस्था विविधापि च ॥ षणनवत्यामितावस्थासारभूतं वदाम्यहम् ॥ २ ॥

अथ जाग्रदाद्यवस्थामाह ।

त्र्यंशादंशं त्रिभागं च कल्पयित्वा पृथक् पृथक् ॥ विषमादिक्रमेणैव समे वै विपरीतकम् ॥ ३ ॥ विज्ञाय प्रथमं पुंसां जाग्रत्स्वप्नसुषुप्तिकाः ॥ विशेषतः परीक्षा स्याज्जागरः कार्यसाधकः ॥ ४ ॥ स्वप्नावस्था मध्यफला उपदेष्टा गुरुर्यदि ॥ निष्फला चरमावस्था ज्ञातव्या मुनिसत्तम ॥ ५ ॥

अथ दीप्ताद्यवस्थामाह ।

दीप्तः स्वस्थः प्रमुदितः शांतो दीनोऽतिदुःखितः ॥ विकलश्च खलः कोपी नवधा खेचरो भवेत् ॥ ६ ॥ उच्चस्थः खेचरो दीप्तः स्वस्थः स्वोच्चातिमित्रभे ॥ मुदितो मित्रभे शांतः समभे दीन उच्यते ॥ ७ ॥ शत्रुभे दुःखितोऽतीव विकलः पापसंयुतः ॥ खलः खलग्रहे ज्ञेयः कोपी स्यादर्कसंयुतः ॥ ८ ॥ पाके प्रदीप्तस्य धराधिपत्यमुत्साहशौर्ये धनवाहने च ॥ स्त्रीपुत्रलाभं शुभबंधुपूजां क्षितीश्वरान्मा-

न्नमुपैति विद्याम् ॥ ९ ॥ स्वस्थस्य खेटस्य दशाविपाके स्वस्थो
नृपाल्लब्धधनादिसौख्यम् ॥ विद्यां यशः प्रीतिमहत्त्वमाराद्दारार्थभूम्यादिजधर्ममेति ॥ १० ॥ मुदान्वितस्यापि दशाविपाके वस्त्रादिकं
गन्धसुतीर्थधैर्यम् ॥ पुराणधर्मश्रवणादिलाभं वस्त्रादियानाम्बरभूषणाप्तिम् ॥ ११ ॥ दशाविपाके सुखधर्ममेति शांतस्य भूपुत्रकलत्रयानम्॥
विद्याविनोदान्वितधर्मशास्त्रं बह्वर्थदेशाधिपपूज्यतां च ॥ १२ ॥
स्थानच्युतिर्बंधुविरोधता च दीनस्य खेटस्य दशाविपाके ॥ जीवत्यसौ
कुत्सितहीनवृत्त्या त्यक्तो जनैरोगानिपीडितः स्यात् ॥ १३ ॥
दुःखार्दितस्यापि दशाविपाके नानाविधं दुःखमुपैति नित्यम् ॥ विदेशगो बंधुजनैर्विहीनश्चोराग्निभूपैर्भयमातनोति ॥ १४ ॥ वैकल्यखेटस्य दशाविपाके वैकल्यमायाति मनोविकारम् ॥ मित्रादिकानां मरणं
विशेषात्स्त्रीपुत्रयानांबरचोरपीडाम् ॥ १५ ॥ दशाविपाके कलहं
वियोगं खलस्य खेटस्य पितुर्वियोगम् ॥ शत्रोर्जनानां धनभूमिनाशमुपैति नित्यं स्वजनैश्च निंदाम् ॥ १६ ॥ कोपान्वितस्यापि दशाविपाके
पापाः समायांति बहुप्रकारैः ॥ विद्याधनस्त्रीसुतबंधुनाशं पुत्रादिकृच्छ्रं
त्वथ नेत्ररोगम् ॥ १७ ॥

अथ बालाद्यवस्थाफलमाह ।

बालो रसांशैरसमे प्रदिष्टस्ततः कुमारो हि युवाथ वृद्धः ॥ मृतः
क्रमादुत्क्रमतः समर्क्षे बालाद्यवस्था कथिता ग्रहाणाम् ॥ १८ ॥ फलं
तु किंचिद्वितनोति बालश्चार्द्धं कुमारो यतते न पुंसाम् ॥ युवा समग्रं
खचरोऽथ वृद्धः फलं च दुष्टं मरणं मृताख्यम् ॥ १९ ॥

अथ प्रवासाद्यवस्थाफलमाह ।

प्रवासनष्टा च मृता जया हास्या रतिर्मुदा ॥ सुप्ता भुक्ता ज्वरा
कंपा सुस्थितिर्नामसन्निभा ॥ २० ॥ षष्टिघ्नं गतभं भुक्तघटीयुक्तं
युगाहृतम् ॥ शराब्धिहृल्लब्धतोऽर्काच्छेषावस्थाद्विजोत्तम ॥ २१ ॥

अस्यार्थः ।

षष्टिघ्नमिति तत्राश्विनीमारभ्य गतभानि षष्ट्या गुण्यानि वर्तमाननक्षत्रभुक्तघटीयुक्तानि कार्याणि तानि पुनर्युगैश्चतुर्भिर्हतानि शराब्धिहृत् पंचचत्वारिंशता भाज्यानि यल्लब्धभागमागतावस्थाताः शेषं वर्तमानावस्थायाः तत्र लब्धांकस्यापि द्वादशाधिक्ये द्वादशभिर्भागैः प्रवासाद्यवस्था ज्ञेयाः ॥

प्रवासः प्रवासोपगे जन्मकालेऽर्थनाशस्तु नष्टोपगे मृत्युभीतिः ॥
मृतावस्थिते स्याज्जयायां जयस्तु विलासस्तु हास्योपगे कामिनीभिः ॥
॥ २२ ॥ रतौ स्याद्रतिः क्रीडिता सौख्यदात्री प्रसुप्तापि निद्रां कालिं
देहपीडाम् ॥ भयं तापहानिः सुखं स्यात्तु भुक्त्वा ज्वरा कंपिता
सुस्थिता सुक्रमेण ॥ २३ ॥

अथ लज्जिताद्यवस्थामाह ।

लज्जितो गर्वितश्चैव क्षुधितस्तृषितस्तथा ॥ मुदितः क्षोभितश्चैव
ग्रहभावाः प्रकीर्तिताः ॥ २४ ॥ पुत्रगेहगतः खेटो राहुकेतुयुतो
भवेत् ॥ रविमंदकुजैर्युक्तो लज्जितो ग्रह एव च ॥ २५ ॥ तुंगस्थानगतो
वापि त्रिकोणेपि भवेत्पुनः ॥ गर्वितः सोपि गदितो निर्विशंकं
द्विजोत्तम ॥ २६ ॥ शत्रुगेही शत्रुयुक्तो रिपुदृष्टो भवेद्यदि ॥ क्षुधितः
स च विज्ञेयः शनियुक्तो यथा तथा ॥ २७ ॥ जलराशौ स्थितः खेटः
शत्रुणा चावलोकितः ॥ शुभग्रहा न पश्यंति तृषितः स उदाहृतः ॥
॥ २८ ॥ मित्रगेही मित्रयुक्तो मित्रेण चावलोकितः ॥ गुरुणा सहितो
यश्च मुदितः स प्रकीर्तितः ॥ २९ ॥ रविणा सहितो यश्च पापाः
पश्यंति सर्वथा ॥ क्षोभितं तं विजानीयाच्छत्रुणा यदि वीक्षितः॥ ३०॥
येषु येषु च भावेषु ग्रहास्तिष्ठंति सर्वथा ॥ क्षुधितः क्षोभितो वापि स
नरो दुःखभाजनः ॥ ३१ ॥ एवं क्रमेण बोद्धव्यं सर्वभावेषु पंडितैः ॥
बलाबलविचारेण वक्तव्यः फलनिर्णयः ॥ ३२ ॥ अन्योन्यं च मुदा

युक्तं फलं मिश्रं वदेत्पुनः ॥ बलहीने तदा हानिः सबले च महाफलम् ॥ ३३ ॥ कर्मस्थाने स्थितो यस्य लज्जितस्तृषितस्तथा ॥ क्षुधितः क्षोभितो वापि स नरो दुःखभाजनः ॥ ३४ ॥ सुतस्थाने भवेद्यस्य लज्जितो ग्रह एव च ॥ सुतनाशो भवेत्तस्य एकास्तिष्ठति सर्वदा ॥ ३५ ॥ क्षोभितस्तृषितश्चैव सप्तमे यस्य वा भवेत् ॥ म्रियते तस्य नारी च सत्यमाहुर्द्विजोत्तम ॥ ३६ ॥ नवालयारामसुखं नृपत्वं कलापटुत्वं विदधाति पुंसाम् ॥ सदार्थलाभं व्यवहारवृद्धिं फलं विशेषादिह गर्वितस्य ॥ ३७ ॥ भवाति मुदितयोगे वासशालाविशाला विमलवसनभूषाभूमियोषासु सौख्यम् ॥ स्वजनजनविलासो भूमिपागारवसो रिपुनिवहविनाशो बुद्धिविद्याविकाशः ॥ ३८ ॥ दिशति लज्जितभाववशाद्रतिं विगतराममतिं विमतिक्षयम् ॥ सुतगदागमनं गमनं वृथा कलिकथाभिरुचिं न रुचिं शुभे ॥ ३९ ॥ संक्षोभितस्यापि फलं विशेषाद्दरिद्रजातं कुमतिं च कष्टम् ॥ करोति वित्तक्षयमंघ्रिबाधां धनातिबाधामवनीशकोपात् ॥ ४० ॥ क्षुधितग्रहवशाद्वै शोकमोहादितापः परिजनपरितापादाधिभीत्या कृशत्वम् ॥ कलिरपि रिपुलोकैरर्थबाधा नराणामखिलबलनिरोधो बुद्धिरोधो विषादात् ॥ ४१ ॥ तृषितखगभवे स्यादंगनासंगमध्ये भवाति गदविकारो दुष्टकार्याधिकारः ॥ निजजनपरिवादादर्थहानिः कृशत्वं खलकृतपरितापो मानहानिः सदैव ॥ ४२ ॥

अथ शयनाद्यवस्थामाह ।

शयनं चोपवेशं च नेत्रपाणिप्रकाशनम् ॥ गमनागमनं चाथ सभायां वसतिं तथा ॥ ४३ ॥ आगमं भोजनं चैव नृत्यं लिप्सां च कौतुकम् ॥ निद्रां ग्रहाणां चेष्टां च कथयामि तवाग्रतः ॥ ४४ ॥ यस्मिन्नृक्षे भवेत्खेटस्तेन तं परिपूरयेत् ॥ पुनरंशेन संपूर्य स्वनक्षत्रं नियोजयेत् ॥ ४५ ॥ यातदंडं तथालग्नमेकीकृत्य सदा बुधः ॥

रविणा हरते भागं शेषं कार्यं नियोजयेत् ॥ ४६ ॥ नाक्षत्रिकदशाक्रमेण पुनः पूरणमाचरेत् ॥ नामाक्षरेण संयुक्ते हर्तव्यं रविणा ततः ॥ ४७ ॥ रवौ पंच तथा देयं चंद्रे दद्याद्द्वयं तथा ॥ कुजे द्वयं च संयुक्तं बुधे त्रीणि नियोजयेत् ॥ ४८ ॥ गुरौ बाणाः प्रदेयाश्च त्रयं दद्याच्च भार्गवे ॥ शनौ त्रयमथो देयं राहौ दद्याच्चतुष्टयम् ॥ ४९ ॥ शेषं हृतं च रामेण ग्रहाणां त्रिविधं भवेत् ॥ दृष्टिं चेष्टां विचेष्टां च कथयामि तवाग्रतः ॥ ५० ॥

अस्यार्थः ।

यस्मिन्नृक्षेति । जन्मनि सूर्यादयो ग्रहा यस्मिन्नक्षत्रे तिष्ठन्ति तन्नक्षत्रसंख्यया ग्रहसंख्यां गुणयेत् । पुनस्तद्राशिभुक्तांशसंख्यया गुणयेत् । पुनर्यातस्य नक्षत्रस्य जन्मेष्टजन्मलग्नसंख्यां च योजयेत् । ततो द्वादशभिः शेषमिता ग्रहचेष्टा ज्ञातव्या । पुनर्लब्धसंख्यया लब्धसंख्यां गुणयेत् । नाक्षत्रीयदशाक्रमपूरणं नाम तन्मध्ये येन नाम्ना सुप्तो बुध्यति तस्याद्यक्षरवर्णस्वरसंख्यां संयोज्य द्वादशहृते यल्लब्धं तत्पुनः पूर्वोक्तावस्था । तत्र यस्य ग्रहस्य पूर्वोक्तरीत्या क्रियते तस्य क्षेपकं योज्यम् । त्रिभिर्हृत्वा तच्छेषस्तेन दृष्ट्यवस्था ज्ञातव्या ॥

अत्रोदाहरणम् ।

अत्र मृगशीर्षे नक्षत्रे रविस्थसंख्या ५ रविसंख्यया १ गुणिताः ५ मिथुनद्वितीयांशके रविस्तेन द्विगुणिता जाता १० इष्टं ६ कृत्तिका जन्मभं ३ कर्कलग्नं ४ एषां योगेन युताः २३ रवि १२ तष्टाः शेषं ११ तेन शयनादिगणनया कौतुकावस्थायां रविर्ज्ञेयः अत्र शेषं ११ स्वरांकस्थानं यथात्र प्रसिद्धं नामाद्यक्षरस्य शकारस्य इकाराधः पंक्तौ स्थित्या तत्स्वरसंख्यां द्वितीयं २ शेषं ११ शेषेण ११ गुणितं

१२१ स्वरांक २ युतं १२३ रवि १२ तष्टं शेषं ३ सूर्यक्षेपकेन ५ युतं ८ त्रिभिस्तष्टं शेषं २ रवेश्चेष्टावस्था एवं चंद्रादीनामपि ज्ञेयम् ॥ ५० ॥

स्वरांशचक्रमिदम्				
१	२	३	४	५
अ	इ	उ	ए	ओ
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह

सूर्यादिक्षेपांकचक्रम्.

सू.	चं.	मं.	बु.	बृ.	शु.	श.	रा.	के.
५	२	२	३	५	३	३	४	४

दृष्टिभेदमाह ।

दृष्टौ स्वल्पफलं ज्ञेयं चेष्टायां विपुलं फलम्॥
विचेष्टायां फलं न स्यादेवं दृष्टिफलं विदुः॥५१॥

शुभाशुभं ग्रहाणांञ्च समीक्ष्याथ बलाबलम् ॥ तुंगस्थाने विशेषेण बलं ज्ञेयं यथा बुधैः ॥ ५२ ॥

अथ प्रत्येकद्वादशावस्थाफलमाह ।

मंदाग्निरोगो बहुधा नराणां स्थूलत्वमंग्रेरपि पित्तकोपः ॥ व्रणं गुदे शूलमुरःप्रदेशे यदोष्णभानौ शयनं प्रयाते ॥ ५३ ॥ दरिद्रताभारविहारशाली विवादविद्याभिरतो नरः स्यात् ॥ कठोरचित्तः खलु नष्टवित्तः सूर्यो यदा चेदुपवेशनस्थः ॥ ५४ ॥ नरः सदानंदधरो विवेकी परोपकारी बलवित्तयुक्तः ॥ महासुखी राजकृपाभिमानी
ाधिनाथो यदि नेत्रपाणौ ॥ ५५ ॥ उदारचित्तः परिपूर्णवित्तः
भासु वक्ता बहुपुण्यकर्ता ॥ महाबली सुंदररूपशाली प्रकाशने
मनि पद्मिनीशे ॥ ५६ ॥ प्रवासशाली किल दुःखमाली सदा-
सी धीधनवर्जितश्च ॥ भयातुरः कोपपरो विशेषाद्दिवाधिनाथे
मने मनुष्यः ॥ ५७ ॥ परदाररतो जनताराहितो बहुधागमने गमना-
रुचिः ॥ कृपणः खलताकुशलो मलिनो दिवसाधिपतौ मनुज-
तिः ॥ ५८ ॥ सभागते हिते नरः परोपकारतत्परः सदार्थरत्न-

पूरितो दिवाकरे गुणाकरः ॥ वसुंधरानवांबरालयान्वितो महाबली विचित्रमित्रवत्सलः कृपाकलाधरः परः ॥ ५९ ॥ क्षोभितो रिपुगणैः सदा नरश्चंचलः खलमतिः कृशस्तथा ॥ धर्मकर्मरहितो मदोद्धतश्चागमे दिनपतौ यदा तदा ॥ ६० ॥ सदांगसंधिवेदनापरांगनाधनक्षयो बलक्षयः पदे पदे यदा तदाहि भोजने ॥ असत्यता शिरोव्यथा तथा वृथान्नभोजनं खावसत्कथारतिः कुमार्गगामिनी मतिः ॥ ६१ ॥ विज्ञलोकैः सदा मंडितः पंडितः काव्यविद्यानवद्यप्रलापान्वितः ॥ राजपूज्यो धरामंडले सर्वदा नृत्यलिप्सागते पद्मिनीनायके ॥ ६२ ॥ सर्वदानंदधर्ता जनो ज्ञानवान्यज्ञकर्ता धराधीशसद्मास्थितः ॥ पद्मबंधावरातेर्भयं स्वाननः काव्यविद्याप्रलापी मुदा कौतुके ॥ ६३ ॥ निद्राभरारक्तनिभे भवेतां निद्रागते लोचनपद्मयुग्मे ॥ रवौ विदेशे वसतिर्जनस्य कलत्रहानिः कतिधार्थनाशः ॥ ६४ ॥

अथ चंद्रफलम् ।

जनुःकाले क्षपानाथे शयनं चेदुपागते ॥ मानी शीतप्रधानश्च कामी वित्तविनाशकः ॥ ६५ ॥ रोगार्दितो मंदमतिर्विशेषाद्वित्तेन हीनो मनुजः कठोरः ॥ अकार्यकारी परवित्तहारी क्षपाकरे चेदुपवेशनस्थे ॥ ६६ ॥ नेत्रपाणौ क्षपानाथे महारोगी नरो भवेत् ॥ अनल्पजल्पको धूर्तः कुकर्मनिरतः सदा ॥ ६७ ॥ यदा राकानाथे गतवति विकाशं च जनने विकाशः संसारे विमलगुणराशेरवनिपात् ॥ नवाशामाला स्यात्कारितुरगलक्ष्म्या पारिवृत्ता विभूषा योषाभिः सुखमनुदिनं तीर्थगमनम् ॥ ६८ ॥ सितेतरे पापरतो निशाकरे विशेषतः क्रूरतरो नरो भवेत् ॥ सदाशिरोगैः परिपीड्यमानो वलक्षपक्षे गमने भयातुरः ॥ ६९ ॥ विधवागमनो मानी पादरोगी नरो भवेत् ॥ गुप्तपापरतो दीनो मतितोषविवर्जितः ॥ ७० ॥ सकलजनवदान्यो राजराजेन्द्रमान्यो रतिपतिसमकांतिः शांतिकृत्कामिनीनाम् ॥ सपादि

सदसि याते चारुबिंबे शशांके भवति परमरीतिप्रीतिविज्ञो गुणज्ञः ॥ ७१ ॥ विधवागमनो मर्त्यो वाचालो धर्मपूरितः ॥ कृष्णपक्षे द्विभार्यः स्याद्रोगी दुष्टतरो हठी ॥ ७२ ॥ भाजने जनुषि पूर्णचंद्रमा मानयानजनतासुखं नृणाम् ॥ आतनोति वनितासुतासुखं सर्वमेव न सितेतरे शुभम् ॥ ७३ ॥ नृत्यलिप्सागते चंद्रे सबले बलवान्नरः ॥ गीतज्ञो हि रसज्ञश्च कृष्णे पापकरो भवेत् ॥ ७४ ॥ कौतुकभवनं गतवति चंद्रे भवति नृपत्वं वा धनपत्वम् ॥ कामकलासु सदा कुशलत्वं वारवधूरतिरमणपटुत्वम् ॥ ७५ ॥ निद्रागते जन्मनि मानवानां कलाधरे जीवयुते महत्त्वम् ॥ यदांगनासंचितवित्तनाशः शिवालयं रौति विचित्रमुच्चैः ॥ ७६ ॥

अथ कुजफलम् ।

शयने वसुधापुत्रे जंतुरंगे जनो भवेत् ॥ बहुना कंडुना युक्तो दद्रुणा च विशेषतः ॥ ७७ ॥ बली सदा पापरतो नरः स्यादसत्यवादी नितरां प्रगल्भः ॥ धनेन पूर्णो निजधर्महीनो धरासुतश्चेदुपवेशनस्थः ॥ ७८ ॥ यदा भूमिसुते लग्ने नेत्रापाणिमुपागते ॥ दरिद्रता सदा पुंसामन्यभे नगरेशता ॥ ७९ ॥ प्रकाशो गुणस्यापि वासः प्रकाशे धराधीशभर्तुः सदा मानवृद्धिः ॥ सुते भूसुते पुत्रकांतावियोगो भवेद्राहुणा दारुणो वा निपातः ॥ ८० ॥ गमनागमने कुरुतेऽनुदिनं व्रणजालभयं वनिताकलहः ॥ बहुदद्रुककण्डुभयं बहुधा वसुधातनयो वसुहानिकरः ॥ ८१ ॥ आगमने गुणशाली मणिमाली करालकरवाली ॥ गजगंता रिपुहन्ता परिजनसंतापहारको भौमे ॥ ८२ ॥ तुंगे युद्धकलाकलापकुशलो धर्मध्वजो वित्तपः कोणे भूमिसुते सभामुपगते विद्याविहीनः पुमान् ॥ अंतेऽपत्यकलत्रमित्ररहितः प्रोक्तेतरस्थानगेऽवश्यं राजसभाबुधो बहु धनी मानी च दानी जनः ॥ ८३ ॥ आगमे भवति भूमजे

जनो धर्मकर्मरहितो गदातुरः ॥ कर्णमूलगुरुशूलरोगवानेव कातरमतिः कुसंगमी ॥ ८४ ॥ भोजने मिष्टभोजी च जनने सबले कुजे ॥ नीचकर्मकरो नित्यं मनुजो मानवर्जितः ॥ ८५ ॥ नृत्यलिप्सागते भूसुते जन्मनामिंदिराराशिरायाति भूमीपतेः ॥ स्वर्णरत्नप्रवालैः सदामंडितो वासशाला नराणां भवेत्सर्वदा ॥ ८६ ॥ कौतुकी भवति कौतुके कुजे मित्रपुत्रपरिपूरितो जनः ॥ उच्चगे नृपतिगेहमंडितः पूजितो गुणवैर्गुणाकरैः ॥ ८७ ॥ निद्रावस्थां गते भौमे क्रोधी धीधनवर्जितः ॥ धूर्तो धर्मपरिभ्रष्टो मनुष्यो गदपीडितः ॥ ८८ ॥

अथ बुधफलम् ।

क्षुधातुरो भवेदंगे खंजो गुंजानिभेक्षणः ॥ अन्यभे लंपटो धूर्तो मनुजः शयने बुधे ॥ ८९ ॥ शशांकपुत्रे जनुरंगगेहे यदोपवेशे गुणराशिपूर्णः ॥ पापेक्षिते पापयुते दरिद्रो हिते शुभे वित्तसुखी मनुष्यः ॥ ९० ॥ विद्याविवेकरहितो हिततोषहीनो मानी जनो भवति चंद्रसुतेऽक्षणपाणौ ॥ पुत्रालये सुतकलत्रसुखेन हीनः कन्याप्रजो नृपतिगेहबुधो वरार्थः ॥ ९१ ॥ दाता दयालुः खलु पुण्यकर्ता विकाशने चंद्रसुते मनुष्यः ॥ अनेकविद्यार्णवपारगंता विवेकपूर्णः खलवर्गहन्ता ॥ ९२ ॥ गमनागमने भवतो गमने बहुधा वसुधाधिपतेर्भवने ॥ भवनं च विचित्रमलं रमया विदि नुश्च जनुः समये नितराम् ॥ ९३ ॥ सपादि विदजनानामुच्चगे जन्मकाले सदसि धनसमृद्धिः सर्वदा पुण्यवृद्धिः ॥ धनपतिसमता वा भूपता मंत्रिता वा हरिहरपदभक्तिः सात्त्विकी मुक्तिलब्धिः ॥ ९४ ॥ आगमे जनुषि जन्मिनां यदा चंद्रजे भवति हीनसेवया ॥ अर्थसिद्धिरपि पुत्रयुग्मता बालिका भवति मानदायिका ॥ ९५ ॥ भोजने चंद्रजे जन्मकाले यदा जन्मिनामर्थहानिः सदा वादतः ॥ राजभीत्या कृशत्वं

चलत्वं मतेरंगसंगो न जाया न मायासुखम् ॥ ९६ ॥ नृत्यालिप्सागते चंद्रजे मानवो मानयानप्रवालव्रजैः संयुतः ॥ मित्रपुत्रप्रतापैः सभापंडितः पापभे वारवामारते लम्पटः ॥ ९७ ॥ कौतुके चंद्रजे जन्मकाले नृणामंगभे गीतविद्याऽनवद्या भवेत् ॥ सप्तमे नैधने वारवध्वा रतिः पुण्यभे पुण्ययुक्ता मतिः सद्गतिः ॥ ९८ ॥ निद्राश्रिते चंद्रसुते न निद्रासुखं सदा व्याधिसमाधियोगः ॥ सहोत्थवैकल्यमनल्पतापो निजेन वादो धनमाननाशः ॥ ९९ ॥

अथ गुरुफलमाह ।

वचसामधिपे तु जनुःसमये शयने बलवानपि हीनरवः ॥ अतिगौरतनुः खलु दीर्घहनुः सुतरामरिभीतियुतो मनुजः ॥ १०० ॥ उपवेशं गतवति यदि जीवे वाचालो बहुगर्वपरीतः ॥ क्षोणीपतिरिपुजनपरितप्तः पदजंघास्यकरव्रणयुक्तः ॥ १०१ ॥ नेत्रपाणिं गते देवराजार्चिते रोगयुक्तो वियुक्तो वरार्थश्रिया ॥ गीतनृत्यप्रियः कामुकः सर्वदा गौरवर्णो विवर्णोद्भवः प्रीतियुक् ॥ १०२ ॥ गुणानामानंदं विमलसुखकंदं वितनुते सदा तेजःपुंजं व्रजपतिनिकुंजं प्रतिगमम् ॥ प्रकाशं चेदुच्चे द्रुतमुपगतौ वासवगुरुर्गुरुत्वं लोकानां धनपतिसमत्वं तनुभृताम् ॥ १०३ ॥ साहसी भवति मानवः सदा मित्रवर्गसुखपूरितो मुदा ॥ पंडितो विविधवित्तमंडितो वेदविद्यादि गुरौ गमं गते ॥ १०४ ॥ आयमनेजनता वरजाया यस्य जनुःसमये हरिमाया ॥ मुंचति नालमिहालयमद्धा देवगुरौ परितः परिबद्धा ॥ १०५ ॥ सुरगुरुसमवक्ता शुभ्रमुक्ताफलाढ्यः सदसि सपदि पूर्णो वित्तमाणिक्ययानैः ॥ गजतुरगरथाढ्यो देवताधीशपूज्यो जनुषि विविधविद्यागर्वितो मानवः स्यात् ॥ १०६ ॥ नानावाहनमानयानपटलीसौख्यं गुरावागमे भृत्यापत्यकलत्रमित्रजसुखं विद्याऽनवद्या भवेत् ॥ क्षोणीपालसमानतानवरतं चातीव हृद्या मतिः काव्यानंदरतिः

सदा हितगतिः सर्वत्रमानोन्नतिः ॥ १०७ ॥ भोजने भवति देवगुरौ
यस्य तस्य सततं सुभोजनम् ॥ नैव मुंचति रमालयं तदा वाजिवारणरथैश्च
मंडितम् ॥ १०८ ॥ नृत्यलिप्सागते राजमानी धनी देवताधीशवंद्यः
सदा धर्मवित् ॥ तंत्रविज्ञो बुधैर्मंडितः पंडितः शब्दविद्यानवद्यो
हि सद्योजनः ॥ १०९ ॥ कुतूहली सकौतुके महाधनी
जनः सदा निजान्वये च भास्करः कृपाकलाधरः सुखी ॥ निलिंपराजपूजिते
सुतेन भूनयेन वा युतो महाबली धराधिपेन्द्रसद्मपंडितः
॥ ११० ॥ गुरौ निद्रागते यस्य मूर्खता सर्वकर्मणि ॥ दरिद्रतापरिक्रान्तं
भवनं पुण्यवर्जितम् ॥ १११ ॥

अथ भृगुफलमाह ।

जनो बलीयानपि दंतरोगी भृगौ महारोषसमन्वितः स्यात् ॥
धनेन हीनः शयनं प्रयाते वरांगनासंगमलंपटश्च ॥ ११२ ॥ यदि
भवेदुशना उपवेशने नवमणिव्रजकांचनभूषणैः ॥ सुखमजस्रमारिक्षय
आदरादवनिपादपि मानसन्नमुतिः ॥ ११३ ॥ नेत्रपाणिं गते
लग्नगेहे कवौ सप्तमे मानभे यस्य तस्य ध्रुवम् ॥ नेत्रपाते निपातो
धनानामलं चान्यभे वासशाला विशाला भवेत् ॥ ११४ ॥ स्वालये
तुंगभे मित्रभे भार्गवे तुंगमातंगलीकाकलापी जनः ॥ भूपतेस्तुल्य
एव प्रकाशं गते काव्यविद्याकलाकौतुकी गीतवित् ॥ ११५ ॥ गमने
जनने शुक्रे तस्य माता न जीवति ॥ आधियोगो वियोगश्च जनानामरिभीतितः
॥ ११६ ॥ आगमनं भृगुपुत्रे गतवति वित्तेश्वरो
मनुजः ॥ सत्तीर्थभ्रमशाली नित्योत्साही करांघ्रिरोगी च ॥ ११७ ॥
अनायासेनालं सपदि महसा याति सहसा प्रगल्भत्वं राज्ञः सदसि
गुणविज्ञः किल कवौ ॥ सभायामायाते रिपुनिवहहन्ता धनपतेः
समत्वं वा दाता बलतुरगगंता नरवरः ॥ ११८ ॥ आगमे भार्गवेनागमो
जन्मिनामर्थराशेररातेरतीव क्षतिः ॥ पुत्रपातो निपातो जना-

नामपि व्याधिभीतिः प्रियाभोगहानिर्भवेत् ॥ ११९ ॥ क्षुधातुरो
व्याधिनिपीडितः स्यादनेकधारातिभयार्दितश्च ॥ कवौ यदा भोजनगे
युवत्या महाधनी पंडितमंडितश्च ॥ १२० ॥ काव्यविद्यानवद्या
च हृद्या मतिः सर्वदा नृत्यलिप्सागते भार्गवे ॥ शंखवीणामृदंगादिगानध्वनिव्रातनैपुण्यमेतस्य
वित्तोन्नतिः ॥ १२१ ॥ कौतुकभवनं
गतवति शुक्रे शक्रेशत्वं सदसि महत्त्वम् ॥ हृद्या विद्या भवति च
पुंसः पद्मा निवसति सद्मादरतः ॥ १२२ ॥ परसेवारतो नित्यं
निद्रासुपगते कवौ ॥ परनिंदापरो वीरो वाचालो भ्रमते महीम् ॥१२३॥

अथ शनिफलम् ।

क्षुत्पिपासापरिक्रांतो विश्रांतः शयने शनौ ॥ वयसि प्रथमे रोगी
ततो भाग्यवतां वरः ॥ १२४ ॥ भानोः सुते चेदुपवेशनस्थे करालकारातिजनानुतप्तः
॥ अपायशाली खलु दद्रुमाली नरोऽभिमानी
नृपदंडयुक्तः ॥ १२५ ॥ नयनपाणिगते रविनंदने परमया रमयारमया
युतः ॥ नृपतितो हिततो मतितोषकृद्बहुकलाकलितो विमलोक्तिकृत्
॥ १२६ ॥ नानागुणग्रामधनाधिशाली सदा नरो बुद्धिविनोदमाली
॥ प्रकाशने भानुसुते सुभानुः कृपानुरक्तो हरपादभक्तः
॥ १२७ ॥ महाधनी नन्दननंदितः स्यादपायकारी रिपुभूमिहारी ॥
गमे शनौ पंडितराजभावं धरापतेरायतने प्रयाति ॥ १२८ ॥ आगमने
पदगदभययुक्तः पुत्रकलत्रसुखेन विमुक्तः ॥ भानुसुते भ्रमते
भुवि नित्यं दीनमना विजनाश्रयभावम् ॥ १२९ ॥ रत्नावलीकांचनमौक्तिकानां
वातेन नित्यं व्रजति प्रमोदम् ॥ सभागते भानुसुते
नितांतं नयेन पूर्णो मनुजो महौजाः ॥ १३० ॥ आगमे गदसमागमो
नृणामब्जबंधुतनये यदा तदा ॥ मंदमेव गमनं धरापतेर्याचनाविरहिता
मतिः सदा ॥ १३१ ॥ संगते जनुषि भानुनंदने भोजनं
भवति भोजनं रसैः ॥ संयुतं नयनमंदतातता मोहतापपरितापिता

मातिः ॥ १३२ ॥ नृत्यलिप्सागते मन्दे धर्मात्मा वित्तपूरितः ॥ राजपूज्यो नरो धीरो महावीरो रणांगणे ॥ १३३ ॥ भवति कौतुकभावमुपागते रविसुते वसुधावसुपूरितः ॥ अतिसुखी सुमुखीसुखपूरितः कवितयामलया कलया नरः ॥ १३४ ॥ निद्रागते वासरनाथपुत्रे धनी सदा चारुगुणैरुपेतः ॥ पराक्रमी चंडविपक्षहंता सुवारकांताराततिरीतिविज्ञः ॥ १३५ ॥

अथ राहुफलम् ।

यदागमो जन्मनि यस्य राहौ क्लेशाधिकत्वं शयनं प्रयाते ॥ वृषेऽथ युग्मेपि च कन्यकायामजे समाजो धनधान्यराशेः ॥ १३६ ॥ उपवेशनमिह गतवति राहौ दद्रुगदेन जनः परितप्तः ॥ राजसमाजयुतो बहुमानी वित्तसुखेन सदा रहितः स्यात् ॥ १३७ ॥ नेत्रपाणावगौ नेत्रे भवतो रोगपीडिते ॥ दुष्टव्यालारिचौराणां भयं तस्य धनक्षयः ॥ १३८ ॥ प्रकाशने शुभासने स्थितिः कृतिः शुभो नृणां धनोन्नतिर्गुणोन्नतिः सदा विदामगाविह ॥ धराधिपाधिकारता यशोलताततता भवेन्नवीननीरदाकृतिर्विदेशतो महोन्नतिः ॥ १३९ ॥ गमने च यदा राहौ बहुसंतानवान्नरः ॥ पंडितो धनवान्दाता राजपूज्यो नरो भवेत् ॥ १४० ॥ राहावागमने क्रोधी सदा धीधनवर्जितः ॥ कुटिलः कृपणः कामी नरो भवति सर्वथा ॥ १४१ ॥ सभागतो यदा राहुः पंडितः कृपणो नरः ॥ नानागुणपरिक्रांतो वित्तसौख्यसमन्वितः ॥ १४२ ॥ चेदगावागमं यस्य याते तदा व्याकुलत्वं सदारातिभीत्याभयम् ॥ महद्बन्धुवादो जनानां निपातो भवेद्वित्तहानिः शठत्वं कृशत्वम् ॥ १४३ ॥ भोजने भोजनेनालं विकलो मनुजो भवेत् ॥ मन्दबुद्धिः क्रियाभीरुः स्त्रीपुत्रसुखवर्जितः ॥ १४४ ॥ नृत्यलिप्सागते राहौ महाव्याधिविवर्द्धनम् ॥ नेत्ररोगो रिपोर्भीतिर्द्धनधर्मक्षयो नृणाम् ॥ १४५ ॥ कौतुके च यदा

राहौ स्थानहीनो नरो भवेत् ॥ परदाररतो नित्यं परवित्तापहारकः ॥ १४६ ॥ निद्रावस्थां गते राहौ गुणग्रामयुतो नरः ॥ कांतासन्तानवान्धीरो गर्विंतो बहुवित्तवान् ॥ १४७ ॥

अथ केतुफलम् ।

मेषे वृषेऽथ वा युग्मे कन्यायां शयनं गते ॥ केतौ धनसमृद्धिः स्यादन्यभे रोगवर्धनम् ॥ १४८ ॥ उपवेशं गते केतौ दद्रुरोगविवर्द्धनम् ॥ अरिवातनृपव्यालचौरशंकासमंततः ॥ १४९ ॥ नेत्रपाणिं गते केतौ नेत्ररोगः प्रजायते ॥ दुष्टसर्पादिभीतिश्च रिपुराजकुलादपि ॥ १५० ॥ केतौ प्रकाशने संज्ञे धनवान्धार्मिकः सदा ॥ नित्यं प्रवासी चोत्साही सात्त्विको राजसेवकः ॥ १५१ ॥ गमनेच्छायां भवेत्केतुर्बहुपुत्रो महाधनः ॥ पंडितो गुणवान्दाता जायते च नरोत्तमः ॥ १५२ ॥ आगमे च यदा केतुर्नानारोगो धनक्षयः ॥ दंतघाती महारोगी पिशुनः परनिंदकः ॥ १५३ ॥ सभावस्थां गते केतौ वाचालो बहुगर्वितः ॥ कृपणो लम्पटश्चैव धूर्तविद्याविशारदः ॥ १५४ ॥ यदागमे भवेत्केतुः केतुः स्यात्पापकर्मणाम् ॥ बन्धुवादरतो दुष्टो रिपुरोगनिपीडितः ॥ १५५ ॥ भोजने तु जनो नित्यं क्षुधया परिपीडितः ॥ दरिद्री रोगसंतप्तः केतौ भ्रमति मेदिनीम् ॥ १५६ ॥ नृत्यलिप्सागते केतौ व्याधिना विकलो भवेत् ॥ बुद्बुदाक्षो दुराधर्षो धूर्तोऽनर्थकरो नरः ॥ ॥ १५७ ॥ कौतुकी कौतुके केतौ नटवामारतिप्रियः ॥ स्थानभ्रष्टो दुराचारी दरिद्रो भ्रमते महीम् ॥ १५८ ॥ निद्रावस्थां गते केतौ धनधान्यसुखं महत् ॥ नानागुणविनोदेन कालो गच्छति जान्मिनाम् ॥ १५९ ॥

अथ सर्वभावफलम् ।

शयनाद्येषु भावेषु यस्य तिष्ठंति सद्ग्रहाः ॥ नित्यं तस्य शुभ-

ज्ञानं निर्विशंकं द्विजोत्तम ॥ १६० ॥ भोजनाद्येकभावेषु पापास्तिष्ठंति सर्वथा ॥ तदा सर्वविनाशोऽपि नात्र कार्या विचारणा ॥ १६१ ॥ निद्रायां च यदा पापो जायास्थाने शुभं वदेत् ॥ यदि पापग्रहैर्दृष्टो न शुभं च कदाचन ॥ १६२ ॥ सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ॥ तदा शुभं भवेत्तस्य नात्र कार्या विचारणा ॥ १६३ ॥ मृत्युस्थानस्थितः पापो निद्रायां शयनेपि वा ॥ तदा तस्यापमृत्युः स्याद्राजतः परतस्तथा ॥ १६४ ॥ शुभग्रहैर्यदा युक्तः शुभैर्वा यदि वीक्षितः ॥ तदा च मरणं तस्य गंगायां च विशेषतः ॥ १६५ ॥ कर्मस्थाने यदा पापः शयने भोजनेऽपि वा ॥ तदा कर्मविपाकः स्यान्नानादुःखप्रदायकः ॥ १६६ ॥ दशमस्थो निशानाथो कौतुकी च प्रकाशने ॥ तदैव राजयोगः स्यान्निर्विशंकं द्विजोत्तम ॥ १६७ ॥ बलाबलविचारेण ज्ञायते च शुभाशुभम् ॥ एवं क्रमेण बोद्धव्यं सर्वभावेषु बुद्धिमन् ॥ १६८ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखण्डसारांशे ग्रहाद्यवस्थाफलकथनं नाम चतुस्त्रिंशोऽध्यायः समाप्तः ॥ ३४ ॥

मैत्रेय उवाच ।

दशाः कतिविधाः संति ह्येतन्मे ब्रूहि तत्त्वतः ॥ महर्षे त्वं समर्थोसि कृपया करुणानिधे ॥ १ ॥

पराशर उवाच ।

अथातः संप्रवक्ष्यामि दशाभेदाननेकशः ॥ विंशोत्तरी दशा चोक्ता दशा तु षोडशोत्तरी ॥ २ ॥ द्वादशोत्तरिका ज्ञेया तथैवाष्टोत्तरी दशा ॥ पंचोत्तरी दशा तद्वद्दशा शतसमा स्मृता ॥ ३ ॥ दशा हि चतुराशीतिः प्राह चाथ द्विसप्ततिः ॥ तथा षष्टिसमा चोक्ता दशा षड्विंशतिः समा ॥ ४ ॥ नवमांशनवदशा राश्यंशकदशाः स्मृताः ॥ दशा कालाभिधा चक्रदशाचक्रं मुनिश्वरैः ॥ ५ ॥ चरपर्या दशा विप्र द्विजोत्तम दशा स्थिरा ॥

अथोत्तरदशा विप्र ब्रह्मता चापरा दशा ॥ ६ ॥ केंद्राद्या च दशा ज्ञेया कारकादिग्रहा दशा ॥ मांडुकी च दशा प्रोक्ता तथा शूलदशापि वा ॥ ७ ॥ योगार्द्धगा दशा विप्र दृग्दशां कथयाम्यहम् ॥ दशा त्रिकोणनामा वै राशीनां च दशा तथा ॥ ८ ॥ तारादशा तथा ज्ञेया दशा ज्ञेया च वर्णदा ॥ पंचस्वरदशा विप्र योगिनी च दशा स्मृता ॥ ९ ॥ ततः पैंडयदशा ज्ञेया तथांशी च दशा द्विज ॥ नैसर्गिकदशा विप्र अष्टवर्गदशा स्मृता ॥ १० ॥ संध्या दशा च ज्ञातव्या पाचका च दशा द्विज ॥ द्विचत्वारिंशद्भेदाः स्युः कथयामितवाग्रतः ॥ ११ ॥

अथ विंशोत्तरीदशामाह ।

आनयनप्रकारं च शृणुष्व द्विजपुंगव ॥ नामनक्षत्रपर्यंतमाधारः कृत्तिकादितः ॥ १२ ॥ कृष्णे तु रविहोरायां चंद्रहोरागते सिते ॥ दहनात्स्वर्क्षपर्यन्तं गणयेन्नवभिर्हरेत् ॥ १३ ॥ सूर्येन्दुक्ष्माजतमसो वाक्पतिर्मंदचंद्रजौ ॥ केतुशुक्रौ क्रमादेते विज्ञेयाश्च दशाधिपाः ॥ ॥ १४ ॥ रसाशामुनिधृत्यब्दा भूपतिर्धृतिवत्सराः ॥ सप्तेंदवो नगा व्योमबाहवो भास्करादितः ॥ १५ ॥ अस्या उदाहरणमग्रे वक्ष्यामि ॥

अथ षोडशोत्तरीदशामाह ।

एकः पंचयुतो रुद्रा धृत्यंतं वत्सराः क्रमात् ॥ रवि[1]र्भौमो[2] गुरु[3]र्मन्दः[4] केतु[5]श्चन्द्रो[6] बुधो[7] भृगुः[8] ॥ १६ ॥ अष्टौ दशाधिपाः प्रोक्ता राहुहीना नवग्रहाः ॥ पुष्यभाज्जन्मभं यावद्गणयेद्वसुभिर्हरेत् ॥ १७ ॥ सूर्यहोरागते शुक्रे चन्द्रस्य कृष्णपक्षके ॥ तदा नृणां फलार्थाय विचिंत्या षोडशोत्तरी ॥ १८ ॥

अथ षोडशात्तरीदशोदाहरणम् ।

‘‘स्फुटतरो हिमगुः’’ इत्तादिश्लोकोक्तरीत्या स्पष्ट चं० ८।

२५।२८।३८ अस्य कलापिंडः १५।८।२९।३८ अस्याष्टशतैर्भक्ते ८०० लब्धा १९ शेषं ७२९।३८ अश्विनीतो गणनया लब्धं मूलगतनक्षत्रं पूर्वाषाढा जन्मभम् । अत्र तु पुष्यभाद्गणनीयं संख्या १३ अस्याष्टभक्तेर्लब्धं १ व्यर्थं शेषं ५ अस्य दशाक्रमः सू० ११ मं० १२ बृ० १३ श० १४ के० १५ चं० १६ बु० १७ शु० १८ शेषं ५ तेन केतुदशामध्ये जन्म तस्य वर्षाणि १५ अत्र पूर्वांकाः ५२८।३८ अस्योपरि विंशोत्तरीरीत्या भुक्तानयनं वर्षादि १३।८।५।१।३०। केतुदशायां जन्म वर्षं १५ मध्ये हीनं जातं भोग्यवर्षं १।३।२४।५८।३० इति षोडशोत्तरीदशोदाहरणम् ॥

अथ षोडशोत्तरीदशाचक्रम्.

सू.	मं.	बृ.	श.	के.	चं.	बु.	शु.	ग्रहाः
११	१२	१३	१४	१५	१६	१७	१८	वर्षाणि.
पुष्य	ऽऽश्ले.	म.	पू. फा.	उ. फा.	ह.	चि.	स्वा.	नक्षत्राणि.
वि.	ऽनु.	ज्ये.	मू.	पू. षा.	उ. षा.	श्र.	ध.	नक्षत्राणि.
श.	पू. भा.	उ. भा.	रे.	अ.	भ.	कृ.	रो.	न.
मृ.	ऽऽर्द्रा	पुन.	०	०	०	०	०	न.

अथ द्वादशोत्तरीदशामाह ।

सूर्यो गुरुः शिखी ज्ञोऽगुः कुजो मंदो निशाकरः ॥ शुक्रहीना दशा ह्येतद्विचयात्सप्तमात्समाः ॥ १९ ॥ जन्मभात्पौष्णपर्यन्तं गणयेदष्टभिर्भजेत् ॥ नवमांशे यदा जाता शुक्रस्य द्वादशोत्तरी ॥ २० ॥

अथ द्वादशोत्तरीदशोदाहरणम् ।

भुक्ताभोग्यं पूर्ववदानेयम् अस्या उदाहरणार्थं चक्रं प्रदर्श्यंते । अत्रपूर्वाषाढाजन्मकालाद्रेवतीपर्यन्तम् अष्ट संख्यास्ता अष्टभिर्भजेत् ।

शेषम् ० अत्र ग्रहक्रमदशाक्रमः सू० ७ बृ० ९ के० ११ बु० १३ रा० १५ मं० १७ श० १९ चं० २१ अत्र तु चंद्रमहादशायां जन्म ॥

अथ द्वादशोत्तरीदशाक्रमचक्रमिदम्.								
सू.	बृ.	के.	बु.	र.	मं.	श.	चं.	ग्रहाः
७	९	११	१३	१५	१७	१९	२१	वर्षाणि.

अथाष्टोत्तरीदशामाह ।

सूर्यश्चंद्रः कुजः सौम्यः शनिर्जीवस्तमो भृगुः ॥ एते दशाधिपाः प्रोक्ता विना केतुं नवग्रहाः ॥ २१ ॥ रसाः पंचेंदवो नागाः शैलचंद्रा नभेन्दवः ॥ गोब्जाः सूर्यकुनेत्राश्च समाः प्रद्योतनादयः ॥ २२ ॥ लग्नेशात्केन्द्रकोणस्थे राहौ लग्ने स्थितं विना ॥ अष्टोत्तरी द्विधा प्रोक्ता शिवाद्याकृत्तिकादितः ॥ २३ ॥ चतुष्कं त्रितयं तस्माच्चतुष्कं त्रितयं पुनः ॥ यावत्स्वजन्मभं तावद्गणयेच्च यथाक्रमात् ॥ २४ ॥

अथाष्टोत्तरीदशोदाहरणम् ।

आर्द्रादि वा कृत्तिकादि जन्मभपर्यंतं गणनीयम् अत्र तु आर्द्रादि जन्मभपर्यन्तं संख्या १५ तस्य दशाक्रमः सू० ६ चं० १५ मं० ८ बु० १७ श० १० बृ० १९ रा० १२ शु० २१ तन्मध्ये शनिदशा तत्रागतवर्षम् १० अस्य भुक्तभोग्ये आनयनक्रममाह ॥ अत्र जन्मचंद्रः ८। २५ । २९ । ३८ । अस्य कलापिंडः १५८२९ । ३८० इदमष्टशतेन ८०० भक्तं लब्धं १९ मूलगतनक्षत्रं पूर्वाषाढानक्षत्रगतिः ३० अनेन शेषांकः ७२९ । ३८ गुणितं जातांकाः २१८८९० इदमष्टशतेन ८०० भक्तं लब्धं वर्षादि २ । ३ । १० । ५० । १५ पूर्वजन्म भुक्तम् इदं शनिवर्ष १० मध्ये ऊनितं भोग्यं वर्षादि ७। ८। १९ । ९। ४५ एवं सर्वत्र ज्ञेयम् ॥

अथाष्टोत्तरीदशायन्त्रम्.			
सू. मं. ७२	चं. भा. मं. १८०	मं. ९५	बुध. २५४
६	१५	८	१७
आ. १८	म. ६०	ह. २४	अ. ६८
पु. १८	पू. ६०	चि. २४	ज्ये. ६८
पु. १८	उ. ६०	स्वा. २४	मू. ६८
आ. १८	० ०	वि. २४	० ०
श. १२०	बृ. २२८	रा. १४४	शु. २५२
१०	१९	१२	२१
पू. ३०	ध. ७६	उ.भा. ३६	कृ. ८४
उ. ३०	श. ७६	रे. ३६	रो. ८४
ऽभि. ३०	पू.भा. ७६	अ. ३६	मृ. ८४
श्र. ३०	० ०	भ. ३६	० ०

अथ पंचोत्तरीदशामाह ।

पत्यौ विनानुराधादि विज्ञेयं जन्मभावधि ॥ गणयेत्सप्तभिर्भक्ते शेषे कल्प्या दशाः शुभाः ॥ २५ ॥ रविज्ञार्कमितो भौमो भार्गवो रजनीकरः ॥ वाचस्पतिश्च कर्कांगे तस्यैव द्वादशांगके ॥ २६ ॥ पंचोत्तरी दशा चिंत्या निर्विशंकं द्विजोत्तम ॥ बलाबलविवेकेन यथान्यायेन योजयेत् ॥२७ ॥

अथ पञ्चोत्तरीदशोदाहरणम् ।

जन्मचंद्रः ८ । २५ । २९ । ३८ । अस्य कलापिंडः १५९२९ ३८ इदमष्टशतेन ८०० भक्तं लब्धं १९ गतमूलशेषांकवर्षमानपूर्वाषाढानक्षत्रे केतुदशायां जन्म वर्षं १५ ॥ शेषांकाः ७२९ । ३८ अमी पंचदशाभिर्गुणितांकाः १०९४४ । ३० अष्टशतै ८०० र्भक्ते

लब्धं पूर्वजन्मानि वर्षादि ॥ १३ । ८ । ५ । १ । ३० अस्य पंचदश १५ मध्ये ऊनितमिहजन्मानि भोग्यवर्षादि १ । ३।२४। ५८। ३० एवं सर्वत्र ज्ञेयम् ॥

अथ पंचोत्तरीदशायंत्रम्.								
सू.	बु.	श.	के.	मं.	शु.	चं.	बु.	ग्रहाः
१२	१३	१४	१५	१६	१७	१८	१९	वर्षाणि.
अनु.	ज्ये.	मू.	पू. षा.	उ. षा.	श्र.	ध.	श.	न-
पू. भा.	उ. भा.	रेवती.	अ.	भ.	कृ.	रो.	मृ.	क्ष-
आ.	पु.	पुष्य.	ऽऽश्ले.	म.	पू. फा.	उ. फा.	ह.	त्रा-
चि.	स्वा.	विशा.	०	०	०	०	०	णि.

अथ शताब्दिकां दशामाह ।

रविश्चंद्रो भृगुश्चांद्रिर्जीवो विश्वंभरात्मजः ॥ दैवाकरिः क्रमादेते बाणा बाणा दिशो दश ॥ २८ ॥ नखा नखाः खरामाश्च वर्षाणि दिनपादितः ॥ वर्गोत्तमगते लग्ने दशा चिंत्या शताब्दिका ॥ २९ ॥ पौष्णाज्जन्मर्क्षपर्यन्तं गणयेत्सप्तभिर्हरेत् ॥ शेषांके रवितो ज्ञेया दशा शतसमास्त्वियम् ॥ ३० ॥

अस्योदाहारणम् ।

जन्मचंद्रः ८ । २५ । २९ । ३८ । अस्य कलापिंडः १५९२९ । ३८ अष्टशतै ८०० र्भक्तं लब्धं १९ गतमूलवर्तमानपूर्वाषाढा शेषांकाः ७२९ । ३८ रेवती एताः पूषतो गणनीयं तस्य शनिदशायां जन्म वर्षे ३० शेषांकाः ७२९ । ३८ गुणितांकाः २१८८६ अस्याऽष्टशते ८०० र्भक्तं जातं पूर्वे भुक्तवर्षादि २७ । ४ । १० । ३ । ० त्रिंशत् ३० मध्ये ऊनं जातम् इह जन्मानि भोग्यवर्षादि २ । ७१ । १९ । ५० । ० एवं सर्वत्र ज्ञेयम् ॥

अथ शताब्दिकयंत्रमाह.

सू.	चं.	शु.	बु.	बृ.	मं.	श.	ग्रहाः
५	५	१०	१०	२०	२०	३०	वर्षाणि
रेवती	अश्वि.	भ.	कृ.	रो.	मृ.	आ.	न-
पुनर्व.	पुष्य.	आश्ले.	म.	पू.	उत्त.	ह.	क्ष-
चित्रा.	स्वाती.	विशा.	अनुरा.	ज्ये.	मूल.	पू. षा.	त्रा-
उ. षा.	श्रवण.	धनिष्ठा	श.	पू.	उत्तरा.	०	णि.

अथ चतुरशीत्यब्दिकां दशामाह ।

रविश्चंद्रः कुजः सौम्यो जीवः शुक्रः शनैश्वरः ॥ तमध्वजौ विना सर्वे ग्रहा द्वादश हायनाः ॥ ३१ ॥ पवनाज्जन्मभं यावत्सप्ततष्टे दशा भवेत् ॥ चतुराशीतिका ज्ञेया कर्मेशे कर्मसंस्थिते ॥ ३२ ॥

अस्योदाहरणम् ।

जन्मचंद्रः ८ । २५ । २९ । ३८ । अस्य कलापिंडः १५९२९ । ३८ अष्टशतै८००र्भक्तं शेषं ७२९ लब्धं १९ गतमूलवर्तमानपूर्वाषाढा भृगुदशवर्षं १२ शेषांकाः ७२९ । ३८ गुणितांकाः ८७५५ । ३६ अस्याष्टशतै८००र्भक्तं पूर्वजन्मनि वर्षादि १० । ११ । १० । १ । १२ द्वादशमध्ये ऊनं इह जन्मनि भोग्यवर्षादि १ । ० २९ । ५८ ४८ एवं सर्वत्र ज्ञेयम् ॥

अथ चतुरशीत्यब्दिकाचक्रम्.

रविः	चंद्रः	मंगलः	बुधः	बृह.	शुक्रः	शनिः	ग्रहाः
१२	१२	१२	१२	१२	१२	१२	वर्षाणि
स्वाती	विशा.	अनुरा.	ज्येष्ठा	मूल	पूर्वाषा.	उ. आ.	न-
श्रवण	धनिष्ठा	शतता.	पू. भा.	उ. भा.	रेवती	अश्वि.	क्ष-
भरणी	कृत्तिका	रोहिणी	मृग	आर्द्रा	पुनर्वसु	पुष्य	त्रा-
आश्ले.	मघा	पूर्वा	उत्तरा	हस्त	चित्रा.	०	णि.

अथ द्विसप्ततिकां दशामाह ।

लग्नेशे सप्तमे यत्र लग्ने वै मदनाधिपे ॥ चिंतनीया दशा तत्र द्व्यधिकाः सप्ततिः समाः ॥ ३३ ॥ नव वर्षाणि सर्वेषां विकेतूनां ग्रहात्मनाम् ॥ मूलाज्जन्मर्क्षपर्यन्तं गणयेदष्टभिर्हरेत् ॥ शेषा दशा विचिंत्या च वदेच्चैव महामुने ॥ ३४ ॥

अस्योदाहरणम् ।

जन्मचंद्रः ८ । २५ । २९ । ३८ कलापिंडः १५९२९। ३८ इदमष्टशतेन ८०० भक्तं लब्धं १९ शेषांकाः ७२९ । ३८ पूर्वाषाढानक्षत्रे चंद्रदशायां जन्म वर्ष ९ अस्य शेषांकाः ७२९ । ३८ गुणितांकाः ३५ । ६६ । ४२ अस्याष्टशतेन भक्तेर्लब्धं भुक्तवर्षादि ८ । २ । १५ । ० । ५४ अस्य ९ मध्ये ऊनं तदा इह जन्मनि भोग्यवर्षादि ० । ९ । १४ । ५९ । ६ एवं सर्वत्र ज्ञेयम् ॥

अथ द्विसप्ततिकादशायन्त्रम्.

र.	चं.	मं.	बु.	बृ.	शु.	श.	रा.	ग्रहाः
९	९	९	९	९	९	९	९	वर्षाणि.
मूल.	पूर्वाषा.	उत्तरा.	श्रवण.	धनिष्ठा.	शतता.	पूर्वाभा.	उ. भा.	न-
रेवती	अश्वि.	भरणी	कृत्ति.	रोहिणी	मृग	आर्द्रा	पुनर्वसु	क्ष-
पुष्य	आश्ले.	मघा	पूर्वा	उत्तरा	हस्त	चित्रा	स्वाती	त्रा-
विशा.	अनुरा.	ज्येष्ठा	०	०	०	०	०	णि.

अथ षष्टिहायनी दशामाह ।

गुर्वर्कभूसुतानां च वर्षाणि दशकानि च ॥ ततः शशिज्ञशुक्रार्कपुत्रागूनां समाश्च षट् ॥ ३५ ॥ दास्रात्त्रयं चतुष्कं च त्रयं वेदं पुनः पुनः ॥ यदैको लग्नराशीशश्चिन्त्या षष्टिसमा तदा ॥ ३६ ॥

अस्योदाहरणम् ।

जन्मचंद्रः ८ । २५ । २९ । ३८ । अस्य कलापिंडः १५९२९ ।

३८ इष्टमष्टशते ८०० भक्तं लब्धं १९ शेषांकाः ७२९ । ३८ अग्रेऽष्टोत्तरीवद्भुक्तभोग्यमानीतम् एवं सर्वत्र ज्ञेयम् ॥

अथ षष्टिहायनीदशायंत्रम्.

बृ.	र.	मं.	चं.	बु.	शु.	श.	रा.	ग्रहाः
१०	१०	१०	६	६	६	६	६	वर्षाणि.
अश्वि. भरणी कृत्ति.	रोहिणी मृग आर्द्रा पुनर्वसु	पुष्य आश्ले. मघा	पूर्वा उ. फा. हस्त चित्रा	स्वाती विशा. अनुरा.	ज्येष्ठा मूल पूर्वाषा. उत्तरा.	ऽभिजि. श्रवण धनि.	शतता. पूर्वाभ'. उत्तरा. रेवती	न– क्ष– त्रा.णि.

अथ षट्त्रिंशत्कां दशामाह ।

श्रवणाज्जन्मभं यावद्गणयेदष्टभिर्भजेत् ॥ शशांकाऽर्कसुरेज्यारज्ञाऽर्कजौ शुक्रराहवः ॥ ३७ ॥ एकोयं च यतश्चैकाद्वर्षाण्येषां क्रमात्स्मृताः ॥ दिवसे सूर्यहोरायां चिंत्या वै षड्गुणाब्दिका ॥ ३८ ॥ रात्रौ चांद्रादष्टतष्टाद्रेकात्स नृपजन्मभात् ॥ सूर्येन्दुभूमिजनिशाधीशपुत्रसुरेज्यकाः ॥ ३९ ॥ भृगुमंदागुशिखिनो लग्नस्थाच्चिन्तिता दशा ॥ दशां तेषां समा दद्यात्स्पष्टराश्यादयश्च ये ॥ ४० ॥ खेटक्रमाद्दशा चिंत्या यदा लग्ने शनिः स्थितः ॥ क्वचिद्ग्रहस्तदानीं च न चिंत्या बहुतो बलात् ॥ ४१ ॥ अस्याः दशाया उदाहरणं विंशोत्तरीवज्ज्ञेयम् ॥

अथ षट्त्रिंशत्याब्दिकादशायंत्रम्.

चं.	सू.	बृ.	मं.	बु.	श.	शु.	रा.	ग्रहाः
१	२	३	४	५	६	७	८	वर्षाणि
श्र.	ध.	श.	पू. भा.	उ. भा.	रे.	अश्वि.	भर.	न.
कृ.	रो.	मृ.	आ.	पुन.	पुष्य	आश्ले.	मघा	क्ष–
पू.	उ.	ह.	चि.	स्वा.	वि.	अनु.	ज्येष्ठा	त्रा–
मू.	पू. षा.	उ. षा.	०	०	०	०	०	णि.

अथ नवमांशनवदशामाह ।

अथ राशिक्रमं वक्ष्ये शृणुष्व द्विजपुंगव ॥ ग्रहे राश्यादिकं चाल्पे
दशा तस्यादिमा भवेत् ॥ ४२ ॥ ततस्तदधिकस्यैवं तुल्ये नैसर्गिकाद्बलात्
॥ राशीशात्सप्तमांगेशाच्चिंत्या राशिक्रमाद्दशा ॥ ४३ ॥
यस्मिन्नवांशकस्थेंके दशा तस्यादिमा मता ॥ अग्रादब्जाच्च ये
खेटाः केत्वंताः संस्थिताः क्रमात् ॥ ४४ ॥ दशामानं प्रवक्ष्यामि
यथोक्तं ब्रह्मणा पुरा ॥ लिप्तीकृत्वा ग्रहं सोमखाश्विभिर्भाजिते फलम्
॥ ४५ ॥ पुनः सूर्यैं ह्रते लब्धं समाद्यांशकला दशा ॥ सर्वेषां मानवानां च दशास्त्वेता विचिंतयेत् ॥ ४६ ॥

टीका ।

अथ श्रीमदाचार्यः द्विचत्वारिंशद्दशानां मध्ये काश्चिदुक्तास्तदंतर्गता एव नवविधा आह । अथेति अथ उक्तदशानंतरं हे द्विजपुंगव राशिक्रमं वक्ष्ये तं शृणुष्व आकर्णयेति शिष्यं प्रति श्रवणाभिमुखीकरणं बोध्यम् । ग्रहे जात्यैकवचनम् । ग्रहेषु मध्ये यस्य ग्रहस्य राश्यादिकं राश्यंशकलाविकलाः एतत्सर्वं सर्वापेक्षया अल्पं न्यूनं तस्य ग्रहस्य आदिमा प्रथमा दशा भवेत् । आदिमेत्युक्त्याऽग्रस्था एवं क्रमेण बोध्याः । तदुक्तं भवति । उक्तापेक्षयाऽधिका अवशिष्टापेक्षया च हीना द्वितीया एवं क्रमशस्तृतीयादिभेदः नवपर्यन्तं बोध्यः इत्येकः प्रकारः । ततः तदनंतरं तदधिकस्य तेषु ग्रहेषु अधिकः सर्वापक्षया अधिकः राश्यंशादिना अधिकः विशिष्टः तस्यः प्रथमोति पूर्वोक्तक्रमापेक्षया व्युत्क्रमशः द्वितीयादिप्रकारो बोध्य इति द्वितीयो भेदः । तुल्ये नैसर्गिकाद्बलादिति उक्तभेदद्वये कदाचित् ग्रहद्वयस्य समत्वं प्राप्तं चेत्प्रथमभेदे यो नैसर्गिकबलहीनस्तस्यादौ ग्राह्या ततः नैसर्गिकबलाधिकस्येति । द्वितीयभेदे तु नैसर्गि-

कबलाधिकस्य आदौ नैसर्गिकबलहीनस्य पश्चात् ग्राह्योति समत्वेऽपि विरोधाभावो भेदद्वयेपि ज्ञेयः । अथ तृतीयभेदः । नैसर्गिकाद्बलादिति नैसर्गिकबलेन न्यूनस्य प्रथमा तदपेक्षया अधिकस्य द्वितीयेत्यादि तृतीयः प्रकारः । इति तृतीयभेदः । अस्मिन्भेदत्रयेऽपि राहुकेत्वंतर्गतत्वं बोध्यम् । अन्यथा नवानुपलब्धेः राश्यंशादिमत्वात्तयोः नैसर्गिकबलवत्वाच्चेति । ननु नैसर्गिकाद्बलादित्यस्यैव प्रकारद्वयं कथमुक्तमिति चेन्नवभेदप्रपूर्तये नैसर्गिकादित्यस्य पुनरावृत्तिरिति । राशीशात्सप्तमांगेशादिति । राशीशात् राशेरीशः राशीशः तस्मात् एतदुक्तं भवति । जन्मराशिर्मिथुनः तदीशो बुधस्तस्य प्रथमा ततः कर्केशश्चंद्रस्तस्य द्वितीयेत्यादि । ननु अत्र राशिक्रमो ग्राह्यो वा गृहक्रमो ग्राह्य इत्याशंकायां राशिक्रम एव "राशिक्रमादशा" इत्युक्तेः । ननु तर्हि मिथुनादिक्रमे प्रथमा बुधस्य चतुर्थ्यपि बुधस्य पुनः प्राप्ता कन्याधिपत्वादिति चेन्नात्र ग्रहक्रमः तस्माद्द्वादशराशीशानामेव दशाग्राह्यत्वादेकस्यैव पुनः प्राप्तौ न दोषः । अत्र वर्षप्रमाणं तु प्रतिराशौ नवसंख्ययैव ग्राह्यम् अष्टोत्तरसंख्योपलब्धेरिति चतुर्थो भेदः । सप्तमांगेशादिति–सप्तमं च अंगं च तयोरीशः तस्मादेतदुक्तं भवति लग्नात्सप्तमाधिपतेः सकाशाद्राशिक्रमाद्दशेति पंचमो भेदः । एवमेव अंगेशान्नाम लग्नाधिपतेः प्रथमा धनाधिपतेर्द्वितीयेत्यादिराशिक्रमात्प्राग्वदेव दशा ज्ञेया इति षष्ठो भेदः । अत्र चतुर्थभेदमारभ्य षष्ठभेदपर्यन्तं शन्यंताः सप्तैव ग्रहाः राहुकेत्वोर्ग्रहत्वाभावादिति । यस्मिन्निति–यस्मिन्नवांशे अंगं लग्नं विद्यते तस्य नवांशस्य य ईशः तस्मादारभ्य नवानां ग्रहाणां दशाः क्रमाज्ज्ञेयाः इति सप्तमो भेदः । अग्रादिति–नवांशानां यदग्रम् अंतिमं नाम नवमो ग्रहः तदारभ्य प्रथमपर्यन्तं ग्रहाणां क्रमशो दशा ज्ञेया । इति अष्टमो भेदः । अब्जादिति–चंद्रात्सकाशाद्रविपर्यन्तं नवानां क्रमाद्दशा ग्राह्याः । अस्मिन्

त्रिप्रकारके दशाभेदे राहुकेत्वंतर्गतत्वसूचनाय “ खेटाः केत्वंताः संस्थिताः क्रमात्” इति स्फुटं लिखितं तेन सप्तमभेदमारभ्य नवपर्यंतं राहुकेत्वंतर्गतत्वं बोध्यं न तु राशीशांगेशसप्तमेशादिभेदत्रयवत् राहुकेतुराहित्यमिति दिक् । अग्रे श्लोकद्वयेन दशानयनप्रकारः स्फुटः ॥

अथ नवांशनवदशोदाहरणमाह ।

यथा जन्मचंद्रः ८ । २५ । २९ । ३८ । अस्य कलापिंडः १५९२९ । ३८ अस्य विंशत्या २० भक्तेर्लब्धांकाः ७९४ इदं द्वादशभिर्भक्तेर्लब्धं भुक्तवर्षादि ६४० । १९ । ० । ० अस्मिन्नष्टोत्तर १०८ मूनं कार्यम् तदा भोग्यवर्षादि ४३ । ११ । ११ । ० । ० । एवं सर्वत्र ज्ञेयम् परं च यत्र यत्र ग्रहाणां दशा तत्र तत्र प्रत्येकग्रहाणां द्वादश १२ वर्षाणि ग्राह्याणि यत्र राशिदशा तत्र प्रतिराशिनववर्षाणि ग्राह्याणि सर्वत्राष्टोत्तरशतमानं ज्ञातव्यम् ॥

अथ राश्यंशकदशामाह ।

तन्वादिभावाः संस्पष्टाः प्रोक्तमार्गेण चानयेत् ॥ लग्नेशांशस्थितो यत्र दशास्तस्य इमाः स्मृताः ॥ ४७ ॥ द्वितीयेशादितश्चाग्रे ज्ञेया राश्यंशका दशा ॥ चिंत्या लग्ने बलवती लग्नेशे वा बलान्विते ॥ ४८ ॥

अस्या दशाया उदाहरणं नवमांशवज्ज्ञेयम् ॥

अथ कालदशामाह ।

संध्या पंचघटी प्रोक्ता दिनषष्ट्यंशनाडिका ॥ सूर्यबिंबार्द्धतः पूर्वं परस्तादुदयादपि ॥ ४९ ॥ संध्याद्वयं विंशत्याघटिकाभिः प्रकीर्तितम् ॥ दिनस्य विंशतिर्दण्डा पूर्णसंज्ञा उदाहृताः ॥ ५० ॥ निशायामुग्धसंज्ञाश्च घटिका विंशतिश्च याः ॥ सूर्योदयस्य या संध्या खण्डाख्या दश नाडिकाः ॥ ५१ ॥ अस्तकालस्य या संध्याः

सुधाख्या दश नाडिकाः ॥ पूर्णमुग्धे गतघटी षड्गुणे नवधा लिखेत् ॥ ५२ ॥ तथा खंडसुधासूर्ये हते तु नवधा लिखेत् ॥ विभक्तानींद्रिययुगैर्मानाख्यानफलानि च ॥ ५३ ॥ क्रमात्सूर्यादिकानां वै मानमुक्तं मुनीश्वरैः ॥ स्वस्वमानं स्वसंख्याभिर्गुणिते स्युः समादयः ॥ ५४ ॥

टीका ।

दिनस्येति । अत्र दिनशब्दोऽहोरात्रपरः अहोरात्रं षष्टिघट्यात्मकं तन्मध्ये पंचघटिका संध्याप्रोक्ता कथिता सा च द्विविधा । अवांतरिता चतुर्विधा भवति । तद्यथा सूर्यबिंबार्द्धादस्तादुदयादपि पंच पंच घटिकाः पूर्वापरा ज्ञेयाः । एवं द्विविधाः संध्या दश दश घटिकाभिः विंशतिर्घटिकाः कथिताः । दिनस्य शेषविंशतिघटिकाः पूर्ण संज्ञा रात्रौ शेषविंशतिघटिका मुग्धसंज्ञा सूर्योदयस्य पूर्वापराः पंच पंच घटिका दश नाडिकाः सा खंडाख्यासंज्ञा एवं पूर्णमुग्धखंडसुधाश्चतुर्विधभेदाः संति एषां मध्ये पूर्णमुग्धे यदा जन्मसमये तदा गतघटीभिः षड्गुणाः कार्या । तेन नवधा लिखेत् । अथवा खंडसुधायां जन्म तदा गतघटीभिः द्वादशगुणितेन नवधा लिखेत् । परम् इंद्रिययुगे ४५ भंक्ते लब्धम् तत्सूर्यादिग्रहाणां श्रीमदाचार्येण मानमुक्तं नाम कथितं सूर्यादिग्रहाणां स्वस्वसंख्याभिः स्वस्वमाने गुणिते सति समादयो वर्षादयः स्युः ॥

अस्योदाहरणम् ।

अथ कालचक्रं द्विभेदाभिन्नं तन्मध्ये प्रथमभेदोदाहरणमाह । यथा दिनस्य विंशतिघटिकायां जन्मेष्टं ८ । १६ तन्मध्ये सूर्योदय ५ घटिका ऊनाः कार्याः शेषघटिका ३ । १६ इदं पूर्णसंज्ञायां जन्म । एत एव षड्गुणाः कार्याः जातांकाः १९ । ३६ इदं पंचचत्वारिंशत् ४५

भक्तेर्लब्धं ० । २६ । ८ । ० । ० एतत्सूर्यादिग्रहाणां मानं परं च सर्वेषां ग्रहाणां स्वस्य संख्याभिर्गुणितं यथा सूर्यसंख्या १ गुणिता जातांकाः ० । २६८ । ० । ० मासस्थाने द्वादश १२ भक्तेर्लब्धं वर्षादिं २ । २ । ८ । ० । ० एवं सर्वत्र ज्ञेयम् ॥

अथ कालचक्रमहादशायन्त्रम् ।

सू.	चं.	मं.	बु.	बृ.	शु.	श.	रा.	के.
२	४	६	८	१०	१३	१५	१७	१९
२	४	६	९	११	१	३	६	८
८	१६	२४	२	१०	१८	२४	४	१२
०	०	०	०	०	०	०	०	०
१०	०	०	०	०	०	०	०	०
१९	१९	१९	१९	१९	१९	१९	१९	१९
००	०३	०७	१३	२२	३२	४५	६१	७८
१७	१७	१७	१७	१७	१७	१८	१८	१८
६५	६८	७२	७८	८७	९८	११	२७	४४
१०	०	४	११	८	८	९	१	७
४	१२	२८	२२	२४	४	२२	१८	२२
१४	१४	१४	१४	१४	१४	१४	१४	१४
२२	२२	२२	२२	२२	२२	२२	२२	२२

अथ पुनः कालचक्रदशामाह ।

कालचक्रं. प्रवक्ष्यामि नराणां हितकाम्यया ॥ यावद्देहादिजीवांतमिति चक्रस्य निर्णयः ॥ ५५ ॥ सप्तविंशतिऋक्षाणि अनुलोमविलोमतः ॥ वक्ष्येऽहं वै तवाग्रे च आश्विन्यादि यथाक्रमम् ॥ ५६॥ द्वे द्वे रेखात्मके चक्रे चतुःकोणं लिखेत् क्रमात् ॥ द्वादशग्रहनिर्माणं मेषादिद्वादशं न्यसेत् ॥ ५७ ॥ ईशान्यादिक्रमेणैव मीनांतं द्वादशं न्यसेत् ॥ एवं क्रमेण चक्रं ताद्विलिखेद्विजनंदन ॥ ५८ ॥ द्वादशारं लिखेच्चक्रं तिर्यगूर्ध्वं समानकम् ॥ गृहाणि द्वादशैवं स्युस्सव्येषु च यथाक्रमम् ॥ ५९ ॥ द्वितीयादिषु कोष्ठेषु राशीन्मेषादिकान्न्यसेत्॥ एवं द्वादशराश्याख्यं कालचक्रमुदीरितम् ॥ ६० ॥ अश्विन्यादित्रयं

चैव सव्यमार्गं प्रतिष्ठितम् ॥ तिस्रोऽपसव्यास्स्युस्तारा रोहिण्याद्या यथाक्रमम् ॥ ६१ ॥ अग्रे पुनः कालचक्रदशासव्यापसव्यमार्गमग्रे स्फुटं वक्ष्यति ॥

अथ चक्रदशामाह ।

राशीश्वराद्दशा ज्ञेया सूर्यादीनां क्रमात्पुनः ॥ दिवारात्रिस्तथा संध्या त्रिकाले त्रिविधा दशा ॥ ६२ ॥ चक्राख्या च दशा प्रोक्ता तवाग्रे द्विजनंदन ॥ लग्नस्थस्य दशा चादौ ततो वित्तास्थितादयः ॥ ६३ ॥ त्रिधादयो यदैकस्थस्तदा भागादयोधिकात् ॥ तत्रापि तुल्यो नैसर्गाद्बलात्सूर्योधिकस्य च ॥ ६४ ॥ राशिप्रमितवर्षाणि भागाद्यान्यपपाततः ॥ भावानामपि लग्नाच्च वर्षाणि दिङ्मितानि च ॥ ६५ ॥

चक्रदशोदाहरणमाह ।

दिवा जन्म तदा राशीश्वराद्दशा ज्ञेया । अत्र तु राशीश्वरो गुरुः । कुंभस्थस्तेनायं कुंभआदिदशा ग्राह्या । रात्रौ जन्म तदा लग्नस्य दशा ग्राह्या यदा संध्यायां जन्म तदा धनभावाद्दशा ग्राह्या एवं सर्वत्र ज्ञेयम् ॥

अथ चक्रदशामाह ।

११	१२	१	२	३	४	५	६	७	८	९	१०	भावाः
१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	१० ० ० ० ०	वर्षाणि मासादयः
१९००	१० १९	२० १९	३० १९	४० १९	५० १९	६० १९	७० १९	८० १९	९० १९	२०००	२०१०	संवत.
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	रविः

अथ चरपर्यादशामाह।

मैत्रेय सुमहाप्राज्ञ परोपहितकारक ॥ आयुर्दायविचारो हिगहनः सर्वदा द्विज ॥ ६६ ॥ आयुर्बहुप्रकारेण भाषितं ब्रह्मणा पुरा ॥ लग्नर्क्षग्रहयोगेन आयुर्दायं वदामि ते ॥ ६७ ॥ नक्षत्रायुः पुरा विप्र तवाग्रे कथितं मया ॥ अधुना संप्रवक्ष्यामि राश्यायुर्द्विजसत्तम ॥६८॥ लग्नादिव्ययपर्यंतं राशयो द्वादशो द्विज ॥ आयुर्वर्षं प्रदातव्या एभिश्चरपर्या दशा ॥ ६९ ॥ ओजर्क्षाणां क्रमाद्विप्र समानां व्युत्क्रमात्पुनः ॥ नाथांतेन समा ज्ञेया निर्विशंकं द्विजोत्तम ॥ ७० ॥ मेषो वृषोऽथ मिथुनो तुलालिश्च धनुर्धरः ॥ एतेषामोजसंज्ञा स्याद्वन्द्वानां गणना क्रमात् ॥ ७१ ॥ कर्कः सिंहश्च कन्या च नक्रकुंभझषा द्विज ॥ एतेषां समसंज्ञा स्याद्वर्षाणां व्युत्क्रमाद्विज ॥ ७२ ॥ स्वर्क्षसंस्थितखेटस्य वर्षाणि द्वादशैव हि ॥ धनस्थे चैकवर्षं तु तृतीये हायनद्वयम् ॥ ७३ ॥ तुर्ये वर्षत्रयं विप्र पंचमे तुर्यहायनम् ॥ रिपुस्थे पंच वर्षाणि षड्वर्षाणि च सप्तमे ॥ ७४ ॥ रंध्रस्थे नगवर्षाणि चाष्टवर्षाणि पुण्यगे ॥ नभःस्थे चांकवर्षाणि दिग्वर्षाणि तु लाभगे ॥ ७५ ॥ व्ययस्थे रुद्रवर्षाणि राश्यब्दाश्च मयानघ ॥ पूर्वोक्तेन प्रकारेण कथिता वै द्विजोत्तम ॥ ७६ ॥ वृश्चिकाधिपती द्वौ च कुजकेतू द्विजोत्तम ॥ स्वर्भानुपंगू कुंभस्य पती द्वौ चिंतयेद्विज ॥ ७७ ॥ स्वर्क्षे यदि स्थितौ द्वौ च भानुवर्षप्रदायकौ ॥ परर्क्षे संमतौ द्वौ च नाथांते न विचिंतयेत् ॥ ७८ ॥ परर्क्षे भिन्नभिन्नस्थौ द्वयोर्मध्ये तु यो बली ॥ तस्य नाथांतरीत्या च वर्षाणि संलिखेद्विज ॥ ७९ ॥ अग्रहात्सग्रहः प्राणी सग्रहादधिकग्रहः ॥ साम्ये चरस्थिरद्वंद्वाः क्रमात्स्युर्बलिनो द्विज ॥ ८० ॥ राशिसाम्ये यदा विप्र बहुवर्षप्रदो बली ॥ तद्बाधादुच्चगः खेटो बल-

वान्सौबलो द्विज ॥ ८१ ॥ यद्यल्पवर्षदो विप्र तदापि तुंगगो बली ॥ नाथांतेन समा ज्ञेया पूर्वोक्तेन क्रमेण हि ॥ ८२ ॥ उच्चखेटस्य यद्भावे वर्षमेकं तु निक्षिपेत् ॥ तथैव नीचखेटस्य वर्षमेकं त्यजेद्विज ॥ ८३ ॥ एकः स्वक्षेत्रगोऽन्यस्तु परत्र यदि संस्थितः ॥ तदान्यत्र स्थितं नाथं परिगृह्य दशां नयेत् ॥ ८४ ॥ एकः स्वोच्चगतस्त्वन्यः परत्र यदि संस्थितः ॥ ग्राहयेदुच्चखेटस्थं राशिमन्यं विहाय वै ॥ ८५ ॥ एवं सर्वं समालोच्य दशायां निधनं वदेत् ॥ पापयोगे पापदृष्ट्या यस्य पापात्रिकोणगाः ॥ ८६ ॥ निधनं तद्दशायां वै भाषितं ब्रह्मणा यथा ॥ चरपर्यादशायास्ते कथयिष्याम्यहं फलम् ॥ ८७ ॥

अथ चरदशोदाहरणमाह ।

ओजराशीनां क्रमगणना समराशीनां विपरीतगणना नाथांतं राशिस्वामिपर्यन्तं यावत्संख्या तानि वर्षाणि स्युः । मेषवृषमिथुनतुलावृश्चिकधनूंषि एतत् ओजराशिसंज्ञा । कर्कसिंहकन्यामकरकुंभमीनानां समराशिसंज्ञा । स्वराशिस्थितखेटस्य तदा द्वादशवर्षाणि ग्राह्याणि । स्वोच्चे तदा यल्लब्धं तन्मध्ये वर्षमेकं वृद्धिः स्यात् नीचे तदा यल्लब्धं तन्मध्ये वर्षमेकं हीनं कार्यम् । वृश्चिकराशेः कुजकेतू द्वौ स्वामिनौ एवं च कुंभराशेः शनिराहू द्वौ स्वामिनौ एतेषां बलाधिके सति स एव ग्राह्यः ॥ दशाक्रममाह ॥ यथा मेषराशिस्वामी भौमः तस्मिन्द्वादशस्थानस्थिते सति एकादश वर्षाणि स्युः एवं वृषस्य दश वर्षाणि लब्ध्वा तस्य स्वामिनि उच्चराशिस्थिते वर्षमेकं वृद्धिर्जाता इमान्येकादशवर्षाणि स्युः । मकरराशिस्वामी शनिः स्वराशिस्थ अत एव द्वादशवर्षाणि स्युः । एवं सर्वत्र ज्ञेयम् ॥

अथ चरदशाचक्रम् ।

१	२	३	४	५	६	७	८	९	१०	११	१२	योगाः
११ ० ० ० ०	११ ० ० ० ०	७ ० ० ० ०	७ ० ० ० ०	६ ० ० ० ०	८ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	२ ० ० ० ०	१२ ० ० ० ०	१२ ० ० ० ०	१ ० ० ० ०	८९ ० ० ० ०
१९००	११ १९	२२ १९	२९ १९	३६ १९	४२ १९	५० १९	५६ १९	५२ १९	६४ १९	७६ १९	८८ १९	८९ १९
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ नवमांशास्थिरदशामाह ।

अधुना संप्रवक्ष्यामि दशास्थिरविशेषतः ॥ नवांशकदशामानं तवाग्रे कथयाम्यहम् ॥ ८८ ॥ प्रतिराशिप्रादिष्टैवमङ्काङ्काब्दा दशा स्थिरा ॥ तन्वादिव्ययभावानां स्पष्टीकृत्वा द्विजोत्तमं ॥ ८९ ॥ ग्रह नवांशायुरीत्या दशा तुल्या नवांशका ॥ अस्थिरा इति विज्ञेया परपक्षमिदं क्रमम् ॥ ९० ॥ पक्षद्वयं प्रवक्ष्यामि चरास्थिरद्वयं द्विज ॥ पूर्वं चरदशां वक्ष्ये तवाग्रे द्विजनन्दन ॥ ९१ ॥ ओजलग्ने जनुर्यस्य नवांशकदशा द्विज ॥ लग्नादिकं समारभ्य या जन्मप्रभृतिर्दशा ॥ ९२ ॥ समराशौ जनुर्यस्य नवांशकदशा द्विज ॥ राश्यादिकं समारभ्य पुरा शंभुप्रणोदितम् ॥ ९३ ॥ ओजराशिगते खेटे क्रमात्तत्तद्दशां नयेत् ॥ तत्तद्राशिनवांशाद्याः समे तु विपरीततः ॥ ९४ ॥ दशाप्रवर्तकः खेटो विषमर्क्षगतो द्विज ॥ राशिप्रतिनवाब्दानां सर्वेषां गणयेत्क्रमात् ॥ ९५ ॥ अष्टोत्तरशताब्दानां संख्यापूर्वं तदांशकाः ॥ ख्याता स्थिरदशा ज्ञेया निर्विशंकं द्विजोत्तम ॥ ९६ ॥ दशाप्रवर्तकः खेटः समराशिं गतो द्विज ॥ तत्तद्राशिं समारभ्य गणयेद्व्युत्क-

मेण च ॥ ९७ ॥ तत्तद्राशिगतानां च नवांशास्ते द्विजोत्तम ॥ अष्टोत्तरशतं संख्या ह्यब्दानां च दशा स्थिरा ॥ ९८ ॥ विषमर्क्षे दशाप्राप्ते मेषे मेषादिकं गणेत् ॥ वृषे वृषादिकं गण्यं क्रमेण द्विजसत्तम ॥ ९९ ॥ समराशिदशाप्राप्ते नवांशकक्रमेण च ॥ संमुखं राशिमारभ्य गणयेद्द्विजसत्तम ॥ १०० ॥ एवं तत्तद्दशाकाले विषमे पूर्ववत्क्रमात् ॥ समे संमुखमारभ्य नवांशकक्रमेणच ॥ १ ॥ मेषे मेषादिकं गण्यं वृषे च मकरादिकम् ॥ मिथुने च तुलाद्यं च कर्के कर्कादिकं द्विज ॥ २ ॥ एवं क्रमेण गणयेद्विषमर्क्षदशांतरे ॥ समर्क्षान्तर्दशाप्राप्ते गणना संमुखेन च ॥ ३ ॥ मेषे च धनुराद्यं च वृषे कन्यामृगं गणेत् ॥ मिथुने च तुलाद्यं च कर्के मीनादिकं च यत् ॥ ४ ॥ एवं क्रमेण गणयेत्समे संमुखराशितः ॥ द्वयोः क्रममहं वक्ष्ये त्रिशूल्यभिहितं यथा ॥ ५ ॥

अथ नवमांशस्थिरदशोदाहरणमाह ।

नवांशस्थिरदशाऽत्र तु ओजलग्नं ० । ६ । ३ । ४२ अत एव लग्नाष्टमो गणनीयः । यथा मेषस्य ९ वर्षाणि वृषस्य ९ वर्षाणि एवं सर्वत्र ज्ञेयम् ॥

अथ नवांशस्थिरदशाचक्रम् ।

१	२	३	४	५	६	७	८	९	१०	११	१२	आद्याः
९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	० ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	१०८ ० ० ० ०
१९ ००	१९ ०९	१९ १८	१९ २७	१९ ३६	१९ ४५	१९ ५४	१९ ६३	१९ ७२	१९ ८१	१९ ९०	१९ ९९	२० १०८
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ स्थिरदशामाह ।

अधुना संप्रवक्ष्यामि स्थिरदशां द्विजोत्तम ॥ प्रकारद्वितयं वक्ष्ये यथा शंभुप्रणोदितम् ॥ ६ ॥ चरस्थिरद्विस्वभावा राशयो त्रिविधाः क्रमात् ॥ सप्ताष्टमनवाब्दां च आनयीत दशां स्थिराम् ॥ ७ ॥ मेषे सप्ताब्दविज्ञेया वृषे वसु ८ समा द्विज ॥ मिथुने नव वर्षाणि कर्कांत्यादि यथाक्रमम् ॥ ८ ॥ द्वादशराशिपर्यन्तं ज्ञायतेऽब्दाद्विजोत्तम ॥ षण्णवतिसमा संख्या तामारभ्य वदाम्यहम् ॥ ९ ॥ एषा स्थिरा सिद्धदशा तस्या यदि प्रवर्तकम्॥ ब्रह्मग्रहाश्रितारंभस्तदग्रे पूर्ववत्क्रमः ११०

अथ स्थिरदशोदाहरणम् ।

अत्र तु बुधः ब्रह्मग्रहः अत एव मकरस्थबुधः तस्य आदिमहादशा प्रथमं मकरः १० द्वितीय कुंभः ११ तृतीयं १२ प्रतिराशिचरादि ८। ९ एवं वर्षाणि सर्वत्र ज्ञेयम् ॥

अथ स्थिरदशायन्त्रमिदम् ।

१०	११	१२	१	२	३	४	५	६	७	८	९	भावाः
७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	वर्षा० ० ० ० ०
१९ ००	१९ ०७	१९ १५	१९ २४	१९ ३१	१९ ३९	१९ ४८	१९ ५५	१९ ६३	१९ ७२	१९ ७९	१९ ८७	१९ ९६
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथोत्तरदशा चतुर्विधप्राणमाह ।

अथ विप्रोत्तरदशानिरूपणमिहोच्यते ॥ प्राणबलेन संयुक्ते तत्रादौ राशिरुच्यते ॥ ११ ॥ आद्यं प्राणिबलं वाच्यं कारके योग-

संमतात् ॥ स्वस्वकारकसंबंधे तत्तद्राशिर्बलप्रदः ॥ १२ ॥ कारकयोगे बलसाम्यं गृहयोगाय साम्यता ॥ भूयसा ग्रहयोगेन बलं वाच्यं द्विजोत्तम ॥ १३ ॥ ग्रहादिकं ग्रहबलामिति न्यायेन चिंतयेत् ॥ तदापि साम्यता विप्र यदापि निर्णयं वदेत् ॥ १४ ॥ राश्याधिपे स्वतुंगस्थे मित्रक्षेत्रादिकेऽपि वा ॥ एवं राशिबलं ज्ञेयं निर्विशंकं द्विजोत्तम ॥ १५ ॥ ततो बलविशेषार्थो नैसर्गिकमतं पुरा ॥ तस्मान्निसर्गकबलं संग्राह्यं द्विजसत्तम ॥ १६ ॥ अग्रहात्सग्रहो ज्यायान्सग्रहादधिकग्रहाः ॥ साम्ये चरास्थिरद्विर्वा क्रमात्स्युर्बलशालिनः ॥१७॥ एवं चरस्थिरप्राणिस्थिरो द्वंद्वबली द्विज ॥ ध्यायेद्विलंबनैसर्गं चिंतयित्वा न संशयः ॥१८॥ पूर्वोक्ते कारकाध्याये चिन्तयेद्विजसत्तम ॥ कारकयोगादि बलं तस्मात्प्राणवती भवेत् ॥ १९ ॥ राशौ कारकयोगेषु निजनाथेन संयुते ॥ सराशिर्बलवान् विप्र कारके योगके मते ॥१२०॥ स्वामियुक्तः कारकेषु यत्तद्राशिर्बली द्विज ॥ तत्तद्राशौ चिंतनीयमग्रमग्रे विशेषतः ॥ २१ ॥ एकराशौ बहुग्रहाः संयुक्ता द्विजसत्तम ॥ राशिद्वारा बली ज्ञेयो यदि अग्रायनेधिकः ॥ २२ ॥ स्वल्पांशाल्पबली ज्ञेयो मध्यांशान्मध्यवीर्यकः ॥ अंशाधिकबली ज्ञेयो ग्रामवनविलक्षणात् ॥ २३ ॥ ओजराशौ वेशिके च पुरतः पार्श्वे २।९२ संस्थिताः ॥ पृष्ठतो वा प्राण इति बलदत्वेन कथ्यते ॥ २४ ॥ इतिप्रथमभेदः ॥ यस्मिन्राशेः स्वामियोगे गुरुचांद्रिनिरीक्षते ॥ स राशिर्बलवान्प्रोक्तो द्वितीयेपि च प्राणिनि ॥ २५ ॥ राशीनां द्वादशानां च बलमेवं द्वितियकम् ॥ इति प्रोक्तप्रकारेण द्वितीयं ज्ञायते बलम् ॥ २६ ॥ इति द्वितीयप्रमाणभेदः ॥ स्वामिनां तृतीयं प्राणि तवाग्रे गदितं मया ॥ स्वात्मकारककुंडल्यां चिंतयेद्विजसत्तम ॥ २७ ॥ केंद्रे पणफरे प्रोक्तं स्वामिदौर्बल्यमेव हि ॥ केंद्रदुर्बलवांश्चैवं पणफरे चैकसंज्ञकः ॥ २८ ॥ आपोक्लिमे द्विगुणितमेवं दौर्बल्यमेव च ॥ तृतीयं

प्राणि इत्येव जानीयाद्द्विजनंदन ॥ २९ ॥ इति तृतीयप्राणभेदः ॥ चतुर्थप्राणि विज्ञेयं तवाग्रे च वदाम्यहम् ॥ पापयोगेन रहितः पापाक्रांतो न पश्यति ॥ स राशिर्बलवान् विप्र प्राणधारे चतुर्थकः ॥ १३० ॥ चतुर्विधे प्राणसंज्ञे एतेषां बलवीर्ययुक् ॥ स राशिस्त्र भागे च अंतःपाके द्विजोत्तम ॥ ३१ ॥ इति चतुर्थभेदः ॥

अस्योदाहरणम् ।

अत्र तु आत्मकारको भौमः स एवाद्यप्राणः द्वितीयांशे निःप्राणः कुतः मकरस्थस्य राशौ बुधसंयुक्ते अत एव द्वितीयशनिप्राणस्वोच्चे भृगुकारककुंडल्यां भृगूच्चस्थे केंद्रगते नायं भृगुस्तृतीयप्राणः पापग्रहरहितः चंद्रश्चतुर्थप्राणः ॥

अथ चतुर्विधप्राणदशायंत्रम् ।

१२ मं.	१	२	१० श.	११	१२	१२ शु	१	२	९ चं.	१०	११	भा.
१	११	११	१२	१२	१	१	११	११	२	१२	१२	वर्ष
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
१९००	१९०१	१९१२	१९२३	१९३५	१९४७	१९४८	१९४९	१९६०	१९७१	१९७३	१९८५	१९९७
१०	१८	१०	१०	१०	१०	१८	१०	१०	१०	१०	१०	१०
४	४	४	४	४	४	४	४	४	४	४	४	४
१४	११	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४
२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२

कारकलग्नमाह ।



अस्या दशाया वर्षाणि चरदशावदानीतानि.

अथ ब्रह्मग्रहाश्रितषष्ठांत्यब्दिकां दशामाह ।

अधुना संप्रवक्ष्यामि ब्रह्मतामपरां दशाम् ॥ तस्याः प्रकारो वै विप्र तवाग्रे गदितो मया ॥ ३२ ॥ पूर्वोक्तलक्षणाक्रांते यत्र ब्रह्मग्रहे स्थिते ॥ तमारभ्य दशा ज्ञेया षष्ठांत्यब्दां समानयेत् ॥ ३३ ॥ ओजलग्ने रविश्चंद्रो मंगलादिक्रमेण च ॥ यस्य राशिस्थिते ब्रह्मा

तद्ग्रहात्षष्ठखेचरः ॥ ३४ ॥ रवेर्भृगुं विजानीयाच्छिखिनोगुरिति क्रमः ॥ षष्ठांतिमसमा विप्र गणनीया यथोक्तकम् ॥ ३५ ॥ समलग्नं यदा प्राज्ञ ब्रह्मखेटः समाश्रितः ॥ तत्तद्राशितमो राशिपर्यंताब्दसमं नयेत् ॥ ३६ ॥ यद्वा ब्रह्मसमां राशिमारभ्य क्रियते द्विज ॥ षष्ठराश्यंतमब्दांश्च संग्राह्य परक्षकः ॥ ३७ ॥ दशा ब्रह्मग्रहपरा राशिमारभ्य कीर्त्यते ॥ षट्खेटा यत्र पूर्णांश्च भवंति द्विजसत्तम ॥ ३८ ॥ तावद्धि राशिपर्यन्तं समा ग्राह्याः प्रयत्नतः ॥ यत्तत्समायुःसंज्ञेयं निर्विशंकं द्विजोत्तम ॥ ३९ ॥ ओजक्रमेण गणनां समेषु चिंतयेत्क्रमः ॥ समोपि सप्तमाच्चेत्तद्राशिर्ब्रह्मणाश्रितः ॥ १४० ॥ ओजब्रह्मग्रहाश्रित्यैतद्ग्रहात्षष्ठमांतकः ॥ समानां गणना विप्र पुरा शंभुप्रणोदिता ॥ ४१ ॥ समे ब्रह्मग्रहाश्रिते सप्तमः षष्ठमान्तकः ॥ गणनीया समा ज्ञेया निर्विशंकं द्विजोत्तम ॥ ४२ ॥

अथ बलविशेषं दर्शयति ।

लग्नेशाल्लाभभावेशौ लग्न इत्यादितो द्विज ॥ स्थातव्यं च पितुः प्राण इत्येवं ब्राह्मणोदितम् ॥ ४३ ॥ षड्वर्गादिस्तु संबंधः स्थानव्यतिकरो द्विज ॥ तथा पूर्वोक्तसंबधे तस्याः स्वच्छं वदाम्यहम् ॥ ४४ ॥ ओजलग्नाश्रिते लग्ने तद्राशिगणनाक्रमात् ॥ षष्ठस्वाम्यंतरीत्या च समानीया द्विजोत्तम ॥ ४५ ॥ ब्रह्माश्रितसमे लग्ने सप्तमाद्व्युत्क्रमेणच ॥ गणयेत्षष्ठिसंख्याह्नि ह्यब्दानिह द्विजोत्तम ॥ ४६ ॥ एवमेकादशे पापे दृष्टियोगे भवत्यपि ॥ ग्रहयोगं तथा विप्र प्रबले च व्यतीकरः ॥ ४७ ॥ रुद्रशूलदशादौ च क्वचित्प्राणो भवत्यपि ॥ तदग्रे तुंगादिबलं व्यतिकरार्थंचतुर्थकः ॥ ४८ ॥ तुंगमूलत्रिकोणेषु स्वर्क्षमित्रादिवर्गके ॥ ग्रहयोगबलप्राप्ताश्चत्वारो द्विजसत्तम ॥ ४९ ॥ इत्यास्यानव्यतिकरो भेदार्थां च चतुर्विधा ॥ अथ कारकयोगानां चतुर्द्धा भेद उच्यते ॥ १५० ॥ चतुर्धा प्राणसंज्ञेयं पूर्ववद्द्विजसत्तम ॥ प्राण इत्यु-

पसंहारः पुरा शंभुप्रणोदितः ॥ ५१ ॥ पंचम इत्युपपदं केतुपंचम शुभम् ॥ ओजे क्रमेण गणना समे वा व्युत्क्रमेण च ॥ ५२ ॥ दशाऽऽनेयाऽऽब्दसंख्या च पर्यायाष्टक्रमेण च ॥ नाथांतेन समा ज्ञेया पूर्ववद्द्विजसत्तम ॥ ५३ ॥ त्रिकं त्रिकं राशिपदमोजे चतुःक्रमेण च ॥ समे व्युत्क्रमरीत्या च राशेः पदात्रिकं त्रिकम् ॥ ५४ ॥ क्रमेण पंचमे केतुर्नवमे व्युत्क्रमेण च ॥ शुभं फलं न दत्त्वैनं पंचमे शिखिसौम्यवत् ॥ ५५ ॥ पंचम इत्युपपदं पदारूढे विचिंतयेत् ॥ ओजक्रमेण गणना समे लग्ने न व्युत्क्रमः ॥ ५६ ॥ नवमे संस्थिते केतावारूढं राशितो द्विज ॥ विषमे पूर्ववत्तर्हि क्रमेण पंचमे स्थिते ॥ ५७ ॥ शुभे फलप्रदातारः पंचमे चरसंज्ञकाः ॥ केतोर्दशायां वै पापा ददत्येवं शुभे फलम् ॥ ५८ ॥ ग्रहनवांशकरीत्या च समानीतं द्विजोत्तम ॥ चरनवांशाब्दसंज्ञेयं भावे बलाद्वितीयकम् ॥ ५९ ॥ स्वस्वाम्यादि दशा ग्राह्या फलादेशाय हेतवे ॥ स्थिरनवांशे वर्षाणि राशिं प्रति नवैव हि ॥ १६० ॥ चरराशिनवांशाब्दे मासान्येव चरस्थिरा ॥ विधेये विफलार्थाय बले ग्राह्यं द्विजोत्तम ॥ ६१ ॥ यस्मिन्काले यस्य राशेर्यदा सा च चरस्थिरा ॥ पर्यायस्तद्दशायां च स राशिर्द्वारमुच्यते ॥ ६२ ॥ लग्नाद्यावद्दूरं स्याद्द्वारराशिर्द्विजोत्तम ॥ तस्माच्च तावद्दूरो हि बाह्यराशिर्भवत्यपि ॥ ६३ ॥ चरानुक्तिमार्गः स्याद्दृष्टषष्ठादिका स्थिरे ॥ उभये कंटका ज्ञेया लग्नपंचमभाग्यतः ॥ ६४ ॥ चरस्थिराद्विःस्वभावे ओजेषु प्राक्क्रमोत्क्रमः ॥ तेषु च त्रिषु युग्मेषु ग्राह्या व्युत्क्रमतोऽखिला ॥ ६५ ॥ एवमुल्लिखितो राशिः पाकराशिरिति स्मृतः ॥ स एव भागराशिश्च पर्याये प्रथमे स्थिरः ॥ ६६ ॥ लग्नाद्यावत्स्थितेः पाकः पर्याय इव दृश्यते ॥ तावन्मात्रं स्थितेर्भोगः पर्याये यत्र गृह्यताम् ॥ ६७ ॥ तदिदं चरपर्यायस्थि-

रपर्याययोर्द्वयोः ॥ त्रिकोणाख्यदशायां च पापभोगप्रकल्पनम् ॥ ६८ ॥
तयोर्द्वयोः समालोक्य योगं पापेन विप्र तम् ॥ पापग्रहदशायां च वंध्यादि
परिचिंतयेत् ॥ ६९ ॥ पापयोगे च पापाद्ये देहपीडा मनोव्यथा ॥ नृपा-
द्भीतिर्महाक्लेशो भवति द्विजसत्तम ॥ १७० ॥ यस्मिन् राशौ पापभोगः
पापाश्चेत्पापयोगतः ॥ स्वर्क्षे गुरुसमीपस्थे पापयोगो न बाधते ॥
॥ ७१ ॥ शुभखेटाश्च सर्वे वा मध्ये कोपि ग्रहो द्विज ॥ समीपे स्वर्क्ष-
तुंगस्थे पापयोगो न बाधते ॥ ७२ ॥ शुभैः शुभफलं वाच्यं सा
दशा सर्वशोभना ॥ राज्यलक्ष्मीप्रदात्री च प्रतिष्ठा गौरवं सुखम् ॥
॥ ७३ ॥ बलिनोः शुक्रशशिनोः केंद्राख्यात्तुदशां नयेत् ॥ पुरुष-
श्चेतसो नेयाः स्त्रियश्चेद्दर्पणं नयेत् ॥ ७४ ॥ आदौ शुक्रादितो नेया
द्वितीयं सूर्यतो द्विज ॥ कुजादितस्तृतीये च प्रकारं सर्वतो नयेत् ॥
॥ ७५ ॥ क्रमव्युत्क्रमभेदेन भृगुभानुकुजान्नयेत् ॥ सर्वेषां फलमि-
त्येवं यथा शंभुप्रणोदितम् ॥ ७६ ॥ लग्नसप्तमयोर्मध्ये बली चैकः
प्रकल्प्यताम् ॥ केंद्रे पणफरापोक्लें दशार्थं द्विजसत्तम ॥ ७७ ॥ केंद्रप्र-
थमतो नेयात्पंचमात्पणफरे स्थिते ॥ नवमाच्चापोक्लिमे नेयाद्दशारंभो
ह्ययं क्रमात् ॥ ७८ ॥ ओजे समप्रभेदेन पुरुषः स्त्री प्रकल्पयेत् ॥
लग्नात्तद्विसुखाद्विप्र दशाद्वादशराशिषु ॥ ७९ ॥ चरे पूर्वप्रकारेण
स्थिरे षष्ठादिकेन च ॥ यावद्द्वादशभावानां भेदं दत्त्वारिभाषि-
तम् ॥ १८० ॥ चरे प्रकारमेवैकं स्थिरे षष्ठादितो द्विज ॥
॥ ८१ ॥ चरपर्या दशा प्रोक्ता पूर्वाख्येयं द्विजोत्तम ॥ स्थिर-
पर्यादितः प्रोक्ता सप्ताष्टनववर्षतः ॥ ८२ ॥

अस्योदाहरणमाह ।

अत्र तु बुधो ब्रह्मा तस्मात्षष्ठो ग्रहः केतुः तस्मात्षष्ठो ग्रहो गुरुः एवमग्रेऽपि बोद्धव्यम् ॥

अथ ब्रह्मदशायंत्रम् ।

१०	११	१२	१	२	३	४	५	६	७	८	९	भावाः
बु.		के.		बृ.		सू.		शु.		चं.		
६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	७२ वर्षाणि.
१९००	१९०६	१९१२	१९१८	१९२४	१९३०	१९३६	१९४२	१९४८	१९५४	१९६०	१९६६	१९७२
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ केंद्रादिदशामाह ।

अथ केंद्रदशारीत्या भेदानाह द्विजोत्तम ॥ ८३ ॥ प्रथमे चरराशौ च लग्ने वा सप्तमेऽपि वा ॥ बलवद्राशिमारभ्य उक्तमार्गे दशाक्रमः ॥ ८४ ॥ विषमे समभेदाच्च प्रथमे प्राक्क्रमोत्क्रमः ॥ प्रथमादि द्वितीयादि द्वादशानां क्रमेण च ॥ ८५ ॥ संप्राक्क्रमोक्तपदमप्यनुज्झितक्रमोपरि ॥ दशा द्वादशराशीनां क्रमव्युत्क्रमभेदतः ॥ ८६ ॥ स्थिरराशौ द्वितीयेपि लग्ने वा सप्तमे द्विज ॥ षट्षष्ठादि च रीत्या च दशारंभः प्रकाशयेत् ॥ ८७ ॥ रवितः पूर्वमुक्तेन क्रमव्युत्क्रमभेदतः ॥ क्रमाद्वृषे वृश्चिके च व्युत्क्रमात्कुंभसिंहयोः ॥ ८८ ॥ पृथक्क्रमेण तृतीयद्विस्वभावदशा द्विज ॥ लग्ने वा सप्तमे वापि बलवान्न विलोकयेत् ॥ ८९ ॥ चतुष्टकेंद्रादिदशा लग्नपंचमभाग्यतः ॥ केंद्रे लग्ने ततो नेयात्पणफरे पंचमादितः ॥ १९० ॥ आपोक्लिमे भाग्यतश्च दशारंभो द्विजोत्तम ॥ नवं नवं समा ग्राह्या मैत्रेयस्पष्टभाषिते ॥ ९१ ॥

अथ कारकेंद्रदशामाह ।

सूर्यादिनवखेटाश्च आयुर्दायनवांशकान् ॥ नवभिर्नवभिर्वर्षैः कारकेन्द्रादिका
दशा ॥ ९२ ॥ तेषां नवांशकानां च ह्यब्दानां द्विजसत्तम ॥
कारकेंद्रादि संस्थाप्य क्रमात्पूर्वं समानयेत् ॥ ९३ ॥ आदौ केंद्रस्थराशिश्च
तस्याधिपक्रमेण च ॥ नवभिर्नवभिर्वर्षैः कारकेंद्रादिसंस्थिता ॥
॥ ९४ ॥ आदौ केन्द्रस्थराशिश्च तस्याधिपक्रमेण च ॥ बलाधिक्येन
प्रथमस्ततो दुर्बलसंज्ञकः ॥ ९५ ॥ प्रतिभे नव वर्षाणि कारकाश्रितराशितः
॥ जन्मसंपद्विपत्क्षेमप्रत्यरीसाधको वधः ॥ ९६ ॥
मैत्रातिमैत्रमित्येवं तत्तदंतर्दशां नयेत् ॥ स्वकेंद्रस्थाधिपानां च सूर्यादीनां
ग्रहाद्द्विज ॥ ९७ ॥ कारकलग्ने समालोक्य लग्नसप्तमयोर्बली ॥
तदारभ्य क्रमेणैवं क्रमव्युत्क्रमभेदतः ॥ ९८ ॥ गृहकारकपर्यंतं राशिसंख्या
दशाब्दिका ॥ ततः कारककेंद्रादिविभागेन बली भवेत् ॥
॥ ९९ ॥ आदौ केंद्रस्थितानां च स्थितानां पणफरे स्थितः ॥
आपोक्लिमे स्थितानां च ततोपि बलवद्द्विज ॥ २०० ॥ बलाढ्यः
प्रथमे विप्र क्रमेण सर्वदुर्बला ॥ केंद्रादिस्थग्रहाणां च दशाब्दानयनं
कृतम् ॥ १ ॥ खेटात्कारकपर्यन्तं राशिसंख्याप्रमाणतः ॥
एवं दूरं महाप्राज्ञ नवत्यब्दान्नयेत्क्रमात् ॥ २ ॥ यथा कारकग्रहस्याब्दास्तथा
कारकयुक्तकाः ॥ तत्तद्ग्रहाणामब्दानामानेयं द्विजसत्तम
॥ ३ ॥ एवं स्थिरदशारम्भात्स्थानं दर्शयाति द्विज ॥ अंतर्दशाब्दमानेयं
ह्यर्क १२ भानां क्रमेण च ॥ ४ ॥ लग्नादिचतुःकेंद्रेषु
वैषम्याधिके वै द्विज ॥ तद्राशेः स्थितिमारभ्य ह्येकाब्देन क्रमेण
च ॥ ५ ॥ चतुःकेंद्रेषु विप्रेंद्र विषमातिबलाधिका ॥ दशाप्रदत्वात्सराशिः
कारकं पर्यवास्थितः ॥ ६ ॥ अंतर्दशां तदारभ्य
द्वादशराशिषु द्विज ॥ प्रातिराश्येकमब्दं चेत्सर्वे स्पष्टाधिपाः
क्रमात् ॥ ७ ॥ एवं महादशाब्दानां द्वादशराशिषु भ्रमेत् ॥ तदनंतदशा

ज्ञेया भानूराश्योपरिभ्रमन् ॥ ८ ॥ नवांशाख्या दशाब्दानामित्यनुवृत्यमेव च ॥ आदिराशिनवाब्दानां संग्राह्यो द्विजसत्तम ॥ ९ ॥ एवं केंद्रबलाधिक्यमारभ्य प्रथमा दशा ॥ दुर्बलानां च सर्वेषामब्दानामानयेत्क्रमात् ॥ २१० ॥

अथ केंद्रादिदशोदाहरणम् ।

अथ प्रथमचरादिभेदमध्ये लग्नसप्तमयोर्मध्ये यो बलवान्स प्रथमतो ग्राह्य एवं स्थिरद्विस्वभावादि ज्ञेयम् । अत्र तु चरलग्नमध्ये सप्तमो बलवान् स एव तुलायां दशाप्रारंभे अग्रे मकरः अत्रमेषः ४ पुनः पणफरात् वृश्चिकदशा अग्रे कुंभः अग्रे (२) पुनः आपोक्लिमे धनं द्वितीयं १२ तृतीयं (३) एवं सर्वत्र ज्ञेयम् । अत्र तु तुलाचरराशिर्बलवान् स एव ग्राह्यः वर्षाणि ९ नवनव ग्राह्याणीति सर्वत्र ज्ञेयम् ॥

अथ केंद्रादिदशायंत्रम् ।												
७	१०	१	४	८	११	२	५	९	१२	३	६	भावाः
९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	१०८ ० ० ० ०
१९ ००	१९ ०९	१९ १८	१९ २७	१९ ३६	१९ ४५	१९ ५४	१९ ६३	१९ ७२	१९ ८१	१९ ९०	१९ ९९	१०८
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ कारकग्रहदशानयनमाह ।

लग्नाद्वा सप्तमाद्विप्र गणनीयः क्रमोत्क्रमात् ॥ कारकावधिराशिश्च संख्या यंत्रात्मिकाः समाः ॥ ११ ॥ कारकग्रहदशा विप्र अन्येषां तु व्यतिक्रमः ॥ ग्रहाः कारकपर्यंतं विषमसमाविरोधतः ॥ १२ ॥ क्रमव्युत्क्रमभेदेन गणनीयं द्विजोत्तम ॥ संख्यासमा

हाब्दाश्च पुरा शंभुप्रणोदिताः ॥ १३ ॥ कारकयुक्तग्रहाणां तु कारकतुल्याब्दसंख्यया ॥ संग्राह्याश्च समा ज्ञेयाः पूर्वोक्तेन दशाक्रमः ॥ १४ ॥ लग्नात्कारकपर्यंतं संख्यां न्यस्य दशा भवेत् ॥ गणनीयं प्रयत्नेन समालब्धदशां नयेत् ॥ १५ ॥ तद्युक्तानां तुल्याब्दाः प्रत्येकं स्युर्दशाक्रमात् ॥ उभयोरधिकं संख्या कारकस्य दशासमाः ॥ १६ ॥ कारकस्य युतश्चादौ तत्केंद्रादिस्थितास्ततः ॥ दशा क्रमेण विज्ञेयाः शुभाशुभफलप्रदाः ॥ १७ ॥ पूर्वं फलं प्रवक्ष्येहं दशायास्तु द्विजोत्तम ॥ स्वामिना बलवान् विप्र तस्याधिकशुभं फलम् ॥२१८॥

अथ कारकग्रहदशोदाहरणम् ।

अत्रात्मकारको भौमः मीनस्थो लग्नमारभ्य भौमपर्यंतमब्दाः ११ स्युः परममात्यकारकश्चंद्रः धनराशिस्थो लग्नमारभ्य चंद्रपर्यंतमष्टौ वर्षाणि स्युः एवमग्रेपि बोद्धव्यम् ॥

अथ कारकचक्रमाह ।

मंगलः	चंद्रमाः	बृहस्पतिः	बुधः	शनैश्चरः	शुक्रः	सूर्यः
आत्मकारक.	अमात्यकारक.	भ्रातृकारक.	मातृकारक.	पुत्रकारक.	ज्ञातिकारक.	दाराकारक.

अथ कारकग्रहदशाचक्रम् ।

१ मं.	९ चं.	११ गु.	१० बु.	१० श.	१२ शु.	११ सू.	योगाः
११ ० ० ० ०	८ ० ० ० ०	१० ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	११ ० ० ० ०	१० ० ० ० ०	६८ ० ० ० ०
१९००	१९११	१९१९	१९२९	१९३८	१९४७	१९५८	१९६८
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ मंडूकदशामाह ।

मंडूक इति विख्यातां त्रिकूटाख्यां दशां द्विज ॥ सप्ताष्टनवसंख्या
श्च क्रमाब्दाः स्थिरदशा इति ॥ १९ ॥ चरस्थिरद्विस्वभावे सप्ताष्टनवसंख्यया
॥ अब्दांस्तु पूर्वरीत्या च ह्यानीय च दशा स्थिरा
॥ २२० ॥ तद्राशेश्चाब्दकूटश्च घटितत्वाद्विजोत्तम ॥ चरस्थिरद्विस्वभावानां
त्रिकोणर्क्षे प्रवर्तते ॥ २१ ॥ क्रमेण प्रोक्तरीत्या
च प्रवृत्तत्वात्रिकूटका ॥ मंडूकेति समाख्याता पुरा शंभुप्रणोदिता
॥ २२ ॥ केंद्रात्पणफराच्चैवापोक्लिमलग्नपंचतः ॥ क्रमेण
भाग्यादिति च त्रिकोणाख्या च पूर्ववत् ॥ २३ ॥ त्रिकूटघटितत्वाच्च
केंद्रादिति द्विजोत्तम ॥ समुद्रा घटितत्वाच्च दशा स्थूला
त्रिकूटका ॥ २४ ॥ वैषम्याद् यदि विप्रेंद्र लग्नसप्तमयोस्तथा ॥
मध्ये बलवती राशिस्तमारभ्य प्रवर्तते ॥ २५ ॥ पुंसो जातकवान्
विप्र लग्नसप्तमयोर्द्वयोः ॥ बलाढ्येन दशा ज्ञेया पूर्वोक्तेन क्रमेण
च ॥ ॥ २६ ॥ स्त्रीजातकवती विप्र बलवत्सप्तमा दशा ॥ आनीय
पूर्वरीत्या च पुनरुक्तं प्रणोदितम् ॥ २७ ॥ बलिनौ शुक्रशशिनौ
ज्ञेया मंडूकका दशा ॥ पुरुषश्च ततो नेयात्स्त्री चेद्दर्पणतो नयेत् ॥
॥ २८ ॥ केंद्रे पणफराच्चापोक्लिमक्रमेण बलवान्द्विज ॥ आदौ
रीत्या दशाऽऽनेया प्रतिराशि नवाब्दिका ॥ १२९ ॥

अथ मंडूकदशोदाहरणमाह ।

अत्र तु मेषलग्नं तस्यादिमा दशा तदब्दाः ७ परं सिंहराशिदशा अब्दाः स्युः ८ परं धनराशिदशाब्दाः ९ स्युरग्रे वृषात् २ । ६ । १० एवमग्रेऽपि बोद्धव्यम् । केंद्रादिक्रमेण मंडूकवदुत्प्लुत्य पतनान्मंडूकसंज्ञा एवं ज्ञेयम् ॥

अथ मण्डूकदशाचक्रम् ।

१	५	९	२	६	१०	३	७	११	४	८	१२	आद्याः
७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	० ० ० ० ०
१९ ००	१९ ०७	१२ १५	१२ २४	१९ ३२	१९ ४१	१९ ४८	१९ ५७	१९ ६४	१९ ७२	१२ ७९	१९ ८७	००
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	० ० ० ०

अथ शूलदशामाह ।

दशा शूलं प्रवक्तव्यं फलं निर्याणराशितः ॥ प्रवक्ति सप्तमाद्विप्र निर्दशे शूलमात्रतः ॥ २३० ॥ माहेश्वरर्क्षादिदशानिर्याणस्थानशूलभम् ॥ बलेन शूलं संग्राह्यं मृत्युश्चाथ द्विजोत्तम ॥ ३१ ॥ दशानेकविधा विप्र सप्ताष्टनवभिः सदा ॥ अत्र ग्राह्या महाप्राज्ञ शूले निर्याणनिश्चितम् ॥ ३२ ॥ सर्वायुः पाकमारभ्य राशौ च विषमे द्विज ॥ लग्नात्प्रवृत्तिः संज्ञेया सप्ताष्टनवभिः समाः ॥ ३३ ॥ समेति सप्तमाद्विप्र नग ७ नाग ८ नवाङ्कि काः ९ ॥ दशामारभ्य संग्राह्यं निर्विशंकमिदं क्रमात् ॥ २३४ ॥

अथ शूलदशोदाहरणमाह ।

अत्र तु भृगुः रुद्रशूलसंज्ञा शूलदशानिर्याणराशेः सप्तमराशितः प्रवृत्ता भृगोः सकाशात् कन्या सप्तमराशिः अत एव कन्याराशिमारभ्येति ज्ञेयम् ॥

अथ शूलदशाचक्रम् ।

६	७	८	९	१०	११	१२	१	२	३	४	५	योग०
९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९ ० ० ० ०	७ ० ० ० ०	८ ० ० ० ०	९६ ० ० ० ०
१९००	१९०९	१९१६	१९२४	१९३३	१९४०	१९४८	१९५७	१९६४	१९७२	१९८१	१९८८	१९९६
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ नक्षत्रदशामाह ।

नक्षत्रायुर्महाप्राज्ञ पूर्णमग्रे प्रभाषितम् ॥ विंशोत्तरी पंचधा च द्विधा चाष्टोत्तरी मता ॥ ३५ ॥ पशुवर्गोपरि दशा सर्वेषां चिंतयेद्विज ॥ ततो निर्याणमालेख्यं निर्विशंकं भविष्यति ॥ ३६ ॥

अथ योगार्द्धदशामाह ।

चरस्थिरदशा विप्र यं च योगं समाचरेत् ॥ तस्यार्द्धं च समायुर्दा योगार्द्धाख्या तु सा दशा ॥ ३७ ॥ लग्नसप्तमयोर्मध्ये चिन्तयेत्तु बलाश्रयम् ॥ लग्ने बलयुते लग्नाद्दशारंभं प्रकाशयेत् ॥ ३८ ॥ तस्मात्सप्तमवीर्याढ्यं ॥ दशारंभं प्रकल्पयेत् ॥ पुंसां स्त्रीजातकं वक्ष्ये क्रमव्युत्क्रमभेदतः ॥ ३९ ॥ बलिनस्तु दशाऽऽनेया राशेर्हि शशिशुक्रयोः ॥ स्त्रीचेद्दर्पणतो नेया पुरुषश्च ततो नयेत् ॥ २४० ॥

अथ योगार्द्धदशोदाहरणमाह ।

योगार्द्धदशायां प्रतिराशिसमागतचरदशाब्दस्थिरदशाब्दयोर्योगार्द्धं कर्तव्यं तदेव योगार्द्धदशा ॥ तद्यथा मेषचरदशायाम् एकादशवर्षाणि ११ पुनः स्थिरदशायां ७ सप्त वर्षाणि उभयोर्योगे १८ अस्यार्द्धम् ९ एवं सर्वत्र ज्ञेयम् ॥

अथ यागार्द्धदशाचक्रम् ।

१	२	३	४	५	६	७	८	९	१०	११	१२	योगाः
९	९	८	७	७	८	६	७	५	९	१०	५	९०
०	६	०	०	०	६	६	०	६	६	०	०	६
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
१०.००	१०.०९	१०.१९	१०.२७	१०.३४	१०.४१	१०.४९	१०.५६	१०.६३	१०.६९	१०.७८	१०.८८	१०.९३
१०	१०	४	४	४	४	१०	४	१०	४	१०	१०	१०
४	४	४	४	४	४	४	४	४	४	४	४	४
१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४
२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२

अथ दृग्दशामाह ।

कुजादिति च, ज्ञेयासा विलग्ननवमादितः ॥ क्रमत्रये कूटपदं नाम्ना वै दृग्दशा द्विज ॥ ४१ ॥ दृष्टिचक्रे संमुखश्च राश्यादौ नवमस्य च ॥ कुत्रचित्क्रमरीत्या च कुत्रचिद्व्युत्क्रमेण च ॥ ४२ ॥ ततोपि पंचमस्यैवं क्रमेण कुत्राचिद्विज ॥ कुत्राचिद्व्युत्क्रमेणैवं राश्येकादश संमुखम् ॥ ४३ ॥ तस्याभावप्रमाणं हि न ग्राह्यं द्विजसत्तम ॥ संग्राह्यं पंचमस्यैवं दृष्टिचक्रे विशेषतः ॥ ४४ ॥ अभिपश्यंति ऋक्षाणि पार्श्वभं द्विजसत्तम ॥ पूर्वोक्तयैवरीत्या तात्त्रिकूटपदमुच्यते ॥ ॥ ४५ ॥ त्रिराश्यात्मकूटपदं ततोपि दशमस्य च ॥ दृग्दशैकादशे ज्ञेया नवमस्यापि दृग्दशा ॥ ४६ ॥ फलार्थे दृग्दशा विप्र संगृह्यैकादशेपि च ॥ तस्याः प्रकारं वक्ष्येहं पुनरुक्तं विशेषतः ॥ ४७ ॥ अथाख्युग्मभेदेन गणनाक्रम उच्यते ॥ यथा सामान्यं संज्ञेयं युग्मेषु मातृधर्मयोः ॥ ४८ ॥ गणनायां च सामान्यं पंचमैकादशे द्विज ॥ ॥ क्वचिदित्यात्मकं ज्ञेयं सामान्यत्रयकूटके ॥ ४९ ॥ अथौजपदयोर्विप्र संज्ञेयं विपरीततः ॥ युग्मे च युग्मपदयोर्यथा सामान्ययोजकम् ॥ २५० ॥ क्रमो वृषे वृश्चिके च हीत्युक्तेन

द्विजोत्तम ॥ अत्रापि ह्योजकूटस्थे पंचमैकादशात्क्रमात् ॥ ५१ ॥
दृग्योगं च भवेद्विप्र दृग्दशा बलदायिका ॥ युग्मकूटस्थ-
सामान्यं व्युत्क्रमात्सिंहकुंभयोः ॥ ५२ ॥ पंचमैकादशौ विप्र
दृग्योगौ भवतस्तथा ॥ राशीनां द्विस्वभावानां पंचमैकादशे स्थिते
॥ ५३ ॥ दृग्योगस्याप्यभावश्च दृष्टिचक्रे विचिंतयेत् ॥ यत्र भावे
भवेद्दृष्टिस्तत्र तस्याश्रयादिकें ॥ ५४ ॥ नवमेशानंतरं च विज्ञेया
गणिताग्रणीः ॥ सप्तमस्य ततो ज्ञेया नवमादि त्रिकोणगे ॥ ५५ ॥
पार्श्वराशिद्वयं दशा ॥ पुंराशिर्द्विस्वभावस्य
॥ ५६ ॥ स्त्रीराशिर्द्विस्वभावेपि व्युत्क्रमेण
ौ ग्राह्यौ पार्श्वभं तु न संशयः ॥ ५७ ॥
े व्युत्क्रमेण च ॥ पंचमैकादशौ विप्र दृग्योगं
पार्श्वराशेर्महाप्राज्ञ दशां नेयात्क्रमोत्क्रमात् ॥
ाः सप्तमस्य च ॥ ५९ ॥ ओजसंज्ञा द्वि-
ोमके ६० ॥ समे व्युत्क्रमतो ज्ञेया सा ग्राह्या
॥ राशीनां द्वादशानान्तु संख्या नवनवाब्दकैः ॥
ं पूर्वप्रकारतः ॥ २६१ ॥

। दृग्दशोदाहरणमाह ।

त्रिकूटपदक्रमेण दृग्दशा भवति आदौ नवम-
स्वराशेस्ततः ॥ क्वचित् क्रमरीत्या कुत्रचिद्व्यु-
ततः कुत्रचित्क्रमेण कुत्रचिद्व्युत्क्रमेणैकादशस्य
तत्र प्रमाणाभावात्पंचमस्य कुतो न उच्यते
खं पश्यन्ति ततः पार्श्वराशिस्तदेव च त्रिकूट-
ं ततो दशमैकादशस्य दृग्दशा भवति नवम
एकादशदृग्दशेति फलितार्थः । पंचमैकाद-
शयागणना सामान्यशास्त्रमोजपदयोर्विपरीतं ज्ञेयम् । युग्मपदयो-

अन्नात्परिश्रुतो, नयम्बकम्, षट्क्रन्दः,
सजोषाऽइन्द्र, प्रजापते नत्वा, घृतं घृतपावानः ।
अत्र यथेच्छं त्रयो मन्त्राः सस्वरं लेख्याः । ७

अथ योगार्द्धदशाचक्रम् ।

१	२	३	४	५	६	७	८	९	१०	११	१२	योगाः
९	९	८	७	७	८	६	७	५	९	१०	५	९०
०	६	०	०	०	६	६	०	६	६	०	०	६
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
१०.००	१०.०९	१०.१८	१०.२७	१०.३४	१०.४१	१०.४९	१०.५६	१०.६३	१०.६९	१०.७८	१०.८८	१०.९३
१०	१०	४	४	४	४	१०	४	१०	४	१०	१०	१०
४	४	४	४	४	४	४	४	४	४	४	४	४
१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४
२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२

अथ दृग्दशामाह ।

कुजादिति च, ज्ञेयासा विलग्ननवमादितः ॥ क्रमत्रये कूटपदं नाम्ना वै दृग्दशा द्विज ॥ ४१ ॥ दृष्टिचक्रे संमुखश्च राश्यादौ नवमस्य च ॥ कुत्रचित्क्रमरीत्या च कुत्रचिद्व्युत्क्रमेण च ॥ ४२ ॥ ततोपि पंचमस्यैवं क्रमेण कुत्रचिद्द्विज ॥ कुत्रचिद्व्युत्क्रमेणैवं राश्येकादश संमुखम् ॥ ४३ ॥ तस्याभावप्रमाणं हि न ग्राह्यं द्विजसत्तम ॥ संग्राह्यं पंचमस्यैवं दृष्टिचक्रे विशेषतः ॥ ४४ ॥ अभिपश्यंति ऋक्षाणि पार्श्वभं द्विजसत्तम ॥ पूर्वोक्तयैवरीत्या तत्त्रिकूटपदमुच्यते ॥ ॥ ४५ ॥ त्रिराश्यात्मकूटपदं ततोपि दशमस्य च ॥ दृग्दशैकादशे ज्ञेया नवमस्यापि दृग्दशा ॥ ४६ ॥ फलार्थे दृग्दशा विप्र संगृह्यैकादशेपि च ॥ तस्याः प्रकारं वक्ष्येहं पुनरुक्तं विशेषतः ॥ ४७ ॥ अथौजयुग्मभेदेन गणनाक्रम उच्यते ॥ यथा सामान्यं संज्ञेयं युग्मेषु मातृधर्मयोः ॥ ४८ ॥ गणनायां च सामान्यं पंचमैकादशे द्विज ॥ ॥ क्वचिदित्यात्मकं ज्ञेयं सामान्यत्रयकूटके ॥ ४९ ॥ अथौजपदयोर्विप्र संज्ञेयं विपरीततः ॥ युग्मे च युग्मपदयोर्यथा सामान्ययोजकम् ॥ २५० ॥ क्रमो वृषे वृश्चिके च हीत्युक्तेन

द्विजोत्तम ॥ अत्रापि ह्योजकूटस्थे पंचमैकादशात्क्रमात् ॥ ५१ ॥
दृग्योगं च भवेद्विप्र दृग्दशा बलदायिका ॥ युग्मकूटस्थसामान्यं
व्युत्क्रमात्सिंहकुंभयोः ॥ ५२ ॥ पंचमैकादशौ विप्र
दृग्योगौ भवतस्तथा ॥ राशीनां द्विस्वभावानां पंचमैकादशे स्थिते
॥ ५३ ॥ दृग्योगस्याप्यभावश्च दृष्टिचक्रे विचिंतयेत् ॥ यत्र भावे
भवेद्दृष्टिस्तत्र तस्याश्रयादिके ॥ ५४ ॥ नवमेशानंतरं च विज्ञेया
गणिताग्रणीः ॥ सप्तमस्य ततो ज्ञेया नवमादि त्रिकोणगे ॥ ५५ ॥
द्विधा राशिर्दृग्दशायां पार्श्वराशिद्वयं दशा ॥ पुंराशिर्द्विस्वभावस्य
ज्ञेया तस्य क्रमेण च ॥ ५६ ॥ स्त्रीराशिर्द्विस्वभावेपि व्युत्क्रमेण
द्विजोत्तम ॥ चतुर्थदशमौ ग्राह्यौ पार्श्वभं तु न संशयः ॥ ५७ ॥
चरराशिक्रमेणैव संस्थिते व्युत्क्रमेण च ॥ पंचमैकादशौ विप्र दृग्योगं
च भवत्यपि ॥ ५८ ॥ पार्श्वराशेर्महाप्राज्ञ दशां नेयात्क्रमोत्क्रमात् ॥
द्विस्वभावनवमादौ संज्ञेयाः सप्तमस्य च ॥ ५९ ॥ ओजसंज्ञा द्विस्वभावे
क्रमेण तुर्यं ४ व्योमके १० ॥ समे व्युत्क्रमतो ज्ञेया सा ग्राह्या
व्योमतुर्ययोः ॥ २६० ॥ राशीनां द्वादशानान्तु संख्या नवनवाब्दकैः ॥
संग्राह्यं दृग्दशानां च फलं पूर्वप्रकारतः ॥ २६१ ॥

अथ दृग्दशोदाहरणमाह ।

कुजादिर्लग्नक्रमादित्रिकूटपदक्रमेण दृग्दशा भवति आदौ नवमस्य ततो दृष्टिचक्रे संमुखराशेस्ततः ॥ क्वचित् क्रमरीत्या कुत्रचिद्व्युत्क्रमरीत्या पंचमस्य ततः कुत्रचित्क्रमेण कुत्रचिद्व्युत्क्रमेणैकादशस्य संमुखराशेरित्युक्तम् । तत्र प्रमाणाभावात्पंचमस्य कुतो न उच्यते दृष्टिविषये आदौ संमुखं पश्यन्ति ततः पार्श्वराशिस्तदेव च त्रिकूटपदं त्रिराश्यात्मकं पदं ततो दशमैकादशस्य दृग्दशा भवति नवमदृग्दशा दशमदृग्दशा एकादशदृग्दशेति फलितार्थः । पंचमैकादशयोर्गणना सामान्यशास्त्रमोजपदयोर्विपरीतं ज्ञेयम् । युग्मपदयो-

यथा समान्यमतिक्रम्य विज्ञेयम् । तथा च क्रमाद्वृश्चिके चेत्यत्र वृषवृश्चिकयोरोजकूटस्थत्वाद्व्युत्क्रमेण पंचमैकादशौदृग्योग्यौ । सिंहकुंभयोर्युग्मकूटस्थत्वाद्यथा सामान्यं व्युत्क्रमेणैव पंचमैकादशौ दृग्योग्यौ भवतः । द्विस्वभावे दृग्योग्यपंचमैकादशयोरभावात् । दृष्टिचक्रे यत्र यत्र दृष्टिस्तत्रादौ नवमराशिद्वयदशायां क्रमस्तु पुंराशिश्चेद्द्विस्वभावस्तर्हि क्रमेण त्रिराशिश्चेद्व्युत्क्रमेण चतुर्थदशमौ ग्राह्यौ अयं भावः चरराशिषु क्रमेण पंचमैकादशौ स्थिरराशिषु व्युत्क्रमेण पंचमैकादशौ दृग्योग्यौ भवतः तथैव पार्श्वराशिदशाक्रमो ज्ञेयः । द्विस्वभावराशिष्वादौ नवमस्य ततः सप्तमस्य ततो विषमश्चेद्द्विस्वभावस्तर्हि क्रमेण चतुर्थस्य सप्तमश्चेत्तदा व्युत्क्रमेण चतुर्थस्य ततस्तथैव दशमस्य अत्र नवनवाब्दा ग्राह्याः अस्योदाहरणम् । मेषलग्नस्य चरसंज्ञकः प्रथमं मेषः पुनः सिंहः पुनः कुंभः एवम् १ । ५ । ११ स्थिरराशिषु यथा सिंहः पुनः मेषः पुनः तुला एवं ५ । १ । ७ द्विस्वभावराशिः यथा मिथुनपुंराशिक्रमः मिथुनः पुनः कन्या पुनर्मीनः एवं ३ । ६ । १२ स्त्रीराशिद्विस्वभावव्युत्क्रमः मीनधनमिथुनाः एवं सर्वत्र ज्ञेयं प्रतिराशिनववर्षाणि स्युः ॥

अथ दृग्दशाचक्रम् ।

१	५	११	५	१	७	३	६	१२	१२	९	३	योगाः
९	९	९	९	९	९	९	९	९	९	९	९	१०८
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०
१९००	१९०९	१९१८	१९२७	१९३६	१९४५	१९५४	१९६३	१९७२	१९८१	१९९०	१९९९	२००८
१०	१०	१०	१०	१०	१०	१०	१०	१०	१०	१०	१०	१०
४	४	४	४	४	४	४	४	४	४	४	४	४
१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४
२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२	२२

अथ त्रिकोणदशामाह ।

दशा त्रिकोणनाम्ना या यथान्यायप्रकल्पना ॥ राशिर्नवांशतुल्या च नववर्षात्मिका दशा ॥ ६२ ॥ चरपर्यायरीत्यादिश्लोकोक्तेन प्रदर्शितः ॥ लग्नात्त्रिकोणयोराशिर्बलवानुक्तहेतुभिः ॥ तत्क्षयेभ्यो जयेद्धीमांश्चरपर्यायवद्दशा ॥ ६३ ॥ युग्मराशिभुवां पुंसामोजे गृह्णीत संमुखः ॥ ओजराशिभुवां स्त्रीणां युग्मे चैव समाश्रयेत् ॥ ६४ ॥ क्रमोत्क्रमेण गणयेदोजयुग्मेषु राशिषु ॥ संपन्नचरपर्याय दशामितिप्रकल्पयेत् ॥ ६५ ॥ ततोपि द्वारबाह्याभ्यां फलमेव विचिंतयेत् ॥ पाकभोगद्वयं विप्र पापयोगेन सौख्यदाम् ॥ ६६ ॥ तदिदं चरपर्यायस्थिरपर्यायकं द्विज ॥ त्रिकोणाख्यादशायां च पापभोगप्रकल्पनम् ॥ ६७ ॥ पापभोगे च पापाढ्ये देहपीडा मनोव्यथा ॥ नृपाद्भीतिं भयं क्लेशमहारुग्भ्यां प्रपीडितः ॥ ६८ ॥ अधुना संप्रवक्ष्यामि कारकाणां फलं द्विज ॥ सप्तमश्च तृतीयश्च प्रथमो नवमोऽपि च ॥ ६९ ॥ नवमात्स्वल्पा विज्ञेया पितृसौख्यं विचिंतयेत् ॥ शरीरारोग्यमैश्वर्यं चिन्तयेत्प्रथमाद्द्विज ॥ २७० ॥

अथ त्रिकोणदशोदाहरणमाह ।

लग्नपंचमनवमेषु यो राशिर्बलवांस्ततस्त्रिकोणदशारंभः आरंभराशिमारभ्य क्रमोत्क्रमाभ्यां द्वादशराशीनां दशा ज्ञेयाः अत्र तु मेषस्य प्रारंभो मेषसिंहधनूंषि पुनः वृषकन्यामकराः एवं सर्वत्र ज्ञेयम् । चरपर्यायवद्वर्षाणि स्युः ॥

अथ त्रिकोणदशाचक्रम् ।

१	५	९	२	६	१०	३	७	११	४	८	१२	योगा.
११ ० ० ० ०	६ ० ० ० ०	२ ० ० ० ०	११ ० ० ० ०	८ ० ० ० ०	१२ ० ० ० ०	७ ० ० ० ०	६ ० ० ० ०	१२ ० ० ० ०	७ ० ० ० ०	६ ० ० ० ०	१ ० ० ० ०	८९ ० ० ० ०
१९.००	१९.११	१९.१७	१९.१९	१९.३०	१९.३८	१९.५०	१९.५७	१९.६३	१९७०	१९८२	१९८८	१९८९
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ नक्षत्राद्राशिदशाक्रममाह ।

जन्मादौ चंद्रनक्षत्रे सर्वत्र घटिकौघके ॥ भानुना दीयते भागं शेषनाडीः प्रकल्पयेत् ॥ ७१ ॥ प्रथमं खंडमारभ्य द्वादशे खंडके द्विज ॥ लग्नाद्द्वादशराशीनां गणनीयं क्रमेण च ॥ ७२ ॥ या घटी कर्मवत्खंडे जन्मखंडश्च आदितः ॥ आरभ्य गणनायां च जन्मलग्नादितो द्विज ॥ ७३ ॥ लग्नाद्द्वादशराशीशमारभ्य द्विजसत्तम ॥ क्रमव्युत्क्रमभेदेन द्वादशर्क्षदशा मता ॥ ७४ ॥

नक्षत्रदशोदाहरणम् ।

जन्मदिने यच्चंद्रस्य नक्षत्रं तदीयाः सर्वर्क्षरीत्या या घटिकास्ताः द्वादशधा विभज्य प्रथमखंडमारभ्य द्वादशसु खंडेषु लग्नादिद्वादशराशयः क्रमेण गणनीयाः । यस्मिन्घटिकामध्ये खंडे जन्म स खंडः आदितः आरभ्य गणनया जन्मलग्नादितः यद्राशिविशिष्टस्तं राशिमारभ्य क्रमव्युत्क्रमभेदेन द्वादशराशीनां दशा आनेया प्रतिराशिनवाब्दा ग्राह्याः । तद्यथा—पूर्वाषाढा जन्मनक्षत्रं सर्वर्क्षघटी ५७ । ४८ द्वादशभक्तेर्लब्धं ४ शेषं ९ । ४८ मेषादिगणना अयं धनूराशिगतः अतएव धनुरारभ्य गणना कार्या एवं सर्वत्र ज्ञेयम् ॥

अथ नक्षत्रराशिदशाचक्रमिदम् ।

९	१०	११	१२	१	२	३	४	५	६	७	८	योगाः
९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	९ ० ० ० ०	१०८ ० ० ० ०
१९००	१९०९	१९१८	१९२७	१९३६	१९४५	१९५४	१९६३	१९७२	१९८१	१९९०	१९९९	संवत.
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ तारादशामाह ।

जन्मसंपद्विपत्क्षेमप्रत्यरीसाधको बधः ॥ मैत्रातिमैत्रमित्येवं दशा ज्ञेया द्विजोत्तम ॥ विंशोत्तर्याः क्रमेणैवमब्दानिह विजानतः ॥ आदौ केंद्रग्रहा यस्य विज्ञेया तारका दशा ॥ ७९ ॥

अथ तारादशामाह ।

केंद्रस्थौ शनिबुधौ तन्मध्ये शनिर्बलवान् अत एव साधकदशायां जन्म तस्याब्दाः १९ अग्रे विंशोत्तरीवत् भुक्तभोग्यमानीतं साधकदशा पूर्वजन्मनि भुक्तवर्षादि १७।३।२८।२१।५४ इह जन्मनि भोग्यवर्षादि १।८।१।३८।६ एवं सर्वत्र ज्ञेयम् ॥

अथ तारादशाचक्रमाह ।

साधक.	वधः	मैत्रः	अतिमैत्रः	जन्म	संपत्	विपत्	क्षेम.	प्रत्यरी	इमादशाः
१ ८ १ ३८ ६	१७ ० ० ० ०	७ ० ० ० ०	२० ० ० ० ०	६ ० ० ० ०	१० ० ० ० ०	७ ० ० ० ०	१८ ० ० ० ०	१६ ० ० ० ०	१०२ ८ १ ३८ ६
१९००	१९०२	१९१९	१९२६	१९४६	१९५२	१९६२	१९६९	१९८७	२००३
१० ४ १४ २२	१० ४ १४ २२	६ ५ १४ २२	६ ५ ५२ २६	६ ५ ५२ २६	६ ५ ५२ २६	६ ५ ५२ २६	६ ५ ५२ २६	६ ५ ५२ २६	६ ५ ५२ २६

अथ वर्णदशामाह ।

जन्महोरर्क्षलग्नर्क्षसंख्या ग्राह्या पृथक् पृथक् ॥ ओजलग्ने च युग्मे तु चक्रशुद्धैकसंयुता ॥ ७६ ॥ युग्मौजसाम्ये संयोज्य वियोज्यान्योन्यमन्यथा ॥ मेषादितः क्रमादोजे मीनादेरुत्क्रमात्समे ॥ ७७ ॥ एवं यल्लग्नमायातं वर्णदं तत्प्रकीर्तितम् ॥ एवं द्वादशभावानां वर्णदं तत्प्रकीर्तितम् ॥ ७८ ॥ एवं द्वादशभावानां वर्णदं लग्नमानयेत् ॥ ग्रहाणां वर्णदा नैव राशीनां वर्णदा दशा ॥ ७९ ॥ वर्षसंख्यां विजानीयाच्चरपर्याप्रमाणतः ॥ २८० ॥

वर्णददशोदाहरणम् ।

अत्र तु ओजलग्नमेषमध्ये जन्म अत एव मेषादिक्रमगणना संख्यापरं होरालग्नं वृषभं तस्य मीनाद्यपसव्यमार्गेण १० संख्याऽत्र तु स्वज्ञातिसंज्ञा उभयोर्योगः ११ मेषादिक्रमगणना ११ वर्षदंकुंभलग्नं एवं सर्वत्र ज्ञेयम् ॥

अथ वर्णददशाचक्रम् ।

११	५	८	६	६	४	४	२	२	८	१२	९	योगाः
१२ ० ० ० ०	६ ० ० ० ०	६ ० ० ० ०	८ ० ० ० ०	८ ० ० ० ०	७ ० ० ० ०	७ ० ० ० ०	११ ० ० ० ०	११ ० ० ० ०	० ० ० ०	० ० ० ०	२ ० ० ० ०	८५ ० ० ० ०
१९००	१९१२	१९१८	१९२४	१९३२	१९४०	१९४७	१९५४	१९६५	१९७६	१९		१९८५
१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२	१० ४ १४ २२

अथ पंचस्वरदशामाह ।

पंचांकान्प्रथमे दत्त्वा स्वरान्वर्णांश्च विन्यसेत् ॥ आदावकछडाद्याश्च अंत ओचद्दवादयः ॥ ८१ ॥ कादिहांताँल्लिखेद्वर्णान्स्व-

राधोङञणोज्झितान् ॥ तिर्यक्पंक्तिक्रमेणैव पंच पंच विभागतः ॥
॥ ८२ ॥ नप्रोक्ता ङञणावर्णा नामादौ संति तेन हि ॥ चेद्भवंति
तदा ज्ञेया गजडास्ते यथाक्रमम् ॥ ८३ ॥ यदि नाम्नि स्युस्तद्वर्णाः
संयोगाक्षरलक्षणाः ॥ ग्राह्यस्तदादिमो वर्ण इत्युक्तं ब्रह्मणा पुरा ॥
॥ ८४ ॥ अकाराद्याः स्वराः पंच ब्रह्माद्याः पंच देवताः ॥ निवृत्त्याद्याः
कलाः पंच इच्छाद्यं शक्तिपंचकम् ॥ ८५ ॥ मायाद्याश्चक्रभेदाश्च
धराद्याः भूतपंचकम् ॥ शब्दादिविषयास्ते च कामबाणा
इतीरिताः ॥ ८६ ॥ प्रभवादिक्रमेणैषां स्वराणामस्वरादिकः ॥
उदयो द्वादशाब्दानां प्रत्येकं द्वादशाब्दिकः ॥ ८७ ॥ अस्यांतरादयो
वर्षमेको मासो दिनद्वयम् ॥ लोकाब्धिनाडिकाः प्रोक्ता अष्ट
त्रिंशत्पलानि च ॥ ८८ ॥ द्वादशाब्दादिनाड्यंताः स्वस्थानाच्च
स्वकालतः ॥ उदयांते पुनस्त्वत्रांतरैरेकादशोदयैः ॥ ८९ ॥ जन्मकर्माधानपिण्डं
छिद्राः संज्ञाः स्वरादिषु ॥ यत्र नामाक्षरं प्राप्तं तत्रैव
उदितः स्वरः ॥ २९० ॥ तस्माद्वर्षान्विजानीयाद्वर्षान्मासो भवेत्पुनः ॥
मासद्वयं च विज्ञेयं दिनद्वादशकाधिकम् ॥ ९१ ॥ एवं क्रमेण जानीयाद्वर्षान्
भागांश्च पंचसु ॥ अमात्यकार्त्यकात्यस्थादिनानां नवकं
तथा ॥ ९२ ॥ मार्गपौषसमाप्तौ तु आद्यास्यादिदिनत्रयम् ॥ एवं
विभागश्चांद्राब्दे संप्रदायानुसारतः ॥ ९३ ॥ तिथयः प्रतिपत्पूर्वाः
कुजादेर्वारनिर्णयः ॥ नंदा भद्रा जया रिक्ता पूर्णा चापि यथाक्रमम्
॥ ९४ ॥ क्रमेणांकाः प्रदातव्या ग्राह्याश्चांकसमुच्चयाः ॥ चंद्राष्टावस्वरे
ज्ञेया इस्वरे नागकुंजराः ॥ ९५ ॥ उस्वरे रामरंकाणि एस्वरे चंद्रखेचराः
॥ ओंस्वरे पंचदशभिः स्थितियोगसमुद्भवः ॥ ९६ ॥ अस्वरे
कौर्प्यसिंहाजा इस्वरे झेंदुराशयः ॥ उस्वरे चापजलजावेस्वरे तु
तुलावृषौ ॥ ९७ ॥ ओ स्वरे मृगकुंभौ च राशीशाद्वारजाः स्वराः ॥
स्वराधः स्थापयेत्खेटान् राशेर्यो यस्य नायकः ॥ ९८ ॥

अथ पंचस्वरदशोदाहरणमाह ।

अत्र तु इकारस्वरमध्ये जन्म तस्यायं इकारस्वरदशामध्ये उकारस्वरः पुनः एकारस्वरः पुनः ओकारः पुनः अकारस्वरः एवं सर्वत्र ज्ञातव्यम् ॥

अथ पंचस्वरचक्रम् ।

अ.	इ	उ	ए	ओ
१२	१२	१२	१२	१२
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह

अथ पंचस्वरदशाचक्रमाह ।

इ	उ	ए	ओ	अ	योगाः
१२	१२	१२	१२	१२	६०
०	०	०	०	०	०
०	०	०	०	०	०
०	०	०	०	०	०
०	०	०	०	०	०
१९००	१९१२	१९२४	१९३६	१९४८	१९६०
१०	१०	१०	१०	१०	१०
४	४	४	४	४	४
१४	१४	१४	१४	१४	१४
२२	२२	२२	२२	२२	२२

अथ योगिनीदशमाह ।

मंगला पिंगला धन्या भ्रामरी भद्रिका तथा ॥ योगिन्यष्टौ समाख्याता उल्का सिद्धा च संकटा ॥ ९९ ॥ पिंगलातो भवेत्सूर्यो मंगलातो निशाकरः ॥ भ्रामरीतो भवेद्भौमो भद्रिकातो बुधस्तथा ॥ ३०० ॥ धन्यकातो गुरुरभूत्सिद्धातः कविसंभवः ॥ उल्कातो भानुतनयः संकटातस्तमोऽभवत् ॥ १ ॥ स्वर्क्षं पिनाकिनयनयुक्तं च वसुभिर्हरेत् ॥ शेषेण योगिनी ज्ञेया शून्यपातेन संकटा ॥ २ ॥ एकाभिवृद्ध्या वर्षाणि मंगलाप्रमुखासु च ॥ प्रथमायां रसैर्वपंचयं च गुणयेत्पुनः ॥ ३ ॥ गताभिर्भस्य नाडीभिर्गुणयित्वा तु तैर्दिनैः ॥ विहीना सा प्रकर्तव्या स्फुटा चैवं भवेद्ध्रुवम् ॥ ४ ॥

अथ योगिनीदशोदाहरणम् ।

अत्र तु जन्म नक्षत्रं पूर्वाषाढा तस्य संख्या २० जाता इयं ३ । युक्ता २३ अनेन वसुभिर्भक्ताल्लब्धं २ शेषं ७ सिद्धादशायां जन्म अग्रे विंशोत्तरीवद्भुक्तभोग्यमानीतं पूर्वजन्मनि भुक्तवर्षादि ६ । ४ । १८ २० । ४२ इह जन्मनि भोग्यवर्षादि ० । ७ । ११ । ३९ । १८ एवं सर्वत्र ज्ञेयम् ॥

अथ योगिनीदशाचक्रम् ।

सि.	सं.	मं.	पिं.	ध.	भ्रा.	भ.	उ.	योगिन्यः
०	८	१	२	३	४	५	६	२९
७	०	०	०	०	०	०	०	०
११	०	०	०	०	०	०	०	०
३९	०	०	०	०	०	०	०	०
१८	०	०	०	०	०	०	०	०
१९००	१९०१	१९०९	१९१०	१९१२	१९१५	१९१९	१९२४	१९३०
१०	५	५	५	५	५	५	५	५
४	१५	१५	१५	१५	१५	१५	१५	१५
१४	५३	५३	५३	५३	५३	५३	५३	५३
२२	४०	४०	४०	४०	४०	४०	४०	४०

अथ पिंडांशनैसर्गिकाष्टकवर्गचतुर्णामायुःपरिदशामाह।

पैंड्यांशनैसर्गिदशामायुः परिविचिंतयेत् ॥ तथा ह्यष्टकवर्गे च विजानीहि द्विजोत्तम ॥ ५ ॥ पैंड्यादिचतुर्विधदशोदाहरणमग्रे वक्ष्यति ॥

अथ संध्यादशामाह ।

परमायुर्दशांशाच्च स्फुटं संध्या भवेत्ततः ॥ स्वलग्नाधिपतेरादौ ततोन्येषु ग्रहेषु च ॥ ६ ॥

अथ संध्यादशोदाहरणमाह।

परमायुः दशमांशः अत्र तु लग्नाधिपतिः भौमस्तस्यादिमा दशा अग्रे बुधादिक्रमेण ज्ञेयम् ॥

अथ संध्यादशाचक्रम्।

ंगलः	बुधः	गुरुः	शुक्रः	शनिः	राहुः	केतुः	सूर्यः	चंद्रः	ग्रहाः
१०	१०	१०	१०	१०	१०	१०	१०	१०	१०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०
१९००	१९१०	१९२०	१९३०	१९४०	१९५०	१९६०	१९७०	१९८०	१९९०
१०	१०	१०	१०	१०	१०	१०	१०	१०	१०
४	४	४	४	४	४	४	४	४	४
१४	१४	१४	१४	१४	१४	१४	१४	१४	१४
२२	२२	२२	२२	२२	२२	२२	२२	२२	२२

अथ पाचकदशामाह।

संध्या रसगुणा कार्या चंद्रवह्निहृताफलम् ॥ संस्थाप्य प्रथमे कोष्ठे ह्यर्द्धमर्द्धत्रिकोष्ठके ॥ ७ ॥ त्रिभागं वसुकोष्ठेषु लिखेद्विद्वन्प्रयत्नतः ॥ एवं द्वादशभावेषु पाचकानि प्रकल्पयेत् ॥ ८ ॥

अथ पाचकदशोदाहरणम्।

संध्या दशा रसगुणा कार्या ७२ चंद्रवह्नि ३१ भक्तेर्लब्धम् १।११।६।४६।२७ प्रथमकोष्ठे संस्थाप्य पुनः अस्यार्द्धम् ०। ११।१८।२३।१३ इमं त्रिषु कोष्ठेषु संस्थाप्य पुनस्तृतीयांशं ०।७।११।१५।०।२७ अयं वसुकोष्ठके संस्थाप्य एवं सर्वत्र ज्ञेयम् ॥

अथ पाचकदशाचक्रम् ।

१	२	३	४	५	६	७	८	९	१०	११	१२	राशयः
१	०	०	०	०	०	०	०	०	०	०	०	वर्षाणि
११	११	११	११	७	७	७	७	७	७	७	७	मासाः
६	१८	१८	१८	२२	२२	२२	२२	२२	२२	२२	२२	दिनानि
४६	२३	२३	२३	१५	१५	१५	१५	१५	१५	१५	१५	घटयः
२७	१३	१३	१३	२९	२२	२१	२९	२९	२२	२९	२९	पलानि
१९००	१९०२	१९०३	१९०४	१९०५	१९०५	१९०६	१९०६	१९०७	१९०८	१९०८	१९०९	१९१०
१०	९	८	८	८	७	२	१०	५	१	८	६	१०
४	११	२९	१७	६	१७	२८	९	२१	२	१३	२४	४
१४	०	२४	४७	१०	२५	४१	५६	१२	२७	४३	५८	१४
२२	४९	२	१५	२८	५५	२२	४०	१६	४३	१०	३१	२२

बलाबलविवेकेन फलं ज्ञेयं दशासु च ॥ विपरीतं फलं वाच्यं खेटे वक्रगते सदा ॥ ९ ॥ आदिद्रेष्के स्थिते खेटे दशारंभफलं वदेत् ॥ दशामध्ये फलं वाच्यं मध्यद्रेष्काणके स्थिते ॥ ३१० ॥ अंते फलं तृतीयस्थे व्यस्तं खेटे च वक्रिणि॥इति ते कथिता विप्र दशाभेदा अनेकशः ॥ ११ ॥ यस्मै कस्मै न दातव्यं ज्ञानमेतत्सुदुर्लभम् ॥३१२॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे अनेकदशाभेदकथनं नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥

पराशर उवाच ।

मार्तण्डं च प्रणम्य सर्वजगतामीशं शिवं शंकरं सर्वेषां हृदि संस्थितं पशुपतिं भर्गं भवानीपतिम् ॥ लोकानां प्रलयोदयास्थितिकरं त्रैलोक्यनाथं हरिं वक्ष्यामीह महेश्वरस्य कृपया दायप्रकाशं शुभम् ॥ १ ॥

अथ विंशोत्तरीपंचविधांतरमाह ।

अथ वक्ष्ये खगेशानां भुक्तिं पंचविधामहम् ॥ दशा चांतर्दशा चैव

तत्तदंतर्दशा तथा ॥ २ ॥ सूक्ष्मभुक्तिप्राणदशाप्येवं पंच दशाः स्मृताः ॥ ३ ॥ मार्तण्डेन्दुकुजाहिजीवशनिवित्केतुः सितोंते क्रमात्षट्शक्तिर्मुनयो धृतिर्धरणिपा एकोनिता विंशतिः ॥ अत्यष्टिर्मुनयो नखा इति विदुर्नाथा इमे खेचराः सप्ताच्यर्यमविश्वभादिनवकक्षाणां दिनेशादयः ॥ ४ ॥

अथ विंशोत्तरीमहादशावर्षनक्षत्राणि ।

सू.	चं.	भौ.	रा.	जी.	श.	बु.	के.	शु.	ग्रहाः
६	१०	७	१८	१६	१९	१७	७	२०	वर्षाणि
कृ.	रो.	मृ.	आ.	पु.	पुष्य	आश्ले.	म.	पू.	इमानि नक्षत्राणि
उ.	ह.	चि.	स्वा.	वि.	अनु.	ज्ये.	मू.	पूर्वाषा.	
उ.षा.	श्र.	ध.	श.	पू.भा.	उ.भा.	रेवती	अश्वि	भरणी	

अथ भुक्तभोग्यानयनमाह ।

स्फुटतरो हिमगुः कलिकात्मकः खखगजैर्विभजेद्गतऋक्षकम् ॥
तदुडुवर्षगुणं च समादिकं खखगजैर्विभजेत्फलमत्र च ॥ ५ ॥

अथोदाहरणमाह ।

स्फुटतर इति । स्फुटतरः हिमगुश्चंद्रः १ । ८ । १६ । ७ तस्य कला २२९६ । ७ अस्याष्टशतेन ८०० भक्ते लब्धं २ तद्गतनक्षत्रं भरणी ज्ञेयम् शेषं ६९६ । ७ पुनः लब्धांके रूपहीने नवभिर्भक्ते शेषा दशा ज्ञेया । तत्राऽत्र लब्धांकौ द्वौ २ तन्मध्ये रूप १ हीने शेषे १ रूपः सू० १ चं० २ भौ० ३ रा० ४ जी० ५ श० ६ ज्ञ० ७ के० ८ शु० ९ क्रमेण सूर्यदशा चागता । अथास्या भुक्तभोग्यानयनं ६९६ । ७ तदुडुवर्षगुणं तस्य जातस्य उडु जन्मनक्षत्रम् तस्याधिष्ठाता यो दशाग्रहः तस्य यानि वर्षाणि तेन शेष गुणनीयम् । अत्र सूर्यदशा-

वर्षाणि ६ तेन गुणितं जातं ४१७०।४२ अष्टशतेन ८०० भक्तेर्लब्धं ५ वर्षाणि शेषं १७०। ४२ द्वादशघ्नं जातं २०४८ ।२४ अष्टशतेन भक्तेन लब्धम् २ मासाः शेषं ४४८।२४ त्रिंशघ्नं जातम् १३४५२।० अष्टशतेन भक्तेन लब्धं १६ दिनादि शेषं ६५२ । ० षष्टिघ्नं जातं ३९१२०। ० अष्टशतेन भक्तेर्लब्धं ४८ घटिका शेषम् ७२०।० षष्टिघ्नं जातं ४३२००। ० अष्टशतेन भक्तेर्लब्धम् ५४ पलानि शेषं ० पूर्णे सति गणितांकं सत्यमेवम् ५ । २ । १६ । ४८ । ५४ वर्षादि, काले पूर्वजन्मनि भुक्तदशा षण्मध्ये पातिता सती शेषा ० । ९ । १३ । ११ । ६ भोग्यदशा इह जन्मन्येवं सर्वत्र ज्ञेयम् ॥

अथ सूर्यस्य दशावर्षाणि ६ तत्फलम् ।

सूर्योत्कृष्टदशा करोति सुतधीप्रज्ञाधिकारोच्छ्रयज्ञानार्थागमकीर्तिपौरुषसुखप्राप्तीश्वरानुग्रहान् ॥ भानोः पापदशा करोति विफलोद्योगार्थहान्यामयान्राजक्षोभमहीशकोपजनकारिष्टाग्निबाधोदयान् ॥ ६ ॥ मूलत्रिकोणे स्वक्षेत्रे स्वोच्चे वा परमोच्चगे ॥ केन्द्रत्रिकोणलाभस्थे भाग्यकर्माधिपैर्युते ॥ बलं सूर्ये समायुक्ते रवौ वर्गे बलैर्युते ॥ तस्मिन्दाये महासौख्यं धनलाभादिकं शुभम् ॥ ७ ॥ अत्यंतं राजसन्मानमश्वांदोल्यादिकं शुभम् ॥ सुताधिपसमायुक्ते पुत्रलाभं च विंदति ॥ ८ ॥ धनेशस्य च संबंधे गजांतैश्वर्यमादिशेत् ॥ वाहनाधिपसंबंधे वाहनत्रयलाभकृत् ॥ ९ ॥ नृपालतुष्टिर्वित्ताढ्यः सेनाधीशः सुखी नरः ॥ वस्त्रवाहनलाभश्च इति दाये रवौ बली ॥ १० ॥ नीचे षडष्टके रिष्फे दुर्बले पापसंयुते ॥ राहुकेतुसमायुक्ते दुःस्थानाधिपसंयुते ॥ ११ ॥ तस्मिन्दाये महापीडा धनधान्यविनाशकृत् ॥ राजकोपं प्रवासं च राजदंड धनक्षयम् ॥ १२ ॥ ज्वरपीडा यशोहानिर्बन्धुमित्रविरोधकृत् ॥ प्रवासं रोगविद्वेषो ह्यपमृत्युभयं भवेत् ॥ १३ ॥ चौराहिव्रणभीतिश्च

ज्वरबाधा भविष्यति ॥ पितृक्षयभयं चैव गृहे त्वशुभमेव च ॥ १४ ॥ पितृवर्गे मनस्तापं जनद्वेष च विंदति ॥ शुभदृष्टियुते सूर्ये मध्ये तस्मिन्क्वचित्सुखम् ॥ पापग्रहेण संदृष्टे वदेत्पापफलं नरः ॥ १५ ॥

अथ चंद्रस्य महादशावर्षाणि १० तत्फलम् ।

चंद्रोत्कृष्टदशा करोति जननीश्रेयस्तडागादिकं क्षेत्रारामगृहासनद्विजवरश्रीशोभनांदोलिका ॥ इन्दोः पापदशान्नहीनकृपणानंतार्थनाशामयप्रज्ञाहीनजुगुप्समातृमरणक्षोभातिशीतज्वरान् ॥ १६ ॥ स्वोच्चे स्वक्षेत्रगे चैव केंद्रे लाभत्रिकोणगे ॥ शुभग्रहेण संयुक्ते वृद्धिचंद्रबलैर्युते ॥ १७ ॥ कर्मभाग्याधिपे चंद्रे वाहनीये बलैर्युते ॥ आद्यंतैश्चोरुभाग्येशनधान्यादिलाभकृत् ॥ १८ ॥ गृहे तु शुभकार्याणि वाहनं राजदर्शनम् ॥ यत्नकार्यार्थसिद्धिः स्याद्गृहे लक्ष्मीकटाक्षकृत् ॥ १९॥ मित्रप्रभुवशाद्भाग्यं राज्यलाभं महत्सुखम् ॥ अश्वांदोल्यादिलाभं च श्वेतवस्त्रादिलाभकृत् ॥ २० ॥ पुत्रलाभादिसंतोषं गृहगोधनसंकुलम् ॥ धनस्थानगते चंद्रे तुंगे स्वक्षेत्रेऽपि वा ॥ २१ ॥ अनेकधनलाभं च भाग्यवृद्धिर्महत्सुखम् ॥ निक्षेपराजसन्मानं विद्यालाभं च विंदति ॥ २२ ॥ नीचे वा क्षीणचंद्रे वा धनहानिर्भविष्यति ॥ दुश्चिक्ये बलसंयुक्ते क्वचित्सौख्यं क्वचिद्धनम् ॥ २३ ॥ दुर्बले पापसंयुक्ते देहजाड्यं मनोरुजम् ॥ भृत्यपीडा वित्तहानिर्मातृवर्गजनाद्वधः ॥ २४ ॥ षष्ठाष्टमव्यये चंद्रे दुर्बले पापसंयुते ॥ राजद्वेषो मनोदुःखं धनधान्यादिनाशनम् ॥ २५ ॥ मातृक्लेशं मनस्तापं देहजाड्यं मनोरुजम् ॥ दुःस्थे चंद्रबलैर्युक्ते क्वचिल्लाभं क्वचित्सुखम् ॥ देहजाड्यं क्वचिच्चैव शांत्यर्थेन विनाशनम् ॥ २६ ॥

अथ कुजदशावर्षाणि ७ तत्फलम्.।

भौमोत्कृष्टदशा करोति वसुधाप्राप्तिं धनस्यागमान्प्रज्ञास्वच्छमनःपराक्रमदधत्पारिक्षयान्वानुजान् ॥ पापो भौमरुजार्तिदं च

कलहं चौराग्निबंधव्रणमक्षिक्षीणमहीशपीडनरुजः क्षोभक्षतिं दास्यति ॥ २७ ॥ परमोच्चगते भौमे स्वोच्चे मूलत्रिकोणगे ॥ स्वर्क्षे केंद्रत्रिकोणे वा लाभे वा धनगेऽपि वा ॥ २८ ॥ संपूर्णबलसंयुक्ते शुभदृष्टे शुभांशके ॥ राज्यलाभं भूमिलाभं धनधान्यादिलाभकृत् ॥ २९ ॥ आधिक्यं राजसन्मानं वाहनांबरभूषणम् ॥ विदेशे स्थानलाभं च सोदराणां सुखं लभेत् ॥ ३० ॥ केंद्रं गते सदा भौमे दुश्चिक्ये बलसंयुते ॥ पराक्रमाद्वित्तलाभो युद्धे शत्रुजयो भवेत् ॥ ३१ ॥ कलत्रपुत्रविभवं राजसन्मानमेव च ॥ दशादौ सुखमाप्नोति दशांते कष्टमादिशेत् ॥ ३२ ॥ नीचादिदुःस्थगे भौमे बलाबलविवर्जिते ॥ पापयुक्ते पापदृष्टे सा दशा नेष्टदायिका ॥ ३३ ॥

अथ राहुदशावर्षाणि १८ तत्फलम् ।

राहूत्कृष्टदशा करोति सकलश्रेयो महद्राज्यकृद्धर्मार्थागमपुण्यतीर्थचलनज्ञानप्रभावोच्छ्रयान् ॥ राहोः पापदशा हि भीतिविषभीः सर्वांगरोगार्तिकृच्छस्त्राघाताविरोधवृक्षपतनं नारातिपीडोदयान् ॥ ॥ ३४ ॥ राहोस्तु वृषभं केतोर्वृश्चिकं तुंगसंज्ञकम् ॥ मूलत्रिकोणकर्कं च युग्मचापं तथैव च ॥ ३५ ॥ कन्या च स्वगृहं प्रोक्तं मीनं च स्वगृहं स्मृतम् ॥ तदाये बहुसौख्यं च धनधान्यादिसंपदाम् ॥ ३६ ॥ मित्रप्रभुवशादिष्टं वाहनं पुत्रसंभवः ॥ नूतनगृहनिर्माणं धर्मचिंता महोत्सवः ॥ ३७ ॥ विदेशराजसन्मानं वस्त्रालंकारभूषणम् ॥ शुभयुक्ते शुभैर्दृष्टे योगकारकसंयुते ॥ ३८ ॥ केंद्रत्रिकोणलाभे वा दुश्चिक्ये शुभराशिगे ॥ महाराजप्रसादेन सर्वसंपत्सुखावहम् ॥ ॥ ३९ ॥ यवनप्रभुसन्मानं गृहे कल्याणसंभवम् ॥ रंध्रे वा व्ययगे राहौ तदाये कष्टदो भवेत् ॥ ४० ॥ पापग्रहेण संबंधे मारकग्रहसंयुते ॥ नीचराशिगते वापि स्थानभ्रंशं मनोरुजम् ॥ ४१ ॥ विनश्येद्दारपु-

त्राणां कुत्सितानां च भोजनम् ॥ दशादौ देहपीडा च धनधान्यपरिच्युतिः ॥ ४२ ॥ दशामध्ये तु सौख्यं स्यात्स्वदेशे धनलाभकृत् ॥ दशांते कष्टमाप्नोति स्थानभ्रंशो मनोव्यथा॥ ४३ ॥

अथ गुरुमहादशावर्षाणि १६ तत्फलम् ।

जीवोत्कृष्टदशा करोति विपुलग्रामाधिकारात्मजश्रीसौभाग्यगुणाकराश्रितजनाद्यांदोलिकावैभवान् ॥ जैव्या पापदशा महीश्वरभयाद्व्याधिं च धैर्यच्युतिं धान्यानर्थमहीसुतार्तिजनकक्षोभाशनार्तिक्षयान् ॥ ४४ ॥ स्वोच्चे स्वक्षेत्रगे जीवे केंद्रे लाभत्रिकोणगे ॥ मूलत्रिकोणलाभे वा तुंगांशे स्वांशगेऽपि वा ॥ ४५ ॥ राज्यलाभं महत्सौख्यं राजसन्मानकीर्तनम् ॥ गजवाजिसमायुक्तं देवब्राह्मणपूजनम् ॥ ४६ ॥ दारपुत्रादिसौख्यं च वाहनांबरलाभगम् ॥ यज्ञादिकर्मसिद्धिः स्याद्वेदांतश्रवणादिकम् ॥ ४७ ॥ महाराजप्रसादेन इष्टसिद्धिः सुखावहा ॥ आंदोलिकादिलाभश्च कल्याणं च महत्सुखम् ॥ ॥ ४८ ॥ पुत्रदारादिलाभश्च अन्नदानं महत्प्रियम् ॥ नीचास्तपापसंयुक्ते जीवे रिष्फाष्टसंयुते ॥ ४९ ॥ स्थानभ्रंशं मनस्तापं पुत्रपीडा महद्भयम् ॥ पश्वादिधनहानिश्च तीर्थयात्रादिकं लभेत् ॥ ५० ॥ आदौ कष्टफलं चैव चतुष्पाज्जीवलाभकृत् ॥ मध्यांते सुखमाप्नोति राजसन्मानवैभवम् ॥ ५१ ॥

अथ शनिमहादशावर्षाणि १९ तत्फलम् ।

मंदोत्कृष्टदशा करोति विभवप्रज्ञानयज्ञादिकक्षेत्रग्रामपुरादिनायकबहुव्यापारदक्षोत्सुकान् ॥ मन्दः पापविषप्रयोगधनहृद्देहार्तिव्यथोदयान् राजक्रोधविरुद्धकार्यविचलोद्योगांगपीडोदयान् ॥ ५२ ॥ स्वोच्चे स्वक्षेत्रगे मंदे मित्रक्षेत्रेऽथ वा यदि ॥ मूलत्रिकोणभाग्ये वा तुंगांशे स्वांशगेऽपि वा ॥ ५३ ॥ दुश्चिक्ये लाभगे चैव राजसन्मानवैभवम् ॥ सत्कीर्तिर्धनलाभश्च विद्यावादविनोदकृत् ॥५४॥

महाराजप्रसादेन गजवाहनभूषणम् ॥ राजयोगं प्रकुर्वीत
सेनाधीशान्महत्सुखम् ॥ ५५ ॥ लक्ष्मीकटाक्षचिह्नानि राज्यलाभं
करोति च ॥ गृहे कल्याणसंपत्तिर्दारपुत्रादिलाभकृत् ॥ ५६ ॥ षष्ठाष्टमव्यये
मंदे नीचे वास्तंगतेऽपि वा ॥ विषशस्त्रादिपीडा च स्थानभ्रंशं
महद्भयम् ॥ ५७ ॥ पितृमातृवियोगं च दारपुत्रादिपीडनम् ॥ राजवैषम्यकार्याणि
ह्यनिष्टं बंधनं तथा ॥ ५८ ॥ शुभयुक्तेक्षिते मंदे योगकारकसंयुते
॥ केंद्रत्रिकोणलाभे वा मीनगे कार्मुके शनौ ॥ ५९ ॥
राज्यलाभं महोत्साहं गजाश्वांबरसंकुलम् ॥ ६० ॥

अथ बुधमहादशावर्षाणि १७ तत्फलम्।

सौम्योत्कृष्टदशा करोति वसनानंताश्वधान्योच्छ्रयाञ्छ्रेयः सौख्यगृहस्वबंधुविजयप्राप्तीष्टवस्त्वागमान् ॥ बोध्याः पापदशाविदेशगमनं क्षोभः स्वबंधुक्षयः प्रज्ञाहीनमतिर्धनार्त्तिकलहक्षेत्रार्थनाशापदः ॥ ६१ ॥ स्वोच्चे स्वक्षेत्रसंयुक्ते केंद्रलाभत्रिकोणगे ॥
मित्रक्षेत्रसमायुक्ते सौम्ये दाये महत्सुखम् ॥ ६२ ॥ धनधान्यादिलाभं च सत्कीर्तिधनसंपदाम् ॥ ज्ञानाधिक्यं नृपप्रीतिं सत्कर्मगुणवर्द्धनम् ॥ ६३ ॥ पुत्रदारादिसौख्यं च देहारोग्यं महत्सुखम् ॥
क्षीरेण भोजनं सौख्यं व्यापारेण धनागमम् ॥ ६४ ॥ शुभदृष्टियुते
सौम्ये भाग्ये कर्माधिपे यदा ॥ आधिपत्ये बलवती संपूर्णफलदायिका ॥ ६५ ॥ पापग्रहयुते दृष्टे राजद्वेषं मनोरुजम् ॥ बंधुजनविरोधं च विदेशगमनं तथा ॥ ६६ ॥ परप्रेष्यं च कलहं मूत्रकृच्छ्रान्महद्भयम् ॥ षष्ठाष्टमव्यये सौम्ये लाभभोगार्थनाशनम् ॥
॥ ६७ ॥ वातपीडां धनं चैवं पांडुरोगं तथैव च ॥ नृपचौराग्निभीतिं
च कृषिगोभूमिनाशनम् ॥ ६८ ॥ दशादौ धनधान्यं च विद्यालाभं
महत्सुखम् ॥ पुत्रकल्याणसंपत्तिः सन्मार्गे धनलाभकृत् ॥ ६९ ॥ मध्ये
नरेंद्रसम्मानमंते दुःखं भविष्यति ॥ ७० ॥

अथ केतुभुक्तिमाहादशावर्षाणि ७ तत्फलम् ।

केतूत्कृष्टदशा करोति विजयक्रूरक्रियार्थागमं म्लेच्छक्ष्मापतिलब्धभाग्यकवनप्रारंभशत्रुक्षयान् ॥ केतोः पापदशातिकष्टविफलानर्थक्रियायोगहृच्छूलास्थिज्वरकंपनद्विजजनद्वेषातिमूर्खक्रियान् ॥ ॥ ७१ ॥ केंद्रलाभत्रिकोणे वा शुभराशौ शुभेक्षिते ॥ स्वोच्चे वा शुभवर्गे वा राजप्रीतिं मनोरुजम् ॥ ७२ ॥ देशग्रामाधिपत्यं च वाहनं पुत्रसंभवम् ॥ देशांतरप्रयाणं च अन्यदेशे सुखावहम् ॥ ॥ ७३ ॥ पुत्रदारसुखं चैव चतुष्पाज्जीवलाभकृत् ॥ दुश्चिक्ये षष्ठलाभे वा केतुर्दाये सुखं भवेत् ॥ ७४ ॥ राज्यं करोति मित्रांशं गजवाजिसमन्वितम् ॥ दशादौ राजयोगाश्च दशामध्ये महद्भयम् ॥ ॥ ७५ अंते दूराटनं चैव देहविश्रमणं तथा ॥ धने रंध्रे व्यये केतौ पापदृष्टियुतेक्षिते ॥ ७६ ॥ निगडं बंधुनाशं च स्थानभ्रंशं मनोरुजम् ॥ शूद्रशून्यादिलाभं च नानारोगाकुलं भवेत् ॥ ७७ ॥

अथ शुक्रमहादशावर्षाणि २० तत्फलम् ।

शौक्री श्रेष्ठदशा करोति सुखसौभाग्योच्चयांदोलिकाऽष्टैश्वर्ययुतधर्मबुद्धिकनकारामाश्वगीतोत्सवान् ॥ शौक्री पापदशा कलत्रभयकृन्नीचार्थहानिप्रदा तिर्यग्जंतुसमुत्थदोषविपुलस्त्रीवर्गरोगोद्भवान् ॥ ७८ ॥ परमोच्चगते शुक्रे स्वोच्चे स्वक्षेत्रकेंद्रगे ॥ नृपाभिषेकसंप्राप्तिर्वाहनांबरभूषणम् ॥ ७९ ॥ गजाश्वपशुलाभं च नित्यं मिष्टान्नभोजनम् ॥ अखंडमंडलाधीशराजसन्मानवैभवम् ॥ ८० ॥ मृदंगवाद्यघोषं च गृहे लक्ष्मिकटाक्षकृत् ॥ त्रिकोणस्थे मीनशुक्रे राज्यार्थगृहसंपदः ॥ ८१ ॥ विवाहोत्सवकार्याणि पुत्रकल्याणवैभवम् ॥ सेनाधिपत्यं कुरुते इष्टबंधुसमागमम् ॥ ८२ ॥ नष्टराज्याद्धनप्राप्तिर्गृहे गोधनसंग्रहम् ॥ षष्ठाष्टमव्यये शुक्रे नीचे वा व्ययराशिगे ॥ ८३ ॥ आत्मबंधुजनद्वेषं दारवर्गादिपीडनम् ॥ व्यवसाया-

त्फलं नष्टं गोमहिष्यादिहानिकृत् ॥ ८४ ॥ दारपुत्रादिपीडा वा
आत्मबंधुवियोगकृत् ॥ भाग्यकर्माधिपत्येन लग्नवाहनराशिगे ॥
॥ ८५ ॥ तद्दशायां महत्सौख्यं देशग्रामाधिपत्यताम् ॥ देवालयतडागादिपुण्यकर्मसु संग्रहम् ॥ ८६ ॥ अन्नदाने महत्सौख्यं नित्यं
मिष्टान्नभोजनम् ॥ उत्साहः कीर्तिसंपत्ती स्त्रीपुत्रधनसंपदः
॥ ८७ ॥ स्वभुक्तौ फलमेवं स्याद्फलान्यन्यानि भुक्तिषु ॥ द्वितीयद्यूननाथे तु देहपीडा भविष्यति ॥ ८८ ॥ तद्दोषपरिहारार्थं रुद्रं वा
त्र्यंबकं जपेत् ॥ श्वेतां गां महिषीं दद्यादारोग्यं च भविष्यति ॥ ८९ ॥

अथ द्वादशभावाधीशदशाफलमाह ।

लग्नेशस्य दशा बलं बहुधनं वित्तेशितुः पंचतां कष्टं वेति सहोदरालयपतेः पापं फलं प्रायशः ॥ तुर्यस्वामिन आलयं किल सुताधीशस्य विद्यासुखं रोगागारपतेररातिजभयं जायापतेः शोकताम् ॥
॥ ९० ॥ मृत्युं मृत्युपतेः करोति नियतं धर्मेशितुः सत्क्रियां चित्तं
राजपतेर्नृपाश्रयमथो लाभं हि लाभेशितुः ॥ रोगे द्रव्यविनाशनं च
बहुधा कष्टं व्ययेशस्य वै पूर्वैरंगभृतामुदीरितमिदं तन्वादिभावेशजम् ॥ ९१ ॥ भावाधिपो बलयुतो निजगेहगामी तुंगत्रिकोणशुभवर्गगतोपि पूर्णम् ॥ जंतोः फलं खलु करोति यदारिनीचस्थानास्थितोऽशुभफलं विबलो विशेषात् ॥ ९२ ॥ आहुः शुभाः शुभफलं नृणां
कालविदो जनाः ॥ एतद्वृत्तं विनिर्णीतमायुषां निश्चयो नृणाम् ॥ ९३ ॥
पंचमेशदशायां तु धर्मपस्य दशा तु या ॥ अतीव शुभदा प्रोक्ता कालविद्भिर्मुनीश्वरैः ॥ ९४ ॥ समंत्रनाथस्य तपोधिपस्य दशा शुभा राज्यसुतप्रदा स्यात् ॥ सकीर्तिनाथस्य सुखेश्वरस्य दशा तथा प्राहुरुदारचित्ताः ॥ ९५ ॥ पंचमेशेन युक्तस्य ग्रहस्य शुभदा दशा ॥ नाथे
धर्मपयुक्तस्य दशा परमशोभना ॥ ९६ ॥ पापदृष्टस्य खेटस्य दशा

राज्यप्रदायिनी ॥ शुभयुक्तस्य खेटस्य दशा द्रव्यप्रदायिनी ॥ संपचमेशलग्ने
वा दशा राज्यप्रदायिनी ॥ ९७ ॥ सपंचमेशस्य तपाधिपस्य
दशा भवेद्राज्यसुखार्थलाभदा ॥ तथैव मानाधिपसंयुतस्य
सुतेश्वरस्यापि दशा शुभा स्यात् ॥ ९८ ॥ पंचमेशेन युक्तस्य मानेंद्रस्य
दशा शुभा ॥ सुखेशसहितस्यापि धर्मेशस्य दशा शुभा ॥
पंचमस्थानगस्यापि मानेशस्य दशा शुभा ॥ ९९ ॥ शुभाशुभस्थानगमा
न यस्य तथैव मानार्थसुखान्विता स्यात् ॥ तदा
नृणां सौख्यकरी भवेद्धि सुखेशयुक्तस्य च मानवस्य ॥ १०० ॥
षष्ठस्य सप्तमस्यैको नायको मानराशिगः ॥ दशा तस्य शुभा
ज्ञेया तथा तेन युतस्य च ॥ १ ॥ एको द्विसप्तमस्थाननायको
यदि सौख्यगः ॥ तेन युक्ता दशा ज्ञेया शुभा प्राहुर्मनीषिणः
॥ २ ॥ षष्ठाष्टमव्ययाधीशाः पंचमाधिपसंयुताः ॥ तेषां दशा च
शुभदा प्रोच्यते कालवित्तमैः ॥ ३ ॥ सुखेशो मानभावस्थो
मानेशसुखराशिगः ॥ तयोर्दशां शुभां प्राहुर्ज्योतिःशास्त्रविदो जनाः
॥ ४ ॥ सुतेशमानेशसुखेशधर्मपा एकत्र युक्ता यदि यत्र कुत्र ॥ तेषां
दशा राज्यफलप्रदा तैर्युक्तग्रहाणामपि वै वदेद्वा ॥ ५ ॥ वाहनस्थानसंयुक्तमंत्रनाथदशा
शुभा ॥ सुखराशिस्थकर्मेशदशा राज्यप्रदायिनी
॥ ६ ॥ ताभ्यां युक्तस्य खेटस्य दृष्टियुक्तस्य चैतयोः ॥ राज्यप्रदां
दशां प्राहुर्विद्वांसो दैवचिंतकाः ॥ ७ ॥ कर्मस्थानस्य बुद्धीशदशा
संपत्करी भवेत् ॥ मानस्थिततपोधीशदशा राज्यप्रदायिनी ॥ ८ ॥
यस्मिन्भावे शुभस्वामिसंबंधस्तुंगखेचरः ॥ स्यात्तद्भावदशायां तु
अत्यैश्वर्यमखंडितम् ॥ ९ ॥ यद्भावेशः स्वार्थराशिमधितिष्ठति
पश्यति ॥ स्यात्तद्भावदशाकाले धनलाभो महत्तरः ॥ ११० ॥ यस्माद्व्ययगतो
यस्तु तद्दशायां धनक्षयम् ॥ यस्मात्त्रिकोणगाः
पापास्तत्रात्मशमनाशनम् ॥ ११ ॥ पुत्रहानिः पितुः पीडा मनस्तापो
महान् भवेत् ॥ यस्मात्त्रिकोणगा रिःफरंध्रेशार्केंदुसूर्यजाः ॥ १२ ॥

पुत्रपीडा द्रव्यहानिस्तत्र केत्वहिसंगमे ॥ विदेशभ्रमणं क्लेशो भयं चैव पदे पदे ॥ १३ ॥ यस्मात्षष्ठाष्टमे क्रूरनीचखेटादयः स्थिताः ॥ रोगशत्रुनृपाद्वा स्यान्मुहुःपीडा सुदुःसहा ॥ १४ ॥ यस्माच्चतुर्थः क्रूरः स्याद्भूगृहक्षेत्रनाशनम् ॥ पशुहानिस्तत्र भौमे गृहदाहप्रमातृधृक् ॥ १५ ॥ शनौ हृदयशूलं स्यात्सूर्ये राजप्रकोपनम् ॥ सर्वस्वहरणं राहौ विषचौरादिजं भयम् ॥ १६ ॥ यस्माद्दशमभे राहुः पुण्यतीर्थाटनं भवेत् ॥ तस्मात्कर्मायभाग्यर्क्षगताः शोभनखेचराः ॥ १७ ॥ विद्यार्थधर्मसत्कर्मख्यातिपौरुषसिद्धयः ॥ यतः पंचमकामारिगताः स्वोच्चशुभग्रहाः ॥ १८ ॥ पुत्रदारादिसंप्राप्तिर्नृपपूजा महत्तरा ॥ यस्मिन्नाज्ञाय कर्मांबुनवलग्नाधिपाः स्थिताः ॥ १९ ॥ तत्तद्भावार्थसिद्धिः स्याच्छ्रेयो योगानुसारतः ॥ यस्मिन् गुरुर्वा शुक्रो वा शुभेशो वापि संस्थितः ॥ १२० ॥ कल्याणोत्सवसंपत्तिर्देवब्राह्मणतर्पणम् ॥ यच्चतुर्थे तुंगखेटाः शुभस्वामी ग्रहश्च वा ॥ २१ ॥ वाहनग्रामलाभश्च पशुवृद्धिश्च भूयसी ॥ तत्र चंद्रेशलाभः स्याद्बहुधान्यरसान्युत ॥ २२ ॥ पूर्णे विधौ निधिप्राप्तिर्लभेद्वा मणिसंचयम् ॥ तत्र शुक्रे मृदंगादिवाद्यगानपुरस्कृतैः ॥ २३ ॥ आंदोलिकाप्तिर्जीवे तु कनकांदोलिका ध्रुवम् ॥ लग्नकर्मेशभाग्येशतुंगस्थशुभयोगतः ॥ २४ ॥ सर्वोत्कर्षमहैश्वर्यसाम्राज्यादिमहत्फलम् ॥ एवं तत्तद्भावदायफलं यत्स्याद्विचिंतयेत् ॥ २५ ॥ एकैरूडुदशा स्वीया गुणैरष्टादशात्मना ॥ भिन्ना फलविपाकस्तु कुर्याद्वैचित्रसंयुतम् ॥ २६ ॥ परमोच्चे तुंगमात्रे तदर्वाक्तदुपर्यपि ॥ मूलत्रिकोणभे स्वर्क्षे स्वाधिमित्रग्रहस्य भे ॥ २७ ॥ तत्कालसुहृदो गेहे उदासीनस्य भे तथा ॥ शत्रोर्भेपि रिपोर्भे च नीचांतादूर्ध्वदेशभे ॥ २८ ॥ तस्मादर्वाङ् नीचमात्रे नीचांते परमांशके ॥ नीचारिवर्गे शकले स्ववर्गे केंद्रकोणभे ॥ २९ ॥ व्यवस्थितस्य खेट-

स्य समरे पीडितस्य च ॥ गाढमूढस्य च दशापाचितिः स्वगुणैः फलम् ॥ १३० ॥ परमोच्चगतो यस्तु योऽतिवीर्यपरत्रवान् ॥ संपूर्णाख्या तद्दशा तु राज्यभाग्यशुभप्रदा ॥ ३१ ॥ लक्ष्मीकटाक्षचिह्नानां चिदावासगृहप्रदा ॥ तुंगमात्रगतस्यापि तथा वीर्याधिकस्य च ॥ ३२ ॥ पूर्णाख्या बहुधैश्वर्यदायिन्यापि रुजाप्रदा ॥ अतिनीचगतस्यापि दुर्बलस्य ग्रहस्य तु ॥ ३३ ॥ रिक्ताष्टानिष्टफलदा व्याध्यनर्थमृतिप्रदा ॥ अत्युच्चेप्यतिनीचोच्चे मध्यगस्य च रोहिणी ॥ ३४ ॥ मित्रोच्चभावप्राप्तस्य मध्याख्या ह्यर्थदा दशा ॥ नीचांतादुच्चभागान्तं भषट्के मध्यगस्य च ॥ ३५ ॥ दशा च रोहिणी नीचरिपुभांशगतस्य च ॥ अधमाख्या भयक्लेशव्याधिदुःखविवर्द्धिनी ॥ ३६ ॥ नामानुरूपफलदा पाककाले दशा यमा ॥ भाग्येशगुरुसंबंधा योगदृक्केंद्रभादिभिः ॥ ३७ ॥ परेषामपि दायेषु भाग्योपक्रमसुन्नयेत् ॥ जातको यस्तु फलदो भाग्ययोगप्रदोऽथ यः ॥ ३८ ॥ ॥ सफलो वक्रिमादूर्ध्वमन्यानपि च खेचरान् ॥ दुर्बलानसमर्थांश्च फलदानेषु योगतः ॥ ३९ ॥ तारतम्यात्सुसंबंधा दशा ह्येताः फलप्रदाः ॥ स्वकेंद्रादिजुषां तेषां पूर्णार्द्धांघ्रिव्यवस्थया ॥ १४० ॥ प्रसह्यकार इत्येतत्संततं संपदां बलात् ॥ शीर्षोदयस्वगा स्वस्वदशादौ स्वफलप्रदा ॥ ४१ ॥ ॥ उभयोदयराशिस्थदशा मध्यफलप्रदा ॥ पृष्ठोदयर्क्षगाः खेटाः स्वदशांते फलप्रदाः ॥ ४२ ॥ जन्मकाले दशानाथस्वेष्टगानां विचारणे ॥ निसर्गतश्च तत्काले सुहृदां हरणे शुभम् ॥ ॥ ४३ ॥ संपादयेत्तदा कष्टं तद्विपर्ययगामिनाम् ॥ दशेशाक्रांतभावानां दारस्य द्वादशार्क्षभम् ॥ ४४ ॥ भुक्त्वा द्वादशराशीनां दशाभुक्तिं प्रकल्पयेत् ॥ एकैकराशेर्या तत्र सुहृत्स्वक्षेत्रगामिनी ॥ ४५ ॥ तस्या राज्यादिसंप्राप्तिपूर्वकं शुभमीरयेत्॥ दुःस्थानारिपुनचिस्थनीचक्रूरयुताच या ॥४६॥

तस्यामनर्थकलहं रोगमृत्युभयादिकम् ॥ बिंदुभूयस्त्वशून्यत्ववशात्स्वीयाष्टवर्गके ॥ ४७ ॥ वृद्धिं हानिं च तद्राशिं भावस्य स्वग्रहात्क्रमात् ॥ भावयोजनया विद्यात्सुताद्यादि शुभाशुभम् ॥ ॥ ४८ ॥ धात्वादिराशिभेदाच्च धात्वादिग्रहयोगतः ॥ शुभपापदशाभेदाच्छुभपापयुतैरपि ॥ ४९ इष्टानिष्टस्थानभेदात्फलभेदात्समुन्नयेत् ॥ एवं सर्वग्रहाणां च स्वां स्वामंतर्दशामपि ॥ ॥ १५० ॥ स्वराशितो राशिभुक्तिं प्रकल्प्य फलमीरयेत् ॥ अंतरंतर्दशां स्वीयां विभज्यैवं पुनः पुनः ॥ ५१ ॥ कालसंक्षेपतः सूक्ष्मफलं ब्रूयाद्दिनं प्रति ॥ स्वाध्यारंभकृतो होराग्रंथेऽयमपि वाऽमुना ॥ ५२ ॥ केंद्रे कोणे कारका भावनाथा भावप्राप्तिदुःस्थिता भावहत्यै ॥ अर्थे लाभे विक्रमा वा यदाते भावात्सर्वे मातृपित्रादितुल्याः ॥ ५३ ॥ भावं पश्यति भावेशो भावस्थे लग्नगेऽपि वा ॥ बलिनः स्वोच्चगे वाऽपि तद्भावात्त्विष्टपुष्टया ॥ ५४ ॥ यद्भावेशोरिनीचस्थो मूढो वा तन्न पश्यति ॥ तद्भावासत्त्वमालस्यं वैरित्वं च विनिर्दिशेत् ॥ ५५ ॥ भावेशाक्रांतराशीशो यदि रंध्रारिरिःफगः ॥ तद्भावनाशनं चैव भावनाथेन दृश्यते ॥ ५६ ॥ परमोच्चगते विलग्ननाथे तनुभावे शुभखेचरेण दृष्टे ॥ उडुपे शुभसंयुते च दृष्टे शतमायुः प्रवदंति बुद्धिमंतः ॥ ५७ ॥ भावैश्चतुर्भिर्बलिभिर्धनभाग्यायकर्मभिः ॥ संपूर्णवित्तं सततं कुबेर इव जायते ॥ ॥ ५८ ॥ लग्ने वाहेशदेहानां संबंधश्चाश्ववाहनम् ॥ शुक्रेणांदोलिकाप्राप्तिर्गुरुणा गजवाहनम् ॥ ५९ ॥ केंद्रायस्वविलग्नकोणसहजस्थौ कांत्यवाहेश्वरौ देहेऽयेन्दुविलग्ननाथसहितावन्योन्यभावाश्रितौ ॥ अन्योन्यामतिभाग्यकंटकगतौ दुःस्थानगौ स्वग्रहं पश्येतां यदि दीनवंशजनितोऽपि स्याच्चतुर्वाहनः ॥ १६० ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे विंशोत्तरीमहादशाफलकथनो नाम षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥

अथान्तर्दशाकरणमाह।

दशा दशाहता कार्या दशभिर्भागमाहरेत् ॥ लब्धांकाश्च भवेन्मासास्त्रिंशघ्ने च दिनानि च ॥ १ ॥

अस्योदाहरणम् ।

यथा सूर्यमहादशावर्षाणि षट् ६ तन्मध्ये सूर्यस्यांतर्दशा कतीत्यपेक्षायां दशावर्षाणि ६ षट् परस्परं गुणिते जातं ३६ दशभिर्भक्तेर्लब्धं ३ मासाः शेषाः ६ षट्त्रिंशद्गुणिताः जाताः १८० अस्य दशभिर्भक्तेर्लब्धं १८ दिनानि एवं सूर्यमहादशामध्ये सूर्यस्यांतर्दशामासाः ३ दिनानि १८ एवमग्रे चंद्रादीनामपि विज्ञेयम् ॥

अथ सूर्यविंशोत्तरीवर्षाणि ६ तन्मध्येंतरमाह ।

सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.
०	०	०	०	०	०	०	०	१
३	६	४	१०	९	११	१०	४	०
१८	०	६	२४	१८	१२	६	६	०
०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०

अथ चंद्रविंशोत्तरीवर्षाणि १० तन्मध्येन्तरम् ।

चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	ग्र.
०	०	१	१	१	१	०	१	०	०
१०	७	६	४	७	५	७	८	६	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०

अथ भौमविंशोत्तरीवर्षाणि ७ तन्मध्येन्तरम् ।

मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	ग्र.
०	१	०	१	०	०	१	०	०	०
४	०	११	१	११	४	२	४	७	०
२७	१८	६	९	२७	२७	०	६	०	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०

अथ राहुविंशोत्तरीवर्षाणि १८ तन्मध्येन्तरम् ।

रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	मं.	ग्र.
२	२	२	२	१	३	०	१	१	०
८	४	१०	६	०	०	१०	६	०	०
१२	२४	६	१८	१८	०	२४	०	०	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०

अथ विंशोत्तरीगुरुवर्षाणि १६ तन्मध्येन्तरम् ।

गु.	श.	बु.	के.	शु.	सू.	चं.	मं.	रा.	ग्र.
२	२	२	०	२	०	१	०	२	०
१	६	३	११	८	९	४	११	४	०
१८	१२	६	६	०	१८	०	६	२४	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०

अथ विंशोत्तरीशनिवर्षाणि १९ तन्मध्येन्तरम् ।

श.	बु.	के.	शु.	सू.	चं.	मं.	रा.	गु.	ग्र.
३	२	१	३	०	१	१	२	२	०
०	८	१	२	११	७	१	१०	६	०
३	९	९	०	१२	०	९	६	१२	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०

अथ विंशोत्तरीबुधवर्षाणि १७ तन्मध्येन्तरम् ।

बु.	के.	शु.	सू.	चं.	मं.	रा.	गु.	श.	ग्र.
२	०	२	०	१	०	२	२	२	०
४	११	१०	१०	५	११	६	३	८	०
२७	२७	०	६	०	२७	१८	६	९	०
०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०

अथ विंशोत्तरीकेतुवर्षाणि ७ तन्मध्येन्तरम् ।

के.	शु.	सू.	चं.	मं.	रा.	गु.	श.	बु.
०	१	०	०	०	१	०	१	०
४	२	४	७	४	०	११	१	११
२७	०	६	०	२७	१८	६	९	२७
०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०

अथ विंशोत्तरीभृगुवर्षाणि २० तन्मध्येन्तरम् ।

शु.	सू.	चं.	मं.	रा.	गु.	श.	बु.	के.
३	१	१	१	३	२	३	२	१
४	०	८	२	०	८	२	१०	२
०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०

स्वद्वादशांशके लग्ने नाथे वा स्वदृक्काणगे ॥ तस्य भुक्तिं शुभा-
माहुर्मुनयः कालचिंतकाः ॥ २ ॥ स्वत्रिंशांशेऽथ वा मित्रे त्रिंशांशे वा
स्थितो यदि ॥ तस्य भुक्तिः शुभा प्रोक्ता कालविद्भिर्मनीषिभिः ॥३॥
मित्रक्षेत्रे नवांशस्थे मित्रस्य द्विरसांशके ॥ तस्य भुक्तिः शुभा प्रोक्ता
कालविद्भिर्मनीषिभिः ॥ ४ ॥ बुद्धिक्षेत्रनवांशस्थे पुत्रस्य द्विरसांशके ॥
मित्रद्रेष्काणगे वापि तस्य भुक्तिः शुभावहा ॥५॥ तयो राशिनवांशस्थे
धर्मस्य द्विरसांशके ॥ गुरुद्रेष्काणगे वापि तस्य भुक्तिः शुभावहा ॥६॥

सुखराशिनवांशस्थे वाहनद्विरसांशके ॥ सुखद्रेष्काणगे वापि तस्य भुक्तिः शुभावहा ॥ ७ ॥ विलग्ननाथस्थितभांशनाथे मित्रांशगे मित्रखगेन दृष्टे ॥ सुहृद्दृकाणस्थनवांशके वा तदास्य भुक्तिं शुभदां वदंति ॥ ८ ॥ अथ वक्ष्ये विशेषेण दशा कष्टप्रदा नृणाम् ॥ षष्ठाष्टमव्ययेशानां दशा कष्टप्रदायिनी ॥ ९ ॥ एषा भुक्तिर्हि कष्टा स्यान्मारकस्य दशा यदि ॥ मारकेशेन षष्ठेशे युक्ते लग्नाधिपे यदि ॥१०॥ तस्य भुक्तौ ज्वरप्राप्तिं प्राहुः कालविदो जनाः ॥ सरोगे सशरीरेशश्चंद्रषड्वर्गगो यदि ॥ ११ ॥ जलदोषस्तस्य भुक्तौ स्यादजीर्णो न संशयः ॥ षष्ठेशयुतलग्नेशो बुधषड्वर्गगो यदि ॥ १२ ॥ तस्य भुक्तौ भवेद्वायुर्वातो वा देहजाड्यकृत् ॥ सारिनाथविलग्नेशो गुरुः षड्वर्गगो यदि ॥ तस्य भुक्तौ भवेद्रोगः पीडा वा ब्राह्मणेन तु ॥ १३ ॥ नक्षत्रेशो विलग्नेशो भृगुषड्वर्गगो यदि ॥ तस्य भुक्तौ भवेत्पीडा रोगस्त्रीसंगमेन च ॥ १४ ॥ सरोगे सविलग्नेशः शनिषड्वर्गगो यदि ॥ तस्य भुक्तौ भवेद्वातः सान्निपातोथ वा नृणाम् ॥ लग्नेशरोगेशपयोर्भवेन्मारकभुक्तिषु ॥ १५ ॥ मृत्यौ स्थितैः सैंहिकमंदकेतुभिर्मनोहिकाश्वासविषूचिकाभिः ॥ रोगो नराणामथ तस्य भुक्तौ भवेद्यदा मारकसंयुतिश्च ॥ १६ ॥ एवं भ्रात्रादिभावानां नायको यत्र संस्थितः ॥ तत्तत्षड्वर्गयोगेन तत्तद्भावफलं वदेत् ॥ १७ ॥

अथाग्रे फलमाह ।

केंद्राधीश्वरकोणनायकदशाश्चांतर्दशाः शोभनाः सामान्याश्च धनत्रिलाभभवनाधीशग्रहाणां दशा ॥ षष्ठाष्टव्ययभावनायकदशाः कष्टा भवेयुः सदा नेतुर्लग्नमवेक्ष्य तत्तदधिपात्तत्तद्दशाभुक्तिषु ॥ १८ ॥

रविमहादशायां रवेरंतर्दशा मास ३ दिन १८ तत्फलम् ।

उच्चक्षेत्रे गते सूर्ये केंद्रलाभत्रिकोणगे ॥रविदाये स्वभुक्तौ च

धनधान्यादिलाभकृत् ॥ १९ ॥ देहरोगं वित्तलाभं राजप्रीतिकरं शुभम् ॥ सर्वकार्यार्थसिद्धिः स्याद्विवाहं राजदर्शनम् ॥ २० ॥ द्वितीयद्यूननाथे तु अपमृत्युर्भविष्याति ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ २१ ॥ सूर्यप्रीतिकरीं शांतिं कुर्यादारोग्यमादिशेत् ॥ २२ ॥

रविदशायां चंद्रभुक्तिमासाः ६ दिना० तत्फलम् ।

सूर्यस्यांतर्गते चंद्रे लग्नात्केंद्रत्रिकोणगे ॥ विवाहं शुभकार्यं च धनधान्यसमृद्धिकृत् ॥ २३ ॥ गृहक्षेत्राभिवृद्धिं च पशुवाहनसंपदाम् ॥ तुंगे वा स्वर्क्षगे वाऽपि दारसौख्यं धनागमम् ॥ २४ ॥ पुत्रलाभसुखं चैव सौख्यं राजसमागमम् ॥ महाराजप्रसादेन इष्टसिद्धिसुखावहम् ॥ २५ ॥ क्षीणे वा पापसंयुक्ते दारपुत्रादिपीडनम् ॥ वैषम्यजनसंवादभृत्यवर्गविनाशनम् ॥ २६ ॥ विरोधं राजकलहं धनधान्यपशुक्षयम् ॥ षष्ठाष्टमव्यये चंद्रे जलभीतिं मनोरुजम् ॥ ॥ २७ ॥ बंधनं रोगपीडा च स्थानविच्युतिकारकम् ॥ दुःस्थाने चापि चित्तेन दायादजनविग्रहम् ॥ २८ ॥ निर्धनं कुत्सितान्नं च चौरादिनृपपीडनम् ॥ मूत्रकृच्छ्रादिरोगश्च देहपीडाक्षयो भवेत् ॥ ॥ २९ ॥ दायेशाल्लाभभाग्ये च केंद्रे वा शुभसंयुते ॥ भोगभाग्यादिसंतोषदारपुत्रादिवर्द्धनम् ॥ ३० ॥ राज्यप्राप्तिं महत्सौख्यं स्थानप्राप्तिं च शाश्वतीम् ॥ विवाहं यज्ञदीक्षां च सुग्धान्यांबरभूषणम् ॥ ३१ ॥ वाहनं पुत्रपौत्रादि लभते सुखवर्द्धनम् ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा बलवर्जिते ॥ ३२ ॥ अकाले भोजनं चैव देशाद्देशं गमिष्याति ॥ द्वितीयद्यूननाथेन अपमृत्युर्भविष्यति ॥ श्वेतां गां महिषीं दद्याच्छांतिं कुर्यात्सुखं लभेत् ॥ ३३ ॥

रविदशायां कुजभुक्ति मासाः ४ दिना० ६ तत्फलम् ।

सूर्यस्यांतर्गते भौमे स्वोच्चे स्वक्षेत्रलाभगे ॥ लग्नात्केंद्रत्रिकोणे वा

शुभकार्यं शुभादिकम् ॥ ३४ ॥भूलाभं कृषिलाभं च धनधान्यादिवृद्धिदम् ॥ गृहक्षेत्रादिलाभं च रक्तवस्त्रादिलाभकृत् ॥३५॥लग्नाधिपेन संयुक्ते सौख्यं राजप्रियं सुखम् ॥ भाग्यलाभाधिपैर्युक्ते लाभश्चैव भविष्यति ॥ ३६ ॥ बहुसेनाधिपत्यं च शत्रुनाशं मनोदृढम् ॥ आत्मबंधुसुखं चैव भ्रातृवर्द्धनकं तथा ॥ ३७ ॥ दायेशाद्रिपुरंध्रस्थे पापयुक्ते च वीक्षिते ॥ आधिपत्यबलैर्हीने क्रूरबुद्धिं मनोरुजम् ॥ ३८ ॥ कारागृहे प्रवेशं च निर्गलं बंधुनाशनम् ॥ भ्रातृवर्गविरोधं च कर्मनाशमथापि वा ॥ ३९ ॥ नीचे वा बहुले भौमे राजमूलाद्धनक्षयः ॥ द्वितीयद्यूननाथे तु देहे जाड्यं मनोरुजम् ॥ ४० ॥ सुब्रह्मजपदानं च अनड्वाहं तथैव च ॥ शांतिं कुर्वीत विधिवदायुरारोग्यासिद्धिदाम् ॥ ४१ ॥

अथ रविदशायां राहुभुक्तिमासाः १० दि० २४ तत्फलम् ।

सूर्यस्यांतर्गते राहौ लग्नात्केंद्रत्रिकोणगे ॥ आदौ द्विमासपर्यन्तं धननाशं महद्भयम् ॥ ४२ ॥ चौराहिव्रणभीतिश्च दारपुत्रादिपीडनम् ॥ तत्परं सुखमाप्नोति शुभयुक्ते शुभांशके ॥ ४३ ॥ देहारोग्यं मनस्तुष्टी राजप्रीतिकरं सुखम् ॥ लग्नाद्युपचये राहौ योगकारकसंयुते ॥ ४४ ॥ दारेशाच्छुभराशिस्थे राजसन्मानकीर्तिदम् ॥ भाग्यवृद्धिं यशोलाभं दारपुत्रादिपीडनम् ॥ ४५ ॥ पुत्रोत्सवादिसंतोषं गृहे कल्याणशोभनम् ॥ दायेशात्षष्ठरिष्फस्थे रंध्रे वा बलवर्जिते ॥ ४६ ॥ बंधनं स्थाननाशश्च कारागृहनिवेशनम् ॥ चौराहिव्रणभीतिश्च दारपुत्रादिवर्द्धनम् ॥ ४७ ॥ चतुष्पाज्जीवनाशश्च गृहक्षेत्रादिनाशनम् ॥ गुल्मक्षयादिरोगश्च अतिसारादिपीडनम् ॥ द्विसप्तस्थे तथा राहौ तत्स्थानाधिपसंयुते ॥ अपमृत्युभयं चैव सर्वभीतिश्च संभवेत् ॥ ४८ ॥ ॥ ४९ ॥ दुर्गाजपं च कुर्वीत छागदानं समाचरेत् ॥ कृष्णा गां माहिषीं दद्याच्छान्तिमाप्नोत्यसंशयम् ॥ ५० ॥

अथ रविमध्ये गुरुभुक्तिमा० ९ दि० १८ तत्फलम् ।

सूर्यस्यांतर्गते जीवे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे मित्रस्य वर्गस्थे विवाहं राजदर्शनम् ॥ ५१ ॥ धनधान्यादिलाभं च पुत्रलाभं महत्सुखम् ॥ महाराजप्रसादेन इष्टकार्यार्थलाभकृत् ॥ ५२ ॥ ब्राह्मणप्रियसन्मानं प्रियवस्त्रादिलाभकृत् ॥ भाग्यकर्माधिपवशाद्राज्यलाभं महोत्सवम् ॥ ५३ ॥ नरवाहनयोगाश्च स्थानाधिक्यं महत्सुखम् ॥ दायेशाच्छुभराशिस्थे भाग्यवृद्धिः सुखावहा ॥ ५४ ॥ दानधर्मक्रियायुक्तो देवताराधनाप्रियः ॥ गुरुभक्तिर्मनःसिद्धिः पुण्यकर्मादिसंग्रहः ॥ ५५ ॥ दायेशाद्रिपुरंध्रस्थे नीचे वा पापसंयुते ॥ दारपुत्रादिपीडा च देहपीडा महद्भयम् ॥ ५६ ॥ राजकोपं प्रकुरुते इष्टवस्तुविनाशनम् ॥ पापमूलाद्द्रव्यनाशं देहभ्रष्टं मनोरुजम् ॥ ५७ ॥ स्वर्णदानं प्रकुर्वीत इष्टजाप्यं च कारयेत् ॥ गवां कपिलवर्णानां दानेनारोग्यमादिशेत् ॥ ५८ ॥

अथ रविदशायां शनिभुक्तिमा० ११ दि० १२ तत्फलम् ।

सूर्यस्यांतर्गते मंदे लग्नात्केंद्रत्रिकोणगे ॥ शत्रुनाशं महत्सौख्यं स्वल्पधान्यार्थलाभकृत् ॥ ५९ ॥ विवाहोत्सवकार्याणि शुभकार्यं शुभावहम् ॥ स्वोच्चे स्वक्षेत्रगे मंदे सुहृद्ग्रहसमन्विते ॥ ६० ॥ गृहे कल्याणसंपात्तिर्विवाहादिषु सत्क्रियाम् ॥ राजसन्मानकीर्तिश्च नाना वस्त्रधनागमः ॥ ६१ ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ वातशूलमहाव्याधिज्वरातीसारपीडनम् ॥ ६२ ॥ बंधनं कार्यहानिश्च वित्तनाशं महद्भयम् ॥ अकस्मात्कलहश्चैव दायादजनविग्रहम् ॥ ॥ ६३ ॥ भुक्त्यादौ मित्रहानिः स्यान्मध्ये किंचित्सुखावहम् ॥ अंते क्लेशकरं चैव नीचं तेषां तथैव च ॥ ६४ ॥ पितृमातृवियोगं च गमनागमनं तथा ॥ द्वितीयद्यूननाथे तु अपमृत्युभयं भवेत् ॥ ६५ ॥

कृष्णां गां महिषीं दद्यान्मृत्युंजयजपं चरेत् ॥ छागदानं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥ ६६ ॥

अथ रविदशायां बुधभुक्तिमा० १० दि० ६ तत्फलम् ।

सूर्यस्यांतर्गते सौम्ये स्वोच्चे वा स्वर्क्षगेऽपि वा ॥ कोणत्रिकोणलाभस्थे बुधे वर्गबलैर्युते ॥ ६७ ॥ राज्यलाभं महोत्साहं दारपुत्रादिसौख्यकृत् ॥ महाराजप्रसादेन वाहनांबरभूषणम् ॥ ६८ ॥ पुण्यतीर्थफलावाप्तिर्गृहे गोधनसंकुलम् ॥ भाग्ये लाभाधिपैर्युक्ते लाभ वृद्धिकरो भवेत् ॥ ६९ ॥ भाग्यपंचमकर्मस्थे सन्मानो भवति ध्रुवम् ॥ स्वकर्मधर्मबुद्धिश्च गुरुधर्मद्विजार्चनम् ॥ ७० ॥ धनधान्यादिसंयुक्तं विवाहं पुत्रसंभवम् ॥ दायेशाच्छुभराशिस्थे सौम्यभुक्तौ महत्सुखम् ॥ ॥ ७१ ॥ वैवाहिकं यज्ञकर्म दानधर्मजपादिकम् ॥ स्वनामांकितपद्यानि नामद्वयमथाऽपि वा ॥ ७२ ॥ भोजनांबरभूषाभिरमरेशो भवेन्नरः ॥ दायेशाद्रिपुरंध्रस्थे रिष्फगे नीचगेऽपि वा ॥ ७३ ॥ देहपीडा मनस्तापो दारपुत्रादिपीडनम् ॥ भुक्त्यादौ दुःखमाप्नोति मध्ये किंचित्सुखावहम् ॥ ७४ ॥ अंते तु राजभीतिश्च गमनागमनं तथा ॥ द्वितीये द्यूननाथे तु देहजाड्यं ज्वरादिकम् ॥ विष्णुनामसहस्रं च ह्यन्नदानं च कारयेत् ॥ रजतप्रतिमादानं कुर्यादारोग्यमादिशेत् ॥ ७५ ॥

रविमध्ये केतुभुक्तिमासाः ४ दिना० ६ तत्फलम् ।

सूर्यस्यांतर्गते केतौ देहपीडा मनोव्यथा ॥ अर्थव्ययं राजकोपं स्वजनादेरुपद्रवम् ॥ ७६ ॥ लग्नाधिपेन संयुक्ते आदौ सौख्यं धनागमम् ॥ मध्ये तत्क्लेशमाप्नोति मृतवार्तागमं वदेत् ॥ ॥ ७७ ॥ षष्ठाष्टमव्यये चैवं दायेशात्पापसंयुते ॥ कपोलदंतरोगश्च मूत्रकृच्छ्रस्य संभवम् ॥ ७८ ॥ स्थानविच्युतिरर्थस्य मित्रहानिः पितुर्मृतिः ॥ विदेशगमनं चैव शत्रुपीडा महद्भयम् ॥ ७९ ॥ लग्नाद्दुपद्रवे केतौ प.ग.क.रकसंयुते ॥ शुभांशे शुभवर्गैश्च शुभक-

र्मफलप्रदम् ॥ ८० ॥ पुत्रदारादिसौख्यं च संतोषं प्रियवर्द्धनम् ॥ विचित्रवस्त्रलाभं च यशोवृद्धिः सुखावहा ॥ ८१ ॥ द्वितीयद्यूननाथे वा ह्यपमृत्युभयं वदेत् ॥ दुर्गाजपं च कुर्वीत छागदानं तथैव च ॥ ८२ ॥ महामृत्युंजयजपं कुर्याच्छांतिमवाप्नुयात् ॥ ८३ ॥

रविदशायां शुक्रांतर्दशा मा० १२ दि० तत्फलम् ।

सूर्यस्यांतर्गते शुक्रे त्रिकोणे चंद्रगेपि वा ॥ स्वोच्चे मित्रस्ववर्गस्थे इष्टस्त्रीभोग्यसंपदाम् ॥ ८४ ॥ ग्रामांतरप्रयाणं च ब्राह्मणप्रभुदर्शनम् ॥ राज्यलाभं महोत्साहं छत्रचामरवैभवम् ॥ ८५ ॥ गृहे कल्याणसंपत्तिर्नित्यं मिष्टान्नभोजनम् ॥ विद्रुमादिरत्नलाभं मुक्तावस्त्रादिलाभकृत् ॥ ८६ ॥ चतुष्पाज्जीवलाभः स्याद्बहुधान्यधनादिकम् ॥ उत्साहं कीर्तिसंपत्तिर्नरवाहनसंपदाम् ॥ ८७ ॥ षष्ठाष्टमव्यये शुक्रे दायेशाद्बलवर्जिते ॥ राजकोपं मनः क्लेशं पुत्रस्त्रीधननाशनम् ॥ ८८ ॥ भुक्त्यादौ वाहनं मध्ये लाभः शुभकरो भवेत् ॥ अंते यशोनाशनं च स्थानभ्रंशमथापि वा ॥८९॥ बंधुद्वेषमनंतं च स्वकुलाद्भोगनाशनम् ॥ भार्गवद्यूननाथे तु देहे जाड्यं मनोरुजम् ॥ ९० ॥ रंध्ररिष्फसमायुक्ते अपमृत्युर्भविष्यति ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ ९१ ॥ श्वेतां गां महिषीं दद्याद्रुद्रजाप्यं च कारयेत् ॥ ९२ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे सूर्यांतर्दशाफलकथनं
नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अथ चंद्रदशायां चंद्रभुक्तिमासाः १० दि० तत्फलम् ।

स्वोच्चे स्वक्षेत्रगे चंद्रे त्रिकोणे लाभगेपि वा ॥ भाग्यकर्माधिपैर्युक्ते गोजाश्वांबरसंकुलम् ॥ १ ॥ देवतागुरुभक्तिश्च पुण्यश्लोकादिकीर्तितम् ॥ राज्यलाभं महत्सौख्यं यशोवृद्धिः सुखावहा ॥ २ ॥ पूर्णचंद्रे पूर्णबलं सेनाधिपमहत्सुखम् ॥ पापयुक्तेऽथवा चंद्रे नीचेवा

रिष्फषष्ठगे ॥ ३ ॥ तत्काले धननाशः स्यात्स्थानच्युतिमथापि
वा ॥ देहालस्यं मनस्तापं राजमंत्रिविरोधकृत् ॥ ४ ॥ मातृक्लेशं मनो-
दुःखं निगडं बंधुनाशनम् ॥ द्वितीयद्यूननाथे तु रंध्ररिष्फसमन्विते
॥ ५ ॥ देहजाड्यं महाभंगमपमृत्योर्भयं भवेत् ॥ श्वेतां गां महिषीं
दद्याद्दानेनारोग्यमादिशेत् ॥ ६ ॥

अथ चंद्रदशायां कुजभुक्तिमासाः ७ तत्फलम् ।

चंद्रस्यातर्गते भौमे लग्नात्केंद्रत्रिकोणगे ॥ सौभाग्यं राजसन्मानं
वस्त्राभरणभूषणम् ॥ ७ ॥ यत्नकार्यार्थसिद्धिस्तु भविष्यति न सं-
शयः ॥ गृहक्षेत्राभिवृद्धिश्च व्यवहारे जयो भवेत् ॥ ८ ॥ कार्यलाभं
महत्सौख्यं स्वोच्चे स्वक्षेत्रगे फलम् ॥ षष्ठाष्टमव्यये भौमे पापयुक्तेऽ
थवा यदि ॥ ९ ॥ दायेशादशुभस्थाने देहार्तिंपदवीक्षिते ॥ गृह-
क्षेत्रादिहानिश्च व्यवहारं तथैव च ॥ १० ॥ भृत्यवर्गेषु कलहं
भूपालस्य विरोधनम् ॥ आत्मबंधुवियोगं च नित्यं निष्ठुरभाषणम्
॥ ११ ॥ द्वितीये द्यूननाथे तु रंध्रे रंध्राधिपो यदा ॥ तद्दोषपरिहा-
रार्थं ब्राह्मणस्यार्चनं चरेत् ॥ १२ ॥

अथ राहुभुक्तिमासाः १९ तत्फलमाह ।

चंद्रस्यांतर्गते राहौ लग्नात्केंद्रत्रिकोणगे ॥ आदौ स्वल्पफलं ज्ञेयं
शत्रुपीडा महद्भयम् ॥ १३ ॥ चौराहिराजभीतिश्च चतुष्पाज्जीवपी-
डनम् ॥ बन्धुनाशं मित्रहानिं मानहानिं मनोव्यथाम् ॥ १४ ॥
शुभयुक्ते शुभैर्दृष्टे लग्नादुपचयेपि वा ॥ योगकारकसंबंधे यत्र कार्या-
र्थसिद्धिकृत् ॥ १५ ॥ नैर्ऋत्ये पश्चिमे भागे कश्चित्प्रभुसमागमम् ॥
वाहनांवरलाभं च इष्टकार्यार्थसिद्धिकृत् ॥ १६ ॥ दायेशाद्रिपुरं-
ध्रस्थे व्यये वा बलवर्जिते ॥ स्थानभ्रंशं मनोदुःखं पुत्रक्लेशं महद्भयम्
॥ १७ ॥ राजकार्यकलापं च दारपीडा महद्भयम् ॥ वृश्चिकादिवि-
षाद्भीतिश्चौराहिनृपपीडनम् ॥ १८ ॥ दायेशात्केंद्रकोणे वा दुश्चिक्ये

लाभोगेपि वा ॥ पुण्यतीर्थफलावाप्तिर्दैवतादर्शनं महत् ॥ १९ ॥ परोपकारधर्मादिपुण्यधर्मादिसंग्रहम् ॥ द्वितीयद्यूनराशिस्थे देहबाधा भविष्यति ॥ २० ॥ छागदानं प्रकुर्वीत देहारोग्यं प्रजायते ॥ २१ ॥

अथ गुरुभुक्तिमासाः १६ तत्फलम् ।

चंद्रस्यांतर्गते जीवे लग्नात्केंद्रत्रिकोणगे ॥ स्वगेहे लाभस्वोच्चे वा राज्यलाभं महोत्सवम् ॥ २२ ॥ वस्त्राऽलंकारभूषाप्तिं राजप्रीतिं धनागमम् ॥ इष्टदेवप्रसादेन गर्भाधानादिकं फलम् ॥ २३ ॥ शुभशोभनकार्याणि गृहे लक्ष्मीः कटाक्षकृत् ॥ राजाश्रयं धनं भूमिगजवाजिसमन्वितम् ॥ २४ ॥ महाराजप्रसादेन इष्टसिद्धिः सुखावहा ॥ षष्ठाष्टमव्यये जीवे नीचे वाऽस्तंगते यदि ॥ २५ ॥ पापयुक्तेऽशुभं कर्म गुरुपुत्रादिनाशनम् ॥ स्थानभ्रंशं मनोदुःखमकस्मात्कलहं ध्रुवम् ॥ २६ ॥ गृहक्षेत्रादिनाशं च वाहनांबरनाशनम् ॥ दायेशात्केंद्रकोणे वा दुश्चिक्ये लाभगेऽपि वा ॥ २७ ॥ भोजनांबरपश्वादि महोत्साहं करोति च ॥ भ्रात्रादि सुखसंपत्तिर्धैर्यं वीर्यपराक्रमम् ॥ २८ ॥ यज्ञवीर्यविवाहश्च राज्यश्रीधनसंपदः ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा बलवर्जिते ॥ २९ ॥ करोति कुत्सितान्नं च विदेशगमनं तथा ॥ भुक्त्यादौ शोभनं प्रोक्तमंते क्लेशकरं भवेत् ॥ ३० ॥ द्वितीये द्यूननाथश्च ह्यपमृत्युर्भविष्यति ॥ तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत् ॥ स्वर्णदानामिति प्रोक्तं सर्वसंपत्प्रदायकम् ॥ ३१ ॥

अथ शनिभुक्तिमासाः १९ तत्फलम् ।

चंद्रस्यांतर्गते मंदे लग्नात्केंद्रत्रिकोणगे ॥ स्वक्षेत्रस्वांशगे चैव मंदे तुंगांशसंयुते ॥ ३२ ॥ शुभदृष्टियुते वाऽपि लाभे वा बलसंयुते ॥ पुत्रमित्रार्थसंपत्तिः शूद्रप्रभुसमागमम् ॥ ३३ ॥ व्यवसायात्फलाधिक्यं गृहक्षेत्रादिवृद्धिदम् ॥ पुत्रलाभं च कल्याणं राजानुग्रहवैभवम् ॥ ३४ ॥ षष्ठाष्टमव्यये मंदे नीचे वा धनगेऽपिवा ॥ तद्भुक्त्या-

दौ पुण्यतीर्थे स्नानं चैव तु दर्शनम् ॥ ३५ ॥ अनेकजनत्रासश्च शस्त्रपीडा भविष्यति ॥ दायेशात्केंद्रराशिस्थे त्रिकोणे बलगेपि वा ॥ ३६ ॥ क्वचित्सौख्यं धनाप्तिश्च दारपुत्रविरोधकृत् ॥ द्वितीयद्यूनरंध्रस्थे देहबाधा भविष्याति ॥ ३७ ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ कृष्णां गां महिषीं दद्याद्दानेनारोग्यमादिशेत् ॥ ३८ ॥

अथ बुधभुक्तिमासाः १७ तत्फलम् ।

चंद्रस्यांतर्गते सौम्ये केंद्रलाभत्रिकोणगे ॥ स्वर्क्षे नवांशके सौम्ये तुंगे वा बलसंयुते ॥ ३९ ॥ धनागमं राजमानं प्रियवस्त्रादि लाभकृत् ॥ विद्याविनोदसद्गोष्ठीज्ञानवृद्धिः सुखावहा ॥ ४० ॥ संतानप्राप्तिं संतोषं वाणिज्याद्धनलाभकृत् ॥ वाहनच्छत्रसंयुक्तं नानालंकारभूषितम् ॥ ४१ ॥ दायेशात्केंद्रकोणे वा लाभे वा धनगेऽपि वा ॥ विवाहं यज्ञदीक्षां च दानधर्मशुभादिकम् ॥ ४२ ॥ राजप्रीतिकरं चैव विद्वज्जनसमागमम् ॥ मुक्तामणिप्रवालानि वाहनांबरभूषणम् ॥ ४३ ॥ आरोग्यप्रीतिसौख्यं च सोमपानादिकं सुखम् ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा नीचगेपि वा ॥ ४४ ॥ तद्भुक्तिर्देहबाधा च कृषिगोभूमिनाशनम् ॥ कारागृहप्रवेशं च दारपुत्रादिपीडनम् ॥ ॥ ४५ ॥ द्वितीयद्यूननाथे तु ज्वरपीडा महद्भयम् ॥ छागदानं प्रकुर्वीत विष्णुसाहस्रकं जपेत् ॥ ४६ ॥

अथ केतुभुक्तिमासाः ७ तत्फलम् ।

चंद्रस्यांतर्गते केतौ केंद्रलाभत्रिकोणगे ॥ दुश्चिक्ये बलसंयुक्ते धनलाभं महत्सुखम् ॥ ४७ ॥ पुत्रदारादिसौख्यं च विघ्नकर्म करोति च ॥ भुक्त्यादौ धनहानिः स्यान्मध्यगे सुखमाप्नुयात् ॥ ४८ ॥ दायेशात्केंद्रलाभे वा त्रिकोणे बलसंयुते ॥ क्वचित्फलं दशादौ तु अल्पसौख्यं धनागमम् ॥ ४९ ॥ गोमहिष्यादिलाभं च भुक्त्यंते

च्चार्थनाशनम् ॥ पापयुक्तेऽथ वा दृष्टे दायेशाद्रंध्ररिःफगे ॥५० ॥ हीनशत्रुत्वकार्याणि अकस्मात्कलहं ध्रुवम् ॥ द्वितीयद्यूनराशिस्थे अनारोग्यं महद्भयम् ॥ ५१ मृत्युंजयं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥ ५२ ॥

अथ शुक्रभुक्तिवर्ष १ मासाः ८ तत्फलम् ।

चंद्रस्यांतर्गते शुक्रे केन्द्रलाभत्रिकोणगे ॥ स्वोच्चे स्वक्षेत्रगे वापि राज्यलाभं करोति च ॥ ५३ ॥ महाराजप्रसादेन वाहनांबरभूषणम् ॥ चतुष्पाज्जीवलाभः स्याद्दारपुत्रादिवर्धनम् ॥ ५४ नूतनागारनिर्माणं नित्यं मिष्टान्नभोजनम् ॥ सुगंधपुष्पदायादिरम्यस्त्र्यारोग्यसंपदाम् ॥ ५५ दशाधिपेन संयुक्ते देहसौख्यं महत्सुखम् ॥ सत्कीर्तिसुखसंपत्तिगृहक्षेत्रादिवृद्धिकृत् ॥ ५६ ॥ नीचे वास्तंगते शुक्रे पापग्रहयुतेक्षिते ॥ भूनाशं पुत्रमित्रादिनाशनं पत्निनाशनम् ॥ ५७ ॥ चतुष्पाज्जीवहानिः स्याद्राजद्वारे विरोधकृत् ॥ धनस्थानगते शुक्रे स्वोच्चे स्वक्षेत्रसंयुते ॥ ५८ ॥ निधिलाभं महत्सौख्यं भूलाभं पुत्रसंभवम् ॥ भाग्यलाभाधिपैर्युक्ते भाग्यवृद्धिकरो भवेत् ॥ ५९ ॥ महाराजप्रसादेन इष्टसिद्धिः सुखावहा ॥ देवब्राह्मणभक्तिश्च मुक्ताविद्रुमलाभकृत् ॥ ६० ॥ दायेशाल्लाभगे शुक्रे त्रिकोणे केन्द्रगेपि वा ॥ गृहक्षेत्राभिवृद्धिश्च वित्तलाभं महत्सुखम् ॥ ६१ ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ विदेशवासदुःखार्तिमृत्युचौरादिपीडनम् ॥ ६२ ॥ द्वितीयद्यूननाथे तु अपमृत्युभयं भवेत् ॥ तद्दोषविनिवृत्त्यर्थं रुद्रजाप्यं च कारयेत् ॥ ६३ ॥ श्वेतां गां रजतं दद्याच्छांतिमाप्नोत्यसंशयः ॥ ६४ ॥

अथ रविभुक्तिमासाः ६ तत्फलम् ।

चंद्रस्यांतर्गते भानौ स्वोच्चे स्वक्षेत्रसंयुते ॥ केंद्रत्रिकोणलाभे वा धने वा सोदरे बले ॥ ६५ ॥ नष्टराज्यं धनप्राप्तिं गृहे कल्याण-

शोभनम् ॥ मित्रराजप्रसादेन ग्रामभूम्यादिलाभकृत् ॥ ६६ ॥ गर्भाधानफलप्राप्तिर्गृहे लक्ष्मीःकटाक्षकृत् ॥ भुक्त्यंते देहआलस्यं ज्वरपीडा भविष्यति ॥ ६७ ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ नृपचौराहिभीतिश्च ज्वररोगादिसंभवम् ॥ ६८ ॥ विदेशगमनं चार्तिं लभते फलवैभवम् ॥ द्वितीयद्यूननाथे तु ज्वरपीडा भविष्याति ॥ तद्दोषपरिहारार्थं शिवपूजां च कारयेत् ॥ ६९ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे चंद्रांतर्दशाफलकथनं नामाष्टत्रिंशत्तमोऽध्यायः ॥ ३८ ॥

अथ कुजदशायां कुजांतरमा०४ दि० २७ तत्फलम् ।

कुजस्यांतर्गते भौमे लग्नात्केन्द्रात्रिकोणगे ॥ लाभे वा धनसंयुक्ते दुश्चिक्ये बनसंयुते ॥ १ ॥ लग्नाधिपेन संयुक्ते राजाऽनुग्रहवैभवम् ॥ लक्ष्मीकटाक्षचिह्नानि नष्टराज्यार्थलाभकृत् ॥ २ ॥ पुत्रोत्सवादिसंतोषं गृहे गोक्षीरसंकुलम् ॥ स्वोच्चे वा स्वर्क्षगे भौमे स्वांशे वा बलसंयुते ॥ ३ ॥ गृहक्षेत्राभिवृद्धिश्च गोमहिष्यादिलाभकृत् ॥ महाराजप्रसादेन इष्टसिद्धिः सुखावहा ॥ ४ ॥ षष्ठाष्टमव्यये भौमे पापदृग्योगसंयुते ॥ मूत्रकृच्छ्रादिरोगश्च प्रेष्ठाधिक्यं व्रणाद्भयम् ॥ ५ ॥ चौराहिराजपीडा च धनधान्यपशुक्षयम् ॥ द्वितीये द्यूननाथे तु देहजाड्यं मनोरुजम् ॥ ६ ॥ तद्दोषपरिहारार्थं रुद्रजाप्यं च कारयेत् ॥ अनड्वाहं प्रदद्याच्च कुजदोषनिवृत्तये ॥ ७ ॥ आरोग्यं कुरुते तस्य सर्वसंपत्तिदायकम् ॥ ८ ॥

अथ राहुभुक्तिमासाः १२ दिना० १८ तत्फलम् ।

कुजस्यांतर्गते राहौ स्वोच्चे मूलत्रिकोणगे ॥ शुभयुक्ते शुभैर्दृष्टे केंद्रलाभत्रिकोणगे ॥ ९ ॥ तत्काले राजसन्मानं गृहभूम्यादिलाभकृत् ॥ कलत्रपुत्रलाभः स्याद्व्यवसायात्फलाधिकम् १० ॥ गंगास्नानफलावाप्तिं विदेशगमनं तथा ॥ षष्ठाष्टमव्यये राहौ पाप-

युक्तेऽथ वीक्षिते ॥ ११ ॥ चौराहिव्रणभीतिश्च चतुष्पाज्जीवनाशनम् ॥ वातपित्तक्षयं चैव कारागृहनिवेशनम् ॥ १२ ॥ धनस्थानगते राहौ धननाशं महद्भयम् ॥ द्वितीये सप्तमे वापि ह्यपमृत्युभयं महत् ॥ १३ ॥ नागदानं प्रकुर्वीत देवब्राह्मणभोजनम् ॥ मृत्युंजयजपं कुर्यादायुरारोग्यमादिशेत् ॥ १४ ॥

अथ गुरुभुक्तिमासाः ११ दिना० ६ तत्फलम् ।

कुजस्यांतर्गते जीवे त्रिकोणे केंद्रगेपि वा ॥ लाभे वा धनसंयुक्ते तुंगांशे स्वांशगेपि वा ॥ १५ ॥ सत्कीर्ती राजसन्मानं धनधान्यस्य वृद्धिकृत् ॥ गृहे कल्याणसंपत्तिर्दारपुत्रादिलाभकृत् ॥ १६ ॥ दायेशात्केंद्रराशिस्थे त्रिकोणे लाभगेपि वा ॥ भाग्यकर्माधिपैर्युक्ते वाहनाधिपसंयुते ॥ १७ ॥ लग्नाधिपसमायुक्ते शुभांशे शुभवर्गगे ॥ गृहक्षेत्राभिवृद्धिश्च गृहे कल्याणसंपदः ॥ १८ ॥ देहारोग्यं महत्कीर्तिर्गृहे गोकुलसंग्रहः ॥ चतुष्पाज्जविलाभः स्याद्व्यवसायात्फलाधिकम् ॥ १९ ॥ कलत्रपुत्रविभवं राजसन्मानवैभवम् ॥ षष्ठाष्टमव्यये जीवे नीचे वास्तंगते यदि ॥ २० ॥ ॥ पापग्रहेणसंयुक्ते दृष्टे वा दुर्बले यदि ॥ चौराहिनृपभीतिश्च पित्तरोगादिसंभवम् ॥ २१ ॥ प्रेतबाधां भृत्यनाशं सोदराणां विनाशनम् ॥ द्वितीयद्यूननाथे तु अपमृत्युज्वरादिकम् ॥ तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत् ॥ २२ ॥

अथ शनिभुक्तिमासाः १३ दिना० ९ तत्फलम् ।

कुजस्यांतर्गते मंदे स्वर्क्षे केंद्रत्रिकोणगे ॥ मूलत्रिकोणकेंद्रे वा तुंगांशे स्वांशगे यदि ॥ २३ ॥ लग्नाधिपतिना वापि शुभदृष्टियुते बले ॥ राज्यसौख्यं यशोवृद्धिं स्वग्रामे धान्यवृद्धिकृत् ॥ २४ ॥ पुत्रपौत्रसमायुक्ते गृहे गोधनसंग्रहः ॥ स्ववारे राजसन्मानं स्वमासे

पुत्रवृद्धिकृत् ॥ २५ ॥ नीचादिक्षेत्रगे मंदे षष्ठाष्टव्ययराशिगे ॥ म्लेच्छवर्गप्रभुभयं धनधान्यादिनाशनम् ॥ २६ ॥ निगडं बंधनं रोगमंते क्षेत्रनिवासकृत् ॥ द्वितीयद्यूननाथे तु पापयुक्ते महद्भयम् ॥ ॥ २७ ॥ धननाशं च संचारं राजद्वेषं मनोरुजम् ॥ चौराग्निनृपपीडा च सहोदरविनाशनम् ॥२८॥ बंधुद्वेषकरं चैव जीवहानिश्च जायते ॥ अकस्माच्च मृतेर्भीतिः पुत्रदारादिपीडनम् ॥ २९ ॥ कारागृहादिभीतिश्च राजदंडो महद्भयम् ॥ दायेशात्केंद्रराशिस्थे लाभस्थे वा त्रिकोणगे ॥ ३० ॥ विदेशयानं लभते दुष्कीर्तिर्विविधा तथा ॥ पापकर्मरतो नित्यं बहुजीवादिहिंसकः ॥ ३१ ॥ विक्रयः क्षेत्रहानिश्च स्थानभ्रंशो मनोव्यथा ॥ वधेष्वपजयं चैव मूत्रकृच्छ्रान्महद्भयम् ॥ ३२ ॥ दायेशात्षष्ठरंध्रे वा व्यये वा पापसंयुते ॥ तद्भुक्तौ मरणं ज्ञेयं नृपचौरादिपीडनम् ॥ ३३ ॥ वातपीडा च शूलादिज्ञातिशत्रुभयं भवेत् ॥ ३४ ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ ३५ ॥

अथ बुधभुक्तिमासाः १६ दिना० २७ तत्फलम् ।

कुजस्यांतर्गते सौम्ये लग्नात्केंद्रत्रिकोणगे ॥ सत्कथाश्चाजपादानं धर्मबुद्धिर्महद्यशः ॥ ३६ ॥ नीतिमार्गप्रसंगश्च नित्यं मिष्टान्नभोजनम् ॥ वाहनांबरपश्वादिराजकर्म सुखानि च ॥ ३७ ॥ कृषिकर्मफलं सिद्धिर्वारणांबरभूषणम् ॥ नीचे वास्तंगते वापि षष्ठाष्टव्ययगेपि वा ॥ ३८ ॥ हृद्रोगं मानहानिश्च निगडं बंधुनाशनम् ॥ दारपुत्रार्थनाशः स्याच्चतुष्पाज्जीवनाशनम् ॥ ३९ ॥ दशाधिपेन संयुक्ते शत्रुवृद्धिर्महद्भयम् ॥ विदेशगमनं चैव नानारोगास्तथैव च ॥ ४० ॥ राजद्वारे विरोधश्च कलहः सौख्यभुक्तिषु ॥ दायेशात्केंद्रकोणे वा स्वोच्चे युक्तार्थलाभकृत् ॥ ४१ ॥ अनेकधननाथत्वं राजसन्मानमेव च ॥ भूपालयोगं कुरुते धनांबरविभूषणम् ॥४२ ॥

भूरिवाद्यमृदंगादि सेनापत्यं महत्सुखम् ॥ विप्राविनोदविमला वस्त्रवाहनभूषणम् ॥ ४३ ॥ दारपुत्रादिविभवं गृहेलक्ष्मीःकटाक्षकृत् ॥ दायेशात्षष्ठरिःफस्थे रंध्रे वा पापसंयुते ॥ ४४ ॥ तद्दाये मानहानिः स्यात्क्रूरबुद्धिस्तु क्रूरवाक् ॥ चौराग्निनृपपीडा च मार्गे चौरभयादिकम् ॥ ४५ ॥ अकस्मात्कलहश्चैव बुधभुक्तौ न संशयः ॥ द्वितीयद्यूननाथे तु महाव्याधिर्भयंकरा ॥ ४६ ॥ अश्वदानं प्रकुर्वीत विष्णोर्नामसहस्रकम् ॥ सर्वसंपत्प्रदं सौख्यं सर्वारिष्टप्रशांतये ॥ ४७ ॥

अथ केतुभुक्तिमासाः ४ दिना० २७ तत्फलम् ।

कुजस्यांतर्गते केतौ त्रिकोणे केंद्रगेपि वा ॥ दुश्चिक्ये लाभगे वापि शुभयुक्ते शुभेक्षिते ॥ ४८ ॥ राजानुग्रहशांतिश्च बहुसौख्यं धनागमम् ॥ किंचित्फलं दशादौ तु भूलाभं पुत्रलाभकृत् ॥ ४९ ॥ राजसंलाभकार्याणि चतुष्पाज्जीवलाभकृत् ॥ योगकारकसंस्थाने बलवीर्यसमन्विते ॥ ५० ॥ पुत्रलाभो यशोवृद्धिर्गृहे लक्ष्मीःकटाक्षकृत् ॥ भृत्यवर्गधनप्राप्तिः सेनापत्यं महत्सुखम् ॥ ५१ ॥ भूपालमित्रं कुरुते यागांबरविभूषणम् ॥ दायेशात्षष्ठरिःफस्थे रन्ध्रे वा पापसंयुते ॥ ५२ ॥ कलहो दंतरोगश्च चौरव्याघ्रादिपीडनम् ॥ ज्वरातीसारकुष्ठादिदारपुत्रादिपीडनम् ॥ ५३ ॥ द्वितियसप्तमस्थाने देहे व्याधिर्भविष्यति ॥ सन्मानं जनसंतापं धनधान्यस्य प्रच्युतिम् ॥ मृत्युंजयं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥ ५४ ॥

अथ शुक्रभुक्तिमासाः १४ दिना० तत्फलम् ।

कुजस्यांतर्गते शुक्रे केंद्रलाभत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे वापि शुभस्थानाधिपेऽथ वा ॥ ५५ ॥ राज्यलाभं महत्सौख्यं गजाश्वांबरभूषणम् ॥ लग्नाधिपेन संबंधे पुत्रदारादिवर्धनम् ॥ ५६ ॥ आयुषो वृद्धिरैश्वर्यं भाग्यवृद्धिसुखं भवेत् ॥ दायेशात्केंद्रलाभस्थे

लाभे वा धनगेऽपि वा ॥ ५७ ॥ तत्काले श्रियमाप्नोति पुत्रलाभं महत्सुखम् ॥ स्वप्रभोश्च महत्सौख्यं श्वेतवस्त्रादिलाभकृत् ॥ ५८ ॥ महाराजप्रसादेन ग्रामभूम्यादिलाभदम् ॥ भुक्त्यंते फलमाप्नोति गीतनृत्यादिलाभकृत् ॥ ५९ ॥ पुण्यतीर्थस्नानलाभं कर्माधिपसमन्विते ॥ पापधर्मदयापुण्यं तडागं कारयिष्यति ॥ ६० ॥ दायेशाद्रंध्ररिष्फस्थे षष्ठे वा पापसंयुते ॥ करोति दुःखबाहुल्यं देहपीडां धनक्षयम् ॥ ६१ ॥ राजचौरादिभीतिश्च गृहे कलहमेव च ॥ दारपुत्रादिपीडा च गोमहिष्यादिनाशकृत् ॥ ६२ ॥ द्वितीयद्यूननाथे तु देहबाधा भविष्यति ॥ श्वेतां गां महिषीं दद्यादायुरारोग्यमादिशेत् ॥ ६३ ॥

अथ रविभुक्तिमासाः ४ दिन ६ तत्फलम् ।

कुजस्यांतर्गते सूर्ये स्वोच्चे स्वक्षेत्रकेंद्रगे ॥ मूलत्रिकोणलाभे वा भाग्यकर्मेशसंयुते ॥ ६४ ॥ तद्भुक्तौ वाहनं कीर्तिः पुत्रलाभं च विंदति ॥ धनधान्यसमृद्धिः स्याद्गृहे कल्याणसंपदः ॥ ६५ ॥ क्षेमारोग्यं महैश्वर्यं राजपूज्यं महत्सुखम् ॥ व्यवसायात्फलाधिक्यं विदेशे राजदर्शनम् ॥ ६६ ॥ दायेशात्षष्ठारिः फे वा व्यये वा पापसंयुते ॥ देहपीडा मनस्तापः कार्यहानिर्महद्भयम् ॥ ६७॥ शिरोरोगं ज्वरादिश्च अतीसारमथापि वा ॥ द्वितीयद्यूननाथे तु सर्प ज्वराविषाद्भयम् ॥ ६८ ॥ सुतपीडाकरं चैव शान्तिं कुर्याद्यथाविधि ॥ देहारोग्यं प्रकुरुते धनधान्यसमृद्धिदम् ॥ ६९ ॥

अथ चंद्रभुक्तिमासाः ७ तत्फलम् ।

कुजस्यांतर्गते चंद्रे स्वोच्चे स्वक्षेत्रकेंद्रगे ॥ भाग्यवाहनकर्मेशलग्नाधिपसमन्विते ॥ ७० ॥ करोति विपुलं राज्यं गंधमाल्यांबरादिकम् ॥ तडागं गोपुरादीनां पुण्यधर्मादिसंग्रहम् ॥ ७१ ॥ विवाहोत्सवकर्माणि दारपुत्रादिसौख्यकृत् ॥ पितृमातृसुखावाप्तिं गृहे लक्ष्मीः

कटाक्षकृत् ॥ ७२ ॥ महाराजप्रसादेन इष्टसिद्धिसुखादिकम् ॥ पूर्णचंद्रे पूर्णफलं क्षीणे स्वल्पफलं भवेत् ॥ ७३ ॥ नीचारिस्थेऽष्टमे षष्ठे दायेशाद्रिपुरंध्रके ॥ मरणं दारपुत्राणां कष्टं भूपतिनाशनम् ॥ ७४ ॥ पशुधान्यक्षयं चैव चौरादिरणभीतिकृत् ॥ द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ॥ ७५ ॥ देहजाड्यं मनोदुःखं दुर्गालक्ष्मीजपं चरेत् ॥ श्वेतां गां महिषीं दद्याद्दानेनारोग्यमादिशेत् ॥ ७६ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखण्डसारांशे भौममहादशांतरफलकथनं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

अथ राहुदशायां राहुभुक्तिमासाः ३२ दिना० १२ तत्फलम् ।

कुलीरे वृश्चिके चैव कन्यायां चापगेऽपि वा ॥ तद्भुक्तौ राजसन्मानं वस्त्रवाहनभूषणम् ॥ १ ॥ व्यवसायात्फलाधिक्यं चतुष्पाज्जीवलाभकृत् ॥ प्रयाणं पश्चिमे भागे वाहनांबरलाभकृत् ॥ २ ॥ लग्नाद्युपचये राहौ शुभदृष्टियुतेक्षिते ॥ मित्रांशे तुंगलाभेशे योगकारकसंयुते ॥ ३ ॥ राज्यलाभं महोत्साहं राजप्रीतिं शुभावहाम् ॥ गृहे कल्याणसंपत्तिर्दारपुत्रादिवर्द्धनम् ॥ ४ ॥ षष्ठाष्टमे व्यये राहौ पापयुक्तेऽथ वीक्षिते ॥ चौरादिव्रणपीडा च सर्वत्र जनपीडनम् ॥ ५ ॥ राजद्वारजनद्वेषइष्टबंधुविनाशनम् ॥ दारपुत्रादिपीडा च सर्वत्र जनपीडनम् ॥ ६ ॥ द्वितीयद्यूननाथे तु सप्तमस्थानमाश्रितः ॥ सदा रोगं महाकष्टं शांतिं कुर्याद्यथाविधि ॥ आरोग्यं संपदश्चैव भविष्यन्ति न संशय ॥ ७ ॥

अथ गुरुभुक्तिमासाः २८ दिना० २४ तत्फलम् ।

राहोरंतर्गते जीवे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे स्वक्षेत्रगे वापि तुंगे स्वांशेंशगेपि वा ॥ ८ ॥ स्थानलाभं मनोधैर्यं शत्रुनाशं महत्सुखम् ॥ राजप्रीतिकरं सौख्यं महतीव समश्नुते ॥ ९ ॥ दिने दिने वृद्धिरपि सितपक्षे शशी यथा ॥ वाहनादिधनं भूरि गृहे गोधनसंकु-

लम् ॥ १० ॥ नैर्ऋत्याः पश्चिमे भागे प्रयाणं राजदर्शनम् ॥ युक्तकार्यार्थसिद्धिः स्यात्स्वदेशे पुनरेष्याति ॥ ११ ॥ उपकारो ब्राह्मणानां तीर्थयात्रादिकर्मणाम् ॥ वाहनं ग्रामलाभं च देवब्राह्मणपूजनम् ॥ १२ ॥ पुत्रोत्सवादिसंतोषं नित्यं मिष्टान्नभोजनम् ॥ नीचे वास्तंगते वापि षष्ठाष्टव्ययराशिगे ॥ १३ ॥ शत्रुक्षेत्रे पापयुक्ते धनहानिर्भविष्यति ॥ कर्मविघ्नो मनोहानिः सा पतिघ्नी भविष्यति ॥ ॥ १४ ॥ कलत्रपुत्रपीडा च हृद्रोगं राजकार्यकृत् ॥ दायेशात्केंद्रकोणे वा लाभे वा धनगेपि वा ॥ १५ ॥ दुश्चिक्ये बलसंपूर्णे गृहक्षेत्रादिवृद्धिकृत् ॥ भोजनांबरपश्वादिदानधर्मजपादिकम् ॥ १६ ॥ भुक्त्यंते राजकोपाच्च द्विमासं देहपीडनम् ॥ ज्येष्ठभ्रातुर्विनाशं च भ्रातृपित्रादिपीडनम् ॥ १७ ॥ दायेशात्षष्ठरंध्रे वा रिःफे वा पापसंयुते ॥ तद्भुक्तौ धनहानिः स्याद्देहपीडा भविष्यति ॥ १८ ॥ द्वितीयद्यूननाथे पा ह्यपमृत्युर्भविष्यति ॥ स्वर्णस्य प्रतिमादानं शिवपूजां च कारयेत् ॥ १९ ॥ देहारोग्यं प्रकुरुते शांतिं कुर्याद्विचक्षणः ॥ २० ॥

अथ शनिभुक्तिमासाः ३४ दिना० ६ तत्फलम् ।

राहोरंतर्गते मंदे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे मूलत्रिकोणे वा दुश्चिक्ये लाभराशिगे ॥ २१ ॥ तद्भुक्तिवाहनं सेवा राजप्रीतिकरं शुभम् ॥ विवाहोत्सवकार्याणि कृत्वा पुण्यानि भूरिशः ॥ २२ ॥ आरामकरणे युक्तं तडागं कारयिष्यति ॥ शूद्रप्रभुवशादिष्टं लाभं गोधनसंग्रहम् ॥ २३ ॥ प्रयाणं पश्चिमे भागे प्रभुमूलाद्धनक्षयः ॥ देहायासं फलाल्पत्वं स्वदेशे पुनरेष्याति ॥ २४ ॥ नीचारिक्षेत्रगे मंदे रंध्रे वा व्ययगेपि वा ॥ नीचारौ राजभीतिश्च दारपुत्रादिपीडनम् ॥ २५ ॥ आत्मबंधुमनस्तापं दायादजनविग्रहम् ॥ व्यवहारे च कलहमकस्माद्भूषणं लभेत् ॥ २६ ॥ दायेशात्षष्ठरिःफे वा

चंद्रे वा पापसंयुते ॥ हृद्रोगं मानहानिं च विवाहे शत्रुपीडनम् ॥
॥ २७ ॥ अन्यदेशादिसारं च गुल्मवद्व्याधिभाग्भवेत् ॥ कुभो-
जनं कोद्रवादि जातिदुःखाद्भयं भवेत् ॥ २८ ॥ द्वितीयद्यूननाथे
तु ह्यपमृत्युर्भविष्याति ॥ कृष्णां गां महिषीं दद्याद्दानेनारोग्यमा-
दिशेत् ॥ २९ ॥

अथ बुधभुक्तिमासाः ३० दिना० १८ तत्फलम् ।

राहोरंतर्गते सौम्ये भाग्ये वा स्वर्क्षगेपि वा ॥ तुंगे वा केंद्ररा-
शिस्थे पुत्रे वा बलगेपि वा ॥ ३० ॥ राजयोगं प्रकुरुते गृहे कल्या-
णवर्धनम् ॥ व्यापारेण धनप्राप्तिर्विद्यावाहनमुत्तमम् ॥ ३१ ॥ विवा-
होत्सवकार्याणि चतुष्पाज्जीवलाभकृत् ॥ सौम्यमासे महत्सौख्यं
स्ववारे राजदर्शनम् ॥ ३२ ॥ सुगंधपुष्पशय्यादिस्त्रीसौख्यं चाति-
शोभनम् ॥ महाराजप्रसादेन धनलाभो महद्यशः ॥ ३३ ॥ दाये-
शात्केंद्रलाभे वा दुश्चिक्ये भाग्यकर्मगे ॥ देहारोग्यं हृदुत्साह इष्ट-
सिद्धिः सुखावहा ॥ ३४ ॥ पुण्यश्लोकादिकीर्तिश्च पुराणश्रवणादि-
कम् ॥ विवाहो यज्ञदीक्षा च दानधर्मदयादिकम् ॥ ३५ ॥ षष्ठाष्टम-
व्यये सौम्ये मंदे राशियुतेक्षिते ॥ दायेशात्षष्ठरिःफे वा रंध्रे वा पाप-
संयुते ॥ ३६ ॥ देवब्राह्मणनिंदा च भोगभाग्यविहीनभाक् ॥ सत्य-
हीनश्च दुर्बुद्धिश्चौराहिनृपपीडनम् ॥ ३७ ॥ अकस्मात्कलहश्चैव
गुरुपुत्रादिनाशनम् ॥ अर्थव्ययो राजकोपो दारपुत्रादिपीडनम् ॥
॥ ३८ ॥ द्वितीयद्यूननाथे वा ह्यपमृत्युं तथाऽश्रियम् ॥ तद्दोषप-
रिहारार्थं विष्णुसाहस्रकं जपेत् ॥ स्वगृह्योक्तविधानेन शांतिं कुर्याद्वि-
चक्षणः ॥ ३९ ॥

अथ केतुभुक्तिमा० १२ दिनानि १८ तत्फलम् ।

राहोरंतर्गते केतौ भ्रमणं राज्यकुद्धनम् ॥ वातज्वरादिरोगश्च

चतुष्पाज्जीवहानिकृत् ॥ ४० ॥ अष्टमाधिपसंयुक्ते देहजाड्यं मनोरुजम् ॥ शुभयुक्ते शुभैर्दृष्टे देहसौख्यं धनागमः ॥ राजसन्मानभूप्राप्तिर्गृहे शुभकरो भवेत् ॥ ४१ ॥ लग्नाधिपेन संबंधे इष्टसिद्धिः सुखावहा ॥ लग्नाधिपसमायुक्ते लाभो वा भवति ध्रुवम् ॥ ४२ ॥ चतुष्पाज्जीवलाभः स्यात्केंद्रे वाथ त्रिकोणगे ॥ रंध्रस्थानगते केतौ व्यये वा बलवर्जिते ॥ ४३ ॥ तद्भुक्तौ बहुरोगः स्याच्चौराहिव्रणपीडनम् ॥ पितृमातृवियोगश्च भ्रातृद्वेषं मनोरुजम् ॥ ४४ ॥ स्वप्रभोश्च महत्कष्टं वैषम्यं चित्तहिंसकम् ॥ द्वितीयद्यूननाथे तु देहबाधा भविष्यति ॥ तद्दोषपरिहारार्थं छागदानं च कारयेत् ॥ ४५ ॥

अथ शुक्रभुक्तिमासाः ३६ तत्फलम् ।

राहोरंतर्गते शुक्रे लग्नात्केंद्रत्रिकोणगे ॥ लाभे वा बलसंयुक्ते योगप्राबल्यमादिशेत् ॥ ४६ ॥ विप्रमूलाद्धनप्राप्तिर्गोमहिष्यादिलाभकृत् ॥ पुत्रोत्सवादिसंतोषं गृहे कल्याणसंभवम् ॥ ४७ ॥ सन्मानं राजसन्मानं राज्यलाभं महत्सुखम् ॥ स्वोच्चे वा स्वर्क्षगे वापि तुंगांशे स्वांशगेऽपि वा ॥ ४८ ॥ नूतनं गृहनिर्माणं नित्यं मिष्टान्नभोजनम् ॥ कलत्रपुत्रविभवं मित्रसंयुक्तभोजनम् ॥ ४९ ॥ अन्नदानप्रियं नित्यं दानधर्मादिसंग्रहम् ॥ महाराजप्रसादेन वाहनांबरभूषणम् ॥ ५० ॥ व्यवसायात्फलाधिक्यं विवाहो मौंजिबंधनम् ॥ षष्ठाष्टमव्यये शुक्रे नीचे शत्रुगृहे स्थिते ॥ ५१ ॥ मंदारफणिसंयुक्ते तद्भुक्तौ रोगमादिशेत् ॥ अकस्मात्कलहं चैव पितृपुत्रवियोगकृत् ॥ ॥ ५२ ॥ स्वबंधुजनहानिश्च सर्वत्र जनपीडनम् ॥ दायादिकलहं चैव स्वप्रभोः स्वस्य मृत्युकृत् ॥ ५३ ॥ कलत्रपुत्रपीडां च शूलरोगादिसंभवम् ॥ दायेशात्केंद्रराशिस्थे त्रिकोणे वा समन्विते ॥ ५४ ॥ लाभे वा धर्मराशिस्थे क्षेत्रपालमहत्सुखम् ॥ सुगंधवस्त्रशय्यादि गानविद्यापरिश्रमम् ॥ ५५ ॥ छत्रचामरवाद्यादिगंधपञ्चसम-

न्वितम् ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ ५६ ॥ विषाहि नृपचौरादिमूत्रकृच्छ्रान्महद्भयम् ॥ प्रमेहाद्रुधिरं रोगं कुत्सितान्नं शिरोरुजम् ॥ ५७ ॥ कारागृहप्रवेशं च राजदंडाद्धनक्षयम् ॥ द्वितीयद्यूननाथे वा दारपुत्रादिनाशनम् ॥ ५८ ॥ आत्मपीडा भयं चैव ह्यपमृत्युस्तथा भवेत् ॥ दुर्गालक्ष्मीजपं कुर्यान्मृत्युनाशकरों भवेत् ॥ ५९ ॥

अथ रविभुक्तमासाः १० दिनानि २४ तत्फलम् ।

राहोरंतर्गते सूर्ये स्वोच्चे स्वक्षेत्रकेंद्रगे ॥ त्रिकोणे लाभगे वाऽपि तुंगांशे स्वांशगेपि वा ॥ ६० ॥ शुभग्रहेण संदृष्टे राजप्रीतिकरं शुभम् ॥ धनधान्यसमृद्धिश्च ह्यल्पसौख्यं सुखावहम् ॥ ६१ ॥ अल्पग्रामाधिपत्यं च स्वल्पलाभो भविष्यति ॥ भाग्यलग्नेशसंयुक्ते कर्मेशेन निरीक्षिते ॥ ६२ ॥ राजाश्रयो महाकीर्तिर्विदेशगमनं महत् ॥ देशाधिपत्ययोगं च गजाश्वांबरभूषणम् ॥ ६३ ॥ मनोभीष्टप्रदानं च पुत्रकल्याणसंभवम् ॥ दायेशाद्रिःफरंध्रस्थे षष्ठे वा नीचगेऽपि वा ॥ ६४ ॥ ॥ ज्वरातिसागररोगं च कलहं राजविद्विषम् ॥ प्रयाणं शत्रुवृद्धिंच नृपचौराग्निपीडनम् ॥ ६५ ॥ दायेशात्केंद्रकोणे वा दुश्चिक्ये लाभगेपि वा ॥ विदेशे राजसन्मानं कल्याणं च शुभावहम् ॥ ६६ ॥ द्वितीयद्यूननाथे तु महारोगो भविष्यति ॥ सूर्यप्रमाणशांतिं च कुर्यादारोग्यसंभवाम् ॥ ६७ ॥

अथ चंद्रभुक्तिमासाः १८ तत्फलम् ।

राहोरंतर्गते चंद्रे स्वक्षेत्रे स्वोच्चगेऽपि वा ॥ केंद्रत्रिकोणलाभे वा मित्रर्क्षे क्रूरसंयुते ॥ ६८ ॥ राजत्वं राजपूज्यत्वं धनार्थं धनलाभकृत् ॥ आरोग्यभूषणं चैव मित्रस्त्रीपुत्रसंपदः ॥ ६९ ॥ पूर्णचंद्रे पूर्णफलं राजप्रीत्या शुभावहम् ॥ अश्ववाहनलाभः स्याद्गृहक्षेत्रादि

वृद्धिकृत् ॥ ७० ॥ दायेशात्सुखभाग्यस्थे केंद्रे वा लाभगेऽपि वा ॥ लक्ष्मीकटाक्षाचिह्नानि गृहे कल्याणसंभवम् ॥ ७१ ॥ यद्यत्कार्यार्थसिद्धिः स्याद्धनधान्यसुखावहम् ॥ सत्कीर्तिलाभसन्मानं देव्याराधनमाचरेत् ॥ ७२ ॥ दायेशात्षष्ठरंध्रस्थे व्यये वा बलसंयुते ॥ पिशाचक्षुद्रव्याघ्रादिगृहक्षेत्रार्थनाशनम् ॥ ७३ ॥ मार्गे चौरभयं चैव व्रणाधिक्यं महोदरम् ॥ द्वितीयद्यूननाथे तु अपमृत्युस्तदा भवेत् ॥ ७४ ॥ श्वेतां गां महिषीं दद्याद्दानमारोग्यमाहरेत् ॥ ७५ ॥

अथ कुजभुक्तिमासाः १२ दिना० १८ तत्फलम् ।

राहोरंतर्गते भौमे लग्नाल्लाभत्रिकोणगे ॥ केंद्रे वा शुभसंयुक्ते स्वोच्चे स्वक्षेत्रगेपि वा ॥ ७६ ॥ नष्टराज्यधनप्राप्तिर्गृहक्षेत्राभिवृद्धिकृत् ॥ इष्टदेवप्रसादेन संतानसुखभोजनम् ॥ ७७ ॥ क्षिप्रभोज्यान्महत्सौख्यं भूषणाश्वांबरादिकृत् ॥ दायेशात्केंद्रकोणे वा दुश्चिक्ये लाभगेऽपि वा ॥ ७८ ॥ रक्तवस्त्रादिलाभः स्यात्प्रयाणं राजदर्शनम् ॥ पुत्रवर्गेषु कल्याणं स्वप्रभोश्च महत्सुखम् ॥ ७९ ॥ सेनापत्यं महोत्साहं भ्रातृवर्गधनागमम् ॥ दायेशाद्रंध्ररिःफे वा षष्ठे पापसमन्विते ॥ ८० ॥ पुत्रदारादिहानिश्च सोदराणां च पीडनम् ॥ स्थानभ्रंशं बंधुवर्गदारपुत्रविरोधनम् ॥ ८१ ॥ चौराहिव्रणभीतिश्च सोदराणां च पीडनम् ॥ आदौ क्लेशकरं चैव मध्यांते सौख्यमाप्नुयात् ॥ ८२ ॥ द्वितीयद्यूननाथे तु देहालस्यं महद्भयम् ॥ अनड्वाहं च गां दद्यादारोग्यं च भविष्यति ॥ ८३ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे विंशोत्तर्यां राहोरंतर्दशाफलकथनं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥

अथ गुरुदशायां गुरुभुक्तिमासाः २५ दिना० १८ फलम् ।

स्वोच्चे स्वक्षेत्रगे जीवे लग्नात्केंद्रत्रिकोणगे ॥ अनेकराजाधीशश्च संपन्नो राजपूजितः ॥ १ ॥ गोमहिष्यादिलाभश्च वस्त्रवाहनभूषणम् ॥ नूतनस्थाननिर्माणं हर्म्यप्राकारसंयुतम् ॥ २ ॥ गजांतैश्वर्यसंपत्तिभाग्यकर्माणि संयुते ॥ ब्राह्मणप्रभुसन्मानं समानप्रभुदर्शनम् ॥ ३ ॥ स्वप्रभोः स्वफलाधिक्यं दारपुत्रादिलाभकृत् ॥ नीचांशे नीचराशिस्थे षष्ठाष्टव्ययराशिगे ॥ ४ ॥ नीचसंगं महादुःखं दायाद्जनविड्वरम् ॥ कलहं न विचारोस्य स्वप्रभुस्वपमृत्युकृत् ॥ ५ ॥ पुत्रदारवियोगं च धनधान्यार्थहानिकृत् ॥ सप्तमाधिपदोषेण देहबाधा भविष्यति ॥ ६ ॥ तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत् ॥ रुद्रजाप्यं च गोदानं कुर्यादिष्टं समाप्नुयात् ॥ ७ ॥

अथ शनिभुक्तिमासाः ३० दिना० १२ तत्फलम् ।

जीवस्यांतर्गते मंदे स्वोच्चे स्वक्षेत्रमित्रगे ॥ लग्नात्केंद्रत्रिकोणस्थे लाभे वा बलसंयुते ॥ ८ ॥ राज्यलाभं महत्सौख्यं वस्त्राभरणसंयुतम् ॥ धनधान्यादिलाभं च स्त्रीलाभं बहुसौख्यकृत् ॥ ९ ॥ वाहनांबरपश्वादिभूलाभं स्थानलाभगम् ॥ पुत्रमित्रादिसौख्यं च नरवाहनयोगकृत् ॥ १० ॥ नीलवस्त्रादिलाभश्च नीलाश्वं लभते च सः ॥ पश्चिमां दिशमाश्रित्य प्रयाणं राजदर्शनम् ॥ ११ ॥ अनेकयानलाभं च निर्दिश्य मंदभुक्तिषु ॥ लग्नात्षष्ठाष्टमे मंदे व्यये नीचेस्तगेऽव्यरौ ॥ १२ ॥ धनधान्यादिनाशश्च ज्वरपीडा मनोरुजम् ॥ स्त्रीपुत्रादिषु पीडा वा व्रणात्यादिकमुद्भवेत् ॥ १३ ॥ गृहे त्वशुभकार्याणि भृत्यवर्गादिपीडनम् ॥ गोमहिष्यादिहानिश्च बंधुद्वेषो भविष्यति ॥ १४ ॥ दायेशात्केन्द्रकोणस्थे लाभे वा धनगेऽपि वा ॥ भूलाभश्चार्थलाभश्च पुत्रलाभसुखं भवेत् ॥ १५ ॥ गोमहिष्यादिलाभश्च

शूद्रमूलाद्धनप्रदम् ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ १६ ॥ धनधान्यादिनाशं च बंधुमित्रविरोधकृत् ॥ उद्योगभंगो देहार्तिः स्वजनानां महद्भयम् ॥ १७ ॥ द्विसप्तमाधिपे मंदे ह्यपमृत्युर्भविष्यति ॥ तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ॥ १८ ॥ कृष्णां गां महिषीं दद्याद्दानेनारोग्यमादिशेत् ॥ १९ ॥

अथ बुधभुक्तिमासाः २ दिना० ६ तत्फलम् ।

जीवस्यांतर्गते सौम्ये केंद्रलाभत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे वापि दशाधिपसमन्विते ॥ २० ॥ अर्थलाभं देहसौख्यं राज्यलाभं महत्सुखम् ॥ महाराजप्रसादेन इष्टसिद्धिः सुखावहा ॥ २१ ॥ वाहनांबरपश्वादिगोधनैस्संकुलं गृहम् ॥ महीसुतेन संदृष्टे शत्रुवृद्धिः सुखक्षयम् ॥ २२ ॥ व्यवसायात्फलं नेष्टं ज्वरातीसारपीडनम् ॥ दायेशाद्भाग्यकोणे वा केंद्रे वा तुंगनायके ॥ २३ ॥ स्वदेशे धनलाभश्च पितृमातृसुखावहम् ॥ गजवाजिसमायुक्तो राजमित्रप्रसादकः ॥ २४ ॥ दायेशात्षष्ठरंध्रस्थे व्यये वा पापसंयुते ॥ शुभदृष्टिविहीनश्चेद्धनधान्यपरिच्युतिः ॥ २५ ॥ विदेशगमनं चैव मार्गे चोरभयं तथा ॥ व्रणदाहाक्षिरोगश्च नानादेशपरिच्युतम् ॥ २६ ॥ लग्नात्षष्ठाष्टरिःफे वा व्यये वा पापसंयुते ॥ अकस्मात्कलहश्चैव गृहे निष्ठुरभाषणम् ॥ २७ ॥ चतुष्पाज्जीवहानिश्च व्यवहारस्तथैव च ॥ अपमृत्युभयं चैव शत्रूणां कलहो भवेत् ॥ २८ ॥ शुभदृष्टौ शुभैर्युक्ते दारसौख्यं धनागमम् ॥ आदौ शुभं देहसौख्यं वाहनाम्बरलाभगम् ॥ २९ ॥ अंते तु धनहानिश्चेत्स्वात्मसौख्यं च जायते ॥ द्वितीयद्यूननाथे वा ह्यपमृत्युर्भविष्यति ॥ ३० ॥ तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ॥ बुधप्रीतिकरं चैव दानं शांतिं च कारयेत् ॥ आयुर्वृद्धिकरं चैव सर्वसौभाग्यसंपदम् ॥ ३१ ॥

केतुभुक्तिमासाः ११ दिना० ६ तत्फलम् ।

जीवस्यांतर्गते केतौ शुभग्रहसमन्विते ॥ अन्यसौख्यधनावाप्तिः कुत्सिनान्नस्य भोजनम् ॥ ३२ ॥ परान्नं चैव श्राद्धान्नं पापमूलाद्धनानि च ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ ३३ ॥ राजकोपं धनच्छेदं बंधनं रोगपीडनम् ॥ बलहानिः पितृद्वेषो भ्रातृद्वेषा मनोरुजः ॥ ३४ ॥ दायेशात्सुतभाग्यस्थे वाहने कर्मगेऽपि वा ॥ नरवाहनयोगश्च गजाश्वांबरसंकुलम् ॥ ३५ ॥ महाराजप्रसादेन इष्टकार्यार्थलाभकृत् ॥ व्यवसायात्फलाधिक्यं गोमहिष्यादिलाभकृत ॥ ३६ ॥ यवनप्रभुमूलाद्वा पितृवस्त्रादिलाभकृत् ॥ द्वितीयद्यूननाथे तु देहबाधा भविष्यति ॥ ३७ ॥ छागदानं प्रकुर्वीत मृत्युंजयजपं चरेत् ॥ सर्वदोषोपशमनीं शांतिं कुर्याद्विधानतः ॥ ३८ ॥

अथ शुक्रभुक्तिमासाः ३० दिनानि० तत्फलम् ।

जीवस्यांतर्गते शुक्रे भाग्यकेन्द्रेशसंयुते ॥ लाभे वा सुतराशिस्थे स्वक्षेत्रे शुभसंयुते ॥ ३९ ॥ नरवाहनयोगश्च गजाश्वांबरसंयुते ॥ महाराजप्रसादेन देशाधिक्यं महत्सुखम् ॥ नीलांबराणि शस्त्राणि लाभश्चैव भविष्याति ॥ ४० ॥ पूर्वस्यां दिशि आश्रित्य प्रयाणं धनलाभगम् ॥ कल्याणं च महाप्रीतिः पितृमातृसुखावहा ॥ ४१ ॥ देवतागुरुभक्तिश्च अन्नदानं महत्तथा ॥ तडागगोपुरादीनि कृत्वा पुण्यानि भूरिशः ॥ ४२ ॥ षष्ठाष्टमव्यये नीचे दायेशाद्वा तथैव च ॥ कलहो बंधुवैषम्यं दारपुत्रादिपीडनम् ॥ ४३ ॥ मंदारराहुसंयुक्ते कलहो राजविड्वरम् ॥ स्त्रीमूलात्कलहं चैव श्वशुरात्कलहं तथा ॥ ॥ ४४ ॥ सोदरेण विवादः स्याद्धनधान्यपरिच्युतिः ॥ दायेशात्केंद्रराशिस्थे धने वा भाग्यगेऽपि वा ॥ ४५ ॥ धनधान्यादिलाभश्च स्त्रीलाभं राजदर्शनम् ॥ ४६ ॥ वाहनं पुत्रलाभं च पशुवृद्धिमहत्सु-

खम् ॥ गीतवाद्यप्रसंगादिविद्वज्जनसमागमम् ॥ ४७ ॥ दिव्यान्नं भोजनं सौख्यं स्वबंधुजनपोषकम् ॥ द्विसप्तमाधिपे शुक्रे तद्दशायां युतेक्षिते ॥ ४८ ॥ अपमृत्युभयं तस्य स्त्रीमूलादौषधादिभिः ॥ तस्य रोगस्य शांत्यर्थं शांतिकर्म समाचरेत् ॥ ४९ ॥ श्वेतां गां महिषीं दद्यादायुरारोग्यवृद्धिकृत् ॥ ५० ॥

अथ रविभुक्तिमासाः ९ दिना० १८ तत्फलम् ।

जीवस्यांतर्गते सूर्ये स्वोच्चे स्वक्षेत्रगेपि वा ॥ केन्द्रेवाथ त्रिकोणे च दुश्चिक्ये लाभगेपि वा ॥ ५१ ॥ भाग्ये वा बलसंयुक्ते दायेशाद्वा तथैव च ॥ तत्काले धनलाभः स्याद्राजसन्मानवैभवम् ॥ ५२ ॥ वाहनांबरपश्वादिभूषणं पुत्रसंभवम् ॥ मित्रप्रभुवशादिष्टं सर्वकार्यं शुभावहम् ॥ ५३ ॥ षष्ठाष्टमव्यये सूर्ये दायेशाद्वा तथैव च ॥ शिरोरोगादिपीडा च ज्वरपीडा तथैव च ॥ ५४ ॥ सत्कर्माणि विहीनत्वं पापकर्म तथैव च ॥ सर्वत्रजनविद्वेषो ह्यात्मबंधुवियोगकृत् ॥ ५५ ॥ अकस्मात्कलहं चैव जीवस्यांतर्गते रवौ ॥ द्वितीयद्यूननाथे तु देहपीडा भविष्यति ॥ ५६ ॥ तद्दोषपरिहारार्थमादित्यहृदयं जपेत् ॥ सर्वपीडोपशमनं सूर्यप्रीतिं च कारयेत् ॥ ५७ ॥

अथ चंद्रभुक्तिमासाः १६ दिनानि० तत्फलम् ।

जीवस्यांतर्गते चंद्रे केंद्रे लाभत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षराशिस्थे पूर्णचंद्रबलैर्युते ॥ ५८ ॥ दायेशाच्छुभराशिस्थे राजसन्मानवैभवम् ॥ दारपुत्रादिसौख्यं च क्षीराणां भोजनं तथा ॥ ५९ ॥ सत्कर्म च तथा कीर्तिः पुत्रपौत्रादिवृद्धिदम् ॥ महाराजप्रसादेन सर्वसौख्यं धनागमम् ॥ ६० ॥ अनेकजनसौख्यं च दानधर्मादिसंग्रहः ॥ षष्ठाष्टमव्यये चंद्रे त्रिकोणे पापसंयुते ॥ ६१ ॥ दायेशात्षष्ठरंध्रे वा व्यये वा बलवर्जिते ॥ मानार्थबंधुहानिश्च विदे-

शपरिविच्युतिः ॥ ६२ ॥ नृपचौरादिपीडा च दायादिजनविड्वरम् ॥ मातुलादिवियोगश्च मातृपीडा तथैव च ॥ ६३ ॥ द्वितीयषष्ठयोरीशे देहपीडा भविष्यति ॥ तद्दोषपरिहारार्थं दुर्गापाठं च कारयेत् ॥ ६४ ॥

अथ कुजभुक्तिमासाः ११ दिनानि ६ तत्फलम् ।

जीवस्यांतर्गते भौमे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे वापि तुंगांशे स्वांशगेपिऽवा ॥ ६५ ॥ विद्याविवाहकार्याणि ग्रामभूम्यादिलाभकृत् ॥ जनसामर्थ्यमाप्नोति सर्वकार्यार्थसिद्धिदम् ॥ ॥ ६६ ॥ दायेशात्केन्द्रलाभस्थे लाभे वा धनगेपि वा ॥ शुभयुक्ते शुभैर्दृष्टे धनधान्यादिसंपदम् ॥ ६७ ॥ मिष्टान्नदानविभवं राजप्रीतिकरं शुभम् ॥ स्त्रीसौख्यं च सुतावाप्तिः पुण्यतीर्थफलप्रदम् ॥६८॥ दायेशात्षष्ठरंध्रे वा व्यये वा नीचगेपि वा ॥ पापयुक्तेक्षिते वापि धान्यार्थगृहनाशनम् ॥ ६९ ॥ नानारोगभयं दुःखं नेत्ररोगादिसंभवम् ॥ पूर्वार्द्धे क्लेशमधिकमपरार्द्धे महत्सुखम् ॥ ७० ॥ द्वितीयद्यूननाथे तु देहजाड्यं मनोरुजम् ॥ अनड्वाहं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥ ७१ ॥

अथ राहुभुक्तिमासाः २८ दिनानि २४ तत्फलम् ।

जीवस्यांतर्गते राहौ स्वोच्चे वा केंद्रगेऽपि वा ॥ मूलत्रिकोणभाग्ये च केंद्राधिपसमन्विते ॥ ७२ ॥ शुभयुक्तेक्षिते वापि योगप्रीतिं समादिशेत् ॥ भुक्त्यादौ शरमासांश्च धनधान्यपरिश्रमम् ॥ ७३ ॥ देशग्रामाधिकारं च यवनप्रभुदर्शनम् ॥ गृहे कल्याणसंपत्तिर्बहुसेनाधिपत्यताम् ॥ ७४ ॥ दूरयात्राधिगमनं पुण्यधर्मादिसंग्रहः ॥ सेतुस्नानफलावाप्तिरिष्टासिद्धिसुखावहम् ॥ ७५ ॥ दायेशात्षष्ठरंध्रे वा व्यये वा पापसंयुते ॥ चौराहिव्रणभीतिश्च राजवैषम्यमेव च ॥७६ ॥ गृहे कर्म-

कलापेन व्याकुलो भवति ध्रुवम् ॥ सोदरेण विरोधः स्याद्दायादिजनविद्रवम् ॥ ७७ ॥ गृहे त्वशुभकार्याणि दुःस्वप्नादिभयं ध्रुवम् ॥ अकस्मात्कलहश्चैव क्षुद्रशून्यादिरोगकृत् ॥ ७८ ॥ द्विसप्तमस्थिते राहौ देहबाधां विनिर्दिशेत् ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ ७९॥ छागदानं प्रकुर्वीत सर्वसौख्यादिमादिशेत् ॥ ८० ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे विंशोत्तर्यांगुरोरंतर्दशाफलकथनं नामैकचत्वारिंशोध्यायः ॥ ४१ ॥

अथ शनिदशायां शनिभुक्तिमासाः ३६ दिनानि ३ तत्फलम् ।

मूलत्रिकोणस्वर्क्षे वा तुलायामुच्चगेऽपि वा ॥ केंद्रत्रिकोणलाभे वा राजयोगादिसंयुते ॥ १ ॥ राज्यलाभं महत्सौख्यं दारपुत्रादिवर्द्धनम् वाहनत्रयसंयुक्तं गजाश्वांबरसंकुलम् ॥ २ ॥ महाराजप्रसादेन अश्वदोत्यादिलाभकृत् ॥ चतुष्पाज्जीवलाभः स्याद्ग्रामभूम्यादिलाभकृत् ॥ ३ ॥ षष्ठाष्टमव्यये मंदे नीचे वा पापसंयुते ॥ तद्भुक्त्यादौ राजप्रीतिर्विषशस्त्रादिपीडनम् ॥ ४ ॥ रक्तस्रावं गुल्मरोगमतिसारादिपीडनम् ॥ मध्ये चौरादिभीतिश्च देशत्यागं मनोरुजम् ॥ ५ ॥ अंते शुभकरं चैव ग्रामभूम्यादिलाभकृत् ॥ द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ॥ ६ ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ ७ ॥

अथ बुधभुक्तिमासाः ३२ दिनानि ९ तत्फलम् ।

मंदस्यांतर्गते सौम्ये त्रिकोणे केंद्रगेपि वा ॥ सन्मानं च यशःकीर्तिर्विद्यालाभं धनागमम् ॥ ८ ॥ स्वदेशे सुखमाप्नोति वाहनादिफलैर्युते ॥ यज्ञादिकर्मसिद्धिश्च राजयोगादिसंभवम् ॥ ९ ॥ देहसौख्यं हृदुत्साहं गृहे कल्याणसंभवम् ॥ सेतुस्नानफलावाप्तिस्ती-

र्थयात्रादिकर्मणा ॥ १० ॥ वाणिज्याद्धनलाभश्च पुराणश्रवणादिकम् ॥ अन्नदानफलं चैव नित्यं मिष्टान्नभोजनम् ॥ ११ ॥ षष्ठाष्टमव्यये सौम्ये नीचे वास्तंगते सति ॥ रव्यारफणिसंयुक्ते दायेशाद्वा तथैव च ॥ १२ ॥ नृपाभिषेकमर्थाप्तिर्देशग्रामाधिपत्यता ॥ फलमीदृशमादौ तु मध्यांते रोगपीडनम् ॥ १३ ॥ नष्टानि सर्वकार्याणि व्याकुलत्वं महद्भयम् ॥ द्वितीयसप्तमाधीशे देहबाधा भविष्यति ॥ १४ ॥ तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ॥ अन्नदानं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥ १५ ॥

अथ केतुभुक्तिमासाः १३ दिनानि ९ तत्फलम् ।

मंदस्यांतर्गते केतौ शुभदृष्टियुतेक्षिते ॥ स्वोच्चे वा शुभराशिस्थे योगकारकसंयुते ॥ १६ ॥ मंदस्यांतर्गते केतौ स्थानभ्रंशं महद्भयम् ॥ दरिद्रबंधनं भीतिः पुत्रदारादिनाशनम् ॥ १७ ॥ स्वप्रभोश्च महाक्लेशं विदेशगमनं तथा ॥ लग्नाधिपेन संयुक्ते आदौ सौख्यं धनागमम् ॥ १८ ॥ गंगादिसर्वतीर्थेषु स्थानदैवतदर्शनम् ॥ दायेशात्केंद्रकोणे वा षष्ठाष्टव्ययराशिगे ॥ १९ ॥ समर्थो धर्मबुद्धिश्च सौख्यं नृपसमागमम् ॥ षष्ठाष्टमव्यये केतौ दायेशाद्वा तथैव च ॥ २० ॥ अपमृत्युभयं चैव कुत्सितान्नस्य भोजनम् ॥ शीतज्वरातिसारश्च व्रणचौरादिपीडनम् ॥ २१ ॥ दारपुत्रवियोगश्च संसारे भवति ध्रुवम् ॥ द्वितियद्यूनराशिस्थे देहपीडा भविष्यति ॥ २२ ॥ छागदानं प्रकुर्वीत ह्यपमृत्युभयं हरेत् ॥ २३ ॥

अथ शुक्रभुक्तिमासाः ३८ ~~३६~~ दिनानि ० तत्फलम् ।

मन्दस्यांतर्गते शुक्रे स्वोच्चे स्वक्षेत्रगेपि वा ॥ केंद्र वा शुभसंयुक्ते त्रिकोणे लाभगेपि वा ॥ २४ ॥ दारपुत्रधनप्राप्तिर्देहारोग्यं महोत्सवः ॥ गृहे कल्याणसंपत्ती राज्यलाभं महत्सुखं ॥ २५ ॥ महा-

राजप्रसादेन ह्यीष्टसिद्धिः सुखावहा ॥ सन्मानः प्रभुसन्मानः प्रियवस्त्रादिलाभकृत् ॥ २६ ॥ द्वीपांतराद्वस्त्रलाभः श्वेताश्वो महिषी तथा ॥ गुरुचारवशाद्भाग्यं सौख्यं च धनसंपदः ॥ २७ ॥ शनिचारान्मनुष्योसौ योगमाप्नोत्यसंशयम् ॥ शत्रुनीचास्तगे शुक्रे षष्ठाष्टव्ययराशिगे ॥ २८ ॥ दारनाशं मनःक्लेशं स्थाननाशं मनोरुजम् ॥ दाराणां स्वजनक्लेशः संतापो जनविड्वरम् ॥ २९ ॥ दायेशाद्भाग्यगेनैव केंद्रे वा लाभसंयुते ॥ राजप्रीतिकरं चैव मनोभीष्टप्रदायकम् ॥ ३० ॥ दानधर्मदयायुक्तस्तीर्थयात्रादिकं फलम् ॥ शास्त्रार्थकाव्यरचनां वेदांतश्रवणादिकम् ॥ ३१ ॥ दारपुत्रादिसौख्यं च वाहनच्छत्रलाभकम् ॥ दायेशाद्व्ययगे शुक्रे षष्ठे वा ह्यष्टमेपि ॥ ३२ ॥ नेत्रपीडा ज्वरभयं स्वकुलाचारवर्जितः ॥ कपोले दंतशूलादि हृदि गुह्ये च पीडनम् ॥ ३३ ॥ जलभीतिर्मनस्तापो वृक्षात्पतनसंभवः ॥ राजद्वारे जनद्वेषः सोदरेण विरोधनम् ॥ ३४ ॥ द्वितीयसप्तमाधीशे आत्मक्लेशो भविष्यति ॥ तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ॥ ३५ ॥ श्वेतां गां महिषीं दद्यादायुरारोग्यवृद्धिदाम् ॥ ३६ ॥

अथ रविभुक्तिमासाः ११ दिनानि १२ तत्फलम् ।

मंदस्यांतर्गते सूर्ये स्वोच्चे स्वक्षेत्रगेपि वा ॥ भाग्याधिपेन संयुक्ते केंद्रलाभत्रिकोणगे ॥ ३७ ॥ शुभदृष्टियुते वापि स्वप्रभोश्च महत्सुखम् ॥ गृहे कल्याणसंपत्तिः पुत्रादिसुखवर्द्धनम् ॥ ३८ ॥ वाहनांबरपश्वादिगोक्षीरैस्संकुलं गृहम् ॥ षष्ठाष्टमव्यये मंदे दायेशाद्वा तथैव च ॥ ३९ ॥ हृद्रोगो मानहानिश्च स्थानभ्रंशो मनोरुजा ॥ इष्टबंधुवियोगश्च उद्योगस्य विनाशनम् ॥ ४० ॥ तापज्वरादिपीडा च व्याकुलत्वं भयं तथा ॥ आत्मसंबंधमरणमिष्टबंधुवियोगकृत् ॥ ॥ ४१ ॥ द्वितीयद्यूननाथे तु देहबाधा भविष्यति ॥ तद्दोषपरिहारार्थं सूर्यपूजां च कारयेत् ॥ ४२ ॥

अथ चंद्रभुक्तिमासाः १९ दिनानि ० तत्फलम् ।

मंदस्यांतर्गते चंद्रे जीवदृष्टिसमन्विते ॥ स्वोच्चे स्वक्षेत्रकेंद्रस्थे
त्रिकोणे लाभगेपि वा ॥ ४३ ॥ पूर्णचंद्रे सौम्ययुक्ते राजप्रीतिस-
मागमम् ॥ महाराजप्रसादेन वाहनांबरभूषणम् ॥ ४४ ॥ सौभा-
ग्यं सुखवृद्धिं च भृत्योश्च परिपालनम् ॥ पितृमातृकुले सौख्यं
पशुवृद्धिः सुखावहा ॥ ४५ ॥ क्षीणे वा पापसंयुक्ते पापदृष्टौ
विनीचगे ॥ क्रूरांशकगते वापि क्रूरक्षेत्रगतोपि वा ॥ ४६ ॥ जातक-
स्य महत्कष्टं राजकोपो धनक्षयः ॥ पितृमातृवियोगश्च पुत्रीपु-
त्रादिरोगकृत् ॥ ४७ ॥ व्यवसायात्फलं नेष्टं नानामार्गे धनव्ययम् ॥
अकाले भोजनं चैवमौषधस्य च भक्षणम् ॥ ४८ ॥ फला-
भिदृष्टचमादौ तु आदौ सौख्यं धनागमम् ॥ दायेशात्केंद्रा-
शिस्थे त्रिकोणे लाभगेपि वा ॥ ४९ ॥ वाहनांबरपश्वादिभ्रातृवृ-
द्धिः सुखावहा ॥ पितृमातृसुखावाप्तिः स्त्रीसौख्यं च धनागमम्
॥ ५० ॥ मित्रप्रभुवशादिष्टं सर्वसौख्यं शुभावहम् ॥ दायेशात्षष्ठारि-
ष्फे वा रंध्रे वा बलवर्जिते ॥ ५१ ॥ शयनं रोगमालस्यं स्थानभ्रष्टं
सुखावहम् ॥ शत्रुवृद्धिविरोधं च इष्टबंधुवियोगकृत् ॥ ५२ ॥ द्विती-
यद्यूननाथे तु देहालस्यो भविष्यति ॥ तद्दोषशमनार्थं च तिलहोमा-
दिकं चरेत् ॥ ५३ ॥ गुडं घृतं च दध्याक्तं तंडुलं च यथाविधि ॥
श्वेतां गां महिषीं दद्यादायुरारोग्यवृद्धिकृत् ॥ ५४ ॥

अथ कुजभुक्तिमासाः १३ दिनानि ९ तत्फलम् ।

मंदस्यांतर्गते भौमे केंद्रलाभत्रिकोणगे ॥ तुंगे स्वक्षेत्रगे वापि
शाधिपसमन्विते ॥ ५५ ॥ लग्नाधिपेन संयुक्ते आदौ सौख्यं ध-
म् ॥ राजप्रीतिकरं सौख्यं वाहनांबरभूषणम् ॥ ५६ ॥ सेना
नृपप्रीतिः कृषिगोधान्यसंपदः ॥ नूतनस्थाननिर्माणं भ्रातृ-

वर्गेष्टसौख्यकृत् ॥ ५७ ॥ नीचे चास्तगते भौमे षष्ठाष्टव्ययराशिगे ॥ पापदृष्टियुते वापि धनहानिर्भविष्यति ॥ ५८ ॥ चौराहिव्रणशस्त्रादिग्रंथिरोगादिपीडनम् ॥ भ्रातृपित्रादिपीडा च दायादजनविड्वरम् ॥ ५९ ॥ चतुष्पाज्जीवहानिश्च कुत्सितान्नस्य भोजनम् ॥ विदेशगमनं चैव नानामार्गे धनव्ययः ॥ ६० ॥ अष्टमद्यूननाथे तु द्वितीयस्थेऽथ वा यदि ॥ अपमृत्युभयं चैव नानाकष्टपराभवम् ॥ ६१ ॥ तद्दोषपरिहारार्थं शांतिहोमं च कारयेत् ॥ अनड्वाहं प्रकुर्वीत सर्वारिष्टनिवारणम् ॥ ६२ ॥

अथ राहुभुक्तिमासाः ३४ दिनानि ६ तत्फलम् ।

मंदस्यांतर्गते राहौ कलहश्च मनोव्यथा ॥ देहपीडा मनस्तापः पुत्रद्वेषो मनोरुजः ॥ ६३ ॥ अर्थव्ययं राजभयं स्वजनादिह्युपद्रवम् ॥ विदेशगमनं चैव गृहक्षेत्रादिनाशनम् ॥ ६४ ॥ लग्नाधिपेन संयुक्ते योगकारकसंयुते ॥ स्वोच्चे स्वक्षेत्रगे केंद्रे दायेशाल्लाभराशिगे ॥ ६५ ॥ आदौ सौख्यं धनावाप्तिं गृहक्षेत्रादिसंपदम् ॥ देवब्राह्मणभक्तिं च तीर्थयात्रादिकं लभेत् ॥ ६६ ॥ चतुष्पाज्जीवलाभः स्याद्गृहे कल्याणवर्द्धनम् ॥ मध्ये तु राजभीतिश्च पुत्रमित्रविरोधनम् ॥ ६७ ॥ मेषादिकन्यकां चैव कुलीरे वृषभे तथा ॥ मीन कोदंडसिंहेषु गजांतैश्वर्यमादिशेत् ॥ ६८ ॥ राजसन्मानभूषाप्ति मृदुलांबरसौख्यकृत् ॥ द्विसप्तमाधिपैर्युक्ते देहबाधा भविष्यति ॥ ६९ ॥ मृत्युंजयं प्रकुर्वीत च्छागदानं च कारयेत् ॥ अनड्वाहं प्रकुर्वीत सर्वसंपत्सुखावहम् ॥ ७० ॥

अथ गुरुभुक्तिमासाः ३० दिनानि १४ तत्फलम् ।

मंदस्यांतर्गते जीवे केंद्रे लाभत्रिकोणगे ॥ ७१ ॥ लग्नाधिपेन संयुक्ते स्वोच्चे स्वक्षेत्रगेपि वा ॥ सर्वकार्यार्थसिद्धिः स्याच्छोभनं

भवति ध्रुवम् ॥ ७२ ॥ महाराजप्रसादेन धनवाहनभूषणम् ॥ स-
न्मानं प्रभुसन्मानं प्रियवस्त्रार्थलाभकृत् ॥ ७३ ॥ देवतागुरुभक्तिश्च
विद्वज्जनसमागमः ॥ दारपुत्रादिलाभश्च पुत्रकल्याणवैभवम् ॥
॥ ७४ ॥ षष्ठाष्टमव्यये जीवे नीचे वा पापसंयुते ॥ देहसंबंधमरणं
धनधान्यविनाशनम् ॥ ७५ ॥ राजस्थानं धनद्वेषं कार्यहानिर्भवि-
ष्यति ॥ विदेशगमनं चैव कुष्ठरोगादिसंभवः ॥ ७६ ॥ दायेशात्कें-
द्रकोणे वा धने वा लाभगेपि वा ॥ विभवं दारसौभाग्यं राजश्री-
धनसंपदः ॥ ७७ ॥ भोजनांबरसौख्यं च दानधर्मादिकं भवेत् ॥
ब्रह्मप्रतिष्ठासिद्धिश्च क्रतुकर्मफलप्रदम् ॥७८॥ अन्नदानं महाकीर्तिर्वेदां-
तश्रवणादिकम् ॥ दायेशात्षष्ठरंध्रे वा व्यये वा बलवर्जिते ॥ ७९ ॥
बंधुद्वेषं मनोदुःखं ब्राह्मणं पदविच्युतम् ॥ कुभोजनं कर्महानी राज-
दंडाद्धनव्ययम् ॥ ८० ॥ कारागृहप्रवेशं च पुत्रदारादिपीडनम् ॥
द्वितीयद्यूननाथे तु देहबाधा मनोरुजम् ॥ ८१ ॥ आत्मसंबंधमरणं
भविष्यति न संशयः ॥ तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत् ॥ ८२ ॥
स्वर्णदानं प्रकुर्वीत ह्यारोग्यं भवति ध्रुवम् ॥ ८३ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखण्डे सारांशे विंशोत्तरीशन्यंतर्दशाफलकथनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

अथ बुधदशायांबुधभुक्तिमासाः २सदि० २७ तत्फलम् ।

मुक्ताविद्रुमलाभश्च ज्ञानकर्मसुखादिकम् ॥ विद्यामहत्त्वं कीर्तिश्च
नूतनप्रभुदर्शनम् ॥ १ ॥ विभवं दारपुत्रादिपितृमातृसुखावहम् ॥
नीचोग्रखेटसंयुक्ते षष्ठाष्टव्ययराशिगे ॥ २ ॥ पापयुक्तेऽथ वा दृष्टे
धनधान्यपशुक्षयम् ॥ आत्मबंधुविरोधं च शूलरोगादिसंभवम् ॥ ३ ॥
राजकार्यकलापेन व्याकुलो भवति ध्रुवम् ॥ द्वितीयद्यूननाथे तु
दारक्लेशो भविष्यति ॥ ४ ॥ आत्मसंबंधमरणं वातशूलादिसंभ-
वम् ॥ तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ॥ ५ ॥

केतुभुक्तिमासाः ११ दिनानि २७ तत्फलम् ।

बुधस्यांतर्गते केतौ लग्नात्केंद्रत्रिकोणगे ॥ शुभयुक्ते शुभैर्दृष्टे लग्नाधिपसमन्विते ॥ ६ ॥ योगकारकसंबंधे दायेशात्केंद्रलाभगे ॥ देहसौख्यं धनाल्पत्वं बंधुस्नेहसहायकृत् ॥ ७ ॥ चतुष्पाज्जीवलाभः स्यात्संसारे देहतापनम् ॥ विद्याकीर्तिप्रसंगश्च समानप्रभुदर्शनम् ॥ ८ ॥ भोजनांबरसौख्यं च ह्यादौ मध्ये सुखावहम् ॥ दायेशाद्रिपुरंध्रस्थे अष्टमे पापसंयुते ॥ ९ ॥ वाहनात्पतनं चैव पुत्रक्लेशसमाकुलम् ॥ चौरादिराजभीतिश्च पापकर्मरतः सदा ॥ ॥ १० ॥ वृश्चिकादिविषाद्भीतिर्नीचैः कलहसंयुतः ॥ शोकरोगादिदुःखं च संसारादिचलं भवेत् ॥ ११ ॥ द्वितियद्यूननाथे तु देहजाड्यं भविष्यति ॥ तद्दोषपरिहाराय च्छागदानं तु कारयेत् ॥ १२॥

अथ शुक्रभुक्तिमासाः ३४ दिनानि० तत्फलम् ।

सौम्यस्यांतर्गते शुक्रे केंद्रे लाभत्रिकोणगे ॥ सत्कथापुण्यधर्मादिसंग्रहः पुण्यकर्मकृत् ॥ १३ ॥ मित्रप्रभुवशादिष्टं क्षेत्रलाभः सुखं भवेत् ॥ दशाधिपात्केंद्रगतस्त्रिकोणे लाभगेपि वा ॥ १४ ॥ तत्काले श्रियमाप्नोति राजश्रीधनसंपदः ॥ वापीकूपतडागादिदानधर्मादिसंग्रहः ॥ १५ ॥ व्यवसायात्फलाधिक्यं धनधान्यसमृद्धिदम् ॥ दायेशात्षष्ठरंध्रस्थे व्यये वा बलवर्जिते ॥ १६ ॥ हृद्रोगो मानहानिश्च ज्वरातीसारपीडनम् ॥ आत्मबंधुवियोगश्च संसारो देहनिःशमम् ॥ ॥ १७ ॥ आत्मसौख्यं मनस्तापमायदायादिकं तथा ॥ द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ॥ १८ ॥ तद्दोषपीरहारार्थं दुर्गादेवीजपं चरेत् ॥ १९ ॥

अथ रविभुक्तिमासाः १० दिनानि ६ तत्फलम् ।

सौम्यस्यांतर्गते सूर्ये स्वोच्चे स्वक्षेत्रकेंद्रगे ॥ त्रिकोणे धनलाभे तु तुंगांशे स्वांशगेपि वा ॥ २० ॥ राजप्रसादसौभाग्यं मित्रप्रभुवशात्सु-

खम् ॥ भूम्यात्मजेन संदृष्टे आदौ भूलाभमेव च ॥ २१ ॥ लग्नाधिपेन संदृष्टे बहुसौख्यं धनागमम् ॥ ग्रामभूम्यादिलाभं च भोजनांबरसौख्यकृत् ॥ २२ ॥ षष्ठाष्टमव्यये वापि शन्यारफणिसंयुते ॥ दायेशाद्रिपुरंध्रस्थे षष्ठे वा बलवर्जिते ॥ २३ ॥ चौराग्निशस्त्रपीडा च पित्ताधिक्यं भविष्यति ॥ शिरोरुङ्मनसस्ताप इष्टबंधुवियोगकृत् ॥ ॥ २४ ॥ द्वितीयसप्तमाधीशे ह्यपमृत्युर्भविष्यति ॥ तद्दोषपरिहारार्थं शांतिं कुर्याद्यथाविधि ॥ सूर्यप्रीतिकरीं चैव दद्याद्धेनुं हिरण्यकम् ॥ २५ ॥

अथ चन्द्रभुक्तिमासाः १७ दिना ० ० तत्फलम् ।

सौम्यस्यांतर्गते चंद्रे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे वापि गुरुदृष्टिसमन्विते ॥ २६ ॥ योगस्थानाधिपत्येन योगप्राबल्यमादिशेत् ॥ स्त्रीलाभं पुत्रलाभं च वस्त्रवाहनभूषणम् ॥ २७ ॥ नूतनालयलाभं च नित्यं मिष्टान्नभोजनम् ॥ गीतवाद्यप्रसंगं च शास्त्रविद्यापरिश्रमम् ॥ २८ ॥ दक्षिणां दिशमाश्रित्य प्रयाणं च भविष्यति ॥ द्वीपांतरादिवस्त्राणां लाभश्चैव भविष्यति ॥ २९ ॥ मुक्ताविद्रुमरत्नानि धौतवस्त्रादिलाभगम् ॥ नीचारिक्षेत्रसंयुक्ते देहबाधा भविष्यति ॥ ३० ॥ दायेशात्केंद्रकोणस्थे दुश्चिक्ये लाभगेऽपि वा ॥ तद्भुक्त्यादौ पुण्यतीर्थस्थानदैवतदर्शनम् ॥ ३१ ॥ मनोधैर्यं त्वदुत्साहं विदेशधनलाभकृत् ॥ दायेशात्षष्ठरंध्रे वा व्यये वा पापसंयुते ॥ ३२ ॥ चौराग्निनृपभीतिश्च स्त्रीसंगे गमनं भवेत् ॥ दुष्कृतिर्धनहानिश्च कृषिगोश्वादिनाशकृत् ॥ ३३ ॥ द्वितीयद्यूननाथे तु देहबाधा भविष्यति ॥ तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ॥ ३४ ॥ वस्त्रदानं प्रकुर्वीत आयुर्वृद्धिसुखावहम् ॥ ३५ ॥

अथ कुजभुक्तिमासाः ११ दिनानि २७ तत्फलम् ।

सौम्यस्यांतर्गते भौमे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे

भौमे लग्नाधिपसमन्विते ॥ ३६ ॥ राजानुग्रहशांतिंच गृहे कल्याण संभवम् ॥ लक्ष्मीकटाक्षचिह्नानि नष्टराज्यार्थलाभकृत् ॥ ३७ ॥ पुत्रोत्सवादिसंतोषं गृहं गोधनसंकुलम् ॥ गृहक्षेत्रादिलाभं च गजवाजिसमन्वितम् ॥ ३८ ॥ राजप्रीतिकरं चैव स्त्रीसौख्यं चातिशोभनम् ॥ नीचक्षेत्रसमायुक्ते ह्यष्टमे वा व्ययेपि वा ॥ ३९ ॥ पापदृष्टियुते वापि देहपीडा मनोव्यथा ॥ उद्योगभंगो देहादौ स्वग्रामे धान्यनाशनम् ॥ ४० ॥ ग्रंथिशस्त्रव्रणादीनां भयं तापज्वरादिकम् ॥ दायेशात्केंद्रगे भौमे त्रिकोणे लाभगेपि वा ॥ ४१ ॥ शुभदृष्टेश्च संप्राप्तिर्देहसौख्यं धनागमम् ॥ पुत्रलाभं यशोवृद्धिं भ्रातृवर्गो महाप्रियः ॥ ४२ ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ तद्भुक्त्यादौ महाक्लेशं भातृवर्गे महद्भयम् ॥ ४३ ॥ नृपाग्निचौरभीतिश्च पुत्रमित्रविरोधनम् ॥ स्थानभ्रंशे महद्वैर्यं मध्ये सौख्यं धनागमम् ॥ ४४ ॥ अंते तु राजभीतिः स्यात्स्थानभ्रंशोह्यथापि वा ॥ द्वितीयद्यूननाथे तु ह्यपमृत्युभयं भवेत् ॥ ४५ ॥ अनड्वाहं प्रकुर्वीत मृत्युंजयजपं चरेत् ॥ ४६ ॥

अथ राहुभुक्तिमासाः ३० दिना०१८ तत्फलम् ।

बुधस्यांतर्गते राहौ केंद्रलाभत्रिकोणगे ॥ कुलीरकर्मगे वापि कन्यायांवृषभेपि वा ॥ ४७ ॥ राजसम्मानकीर्ती च समये राजयिष्यति ॥ पुण्यतीर्थस्थानलाभं देवतादर्शनं तथा ॥ ४८ ॥ इष्टापूर्तं च महतो मानश्चांबरलाभकृत् ॥ भुक्त्यादौ देहपीडा च अंते सौख्यं विनिर्दिशेत् ॥ ४९ ॥ षष्ठाष्टव्ययराशिस्थे तद्भुक्तौ धननाशनम् ॥ भुक्त्यादौ देहनाशं च वातज्वरमजीर्णकृत् ॥ ५० ॥ लग्नाद्युपचये राहौ शुभग्रहसमन्विते ॥ राजसंलापसंतोषं नूतनप्रभुदर्शनम् ॥ ५१ ॥ दायेशात्षष्ठरिःफे वा ह्यष्टमे पापसंयुते ॥ निष्ठुरं राजकार्याणि स्थानभ्रंशो महद्भयम् ॥ ५२ ॥ बंधनं रोगपी-

डा च आत्मबंधुमनोव्यथा ॥ हृद्रोगो मानहानिश्च धनहानिर्भविष्यति ॥ ५३ ॥ द्वितीयसप्तमस्थे वा ह्यपमृत्युर्भविष्याति ॥ तद्दोषपरिहारार्थं दुर्गालक्ष्मीजपं चरेत् ॥ ५४ ॥ श्वेतां गां महिषीं दद्यादायुरारोग्यदायिनीम् ॥ ५५ ॥

अथ गुरुभुक्तिमासाः २७ दिना ०६ तत्फलम् ।

बुधस्यान्तर्गते जीवे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे वापि लाभे वा धनराशिगे ॥ ५६ ॥ देहसौख्यं धनावाप्तिं राजप्रीतिं तथैव च ॥ विवाहोत्सवकार्याणिं नित्यमिष्टान्नभोजनम् ॥ ५७ ॥ गोमहिष्यादिलाभं च पुराणश्रवणादिकम् ॥ देवतागुरुभक्तिं च दानधर्ममखादिकम् ॥ ५८ ॥ यज्ञकर्मप्रवृद्धिं च शिवपूजाफलं तथा ॥ नीचे वास्तंगते वापि रिःफाष्टव्ययगेपि वा ॥ ५९ ॥ शन्यारपातिसंयुक्ते कलहो राजविड्वरम् ॥ चौरादिदेहपीडा च पितृमातृविनाशनम् ॥ ६० ॥ मानहानीराजदंडो धनहानिर्भविष्यति ॥ विषाहिज्वरपीडा च कृषिगोभूमिनाशनम् ॥ ६१ ॥ दायेशात्केंद्रकोणे वा लाभे वा बलसंयुते ॥ बंधुपुत्रस्हृदुत्साहं शुभं शोभनसंयुतम् ॥ ६२ ॥ पशुवृद्धियशोलाभमन्नदानादिकं फलम् ॥ दायेशात्षष्ठरंध्रे वा व्यये वा बलवर्जिते ॥ ६३ ॥ अंगतापश्च वैकल्यं देहबाधा भविष्यति ॥ कलत्रबंधुवैषम्यं राजकोपो धनक्षयः ॥ ६४ ॥ अकस्मात्कलहाद्भीतिः प्रमोदो राजविड्वरम् ॥ द्वितीयसप्तमस्थे वा देहबाधा भविष्यति ॥ ६५ ॥ तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत् ॥ गोभूहिरण्यदानेन सर्वारिष्टं व्यपोहाति ॥ ६६ ॥

अथ शनिभुक्तिमासाः ३२ दि ०९ तत्फलम् ।

सौम्यस्यांतर्गते मन्दे स्वोच्चे स्वक्षेत्रकेंद्रगे ॥ त्रिकोणलाभगे वापि गृहे कल्याणवर्द्धनम् ॥ ६७ ॥ राज्यलाभं महोत्साहं गृहं गोधनसंकुलम् ॥ ६८ ॥ शत्रुस्थानफलावाप्तिं भुत्त्या तीर्थविनाशनम् ॥

षष्ठाष्टमव्यये मंदे दायेशाद्वा तथैव च ॥ ६९ ॥ अरातिदुःखबाहुल्यं
दारपुत्रादिपीडनम् ॥ बुद्धिभ्रंशं बंधुनाशं कर्मनाशं मनोरुजम्
॥ ७० ॥ विदेशगमनं चैव स्वम्रं दूराभिसंपदम् ॥ द्वितीयद्यूननाथे
तु ह्यपमृत्युर्भविष्यति ॥ ७१ ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं
चरेत् ॥ कृष्णां गां महिषीं दद्यादायुरारोग्यवृद्धिदाम् ॥ ७२ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखण्डसारांशे विंशोत्तरीबुधांतर्दशाफलकथनं
नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

27

अथ केतुभुक्तिदशायामंतर्दशामासाः४दि०६तत्फलम् ।

केंद्रे त्रिकोणलाभे वा लग्नाधिपसमन्विते ॥ भाग्यकर्मसुसंबंधे
वाहनेशसमन्विते ॥ १ ॥ तद्भुक्तौ धनधान्यादि चतुष्पाज्जीवलाभकृत् ॥ पुत्रदारादिसौख्यं च राजप्रीतिमनोरुजम् ॥ २ ॥ ग्रामभूम्यादिलाभश्च गृहं गोधनसंकुलम् ॥ नीचास्तखेटसंयुक्ते ह्यष्टमे व्ययगेपि
वा ॥ ३ ॥ हृद्रोगं मानहानिं च धनधान्यपशुक्षयम् ॥ दारपुत्रादिपीडां
च मनश्चांचल्यमेव च ॥ ४ ॥ द्वितीयद्यूननाथेन संबंधे तत्र संस्थिते ॥
अनारोग्यं महत्कष्टमात्मबंधुवियोगकृत् ॥ ५ ॥ दुर्गादेवीजपं
कुर्यान्मृत्युंजयजपं चरेत् ॥ ६ ॥ 14

अथ शुक्रभुक्तिमासाः ~~२४~~ दिनानि० तत्फलम् ।

केतोरंतर्गते शुक्रे स्वोच्चे स्वक्षेत्रसंयुते ॥ केंद्रत्रिकोणलाभे वा
राज्यनाथेन संयुते ॥ ७ ॥ राजप्रीतिं च सौभाग्यं राजत्स्वांबरसंकुलम् ॥ तत्काले श्रियमाप्नोति भाग्यकर्मेशसंयुते ॥ ८ ॥ नष्टराज्यधनप्राप्तिं सुखवाहनमुत्तमम् ॥ सेतुस्नानादिकं चैव देवतादर्शनं महत् ॥ ९ ॥ महाराजप्रसादेन ग्रामभूम्यादिलाभकृत् ॥ दायेशात्केंद्रकोणे वा दुश्चिक्ये लाभगेपि वा ॥ १० ॥ देहारोग्यं शुभं चैव गृहे
कल्याणशोभनम् ॥ भोजनांबरभूषाप्तिमश्वदोलादिलाभकृत् ॥ ११ ॥

दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ अकस्मात्कलहं चैव पशुधान्यादिपीडनम् ॥ १२ ॥ नीचस्थे खेटसंयुक्ते लग्नात्षष्ठाष्टराशिगे ॥ स्वबंधुजनवैषम्यं शिराक्षिव्रणपीडनम् ॥ १३ ॥ हृद्रोगं मानहानिं च धनधान्यपशुक्षयम् ॥ कलत्रपुत्रपीडायास्संचारं देहविड्वरम् ॥ १४ ॥ द्वितीयद्यूननाथे तु देहजाड्यं मनोरुजम् ॥ तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ॥ श्वेतां गां माहिषीं दद्यादायुरारोग्यदायिनीम् ॥ १५॥

अथ रविभुक्तिमासाः ४ दिना ०६ तत्फलम् ।

केतोरंतर्गते सूर्ये स्वोच्चे स्वक्षेत्रगेपि वा ॥ केंद्रत्रिकोणलाभे वा शुभयोगनिरीक्षिते ॥ १६ ॥ धनधान्यादिलाभश्च राजानुग्रहवैभवम् ॥ अनेकशुभकार्याणि चेष्टसिद्धिः सुखावहा ॥ १७ ॥ षष्ठाष्टव्ययराशिस्थे पापग्रहसमन्विते ॥ तद्भुक्तौ राजभीतिश्च पितृमातृवियोगकृत् ॥ १८ ॥ विदेशगमनं चैव चौराहिविषपीडनम् ॥ राजमित्रविरोधश्च राजदंडाद्धनक्षयः ॥ १९ ॥ शोकरोगभयं चैव उष्णाधिक्यं ज्वरो भवेत् ॥ दायेशात्केंद्रकोणे वा लाभे वा धनसंस्थिते ॥ २० ॥ देहसौख्य चार्थलाभं पुत्रलाभं मनोहृदम् ॥ यातुः कार्यार्थसिद्धिः स्यात्स्वल्पग्रामाधिपत्वयुक् ॥ २१ ॥ दायेशात्केन्द्ररिःफे वा षष्ठे वा पापसंयुते ॥ अन्नविघ्नो मनोभीतिर्धनधान्यपशुक्षयः ॥ २२ ॥ आदौ मध्ये महाक्लेशानन्ते सौख्यं विनिर्दिशेत् ॥ द्वितीयसप्तमाधीशे ह्यपमृत्युर्भविष्यति ॥ २३ ॥ दशशांतिं प्रकुर्वीत स्वर्णधेनुं प्रदापयेत् ॥ २४ ॥

अथ चंद्रभुक्तिमासाः ७ दिना ० ० तत्फलम् ।

केतोरंतर्गते चंद्रे स्वोच्चे स्वक्षेत्रराशिगे ॥ केंद्रत्रिकोणलाभे वा धने सुखसमन्विते ॥ २५ ॥ राजप्रीतिर्महोत्साहः कल्याणं च महत्सुखम् ॥ महाराजप्रसादेन गृहभूम्यादिलाभकृत् ॥ २६ ॥ भोजनांबरपश्वादिव्यवसायेऽधिकं फलम् ॥ अश्ववाहनलाभश्च वस्त्राभरणभूष-

णम् ॥ २७ ॥ देवालयतडागादिपुण्यधर्मादिसंग्रहम् ॥ पुत्रदारादिसौख्यं च पूर्णचंद्रस्तथैव च ॥ २८ ॥ नीचे वा क्षीणगे चंद्रे षष्ठाष्टव्ययराशिगे ॥ आत्मसौख्यं मनस्तापं कार्यविघ्नं महद्भयम् ॥ २९ ॥ पितृमातृवियोगं च देहजाड्यं मनोव्यथाम् ॥ व्यवसायात्फलं नष्टं गोमहिष्यादिनाशकृत् ॥ ३० ॥ दायेशात्केंद्रकोणे वा लाभे वा बलसंयुते ॥ कृषिगोभूमिलाभं च इष्टबंधुसमागमम् ॥ ३१ ॥ ताम्रसात्कार्यसिद्धिं च गृहे गोक्षीरमेव च ॥ भूकृत्यं शुभमारोग्यं मध्ये राजप्रियं शुभम् ॥ ३२ ॥ अंते तु राजभीतिं च विदेशगमनं तथा ॥ दूरयात्रादिसंचारं संबंधिजनपूजनम् ॥ ३३ ॥ दायेशात्षष्ठरिःफे वा रंध्रे वा बलवर्जिते ॥ धनधान्यादिहानिश्च मनोव्याकुलमेव च ॥ ३४ ॥ स्वबंधुजनदातृत्वं भ्रातृपीडा तथैव च ॥ निधनाधिपदोषेण द्विसप्तमाधिपे युते ॥ ३५ ॥ अपमृत्युभयं तस्य शांतिं कुर्याद्यथाविधि ॥ चंद्रप्रीतिकरं चैव ह्यायुरारोग्यसंभवम् ॥ ३६ ॥

अथ कुजभुक्तिमासाः ४ दिना० २७ तत्फलम् ।

केतोरंतर्गते भौमे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे स्वक्षेत्रगे भौमे शुभदृष्टियुतेक्षिते ॥ ३७ ॥ आदौ शुभफलं चैव ग्रामभूम्यादिलाभकृत् ॥ धनधान्यादिलाभश्च चतुष्पाज्जीवलाभकृत् ॥ ३८ ॥ गृहारामक्षेत्रलाभं राजानुग्रहवैभवम् ॥ भाग्ये कर्मेशसंबंधे भूलाभं सौख्यमेव च ॥ ३९ ॥ दायेशात्केंद्रकोणे वा दुश्चिक्ये लाभगेपि वा ॥ राजप्रीतियशोलाभं पुत्रमित्रादिसौख्यकृत् ॥ ४० ॥ षष्ठाष्टमव्यये भौमे दायेशाद्धनगेपि वा ॥ द्रुतं करोति मरणं विदेशं चापदं भ्रमम् ॥ ४१ ॥ प्रमेहमूत्रकृच्छ्रादिचौरादिनृपपीडनम् ॥ कलहादौ व्यथायुक्तं किंचित्सुखविवर्द्धनम् ॥ ४२ ॥ ॥ द्वितीयद्यूननाथे तु तापज्वरविषाद्भयम् ॥ दारपीडा मनःक्लेशमपमृत्युभयंभवेत् ॥ ४३ ॥ अनड्वाहं प्रदद्यात्तु सर्वसंपत्सुखावहम् ॥ ४४ ॥

अथ राहुभुक्तिमासाः १२ दिना० १८ ० तत्फलम् ।

केतोरंतर्गते राहौ स्वोच्चे मित्रस्वराशिगे ॥ केंद्रत्रिकोणलाभे वा दुश्चिक्ये धनसंज्ञके ॥ ४५ ॥ तत्काले धनलाभः स्यात्संसारो भवति ध्रुवम् ॥ म्लेच्छप्रभुवशात्सौख्यं धनधान्यफलादिकम्॥ ४६ ॥ चतुष्पाज्जीवलाभः स्याद्ग्रामभूम्यादिलाभकृत् ॥ भुक्त्यादौ क्लेशमाप्नोति मध्यांते सौख्यमाप्नुयात् ॥ ४७ ॥ रंध्रे वा व्ययगे राहौ पापसंदृष्टिसंयुते ॥ बहुपुत्रः कृशं देहं शीतज्वरविषाद्भयम् ॥ ४८ ॥ चातुर्थिकज्वरं चैव क्षुद्रोपद्रवपीडनम् ॥ अकस्मात्कलहं चैव प्रमेहं शूलमेव च ॥ ४९ ॥ द्वितीयसप्तमस्थे वा तदा क्लेशं महद्भयम् ॥ तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ॥ अयुतहोमः कर्तव्यः सर्वसौख्यप्रदायकः ॥ ५० ॥

अथ गुरुभुक्तिमासाः ११ दिना ० ६० तत्फलम् ।

केतोरंतर्गते जीवे केंद्रलाभत्रिकोणगे ॥ स्वोच्चे स्वक्षेत्रगे वापि लग्नाधिपसमन्विते ॥ ५१ ॥ कर्मभाग्याधिपैर्युक्ते धनधान्यार्थसंपदम् ॥ राजप्रीतिं मनोत्साहमश्वांदोल्यादिलाभकृत् ॥ ५२ ॥ गृहे कल्याणसंपत्ति पुत्रलाभं महोत्सवम् ॥ पुण्यतीर्थं मनोत्साहं सत्कर्म च सुखावहम् ॥ ५३ ॥ इष्टदेवप्रसादेन विजयं कार्यलाभकृत् ॥ राजसंलापकार्याणि नूतनप्रभुदर्शनम् ॥ ५४ ॥ षष्ठाष्टमव्यये जीवे दायेशान्नीचगेपि वा ॥ चोराहिव्रणभीतिं च धनधान्यादिनाशनम् ॥ ५५ ॥ पुत्रदारावियोगं च अतीवक्लेशसंभवम् ॥ आदौ शुभफलं चैव अंते क्लेशकरं भवेत् ॥ ५६ ॥ दायेशात्केंद्रकोणे वा दुश्चिक्ये लाभगेपि वा ॥ शुभयुक्ते नृपाद्भीतिर्विचित्रांबरभूषणम् ॥ ५७ ॥ दूरदेशप्रयाणं च स्वबंधुजनपोषणम् ॥ भोजनांबरपश्वादिभुक्त्यादौ देहपीडनम् ॥ ५८ ॥ अंते तु स्थानचलनमकस्मात्कलहो भवेत् ॥

द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ॥ ५९ ॥ तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत् ॥ महामृत्युंजयं जाप्यं सर्वोपद्रवनाशनम् ॥ ६० ॥

अथ शनिभुक्तिमासाः १६ दिना ० ९ तत्फलम् ।

केतोरंर्गते मंदे स्वदशायां तु पीडनम् ॥ बंधोः क्लेशो मनस्तापश्चतुष्पाज्जीवलाभकृत् ॥ ६१ ॥ राजकार्यकलापेन धननाशं महद्भयम् ॥ स्थानाच्युतिः प्रवासश्च मार्गे चौरभयं भवेत् ॥ ६२ ॥ आलस्यं मनसो हानिश्चाष्टमे व्ययराशिगे ॥ मीनात्रिकोणगे मंदे तुलायां स्वर्क्षगेपि वा ॥ ६३ ॥ केंद्रत्रिकोणलाभे वा दुश्चिक्ये वा शुभांशके ॥ शुभदृष्टिसमाप्तौ च सर्वकार्यार्थसाधनम् ॥ ६४ ॥ स्वप्रभोश्च महत्सौख्यं भ्रमणं रणलाभगम् ॥ स्वग्रामे सुखसंपत्तिः स्ववर्गे राजदर्शनम् ॥ ६५ ॥ दायेशात्षष्ठारिःफे वा अष्टमे पापसंयुते ॥ देहतापो मनस्तापः कार्ये विघ्नो महद्भयम् ॥ ६६ ॥ आलस्यं मानहानिश्च पितृमात्रोर्विनाशनम् ॥ द्वितीयद्यूननाथे तु ह्यपमृत्युभयं भवेत् ॥ ६७ ॥ तद्दोषपरिहारार्थं तिलहोमं च कारयेत् ॥ कृष्णां गां महिषीं दद्यादायुरारोग्यवृद्धिदाम् ॥ ६८ ॥

अथ बुधभुक्तिमासाः ११ दि० २७ तत्फलम ।

केतोरंतर्गते सौम्ये केंद्रलाभत्रिकोणगे ॥ स्वोच्चे स्वक्षेत्रसंयुक्ते राज्यलाभो महत्सुखम् ॥ ६९ ॥ सत्कथाश्रवणं दानं धर्मसिद्धिः सुखावहा ॥ भूलाभः पुत्रलाभश्च शुभगोष्ठीधनागमः ॥ ७० ॥ अयत्नाद्धर्मलब्धिश्च विवाहश्च भविष्यति ॥ गृहे शुभकरं चैव वस्त्राभरणभूषणम् ॥ ७१ ॥ भाग्यकर्माधिपैर्युक्ते भाग्यवृद्धिः सुखावहा ॥ विद्वद्गोष्ठीकलापेन संतापो भूषणादिकम् ॥ ७२ ॥ षष्ठाष्टमव्यये सौम्ये मंदाराहियुतेक्षिते ॥ विरोधराजकार्याणि परगेहनिवासनम् ॥ ७३ ॥ वाहनांबरपश्वादिधनधान्यादिनाशकृत् ॥ भुक्त्यादौ शोभनं प्रोक्तं मध्ये सौख्यं धनागमम् ॥ ७४ ॥

अंते क्लेशकरं चैव दारपुत्रादिपीडनम् ॥ दायेशात्केंद्रगे सौम्ये त्रिकोणे लाभगेपि वा ॥ ७५ ॥ देहारोग्यं महाँल्लाभः पुत्रकल्याणवैभवम् ॥ भोजनांबरपश्वादिव्यवसायेऽधिकं फलम् ॥ ७६ ॥ दायेशात्षष्ठरंध्रे वा व्यये वा बलवर्जिते ॥ तद्भुक्त्यादौ महाक्लेशो दारपुत्रादिपीडनम् ॥ ७७ ॥ राजभीतिकरं चैव मध्ये तीर्थकरं भवेत् ॥ द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्याति ॥ तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ॥ ७८ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे विं० केत्वंतर्दशाफलकथनं नाम चतुश्चत्वारिंशोध्यायः ॥ ४४ ॥

अथ शुक्रदशायां शुक्रभुक्तिमा० ४० दि० ० तत्फलम् ।

भृगोरंतर्गते शुक्रे लग्नात्केंद्रत्रिकोणगे ॥ लाभे वा बलसंयुक्ते योगप्राबल्यमादिशेत् ॥ १ ॥ विप्रमूलाद्धनप्राप्तिर्गोमाहिष्यादि लाभकृत् ॥ पुत्रोत्सवादिसंतोषं गृहे कल्याणसंभवम् ॥ २ ॥ सन्मानं राजसन्मानं राज्यलाभो महत्सुखम् ॥ स्वोच्चे वा स्वक्षगे चापि तुंगांशे स्वांशगेपि वा ॥ ३ ॥ नूतनालयनिर्माणं नित्यं मिष्टान्नभोजनम् ॥ कलत्रपुत्रविभवं मित्रसंयुक्तभोजनम् ॥ ४ ॥ अन्नदानं प्रियं नित्यं दानधर्मादिसंग्रहः ॥ महाराजप्रसादेन वाहनांबरभूषणम् ॥ ५ ॥ व्यवसायात्फलाधिक्यं चतुष्पाज्जीवलाभकृत् ॥ प्रयाणं पश्चिमे भागे वाहनांबरलाभकृत् ॥ ६ ॥ लग्नाद्युपचये शुक्रे शुभदृष्टियुतेक्षिते ॥ मित्रांशे तुंगलाभेशे योगकारकसंयुते ॥ ७ ॥ राज्यलाभो महोत्साहो राजप्रीतिः शुभावहा ॥ गृहे कल्याणसंपत्तिर्दारपुत्रादिवर्द्धनम् ॥ ८ ॥ षष्ठाष्टमव्यये शुक्रे पापयुक्तेऽथवीक्षिते ॥ चौरादिव्रणभीतिश्च सर्वत्र जनपीडनम् ॥ ९ ॥ राज-

द्वारे जनद्वेष इष्टबंधुविनाशनम् ॥ दारपुत्रादिपिडा च सर्वत्र जनपीडनम् ॥ १० ॥ द्वितीयद्यूननाथे तु स्थिते चेन्मरणं भवेत् ॥ शुक्रे दुर्गाजपं कुर्याद्धेनुदानं च कारयेत् ॥ ११ ॥

अथ रविभुक्तिमासाः १२ दिना० २ तत्फलम् ।

शुक्रस्यांतर्गते सूर्ये संतापं राजाविड्रुजम् ॥ दायादिकलहं चैव व्यवहारमथापि वा ॥ १२ ॥ स्वोच्चे स्वक्षेत्रगे सूर्ये मित्रर्क्षे केंद्रकोणगे ॥ दायेशात्केंद्रकोणे वा लाभे वा धनगेऽपि वा ॥ १३ ॥ तद्भुक्तौ धनलाभः स्याद्राज्यस्त्रीधनसंपदः ॥ स्वप्रभोश्च महत्सौख्यमिष्टबंधोः समागमः ॥ १४ ॥ पितृमात्रोः सुखप्राप्तिं भ्रातृलाभं सुखावहम् ॥ सत्कीर्तिं सुखसौभाग्यं पुत्रलाभं च विंदति ॥ १५ ॥ षष्ठाष्टमव्यये सूर्ये दाये दाहात्तथैव च ॥ नीचे वा पापवर्गस्थे देहतापं मनोरुजम् ॥ १६ ॥ स्वजनात्परिसंक्लेशो नित्यं निष्ठुरभाषणम् ॥ पितृपिडा बंधुहानी राजद्वारे विरोधकृत् ॥ १७ ॥ व्रणपीडाहिबाधा च स्वर्क्षेगे च भयं तथा ॥ नानारोगभयं चैव गृहक्षेत्रादिनाशनम् ॥ १८ ॥ सप्तमाधिपदोषेण ग्रहबाधा भविष्यति ॥ तद्दोषपरिहारार्थं सूर्यप्रीतिं च कारयेत् ॥ १९ ॥

अथ चन्द्रभुक्तिमासाः २० दिना ०० तत्फलम् ।

शुक्रस्यांतर्गते चंद्रे केंद्रलाभत्रिकोणगे ॥ स्वोच्चे स्वक्षेत्रगे चैव भाग्यकर्मेशसंयुते ॥ २० ॥ शुभयुक्ते पूर्णचंद्रे राज्यनाथेन संयुते ॥ तद्भुक्तौ वाहनाधिक्येनापत्येन महत्सुखम् ॥ २१ ॥ महाराजप्रसादेन गजांतैश्वर्यमादिशेत् ॥ महानदीस्नानपुण्यं देवब्राह्मणपूजनम् ॥ २२ ॥ गीतवाद्यप्रसंगादिविद्वज्जनाविभूषणम् ॥ गोमाहिष्यादिवृद्धिश्च व्यवसायेऽधिकं फलम् ॥ २३ ॥ भोजनांबरसौख्यं च बंधुसंयुक्तभोजनम् ॥ नीचे वास्तंगते वापि षष्ठाष्टव्ययराशिगे ॥ २४ ॥

दायेशात्षष्ठगे वापि रंध्रे वा व्ययराशिगे ॥ तत्काले धननाशः स्यात्संचरेत महद्भयम् ॥ २५ ॥ देहायासो मनस्तापो राजद्वारे विरोधकृत् ॥ विदेशगमनं चैव तीर्थयात्रादिकं फलम् ॥ २६ ॥ दारपुत्रादिपीडा च आत्मबंधुवियोगकृत् ॥ दायेशात्केंद्रलाभस्थे त्रिकोणे व्ययगेपि वा ॥ २७ ॥ राजप्रीतिकरं चैव देशग्रामाधिपत्यता ॥ धैर्यं यशः सुखं कीर्तिर्वाहनांबरभूषणम् ॥ २८ ॥ कूपारामतडागादिनिर्माणं धनसंग्रहः ॥ भुक्त्यादौ देहसौख्यं स्यादंते क्लेशकरं भवेत् ॥ २९ ॥

अथ कुजभुक्तिमासाः १४ दिना ० ० तत्फलम् ।

शुक्रस्यांतर्गते भौमे लग्नात्केंद्रत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे भौमे लाभे वा बल संयुते ॥ ३० ॥ लग्नाधिपेन संयुक्ते कर्मभाग्येन संयुते ॥ तद्भुक्तौ राजयोगादिसंपदं शुभशोभनम् ॥ ३१ ॥ वस्त्राभरणभूम्यादेरिष्टसिद्धिः सुखावहा ॥ षष्ठाष्टमव्यये वापि दायेशाद्वा तथैव च ॥ ३२ ॥ शीतज्वरादिपीडा च पितृमातृभयावहा ॥ ज्वराद्याधिकरोगाश्च स्थानभ्रंशो मनोरुजा ॥ ३३ ॥ स्वबंधुजनहानिश्च कलहो राजविड्वरम् ॥ राजद्वारजनद्वेषो धनधान्यव्ययोधिकम् ॥ ॥ ३४ ॥ व्यवसायात्फलं नेष्टं ग्रामभूम्यादिलाभकृत् ॥ द्वितीयद्यूननाथे तु देहबाधा भाविष्यति ॥ ३५ ॥

अथ राहुभुक्तिमासाः ३० दिना ० ० तत्फलम् ।

शुक्रस्यांतर्गते राहौ केंद्रलाभत्रिकोणगे । स्वोच्चे वा शुभसंदृष्टे योगकारकसंयुते ॥ ३६ ॥ तद्भुक्तौ बहुसौख्यं च धनधान्यादिलाभकृत् ॥ इष्टबंधुसमाकीर्णं भोजनांबरलाभगम् ॥ ३७ ॥ यातुः कार्यार्थसिद्धिः स्यात्पशुक्षेत्रादिसंभवः ॥ लग्नाद्युपचये राहौ तद्भुक्तिः सुखदा भवेत् ॥ ३८ ॥ शत्रुनाशो महोत्साहो राजप्रीतिकरी शुभा ॥

भुक्त्यादौ शरमासश्च अंते ज्वरमजीर्णकृत् ॥ ३९ ॥ कार्ये विघ्नमवाप्नोति संचरं च मनोव्यथाम् ॥ परंसुखं च सौभाग्यं महानिव समश्नुते ॥ ४० ॥ नैर्ऋतीं दिशमाश्रित्य प्रयाणं प्रभुदर्शनम् यातुः ॥ कार्यार्थसिद्धिः स्यात्स्वदेशे पुनरेष्यति ॥ ४१ ॥ उपकारो ब्राह्मणानां तीर्थयात्राफलं भवेत् ॥ दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ ४२ ॥ अशुभं लभते कर्म पितृमातृजनावधि ॥ सर्वत्र जनविद्वेषं नानारूपादिसंभवम् ॥ ४३ ॥ द्वितीये सप्तमे वापि देहालस्यं विनिर्दिशेत् ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ ४४ ॥

अथ गुरुभुक्तिमासाः ३२ दिना ० ० तत्फलम् ।

शुक्रस्यांतर्गते जीवे स्वोच्चे स्वक्षेत्रकेंद्रगे ॥ दायेशाच्छुभराशिस्थे भाग्ये वा कर्मराशिगे ॥ ४५ ॥ नष्टराज्याद्धनप्राप्तिमिष्टार्थाम्बरसंपदम् ॥ मित्रप्रभोश्च सन्मानं धनधान्यपरांगतिम् ॥ ४६ ॥ राजसन्मानकीर्ती च अश्वांदोलादिलाभकृत् ॥ विद्वत्प्रभुसमाकीर्णं शास्त्रापारपरिश्रमम् ॥ ४७ ॥ पुत्रोत्सवादिसंतोषमिष्टबंधुसमागमम् ॥ पितृमातृसुखप्राप्तिं भ्रातृपुत्रादिसौख्यकृत् ॥ ४८ ॥ दायेशात्षष्ठराशिस्थे व्यये वा पापसंयुते ॥ राजचौरादिपीडा च देहपीडा भविष्यति ॥४९॥ आत्मभुग्बंधुकष्टः स्यात्कलहेन मनोव्यथा ॥ स्थानच्युतिं प्रवासं च नानारोगं समाप्नुयात् ॥ ५० ॥ द्वितीयसप्तमाधीशे देहबाधा भविष्यति ॥ तद्दोषपरिहारार्थं महामृत्युंजयं चरेत् ॥ ५१ ॥

अथ शनिभुक्तिमासाः ३२ दिना ०० तत्फलम् ।

शुक्रस्यांतर्गते मंदे स्वोच्चे तु परमोच्चगे ॥ स्वर्क्षकेन्द्रत्रिकोणस्थे तुंगांशे स्वांशगेपि वा ॥ ५२॥ तद्भुक्तौ बहुसौख्यं स्यादिष्टबंधुसमन्विते ॥ सन्मानं बहुसन्मानं पुत्रिकागमनं शुभम् ॥ ५३ ॥ पुण्यतीर्थफलावाप्तिर्दानधर्मादिपुण्यकृत् ॥ स्वप्रभोश्च विशेषः स्यादाति वा

क्लेशः भाग्भवेत् ॥ ५४ ॥ देहालस्यमवाप्नोति आदायादधिकव्ययम् ॥ षष्ठाष्टमव्यये मंदे दायेशाद्वा तथैव च ॥ ५५ ॥ भुक्त्यादौ देहआरोग्यं पितृमातृजनावाधि ॥ दारपुत्रादिपीडा च संहारे देहविभ्रमम् ॥ ५६ ॥ व्यवसायात्फलं नष्टं गोमहिष्यादिहानिकृत् ॥ द्वितीयसप्तमाधीशे देहबाधा भविष्यति ॥ ५७ ॥ तद्दोषपरिहारार्थं तिलहोमं च कारयेत् ॥ ५८ ॥ यो गां ददाति भृगुजस्य दशाविपाके सौख्यं सदा नृपतितुल्य उपैति लक्ष्मीम् ॥ श्रेयो यशः सुविजयो बहुराज्यलाभः श्रीसूर्यभांशकजनिर्बहुभाग्यभाक् स्यात् ॥ ५९ ॥

अथ बुधभुक्तिमासाः ३४ दिना ०० तत्फलम् ।

शुक्रस्यांतर्गते सौम्ये केंद्रे लाभत्रिकोणगे ॥ स्वोच्चे वा स्वर्क्षगे वापि राजप्रीतिकरं शुभम् ॥ ६० ॥ सौभाग्यं पुत्रलाभं च सन्मार्गे धनलाभकृत् ॥ पुराणधर्मश्रवणं शृंगारिजनसंगमम् ॥ ६१ ॥ इष्टबंधुजनाकीर्णं विप्रप्रभुसमागमम् ॥ स्वप्रभोश्च महत्सौख्यं नित्यं मिष्टान्नभोजनम् ॥ ६२ ॥ दायेशात्षष्ठरंध्रे वा व्यये वा बलवर्जिते ॥ पापदृष्टो तया युक्ते चतुष्पाज्जीवहानिकृत् ॥ ६३ ॥ अन्यालयनिवासश्च मनोवैकल्यसंभवः ॥ कालातिक्रमभुक्त्या च ऋणद्रव्यात्पित्र्यमेव च ॥ ६४ ॥ भुक्त्यादौ शोभनं प्रोक्तं मध्ये सौख्यं विनिर्दिशेत् ॥ अंते क्लेशकरं चैव शीतवातज्वरादिकम् ॥ ६५ ॥ सप्तमाधीशदोषेण देहपीडा भविष्यति ॥ तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ॥ ६६ ॥

अथ केतुभुक्तिमासाः १४ दिना ०० तत्फलम् ।

शुक्रस्यांतर्गते केतौ स्वोच्चे वा स्वर्क्षगोपि वा ॥ योगकारकसंबंधे स्थानवीर्यसमान्विते ॥ ६७ ॥ भुक्त्यादौ शुभमाधिक्यान्नित्यं मिष्टान्नभोजनम् ॥ व्यवसायात्फलाधिक्यं गोमहिष्यादिवृद्धिकृत् ॥ ६८ ॥ धनधान्यसमृद्धिश्च संग्रामे विजयो भवेत् ॥ भुक्त्यंते हि सुखं चैव -

अंते सुखकरं भवेत् ॥ ६९ ॥ मध्ये मध्ये महत्कष्टं पश्चादारोग्यमादिशेत् ॥
दायेशाद्रिपुरंध्रस्थे व्यये वा पापसंयुते ॥ ७० ॥ चौराहिव्रणपीडा च वृद्धिनाशो महद्भयम् ॥ शिरोरुजं मनस्तापमकर्मकलहं
तथा ॥ ७१ ॥ प्रमेहकर्म आरोग्यं नानामार्गे धनव्ययम् ॥ भार्यापुत्रविरोधश्च गमनं कार्यनाशनम् ॥ ७२ ॥ द्वितीयद्यूननाथे तु देहबाधा भविष्यति ॥ तद्दोषपरिहारार्थं मृत्युंजयजपं चरेत् ॥ ७३ ॥
छागदानं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥ ७४ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसा० विं० भृगोरंतर्दशाफलक०
नाम पंचचत्वारिंशोध्यायः ॥ ४५ ॥

अथोपदशाप्रकरणमाह ।

स्वांतर्दशाब्दवृंदं च हन्यात्स्वाब्दैर्ग्रहस्य च ॥ विंशोत्तरशतेनाप्तं
घस्राः शेषं कलादिकम् ॥ १ ॥

अथोपदशानयने उदाहरणमाह ।

यद्ग्रहस्यांतर्दशायां यस्य ग्रहस्य उपदशाक्रियते तद्ग्रहस्य अंतर्दशायां यावंतिवर्षमासदिनानि तेषां सर्वाणि दिनानि कृत्वा पुनः यस्य ग्रहस्य व्यतरं कर्तव्यं तस्य ग्रहस्याब्दादिगुणनं कृत्वा पश्चाद्विंशोत्तरशतेन भक्तेर्लब्धं दिनानि शेषं षष्टिगुणं पुनः विंशोत्तरशतेन भक्तेर्लब्धं घटिका ज्ञेयाः यथासूर्यस्यांतरं ३ । १८ तस्य दिनानि १०८ स्वीयमहादशावर्षेण ६ गुणितानि जातानि ६४८ ततोविंशोत्तरशतेन भक्तेर्लब्धं ५ दिनानि शेषं ४८ षष्टिघ्नंजातं २८८० पुनः विंशोत्तरशतेनाप्तेलब्धं २४ घटीशेषाभावः एवं सूर्यांतर्दशामध्येसूर्योपदशादिनानि ५ घट्यः २४ एवं सूर्यस्यांतर्मध्ये चंद्रादीनामुपदशायां क्रियमाणायां दिनपिंडस्तु सएव केवलंगुणक एवं चंद्रादीनां ग्राह्य इति यथासूर्यपिंडः १०८ चंद्रस्यस्वीयमहादशावर्षाणि १० तेन गुणितांकाः १०८० अग्रेपूर्ववज्ज्ञेयम्.

अथ सूर्यमध्येसूर्यव्यंतरं योगमास ३ दिन १८

सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	०	०	०	०	०	०	मास.
५	९	६	१६	१४	१७	१५	६	१८	दिनानि.
२४	०	१८	१२	२४	६	१८	१८	०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्येचन्द्रव्यंतरं योगमास ६ दिन०

चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	ग्रहाः
०	०	०	०	०	०	०	१	०	मास.
१५	१०	२७	२४	२८	२५	१०	०	९	दिनानि.
०	३०	०	०	३०	३०	३०	०	०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्ये भौमव्यंतरं योगमास ४ दिन ६

मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	ग्रहाः
०	०	०	०	०	०	०	०	०	मास.
७	१८	१६	१९	१७	७	२१	६	१०	दिनानि.
२१	५४	४८	५७	५१	२१	०	१८	३०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्येराहुव्यंतरं योगमासा: १० दिनानि २४

रा.	बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	ग्रहाः
१	१	१	१	०	१	०	०	०	मास.
१८	१३	२१	१५	१८	२४	१६	२७	१८	दिनानि.
३६	१२	१८	५४	५४	०	१२	०	५४	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्ये गुरुव्यंतरं मासाः ९ दिनानि १८

बृ.	श.	बु.	के.	शु.	सू.	च.	मं.	रा.	ग्रहाः
१	१	१	०	१	०	०	०	१	मास.
८	१५	१०	१६	१८	१४	२४	१६	१३	दिनानि.
२४	३६	४८	४८	०	२४	०	४८	१२	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्ये शनिव्यंतरं योगमास ११ दिनानि १२

श.	बु.	के.	शु.	सू.	चं.	म.	रा.	बृ.	ग्रहाः
१	१	०	१	०	०	०	१	१	मास.
२४	१८	१९	२७	१७	२८	१९	२१	१५	दिनानि.
९	२७	५७	०	६	३०	५७	१८	३६	घटय.
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्ये बुधव्यंतरं योगमासा १० दिनानि ६

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
१	०	१	०	०	०	१	१	१	मास.
१३	१७	२१	१५	२५	१७	१५	१०	१८	दिनानि.
२१	५१	०	१८	३०	५१	५४	४८	२७	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्ये केतुव्यंतरं योगमास ४ दिनानि ६

के.	शु.	सू.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	०	०	०	०	०	०	०	०	मास.
७	२१	६	१०	७	१८	१६	१९	१७	दिनानि.
२१	०	१८	३०	२१	५४	४८	५७	५१	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ सूर्यमध्येभृगुव्यंतरं योगमासाः १२ दिनानि०

शु.	सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
२	०	१	०	१	१	१	१	०	मास.
०	१८	०	२१	२४	१८	२७	२१	२१	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये चंद्रव्यंतरम्.

चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	ग्रहाः
०	०	१	१	१	१	०	१	०	मास.
२५	१७	१५	१०	१७	१२	१७	२०	१५	दिनानि.
०	३०	०	०	३०	३०	३०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये भौमव्यंतरम्.

मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	ग्रहाः
०	१	०	१	०	०	१	०	०	मास.
१२	१	२८	३	२९	१२	५	१०	१७	दिनानि.
१५	३०	०	१५	४५	१५	०	३०	३०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये राहुव्यंतरम्.

रा.	बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	ग्रहाः
२	२	२	२	१	३	०	१	१	मास.
२१	१२	२५	१६	१	०	२७	१५	१	दिनानि.
०	०	३०	३०	३०	०	०	०	३०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये गुरुव्यंतरम्.

गु.	श.	बु.	के.	शु.	सू.	चं.	मं.	रा.	ग्रहाः
२	२	२	०	२	०	१	०	२	मासाः
४	१६	८	२८	२०	२४	१०	२८	१२	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये शनिव्यंतरम्.

श.	बु.	के.	शु.	सू.	चं.	मं.	रा.	बृ.	ग्रहाः
३	२	१	३	०	१	१	२	२	मास.
०	२०	३	५	२८	१७	३	२५	१६	दिनानि.
१५	४५	१५	०	३०	३०	१५	३०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये बुधव्यंतरम्.

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
२	०	२	०	१	०	२	२	२	मास.
१२	२९	२५	२५	१२	२९	१६	८	२०	दिनानि.
१५	४५	०	३०	३०	४५	३०	०	४५	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये केतुव्यंतरम्.

के.	शु.	सू.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	१	०	०	०	१	०	१	०	मास.
१२	५	१०	१७	१२	१	२८	३	२९	दिनानि.
१५	०	३०	३०	१५	३०	०	१५	४५	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये भृगुव्यंतरम्.

शु.	सू.	च.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
३	१	१	१	३	२	३	२	१	मास.
१०	०	२०	५	०	२०	५	२५	५	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ चंद्रमध्ये सूर्यव्यंतरम्.

सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	०	०	०	०	०	१	मास.
९	१५	१०	२७	२४	२८	२५	१०	०	दिनानि.
०	०	३०	०	०	३०	३०	३०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

[illegible]

अथ भौममध्ये भौमव्यंतरम्.

मं.	रा.	बृ.	श.	बु.	क.	शु.	र.	चं.	ग्रहाः
[illegible]	०	०	०	०	०	०	०	०	मास.
८	२२	१९	२३	२०	८	२४	७	१२	दिनानि.
३४	३	३६	१६	४९	३४	३०	२१	१५	घट्यः
३०	०	०	३०	३०	३०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये राहुव्यंतरम्.

रा.	बृ.	श.	बु.	क.	शु.	र.	चं.	म.	ग्रहाः
१	१	१	१	०	२	०	१	०	मास.
२६	२०	२९	२३	२२	३	१८	१	२२	दिनानि.
४२	२४	५१	३३	३	०	५४	३०	३	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये गुरुव्यंतरम्.

बृ.	श.	बु.	क.	शु.	सू.	चं.	मं.	रा.	ग्रहाः
१	१	१	०	१	०	०	०	१	मास.
१४	२३	१७	१९	२६	१६	२८	१९	२०	दिनानि.
४८	१२	३६	३६	०	४८	०	३६	२४	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये शनिव्यंतरम्.

श.	बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	ग्रहाः
२	१	०	२	०	१	०	१	१	मास.
३	२६	२३	६	१९	३	२३	२९	२३	दिनानि.
१०	३१	१६	३०	५७	१५	१६	५१	१२	घट्यः
३०	३०	३०	०	०	०	३०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये बुधव्यंतरम्.

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
[illegible]	०	१	०	०	०	१	१	१	मास.
२०	२०	२९	१७	२९	२०	२३	१७	२६	दिनानि.
३४	४९	३०	५१	४५	४९	३३	३६	३१	घट्यः
३०	३०	०	०	०	३०	०	०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये केतुव्यंतरम्.

के.	शु.	र.	चं.	म.	रा.	बृ.	श.	बु.	ग्रहाः
०	०	०	०	०	०	०	०	०	मास.
८	२४	७	१२	८	२२	१९	२३	२०	दिनानि.
३४	३०	२१	१५	३४	३	३६	१६	४९	घट्यः
३०	०	०	०	३०	०	०	३०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये भृगुव्यंतरम्.

शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
२	०	१	०	२	१	२	१	०	मासाः
१०	२१	५	२४	३	२६	६	२९	२४	दिनानि.
०	०	०	३०	०	०	३०	३०	३०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये सूर्यव्यंतरम्.

र.	च.	मं.	रा.	बृ.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	०	०	०	०	०	०	मासाः
६	१०	७	१८	१६	१९	१७	७	२१	दिनानि.
१८	३०	२१	५४	४८	५७	५१	२१	०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भौममध्ये चन्द्रव्यंतरम्.

चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	र.	ग्रहाः
०	०	१	०	१	०	०	१	०	मासाः
१७	१२	१	२८	३	२९	१२	५	१०	दिनानि.
३०	१५	३०	०	१५	४५	१५	०	३०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये राहुव्यंतरम्.

रा.	बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	ग्रहाः
४	४	५	४	१	५	१	२	१	मासाः
२५	९	३	१७	२६	१२	१८	२१	२६	दिनानि.
४८	३६	५४	४२	४२	०	३६	०	४२	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये गुरुव्यंतरम्.

बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	रा.	ग्रहाः
३	४	४	१	४	१	२	१	४	मासाः
२५	१६	२	२०	२४	१३	१२	२०	९	दिनानि.
१२	४८	२४	२४	०	१२	०	२४	३६	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये शनिव्यंतरम्.

श.	बु.	क.	शु.	सू.	च.	म.	रा.	बृ.	ग्रहाः
५	४	१	५	१	२	१	५	४	मासाः
१२	२५	२९	२१	२१	२५	२९	३	१६	दिनानि.
२७	२१	५१	०	१८	३०	५१	५४	४८	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये बुधव्यंतरम्.

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
४	१	५	१	२	१	४	४	४	मासाः
१०	२३	३	१५	१६	२३	१७	२	२५	दिनानि.
३	३३	०	५४	३०	३३	४२	२४	२१	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये केतुव्यंतरम्.

के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	२	०	१	०	१	१	१	१	मासाः
२२	३	१८	१	२२	२६	२०	२९	२३	दिनानि.
३	०	५४	३०	३	४२	२४	५१	३३	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये भृगुव्यंतरम्.

शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
६	१	३	२	५	४	५	५	२	मासाः
०	२४	०	३	१२	२४	२१	३	३	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये सूर्यव्यंतरम्.

र.	च.	मं.	रा.	गु.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	१	१	१	१	०	१	मासाः
१६	२७	१८	१८	१३	२१	१५	१८	२४	दिनानि.
१२	०	५४	३६	१२	१८	५४	५४	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये चंद्रव्यंतरम्..

चं.	म.	रा.	बृ.	श.	बु.	के.	शु.	र.	ग्रहाः
१	१	२	२	२	२	१	३	०	मासाः
१५	१	२१	१२	२५	१६	१	०	२७	दिनानि.
०	३०	०	०	३०	३०	३०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये भौमव्यंतरम्.

मं.	रा.	बृ.	श.	बु.	के.	शु.	र.	चं.	ग्रहाः
०	१	१	१	१	०	२	०	१	मासाः
२२	२६	२०	२९	२३	२२	३	१८	१	दिनानि.
३	४२	२४	५१	३३	३	०	५४	३०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ राहुमध्ये गुरुव्यंतरम्.

गु.	श.	बु.	के.	शु.	सू.	चं.	मं.	रा.	ग्रहाः
३	४	३	१	४	१	२	१	३	मासाः
१२	१	१८	१४	८	८	४	१४	२५	दिनानि.
२४	३६	४८	४८	०	२४	०	४८	१२	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलक्षने.

अथ राहु मध्ये शनिव्यंतरम्.

श.	बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	ग्रहाः
४	४	१	५	१	२	१	४	४	मासाः
२४	९	२३	२	१५	१६	२३	१६	१	दिनानि.
२४	१२	१२	०	३६	०	१२	४८	३६	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

रा.दृ. अथ गुरुमध्ये बुधव्यंतरम्.

बु.	के.	शु.	सू.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
३	१	४	१	२	१	४	३	४	मासाः
२५	१७	१६	१०	८	१७	२	१८	९	दिनानि.
३६	३६	०	४८	०	३६	२४	४८	१२	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विरलानि.

रा.दृ. अथ गुरुमध्ये केतुव्यंतरम्.

के.	शु.	सू.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	१	०	०	०	१	१	१	१	मासाः
१९	२६	१६	२८	१९	२०	१४	२३	१७	दिनानि.
३६	०	४८	०	३६	२४	४८	१२	३६	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

रा.दृ. अथ गुरुमध्ये भृगुव्यंतरम्.

शु.	सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
५	१	२	१	४	४	५	४	१	मासाः
१०	१८	२०	२६	२४	८	२	१६	२६	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ गुरुमध्ये सूर्यव्यंतरम्.

सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	१	१	१	१	०	१	मासाः
१४	२४	१६	१३	८	१५	१०	१६	१८	दिनानि.
२४	०	४८	१२	२४	३६	४८	४८	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ गुरुमध्ये चन्द्रव्यंतरम्.

चं.	मं.	रा.	बृ.	श.	बु.	क.	शु.	र.	ग्रहाः
१	०	२	२	२	२	०	२	०	मासाः
१०	२८	१२	४	१६	८	२८	२०	२४	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ गुरुमध्ये भौमव्यंतरम्.

मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	ग्रहाः
०	१	१	१	१	०	१	०	०	मासाः
१९	२०	१४	२३	१७	१९	२६	१६	२८	दिनानि.
३६	२४	४८	१२	३६	३६	०	४८	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ गुरुमध्ये राहुव्यंतरम्.

रा.	बृ.	श.	बु.	क.	शु.	र.	च.	मं.	ग्रहाः
४	३	४	४	१	४	१	२	१	मासाः
९	२५	१६	२	२०	२४	१३	१२	२०	दिनानि.
३६	१२	४८	२४	२४	०	१२	०	२४	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये शनिव्यंतरम्.

श.	बु.	क.	शु.	र.	चं.	मं.	रा.	बृ.	ग्रहाः
५	५	२	६	१	३	२	५	४	मासाः
२१	३	३	०	२४	०	३	१२	२४	दिनानि.
२८	२५	१०	३०	९	१५	१०	२७	२४	घट्यः
३०	३०	३०	०	०	०	३०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये बुधव्यंतरम्.

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
४	१	५	१	२	१	४	४	५	मासाः
१७	२६	११	१८	२०	२६	२५	९	३	दिनानि.
१६	३१	३०	२७	४५	३१	२१	१२	२५	घट्यः
३०	३०	०	०	०	३०	०	०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये केतुव्यंतरम्.

के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	२	०	१	०	१	१	२	१	मासाः
२३	६	१९	३	२३	२९	२३	३	२६	दिनानि.
१६	३०	५७	१५	१६	५१	१२	१०	३१	घट्यः
३०	०	०	०	३०	०	०	३०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये भृगुव्यंतरम्.

शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
६	१	३	२	५	५	६	५	२	मासाः
१०	२७	५	६	२१	२	०	११	६	दिनानि.
०	०	०	३०	०	०	३०	३०	३०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये सूर्यव्यंतरम्.

र.	चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	१	१	१	१	०	१	मासाः
१७	२८	१९	२१	१५	२४	१८	१९	२७	दिनानि.
६	३०	५७	१८	३६	९	२७	५७	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये चन्द्रव्यंतरम्.

चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	र.	ग्रहाः
१	१	२	२	३	२	१	३	०	मासाः
१७	३	२५	१६	०	२०	३	५	२८	दिनानि.
३०	१५	३०	०	१५	४५	१५	०	३०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये भौमव्यंतरम्.

मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	ग्रहाः
०	१	१	२	१	०	२	०	१	मासाः
२३	२९	२३	३	२६	२३	६	१९	३	दिनानि.
१६	५१	१२	१०	३१	१६	३०	५७	१५	घट्यः
३०	०	०	३०	३०	३०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये राहुव्यंतरम्.

रा.	बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	ग्रहाः
५	४	५	४	१	५	१	२	१	मासाः
३	१६	१२	२५	२९	२१	२१	२५	२९	दिनानि.
५४	४८	२७	२१	५१	०	१८	३०	५१	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ शनिमध्ये गुरुव्यंतरम्.

बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	रा.	ग्रहाः
४	४	४	१	५	१	२	१	४	मासाः
१	२४	९	२३	२	१५	१६	२३	१६	दिनानि.
३६	२४	१२	१२	०	३६	०	१२	४८	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये बुधप्र्यंतरम.

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
४	१	४	१	२	१	४	३	४	मासाः
२	२०	२४	१३	१२	२०	१०	२५	१७	दिनानि.
४९	३४	३०	२१	१५	३४	३	३६	१६	घटयः
३०	३०	०	०	०	३०	०	०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये केतुप्र्यंतरम्.

के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	१	०	०	०	१	१	१	१	मासाः
२०	२९	१७	२९	२०	२३	१७	२६	२०	दिनानि.
४९	३०	५१	४५	४९	२३	३६	३१	३४	घटयः
३०	०	०	०	३०	०	०	३०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये शुक्रप्र्यंतरम्.

शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
५	१	२	१	५	४	५	४	१	मासाः
२०	२१	२५	२९	३	१६	११	२४	२९	दिनानि.
०	०	०	३०	०	०	३०	३०	३०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये सूर्यप्र्यंतरम्.

र.	च.	मं.	रा.	बृ.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	१	१	१	१	०	१	मासाः
१५	२५	१७	१५	१०	१८	१३	१७	२१	दिनानि.
१८	३०	५१	५४	४८	२७	२१	५१	०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्य चंद्रप्र्यंतरम्.

चं.	म.	रा.	बृ.	श.	बु.	क.	शु.	र.	ग्रहाः
१	०	२	२	२	२	०	२	०	मासाः
१२	२९	१६	८	२०	१२	२९	२५	२५	दिनानि.
३०	४५	३०	०	४५	१५	४५	०	३०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये भौमप्र्यंतरम्.

मं.	रा.	बृ.	श.	बु.	क.	शु.	र.	चं.	ग्रहाः
०	१	१	१	१	०	१	०	०	मासाः
२०	२३	१७	२६	२०	२०	२९	१७	२९	दिनानि.
४९	३३	३६	३१	३४	४९	३०	५१	४५	घटयः
३०	०	०	३०	३०	३०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये राहुव्यंतरम्.

रा.	बृ.	श.	बु.	क.	शु.	र.	चं.	मं.	ग्रहाः
४	४	४	४	१	५	१	२	१	मासाः
१७	२	२५	१०	२३	३	१५	१६	२३	दिनानि.
४२	२४	२१	३	३३	०	५४	३०	३३	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये गुरुव्यंतरम्.

बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	रा.	ग्रहाः
३	४	३	१	४	१	२	१	४	मासाः
१९	९	२५	१७	१६	१०	८	१७	२	दिनानि.
४८	१२	३६	३६	०	४८	०	३६	२४	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ बुधमध्ये शनिव्यंतरम्.

श.	बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	ग्रहाः
५	४	१	५	१	२	१	४	४	मासाः
३	१७	२६	११	१८	२०	२६	२५	९	दिनानि.
२५	१६	३१	३०	२७	४५	३१	२१	१२	घट्यः
३०	३०	३०	०	०	०	३०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये केतुव्यंतरम्.

के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	०	०	०	०	०	०	०	०	मासाः
८	२४	७	१२	८	२२	१९	२३	२०	दिनानि.
३४	३०	२१	१५	३४	३	२६	१६	४९	घट्यः
३०	०	०	०	३०	०	०	३०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये भृगुव्यंतरम्.

शु.	सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
२	०	१	०	२	१	२	१	०	मासाः
१०	२१	५	२४	३	२६	६	२९	२४	दिनानि.
०	०	०	३०	०	०	३०	३०	३०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये सूर्यव्यंतरम्.

सू.	चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	ग्रहाः
०	०	०	०	०	०	०	०	०	मासाः
६	१०	७	१८	१६	१९	१७	७	२१	दिनानि.
१८	३०	२१	५४	४८	५७	५१	२१	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये चंद्रन्यंतरम्.

चं.	मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	ग्रहाः
०	०	१	०	१	०	०	१	०	मासाः
१७	१२	१	२८	३	२९	१२	५	१०	दिनानि.
३०	१५	३०	०	१५	४५	१५	०	३०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये भौमन्यंतरम्.

मं.	रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	ग्रहाः
०	०	१	०	०	०	०	०	०	मासाः
८	२२	१९	२३	२०	८	२४	७	१२	दिनानि.
३४	३	३६	१६	४९	३४	३०	२१	१५	घट्यः
३०	०	०	३०	३०	३०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये राहुन्यंतरम्.

रा.	बृ.	श.	बु.	के.	शु.	सू.	चं.	मं.	ग्रहाः
१	१	१	१	०	२	०	१	०	मासाः
२६	२०	२९	२३	२२	३	१८	१	२२	दिनानि.
४२	२४	५१	३३	३	०	५४	३०	३	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये गुरुन्यंतरम्.

बृ.	श.	बु.	के.	शु.	सू.	चं.	मं.	रा.	ग्रहाः
१	१	१	०	१	०	०	०	१	मासाः
१४	२३	१७	१९	२६	१६	२८	१९	२०	दिनानि.
४८	१२	३६	३६	०	४८	०	३६	२४	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये शनिन्यंतरम्.

श.	बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	ग्रहाः
२	१	०	२	०	१	०	१	१	मासाः
३	२६	२३	६	१९	३	२३	२९	२३	दिनानि.
१०	३१	१६	३०	५७	१५	१६	५१	१२	घट्यः
३०	३०	३०	०	०	०	३०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ केतुमध्ये बुधन्यंतरम्.

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
१	०	१	०	०	०	१	१	१	मासाः
२०	२०	२९	१७	२९	२०	२३	१७	२६	दिनानि.
३४	४९	३०	५१	४५	४९	३३	३६	३१	घट्यः
३०	३०	०	०	०	३०	०	०	३०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये भृगुव्यंतरम्.

शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	के.	ग्रहाः
६	२	३	२	६	५	६	५	२	मासाः
२०	०	१०	१०	०	१०	१०	२०	१०	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये सूर्यव्यंतरम्.

र.	चं.	मं.	रा.	बृ.	श.	बु.	क.	शु.	ग्रहाः
०	१	०	१	१	१	१	०	२	मासाः
१८	०	२१	२४	१८	२७	२१	२१	०	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये चन्द्रव्यंतरम्.

चं.	मं.	रा.	बृ.	श.	बु.	क.	शु.	सू.	ग्रहाः
१	१	३	२	३	२	१	३	१	मासाः
२०	५	०	२०	५	२५	५	१०	०	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये भौमव्यंतरम्.

मं.	रा.	बृ.	श.	बु.	के.	शु.	र.	चं.	ग्रहाः
०	२	१	२	१	०	२	०	१	मासाः
२४	३	२६	६	२९	२४	१०	२१	५	दिनानि.
३०	०	०	३०	३०	३०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये राहुव्यंतरम्.

रा.	बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	ग्रहाः
५	४	५	५	२	६	१	३	२	मासाः
१२	२४	२१	३	३	०	२४	०	३	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये गुरुव्यंतरम्.

बृ.	श.	बु.	के.	शु.	र.	चं.	मं.	रा.	ग्रहाः
४	५	४	१	५	१	२	१	४	मासाः
८	२	१६	२६	१०	१८	२०	२६	२४	दिनानि.
०	०	०	०	०	०	०	०	०	घट्यः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये शनिव्यंतरम्.

श.	बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	ग्रहाः
६	५	२	६	१	३	२	५	५	मासाः
०	११	६	१०	२७	५	६	२१	२	दिनानि.
३०	३०	३०	०	०	०	३०	०	०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि

अथ भृगुमध्ये बुधव्यंतरम्.

बु.	के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	ग्रहाः
४	१	५	१	२	१	५	४	५	मासाः
२४	२९	२०	२१	२५	२९	३	१६	११	दिनानि.
३०	३०	०	०	०	३०	०	०	३०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ भृगुमध्ये केतुव्यंतरम्.

के.	शु.	र.	चं.	मं.	रा.	बृ.	श.	बु.	ग्रहाः
०	२	०	१	०	२	१	२	१	मासाः
२४	१०	२१	५	२४	३	२६	६	२९	दिनानि.
३०	०	०	०	३०	०	०	३०	३०	घटयः
०	०	०	०	०	०	०	०	०	पलानि.
०	०	०	०	०	०	०	०	०	विपलानि.

अथ विदशाफलं प्रारभ्यते.

लग्नेशरोगनाथौ च निधनेशेन संयुतौ ॥ मारकेशयुतौ दृष्टौ रोगनाथांशगौ यदि ॥ २ ॥ तस्य भुक्तौ विजानीयाद्व्यथां शस्त्रेण वै नृणाम् ॥ शुभयोगेन बाधः स्यात्पापयोगेन मृत्युकृत् ॥ ३ ॥ जीवांशे जीववर्गेण मूलांशे मूलवर्गतः ॥ रोगादिप्रवदेत्तत्र तेषां भुक्तिवशात्फलम् ॥ ४ ॥ विलग्ननाथस्य नवांशनाथो रंध्रांशकस्याधिपतिश्च युक्तौ ॥ मेषस्य षड्वर्गगतौ यदा तौ भुक्तौ तयोर्जंबुकभीतितो बुधः ॥ ५ ॥ वृषवर्गगतौ तौ चेद्वृश्चिकाद्भयमादिशेत् ॥ युग्मवर्गगतौ भीतिः कपिजा नात्र संशयः ॥ ६ ॥ कुलीरवर्गगौ तौ चेद्रासभाद्भीतिमादिशेत् ॥ सिंहवर्गगतौ तौ चेद्भुक्तौ स्याद्व्याघ्रजं भयम् ॥ ७ ॥ कन्यावर्गगतौ तौ चेद्भल्लूकाद्भयमंजसा ॥ वणिग्वर्गगतौ तौ चेत्तद्भुक्तौ स्याद्गजाद्भयम् ॥ ८ ॥ अलिवर्गगतौ येषां तेषां स्याद्गजतो भयम् ॥

यदि कार्मुकवर्गस्थौ भुक्तौ स्याद्रथजं भयम् ॥ ९ ॥ मृगवर्गगतौ
तौ चेद्भुक्तौ करभजं भयम् ॥ कुंभवर्गगतौ तौ चेद्गोलांगूलाद्भयं
भवेत् ॥ १० ॥ मीनवर्गगतौ भुक्तौ तेषां स्याद्ग्राहजं भयम् ॥ एवं
देहादिभावानां षड्वर्गगतिभिः फलम् ॥ सम्यग्विचार्य मतिमान्प्र-
वदेत्कालवित्तमः ॥ ११ ॥

अथ सूर्यादिसर्वग्रहाणां विदशाफलमाह.

(सू. सू.) उद्वेगोथ बलं वित्तदारार्तिः शिरसि व्यथा ॥ ब्राह्म-
णेन विवादश्च सूर्यः स्वविदशां गतः ॥ १२ ॥ (सू. चं.) उद्वेगं
कलहं चित्तपीडां स्वहातिमद्भुताम् ॥ मणिमुक्तादिनाशश्च विदिशासु
रवेः शशी ॥ १३ ॥ (सू. मं.) राजभीतिं शस्त्रभीतिं बंधनं बहुसं-
कटम् ॥ शत्रुवह्निकृता पीडा स्वदशासु रवेः कुजः ॥ १४ ॥ (सू. रा.)
श्लेष्मव्याधिं शस्त्रभीतिं धनहानिं महद्भयम् ॥ राजभंगस्तथा त्रासो
विदशासु रवेस्तमः ॥ १५ ॥ (सू. गु.) शत्रुनाशं जयं वृद्धिं वस्त्रहेमा-
दिभूषणम् ॥ अश्वयानादि ददते गोधनं च रवेर्गुरुः ॥१६॥ (सू. श.)
धनहानिः पशोः पीडा महोद्वेगो महारुजः ॥ अशुभं सर्वमाप्नोति
विदशासु रवेः शनिः ॥१७॥ (सू. बु.) विद्यालाभो बंधुसंगो भोज्य-
प्राप्तिर्धनागमः ॥ धर्मलाभो नृपात्पूजा विदशासु रवेर्बुधः ॥ १८ ॥
(सू. के.) प्राणभीतिर्महाहानी राजभीतिश्च विग्रहः ॥ शत्रुणा च महा-
वादो विदशासु रवेः शिखी ॥ १९ ॥ (सू. शु.) दिनानि समरूपा-
णि लाभोऽप्यल्पो भवेदिह ॥ स्वल्पा च सुखसंपत्तिर्विदशासु रवे-
र्भृगुः ॥ २० ॥

अथ चंद्राविदशाफलमाह।

(चं. चं.) भूभोज्यधनसंप्राप्ती राजपूजामहत्सुखम् ॥ महालाभः
स्त्रियो भोगो विदशासु स्वयं शशी ॥ २१ ॥ (चं. मं.) मतिवृद्धिर्म-

हापूज्यः सुखं बंधुजनैः सह ॥ धनागमं शत्रुभयं चंद्रस्यांतर्गतः कुजः ॥ २२ ॥ (चं. रा.) भवेत्कल्याणसंपत्ती राजवित्तसमागमः ॥ अशुभैरल्पमृत्युश्च चंद्रचंद्रांतरे तमः ॥ २३ ॥ (चं. बृ.) वस्त्रलाभो महातेजो ब्रह्मज्ञानं च सद्गुरोः ॥ राज्यालंकरणावाप्तिश्चंद्रचंद्रांतरे गुरुः ॥ २४ ॥ (चं. के.) दुर्दिने लभते पीडा वातपित्ताद्विशेषतः ॥ धनधान्ययशोहानिश्चंद्रचंद्रांतरे शनिः ॥ २५ ॥ (चं. बु.) पुत्रजन्महयप्राप्तिर्विद्यालाभो महोन्नतिः ॥ शुक्लवस्त्रान्नलाभश्च चंद्रचंद्रांतरे बुधः ॥ २६ ॥ (चं. के.) ब्राह्मणेन समं युद्धमपमृत्युः सुखक्षयः ॥ सर्वत्र जायते क्लेशश्चंद्रचंद्रांतरे शिखी ॥ २७ ॥ (चं. शु.) धनलाभो महत्सौख्यं कन्याजन्म सुभोजनम् ॥ प्रीतिश्च सर्वलोकेभ्यश्चंद्रचंद्रांतरे भृगुः ॥ २८ ॥ (चं. सू.) अन्नागमो वस्त्रलाभः शत्रुहानिः सुखागमः ॥ सर्वत्र विजयप्राप्तिश्चंद्रचंद्रांतरे रविः ॥ २९ ॥

अथ भौमविदशाफलमाह ।

(मं० मं०) शत्रुभीतिं कालिं घोरमकस्माज्जायते भयम् ॥ रक्तस्रावोपमृत्युश्च विदशासु स्वयं कुजः ॥ ३० ॥ (मं० रा०) बंधनं राजभंगं चं धनहानिः कुभोजनम् ॥ कलहः शत्रुभिर्नित्यं भौमभौमांतरे तमः ॥ ३१ ॥ (मं० गु०) मतिनाशं तथा दुःखं संतापः कलहो भवेत् ॥ विफलं चिंतितं सर्वं भौमभौमान्तरे गुरुः ॥ ३२ ॥ (मं० श०) स्वामिनाशस्तथा पीडा धनहानिर्महाभयम् ॥ वैकल्यं कलहस्त्रासो भौमभौमान्तरे शनिः ॥ ३३ ॥ (मं० बु०) सर्वथा बुद्धिनाशश्च धनहानिर्ज्वर स्तनौ ॥ वस्त्रान्नसुहृदां नाशो भौमभौमांतरे बुधः ॥ ३४ ॥ (मं० के०) आलस्यं च शिरःपीडा पापरोगापमृत्युकृत् ॥ राजभीतिः शस्त्रघातो भौमभौमान्तरे शिखी ॥ ३५ ॥ (मं० शु०) चांडालात्संकटस्त्रासो राजशस्त्रभयं भवेत् ॥ अतिसारोथ वमनं भौमभौमांतरे भृगुः ॥ ३६ ॥ (मं० सू०) भूमिलाभोर्थसंपत्तिः

संतोषो मित्रसंगतिः ॥ सर्वत्र सुखमाप्नोति भौमभौमांतरे रविः ॥ ३७ ॥ (मं० बु०) याम्यां दिशि भवेल्लाभः सितवस्त्रविभूषणम् ॥ संसिद्धिः सर्वकार्याणां भौमभौमांतरे शशी ॥ ३८ ॥

अथ राहोर्विदशाफलमाह ।

(रा० रा०) बंधनं बहुधा रोगो बाहुघातं सुहृद्भयम् ॥ अकस्मादापदो यान्ति राहोर्जलाग्नितो भयम् ॥ ३९ ॥ (रा० बृ०) सर्वत्र लभते लाभं गजाश्वं च धनागमम् ॥ राजसन्मानदं राज्यं भवेद्राह्वन्तरे गुरुः ॥ ४० ॥ (रा० श०) बंधनं जायते घोरं सुखहानिर्महद्भयम् ॥ प्रत्यहं वातपीडा च राहो राह्वंतरे शनिः ॥ ४१ ॥ (रा० बु०) सर्वत्र बहुधा लाभः स्त्रीसमश्च विशेषतः ॥ परदेशगतः सिद्धी राहो राह्वंतरे बुधः ॥ ४२ ॥ (रा० के०) बुद्धिनाशो भयं विघ्नं धनहानिर्महद्भयम् ॥ सर्वत्र कलहोद्वेगो राहो राह्वंतरे शिखी ॥४३॥ (रा० शु०) योगिनीभ्यो भयं भूपादश्वहानिः कुभोजनम् ॥ स्त्रीनाशः कुलजं शोकं राहो राह्वंतरे सितः ॥ ४४ ॥ (रा० सू०) ज्वररोगो महाभीतिः पुत्रपौत्रादिपीडनम् ॥ अल्पमृत्युः प्रमादश्च राहो राह्वंतरे रविः ॥ ४५ ॥ (रा० चं०) उद्वेगकलहौ चिंता मानहानिर्महद्भयम् ॥ पितुर्विकलता देहे राहो राह्वंतरे शशी ॥ ४६ ॥ (रा० मं०) भगंदरकृता पीडा रक्तपित्तप्रपीडनम् ॥ अर्थहानिर्महोद्वेगो राहो राह्वंतरेः कुजः ॥ ४७ ॥

अथ गुरोर्विदशाफलमाह ।

(बृ० बृ०) हेमलाभो धान्यवृद्धिः कल्याणं च फलोदयः ॥ बहुभावं गृहे बुद्धिं जीवजीवांतरे गुरुः ॥ ४८ ॥ (गु० श०) गोभूमिहयलाभः स्यात्सर्वत्र सुखसाधनम् ॥ संग्रहो ह्यन्नपानादि गुरोर्गुर्वंतरा शनिः ॥ ४९ ॥ (गु० बु०) विद्यालाभो वस्त्रलाभो ज्ञानलाभः समौक्तिकः ॥ सुहृदां संगमः स्नेहो जीवजीवांतरा बुधः ॥ ५० ॥

(बृ० के०) जलभीतिस्तथा चौर्यं नंधनं कलहो भवेत् ॥ अल्पमृत्युर्भयं घोरं जीवजीवांतरे ध्वजः ॥ ५१ ॥ (बृ० शु०) नानाविद्यार्थसंप्राप्तिर्हेमवस्त्रविभूषणम् ॥ लभते क्षेमसंतोषं जीवजीवांतरे कविः ॥ ५२ ॥ (बृ० सू०) नृपाल्लाभस्तथा मित्रात्पितृतो मातृतोपि वा ॥ सर्वत्र लभते पूजां जीवजीवांतरा रविः ॥ ५३ ॥ (बृ० चं०) सर्वदुःखविमोक्षश्च मुक्तालाभो हयस्य च ॥ सिध्यंति सर्वकार्याणि जीवजीवांतरे शशी ॥ ५४ ॥ (बृ० मं०) शस्त्रभीतिर्गुदे पीडा वह्निमांद्यमजीर्णता ॥ पीडा शत्रुकृता भूरि जीवजीवांतरे कुजः ॥ ५५ ॥ (बृ० रा०) चांडालेन विरोधः स्याद्भयं तेभ्यो रतिग्रहः ॥ कष्टं स्याद्व्याधिशत्रुभ्यो जीवजीवांतरे तमः ॥ ५६ ॥

अथ शनिविदशाफलमाह ।

(श० श०) देहपीडा कलेर्भीतिर्भयमंत्यजलोकतः ॥ विदेशगमनं दुःखं शनेः शन्यंतरे शनिः ॥ ५७ ॥ (श० बु०) बुद्धिनाशः कलेर्भीतिमन्नपानादिहानिकृत् ॥ धनहानिर्भयं शत्रोः शनेः शन्यंतरे बुधः ॥ ५८ ॥ (श० के ०) बंधुशत्रुगृहे जातो वर्णहानिर्बहुक्षुधा ॥ चित्ते चिंता भयं त्रासः शनेः सौरांतरे शिखी ॥ ५९ ॥ (श० शु०) चिंतिते फलितं वस्तु कल्याणं स्वजनं जने ॥ मनुष्यकृतिता लाभः शनेः शन्यंतरे भृगुः ॥ ६० ॥ (श० सू०) राजतेजोधिकारित्वं स्वगृहे जायते कलिः ॥ ज्वरादिव्याधिपीडा च कोणे कोणांतरे रविः ॥ ६१ ॥ (श० चं०) स्फीतबुद्धिर्महारंभो मंदतेजा बहुव्ययः ॥ बहुस्त्रीभिः समं भोगं कोणे कोणांतरे शशी ॥ ६२ ॥ (श० मं ०) तेजोहानिः पुत्रघातो वह्निभीती रिपोर्भयम् ॥ वातपित्तकृता पीडा कोणे कोणांतरे कुजः ॥ ६३ ॥ (श० रा०) धननाशो वस्त्रहानिर्भूमिनाशो भयं भवेत् ॥ विदेशगमनं मृत्युः

कोणे कोणांतरे कुजः॥६४॥(श०बृ०) गृहेषु स्त्रीकृतं छिद्रं ह्यसमर्थो निरीक्षणे ॥ अथ वा कलिमुद्वेगं शनेः सौरांतरे गुरुः ॥ ६५ ॥

अथ बुधाविदशाफलम् ।

(बु० बु०) बुद्धिर्विद्यार्थलाभो वा वस्त्रलाभो महत्सुखम् ॥ स्वर्णादिधनलाभः स्यात्सौम्यसौम्यांतरे बुधः ॥ ६६ ॥ (श० के०) कठिनान्नस्य संप्राप्तिरुदरे रोगसंभवः ॥ कामलं रक्तपित्तं च सौम्यसौम्यांतरे शिखी ॥ ६७ ॥ (बु० शु०) उत्तरस्यां भवेल्लाभो हानिः स्यात्तु चतुष्पदात् ॥ अधिकारान्महाप्रीतिः सौम्ये सौम्यांतरे भृगुः ॥ ६८ ॥ (बु० सू०) तेजोहानिर्भवेद्रोगस्तनुपीडा तु मांदवी ॥ जायते चित्तवैकल्यं सौम्यसौम्यांतरे रविः ॥ ६९ ॥ (बु० चं०) स्त्रीलाभश्चार्थसंपत्तिः कन्यालाभो महद्धनम् ॥ लभते सर्वतः सौख्यं सौम्यसौम्यांतरे शशी ॥ ७० ॥ (बु० मं०) धर्मधीर्धनसंप्राप्तिश्चौराग्न्यादिप्रपीडनम् ॥ रक्तवस्त्रं शस्त्रघातः सौम्यसौम्यांतरे कुजः ॥ ७१ ॥ (बु० रा०) कलहो जायते स्त्रीभिरकस्माद्भयसंभवः ॥ राजशस्त्रकृता भीतिः सौम्यसौम्यांतरे तमः ॥ ७२ ॥ (बु० बृ०) राज्यं राज्याधिकारी वा पूजा राजसमुद्भवा ॥ विद्याधरान्नगुल्मश्च सौम्यसौम्यांतरे गुरुः ॥ ७३ ॥ (बु० श०) वातपित्तमहापीडा देहघातसमुद्भवा ॥ धननाशमवाप्नोति सौम्यसौम्यांतरे शनिः ॥ ७४ ॥

अथ केतोर्विदशाफलम् ।

(के० के०) अपां समुद्भवोऽकस्माद्देशांतरसमागमः ॥ धननाशोऽल्पमृत्युश्च केतोः केत्वंतरे शिखी ॥ ७५ ॥ (के०शु०) म्लेच्छभीत्यर्थनाशो वा नेत्ररोगः शिरोव्यथा ॥ हानिश्चतुष्पदानां च केतोः केत्वंतरे भृगुः ॥ ७६ ॥ (के० सू०) मित्रैः सह विरोधश्च स्वल्पमृत्युः पराजयः ॥ मतिभ्रंशो विवादश्च केतोः केत्वंतरे रविः ॥ ७७ ॥

(के० चं०) अन्ननाशो यशोहानिर्देहपीडा मतिभ्रमः ॥ आमवातादिवृद्धिश्च केतोः केत्वंतरे शशी ॥ ७८ ॥ (के० मं०) शस्त्रघातेन पातेन पीडितो वह्निपीडया ॥ नीचाद्भीती रिपोः शंका केताः केत्वंतरे कुजः ॥ ७९ ॥ (के० रा०) कामिनीभ्यो भयं भूयात्तथा वैरिसमुद्भवः ॥ क्षुद्रादपि भवेद्भीतिः केतोः केत्वंतरे तमः ॥ ॥ ८० ॥ (के० गु०) धनहानिर्महोत्पातो वस्त्रमित्रविनाशनम् ॥ सर्वत्र लभते क्लेशं केतोः केत्वंतरे गुरुः ॥ ८१ ॥ (के० श०) गोमहिष्यादिमरणं देहपीडा सुहृद्वधः ॥ स्वल्पाल्पलाभकरणं केतोः केत्वंतरे शनिः ॥ ८२ ॥ (के० बु०) बुद्धिनाशो महोद्वेगो विद्याहानिर्महाभयम् ॥ कार्यसिद्धिर्न जायेत केतोः केत्वंतरे बुधः ॥ ८३ ॥

अथ शुक्रविदशाफलमाह ।

(शु० शु०) श्वेताश्वस्त्रमुक्ताद्याः स्वर्णमाणिक्यसंभवः ॥ लभते सुंदरीं नारीं शुक्रे शुक्रांतरे सितः ॥ ८४ ॥ (शु० सू०) वातज्वरः शिरःपीडा राज्ञः पीडा रिपोरपि ॥ जायते स्वल्पलाभोऽपि शुक्रे शुक्रांतरे रविः ॥ ८५ ॥ (शु० चं०) कन्याजन्म नृपाल्लाभो वस्त्राभरणसंयुतः ॥ राज्याधिकारसंप्राप्तिः शुक्रे शुक्रांतरे शशी ॥ ८६ ॥ (शु० मं०) रक्तपित्तादिरोगश्च कलहस्ताडनं भवेत् ॥ महान्क्लेशो भवेदत्र शुक्रे शुक्रांतरे कुजः ॥ ८७ ॥ (शु० बृ०) महद्द्रव्यं महद्राज्यं वस्त्रमुक्तादिभूषणम् ॥ गजाश्वादिपदप्राप्तिः शुक्रे शुक्रांतरे गुरुः ॥ ८८ ॥ (शु० रा०) कलहो जायते स्त्रीभिरकस्माद्भयसंभवः ॥ राजतः शत्रुतः पीडा शुक्रे शुक्रांतरे तमः ॥ ८९ ॥ (शु० श०) खरोष्ट्रछागसंप्राप्तिर्लोहमाषतिलादिकम् ॥ लभते स्वल्पपीडादि शुक्रे शुक्रांतरे शनिः ॥ ९० ॥ (शु० बु०) धनज्ञानमहाँल्लाभो राजराज्याधिकारता ॥ निक्षेपाद्धनलाभोपि शुक्रे शुक्रांतरे बुधः ॥ ९१ ॥

(शु० के०) अल्पमृत्युर्महाघोरादेशादेशांतरागमः ॥ लाभोऽपि जायते मध्ये शुक्रे शुक्रांतरे शिखी ॥ ९२ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे सूर्याद्युपदशाफल-
कथनं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

अथ सूक्ष्मदशाकरणमाह ।

स्वोपदशाघटीवृंदं हतं स्वाब्दग्रहेण च ॥ विंशोत्तरशतेनाप्तं १२० लिप्ता शेषं कलादिकम् ॥ १ ॥

अथ सूक्ष्मदशानयनोदाहरणमाह ।

यस्य ग्रहस्योपदशामध्ये यस्य ग्रहस्य सूक्ष्मदशा क्रियते तदा उपदशामध्ये यावत्परिमिताः मासदिनघटयः तासां सर्वासां घटीवृंदं कृत्वा स्वाब्दैर्गुणिते यथा सूर्यमध्ये चंद्रसूक्ष्मांतरमानीतं तदा सूर्यपिंडं चंद्राब्दै १० गुणितमित्यर्थः । स्वाब्दैर्गुणिते विंशोत्तरशतेनाप्ते लब्धं घटिकाः शेषं षष्टिघ्नं विंशोत्तरशतेनाप्तं लब्धं पलानि शेषं षष्टिघ्नं पूर्ववद्भक्तेर्लब्धम् अक्षराणीति यथा सूर्यस्योपदशा ५ । २४ घटीपिंडः ३२४ स्वदशावर्षेण ६ गुणितो जातः १९४४ अस्य विंशोत्तरशतेनाप्ते लब्धं १६ घटिका शेषं २४ घाटिघ्नं जातं १४४० विंशोत्तरशतेनाप्ते लब्धं पलानि १२ एवं सर्वेषामूह्यम् । दिने त्रिंशद्भिरधिके त्रिंशद्भिस्तष्टे उपरि मासस्थले स्थाप्यः ॥

अथाग्रे उपदशाचक्राणि ।

अथ सूर्योपदशा तन्मध्ये सूर्यसूक्ष्मचक्रं लिख्यते.

ग्रहाः	सूर्य.	चं.	मं	रा.	बृ.	श.	बु.	के.	शु.	यो.
दिना०	०	०	०	०	०	०	०	०	०	३
घटयः	१६	२७	१८	४८	४३	५१	४५	१८	५४	१८
पला०	१२	०	५४	३६	१२	१८	५४	५४	०	०

अथ सूक्ष्मदशाफलम् ।

लग्नेश्वरो रंध्रपतिश्च युक्तौ वृषे वृषांशे वृषभे दृकाणे ॥ स्थितौ भवेतां यदि तौ वृषेण यातान्निमित्तौ मरणस्य वेद्यौ ॥ २ ॥ वृषे युग्मांशगौ तौ चेद्भल्लूकेन मृतिर्नृणाम् ॥ वृषे कर्कांशगौ तौ चेन्नक्रादथ जले मृतिः ॥ ३ ॥ वृषे सिंहांशगौ तौ चेद्व्याघ्राद्याघाततो मृतिः ॥ वृषे कन्यांशगौ तौ चेत्कपिना नाऽत्र संशयः ॥ ४ ॥ वृषे तुलांशगौ तौ चेद्व्याघ्राद्भीतिं वदेत्तदा ॥ वृषे कौमांशगौ तौ चेद्धुक्तौ चिंता व्ययो भवेत् ॥ ५ ॥ वृषे चापांशगौ तौ चेदश्वेन च मृतिं वदेत् ॥ वृषे कुंभांशगौ तौ चेद्दंतव्यापारतो भयम् ॥ ६ ॥ वृषे मृगांशगौ तौ चेन्महिषेण मृतिं वदेत् ॥ वृषे कुंभांशगौ ता चेद्गोलांगूलान्मृतिं वदेत् ॥ ७ ॥ वृषे झषांशगौ तौ चेदजवस्ताद्भयं भवेत् ॥ एवं संचिंत्य मतिमान्भ्रात्रादीनां मृतिं वदेत् ॥ ८ ॥

अथ सूर्यादिग्रहाणां सूक्ष्मदशाफलमाह ।

(सू० सू०) नृणां भूमिपरित्यागो विगमं प्राणनाशनम् ॥ स्थाननाशो महाहानिः सूर्यसूक्ष्मदशाफलम् ॥ ९ ॥ (सू० चं०) देवब्राह्मणभक्तिश्च नित्यकर्मरतस्तथा ॥ सुप्रीतिः सर्वमित्रैश्च रवेः सूक्ष्मगते विधौ ॥ १० ॥ (सू० मं०) क्रूरकर्मरतिस्तिग्मशस्त्राभिः परिपीडनम् ॥ रक्तस्रावादिरोगश्च रवेः सूक्ष्मगते कुजे ॥ ११ ॥ (सू० रा०) चौराग्निविषभीतिश्च रणे भंगः पराजयः ॥ दानधर्मादिहीनश्च रवेः सूक्ष्मगते ह्यगौ ॥ १२ ॥ (सू० बृ०) नृपसत्काररराजार्हैः सेवकैः परिपूजितः ॥ राजचक्षुर्गतः शांतः सूर्यसूक्ष्मगते गुरौ ॥ १३ ॥ (सू० श०) चौर्यसाहसकर्मार्थं देवब्राह्मणपीडनम् ॥ स्थानच्युतिं मनोदुःखं रवेः सूक्ष्मगते शनौ ॥ १४ ॥ (सू० बु०) दिव्यांबरादिलब्धिश्च दिव्यस्त्रीपरिभोगता ॥ आचिंतितार्थसिद्धिश्च रवेः सूक्ष्म-

गते बुधे ॥ १५ ॥ (सू० के०) गुरुतार्तिविनाशश्च भृत्यदारभवस्तथा ॥ क्वचित्सेवकसंबंधो रवेः सूक्ष्मगते ध्वजे ॥ १६ ॥ (सू० शु०) पुत्रमित्रकलत्रादिसौख्यसंपन्न एव च ॥ नानाविधा च संपत्ती रवेः सूक्ष्मगते भृगौ ॥ १७ ॥

अथ चंद्रसूक्ष्मदशाफलम् ।

(चं० चं०) भूषणं भूमिलाभश्च सन्मानं नृपपूजनम् ॥ तामसत्वं गुरुत्वं च चंद्रसूक्ष्मदशाफलम् ॥ १८ ॥ (चं० मं०) दुःखं शत्रुविरोधश्च कुक्षिरोगः पितुर्मृतिः ॥ वातपित्तकफोद्रेकः शशिसूक्ष्मगते कुजे ॥१९॥ (चं० रा०) क्रोधनं मित्रबंधूनां देशत्यागो धनक्षयः ॥ विदेशान्निगडप्राप्तिरिंदुसूक्ष्मगतेप्यहौ ॥ २० ॥ (चं० बृ०) छत्रचामरसंयुक्तं वैभवं पुत्रसंपदः ॥ सर्वत्र सुखमाप्नोति चंद्रसूक्ष्मगते गुरौ ॥ २१ ॥ (चं० श०) राजोपद्रवनाशः स्याद्व्यवहारे धनक्षयः ॥ चौरत्वं विप्रभीतिश्च चंद्रसूक्ष्मगते शनौ ॥ २२ ॥ (चं० बु०) राजमानं वस्तुलाभं विदेशाद्गहनादिकम् ॥ पुत्रपौत्रसमृद्धिश्च चंद्रसूक्ष्मगते बुधे ॥ २३ ॥ (चं० के०) आत्मनो वृत्तिहननं सस्यशृंगवृषादिभिः ॥ अग्निसूर्यादिभीतिः स्याच्चंद्रसूक्ष्मगते ध्वजे ॥ २४ ॥ (चं० शु०) विवाहो भूमिलाभश्च वस्त्राभरणवैभवम् ॥ राज्यलाभश्च कीर्तिश्च चंद्रसूक्ष्मगते भृगौ ॥ २५ ॥ (चं० सू०) क्लेशात्क्लेशः कार्यनाशः पशुधान्यधनक्षयः ॥ गात्रवैषम्यभूमिश्च चंद्रसूक्ष्मगते रवौ ॥ २६ ॥

अथ भौमसूक्ष्मदशाफलम् ।

(मं० मं०) भूमिहानिर्मनःखेदोह्यपरस्मारी च बंधुयुक् ॥ पुरक्षोभमनस्तापो भौमसूक्ष्मदशाफलम् ॥ २७ ॥ (मं० रा०) अंगदोषो जनाद्भीतिः प्रमदावंशनाशनम् ॥ वह्निसर्पभयं घोरं भौमसूक्ष्मगतेप्यहौ ॥ २८ ॥ (मं० बृ०) देवपूजारतिश्चात्र मंत्राभ्यु-

त्थानतत्परः ॥ लोकपूज्यं प्रमोदं च भौमसूक्ष्मगते गुरौ ॥ २९ ॥ (मं० श०) बंधनान्मुच्यते बद्धो धनधान्यपरिच्छदः ॥ भृत्यार्थबहुलः श्रीमान्भौमे सूक्ष्मगते शनौ ॥ ३० ॥ (मं० बु०) वाहनं छत्रसंयुक्तं राज्यभोगपरं सुखम् ॥ कासश्वासादिका पीडा भौमसूक्ष्मगते बुधे ॥ ३१ ॥ (मं० के०) पराप्रेरितबुद्धिश्च सर्वत्रापि च गर्हिता ॥ अशुचिः सर्वकालेषु भौमसूक्ष्मगते ध्वजे ॥ ३२ ॥ (मं० शु०) इष्टस्त्रीभोगसंपत्तिरिष्टभोजनसंग्रहः ॥ इष्टार्थश्चैव लाभश्च भौमसूक्ष्मगते भृगौ ॥ ३३ ॥ (मं० सू०) राजद्वेषो द्विजात्क्लेशः कार्याभिप्रायवंचकः ॥ लोकेऽपि निंद्यतामेति भौमसूक्ष्मगते रवौ ॥ ३४ ॥ (मं० चं०) शुद्धत्वं धनसंप्राप्तिर्देवब्राह्मणवत्सलः ॥ व्याधिना परिभूयेत भौमसूक्ष्मगते विधौ ॥ ३५ ॥

अथ राहोःसूक्ष्मदशाफलम्

(रा० रा०) लोकोपद्रवबुद्धिश्च स्वकार्ये मतिविभ्रमः ॥ शून्यता चित्तदोषः स्याद्राहोः सूक्ष्मदशाफलम् ॥ ३६ ॥ (रा० बृ०) दीर्घरोगी दरिद्रश्च सर्वेषां प्रियदर्शनः ॥ दानधर्मरतः शस्तो राहोः सूक्ष्मगते गुरौ ॥ ३७ ॥ (रा० श०) कुमार्गात्कुत्सितोग्रश्च दुष्टश्च परसेवकः ॥ असत्संगमतिर्मूढो राहोः सूक्ष्मगते शनौ ॥ ३८ ॥ (रा० बु०) स्त्रीसंभोगमतिर्वाग्मी लोकसंभावनावृतः ॥ अन्नमिच्छंस्तनुग्लानी राहोः सूक्ष्मगते बुधे ॥ ३९ ॥ (रा० के०) माधुर्यं मानहानिश्च बंधनं चाप्रमारकम् ॥ पारुष्यं जीवहानिश्च राहोः सूक्ष्मगते ध्वजे ॥ ४० ॥ (रा० शु०) बंधनान्मुच्यते बद्धः स्थानमानार्थसंचयः ॥ कारणाद्द्रव्यलाभश्च राहोः सूक्ष्मगते भृगौ ॥ ४१ ॥ (रा० सू०) व्यक्तार्शो गुल्मरोगश्च क्रोधहानिस्तथैव च ॥ वाहनादिसुखं सर्वं राहोः सूक्ष्मगते रवौ ॥ ४२ ॥ (रा० चं०) माणि-

रत्नधनावाप्तिर्विद्योपासनशीलवान् ॥ देवार्चनपरो भक्त्या राहोः सूक्ष्मगते विधौ ॥ ४३ ॥ (रा० मं०) निर्जितं जनविद्रावो जने क्रोधश्च बंधनात् ॥ चौर्यशीलरतिर्नित्यं राहोः सूक्ष्मगते कुजे ॥ ४४ ॥

अथ गुरोः सूक्ष्मदशाफलम् ।

(बृ० बृ०) शोकनाशो धनाधिक्यमग्निहोत्रं शिवार्चनम् ॥ वाहनं छत्रसंयुक्तं जीवसूक्ष्मदशाफलम् ॥ ४५ ॥ (बृ० श०) व्रतहा सूर्यवर्ती च विदेशे वसुनाशनम् ॥ विरोधो धननाशश्च गुरोः सूक्ष्मगते शनौ ॥ ४६ ॥ (बृ० के०) ज्ञानं विभवपांडित्ये शास्त्रश्रोता शिवार्चनम् ॥ अग्निहोत्रं गुरोर्भक्तिर्गुरोः सूक्ष्मगते ध्वजे ॥ ४७ ॥ (बृ० शु०) रोगान्मुक्तिः सुखं भोगं धनधान्यसमागमम् ॥ पुत्रदारादिकं सौख्यं गुरोः सूक्ष्मगते भृगौ ॥ ४८ ॥ (बृ० सू०) वातपित्तप्रकोपश्च श्लेष्मोद्रेकस्तु दारुणः ॥ रसव्याधिकृतं शूलं गुरोः सूक्ष्मगते रवौ ॥ ४९ ॥ (बृ० चं०) छत्रचामरसंयुक्तं वैभवं पुत्रसंपदः ॥ नेत्रकुक्षिगता पीडा गुरोः सूक्ष्मगते विधौ ॥ ५० ॥ (बृ० मं०) स्त्रीजनाच्च विषोत्पत्तिर्बंधनं चातिनिग्रहम् ॥ देशांतरगमो भ्रांतिर्गुरोः सूक्ष्मगते कुजे ॥ ५१ ॥ (बृ० रा०) व्याधिभिःपरिभूतः स्याच्चौरैरपहृतं महत् ॥ सर्पवृश्चिकदष्टत्वं गुरोः सूक्ष्मगतेऽप्यहौ ॥ ५२ ॥

अथ शनेः सूक्ष्मदशाफलम् ।

(श० श०) धनहानिर्महाव्याधिः शनेः पीडा कुलक्षयः ॥ भिन्नाहारी महादुःखी मंदसूक्ष्मदशाफलम् ॥ ५३ ॥ (श० बु०) वाणिज्यवृत्तेर्लाभश्च विद्याविभवमेव च ॥ स्त्रीलाभश्च महीप्राप्तिः शनेः सूक्ष्मगते बुधे ॥ ५४ ॥ (श० के०) चौरोपद्रवकुष्ठादिवृत्तिक्षयविगुंफनम् ॥ सर्वांगपीडनं व्याधिः शनिसूक्ष्मगते ध्वजे ॥ ॥ ५५ ॥ (श० शु०) ऐश्वर्यमायुधाभ्यासं पुत्रलाभोभिषेचनम् ॥

आरोग्यं धनकामौ च शनिसूक्ष्मगते भृगौ ॥ ५६ ॥ (श० सू०) राजतेजोविकारत्वं स्वगृहे जायते कलिः ॥ किंचित्पीडा स्वदेहोत्था शनिसूक्ष्मगते रवौ ॥ ५७ ॥ (श० चं०) स्फीतबुद्धिर्महारंभो मंदतेजा बहुव्ययः ॥ स्त्रीपुत्रैश्च समं सौख्यं शनिसूक्ष्मगते विधौ ॥ ५८ ॥ (शं० मं०) तेजोहानिर्महोद्वेगो वह्निक्षयभ्रमः कलिः ॥ वातपित्तकृता पीडा शनेः सूक्ष्मगते कुजे ॥ ५९ ॥ (श० रा०) पितृमातृविनाशश्च मनोदुःखं गुरुव्ययम् ॥ सर्वत्र विफलं स्याच्च शनिसूक्ष्मगतेऽप्यहौ ॥ ६० ॥ (श० बृ०) सन्मुद्राभोगसन्मानं धनधान्यविवर्द्धनम् छत्रचामरसंप्राप्तिः शनेः सूक्ष्मगते गुरौ ॥ ६१ ॥

अथ बुधसूक्ष्मदशाफलम्।

(बु० बु०) सौभाग्यं राजसन्मानं धनधान्यादिसंपदः ॥ सर्वेषां प्रियदर्शी च बुधसूक्ष्मदशाफलम् ॥ ६२ ॥ (बु० के०) बालग्रहाग्निभिस्तापः स्त्रीगदोद्भवदोषभाक् ॥ कुमार्गीकुत्सिताशा च बुधसूक्ष्मगते ध्वजे ॥ ६३ ॥ (बु० शु०) वाहनं धनसंपत्तिर्जलजान्नार्थसंभवः ॥ शुभकीर्तिर्महाभोगो बुधसूक्ष्मगते भृगौ ॥ ६४ ॥ (बु० र०) ताडनं नृपवैषम्यं बुद्धिस्खलनरोगभाक् ॥ हानिर्जनापवादं च बुधसूक्ष्मगते रवौ ॥ ६५ ॥ (बु० चं०) सुभगः स्थिरबुद्धिश्च राजसन्मानसंपदः ॥ सुहृदां गुरुसंस्कारो बुधसूक्ष्मगते विधौ ॥ ६६ ॥ (बु० मं०) अग्निदाहो विषोत्पत्तिर्जडत्वं च दरिद्रता ॥ विभ्रमश्च महोद्वेगो बुधसूक्ष्मगते कुजे ॥ ६७ ॥ (बु० रा०) अग्निसर्पनृपाद्भीतिः कृच्छ्रादारिपराभवः ॥ भूतावेशभ्रमाद्भ्रांतिर्बुधसूक्ष्मगतेऽप्यहौ ॥ ६८ ॥ (बु० बृ०) गृहोपकारणं भव्यं त्यागं भोगादिवैभवम् ॥ राजप्रसादसंपत्तिर्बुधसूक्ष्मगते गुरौ ॥ ६९ ॥ (बु० श०) वाणिज्यवृत्तिलाभश्च विद्याविभवमेव च ॥ स्त्रीलाभश्च महाव्याप्तिर्बुधसूक्ष्मगते शनौ ॥ ७० ॥

अथ केतोः सूक्ष्मदशाफलम् ।

(के० के०) पुत्रदारादिजं दुःखं गात्रवैषम्यमेव च ॥ दारिद्र्याद्विक्षुवृत्तिश्च
केतोः सूक्ष्मदशाफलम् ॥ ७१ ॥ (के० शु०) रोगनाशोऽर्थलाभश्च
गुरुविप्रानुवत्सलः ॥ संगमः स्वजनैः सार्द्धं केतोः सूक्ष्मगते
भृगौ ॥ ७२ ॥ (के० सू०) युद्धभूमिविनाशश्च विप्रवासः स्वदेशतः ॥
सुहृद्विपत्तिरार्तिश्च केतोः सूक्ष्मगते रवौ ॥ ७३ ॥ (के० चं०)
दासीदाससमृद्धिश्च युद्धे लब्धिर्जयस्तथा ॥ ललिता कीर्तिरुत्पन्ना
केतोः सूक्ष्मगते विधौ ॥ ७४ ॥ (के० मं०) आसने भयमश्वादेश्चौरदुष्टादिपीडनम् ॥ गुल्मपीडा शिरोरोगः केतोः सूक्ष्मगते कुजे
॥ ७५ ॥ (के० रा०) विनाशः स्त्रीगुरूणां च दुष्टस्त्रीसंगमाल्लघुः ॥
वमनं रुधिरं पित्तं केतोः सूक्ष्मगतेऽप्यगौ ॥ ७६ ॥ (के० बृ०) वैरं
विरोधसंपत्तिः सहसा राजवैभवम् ॥ पशुक्षेत्रविनाशार्तिः केतोः सूक्ष्मगते गुरौ ॥ ७७ ॥ (के० श०) मृषा पीडा भवेत्क्षुद्रसुतोत्पत्तिश्च
लंघनम् ॥ स्त्रीविरोधः सत्यहानिः केतोः सूक्ष्मगते शनौ ॥ ७८ ॥
(के० बु०) नानाविधजनाप्तिश्च विप्रयोगोऽरिपीडनम् ॥ अर्थसंपत्समृद्धिश्च केतोः सूक्ष्मगते बुधे ॥ ७९ ॥

अथ शुक्रसूक्ष्मदशाफलम् ।

(शु० श०) शत्रुहानिर्महत्सौख्यं शंकरालयसंभवम् ॥ तडागः
कूपनिर्माणं शुक्रसूक्ष्मदशाफलम् ॥ ८० ॥ (शु० सू०) उरस्तापो
भ्रमश्चैव गतागतविचेष्टितम् ॥ क्वचिल्लाभः क्वचिद्धानिर्भृगोः सूक्ष्मगते रवौ ॥ ८१ ॥ (शु० चं०) आरोग्यं धनसंपत्तिः कार्यलाभो
गतागतैः ॥ वैरिकावारबुद्धिः स्याद्भृगोः सूक्ष्मगते विधौ ॥ ८२ ॥
(शु० मं०) जडत्वं रिपुवैषम्यं देशभ्रंशो महद्भयम् ॥ व्याधिदुःखसमुत्पत्तिर्भृगोः सूक्ष्मगते कुजे ॥ ८३ ॥ (शु० रा०)

राज्याग्निसर्पजा भीतिर्बंधुनाशो गुरुव्यथा ॥ स्थानच्युतिर्महाभीतिर्भृगोः सूक्ष्मगतेऽप्यहौ ॥ ८४ ॥ (शु० बृ०) सर्वत्र कार्यलाभश्च क्षेत्रार्थविभवोन्नतिः ॥ वणिग्वृत्तेर्महालब्धिर्भृगोः सूक्ष्मगते गुरौ ॥ ८५ ॥ (शु० श०) शत्रुपीडा महद्दुःखं चतुष्पादविनाशनम् ॥ स्वगोत्रगुरुहानिः स्याद्भृगोः सूक्ष्मगते शनौ ॥ ८६ ॥ (शु० बु०) बांधवादिषु संपत्तिर्व्यवहारो धनोन्नतिः ॥ पुत्रदारादितः सौख्यं भृगोः सूक्ष्मगते बुधे ॥ ८७ ॥ (शु० के०) अग्निरोगो महत्पीडा मुखनेत्रशिरोव्यथा ॥ संचितार्थात्मनः पीडा भृगोः सूक्ष्मगते ध्वजे ॥ ८८ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे सूर्यादिसूक्ष्मदशाफलकथनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अथ प्राणदशानयनमाह ।

स्वसूक्ष्माख्यदशायाश्च पिंडे विघटिकात्मके ॥ स्वाब्दैस्तष्टे पुनस्तष्टे विंशोत्तरशतेन च ॥ लब्धं विघटिका ज्ञेया विपलानि ततः परम् ॥ १ ॥

अस्योदाहरणमाह ।

यस्य ग्रहस्य सूक्ष्मदशामध्ये यस्य ग्रहस्य प्राणदशा क्रियते तदा तत्सूक्ष्मदशायाः यावत्परिमितानि दिनानि घट्यश्च तेषां पलानि कृत्वा स्वाब्दैर्गुणयेत् । शेषा क्रिया सूक्ष्मदशावत् । यथा सूक्ष्मदशा घटी १६ पलानि १२ तन्मध्ये सर्वेषां प्राणदशा । तद्यथा सूर्यसूक्ष्मदशाया विघटिकापिंडः ९ । ७२ स्वाब्दै ६ र्गुणिते जातं ५८ । ३२ विंशोत्तरशतेनाप्ते लब्धं ४८ पलानि शेषं ७२ षष्टिगुणितं जातं ४३२० पुनस्तेनैव भक्तेर्लब्धं ३६ विपलानि एवं, सूर्यसूक्ष्मदशामध्ये सूर्यस्य प्राणदशा विघटिका ४८ विपलानि ३६ एवं सर्वेषामूह्यामिति ॥

अथ सूर्यसूक्ष्मदशा तन्मध्ये प्राणदशाचक्रम्.

ग्रहाः	सू.	चं.	मं.	रा.	बृ	श.	बु.	के.	शु.	यो.
घटचः	०	१	०	२	२	२	२	०	२	१६
पला०	४८	२१	५६	२५	९	३३	१७	५६	४२	१२
विपला०	३६	०	४२	४८	३६	५४	४२	४२	०	०

अथ प्राणदशामाह ।

शरीरनाथो मरणाधिपेन युक्तो मृगेंद्रेण मृगाधिपांशे ॥ तयोर्विपाके भयमाखुतो मृतिं सर्पात्तदा प्राहुरुदारचित्ताः ॥ २ ॥ सिंहे कन्यांशगौ तौ चेत्कफकंपादितो मृतिः ॥ मृगराजे तुलासंस्थे तयोर्युक्तौ मृतिं वदेत् ॥ ३ ॥ अलपांशगो मृगेंद्रे वा तयोर्दाये सरीसृपात् ॥ चापांशगो मृगेंद्रे तु तद्वर्गाच्च मृतिं वदेत् ॥ ४ ॥ मृगांशगौ तौ सिंहे च तयोर्दाये खरान्मृतिः ॥ कुंभांशगौ यदा तौ च मृगराजनृपाद्भयम् ॥ ५ ॥ मीनांशकगतौ सिंहे सारंगाद्भयमादिशेत् ॥ सिंहे मेषांशगौ तौ चेद्रोमायोर्भयमादिशेत् ॥ ६ ॥ वृषांशगौ तौ सूर्यर्क्षे तयोर्दाये शुनो मृतिः ॥ युग्मांशगौ तौ सूर्यर्क्षे गोलांगूलाद्भयं भवेत् ॥ ७ ॥ कर्कांशगौ तु सिंहे तु ह्यग्निदग्धाद्गृहान्मृतिः ॥ एवं भ्रात्रादिभावानां तत्तद्युक्तौ फलं वदेत् ॥ ८ ॥ देहाधिपौ मृत्युपतिश्च युक्तश्चापांशगो कार्मुकराशिगौ चेत् ॥ दाये तयोर्वाजिकृतं च मृत्युं वदंति तत्कालविदो महांतः ॥ ९ ॥ चापे मृगांशगौ तौ चेत्सारंगाद्भयमादिशेत् ॥ हये कुंभांशगौ तौ चेद्वराहाद्भयमादिशेत् ॥ १० ॥ हये मीनांशगौ तौ चेत्पाके नक्राद्भयं तयोः ॥ मेषांशगौ तौ चापे तु तयोर्दाये चतुष्पदात् ॥ ११ ॥ हये वृषांशगौ तौ चेद्रासभाद्भयमादिशेत् ॥ १२ ॥ युग्मांशगौ हयांगेषु वानराद्भयमादिशेत् ॥ कर्कांशगौ हयांगे तु चाखुना भयमेतयोः ॥ १३ ॥ सिंहांशगौ हयांगेषु जंबुकाद्भयमेतयोः ॥ कन्यांशगौ हयांगे तु लांगूलान्मृतिरुच्यते ॥ १४ ॥ तुलांशगौ हयांगे तु लोष्टान्मरणमेतयोः ॥ अलपांशगौ हयांगेषु

तयोः पाके सरीसृपात् ॥ एवं भ्रात्रादिभावानां फलमाहुर्मनीषिणः ॥ १५ ॥ विलग्नयोनेर्धननायकश्च मृगे मृगांशे च गतेऽथ युक्ते ॥ भुक्तोऽथ प्रीतिश्च भवेन्नराणां विवाहहेतुः प्रवदंति संतः ॥ १६ ॥ कुंभांशगौ मृगांगे च भल्लूकाद्भयमेतयोः ॥ झषांशगौ मृगांशे च सारंगाद्भयमेतयोः ॥ १७ ॥ युग्मांशगौ मृगांशे तौ हरिणान्मृतिरेतयोः ॥ कर्कांशगौ मृगास्ये तौ तयोर्दाये मृतिर्गजात् ॥ १८ ॥ कौर्पांशगौ मृगांशे तौ नकुलान्मृतिरेतयोः ॥ चापांशगौ मृगांशे तौ मार्जारान्मृतिरेतयोः ॥ १९ ॥ एवं निश्चित्य मतिमान्भ्रात्रादीनां फलं वदेत् ॥ २० ॥

अथ सूर्यप्राणदशाफलम् ।

(सू० सू) पौंश्चल्यविषजा बाधा मोषणं विषमेक्षणम् ॥ सूर्यप्राणदशायां तु मरणं कृच्छ्रमादिशेत् ॥ २१ ॥ (सू० चं०) सुखं भोजनसंपत्तिः संस्कारो नृपवैभवम् ॥ उदराविकृताभिश्च रवेः प्राणगते विधौ ॥ २२ ॥ (सू० मं०) भूपोपद्रवमन्यार्थे द्रव्यनाशो महद्भयम् ॥ महत्यपचयप्राप्ती रवेः प्राणगते कुजे॥२३॥ (सू० रा०) अन्नोद्भवा महापीडा विषोत्पत्तिर्विषेणकः ॥ अर्थाग्निराजभिः क्लेशं रवेः प्राणगतेप्यहौ ॥ २४ ॥ (सू० बृ०) नानाविद्यार्थसंपत्तिः कार्यलाभो गतागतैः ॥ जीवप्राणश्रम नाशो रवेः प्राणगते गुरौ ॥ २५ ॥ (सू० श०) बंधनं प्राणनाशश्च चित्तोद्वेगस्तथैव च ॥ बहुबाधा महाहानी रवेः प्राणगते शनौ ॥ २६ ॥ (सू० बु०) राजान्नभोगः सततं राजलांछनतत्पदम् ॥ आत्मा संतर्पयेदेवं रवेः प्राणगते बुधे ॥ २७ ॥ (सू० के०) अन्योन्यं कलहश्चैव वसुहानिः पराजयः ॥ गुरुस्त्रीबंधुहानिश्च सूर्यप्राणगते ध्वजे ॥ २८ ॥ (सू० शु०) राजपूजा धनाधिक्यं स्त्रीपुत्रादिभवं सुखम् ॥ अन्नपानादिभोगादि सूर्यप्राणगते भृगौ ॥ २९ ॥

अथ चंद्रप्राणदशाफलम् ।

(चं० चं०) योगाभ्यासं समाधिं च देशिकत्वं च पश्यति ॥ इति सर्वं समासेन चंद्रप्राणदशाफलम् ॥ ३० ॥ (चं० मं०) क्षयं कुष्ठं बंधुनाशं रक्तस्रावान्महद्भयम् ॥ भूतावेशादि जायेत चंद्रप्राणगते कुजे ॥ ३१ (चं० रा०) सर्पभीतिर्विशेषेण भूतोपद्रववान्सदा ॥ दृष्टिक्षोभो मतिभ्रंशश्चंद्रप्राणगतेप्यहौ ॥ ३२ ॥ (चं० बृ०) धर्मवृद्धिः क्षमाप्राप्तिर्देवब्राह्मणपूजनम् ॥ सौभाग्यं प्रियदृष्टिश्च चंद्रप्राणगते गुरौ ॥ ३३ ॥ (चं० श०) सहसा देहपतनं शत्रूपद्रववेदना ॥ अंधत्वं च धनप्राप्तिश्चंद्रप्राणगते शनौ ॥ ३४ ॥ (चं० बु०) चामरच्छत्रसंप्राप्ती राज्यलाभो नृपात्ततः ॥ समत्वं सर्वभूतेषु चंद्रप्राणगते बुधे ॥ ३५ ॥ (चं० के०) शस्त्राग्निरिपुजा पीडा विषाग्निः कुक्षिरोगता ॥ पुत्रदारवियोगश्च चंद्रप्राणगते शिखी ॥ ३६ ॥ (चं० शु०) पुत्रमित्रकलत्राप्तिर्विदेशाच्च धनागमः ॥ सुखसंपत्तिरर्थश्च चंद्रप्राणगते भृगौ ॥ ३७ ॥ (चं० सू०) तीव्रदोषी प्रदोषी च प्राणहानिर्मनोविषम् ॥ देशत्यागी महाभीतिश्चंद्रप्राणगते रवौ ॥ ३८ ॥

अथ भौमप्राणदशाफलम् ।

(मं० मं०) शास्त्रे परजनाद्बद्धः शास्त्रेण परकेन वा ॥ मृत्युना मरणं याति भौमे प्राणदशाफलम् ॥ ३९ ॥ (मं० रा०) विच्युतः सुतदारादिबंधूपद्रवपीडितः ॥ प्राणत्यागी विषेणैव भौमप्राणगतेप्यहौ ॥ ४० ॥ (मं० बृ०) देवार्चनपरः श्रीमान्मंत्रानुष्ठानतत्परः ॥ पुत्रपौत्रसुखावाप्तिर्भौमप्राणगते गुरौ ॥४१॥ (मं० श०) अग्निबाधा भवेन्मृत्युरर्थनाशः पदच्युतिः ॥ बंधुभिर्बंधुतावाप्तिर्भौमप्राणगते शनौ ॥ ४२ ॥ (मं० बु०) दिव्यांबरसमुत्पत्तिर्दिव्याभरण-

भूषितः ॥ दिव्यांगनायाः संप्राप्तिर्भौमप्राणगते बुधे ॥ ४३ ॥ (मं० के०) पतनोत्पातपीडा च नेत्रक्षोभो महद्भयम् ॥ भुजंगाद्द्रव्यहानिश्च भौमप्राणगते ध्वजे ॥ ४४ ॥ (मं० शु०) धनधान्यादिसंपत्तिर्लोकपूजा सुखागमा ॥ नानाभोगैर्भवेद्रोगी भौमप्राणगते भृगौ ॥ ४५ ॥ (मं० सू०) ज्वरोन्मादः क्षयोर्थश्च राजविस्नेहसंभवः ॥ दीर्घरोगी दरिद्रः स्याद्भौमप्राणगते रवौ ॥४६॥ (मं० चं०) भोजनादिसुखप्रीतिर्वस्त्राभरणवांछितम् ॥ शीतोष्णव्याधिपीडा च भौमप्राणगते विधौ ॥ ४७ ॥

अथ राहोः प्राणदशाफलम् ।

(रा० रा०) अन्नाशने विरक्तश्च विषभीतिस्तथैव च ॥ साहसाद्धननाशश्च राहोः प्राणदशाफलम् ॥ ४८ ॥ (रा० बृ०) अंगसौख्यं विनिर्भीतिर्वाहनादेश्च संगता ॥ नीचैः कलहसंप्राप्ती राहोः प्राणगते गुरौ ॥४९॥ (रा० श०) गृहदाहशरीरे च नीचैरपहृतं धनम् ॥ रोगबंधनसंप्राप्ती राहोः प्राणगते शनौ ॥ ५० ॥ (रा० बु०) गुरूपदेशविभवो गुरुसत्कारवर्द्धनम् ॥ गुणवाञ्छीलवांश्चापि राहोः प्राणगते बुधे ॥५१॥ (रा० के०) स्त्रीपुत्रादिविरोधश्च गृहान्निष्क्रमणादपि ॥ साहसात्कार्यहानिश्च राहोः प्राणगते ध्वजे ॥ ५२ ॥ (रा० शु०) छत्रवाहनसंपत्तिः सर्वार्थफलसंचयः ॥ शिवार्चनगृहारंभी राहोः प्राणगते भृगौ ॥ ५३ ॥ (रा० सू०) अर्शादिरोगभीतिश्च राज्योपद्रवसंभवः ॥ चतुष्पादादिहानिश्च राहोः प्राणगते रवौ ॥ ५४ ॥ (रा० चं०) सौमनस्यं च सद्बुद्धिः सत्कारो गुरुदर्शनम् ॥ पापभीतिर्मनःसौख्यं राहोः प्राणगते विधौ ॥ ५५ ॥ (रा० मं०) चंडालाग्निशस्त्रभीतिः स्वपदच्युतिरापदः ॥ मलिनः श्वादिवृत्तिश्च राहोः प्राणगते कुजे ॥ ५६ ॥

अथ गुरोः प्राणदशाफलम् ।

(बृ० बृ०) शोकनाशो धनाधिक्यमग्निहोत्रं शिवार्चनम् ॥ वाहनं छत्रसंयुक्तं जीवप्राणदशाफलम् ॥ ५७ ॥ (बृ० श०) व्रतहा सूर्यवर्त्तिश्च विदेशे वसुनाशनम् ॥ विरोधो धननाशश्च गुरोः प्राणगते शनौ ॥ ५८ ॥ (बृ० के०) ज्ञानं विभवपांडित्यं शास्त्रश्रोता शिवार्चनम् ॥ अग्निहोत्रं गुरोर्भक्तिर्गुरोः प्राणगते ध्वजे ॥ ५९ ॥ (बृ० शु०) रोगान्मुक्तिः सुखं भोगं धनधान्यसमागमम् ॥ पुत्रदारादिकं सौख्यं गुरोः प्राणगते भृगौ ॥ ६० ॥ (बृ० सू०) वातपित्तप्रकोपं च श्लेष्मोद्रेकंतु दारुणम् ॥ रसव्याधिकृतं शूलं गुरोः प्राणगते रवौ ॥ ६१ ॥ (बृ० चं०) छत्रचामरसंयुक्तं वैभवं पुत्रसंपदः ॥ नेत्रकुक्षिगता पीडा गुरोः प्राणगते विधौ ॥ ६२ ॥ (बृ० मं०) स्त्रीजनाच्च विषोत्पत्तिर्बंधनं चातिनिग्रहः ॥ देशांतरगमो भ्रांतिर्गुरोः प्राणगते कुजे ॥ ६३ ॥ (बृ० रा०) व्याधिभिः परिभूतः स्याच्चौरैरपहृतं महत् ॥ सर्पवृश्चिकदष्टत्वं गुरोः प्राणगतेप्यहौ ॥ ६४ ॥

अथ शनिप्राणदशाफलम् ।

(श० श०) ज्वरेण ज्वलिता कांतिः कुष्ठरोगोदरादिरुक् जलाग्निकृतमृत्युः स्यान्मंदप्राणदशाफलम् ॥ ६५ ॥ (श० बु०) धनं धान्यं च मांगल्यं व्यवहाराभिपूजनम् ॥ देवब्राह्मणभक्तिश्च शनेः प्राणगते बुधे ॥ ६६ ॥ (श० के०) मृत्युवेदनदुःखं च भूतोपद्रवसंभवः ॥ परदाराभिभूतत्वं शनेः प्राणगते ध्वजे ॥६७॥ (श० शु०) पुत्रार्थविभवैः सौख्यं क्षितिमानादिना सुखम् ॥ अग्निहोत्रं विवाहश्च शनेः प्राणगते भृगौ ॥ ६८ ॥ (श० सू०) अक्षिपीडा शिरोव्याधिः सर्पशत्रुभयं भवेत् ॥ अर्थहानिर्महाक्लेशः शनेः प्राणगते

रवौ ॥ ६९ ॥ (श० चं०) आरोग्यं पुत्रलाभश्च शांतिपौष्टिकवर्धनम् ॥ देवब्राह्मणभक्तिश्च शनेः प्राणगते विधौ ॥ ७० ॥ (श० मं०) गुल्मरोगः शत्रुभीतिर्मृगया प्राणनाशनम् ॥ सर्पाग्निशत्रुतो भीतिः शनेः प्राणगते कुजे ॥ ७१ ॥ (श० रा०) देशत्यागो नृपाद्भीतिर्मोहनं विषभक्षणम् ॥ वातपित्तकृता पीडा शनेः प्राणगतेप्यहौ ॥ ॥ ७२ ॥ (श० बृ०) सेनापत्यं भूमिलाभं संगमं स्वजनैः सह ॥ गौरवं नृपसन्मानं शनेः प्राणगते गुरौ ॥ ७३ ॥

अथ बुधप्राणदशाफलम् ।

(बु० बु०) आरोग्यं सुखसंपत्तिर्धर्मकर्मादिसाधनम् ॥ समत्वं सर्वभूतेषु बुधप्राणदशाफलम् ॥ ७४ ॥ (बु० के०) दहनं चौरविद्धांगं परमाधिं विषोद्भवाम् ॥ देहांतकरणे दुःखं बुधप्राणगते ध्वजे ॥ ७५ ॥ (बु० शु०) प्रभुत्वं धनसंपत्तिः कीर्तिर्धर्मः शिवार्चनम् ॥ पुत्रदारादिकं सौख्यं बुधप्राणगते भृगौ ॥ ७६ ॥ (बु० सू०) अंतर्दाहो ज्वरोन्मादौ बांधवानां रतिः स्त्रिया ॥ पापानिस्तेयसंपत्तिर्बुधप्राणगते रवौ ॥ ७७ ॥ (बु० चं०) स्त्रीलाभश्चार्थसंपत्तिः कन्यलाभो धनागमः ॥ लभते सर्वतः सौख्यं बुधप्राणगते विधौ ॥ ७८ ॥ (बु० मं०) पतितः कुक्षिरोगी च दंतनेत्रादिजा व्यथा ॥ अर्शांसि प्राणसंदेहो बुधप्राणगते कुजे ॥ ७९ ॥ (बु० रा०) वस्त्राभरणसंपत्तिर्वियोगो विप्रवैरिता ॥ सन्निपातोद्भवं दुःखं बुधप्राणगतेप्यहौ ॥ ८० ॥ (बु० गु०) गुरुत्वं धनसंपत्तिर्विद्या सद्गुणसंग्रहः ॥ व्यवसायेन सल्लाभो बुधप्राणगते गुरौ ॥ ८१ ॥ (बु० श०) चौर्येण निधनप्राप्तिर्विधनत्वं दरिद्रता ॥ याचकत्वं विशेषेण बुधप्राणगते शनौ ॥ ८२ ॥

अथ केतोः प्राणदशाफलम् ।

(के० के०) अश्वपातेन घातं च पादस्वबलमेव च ॥ निर्विचारवधोत्पतिः केतोः प्राणदशाफलम् ॥ ८३ ॥ (के० शु०) क्षे-

त्रलाभो वैरिनाशो हयलाभो मनःसुखम् ॥ पशुक्षेत्रधनाप्तिश्च केतोः प्राणगते भृगौ ॥ ८४ ॥ (के० सू०) स्तेयाग्निरिपुभीत्यादिघातश्चैवावरोधयुक् ॥ प्राणांतकरणं कृच्छ्रं केतोः प्राणगते रवौ ॥ ८५ ॥ (के० चं०) देवद्विजगुरोः पूजा दीर्घयात्रा धनं सुखम् ॥ कंठाश्रिते नेत्ररोगी केतोः प्राणगते विधौ ॥ ८६ ॥ (के० मं०) तीव्ररोगो नसावृद्धिर्विभ्रमः सान्निपातजः ॥ स्वबंधुजनविद्वेषः केतोः प्राणगते कुजे ॥८७॥ (के. रा.) विरोधः स्त्रीसुताद्यैश्च गृहान्निष्क्रमणं भवेत् ॥ स्वसाहसात्कार्यहानिः केतोः प्राणगतेऽप्यहौ ॥ (के० बृ०) शस्त्रव्रणैर्महारोगैर्हृत्पीडादिसमुद्भवः ॥ सुतदारावियोगश्च केतोः प्राणगते गुरौ ॥ ८८ ॥ (के० श०) मतिविभ्रमतीक्ष्णश्च क्रूरकर्मरतः सदा ॥ व्यसनाद्बंधनं दुःखं केतोः प्राणगते शनौ ॥ ८९ ॥ (के० बु०) कुसुमं शयनं भूषा लेपनं भोजनादिकम् ॥ सौख्यं सर्वांगभोग्यं च केतोः प्राणगते बुधे ॥ ९० ॥

अथ शुक्रप्राणदशाफलम् ।

(शु० शु०) ज्ञानमीश्वरभक्तिश्च तोषकर्मरसायनम् ॥ पुत्रपौत्रसमृद्धिश्च शुक्रप्राणगते फलम् ॥ ९१ ॥ शु० सू०) लोकप्रकाशकीर्तिश्च सुतसौख्यविवर्जितः ॥ उष्णादिरोगजं दुःखं शुक्रप्राणगते रवौ ॥ ९२ ॥ (शु० चं०) देवार्चने कर्मरतिर्मंत्रतोषणतत्परः ॥ धनसौभाग्यसंपत्तिः शुक्रप्राणगते विधौ ॥ ९३ ॥ (शु० मं०) ज्वरो मसूरिकास्फोटकंडूचिपिटकादिकाः ॥ देवब्राह्मणपूजा च शुक्रप्राणगते कुजे ॥ ९४ ॥ (शु० रा०) नित्यं शत्रुकृता पीडा नेत्रकुक्षिरुजादयः॥विरोधः सुहृदां पीडा शुक्रप्राणगतेप्यहौ ॥ ९५ ॥ (शु० बृ०) आयुरारोग्यमैश्वर्यं पुत्रस्त्रीधनवैभवम् ॥ छत्रवाहनसंप्राप्तिः शुक्रप्राणगते गुरौ ॥ ९६ ॥ (शु श०) राजोपद्रवजा

भीतिः सुखहानिर्महारुजः ॥ नीचैः सह विषादं च शुक्रप्राणगते शनौ ॥ ९७ ॥ (शु० बु०) संतोषं राजसन्मानं नानादिग्भूमिसंपदः ॥ नित्यमुत्साहवृद्धिः स्याच्छुक्रप्राणगते बुधे ॥ ९८ ॥ (शु० के०) जीवितात्मयशोहानिर्धनधान्यपरिच्छदः ॥ त्यागभोगधनानि स्युः शुक्रप्राणगते ध्वजे ॥ ९९ ॥

इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे सूर्यादिप्राणदशाफलकथनं नामाऽष्टचत्वारिंशोऽध्यायः ॥४८ ॥

अथ कालचक्रदशाप्रकरणमाह ।

वंदेऽहं गोपिकानाथं भारतीं गणनायकम् ॥ पार्वत्यै कथितं पूर्वं कालचक्रं पिनाकिना ॥ १ ॥ तच्चक्रसारमुद्धृत्य लघुमार्गेण कथ्यते ॥ शुभाशुभं मनुष्याणां भूत भव्यं च भावि तत् ॥ २ ॥ भूते ५ कविंश २१ गिरयो ७ नव ९ दिक् १० षोडश १६ ऽधयः ४॥ सूर्यादीनां क्रमाद्वायूराशीनां स्वामिनो वशात् ॥३॥ नरस्य जन्मकाले वा प्रश्नकाले यदंशकः ॥ तदादि नवपर्यन्तमायुषं परिचक्षते ॥ ४ ॥ अश्विन्यदितिहस्तर्क्षमूलप्रोष्ठपदाभिधाः ॥ अंशकाद्गणयेन्मेषात्प्रादक्षिण्यक्रमेण तु ॥५ ॥ प्राजापत्यमघेंद्राग्निश्रवणं च यथ क्रमम् ॥ अप्रदक्षिणधिष्ण्यानि भवंत्येतानि पर्वंति ॥ ६ ॥ आश्विन्यादित्रयं चैव सव्यमार्गे व्यवस्थितम् ॥ रोहिण्यादित्रयं चैव अपसव्ये व्यवस्थितम् ॥ ७ ॥ एवमृक्षं चतुर्भागं कृत्वा चक्रे समुद्धरेत् ॥ अंशावसाने जातस्य आयुर्दायोऽस्य कस्य चित् ॥ ८ ॥ संपूर्णायुर्भवेदादावधमांशस्य मध्यमम् ॥ अपमृत्युसमं कष्टमशांते चापरे जगुः ॥ ९ ॥ ज्ञात्वैवं स्फुटसिद्धांतो राश्यंशं गणयेद्बुधः ॥ अनुपातेन वक्ष्यामि तदुपायमतः परम् ॥ १० ॥ गततारा त्रिभिर्भक्ता

शेषं चत्वारिसंगुणं ॥ वर्तमानं पदेनाढ्यं राशीनामंशको भवेत् ॥ ११ ॥ ये च जीवांशके जाता गतनाडिविनांशकाः ॥ स्वस्वदशावर्षसंख्यापंचभूमि १९ विभाजिताः ॥ १२ ॥ एवं महादशा ज्ञेयाः सूर्यादिनां यथाक्रमम् ॥ गणयेज्जीवपर्यन्तमायुष्यं परिचिंतयेत् ॥ १३ ॥

सव्ये मेषादिरपसव्ये वृश्चिकादिरंशोज्ञातव्यः ।

ये जीवा अंशके जाता गतनाडीपलेन तु ॥ तदंशोनहृताब्दस्तु पंचभूमिविभाजिताः ॥ १४ ॥ एवं महादशारंभो भवेदंशाद्यथाक्रमात् ॥ गणयेन्नवपर्यंतमायुष्यं तत्प्रकीर्तितम् ॥ १५ ॥ सूर्यादीनां क्रमादेतद्दशाः सर्वदशासु च ॥ १६ ॥ मेषगोयमकुलीरराशिषु स्वांशकेषु परमायुरुच्यते ॥ ज्ञानकं १०० मद ८९ गज ८३ स्तद ८६ भ्रमात्तत्रिकोणभनवेषु तद्भवेत् ॥ १७ ॥ द्वादशारं लिखेच्चक्रं तिर्यगूर्ध्वसमानकम् ॥ गृहा द्वादश जायंते सव्यचक्रे यथाक्रमम् ॥ १८ ॥ द्वितीयादिषु कोष्ठेषु राशीन्मेषादिकाँल्लिखेत् ॥ एवं द्वादशराश्याख्यकालचक्रमुदीरितम् ॥ १९ ॥ विश्वर्क्षपूर्वाभाद्रं च रेवती सव्यतारकः ॥ एतद्दशोडुपादीनामश्विन्यादौ च वीक्षयेत् ॥ विशदस्तत्प्रकारस्तु कथ्यते शृणु पार्वति ॥ २० ॥ देह जीवौ मेषचापो दस्राद्यचरणस्य च ॥ मेषादिचापपर्यंतं राशिपाश्च दशाधिपाः ॥ २१ ॥ देहजीवौ नक्रयुग्मौ दिगीशार्काष्टभूधराः ॥ षड्वेदशरलोकाश्च राशिपाश्च दशाधिपाः ॥ २२ ॥ दस्रादिदशताराणां तृतीयचरणेषु च ॥ गौर्देहो मिथुनं जीवो द्विकार्केशदशांशकाः ॥ २३ ॥ अक्षिरामाख्यनाथास्ते दशाधिपतयः क्रमात् ॥ अश्विन्यादिदशोडूनां चतुर्थचरणेषु च ॥ २४ ॥ कर्कमीनौ देहजीवौ कर्का-

दिनवभेश्वराः दशाधिपा नव ज्ञेयाः शृणु पार्वति निश्चितम् ॥ ॥ २५ ॥ याम्येज्यचित्रतोयर्क्षा उत्तराभाद्रतारकाः ॥ एतत्पंचोडुपादीनां भरण्यादौ च वीक्षयेत् ॥ २६ ॥ याम्यप्रथमपादस्य देहजीवावलिझषः ॥ नागागर्तुपयोधीषु रामाक्षाद्रिर्कभेश्वराः ॥ २७ ॥ याम्यद्वितीयपादस्य देहजीवौ घटांगने ॥ रुद्रदिङ्नंदचंद्राक्षिरामाब्धीषु रसेश्वराः ॥ २८ ॥ याम्यतृतीयपादस्य देहजीवौ तुलांगने ॥ सप्ताष्टांकदिगीशार्कगजादिरसराशिपाः ॥ २९ ॥ देहजीवौ कर्कचापौ चतुर्थचरणे स्मृतौ ॥ वेदबाणाग्निनेत्रेंदुसूर्येशदशनंदपाः ॥ ॥ ३० ॥ सव्यमेव विजानीयादपसव्यं तु कथ्यते ॥ द्वादशारं लिखेच्चक्रं तिर्यगूर्ध्वसमानकम् ॥ ३१ ॥ द्वितीयादिषु कोष्ठेषु वृश्चिकाद्यस्तमालिखेत् प्राजापत्ये मघेंद्राग्निश्रवणं च चतुष्टयम् ॥ ३२ ॥ धातृवद्वीक्षयेद्देहजीवौ कार्किधनुर्धरौ ॥ नवदिग्रुद्रसूर्येन्दुनेत्राग्निष्वब्धिराशिपाः ॥ ३३ ॥ धातृद्वितीयचरणे तुलास्त्रीदेहजीवकौ ॥ षष्ठसप्ताष्टार्करुद्रा दिङ्नवा गिरिराशिपाः ॥ ३४ ॥ धातृतृतीयचरणे (देह) जीवौ कुंभांगनाधिपौ ॥ षड्बाणाब्धिगुणाक्षींदुनंदादिग्रुद्राशिपाः ॥ ३५ ॥ रोहिण्यंतपदे देहजीवावालिझषौ स्मृतौ ॥ सूर्येन्दुद्विगुणेष्वब्धितर्कशैलाष्टराशिपाः ॥ ३६ ॥ चांद्ररौद्रभगार्यम्णामित्रेंद्रवसुदारुणम् ॥ एतत्ताराष्टकं चैव विज्ञेयं चांद्रवत्क्रमात् ॥ ३७ ॥ देहजीवौ कार्किमीनौ मृगाद्यचरणस्य च ॥ व्यस्तमीनादिकर्कान्तं राशिपाश्च दशाधिपाः ॥ ३८ ॥ गौर्देही मिथुनं जीव इन्दुभस्य द्वितीयके ॥ त्रिद्व्यर्कांकदिगीशार्कचन्द्रर्क्षभवनाधिपाः ॥ ३९ ॥ देहजीवौ नक्रयुग्मौ मृगपादे तृतीयके ॥ त्रिबाणाब्धिरसागाष्टसूर्येशदशराशिपाः ॥ ४० ॥ मेषचापौ देहजीवाविंदुभस्य चतुर्थके ॥

व्यस्तं चापादि मेषांतं राशिपाश्च दशाधिपाः ॥ ४१ ॥ एवं व्यस्ततरे ज्ञेयं देहजीवदशादिकम् ॥ स्पष्टं तवाग्रे कथितं पार्वति प्राणवल्लभे ॥ ४२ ॥

अथ कालचक्रदशानयनोदाहरणमाह ।

स्पष्टचंद्रः १ । ८ । १५ । ७ अस्य कलापिंडं कृत्वा २२९५ । ७ अष्टशतेन ८०० भक्तेर्लब्धं गतनक्षत्रं २ व्यर्थं शेषं ६ । ९ । ५ । ७ षष्टिघ्नं जातं ४१७०७ अष्टशतै ८०० र्भक्तेर्लब्धं एता नक्षत्रघटिका ५२ शेषं १०७ षष्टिघ्नं जातं ६४२० अष्टशतेन भक्तेर्लब्धं ८ पलानि एवं कृत्तिकानक्षत्रे भुक्तघटीपलानि ५२८ शेषं २० व्यर्थं नक्षत्रभुक्तघटिकात्पंचदशघटिकादधिकं अत एव पंचदशभक्ते र्लब्धं ३ व्यर्थं शेषं ७।८ कृत्तिकानक्षत्रे चतुर्थचरणे देहाधिपतिश्चंद्रः जीवाधिपतिर्गुरुः मीनांशदशाऽऽगताब्दानि ८६ शेषं ७ । ८ षष्टिघ्नं ४२८ पुनः दशाऽऽगताब्दानि ८६ गुणनीयं जातं ३६८०८ यदंकेषु नवशतेन ९०० भक्तेर्लब्धं ४० वर्षाणि षेशं ८०८ द्वादशघ्नं जातं ९६९६ नवशतेन भक्तेर्लब्धं १० मासशेषं ६९६ त्रिंशघ्नं जातं २०८८० नवशतेन भक्तेर्लब्धं दिनानि २३ शेषं १८० षष्टिघ्नं १०८०० नवशतेन भक्तेर्लब्धं घटी १२ शेषं पूर्णं० एवं मीनांशदशापूर्वजन्मभुक्तवर्षादि ४० । १० । २३ । १२ । ० एषां स्वदशाब्देषु ८६ उनं इह जन्मानि भोग्यवर्षादि ४५ । १६ । ४० । ० स्युः एवं सर्वत्र ज्ञेय मीनांशदशांतर्गतभृगुमध्ये जन्म १० । १ । ६४८ । ०

अथ कालचक्रसव्यमार्गदशाप्रकरणचक्रम्.

दशानां नक्षत्रनामानि तथा नक्षत्रपदानि.	देहाधिपः	अथ सव्यनक्षत्रदशा १।२।३।७।८।९।१३।१४।१५।१९।२०।२१ २५।२६।२७ सव्य.									जीवाधिपतिः	अंशाः	परमायुर्वर्षाणि.
अ. १ च. १ मू. १९ च. १ पु. ७ च. १ पू. २५ च. १ ह. १३ च. १	भौ.	पा. १ मं. ७व.	रं. २ शु१६व	गा. ३ बु. ९ व	वो. ४ चं२ १	मा. ५ र.५व.	ता. ६ ९बु.व	स. ७ शु१६व	हो. ८ मं.७व.	धि. ९ गु१०व	गुरुः	मेषांशः	दशा १०० वर्षाणि.
अ. १ च. २ मू. १९ च. २ पु. ७ च. २ पू. २५ च. २ ह. १३ च. २	श.	नं १० श. ४	क्ष. ११ श. ४	त्र. १२ गु. १०	दा. ८ मं. ७	सि. ७ शु. १६	च. ६ बु. ९	वं. ४ चं.२१	ण. ५ सू. ५	गा. ३ बु. ९	बुधः	वृषांशः	दशा ८५ वर्षाणि.
अ. १ च. ३ मू. १९ च. ३ पु. ७ च. ३ पू. २५ च. ३ ह. १३ च. ३	शु.	कृ. २ शू.१६	पा. १ मं. ७	अ. १२ गु. १०	क्षु ११ श. ४	नि.१० श. ४	धा. ९ गु. १०	य. १ मं. ७	रं. २ शु. १६	गं. ३ बु. ९	बुधः	मिथुनांशः	दशा ८३ वर्षाणि.
अ. १ च. ४ मू. १९ च. ४ पु. ७ च. ४ पु. २५ च. ४ ह. १३ च. ४	चंद्र	वा. ४ च. २१	णि. ५ सू. ५	च. ६ बु. ९	स्थ. ७ शु.१६	द. ८ मं. ७	धि. ९ गु. १०	न. १० श. ४	क्ष. ११ श. ४	त्र. १२ गु. १०	गुरुः	कर्कांशः	दशा ८६ वर्षाणि.
भ. २ च. १ चि. १४ च. १ पु. ८ च. १ पू. २० च. १ उ. २६ च. १	भौम	ह. ८ मं. ७	स. ७ शु.१६	श्व. ६ बु. ९	व. ४ चं.२१	शा. ५ र. ५	व. ३ बु. ९	र. २ शु १६	प. १ मं. ७	त्र. १२ गु. १०	गुरुः	सिंहांशः	दशा १०० वर्षाणि.
भ. २ च. ३ पू. २० च. २ पु. ८ च. २ चि. १४ च.२ उ.२६ च.२	शनि	क्षु ११ श. ४	ना १० श. ४	धि. ९ गु. १०	क. १ म. ७	र. २ शु १६	गा ३ बु. ९	मी. ४ चं २१	ना. ५ सू. ५	चं. ६ बु. ९	बुधः	कन्यांशः	दशा ८५ वर्षाणि.
भ. २ च. ३ पू. २० च. ३ पू. ८ च. ३ उ. २६ च. ३ चि १४ च. ३	शुक्र	सू. ७ शु. १६	द. ८ मं. ७	धि. ९ गु. १०	म. १० श. ४	क्ष. ११ श. ४	त्र. १२ गु. १०	ज. ८ मं. ७	सि. ७ शू. १६	च. ६ बु. ९	बुधः	तुलांशः	दशा ८३ वर्षाणि.
भ. २ च. ४ पू. २० च. ४ पू. ८ च. ४ चि. १४ च.४ उ. २६ च.४	चंद्र	वा. ४ चं. २१	मा. ५ सू. ५	गा. ३ बु. ९	र. २ शु. १६	क. १ मं. ७	त्र. १२ गु. १०	क्षु.११ श. ४	नी.१० श. ४	धि. ९ गु. १०	गुरुः	वृश्चिकांशः	दशा ८६ वर्षाणि.
कृ. ३ च. १ उ. २१ च. १ अ. ९ च. १ रे. २७ च.१ स्वा.१५ च.१	भौम	पौ. १ मं. ७	रं. २ शु १६	गा. ३ बु. ९	वा ४ च. २१	मा. ५ र. ५	वा. ६ बु. ९	स. ७ शु.१६	हो. ८ मं. ७	धि. ९ गु. १०	गुरुः	धनांशः	दशा १०० वर्षाणि.
कृ. ३ च. २ उ. २१ च. २ अ. ९ च. २ रे. २७ च. २ स्वा.१५ च.२	श.	न. १० श. ४	क्ष. ११ श. ४	त्र. १२ गु. १०	दा. ८ मं. ७	सि. ७ शु १६	च. ६ बु. ९	वं. ४ च.२१	ण. ५ सू. ५	गां. ३ बु. ९	बुधः	मकरांशः	दशा ८५ वर्षाणि.
कृ. ३ च. ३ उ.२१च.३अ.९च.३ रे. २७ च. ३ स्वा. १५ च. ३	शु.	कृ. २ शु १६	पो. १ मं. ७	त्र. १२ गु. १०	क्षु ११ श. ४	र्नि.१० श. ४	धा. ९ गु. १०	य. १ म. ७	रं. २ शु १६	ग. ३ बु. ९	बुधः	कुंभांशः	दशा ८३ वर्षाणि.
कृ.३ च.४ उ.२१च.४ अ.९ च.४ रे. २७ च. ४ स्वा. १५ च. ४	चंद्र	वा. ४ चं.२१	णि. ५ सू. ५	च. ६ बु. ९	स्थं. ७ शु. १६	द. ८ मं. ७	धि. ९ गु. १०	न. १० श. ४	क्ष. ११ श. ४	त्र. १२ गु. १०	गुरुः	मीनांशः	दशा ८६ वर्षाणि.

अथ कालचक्राऽपसव्यमार्गदशाप्रकरणचक्रम्.

दशानां नक्षत्रनामानि तथा नक्षत्रपादानि.	जीवाधिपतिः	अपसव्यनक्षत्राणि ४।५।६।१०।११।१२।१६।१७।१८।२२।२३।२४									देहाधिपः	अंशाः	परमायुर्वर्षाणि.
रो. ४ चं १ वि. १६ च. १ म. १० च. १ श्र. २२ च. १	गुरुः	य. ९ गु. १०	न. १० श. ४	क्ष. ११ श. ४	त्रं. १२ गु. १०	प. १ म. ७	रा. २ शु. १६	ग. ३ बु. ९	मि. ५ सू. ५	व. ४ चं. २१	चंद्रः	वृश्चिकांशः	दशावर्षाणि. ८६
रो. ४ चं. २ वि. १६ च. २ म. १० च. २ श्र. २२ च. २	बुधः	ता. ६ बु. ९	सा. ७ शु. १६	द. ८ गु. १०	त्र. १२ गु १०	क्षु. ११ श. ४	र्नि. १० श. ४	धि. ९ गु. १०	दी. ८ म. ७	सि. ७ शु. १६	शुक्रः	तुलांशः	दशावर्षाणि. ८३
रो. ४ च. ३ वि. १६ च. ३ म. १० च. ३ श्र. २२ च. ३	बुधः	च. ६ बु. ९	मीं. ५ सू. ५	भौ. ४ चं. २१	गी. ३ बु. ९	रा. २ शु. १६	य. १ म. ७	ध. ९ गु. १०	न. १० श. ४	क्षु. ११ श. ४	शनिः	कन्यांशः	दशाब्दाः ८५
रो. ४ च. ४ वि १६ च. ४ म. १० च. ४ श्र. २२ च. ४	गुरुः	त्र. १२ गु. १०	पा. १ म. ७	रा. २ शु. १६	ग. ३ बु. ९	शु. ५ र. ५	भ. ४ चं. २१	ते. ६ बु. ९	स. ७ शु. १६	दा. ८ मं. ७	भौ.	सिंहांशः	दशाब्दाः १००
मृ. ५ च. १ अ. १७ च. १ पू. ११ च. १ ध. २३ च. १	गुरुः	त्र. १२ गु. १०	क्षु. ११ श. ४	र्नि. १० श. ४	धि. ९ गु. १०	दी. ८ म. ७	सा. ८ शु. १६	त. ६ बु. ९	नी. ५ सू. ५	व. ४ चं. २१	चंद्रः	कर्कांशः	दशावर्षाणि. ८६
मृ. ५ च. २ अ. १७ च. २ पू. ११ च. २ ध. २३ च. २	बुधः	गी. ३ बु. ९	रा. २ शु. १६	यु. १ म. ७	ध. ९ गु. १०	न. १० श. ४	क्ष. ११ श. ४	त्र. १२ गु. १०	क. १ मं. ७	रा. २ शु. १६	शु.	मिथुनांशः	दशावर्षाणि. ८३
मृ. ५ च. ३ अ. १७ च. ३ पू. ११ चं. ३ ध. २३ च. ३	बुधः	गो. ३ बु. ९	मा. ५ सु. ५	वा. ४ चं. २१	चां. ६ बु. ९	स. ७ शु. १६	द. ८ मं. ७	त्र. १२ गु. १०	क्षु. ११ श. ४	त्रं. १० श. ४	श.	वृषांशः	दशावर्षाणि. ८५
मृ. ५ च. ४ अ. १७ च. ४ पू. ११ च. ४ ध. २३ च. ४	गुरुः	यी. ९ गु. १०	ज्य. ८ मं. ७	सो. ७ शु. १६	त. ६ बु. ९	मी. ५ सु. ५	वा. ४ चं. २१	गा. ३ बु. ९	रा. २ शु. १६	य. १ म. ७	भौमः	मेषांशः	दशाब्दाः १००
आ. ६ च. १ ज्ये. १८ च. १ उ. १२ च. १ श. २४ च. १	गुरुः	त्र. १२ गु. १०	क्षु. ११ श. ४	नि. १० श. ४	धि. ९ गु. १०	दा. ८ मं. ७	सी. ७ शु. १६	त. ६ बु. ९	मी. ५ सू. ५	व. ४ चं. २१	चंद्रः	मीनांशः	दशाब्दाः ८६
आ. ६ च २ ज्ये. १८ च. २ उ. १२ च. २ श. २४ च. २	बुधः	गी. ३ बु. ९	रा. २ शु. १६	यु. १ मं. ७	ध. ९ गु. १०	नं. १० श. ४	क्ष. ११ श. ४	त्र. १२ गु. १०	य. १ मं. ७	रा. २ शु. १६	शु.	कुंभांशः	दशाब्दाः ८३
आ. ६ च. ३ ज्य. १८ च. ३ उ. १२ च. ३ श. २४ च. ३	बुधः	गो. ३ बु. ९	मा. ५ सू. ५	वा. ४ चं. २१	चा. ६ बु. ९	स. ७ शु. १६	द. ८ मं. ७	त्र. १२ गु. १०	क्षु. ११ श. ४	त्रं. १० श. ४	श.	मकरांशः	दशाब्दाः ८५
आ. ६ च. ४ ज्य. १८ च. ४ उ. १२ च. ४ श. [illegible] च. ४	गुरुः	धी. ९ गु. १०	ज्ये. ८ मं. ७	सी. ७ शु. १६	त. ६ बु. ९	मा. ५ र. ५	वा. ४ चं. २१	गा. ३ बु. ९	र. २ शु. १६	यो. १ मं. ७	भौमः	धनुरंशः	दशाब्दाः १००

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	योगाः
२	०	१	०	१	०	०	१	०	०	७
०	५	१	७	५	४	७	१	५	८	०
२५	२६	१३	१६	१९	६	१६	१३	२६	१२	०
१२	२४	१२	४८	१२	०	४८	१२	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांश दशावर्षाणि १०० तन्मध्ये भृग्वंतर्वर्षाणि १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. २	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	योगाः
०	२	१	३	०	१	२	१	१	१	१६
१	६	५	४	९	५	६	१	६	१	०
२७	२१	८	९	१८	८	२१	१३	३६	१३	०
३६	३६	२४	३६	०	२४	३६	१२	०	१२	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	योगाः
०	०	१	०	०	१	०	०	०	१	९
१	९	१०	५	९	५	७	१०	७	५	०
२	२१	२०	१२	२१	८	१६	२४	१६	८	०
२४	३६	२४	०	३६	२४	४८	०	४८	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये चंद्रांतर्वर्षाणि २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	बु. ९	मं. १	शु. २	बु. ३	योगाः
०	४	१	१	३	१	२	१	३	१	२१
२	४	०	१०	४	५	१	५	४	१०	०
१५	२७	१८	२०	९	१९	६	१९	९	२०	०
३६	३६	०	२४	३६	१२	०	१२	३६	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये रव्यंतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	योगाः
०	०	०	०	०	०	०	०	०	१	५
०	३	५	९	४	६	४	९	५	०	०
१८	०	१२	१८	६	०	६	१८	१२	१८	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	बृ. ३	चं. ४	सू. ५	योगाः
०	०	१	०	०	०	१	०	१	०	९
२	९	५	७	१०	७	५	९	१०	५	०
२४	२१	८	१६	२४	१६	८	२१	२०	१२	०
०	३६	२४	४८	०	४८	२४	३६	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्षे. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	योगाः
०	२	१	१	१	२	१	३	०	१	१६
१	६	१	७	१	६	५	४	९	५	०
२७	२१	१३	६	१३	२१	८	९	१८	८	०
३६	३६	१२	०	१२	३६	२४	३६	०	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्षे. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	योगाः
०	०	०	०	१	०	१	५	१	१	७
०	५	८	५	१	७	५	४	७	१	०
२५	२६	१२	२६	१३	१६	१९	६	४८	१३	०
१२	२४	०	२४	१२	४८	१२	०	१६	१२	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमेषांशदशावर्षाणि १०० तन्मध्य गुरोरंतर्वर्षे. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	योगाः
०	१	०	१	०	२	०	०	१	०	१०
१	०	८	७	१०	१	६	१०	७	८	०
६	०	१२	६	२४	६	०	२४	६	१२	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये शन्यंतर्वर्षे. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	३	९	५	११	२	५	०
५६	५	५	१९	२८	१	२	२५	२४	२	०
२८	४३	४५	१४	३५	३	२८	४५	४२	४८	०
१४	५३	५३	४२	१८	३२	१४	५३	२१	१४	०

अथ कालचक्रवृषभांशदशाव. ८५ तन्मध्ये शन्यंतवर्षाणि ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	५	३	९	५	११	२	५	२	०
२८	७	१९	२८	१	२	२५	२४	२	७	०
५६	४५	५४	३५	३	१८	४५	४२	२८	४५	०
१४	५३	४२	१८	३२	१४	५३	२१	१४	५३	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्य गुरोरंतर्वर्षे. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	श. ११	योगाः
१	१	०	१	१	२	०	१	०	०	१०
१२	२	९	१०	०	५	७	०	५	५	०
२१	३	२६	१७	२१	१९	१	२१	१९	१९	०
१०	३१	२८	३८	१०	२४	४५	१०	२४	२४	०
३५	४६	१४	४९	३५	४२	५३	३५	४३	४३	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये भौमांतर्दशावर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	श. ११	बृ. १२	योगाः
० ०	०	१	०	१	०	०	०	०	०	७
२९	६	३	८	८	४	८	३	३	९	०
३८	२७	२४	२६	२२	२८	२६	२८	२८	२६	०
४९	३१	३१	४९	३५	१४	४९	३५	३५	२८	०
२४	४६	१०	२५	१७	७	२५	१८	१८	१४	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	योगाः
० २	३	१	३	०	१	०	०	१	१	१६
७	०	८	११	११	८	९	९	१०	३	०
४५	४	९	१३	८	९	१	१	१७	२४	०
५२	१४	५२	३	४९	५२	३	३	३८	२१	०
५६	७	५६	३२	२५	५६	३२	३२	४९	११	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्वर्ष. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	योगाः
० १	०	२	०	०	०	०	१	०	१	९
८	११	२	६	११	५	५	०	८	८	०
७	१३	२०	१०	१३	२	२	२१	२६	९	०
३	३	२८	३५	३	२८	२८	१०	४९	५२	०
३१	३२	१४	१८	३२	१४	१४	३५	२५	५६	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये चंद्रांतर्वर्ष. २१ तस्योपदशाचक्रम्.

ध्रुकांक	चं. ४	सू. ५	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	योगाः
० २	५	१	२	०	०	२	१	३	२	२१
२८	२	२	२	११	११	५	८	११	२	०
५६	७	२४	२०	२५	२५	१९	२२	१३	२०	०
२८	४५	४२	२८	४५	४५	२४	३५	३	२८	०
१४	५३	२१	१४	५३	५३	४३	१७	३२	१४	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये सूर्यांतर्वर्ष ५ तस्योपदशाचक्रम्.

ध्रुवांक	र. ५	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	योगाः
० ०	०	०	०	०	०	०	०	०	१	५
२१	३	६	२	२	७	४	११	६	२	०
१०	१५	१०	२४	२४	१	२८	८	१०	२४	०
३५	५२	३५	४२	४२	४५	१४	४९	३५	४२	०
१७	५६	१८	२१	२१	५३	७	२५	१८	२१	०

अथ कालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्व. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	र. ५	योगाः
१	०	०	०	१	०	१	०	२	०	९
८	११	५	५	०	८	८	११	२	६	०
७	१३	२	२	२१	२६	९	१३	२०	१०	०
३	३	२८	२८	१०	४९	५२	३	२८	३५	०
३१	३२	१४	१४	३५	२५	५६	३२	१५	१८	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	योगाः
२	३	१	१	०	०	१	१	३	१	१६
९	१	४	११	९	९	११	४	१	८	०
२३	०	५	३	७	७	३३	५	०	२४	०
५१	२१	४७	५८	३५	३५	५८	४७	२१	३४	०
१९	४१	०	३३	२५	२५	३३	०	४१	४२	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्वर्ष ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	बृ. ३	शु. २	योगाः
१	०	०	०	०	०	०	१	०	१	७
०	७	१०	४	४	१०	७	४	९	४	०
२१	२	३	१	१	३	२	५	३	५	०
२१	३१	३६	२६	२६	३६	३१	४७	१५	४७	०
१२	४८	५२	४५	४५	५२	४८	०	१०	०	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्दशाव. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	शु. २	मं. १	योगाः
१	१	०	०	१	०	१	१	१	०	१०
१३	२	५	५	२	१०	११	१	११	१०	०
२२	१३	२३	२३	१३	३	३	०	३	३	०
२४	४४	२९	२९	४४	३६	५८	२१	५८	३६	०
३४	६	३८	३८	६	५२	३३	४२	३३	५२	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्षे. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	श. १०	बृ. ९	मं. १	शु. २	बृ. ३	शु. २	मं. १	बृ. १२	योगाः
०	०	०	०	०	०	०	०	०	०	४
१७	२	२	५	४	९	५	९	४	५	०
२०	९	९	२३	१	७	६	७	१	२३	०
५७	२३	२३	२९	२६	३५	८	३५	२६	२९	०
४९	५२	५२	३८	४५	२५	४०	२५	४५	३८	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्यें शन्यंतर्वर्षे. ४ तस्योपदशाच०

ध्रुवांक	श. १०	बृ. ९	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. १२	श. ११	योगाः
०	०	०	०	०	०	०	०	०	०	४
१७	२	५	४	९	५	९	४	५	२	०
२०	९	२३	१	७	६	७	१	२३	९	०
५७	२३	२९	२६	३५	८	३५	२६	२९	२३	०
४९	५२	३८	४५	२५	४०	२५	४५	३८	५२	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्षे. १० तस्योपदशाच०

ध्रुवांक	बृ. ९	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	योगाः
१	१	०	१	१	१	०	१	०	०	१०
१३	२	१०	११	१	११	१०	२	५	५	०
२२	१३	३	३	०	३	३	१३	२३	२३	०
२४	४४	२६	५८	२१	५८	३६	४४	२९	२९	०
३४	६	५२	३३	४२	३३	५२	६	३८	३८	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्दशावर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	योगाः
१	०	१	०	१	०	०	०	०	०	७
०	७	४	९	४	७	१०	४	४	१०	०
२१	२	५	३	५	२	३	१	१	३	०
४१	३१	४७	१५	४७	३१	३६	२६	२६	३६	०
१२	४८	०	१०	०	४८	५२	४५	४५	५२	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	योगाः
२	३	१	३	१	१	०	०	१	१	१६
९	१	८	१	४	११	९	९	११	४	०
२३	०	२४	०	५	३	७	७	३	५	०
५१	२१	३४	२१	४७	५८	३५	३५	५८	४७	०
१९	४१	४२	४१	०	३३	२५	२५	३३	०	०

अथ कालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये बुधांतर्वर्ष. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	योगाः
१	०	१	०	१	०	०	१	०	१	९
९	११	८	९	१	५	५	१	९	८	८
२	११	२४	३	०	६	६	०	३	२४	०
१०	१९	३४	१५	२१	८	८	२१	१५	३४	०
७	३२	४२	१०	४२	४०	४०	४२	१०	४२	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये चंद्रांतर्वर्ष. २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बु. १२	योगाः
२	५	१	२	३	१	२	०	०	२	२१
२७	१	२	२	१०	८	५	११	११	५	०
२५	१६	१९	११	२६	१५	९	२१	२१	९	०
५४	२	३२	९	२	२०	४	३७	३७	४	०
७	४७	५	४६	४२	५६	११	४१	४१	११	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये सूर्यांतर्वर्ष ५ तस्योपदशाचक्रम्.

ध्रुवांक	र. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	योगाः
०	०	०	०	०	०	०	०	०	१	५
२०	३	६	११	४	६	२	२	६	२	४
५५	१४	८	४	२६	२९	२३	२३	२९	१९	०
४८	३९	२२	५३	३०	१८	४३	४३	१८	३२	०
५०	४	२०	१	४२	९	१५	१५	९	५	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये सूर्यांतर्वर्ष. ९ तस्योपदशाचक्रम.

ध्रुवांक	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बु. १२	च. ४	र.५	योगाः
१	०	१	०	१	०	०	१	२	०	९
७	११	८	८	०	५	५	०	२	६	०
४०	९	२	२३	१६	०	०	१६	११	८	०
२७	४	४७	४३	४४	४१	४१	४४	९	२२	०
५४	११	२४	१५	४०	५१	५१	४०	४६	३०	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये भृगोरंतर्वर्ष १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	योगाः
२	२	१	१	०	१	१	३	०	१	१६
६	११	३	१०	८	८	१०	१०	११	८	०
५८	२१	१८	९	२७	२७	९	२६	४	२	०
३६	३७	५०	४६	५४	५४	४६	३०	५३	४७	०
१६	४१	१४	२	२६	२६	२	४२	१	२६	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये भौमांतर्वर्ष ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	योगाः
०	०	०	०	०	०	१	०	०	१	७
२९	६	९	३	३	९	८	४	८	३	०
१८	२	२३	२७	२७	२३	१५	२६	२३	१८	०
८	६	१	१२	१२	१	२०	३०	४३	५०	०
२२	५९	२४	३३	३३	२४	५६	४२	१५	१४	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्दशाव. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	योगाः
१	१	०	०	१	२	०	१	१	०	१०
११	१	५	५	१	५	६	०	१०	९	०
५१	२८	१७	१७	२८	९	२९	१६	९	२३	०
३७	२६	२६	२६	२६	४	१८	४४	४६	१	०
४०	१६	३०	३०	१६	१३	९	४०	२	२४	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	११	२	५	८	३	५	०
४४	६	६	१७	२१	२३	०	२७	२७	१७	०
३९	५८	५८	२६	३७	४३	४१	५४	१२	२६	०
४	३७	३७	३०	३१	१५	५१	२६	३३	३०	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाच०

ध्रुवांक	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	योगाः
०	१	०	०	०	०	०	०	०	०	४
१६	२	५	११	२	५	८	३	५	२	०
४४	६	१७	२१	२३	०	२७	२७	१७	६	०
३९	५८	२६	३७	४३	४१	५४	१२	२६	५८	०
४	३७	३०	४१	१५	५१	२६	३३	३०	३७	०

अथ कालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	योगाः
१	१	२	०	१	१	०	१	०	०	१०
११	१	५	६	०	१०	९	१	५	५	०
५१	२८	९	२९	१६	९	२३	२८	१७	१७	०
३७	३६	४	१८	४४	४६	१	२६	२६	२६	०
४०	१६	१३	९	४०	२	२४	१६	३०	३०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ६	शु. २	मं. १	बृ. १२	योगाः
०	०	१	०	१	०	०	१	०	०	७
०	५	१	७	५	४	७	१	७	८	०
२५	२६	१३	१६	१९	६	१६	१३	२	१२	०
१२	२४	१२	४८	१२	०	४८	१२	४	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांश दशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्षाणि १६ तस्योपदशाचक्रम्.

ध्रुवांक	गु. ७	बु. ६	चं. ४	सू. ५	बु. ६	शु. २	मं. १	बृ. १२	मं. ८	योगाः
०	२	१	३	०	१	२	१	१	१	१६
१	६	५	६	९	५	६	१	७	१	०
२७	२१	८	९	१८	८	२१	१३	६	१३	०
३६	३६	२४	३६	०	२४	३६	१२	०	१२	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	चं. ४	सू. ५	बु. ६	शु. २	मं. १	बृ. १२	मं. ८	शु. ७	योगाः
०	०	१	०	०	१	०	०	०	१	९
१	९	१०	५	९	५	७	१०	७	५	०
२	२१	२०	१२	२१	८	१६	२४	१६	८	०
२४	३६	२४	०	३६	२४	४८	०	४८	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये चंद्रांतर्वर्षाणि २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	र. ५	बु. ६	शु. २	मं. १	बृ. १२	मं. ८	शु. ७	बु. ६	योगाः
०	४	१	१	३	१	२	१	३	१	२१
२	४	०	१०	४	५	१	५	४	१०	०
१५	२७	१८	२०	९	१९	६	१९	९	२१	०
३६	३६	०	२४	३६	१२	०	१२	३६	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये रव्यंतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	बु. ६	शु. २	मं. १	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	योगाः
०	०	०	०	०	०	०	०	०	१	५
०	३	५	९	४	६	४	९	५	०	०
१८	०	१२	१८	६	०	६	१८	१२	१८	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. २	मं. १	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	योगाः
०	०	१	०	०	०	१	०	१	०	९
२७	९	५	७	१०	७	५	९	१०	५	०
२४	२१	८	१६	२४	१७	८	२१	२०	१२	०
०	३६	२४	४८	०	४८	२४	३६	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	मं. १	बु. १२	मं. ८	शु. ७	बु. ६	चं. ४	र. ५	बु. ६	योगाः
०	२	१	१	१	२	१	३	०	१	१६
१	६	१	७	१	६	५	४	९	५	०
२७	२१	१३	६	१३	२१	८	९	१८	८	०
३६	३६	१२	०	१२	३६	२४	३६	०	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	र. ५	बु. ६	शु. २	योगाः
०	०	०	०	१	०	१	०	०	१	७
०	५	८	५	१	७	५	४	७	१	०
२५	२६	१२	२६	१३	१६	१९	६	१६	१३	०
१२	२४	०	२४	१२	४८	१२	०	४८	१२	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	गु. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ६	शु. २	मं. १	योगाः
०	१	०	१	०	२	०	०	१	०	१०
१	०	८	७	१०	१	६	१०	७	८	०
६	०	१२	६	२४	६	०	२४	६	१२	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ४	श. १०	गु. ९	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	योगाः
०	०	०	०	०	०	०	०	०	०	४
०	२	२	५	३	९	५	११	२	५	०
५६	७	७	१९	२८	१	२	२५	२४	२	०
२८	४५	४५	१४	३५	३	२८	४५	४२	२८	०
१४	५३	५३	४२	१८	३२	१४	५३	२१	१४	०

अथ कालचक्रकन्यांशदशाव. ८५ तन्मध्ये शन्यंतवर्षाणि ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	गु. ९	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	श. ११	योगाः
०	०	०	०	०	०	०	०	०	०	४
०	२	५	३	९	५	११	२	५	२	०
५६	७	१९	२८	१	२	२५	४४	२	७	०
२८	४५	५४	३५	३	२८	४५	४२	२८	४५	०
१४	५३	४२	१८	३२	१४	५३	२१	१४	५३	०

अथ कालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	श. १०	श. १०	योगाः
० १	०	०	१	१	२	०	१	०	०	१०
१२	२	९	१०	०	५	७	०	५	५	०
२१	३	२६	१७	२१	१९	१	२१	१९	१९	०
१०	३१	२८	३८	१०	२४	४५	१०	२४	२४	०
३५	४६	१४	४९	३५	४२	४२	३५	४३	४३	०

अथ कालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये भौमांतर्वर्षं. ७ त. उ. द. चक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	श. ११	श. १०	बृ. ९	योगाः
$\overset{०}{०}$	०	१	०	१	०	०	०	०	०	७
२९	६	६	८	८	४	८	३	३	९	०
३८	२७	२४	२६	२२	२८	२६	२८	२८	२६	०
४९	३१.	२१	४९	३५	१४	४९	३५	३५	१८	०
२४	४६	१०	२५	१७	७	२५	१८	१८	१४	०

अथ कालचक्रकन्यांशदशाव० ८५ तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. चक्रम्.

ध्रुवांक	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	श. ११	श. १०	बृ. ९	मं. १	योगाः
$\overset{०}{२}$	२	१	३	०	१	०	०	१	१	१६
७	०	८	११	११	८	९	९	१०	३	०
४५	४	९	१३	८	९	१	१	१७	२४	०
५२	१४	५२	३	४९	५२	३	३	३८	२१	०
५६	७	५६	३२	२५	५६	३२	३२	४९	११	०

अथ कालचक्रकन्यांशदशाव० ८५ तन्मध्ये बुधांतर्वर्ष. ९ त. उ. द. चक्रम्.

ध्रुवांक	बु. ३	चं. ४	सू. ५	बु. ६	श. ११	श. १०	बृ. ९	मं. १	शु. २	योगाः
$\overset{०}{१}$	०	२	०	०	०	०	१	०	१	१
८	११	२	६	११.	५	५	०	८	८	०
७	१३	२०	१०	१३	२	२	२१	२६	९	०
६	३	२८	३५	३	२८	२८	१०	४९	५२	०
३१	३२	१४	१८	३२	१४	१४	३५	२५	५६	०

अथ कालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये चंद्रांतर्वर्ष. २१ त. उ. द. चक्रम्.

ध्रुवांक	चं. ४	सू. ५	बु. ६	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	योगाः
$\overset{०}{२}$	५	१	२	०	०	२	१	३	२	२१
२८	२	२	२	११	११	५	८	११	२	०
५६	७	२४	२०	२५	२५	११	२२	१३	२०	०
२८	४५	४२	२८	४५	४५	२४	३५	३	२८	०
१४	५३	२१	१४	४३	४३	४३	१७	३२	१४	०

अथ कालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये सूर्यांतर्वर्ष. ५ त. उ. द. च.

ध्रुवांक	सू. ५	बु. ६	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	च. ४	योगाः
$\overset{०}{०}$	०	०	०	०	०	०	०	०	१	५
२१	३	६	२	२	७	४	११	६	२	०
१०	१४	१०	२४	२४	१	२८	८	१०	२४	०
३५	५२	३५	४२	४२	४५	१४	४९	३५	४२	०
१७	५६	१७	२१	२१	५३	७	२५	१८	२१	०

अथ कालचक्रकन्यांशदशाव० ८५ तन्मध्ये बुधांतर्वर्ष. ९ त. उ. द. चक्रम्.

ध्रुवांक	बु. ६	श. ११	श. १०	बृ. ९	म. १	शु. २	बु. ३	च. ४	सू. ५	योगाः
$\overset{०}{१}$	०	०	०	१	०	१	०	२	०	९
८	११	५	५	०	८	८	११	२	६	०
७	१३	२	२	२१	२६	९	१३	२०	१०	०
३	३	२८	२८	१०	४९	५२	३	२८	३५	०
२१	३२	१४	१४	३५	२५	५६	३२	१४	१८	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. च.

ध्रुवांक	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	योगाः
०२	३	१	१	०	०	१	१	३	१	१६
९	१	४	११	९	९	११	४	१	८	०
२३	०	५	३	७	७	३	५	०	२४	०
५१	२१	४७	५८	३५	३५	५८	४७	२१	३४	०
१९	४१	०	३३	२५	२५	३३	०	४१	४२	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्वर्ष. ७ त. उ द. च.

ध्रुवांक	म. ८	बृ. ९	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	शु. ७	योगाः
०	०	०	०	०	०	०	१	०	१	७
१०	७	१०	४	४	१०	७	४	९	४	०
२१	२	३	१	१	३	२	५	३	५	०
४१	३१	३६	२६	२६	३६	३१	४७	१५	४७	०
१२	४८	५२	४५	४५	५२	४८	०	१०	०	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. च.

ध्रुवांक	बृ. ९	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	शु. ७	म. ८	यो
०१	१	०	०	१	०	१	१	१	०	१०
१३	२	५	५	२	१०	११	१	११	१०	०
२२	१३	२३	२३	१३	३	३	०	३	३	०
२४	४४	२९	२९	४४	३६	५८	२१	५८	३६	०
३४	६	३८	३८	६	५२	३३	४२	३३	५२	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. च.

ध्रुवांक	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	शु. ७	मं. ८	बृ. ९	योगाः
००	०	०	०	०	०	०	०	०	०	४
१७	२	२	५	४	९	५	९	४	५	०
२०	९	९	२३	१	७	६	७	१	२३	०
५७	२३	२३	२९	२६	३५	८	३५	२६	२९	०
४९	५२	५२	३८	४५	२५	४०	२५	४५	३८	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योप च०

ध्रुवांक	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	शु. ७	म. ८	बृ. ९	श. १०	योगाः
००	०	०	०	०	०	०	०	०	०	४
१७	२	५	४	९	५	८	४	५	२	०
२०	९	२३	१	७	६	७	१	२३	९	०
५७	२३	२९	२६	३५	८	३५	२६	२९	२३	०
४९	५२	३८	४५	२५	४०	२५	४५	३८	५२	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. १२	मं. ८	शु. ७	बु. ६	श. ७	मं. ८	बृ. ९	श. १०	श. ११	योगाः
०१	१	०	१	१	१	०	१	०	०	१०
१३	२	१०	११	१	११	१०	२	५	५	०
२२	१३	३	३	०	३	३	१३	२३	२३	०
२४	४४	३६	५८	२१	५८	३६	४४	२९	२९	०
३४	६	५२	३३	४२	३३	५२	६	३८	३८	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्दशावर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	शु. ७	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	योगाः
० १	०	१	०	१	०	०	०	०	०	७
०	७	४	९	४	७	१०	४	४	१०	०
२१	२	५	३	५	२	३	१	१	३	०
४१	३१	४७	१५	४७	३१	३६	२६	२६	३६	०
१२	४८	०	१०	०	४८	५२	४५	४५	५२	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	मं. ८	योगाः
० ३	३	१	३	१	१	०	०	१	१	१६
९	१	८	१	४	११	९	९	११	४	०
२३	०	२४	०	५	३	७	७	३	५	०
५१	२१	३४	२१	४७	५८	३५	३५	५८	४७	०
१९	४१	४२	४१	०	३३	२५	२५	३३	०	०

अथ कालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये बुधांतर्वर्ष. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बु. १२	मं. ८	शु. ७	योगाः
० १	०	१	०	१	०	०	१	०	०	९
९	११	८	९	१	५	५	१	९	८	०
२	२१	२४	३	०	६	६	०	३	२४	०
१०	१९	३४	१५	२१	८	८	२१	१५	३४	०
७	३२	४२	१०	४२	४०	४०	४२	१०	४२	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये चंद्रांतर्वर्ष. २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	सू. ५	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	योगाः
० २	५	१	२	३	१	२	०	०	२	२१
२७	१	२	२	१०	८	५	११	११	५	०
५४	१६	१९	११	२६	१५	९	२१	२१	९	०
२५	२	३२	९	३०	२०	४	३७	३७	४	०
६	४७	५	४६	४२	५६	११	४१	४१	११	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये सूर्यांतर्वर्ष ५ तस्योपदशाचक्रम्.

ध्रुवांक	र. ५	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	चं. ४	योगाः
० ०	०	०	०	०	०	०	०	२	१	५
२०	३	६	११	४	६	२	२	६	२	०
५५	१४	८	४	२६	२९	२३	२३	२९	१९	०
४८	३९	२२	५३	३०	१८	४३	४३	१८	३२	०
५०	४	२०	१	४२	९	१५	१५	९	५	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये बुधांतर्वर्ष. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	चं. ४	र. ५	योगाः
० १	०	१	०	१	०	०	१	२	०	९
७	११	८	८	०	५	५	०	२	६	०
४०	०	२	२३	१६	०	०	१६	११	८	०
२७	५	४७	४३	४४	४१	४१	४४	९	२२	०
५४	११	२६	१५	४०	५१	५१	४०	४६	२०	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये भृगोरंतर्वर्ष १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	चं. ४	सू. ५	बृ. ३	योगाः
० २	२	१	१	०	०	१	३	०	१	१६
६	११	३	१०	८	८	१०	१०	११	८	०
५८	२१	१८	९	२७	२७	९	२६	४	२	०
३६	३७	५०	४६	५४	५४	४६	३०	५३	४७	०
१६	४१	१४	२	२६	२६	२	४२	१	२६	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये भौमांतर्वर्ष ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	चं. ४	सू. ५	बु. ३	शु. २	योगाः
२ ०	०	०	०	०	०	१	०	०	१	७
२९	६	९	३	३	९	८	४	८	३	०
१८	२५	२३	२७	२७	२३	१५	२६	२३	१८	०
८	६	१	१२	१२	१	२०	३०	४२	५०	०
२२	५९	२४	३३	३३	२४	५६	४२	१५	१४	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्दशाव. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. १२	श. ११	श. १०	बृ. ९	चं. ४	सू. ५	बु. ३	शु. २	मं. १	योगाः
० १	१	०	०	१	२	०	१	१	०	१०
११	१	५	५	१	५	६	०	१०	९	०
५९	२८	१७	१७	२८	९	२९	१६	९	२३	०
३७	३६	२६	२६	३६	४	१८	४४	४६	१	०
४०	१६	३०	३०	१६	१३	९	४०	२	२४	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	श. १०	बृ. ९	चं. ४	सू. ५	बु. ३	शु. २	मं. १	बृ. १२	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	११	२	५	८	३	५	०
४४	६	६	१७	२१	२३	०	२७	२७	१७	०
३९	५८	५८	२६	३७	४३	४१	५४	१२	२६	०
४	३७	३७	३०	४१	१५	५१	२६	३३	३०	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशा च०

ध्रुवांक	श. १०	बृ. ९	चं. ४	सू. ५	बु. ३	शु. २	मं. १	बृ. १२	श. ११	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	५	११	२	५	८	३	५	२	०
४४	६	१७	२१	२३	०	२७	२७	१७	६	०
३९	५८	२६	३७	४३	४१	५४	१२	२६	५८	०
४	३७	३०	४१	१५	५१	२६	२३	३०	३७	०

अथ कालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ९	चं. ४	सू. ५	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	योगाः
० १	१	२	०	१	१	०	१	०	०	१०
११	१	५	६	०	१०	९	१	५	५	०
५१	२८	९	२९	१६	९	२३	२८	१७	१७	०
३७	३६	४	२८	४४	४६	१	३६	२६	२६	०
४०	१६	१३	९	४०	२	२४	१६	३०	३०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	योगाः
०	०	१	०	१	०	०	१	०	०	७
०	५	१	७	५	४	७	१	५	८	०
२५	२६	१३	१६	१९	६	१६	१३	२६	१२	०
१२	२४	१२	४८	१२	०	४८	१२	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्षाणि १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. २	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	योगाः
०	२	१	३	०	१	२	१	१	१	१६
१	६	५	६	९	५	६	१	६	१	०
२७	२१	८	९	१८	८	२१	१३	३६	१३	०
३६	३६	२४	३६	२	२४	३६	१२	०	१२	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	योगाः
०	०	१	०	०	१	०	०	०	१	९
१	९	१०	५	९	५	७	१०	७	५	०
२	२१	२०	१२	२१	८	१६	२४	१६	८	०
२४	३६	२४	०	३६	२४	४८	०	४८	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये चंद्रांतर्वर्षाणि २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	र. ५	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	बु. ३	योगाः
०	४	१	१	३	१	२	१	३	१	२१
२	४	०	१०	४	५	१	५	४	१०	०
१५	२७	१८	२०	९	१९	६	१९	९	२०	०
३६	३६	०	२४	३६	१२	०	१२	३६	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये रव्यंतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	योगाः
०	०	०	०	०	०	०	०	०	१	५
०	३	५	९	४	३	४	९	५	०	०
१८	०	१२	१८	६	०	६	१८	१२	१८	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. ७	मं. ८	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	सू. ५	योगाः
०	०	१	०	०	०	१	०	१	०	९
२	९	५	७	१०	७	५	९	१०	५	०
२४	२१	८	१६	२४	१६	८	२१	२०	१२	०
०	३६	२४	४८	०	४८	२४	३६	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बु. ९	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	योगाः
०	२	१	१	१	२	१	३	०	०	१६
१	६	१	७	१	३	५	४	९	५	०
२७	२१	१३	६	१३	२१	८	९	१८	८	०
३६	३६	१२	०	१२	३६	२४	३६	०	२४	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. ९	मं. १	शु. २	बु. ३	चं. ४	र. ५	बु. ६	शु. ७	योगाः
०	०	०	०	१	०	१	०	०	१	७
०	५	८	५	१	७	५	४	७	१	०
२५	२६	१२	२६	१३	१६	१९	६	१६	१३	०
१२	२४	०	२४	१२	४८	१२	०	४८	१२	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रधनांशदशावर्षाणि १०० तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	गु. ९	मं. १	शु. २	बु. ३	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	योगाः
०	१	०	१	०	२	०	०	१	०	१०
१	०	८	७	१०	१	६	१०	७	८	०
६	०	१२	६	२४	६	०	२४	६	१२	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अथ कालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	श. ११	गु. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	३	९	५	११	२	५	०
५६	७	७	१९	२८	१	२	२५	२४	२	०
२८	४५	४५	२४	३५	३	२८	४५	४२	२८	०
२४	५३	५३	४२	१८	३२	१४	५३	२१	२४	०

अथ कालचक्रमकरांशदशाव. ८५ तन्मध्ये शन्यंतर्वर्षाणि ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	गु. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	५	३	९	५	११	२	५	२	०
५८	७	१९	२८	१	२	२५	२४	२	७	०
२८	४५	२४	३५	३	२८	४५	४२	२८	४५	०
१४	५३	४२	१८	३२	१४	५३	२१	१४	५३	०

अथ कालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	श. ११	योगाः
१	१	०	१	१	२	०	१	०	०	१०
१२	२	९	१०	०	५	७	०	५	५	०
२१	३	२६	१७	२१	१९	१	२१	१९	१९	०
१०	३१	२८	३८	१०	२४	४५	१०	२४	२४	०
३५	४६	१४	४९	३५	४२	५३	३५	४३	४३	०

अथ कालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. चक्रम्.

ध्रुवांक	शु. ७	मं. ८	बु. ६	चं. ४	र. ५	बृ. ३	श. १०	श. ११	बृ. १२	योगाः
० ०	०	१	०	१	०	०	०	०	०	१०
२९	६	३	८	८	४	८	३	३	९	०
३८	२७	२४	२६	२२	२८	२६	२८	२८	२६	०
४९	३१	२१	४९	३५	१४	४९	३५	३५	१८	०
२४	४६	१०	२५	१७	७	२५	१८	१८	१४	०

अथ कालचक्रमकरांशदशाव० ८५ तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. चक्रम्.

ध्रुवांक	शु. ७	बु. ६	चं. ४	सू. ५	बु.	श. ३	श. १०	बृ. १०	मं. १२	योगाः
० २	६	१	३	०	१	०	०	१	१	१६
७	०	८	११	११	८	९	९	१०	३	०
४५	४	९	१३	८	९	१	१	१७	२४	०
५२	१४	५२	३	४९	५२	३	३	३८	२१	०
५६	७	५६	३२	२५	५६	३२	३२	४९	११	०

अथ कालचक्रमकरांशदशाव० ८५ तन्मध्ये बुधांतर्वष. ९ त. उ. द. चक्रम्.

ध्रुवांक	बु. ६	चं. ४	सू. ५	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	योगाः
० १	०	२	०	०	०	०	१	०	१	९
८	११	२	६	११	५	५	०	८	८	०
७	१३	२०	१०	१३	२	२	२१	२६	९	०
३	३	२८	३५	३	२८	२८	१०	४९	५२	०
३१	३२	१४	१८	३२	१४	१४	३५	२५	५६	०

अथ कालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये चंद्रांतर्वर्ष. २१ त. उ. द. चक्रम्.

ध्रुवांक	चं. ४	सू. ५	बु. ३	श. १०	श. ११	बृ. १२	म.८-१	शु.७-२	बु. ६	योगाः
० २	५	१	२	०	०	२	१	३	२	२१
२८	२	२	२	११	११	५	८	११	२	०
५६	७	२४	२०	२५	२५	१९	२२	१३	२०	०
२८	४५	४२	२८	४५	४५	२४	३५	३	२८	०
१४	५३	३१	१४	५३	५३	४३	१७	३२	१४	०

अथ कालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये सूर्यांतर्वर्ष. ५ त. उ. द. च.

ध्रुवांक	सू. ५	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	योगाः
० ०	०	०	०	०	०	०	०	०	१	५
२१	३	६	२	२	७	४	११	६	२	०
१०	१५	१०	२४	२४	१	२८	८	१०	२४	०
३५	५२	३५	४२	४२	४५	१४	४९	३५	४२	०
१७	५६	१८	२१	२१	५३	७	२५	१८	२१	०

अथ कालचक्रमकरांशदशाव० ८५ तन्मध्ये बुधांतर्वर्ष. ९ त. उ. द. चक्रम्.

ध्रुवांक	बु. ३	श. १०	श. ११	बृ. १२	मं. ८	शु. ७	बु. ६	चं. ४	सू. ५	योगाः
० १	०	०	०	१	०	१	०	२	०	९
८	११	५	५	०	८	८	११	२	०	०
७	१३	२	२	२१	२६	९	१३	२	६	०
३	३	२८	२८	१०	४९	५२	३	२०	१०	०
३१	३२	१४	१४	३५	२५	५६	३२	२८	३५	०
								१४	१८	०

अथ कालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. च.

ध्रुवांक	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	योगाः
०	३	१	१	०	०	१	१	३	१	१६
२	१	४	११	९	९	११	४	१	८	०
९	०	५	३	७	७	३	५	०	२४	०
२३	२१	४७	५८	३५	३५	५८	४७	२१	३४	०
५१	४१	०	३३	२५	२५	३३	०	४१	४२	०

अथ कालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्वर्ष. ७ त. उ द. च.

ध्रुवांक	म. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	शु. २	योगाः
० १	०	०	०	०	०	०	१	०	१	७
०	७	१०	४	४	१०	७	४	९	४	०
२१	२	३	१	१	३	२	५	३	५	०
४१	३१	३६	२६	२६	३६	३१	४७	१५	४७	०
१२	४८	५२	४५	४५	५२	४८	०	१०	०	०

अथ कालचक्रकुंभांशदशावर्षाणे ८३ तन्मध्ये गुरारंतर्वर्ष. १० त. उ. द. च.

ध्रुवांक	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	शु. २	मं. १	योगा
० १	१	०	०	१	०	१	१	१	०	१०
१३	२	५	५	२	१०	११	१	११	१०	०
२२	१३	२३	२३	१३	३	३	०	३	३	०
२४	४४	२९	२९	४४	३६	५	१	५८	३६	०
३४	६	३८	३८	६	५२	३३	४२	३३	५२	०

अथ कालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. च.

ध्रुवांक	श. ११	श. १०	बृ. ९	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. १२	योगा
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	२	५	४	९	५	९	४	५	०
२०	९	९	२३	१	७	६	७	१	२३	०
५७	२३	२३	२९	२६	३५	८	३५	२६	२९	०
४९	५२	५२	३८	४५	२५	४०	२५	४५	३८	०

अथ कालचक्रकुंभांशदशावषाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योप च०

ध्रुवांक	श. १०	बृ. ९	म. १	शु. २	बु. ३	शु. २	म. १	बृ. १२	श. ११	यागा
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	५	४	९	५	९	४	५	२	०
२०	९	२३	१	३७	६	३७	१	२३	९	०
५७	२३	२९	२६	३५	८	३५	२६	२९	२३	०
४९	५२	३८	४५	२५	४०	२५	४५	२८	५२	०

अथ कालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्षं. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ९	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	योगाः
० १	१	०	१	१	१	०	१	०	०	१०
१३	२	१०	११	१	११	१०	२	५	५	०
२२	१३	३	३	०	३	३	१३	२३	२३	०
२४	४४	३६	५८	२१	५८	३६	४४	२९	२९	०
३४	६	५२	३३	४२	३३	५२	६	३८	३८	०

अथ कालचक्रकुम्भांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्दशावर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	योगाः
०	०	१	०	१	०	०	०	०	०	७
०	७	४	९	४	७	१०	४	४	१०	०
२१	२	५	३	५	२	३	१	१	३	०
४१	३१	४७	१६	४७	३१	३६	२६	२६	३६	०
१२	४८	०	१०	०	४८	५२	४५	४५	५२	०

अथ कालचक्रकुम्भांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	योगाः
०	३	१	३	१	१	०	०	१	१	१६
९	१	८	१	४	११	९	९	११	४	०
२३	०	२४	०	५	३	७	७	३	५	०
५१	२१	३४	२१	४७	५८	३५	३५	५८	४७	०
१९	४१	४२	४१	०	३३	२५	२५	३३	०	०

अथ कालचक्रकुम्भांशदशावर्षाणि ८३ तन्मध्ये बुधांतर्वर्ष. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. १२	श. ११	श. १०	बृ. ९	मं. १	शु. २	योगाः
०	०	१	०	१	०	०	१	०	१	९
९	११	८	९	१	५	५	१	९	८	०
२	२१	२४	३	०	६	६	०	३	२४	०
१०	१९	३४	१५	२१	८	८	२१	१५	३४	०
७	३२	४२	१०	४२	४०	४०	४२	१०	४२	०

अथ कालचक्रमीनांशदशावर्षाणि ८३ तन्मध्ये चंद्रांतर्दशावर्ष. २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	योगाः
०	५	१	२	३	१	२	०	०	०	२१
२	१	२	२	१०	८	५	११	११	५	०
२७	१६	१९	११	२६	१५	९	२१	२१	९	०
५४	२	३२	९	३०	२०	४	३७	३७	४	०
२७	४७	५	४७	४३	५६	११	४१	४१	११	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये सूर्यांतर्वर्ष ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	योगाः
०	०	०	०	०	०	०	०	०	१	५
२०	३	६	११	४	६	२	२	६	२	०
५५	१४	८	४	२६	२९	२३	२३	२९	१९	०
४८	१९	२२	५३	३०	१८	४३	४३	८	३२	०
५०	४	२०	१	४२	९	१५	१५	९	५	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये बुधांतर्वर्ष. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	र. ५	योगाः
०	०	१	०	१	०	०	१	२	०	९
७	११	८	८	०	५	५	०	२	६	०
५०	०	२	२३	१६	०	०	१६	११	८	०
२७	४	४७	४३	४४	४१	४१	४४	९	२२	०
५४	११	२६	१५	४०	५१	५१	४०	४६	२०	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये भृगोरंतर्वर्ष १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	योगाः
२	२	१	०	०	०	१	३	०	१	१६
६	११	३	१०	८	८	१०	१०	११	८	०
५८	२१	१८	९	२७	२७	९	२६	४	२	०
३६	३७	५०	४६	५४	५४	४६	३०	५३	४७	०
१६	४१	१४	२	२६	२६	२	४२	१	२६	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये भौमांतर्वर्ष ७ तस्यापदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	योगाः
०	०	०	०	०	०	१	०	०	१	७
२९	६	९	३	३	९	८	४	८	३	०
१८	२५	२३	२७	२७	२३	१५	२६	२३	१८	०
८	६	१	१२	१२	१	२०	३०	४३	५०	०
२२	५९	२४	३३	३३	२४	५६	४२	१५	१४	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्दशाव. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ९	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	योगाः
१	१	०	०	१	२	०	१	१	०	१०
११	१	५	५	१	५	६	०	१०	९	०
५१	२८	१७	१७	२८	९	२९	१६	९	२३	०
३७	३६	२६	२६	३६	४	१८	४४	४६	१	०
४०	१६	३०	३०	१६	१३	९	४०	२	२४	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	१	२	५	८	३	५	०
४४	६	६	१७	२१	१३	०	२७	२७	१७	०
३९	५८	५८	२६	३७	४३	४१	५४	१२	२६	०
४	३७	३७	३०	४१	१५	५१	२६	३३	३०	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाच०

ध्रुवांक	श. ११	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	५	११	२	५	८	३	५	२	०
४४	६	१७	२१	२३	०	२७	२७	१७	६	०
३९	५८	२६	३७	४३	४१	५४	१२	२६	५८	०
४	३७	३०	४१	१५	५१	२६	२३	३०	३७	०

अथ कालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. १२	चं. ४	सू. ५	बु. ६	शु. ७	मं. ८	बृ. ९	श. १०	श. ११	योगाः
१	१	२	०	१	१	०	१	०	०	१०
११	१	५	६	०	१०	९	१	५	५	०
५१	२८	९	२९	१६	९	२३	२८	१७	१७	०
३७	३६	४	१८	४४	४६	१	३६	२६	२६	०
४०	१६	१३	९	४०	२	२४	१६	३०	३०	०

अथापसव्यन. का. च. वृश्चिकांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १ तस्योपदशाच०

ध्रुवांक	बृ. ९	श. १०	श. ११	बृ.१२	मं. १	शु. २	बु. ३	सू. ५	चं.६	योगाः
० १	१	०	०	१	०	१	१	०	२	१०
११	१	५	५	१	९	१०	१०	६	५	०
५१	२८	१७	१७	२८	२३	९	१६	२९	९	०
३७	३६	२६	२६	३६	१	४६	४४	१८	४	०
४०	१६	३०	३०	१६	२४	२	४०	९	१३	०

अपसव्यकालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श.१०	श. ११	बृ. १२	मं. १	शु. २	बु. ३	सू. ५	चं. ४	बृ. ९	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	३	८	५	२	११	५	०
४४	६	६	१७	२७	२७	०	२३	२१	१७	०
३९	५८	५८	२६	१२	५४	४१	४३	३७	२६	०
४	३७	३७	३०	३३	२६	५१	१५	४१	३०	०

अपसव्यकालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श.११	बृ १२	मं. १	शु. २	बु. ३	सू. ५	चं. ४	बृ. ९	श.१०	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	५	३	८	५	२	११	५	२	०
४४	६	१७	२७	२७	०	२३	२१	१७	६	०
३९	५८	२६	१२	५४	४१	४३	३७	२६	५८	०
४	३७	३०	३३	२६	५१	१५	४१	३०	३७	०

अपसव्यकालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	गु. १२	मं. १	शु. २	बु. ३	सू. ५	चं. ४	गु. ९	श.१०	श.११	योगाः
० १	१	०	१	१	०	२	१	०	०	१०
११	१	९	१०	०	६	५	१	५	५	०
५१	२८	२३	९	१६	२९	९	२८	१७	१७	०
३७	३६	१	४६	४४	१८	४	३६	२६	२६	०
४०	१६	२४	२	४०	९	१३	१६	३०	३०	०

अपसव्यकालचक्रवृश्चिकांशदशाव. ८६ तन्मध्ये भौमांतवर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	सू. ५	चं. ४	बृ. ९	श.१०	श.११	बृ.१२	योगाः
० ०	०	१	०	०	१	०	०	०	०	७
२९	६	३	८	४	८	९	३	३	९	०
१८	२५	१८	२३	२६	१५	२३	२७	२७	२३	०
८	६	५०	४३	३०	२०	१	१२	१२	१	०
२२	५९	१४	१५	४२	५६	२४	३३	३३	२४	०

अपसव्यकालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. ३	सू. ५	चं. ४	बृ. ९	श. १०	श. ११	गु.१२	मं. १	योगाः
० २	२	१	०	३	१	२	२	१	१	१६
६	११	८	११	१०	१०	८	८	१०	३	०
५८	२१	२	४	२६	९	२७	२७	९	१८	०
३६	३७	४७	५३	३०	४६	५४	५४	४६	५०	०
१६	४१	२६	१	४२	२	२६	२६	२	१४	०

अपसव्यकालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	सू. ५	चं. ४	बृ. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	योगाः
० १	०	०	२	१	०	०	१	०	१	९
७	११	६	२	०	५	५	०	८	८	०
४०	९	८	११	१६	०	०	१६	२३	२	०
२७	४	२२	९	४४	४१	४१	४४	४३	४७	०
५४	११	२०	४६	४०	५२	५२	४०	१५	२६	०

अपसव्यकालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये सूर्यांतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	चं. ४	बृ. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	योगाः
० ०	०	१	०	०	०	०	०	०	०	५
२०	३	२	६	२	२	६	४	११	६	०
५५	१४	१९	२९	२३	२३	२९	२६	४	८	०
४८	३९	३२	१८	४३	४३	१८	३०	५३	२२	०
५०	४	५	९	१५	१५	९	४२	९	२०	०

अपसव्यकालचक्रवृश्चिकांशदशावर्षाणि ८६ तन्मध्ये चंद्रांतर्वर्षाणि २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	बृ. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	सू. ५	योगाः
० ४	५	२	०	०	२	१	३	२	१	२१
२७	१	५	११	११	५	८	१०	२	२	०
५४	१६	९	२१	२१	९	१५	२६	११	१९	०
५६	२	४	३७	३७	४	२०	३०	९	३२	०
७	४७	११	४१	४१	११	५६	४२	४६	५	०

अपसव्यकालचक्रतुलांशदशावर्षाणि ८६ तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. ७	मं. ८	गु. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	योगाः
० १	०	१	०	१	०	०	१	०	१	९
९	११	८	९	१	५	५	१	९	८	०
२	२१	२४	३	०	६	६	०	३	२४	०
१०	१९	३४	१५	२१	८	८	२१	१५	३४	०
७	३२	४२	१०	४२	४०	४०	४२	१०	४२	०

अपसव्यकालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बृ. १२	श. ११	श. १०	गु. ९	मं. ८	शु. ७	बु. ६	योगाः
० ३	३	१	१	०	०	१	०	३	१	१६
९	१	४	११	९	९	११	४	१	८	०
२२	०	५	३	७	७	३	५	०	२४	०
५१	२१	४७	५८	३५	३५	५८	४७	२१	३४	०
१९	४१	०	३३	२५	२५	३३	०	४१	४२	०

अपसव्यकालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. १२	श. ११	श. १०	गु. ९	मं. ८	शु. ७	बु. ६	शु. ७	योगाः
० १	०	०	०	०	०	०	१	०	१	७
०	७	१०	४	४	१०	७	४	९	४	०
२१	२	३	१	१	३	२	५	३	५	०
४१	३१	३६	२६	२६	३६	३१	४७	१५	४७	०
१२	४८	५२	४५	४५	५२	४८	०	१०	०	०

अपसव्यकालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	शु. ७	मं. ८	योगाः
० १	१	०	०	१	०	१	१	१	०	१०
१३	२	५	५	२	१०	११	१	११	१०	०
२२	१३	२३	२३	१३	३	३	०	३	३	०
२४	४४	२९	२९	४४	३६	५८	२१	५८	३६	०
३४	६	३८	३८	६	५२	३३	४२	३३	५२	०

अपसव्यकालचक्रतुलांशदशाव० ८३ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	शु. ७	मं. ८	बृ. १२	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	२	५	४	९	५	९	४	५	०
२०	९	९	२३	१	७	६	७	१	२३	०
५७	२३	२३	२९	२६	३५	८	३५	२६	२९	०
४९	५२	५२	३८	४५	२५	४०	२५	४५	३८	०

अपसव्यकालचक्रतुलांशदशाव० ८३ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	शु. ७	मं. ८	बृ. १२	श. ११	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	५	४	९	५	९	४	५	२	०
२०	९	२३	१	७	६	७	१	२३	९	०
५७	२३	२९	२६	३५	८	३५	२६	२९	२३	०
४९	५२	३८	४५	२५	४०	२५	४५	३८	५२	०

अपसव्यकालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	बृ. ९	मं. ८	शु. ७	बु. ६	शु. ७	म. ८	बृ. १२	श. ११	श. १०	योगाः
० १	१	०	१	१	१	०	१	०	०	१०
१३	२	१०	११	१	११	१०	२	५	५	०
२३	१३	३	३	०	३	३	१३	२३	२३	०
२४	४४	३६	५८	२१	५८	३६	४४	३९	३९	०
३४	६	५२	३३	४२	३३	५२	६	३८	३८	०

अपसव्यकालचक्रतुलांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्वर्ष. ७ त. उ. द. च.

ध्रुवांक	म. ८	शु. ७	बु. ६	शु. ७	म. ८	बृ. १२	श. ११	श. १०	बृ. ९	योगाः
० १	०	१	०	१	०	०	०	०	०	७
०	७	४	९	४	७	१०	४	४	१०	०
२१	२	५	३	५	२	३	१	१	३	०
४१	३१	४७	१५	४७	३१	३६	३६	३६	३६	०
१२	४८	०	१०	०	४८	५२	४५	४५	५२	०

अपसव्यकालचक्रतुलांशदशाव० ८६ तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. चक्रम्.

ध्रुवांक	शु. ७	बु. ६	शु. ७	म. ८	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	योगाः
३	३	१	३	१	१	०	०	१	१	१६
९	१	८	१	४	११	९	९	११	४	०
२३	०	२४	०	५	३	७	७	३	५	०
५१	२१	३४	२१	४७	५८	३५	३५	५८	४७	०
१९	४१	४२	४१	०	३३	२५	२५	३३	०	०

अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्वर्ष. ९ त. उ. द. च.

ध्रुवांक	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	श. १०	श. ११	योगाः
० १	०	०	२	०	१	०	१	०	०	९
८	११	६	२	११	८	८	०	५	५	०
७	१३	१०	२०	१३	९	२६	२१	२	२	०
३	३	३५	२८	३	५२	४९	१०	२८	२८	०
३१	३२	१८	१४	३२	५६	२५	३५	१४	१४	०

अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये सूर्यांतर्वर्ष. ५ त. उ द. च.

ध्रुवांक	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	श. १०	श. ११	बु. ६	योगाः
० ०	०	१	०	०	०	०	०	०	०	५
२१	३	२	६	११	४	७	२	२	६	०
१०	१५	२४	१०	८	२८	१	२४	२४	१०	०
३५	५२	४२	३५	४९	१४	४५	४२	४२	३५	०
१७	५६	१	१८	२५	७	५३	२१	२१	१८	०

अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये चंद्रांतर्वर्ष. २१ त. उ. द. च.

ध्रुवांक	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	श. १०	श. ११	बु. ६	सू. ५	योगाः
० २	५	२	३	१	२	०	०	२	१	२१
२८	२	२	११	८	५	११	११	२	२	०
५६	७	२०	१३	२२	१९	२५	२५	२०	२४	०
२८	४५	२८	३	३५	२४	४५	४५	१८	४२	०
१४	५३	१४	३२	१७	४३	५३	५३	१४	२१	०

अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्वर्ष० त. उ. द. च.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. ९	श. १०	श. ११	बु. ६	सू. ५	चं. ४	योगाः
० १	०	१	०	१	०	०	०	०	२	९
८	११	८	८	०	५	५	११	६	२	०
७	१३	९	२६	२१	२	२	१३	१०	२०	०
३	३	५२	४९	१०	२८	२८	३	३५	२८	०
३१	३२	५६	२५	३५	१४	१४	३२	१८	१४	०

अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये भृगोरंतर्वर्ष. १६तस्योप च०

ध्रुवांक	शु. २	मं. १	बृ. ९	श. १०	श. ११	बु. ६	सू. ५	चं. ४	बु. ३	योगाः
० २	३	१	१	०	०	१	१	३	१	१६
७	०	३	१०	९	९	८	११	११	८	०
४५	४	२४	१७	१	१	९	१८	१३	९	०
५२	१४	२१	३८	३	३	५२	३९	३	५२	०
५६	७	११	४९	३२	३२	५६	२५	३२	५६	०

अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. ९	श. १०	श. ११	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	योगाः
० ०	०	०	०	०	०	०	१	०	१	७
२९	६	९	३	३	८	४	८	८	३	०
३८	२७	२६	२८	२८	२६	२८	२२	२६	२४	०
४९	३१	२८	३५	३५	४९	१४	३५	४९	२१	०
२४	४६	१४	१८	१८	३५	७	१७	२५	१०	०

: अपसव्य का. च. कन्यांशदशावर्षाणि ८५ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाच०

ध्रुवांक	बृ. ९	श. १०	श. ११	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	मं. १	योगाः
० १	१	०	०	१	०	२	१	१	०	१०
१२	२	५	५	०	७	५	०	१०	९	०
२१	२	१९	१९	२१	१	१९	२१	१७	२६	०
१०	३१	२४	२४	१०	४५	२४	१०	३८	२८	०
३५	४६	४३	४३	३५	५३	४२	३५	४९	१४	०

अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	श. ११	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	२	११	५	९	३	५	०
५६	७	७	२	२४	२५	२	१	२८	१९	०
२८	४५	४५	२८	४२	४५	२८	३	३५	२४	०
१४	५३	५३	१४	२१	५३	१४	३२	१८	४२	०

:अपसव्यकालचक्रकन्यांशदशावर्षाणि ८५ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	श. १०	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	५	२	११	५	९	३	५	२	०
५६	७	२	२४	२५	२	१	२८	१९	७	०
२८	४५	२८	४२	४५	२८	३	३५	२४	४५	०
१४	५३	१४	२१	५३	१४	३२	१८	४२	५३	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्

ध्रुवांक	गु. १२	मं. १	शु. २	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	योगाः
०	१	०	१	०	०	२	०	१	०	१०
१	०	८	७	१०	६	१	१०	७	८	०
६	०	१२	६	२४	०	६	२४	६	१२	०
० ०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशाव. १०० तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	बृ. १२	योगाः
० ०	०	१	०	०	१	०	१	०	०	७
२५	५	१	७	४	५	७	१	५	८	०
१२	२६	१३	१६	६	१९	१६	१३	२६	१२	०
०	२४	१२	४८	०	१२	४८	१२	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	गु. १२	मं. १	योगाः
०	२	१	०	३	१	२	१	१	१	१६
१	६	५	९	४	५	६	१	६	१	०
२७	११	८	१८	९	८	२१	१३	३६	१३	०
३६	३६	२४	०	३६	२४	३६	१२	०	१२	०
० ०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९, तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	मं. १	शु. २	योगाः
०	०	०	१	०	१	७	०	०	१	९
२	९	५	१०	९	५	७	१०	७	५	०
२४	२१	१२	२०	२१	८	१६	२४	१६	८	०
०	३६	०	२४	३६	२४	४८	०	४८	२४	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये सूर्यांतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	मं. १	शु. २	बु. ३	योगाः
०	०	१	०	०	०	०	०	०	०	५
१८	२	०	५	९	४	६	४	९	५	०
०	०	१८	१२	१८	६	०	६	१८	१२	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये चद्रांतर्वर्षाणि २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	मं. १	शु. २	बु. ३	सू. ५	योगाः
०	४	१	३	१	२	१	३	१	१	२१
२	४	१०	४	५	१	५	४	१०	०	०
१५	२७	२०	९	१९	६	१९	९	२०	१८	०
३६	३६	२४	३६	१२	०	१२	३६	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. ७	मं. ८	गु. १२	मं. १	शु. २	बु. ३	सू. ५	चं. ४	योगाः
०	०	१	०	०	०	०	०	०	१	९
१	९	५	७	१०	७	५	९	५	१०	०
२	२१	८	१६	२४	१६	८	२१	१२	२०	०
२४	३६	२४	४८	०	४८	२४	३६	०	२४	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि१००तन्मध्ये भृगोरंतर्वर्षाणि १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बृ. १२	मं. १	शु. २	बु. ३	सू. ५	चं. ४	बु. ६	योगाः
०	२	१	१	१	०	१	०	३	१	१६
१	६	१	७	१	६	५	९	४	५	०
२७	२१	१३	६	१३	२१	८	१८	९	८	०
३६	३६	१२	०	१२	३६	२४	०	३६	२४	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रसिंहांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. १२	मं. १	शु. २	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	योगाः
०	०	०	०	१	०	०	१	०	१	७
२५	५	८	५	१	७	४	५	७	१	०
१२	२६	१२	२६	१३	१६	६	१९	१६	१३	०
०	२४	०	२४	१२	४८	०	१२	४८	१२	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	योगाः
१	१	०	०	१	०	१	१	०	२	१०
११	१	५	५	१	९	१०	०	६	५	०
५१	२८	१७	१७	२८	२३	९	१६	२९	९	०
३७	३६	२६	२६	३६	१	४६	४४	१८	४	०
४०	१६	३०	३०	१६	२४	२	४०	९	१३	०

अपसव्यकालचक्रकर्कांशदश.व० ८६ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	३	८	५	२	११	५	०
४४	६	६	१७	२७	२७	०	२३	२१	१७	०
३९	५८	५८	२६	१२	५४	४१	४३	३७	२६	०
४	३७	३७	३०	३३	२६	५१	२५	४१	३०	०

अपसव्यकालचक्रकर्कांशदशाव० ८६ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	योगाः
०	०	०	०	०	०	०	०	१	०	४
१६	२	५	३	१	५	२	११	५	२	०
४४	६	१७	२७	२७	०	२३	२१	१७	६	०
३९	५८	२६	१२	५४	४१	४३	३७	२६	५८	०
४	३७	३०	३३	२६	५१	१५	४१	३०	३७	०

अपसव्यकालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	योगाः
१	१	०	१	१	०	२	१	०	०	१०
११	१	९	१०	०	६	५	१	५	५	०
५१	२८	२३	९	१६	२९	९	२८	१७	१७	०
३७	३६	१	४६	४४	१८	४	३६	२६	२६	०
४०	१६	२४	२	४०	९	१३	१६	३०	३०	०

अपसव्यकालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये भौमांतर्वर्ष. ७ त. उ. द. च.

ध्रुवांक	मं. ८	शु. ७	बु. ६	सू. ५	च. ४	बृ. १२	श. ११	श. १०	बृ. ९	योगाः
०	०	१	०	०	१	०	०	०	०	७
२९	६	३	८	४	८	९	३	३	९	०
१८	२५	१८	२३	२६	१५	२३	२७	२७	२३	०
८	६	५०	४३	३०	२०	१	१२	१२	१	०
२२	५८	१४	१५	४२	५६	२४	३३	३२	२४	०

अपसव्यकालचक्रकर्कांशदशाव० ८६ तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. चक्रम्.

ध्रुवांक	शु. ७	बु. ६	सू. ५	च. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	योगाः
२	२	१	०	३	१	०	०	१	१	१६
६	११	८	११	१०	१०	८	८	१०	३	०
५८	२१	२	४	२६	९	२७	२७	९	१८	०
३६	३७	४७	५३	३०	४६	५४	५४	४६	५०	०
१६	४१	२६	१	४२	२	२६	२६	२	१४	०

अपसव्यकालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये बुधांतर्वर्ष. ९ त. उ. द. च.

ध्रुवांक	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	योगाः
० १	०	०	२	१	०	०	१	०	१	९
७	११	६	२	०	५	५	०	८	८	०
४०	९	८	११	१६	०	०	१६	२२	२	०
२७	४	२२	९	४४	४१	४१	४४	४३	४७	०
५४	११	२०	४६	४०	५१	५१	४०	१५	२६	०

अपसव्यकालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये सूर्यांतर्वर्ष. ५ त. उ द. च.

ध्रुवांक	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	योगाः
० ०	०	१	०	०	०	०	०	०	०	५
२०	३	२	६	२	२	६	४	११	६	०
५५	१४	१९	२९	२३	२३	२९	२६	४	८	०
३८	३९	३२	१८	४३	४३	१८	३०	५३	२२	०
५०	४	१५	९	१५	१५	९	४२	१	२०	०

अपसव्यकालचक्रकर्कांशदशावर्षाणि ८६ तन्मध्ये चंद्रांतर्वर्ष. २१ त. उ. द. च.

ध्रुवांक	चं. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	योगाः
० २	५	२	०	०	२	१	३	२	१	२१
२७	१	५	११	११	५	८	१०	२	२	०
५४	१६	९	२१	२१	९	१५	२६	११	१९	०
२५	२	४	३७	३७	४	२०	३०	९	३२	०
७	४७	११	४१	४१	११	५६	४२	४६	५	०

अपसव्यकालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये बुधांतर्वर्ष०९ त. उ. द. च.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. ९	श. १०	श. ११	बृ. १२	मं. १	शु. २	योगाः
० १	०	१	०	१	०	०	१	०	१	९
९	११	८	९	१	५	५	१	९	८	०
२	२१	२४	३	०	६	६	०	३	२४	०
१०	१९	३४	१५	२१	८	८	२१	१५	३४	०
७	३२	४२	१०	४२	४०	४०	४२	१०	४२	०

अपसव्यकालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६तस्योप च०

ध्रुवांक	शु. २	मं. १	बृ. ९	श. १०	श. ११	बृ. १२	मं. १	शु. २	बु. ३	योगाः
० ३	३	१	१	०	०	१	१	३	०	१६
९	१	४	११	९	९	११	४	१	८	०
२३	०	५	३	७	७	३	५	०	२४	०
५१	२१	४७	५८	३५	३५	५८	४७	२१	३४	०
१९	४१	०	३३	२५	२५	३३	०	४१	४२	०

अपसव्यकालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. ९	श. १०	श. ११	बृ. १२	मं. १	शु. २	बु. ३	शु. २	योगाः
० १	०	०	०	०	०	०	१	०	१	७
०	७	१०	४	४	१०	७	४	९	४	०
२१	२	३	१	१	३	२	५	३	५	०
४१	३१	३६	२६	२६	३६	३१	४७	१५	४७	०
१२	४८	५२	४५	४५	५२	४८	०	१०	०	०

अपसव्य का. च. मिथुनांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाच०

ध्रुवांक	बृ. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	योगाः
० १	१	०	०	१	१	१	१	१	०	१०
३	२	५	५	२	१०	११	१	११	१०	०
२२	१२	२३	२३	१३	३	३	०	३	३	०
२४	४४	३९	३९	४४	३६	५८	२१	५८	३६	०
३४	६	३८	३८	६	५२	३३	४२	३३	५२	०

अपसव्यकालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. ९	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	२	५	४	९	५	९	४	५	०
२०	९	९	२३	१	७	६	७	१	२३	०
५७	२३	२३	२९	२६	३५	८	३५	२६	२९	०
४९	५२	५२	३८	४५	२५	४०	२५	४५	३८	०

अपसव्यकालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. ९	श. १०	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	५	४	९	५	९	४	५	२	०
२०	९	२३	१	७	६	७	१	२३	९	०
५७	२३	२९	२६	३५	८	३५	२६	२९	२३	०
४९	५२	३८	४५	२५	४०	२५	४५	३८	५२	०

अपसव्यकालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	गु. ९	श. १०	श. ११	योगाः
० १	१	०	१	१	१	०	१	०	०	१०
१२	२	१०	११	१	११	१०	२	५	५	०
२२	१३	३	३	०	३	३	१३	२३	२३	०
२४	४४	३६	५८	२१	५८	३६	४४	२९	२९	०
३४	६	५२	३३	४१	३३	५२	६	३८	३८	०

अपसव्यकालचक्रमिथुनांशदशाव. ८३ तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	शु. २	मं. १	गु. ९	श. १०	श. ११	बृ. १२	योगाः
० १	०	१	०	१	०	०	०	०	०	७
०	७	४	९	४	७	१०	४	४	१०	०
२१	२	५	३	५	२	३	१	१	३	०
४१	३१	४७	१५	४७	३१	३६	२६	२६	३६	०
१२	४८	०	१०	०	४८	५२	४५	४५	५२	०

अपसव्यकालचक्रमिथुनांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. ३	शु. २	मं. १	गु. ९	श. १०	श. ११	गु. १२	मं. १	योगाः
० २	३	१	३	१	१	०	०	१	१	१६
९	१	८	१	४	११	९	९	११	४	०
२३	०	२४	०	५	३	७	७	३	५	०
५१	२१	३४	२१	४७	५८	३५	३५	५८	४७	०
१९	४१	४२	४१	०	३३	२५	२५	३३	०	०

अपसव्यकालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	श.११	श.१०	योगाः
० १	०	०	२	०	१	०	१	०	०	९
८	११	६	२	११	८	८	०	५	५	०
७	१३	१०	२०	१३	९	२६	२१	२	२	०
३	३	३५	२८	३	५२	४९	१०	२८	२८	०
३१	३२	१८	१४	३२	५६	२५	३५	१४	१४	०

अपसव्यकालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये सूर्यांतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	श. १०	श.११	बु. ३	योगाः
० ०	०	१	०	०	०	०	०	०	०	५
२१	३	२	६	११	४	७	२	२	६	०
१०	१५	२४	१०	८	२८	१	२४	२४	१०	०
३५	५२	४२	३५	४९	१४	४५	४२	४२	३५	०
१७	५६	२१	१८	२५	१७	५३	२१	२१	१८	०

अपसव्यकालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये चंद्रांतर्वर्षाणि २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	श. १०	श. ११	बु. ३	सू. ५	योगाः
० २	५	२	३	१	२	०	०	२	१	२१
२८	२	२	११	८	५	११	११	२	२	०
५६	७	२०	१३	२२	१९	२५	२५	२०	२४	०
२८	५४	१८	३	३५	२४	४५	४५	२८	४२	०
१४	५३	१४	३२	१७	४२	५३	५३	१४	२१	०

अपसव्यकालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. ७	मं. ८	गु. १२	श. १०	श.११	बु. ३	सू. ५	चं. ४	योगाः
० १	०	१	०	१	०	०	०	०	२	९
८	११	८	८	०	५	५	११	६	२	०
७	१३	९	२६	२१	२	२	१३	०	२०	०
३	३	५२	४९	१०	२८	२८	३	३५	२८	०
३१	३२	५६	२५	३५	१४	१४	३२	१८	१४	०

अपसव्यकालचक्रवृषभांशदशावर्षाणि८५तन्मध्ये भृगोरंतर्वर्षाणि १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बृ. १२	श. १०	श. ११	बु. ३	सू. ५	चं. ४	बु. ६	योगाः
० २	३	१	१	०	०	१	०	३	१	१६
७	०	३	१०	९	९	८	११	११	८	०
४५	४	२४	१७	१	१	९	८	१३	९	०
५२	१४	२१	३८	३	३	५२	४९	३	५२	०
२६	७	११	४९	३२	३२	५६	२५	३२	५६	०

अपसव्यकालचक्रवृषभांशदशावर्षाणि तन्मध्ये ८५भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. १२	श. १०	श. ११	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	योगाः
० ०	०	०	०	०	०	०	१	०	१	७
२९	६	९	३	३	८	४	८	८	३	०
३८	२७	२६	२८	२८	२६	२८	२२	३६	२४	०
४९	२१	२८	३५	३५	४९	१४	३५	४९	२१	०
२४	४६	१४	१८	१८	२५	७	१७	२५	१०	०

अपसव्यकालचक्रवृषभांशदशावर्षाणि ८५ तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	बृ. १२	श. ११	श. १०	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	योगाः
० १	१	०	०	१	०	२	१	१	०	१०
१२	२	५	५	०	७	५	०	१०	९	०
२१	३	१९	१९	२१	१	१९	२१	१७	२६	०
१०	३१	२४	२४	१०	४५	२४	१०	३८	२८	०
२५	४६	४३	४३	३५	५३	४२	३५	४९	१४	०

अपसव्यकालचक्रवृषभांशदशाव० ८५ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. ११	श. १०	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. १२	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	२	११	५	९	३	५	०
५६	७	७	२	२४	२५	२	१	२८	१९	०
२८	४५	४५	२८	४२	४५	२८	३	३५	२४	०
१४	५३	५३	१४	२१	५३	१४	३२	१८	४२	०

अपसव्यकालचक्रवृषभांशदशाव० ८५ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. १०	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. १२	श. १२	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	५	२	११	५	९	३	५	२	०
५६	७	२	२४	२५	२	१	२८	१९	७	०
२८	४५	२८	४२	४५	२८	३	३५	२४	४५	०
१४	५३	१४	२१	५३	१४	३२	१८	४२	५३	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	गु. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	मं. १	योगाः
०	१	०	१	०	०	२	०	१	०	१०
१	०	८	७	१०	६	१	१०	७	८	०
६	०	१२	६	२४	०	६	२४	६	१२	०
० ०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्ष. ७ त. उ. द. च.

ध्रुवांक	मं. ८	शु. ७	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	वृ. १	योगाः
० ०	०	१	०	०	१	०	१	०	०	७
२५	५	१	७	४	५	७	१	५	१२	०
१२	२६	१३	१६	६	१९	१६	१३	२६	०	०
०	२४	१२	४८	०	१२	४८	१२	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशाव० १०० तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. चक्रम्.

ध्रुवांक	शु. ७	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	योगाः
०	२	१	०	३	१	२	१	१	१	१६
१	६	५	९	४	५	६	१	७	१	०
२७	२१	८	१८	९	८	२१	१३	६	१३	०
३६	३६	२४	०	३६	२४	३६	१२	०	१२	०
० ०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्ष. ९ त. उ. द. च.

ध्रुवांक	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बु. ९	मं. ८	शु. ७	योगाः
०	०	०	१	०	१	०	०	०	१	९
२	९	५	१०	९	५	७	१०	७	५	०
२४	२१	१२	२०	२१	८	१६	२४	१६	८	०
०	३६	०	२४	३६	२४	४८	०	४८	२४	०
००	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये सूर्यांतर्वर्ष. ५ त. उ द. च.

ध्रुवांक	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ३	योगाः
००	०	१	०	०	०	०	०	०	०	५
१८	३	०	५	९	४	६	४	९	५	०
०	०	१८	१२	१८	६	०	६	१८	१२	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये चंद्रांतर्वर्ष. २१ त. उ. द. च.

ध्रुवांक	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ३	सू. ५	योगाः
०	४	१	३	१	२	१	३	१	१	२१
२	४	१०	४	५	६	५	४	१०	०	०
१५	२७	२०	९	१९	६	१९	९	२०	१८	०
३६	३६	२४	३६	१२	०	१२	३६	२४	०	०
००	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्ष०९ त. उ. द. च.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ३	सू. ५	चं. ४	योगाः
०	०	१	०	०	०	१	०	०	१	९
१	९	५	७	१०	७	५	९	५	१०	०
२	२१	८	१६	२४	१६	८	२१	१२	२४	०
२४	३६	२४	४८	०	४८	२४	३६	०	०	०
००	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्ष. १६तस्योप च०

ध्रुवांक	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ३	सू. ५	चं. ४	बु. ३	योगाः
०	२	१	१	१	२	१	०	३	१	१६
१	६	१	६	१	६	५	९	४	५	०
२७	२१	१३	३६	१३	२१	८	१८	९	८	०
३६	३६	१२	०	१२	३६	२४	०	३६	२४	०
००	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमेषांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	योगाः
००	०	०	०	१	०	०	१	०	१	७
२५	५	८	५	१	७	४	५	७	१	०
१२	२६	१२	२६	१३	१६	६	१९	१६	१३	०
०	२४	०	२४	१२	४८	०	१२	४८	१२	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्दशावर्ष. १० तस्योपदशाच०.

ध्रुवांक	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	योगाः
१	१	०	०	१	०	१	१	०	२	१०
११	१	५	५	१	९	१०	०	६	५	०
५१	२८	१७	१७	२८	२३	९	१६	२९	९	०
३७	३६	२६	२६	३६	१	४६	४४	१८	४	०
४०	१६	३०	३०	१६	२४	२	४०	०	१३	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	३	८	५	२	११	५	०
४४	६	६	१७	२७	२७	०	२३	२१	१७	०
३९	५८	५८	२६	१३	५४	४१	४३	३७	२६	०
४	३७	३७	३०	३३	२६	५१	१५	४१	३०	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	योगाः
०	०	०	०	०	०	०	०	०	०	४
१६	२	५	३	८	५	२	११	५	२	०
४४	६	१७	२७	२७	०	२३	२१	१७	६	०
३९	५८	२६	१२	५४	४१	४३	३७	२६	५८	०
४	३७	३०	३३	२६	५१	१५	४१	३०	३७	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	योगाः
१	१	०	१	१	०	२	१	०	०	१०
११	०	९	१०	०	६	५	१	५	५	०
५१	२८	२३	९	१६	२९	९	२८	१७	१७	०
३७	३६	१	४६	४४	१८	४	३६	२६	२६	०
४०	१६	२४	२	४०	९	१३	१६	३०	३०	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	बृ. ९	योगाः
०	०	१	०	०	१	०	०	०	०	७
२९	६	३	८	४	८	९	३	३	९	०
१८	२५	१८	२३	२६	१५	२३	२७	२७	२३	०
८	६	५०	४३	३०	२०	१	१२	१२	१	०
२२	५८	१४	१५	४२	५६	२४	३३	३३	२४	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	योगाः
२	२	१	०	३	१	०	०	१	१	१६
६	११	८	११	१०	१०	८	८	१०	३	०
५८	२१	२	४	२६	९	२७	२७	९	१८	०
३६	३७	४७	५३	३०	४६	५४	५४	४६	५०	०
१६	४१	२६	१	४२	२	२६	२६	२	१४	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये बुधांतर्वर्ष ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	योगाः
० १	०	०	२	१	१	१	१	०	१	९
७	११	६	२	०	५	५	०	८	८	०
४०	९	८	११	१६	०	०	१६	२३	२	०
२७	४	२२	९	४४	४१	४१	४४	४३	२७	०
५०	११	२०	४६	४०	५१	५१	४०	१५	२६	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये सूर्यांतर्वर्ष ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	चं. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	योगाः
० ०	०	१	०	०	०	०	०	०	०	५
२०	३	२	६	२	२	६	४	११	६	०
५५	१४	१९	३९	२३	२३	२९	२६	४	८	०
४८	३९	३२	१८	४३	४३	१८	३०	५३	२२	०
५०	४	५	९	१५	१५	९	४२	१	२०	०

अपसव्यकालचक्रमीनांशदशावर्षाणि ८६ तन्मध्ये चंद्रांतर्दशाव. २१ तस्योपदशाचक्रम्.

ध्रुवांक	च. ४	बृ. १२	श. ११	श. १०	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	योगाः
० २	५	२	०	०	२	१	३	२	१	२१
२७	१	५	११	११	५	८	१०	२	२	०
५४	१६	९	२१	२१	९	१५	२६	११	१९	०
२५	२	४	३७	३७	४	२०	३	९	३२	०
७	४७	११	४१	४१	११	५६	४२	४६	५	०

अपसव्यकालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये बुधांतर्वर्ष. ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. ९	श. १०	श. ११	बृ. १२	मं. १	शु. २	योगाः
० १	०	१	०	१	०	०	१	०	१	९
९	११	८	९	१	५	५	१	९	८	०
२	२१	२४	३	०	६	६	०	३	२४	०
१०	१९	३४	१५	२१	८	८	२१	१५	३४	०
७	३२	४२	१०	४२	४०	४०	४२	१०	४२	०

अपसव्यकालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये भृगोरंमर्वर्ष. १६ तस्योपदशाच०

ध्रुवांक	शु. २	मं. १	बृ. ९	श. १०	श. ११	बृ. १२	मं. १	शु. २	बु. ३	योगाः
० २	३	१	१	०	०	१	१	३	१	१६
९	१	४	११	९	९	११	४	१	८	०
२३	०	५	३	७	७	३	५	०	२४	०
५१	२१	४७	५८	३५	३५	५८	४७	२१	३४	०
१९	४१	०	३३	२५	२५	३३	०	४१	४२	०

अपसव्यकालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. ९	श. १०	श. ११	बृ. १२	मं. १	शु. २	बु. ३	शु. २	योगाः
० १	०	०	०	०	०	०	१	०	१	७
०	७	१०	४	४	१०	७	४	९	४	०
२१	२	३	१	१	३	२	५	३	५	०
४१	३१	३६	२६	२६	३६	३१	४७	१५	४७	०
१२	४८	५२	४५	४५	५२	४८	०	१०	०	०

अपसव्य का. च. कुंभांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाच०

ध्रुवांक	बृ. ९	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	योगाः
० १	१	०	०	१	१	१	१	१	०	१०
१३	२	५	५	२	१०	११	१	११	१०	०
२२	१२	२३	२३	१३	३	३	०	३	३	०
२४	४४	३९	२९	४४	३६	५८	२१	५८	३६	०
३४	६	३८	३८	६	५२	३३	४२	३३	५२	०

अपसव्यकालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. १०	श. ११	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. ९	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	२	५	४	९	५	९	४	५	०
२०	९	९	२३	१	७	६	७	१	२३	०
५७	२३	२३	२९	२६	३५	८	३५	२६	२९	०
४८	५२	५२	३८	४५	२५	४०	२५	४५	३८	०

अपसव्यकालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये शन्यंतर्वर्ष. ४ तस्योपदशाचक्रम्.

ध्रुवांक	श. ११	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	बृ. ९	श. १०	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१७	२	५	४	९	५	९	४	५	२	०
२०	९	२३	१	७	६	७	१	२३	९	०
५७	२३	२९	२६	३५	८	३५	२६	२९	२३	०
४८	५२	३८	४५	२५	४०	२५	४५	३८	५२	०

अपसव्यकालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये गुरोरंतर्वर्ष. १० तस्योपदशाचक्रम्.

ध्रुवांक	गु. १२	मं. १	शु. २	बु. ३	शु. २	मं. १	गु. ९	श. १०	श. ११	योगाः
० १	१	०	१	१	१	०	१	०	०	१०
१३	२	१०	११	१	११	१०	२	५	५	०
२२	१३	३	३	०	३	३	१३	२३	२३	०
२४	४४	३६	५८	२१	५८	३६	४४	२९	२९	०
३४	६	५२	३३	४१	३३	५२	६	३८	३८	०

अपसव्यकालचक्रकुंभांशदशाव. ८३ तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	शु. २	बु. ३	शु. २	मं. १	गु. ९	श. १०	श. ११	बृ. १२	योगाः
० १	०	१	०	१	०	०	०	०	०	७
०	७	४	९	४	७	१०	४	४	१०	०
२१	२	५	३	५	२	३	१	१	३	०
४१	३१	४७	१५	४७	३१	३६	२६	२६	३६	०
१२	४८	०	१०	०	४८	५२	४५	४५	५२	०

अपसव्यकालचक्रकुंभांशदशावर्षाणि ८३ तन्मध्ये भृगोरंतर्वर्ष. १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. २	बु. ३	शु. २	मं. १	गु. ९	श. १०	श. ११	गु. १२	मं. १	योगाः
० ३	३	१	३	१	१	०	०	१	१	१६
९	१	८	१	४	११	९	९	११	४	०
२३	०	२४	०	५	३	७	७	३	५	०
५१	२१	३४	२१	४७	५८	३५	३५	५८	४७	०
१९	४१	४२	४१	०	३३	२५	२५	३३	०	०

अपसव्यकालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	श. ११	श. १०	योगाः
० १	०	०	२	०	१	०	१	०	०	५
८	११	६	२	११	८	८	०	५	५	०
७	१३	१०	२०	१३	९	२६	२१	२	२	०
३	३	३५	२८	३	५२	४९	१०	२८	२८	०
३१	३२	१८	१४	३२	५६	२५	३५	१४	१४	०

अपसव्यकालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये सूर्यांतर्वर्षाणि ५ तस्योपदशाचक्रम्.

ध्रुवांक	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	गु. ९	श. ११	श. १०	बु. ३	योगाः
० ०	०	१	०	०	०	०	०	०	०	५
२१	३	२	६	११	४	७	२	२	१०	०
१०	१५	२४	१०	८	२८	१	२४	२४	६	०
३५	५२	४२	३५	४९	१४	४५	४२	४२	३५	०
१७	५६	२१	१८	२५	७	५३	२१	२१	१८	०

अपसव्यकालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये चंद्रांतर्वर्षाणि २१ तस्योपदशाचक्रम्.

ध्रुवांक	चं. ४	बु. ६	शु. ७	मं. ८	गु.१२	श. ११	श. १०	बु. ३	सू. ५	योगाः
० २	५	२	३	१	२	०	०	२	१	२१
२८	२	२	११	८	५	११	११	२	२	०
५६	७	२०	१३	३२	१९	२५	२५	२०	२४	०
२८	४५	२८	२	३५	२४	४५	४५	२८	४२	०
१४	५३	१४	३२	१७	४२	५३	५३	१४	२१	०

अपसव्यकालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये बुधांतर्वर्षाणि ९ तस्योपदशाचक्रम्.

ध्रुवांक	बु. ६	शु. ७	मं. ८	गु. १२	श. ११	श. १०	बु. ३	सू. ५	चं. ४	योगाः
० १	०	१	०	१	०	०	०	०	२	९
८	११	८	८	०	५	५	११	६	२	०
७	१३	९	२६	२१	२	२	१३	१०	२०	०
३	३	५२	४९	१०	२८	२८	३	३५	२८	०
३१	३२	५६	२५	३५	१४	१४	३२	१८	१४	०

अपसव्यकालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये भृगोरंतर्वर्षाणि १६ तस्योपदशाचक्रम्.

ध्रुवांक	शु. ७	मं. ८	बृ. १२	श. ११	श. १०	बु. ३	सू. ५	चं. ४	बु. ६	योगाः
० १	३	१	१	०	०	१	०	३	१	१६
७	०	३	१०	९	९	८	११	११	८	०
४५	४	२४	१७	१	१	९	८	१३	९	०
५२	१४	२१	३८	३	३	५२	४९	३	५२	०
५६	७	११	४९	३२	३२	५६	३५	३२	५६	०

अपसव्यकालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये भौमांतर्वर्षाणि ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. ८	बृ. १२	श. ११	श. १०	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	योगाः
० ०	०	०	०	०	०	०	१	०	१	७
२९	६	९	३	३	८	४	८	८	३	०
३८	२७	२६	२८	२८	२६	२८	२२	३६	२४	०
४९	३१	२८	३५	३५	४९	१४	३५	४९	२१	०
२४	४६	१४	१८	१८	२५	७	१७	२५	१०	०

अपसव्यकालचक्रमकरांशदशावर्षाणि ८५ तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	बृ. १२	श. ११	श. १०	बु. ३	सू. ५	चं. ४	बु. ६	शु. ७	मं. ८	योगाः
० १	१	०	०	१	०	२	१	१	०	१०
१२	२	५	५	०	७	५	०	१०	९	०
२१	३	१९	१९	२१	१	१९	२१	१७	२६	०
१०	३१	२४	२४	१०	४५	२४	१०	३८	२८	०
३५	४६	४३	४३	३५	५३	४२	३५	४९	१४	०

अपसव्यकालचक्रमकरांशदशाव० ८५ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. ११	श. १०	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. १२	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	२	५	२	११.	५	९	३	५	०
५६	७	७	२	२४	२५	२	१	२८	१९	०
२८	४५	४५	२८	४२	४५	२८	३	३५	२४	०
१४	५३	५३	१४	२१	५३	१४	३२	१८	४२	०

अपसव्यकालचक्रमकरांशदशाव० ८५ तन्मध्ये शन्यंतर्वर्ष. ४ त. उ. द. चक्रम्.

ध्रुवांक	श. १०	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. १२	श. ११	योगाः
० ०	०	०	०	०	०	०	०	०	०	४
१६	२	५	२	११	५	९	३	५	२	०
५६	७	२	२४	२५	२	१	२८	१९	७	०
२८	४५	२८	४२	४५	२८	३	३५	२४	४५	०
१४	५३	१४	२१	५३	१४	३२	१८	४२	५३	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये गुरोरंतर्वर्ष. १० त. उ. द. चक्रम्.

ध्रुवांक	गु. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	मं. १	योगाः
०	१	०	१	०	०	२	०	१	०	१०
१	०	८	७	१०	६	१	१०	७	८	०
६	०	१२	६	२४	०	६	२४	६	१२	०
० ०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्ष. ७ त. उ. द. च.

ध्रुवांक	मं. ८	शु. ७	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	योगाः
० ०	०	१	०	०	१	०	१	०	०	७
२५	५	१	७	४	५	७	१	५	८	०
१२	२६	१३	१६	६	१९	१६	१३	२६	१२	०
०	२४	१२	४८	०	१२	४८	१२	२४	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशाव० १०० तन्मध्ये भृगोरंतर्वर्ष. १६ त. उ. द. चक्रम्.

ध्रुवांक	शु. ७	बु. ३	सू. ५	चं. ४	बु ३	शु. २	मं. १	बृ. ९	मं. ८	योगाः
०	२	१	०	३	१	२	१	१	१	१६
१	६	५	९	४	५	६	१	७	१	०
२७	२१	८	१८	९	८	२१	१३	६	१३	०
३६	३६	२४	०	३६	२४	३६	१२	०	१२	०
० ०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्ष. ९ त. उ. द. च.

ध्रुवांक	बु. ३	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	योगाः
०	०	०	१	०	१	०	०	०	१	९
२	९	५	१०	९	५	७	१०	७	५	०
२४	२१	१२	२०	२१	८	१६	२४	१६	८	०
०	३६	०	२४	३६	२४	४८	०	४८	२४	०
० ०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये सूर्यांतर्वर्ष. ५ त. उ द. च.

ध्रुवांक	सू. ५	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ३	योगाः
० ०	०	१	०	०	०	०	०	०	०	५
१८	३	०	५	९	४	६	४	९	५	०
०	०	१८	१२	१८	६	०	६	१८	१२	०
०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये चंद्रांतर्वष. २१ त. उ. द. च.

ध्रुवांक	चं. ४	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	योगाः
०	४	१	३	१	२	१	३	१	१	२१
२	४	१०	४	५	६	५	४	१०	०	०
१५	२७	२०	९	१९	६	१९	९	२०	१८	०
३६	३६	२४	३६	१२	०	१२	३६	२४	०	०
० ०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये बुधांतर्वर्ष०९ त. उ. द. च.

ध्रुवांक	बु. ३	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	योगाः
०	०	१	०	०	०	१	०	०	१	९
१	९	५	७	१०	७	५	९	५	१०	०
२	२१	८	१६	२४	१६	८	२१	१२	२४	०
२४	३६	२४	४८	०	४८	२४	३६	०	०	०
० ०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये भृगोरंतर्वर्ष. १६तस्योप च०

ध्रुवांक	शु. २	मं. १	बृ. ९	मं. ८	शु. ७	बु. ३	सू. ५	चं. ४	बु. ३	योगाः
०	२	१	१	१	२	१	०	३	१	१६
१	६	१	७	१	६	५	९	४	५	०
२७	२१	१३	३६	१३	२१	८	१८	९	८	०
३६	३६	१२	०	१२	३६	२४	०	३६	२४	०
० ०	०	०	०	०	०	०	०	०	०	०

अपसव्यकालचक्रधनांशदशावर्षाणि १०० तन्मध्ये भौमांतर्वर्ष. ७ तस्योपदशाचक्रम्.

ध्रुवांक	मं. १	बृ. ९	मं. ८	शु. ७	बु. ६	सू. ५	चं. ४	बु. ३	शु. २	योगाः
० ०	०	०	०	१	०	०	१	०	१	७
२५	५	८	५	१	७	४	५	७	१	०
१२	२६	१२	२६	१३	१६	६	९	१६	१३	०
०	२४	०	२४	१२	४८	०	२२	४८	१२	०
०	०	०	०	०	०	०	०	०	०	०

अथाग्रे कालचक्रमाह ।

मेषांशे चोरको विंद्याच्छ्रीमाञ्छुक्रांशके भवेत् ॥ बुधांशे ज्ञानसंपन्नश्चंद्रे च नृपतिर्भवेत् ॥ ४१ ॥ सिंहांशे राजसः प्रोक्तः सौम्यांशे पंडितो भवेत् ॥ तुलांशे राजमंत्री च भौमांशे निर्धनो भवेत् ॥ ४२ ॥ चापांशे ज्ञानसंयुक्तो मकरांशे च पापकृत् ॥ कुंभांशे च वणिक्कर्मा मीनांशे किल धान्यवान् ॥ ४३ ॥

अथोदयफलमाह ।

आदित्यस्योदये राज्यं कृषिश्चंद्रोदये भवेत् ॥ अंगारकस्य शूरः स्यात्पापकर्मणि संगतः ॥ ४४ ॥ बुधस्य विमला बुद्धिरत्यंतं पंडितो भवेत् ॥ गुरुशुक्रोदये राज्यं चौरको मंदकोदये ॥ ४५ ॥

अथ देहजीवफलमाह ।

देहजीवसमायोगे भौमार्करविजादिभिः ॥ एकैकयोगे मरणं बहुयोगेषु का कथा ॥ ४६ ॥ यत्र स्थानेषु संजीवो देहयोगसमन्वितः ॥ तत्र पापग्रहैर्योगे तद्दशामरणं वदेत् ॥ ४७ ॥ देहयोगे महाबाधा जीवयोगे तु मृत्युदः ॥ द्वाभ्यां संयोगमात्रेण हन्यते नाऽत्र संशयः ॥ ॥ ४८ ॥ जीवे जीवो यदा राहुः सौरिर्वक्री रविः स्थितः ॥ मृत्युकालगतिं ज्ञात्वा शांतिं कुर्याद्यथाविधि ॥ ४९ ॥ जीवे जीवो यदा सोमे सौम्ये जीवसितः स्थितः ॥ तदा सौख्यं प्रकुर्वन्ति रोगमृत्युविनाशनम् ॥ ५० ॥ पापक्षेत्रदशायोगे देहजीवौ तु दुःखितौ ॥ शुभक्षेत्रदशायोगे शुभयोगे शुभं भवेत् ॥ ५१ ॥ देहे शुभग्रहैर्युक्ते भूषणादि ध्रुवं भवेत् ॥ जीवे शुभग्रहैर्युक्ते पुत्रदारादिकाँल्लभेत् ॥ ५२ ॥

अथ गतिप्रकरणम् ।

प्रथमे गतिर्मंडूकी द्वितीये मर्कटी तथा ॥ बाणायनवपर्यंतं गतिः सिंहावलोकनम् ॥ ५३ ॥

अथ फलमाह ।

मंडूके तु महाव्याधिर्मर्कट्यां तु महद्भयम् ॥ सिंहावलोके मरणं गर्गस्य वचनं यथा ॥ ५४ ॥

सिंहावलोकनगतिमांडूकीगतिफलान्याह ।

कन्यायां कर्कटे वापि सिंहभे मिथुनेपि च ॥ माण्डूकीगतिसंज्ञो वै तादृशं रोगकारणम् ॥ ५५ ॥ मीने तु वृश्चिके वापि चापो मेषस्तथैव च ॥ सिंहावलोकनं चैव तादृशं च फलं लभेत् ॥ ५६ ॥ सिंहावगतिमार्गे च मांडूकीगतिसंभवः ॥ अपमृत्युकरस्तस्मिन्प्रायश्चित्तेतिशोचतिं ॥ ५७ ॥ मीने तु वृश्चिके याते ज्वरो भवति निश्चितम् ॥ कन्यायां कर्कटे याते मातृबंधुविनाशनम् ॥ ५८ ॥ सिंहे तु मिथुने याते स्त्रियां व्याधिर्भवेद्ध्रुवम् ॥ कर्कटे तु रवौ याते वधो भवति देहिनाम् ॥ पितृबंधुमृतिं विद्याच्चापान्मेषगते पुनः ॥ ५९ ॥

पुनः गतिफलमाह ।

कन्यायां कर्कटे याते पूर्वभागे महत्फलम् ॥ ६० ॥ उत्तरं देशमाश्रित्य सुखं यात्रा भविष्यति ॥ सिंहे तु मिथुने याते पूर्वभागो विसृज्यते ॥ कार्यांतेपि च नैर्ऋत्यां सुखं यात्रा भाविष्याति ॥ ६१ ॥ कर्कटे मेषसिंहे च कार्यहानिश्च योगयुक् ॥ दक्षिणां दिशमाश्रित्य प्रत्यब्दं गमनं भवेत् ॥ ६२ ॥ कुंभे व्याधिर्मनोदुःखं मिथुने निर्धनो भवेत् ॥ मीने तु वृश्चिके याते उदग्गच्छाति संकटम् ॥ मकरे संकटं दुःखं चापात्संकटमुच्यते ॥ ६३ ॥ चापे मेषे भयं यात्रा वधबंधो

मृतिर्भवेत् ॥ तुला संपद्विवाहश्च स्त्रीप्राप्तिर्वृश्चिके गतिः ॥ ॥ ६४ ॥
मेषे शुक्रफलं विद्याद्दक्षिणे गमनं सुखम् ॥ देहजीवसमायोगे
मंदः स्थित्वाऽपमृत्युदः ॥ ६५ ॥ (एवं राशिफलं बुध्वा नक्षत्रांशक्रमेण
तु ॥ जीवदेहक्रमाच्चैव महादशांतरदशा ॥ प्रदक्षिणेन मार्गेण
वृश्चिकादि विवक्षिते ॥)

अथ महादशाफलमाह ।

रक्तपित्ताधिकव्याधिर्नामकर्मफलं भवेत् ॥ धनकीर्तिप्रजावृद्धिवस्त्राभरणदः
शशी ॥६६॥ ज्वरमाशु दिशेत्पैत्यं ग्रंथिस्फोटः कुजस्य
तु ॥ प्रजावृद्धिर्धने बुद्धिर्बुधे भोगफलं भवेत् ॥ ६७ ॥ धनं कीर्तिं
प्रजावृद्धिं नानाभोगं बृहस्पतिः ॥ विद्या विवाहः सुक्षेत्रं गृहं धान्यं
भृगोः फलम् ॥६८॥ तापाधिक्यं महादुःखं बंधुनाशः शनेः फलम् ॥
एवमर्कादियोगेन राशियोगेन संयुते ॥ ६९ ॥ शुभयोगे शुभं ब्रयादशुभे
त्वशुभं फलम् ॥ मिश्रे मिश्रफलं ब्रूयाद्ग्रहराशिसमुद्भवम् ॥७०॥
द्वादशाष्टमजन्मर्क्षदशाभोगेन निर्णयः ॥ मृत्युकाल इति ज्ञात्वा
शांतिं कुर्याद्विचक्षणः ॥ ७१ ॥

अथांशायुर्निर्णयमाह ।

भ्रांघ्रिएष्यघटिका हतायुषा बाणचंद्र १५ विधिरायुषः क्रमात् ॥
स्वस्ववर्षनिहता स्वकीयजा कालचक्रविधिरायुषः क्रमात् ॥ ७२ ॥
भुक्तनाडिहतावर्षास्तथाबाणेंद्व १५ भाजिताः ॥ वर्षमासाहघटिकाः
स्वविकल्पविभाजिताः ॥ ७३ ॥ अस्मिन्नवांशके चंद्रे स्थिते
तस्मान्नवांशकात् ॥ न वा नवांशराशीनामंते मृत्युर्भविष्यति ॥ ७४ ॥

अथांतर्दशाफलमाह ।

लग्नर्क्षवीक्षितो यश्च येन केन समायुतः ॥ यस्य राशिः स्थितो
जातस्तादृशं फलमाप्नुयात् ॥ ७५ ॥ अथाऽतो देवदेवेशि ह्यंशकां-

तद्दशाफलम् ॥ यथाविधि प्रवक्ष्यामि श्रूयतां कमलानने ॥ ७६ ॥ प्रथमांशे वधो भौमे ज्वरश्च व्रणसंभवः ॥ बुधशुक्रेंदुजीवेषु वस्त्राभरणमादिशेत् ॥ ७७ ॥ लभते स्वांशके देवि निश्चयं सुरवंदिते ॥ राज्ञातिकलहं सौरेः शत्रुक्षोभं महद्भयम् ॥ ७८ ॥ मेषांशस्थे तथादित्येऽनुक्रमात्फलनिश्चयः ॥ राजप्रसादमाप्नोति मेषस्वांशगते गुरौ ॥ ७९ ॥ विद्यालाभो महत्प्रीतिः शारीरं सुखमेव च ॥ वृषभस्वांशके देवि गुरौ तत्र गते फलम् ॥ ८० ॥ देशत्यागश्च मरणं ज्वरः शस्त्रक्षतं तथा ॥ वृषभस्वांशके देवि कुजे तत्र गते फलम् ॥ ८१ ॥ वस्त्राभरणलाभं तु स्त्रिया योगं महत्फलम् ॥ शुक्रेंदुसुतचंद्राणां स्वांशके वृषभे फलम् ॥ ८२ ॥ नृपाद्भयं पितृमृतिर्मृगाद्यैश्च महद्भयम् ॥ क्षुद्ररोगं च लभते वृषभस्वांशके रविः ॥ ॥ ८३ ॥ मौक्तिकाभरणादीनि दारावस्त्रफलादि च ॥ लभते स्वांशके देवि मिथुनस्वांशके भृगौ ॥ ८४ ॥ पितृमातृभयं चैव ज्वरश्च व्रणसंभवः ॥ प्रयाणं कुरुते देवि मिथुनस्वांशके कुजः ॥ ८५ ॥ विद्यालाभं द्रव्यलाभं महाविभवसंभवम् ॥ समस्तप्रीतिमाप्नोति मिथुनस्वांशके गुरौ ॥ ८६ ॥ प्रयाणं च महाव्याधिर्मरणं चार्थनाशनम् ॥ बंधुनाशो भवेद्देवि मिथुनस्वांशके शनौ ॥ ८७ ॥ वस्त्रलाभं पुत्रलाभं विद्यालाभ तथैव च ॥ समस्तप्रीतिमाप्नोति मिथुनस्वांशके बुधे ॥ ८८ ॥ ऐश्वर्यं धनलाभं च पुत्रपत्नीसमागमम् ॥ मनः प्रीतिमवाप्नोति कुलीरस्वांशके शशी ॥ ८९ ॥ नृपाद्भयं शत्रुभयं मृगेभ्यश्च महद्भयम् ॥ ज्वरव्याधिश्च दाहश्च कुलीरस्वांशके रवौ ॥ ९० ॥ पुत्रलाभं बंधुलाभं रत्नविद्यार्थमेव च ॥ कुलीरस्वांशके देवि बुधशुक्रसमागमे ॥ ९१ ॥ विषशस्त्रमृतिं घोरां ज्वरदाहसमुद्भवाम् ॥ सर्वदुःखमवाप्नोति कुलीरस्वांशके कुजे ॥ ९२ ॥ विभवस्यातिलाभं च धनलाभं तथैव च ॥ नृपप्रसादमाप्नोति कुली-

रस्वांशके गुरौ ॥ ९३ ॥ वातव्याधिश्च निघातमसूराविषदष्ट्रकम् ॥
सर्वक्लेशमवाप्नोति कुलीरस्वांशके शनौ ॥ ९४ ॥ ज्वरपित्तविनाशं
च शस्त्रक्षतविषूचिकाः ॥ मुखरोगमवाप्नोति मृगद्रस्वांशक कुजे
॥ ९५ ॥ वस्त्राभरणविद्याश्च सुतस्त्रीलाभमेव च ॥ मृगेंद्रस्वाशक देवि
भार्गवे च बुधागमे ॥ ९६ ॥ आरूढपतनं चैव देशत्यागं महद्भयम् ॥
महाधनविघातं च सिंहस्वांशगतः शशी ॥ ९७ ॥ महाशत्रुभयं चैव
ज्वरश्च व्याधिरेव च ॥ अज्ञानं मरणं राज्ञो मृगेंद्रस्वांशगे च वै
॥ ९८ ॥ धनधान्यमहालाभं प्रसादं द्विजदेवयोः ॥ विद्यालाभमवाप्नोति
मृगेंद्रस्वांशगे गुरौ ॥ ९९ ॥ प्रयाणं च ज्वरं चैव क्षुद्भवं
वैक्लवं तथा ॥ व्याधिदुःखमवाप्नोति कन्यास्वांशगते शनौ ॥ १०० ॥
नृपप्रसादनं लाभमैश्वर्यं बंधुसंभवम् ॥ विद्यालाभमवाप्नोति कन्यास्वांशगते
गुरौ ॥ १०१ ॥ प्रयाणं च ज्वरं चैव मसूरीवह्निना भयम् ॥
शस्त्रक्षतं च मरणं कन्यास्वांशगते कुजे ॥ २ ॥ भृत्यपुत्रार्थलाभं च
वस्त्राभरणमेव च ॥ शुक्रेंदुसुतचंद्राणां कन्यास्वांशगते फलम् ॥ ३ ॥
प्रयाणं च ज्वरश्चैव पुत्रहानिस्तथैव च ॥ शस्त्रघातन मरणं कन्यास्वांशगते
रवौ ॥ ४ ॥ स्त्रीलाभं धनलाभं च पुत्रलाभं तथैव च ॥
वस्त्राभरणलाभं च तुलास्वांशगते भृगौ ॥ ५ ॥ पिता सुहृद्धनं चैव
शिरोरोगं ज्वरं तथा ॥ शस्त्राग्निक्षतघातं च तुलास्वांशगते कुजे
॥ ६ ॥ धनं रत्नं महालाभं धर्मचेष्टा नृपावहम् ॥ सर्वसंपत्समृद्धिश्च
तुलास्वांशगते गुरौ ॥ ७ ॥ प्रयाणं च महाव्याधिं तथा क्षेत्रभयं
तथा ॥ शत्रुबाधा महादुःखं तुलास्वांशगते शनौ ॥ ८ ॥ पुत्रलाभं
धनं स्त्रीणां लाभ चैव मनःप्रियम् ॥ सौभाग्यं बंधुलाभं च तुलास्वांशगते
बुधे ॥ ९ ॥ व्याधिनाशं महत्सौख्यं नानासर्वार्थसिद्धिदम्
॥ भृगुसौम्यशशांकानां वृश्चिकस्वांशगे फलम् ॥ ११० ॥

शत्रुक्षोभं भयं व्याधिमर्थनाशं पितुर्भयम् ॥ मृगाद्भयमवाप्नोति वृश्चिकस्वांशगे रवौ ॥ ११ ॥ वातपित्तभयं चैव मसूरीव्याधिमेव च ॥ अग्निशस्त्रादिभीतिं च वृश्चिकस्वांशगे कुजे ॥ १२ ॥ धनं रत्नं च धान्यं च देवब्राह्मणपूजनम् ॥ राजप्रसादमाप्नोति वृश्चिकस्वांशगे गुरौ ॥ १३ ॥ धनबंधुविनाशश्च मनोबंधस्तथाकुलम् ॥ शत्रुबाधा महाव्याधिर्वृश्चिकस्वांशगे शनौ ॥ १४ ॥ अतिदाहं ज्वरं छर्दिंमुखरोगं च कष्टताम् ॥ शरीरक्लेशमाप्नोति चापस्वांशगते कुजे ॥ १५ ॥ श्रीविद्यानां च सौभाग्यं शत्रुनाशं नृपाद्भयम् ॥ भार्गवेंदुजचंद्राणां चापस्वांशगते फलम् ॥ १६ ॥ स्त्रीनाशं वित्तनाशं च कलहं च नृपाद्भयम् ॥ प्रयाणं समवाप्नोति चापस्वांशगते रवौ ॥ १७ ॥ दानधर्मतपोलाभं राजपूजनमेव च ॥ स्त्रीलाभं धनलाभं च चापस्वांशगते गुरौ ॥ १८ ॥ द्विजदेवनृपात्कोपं बंधुभिश्च विनाशनम् ॥ देशत्यागमवाप्नोति मृगस्वांशगते शनौ ॥ १९ ॥ देवार्चनं तपो ध्यानं द्विजपूजादिसंभवम् ॥ भार्गवज्ञेंदुजीवानां मृगस्वांशगते फलम् ॥ १२० ॥ शिरोरोगं ज्वरं चैव करपादगतक्षतम् ॥ रक्तपित्तातिसारांश्च मृगस्वांशगते कुजे ॥ २१ ॥ बंधुपुत्रपितुर्नाशं ज्वररोगसमाश्रयम् ॥ नृपशत्रुभयं चैव मृगस्वांशगते शनौ ॥ २२ ॥ नानाविद्यार्थलाभं च पुत्रस्त्रीमित्रसंभवम् ॥ ऐश्वर्यं धनलाभं च घटस्वांशगते भृगौ ॥ २३ ॥ ज्वराग्निचोरघातं च शत्रूणां च महद्भयम् ॥ मनोदुःखमवाप्नोति घटस्वांशगते कुजे ॥ २४ ॥ दुःखव्याधिहरं चैव देवब्राह्मणपूजनम् ॥ मनःप्रीतिमवाप्नोति घटस्वांशगते गुरौ ॥ ॥ २५ ॥ त्रिदोषकुपितं चैव कलहं देशविभ्रमम् ॥ क्षयव्याधिमवाप्नोति घटस्वांशगते शनौ ॥ २६ ॥ पुत्रमित्रधनस्त्रीणां लाभं चैव मनःप्रियम् ॥ सौभाग्यं वस्त्रलाभं च घटस्वांशगते बुधे ॥ ॥ २७ ॥ स्त्रीविद्यालाभमाप्नोति ह्याश्रितव्याधिनाशनम् ॥ बहुस्त्री-

ङामवाप्नोति मीनस्वांशगतः शशी ॥ २८ ॥ कलहं चौरभीतिं च
बंधुभिः क्षयकारणम् ॥ स्थानभ्रंशमवाप्नोति मीनस्वांशगते रवौ
॥ २९ ॥ शत्रुनाशं च विजयं नृपगोभूसुतागमम् ॥ रत्नलाभं च
मीने च स्वांशगे बुधशुक्रयोः ॥ १३० ॥ विवादं पित्तरोगं च
जंतोर्जारणमारणम् ॥ शत्रुक्षयमवाप्नोति मीनस्वांशगते कुजे ॥ ३१ ॥
धनधान्यकलत्राणि लभते राजपूजनम् ॥ वस्त्राभरणलाभं च मीनस्वांशगते
गुरौ ॥ ३२ ॥ ऐश्वर्यस्य प्रणाशश्च वेश्यादीनामुपद्रवैः ॥
देशत्यागं दरिद्रं च मीने स्वांशगते शनौ ॥ ३३ ॥ एवं यथाक्रमेणैव
विज्ञेयं स्वांशगे फलम् ॥ वामर्क्षेष्वेवमेवं च फलं तत्रैव योजयेत्
॥ ३४ ॥ दशाफलमहं वक्ष्ये धर्मकर्मकृतं पुरा ॥ तत्सर्वं प्राणिभिर्नित्यं
प्राप्यते नात्र संशयः ॥ ३५ ॥ सुहृदंतर्दशा भाव्या विरुद्धा
शत्रुसंभवा ॥ मध्यमा मध्यखेटस्य दशादीनामिदं विदुः ॥ १३६ ॥

अथ नवांशफलमाह ।

मेषे तु रत्नपीडा च वृषभे धान्यवर्द्धनम् ॥ मिथुने ज्ञानसंपन्नश्चंद्रे
धनपतिर्भवेत् ॥ १३७ ॥ सूर्यर्क्षे शत्रुबाधा च कन्यास्त्रीणां
च नाशनम् ॥ तौलिके राजमंत्रित्वं वृश्चिके मरणं भवेत् ॥ ३८ ॥
अर्थलाभो भवेद्धन्वे मेषस्य नवभागके ॥ मकरे पापकर्माणि कुंभे
वाणिज्यमेव च ॥ ३९ ॥ मीने सर्वार्थसिद्धिश्च वृश्चिकेष्वग्नितो
भयम् ॥ तौलिके राजपूज्यश्च कन्यायां शत्रुवर्धनम् ॥ १४० ॥
शशिभे दारसंबाधा सिंहे च त्वक्षिरोगकृत् ॥ मिथुने वृक्षबाधा
स्याद्वृषभे च नवांशके ॥ ४१ ॥ वृषभे अर्थलाभं च मेषे तु ज्वररोगकृत्
॥ मिथुने मातुलप्रीतिः कुंभे शत्रुप्रवर्द्धनम् ॥ ४२ ॥ मृगे
चोरस्य संबाधा धनुषि शस्त्रवर्धनम् ॥ मेष तु शस्त्रसंबंधो वृषभे
कलहप्रियः ॥ ४३ ॥ मिथुने सुखमाप्नोति मिथुनस्य नवांशके ॥

कर्कटे संकटप्राप्तिः सिंहे राजप्रकोपकृत् ॥ ४४ ॥ कन्यायां भ्रातृ-
पूजा च तौलिके प्रियकृन्नरः ॥ वृश्चिके पितृबाधा स्यात्कर्कटस्य
नवांशके ॥ ४५ ॥ वृश्चिके कलहं पीडां तौलिके ह्यधिकं फलम् ॥
कन्यायामातिलाभ च शशांके मृगबाधिकाम् ॥ ४६ ॥ सिंहे च
पुत्रलाभं च मिथुने शत्रुवर्द्धनम् ॥ मीने तु दीर्घयात्रा स्यात्सि-
हस्य नवभागके ॥ ४७ ॥ कुंभे तु धनलाभं च मकरे द्रव्यलाभ-
कृत् ॥ धनुषि भ्रातृसंसर्गो मेषे मातृविवर्द्धनम् ॥ ४८ ॥ वृषभे पुत्र-
वृद्धिः स्यान्मिथुने शत्रुवर्द्धनम् ॥ शशिभे तु स्त्रियां प्रीतिः सिंहे
व्याधिविवर्द्धनम् ॥ ४९ ॥ कन्यायां पुत्रवृद्धिः स्यात्कन्यायां नव-
मांशके ॥ तुलायामर्थलाभं च वृश्चिके भ्रातृवर्द्धनम् ॥ १५० ॥
चापे च तातसौख्यं च मृगे मातृविरोधिता ॥ अलौ जायाविरोधं
च तुले च जलबाधताम् ॥ ५१ ॥ कन्यावृद्धिकरं विद्यात्तुलाया नव-
भागके ॥ कर्कटे ह्यर्थनाशश्च सिंहे राजविरोधिता ॥ ५२ ॥ मिथुने
भूमिलाभं च वृषभे चार्थलाभकृत् ॥ चापे तु धनलाभः स्याद्वृ-
श्चिकस्य नवांशके ॥ ५३ ॥ मेषे तु धनलाभः स्याद्वृषे भूमिविव-
र्द्धनम् ॥ मिथुने सर्वसिद्धिः स्यात्कर्कटे सर्वसिद्धिकृत् ॥ ५४ ॥ सिंहे
तु पूर्ववृद्धिः स्यात्कन्यायां कलहो भवेत् ॥ तौलिके चार्थलाभः
स्याद्वृश्चिके रोगमाप्नुयात् ॥ ५५ ॥ चापे तु सुतवृद्धिः स्याच्चापस्य
नवमांशके ॥ मकरे पुत्रलाभः स्यात्कुंभे धान्यविवर्द्धनम् ॥ ५६ ॥
मीने कल्याणमाप्नोति वृश्चिके मृगबाधिता ॥ तौलिके त्वर्थलाभं
च कन्यायां शत्रुवर्द्धनम् ॥ ५७ ॥ शशिभे श्रियमाप्नोति सिंहे तु
मृगबाधिता ॥ मिथुने वृक्षबाधा च मृगस्य नवभागके ॥ ५८ ॥
वृषभे त्वर्थलाभं च मेषस्य त्वक्षिरोगकृत् ॥ मीथुने दीर्घयात्रा
स्यात्कुंभे स्वस्य विवर्द्धनम् ॥ ५९ ॥ मकरे सर्वसिद्धिः स्याच्चापे
शत्रुविवर्द्धनम् ॥ मेषे सौख्यविनाशश्च वृषभे मरणं भवेत् ॥ १६० ॥

युग्मे कल्याणमाप्नोति कुंभस्य नवमांशके ॥ कर्कटे धनवृद्धिः स्यात्सिंहे तु राजपूजनम् ॥ ६१ ॥ कन्यायामर्थलाभस्तु तुलायां लाभमाप्नुयात् ॥ वृश्चिके ज्वरमाप्नोति चापे शत्रुविवर्द्धनम् ॥ ६२ ॥ मृगे जायाविरोधं च कुंभे जलविरोधतः ॥ मीने तु सर्वसौभाग्यं मीनस्य नवभागके ॥ ६३ ॥ दशाद्यंशक्रमेणैव ज्ञात्वा सर्वफलं वदेत् ॥ क्रूरग्रहदशाकाले शांतिं कुर्याद्विचक्षणः ॥ १६४ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे कालचक्रदशाफलकथनं नामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥

अथ चरदशाफलमाह ।

अधुना संप्रवक्ष्यामि चरपर्यादशाफलम् ॥ यस्य विज्ञानमात्रेण दैवज्ञो जायते द्विज ॥ १ ॥ नराणां सर्वमायुश्च सुखदुःखशुभाशुभम् ॥ सर्ववेत्ता निर्विशंकं भवतीह न संशयः ॥ २ ॥ जन्मलग्नात्समारभ्य भानुभावे द्विजोत्तम ॥ आयुर्वर्षप्रदा ज्ञेया तस्याः फलं वदाम्यहम् ॥ ३ ॥ यदा दशाप्रदो राशिस्तस्य रंध्रत्रिकोणगः ॥ पापखेटयुते विप्र सा दशा दुःखदायिका ॥ ४ ॥ तृतीयषष्ठगे पापे जयादिः परिकीर्तिता ॥ शुभं खेटयुते तत्र जायतेऽपि पराजयः ॥ ५ ॥ लाभस्थे शुभपापश्च लाभो भवति निश्चितम् ॥ यदा दशाप्रदो राशिः शुभखेटयुतो द्विज ॥ ६ ॥ शुभक्षेत्रे हि तद्राशिः शुभकर्ता दशाफलम् ॥ पापयुक्ते शुभक्षेमपूर्वयुक्तं सुखोत्तमे ॥ ७ ॥ पापर्क्षे शुभसंयुक्ते पूर्वसौख्यं ततो ऽयसेत् ॥ पापक्षेत्रे पापयुक्ते सा दशा सर्वदुःखदा ॥ ८ ॥ शुभक्षेत्रदशा रात्रौ युक्ते पापशुभौ द्विज ॥ ९ ॥ पूर्वं कष्टं सुखं पश्चान्निर्विशंकं प्रजायते ॥ पापर्क्षे पापपशुगौ पूर्वसौख्यं समेन तत् ॥ शुभक्षेत्रे शुभं वाच्यं पापर्क्षे त्वशुभं फलम् ॥ १० ॥ द्वितीये पंचमे सौ-

स्थे राजप्रीतिर्जयो ध्रुवम् ॥ पापे तृतीयगे खेटे शत्रोर्निग्रहणं जयः ॥
॥ ११ ॥ चतुर्थे तु शुभं सौख्यमारोग्यं त्वष्टमे शुभे ॥ धर्मवृद्धिर्गुरुजनात्सौख्यं
च नवमे शुभे ॥ १२ ॥ विपरीते विपर्यासो मिश्रे मिश्रं
प्रकीर्तितम् ॥ पापे भोगे च पापादेर्देहपीडा मनोव्यथा ॥ १३ ॥
सप्तमे पापयोगाभ्यां पापे दारार्तिरीरिता ॥ चतुर्थे स्थानहानिः
स्यात्पंचमे पुत्रपीडनम् ॥ १४ ॥ दशमे कीर्तिहानिः स्यान्नवमे
पितृपीडनम् ॥ पापाद्धुद्रगते पापे पीडा सर्वाप्यबाधिका ॥ १५ ॥
उक्तस्थानगते सौम्ये ततः सौख्यं विनिर्दिशेत् ॥ केंद्रस्थानगते सौम्ये
लाभशत्रुजयप्रदः ॥ १६ ॥ जन्मकालग्रहैः स्थित्या अगोचरग्रहैरपि
॥ विचारितैः प्रवक्तव्यं तत्तद्राशिदशाफलम् ॥ १७ ॥ यस्य राशिः
शुभाक्रांतो यस्य पश्चाच्छुभग्रहाः ॥ तद्दशा शुभदा प्रोक्ता विपरीते
विपर्ययः ॥१८॥ त्रिकोणरंध्ररिष्फस्थैः शुभपापैः शुभाशुभम् ॥ तद्दशा
प्रदराशीषु वक्तव्यं फलमन्यथा ॥ १९ ॥ मेषनक्रतुलानक्रराशीनां च
यथाक्रमम् ॥ बाधास्थानादिसंप्रोक्ता कुंभगोसिंहवृश्चिकाः ॥ २० ॥
पाकश्चरांतराशौ वा बाधास्थाने शुभोत्तरे ॥ स्थिते सति महाशोको
बंधनं व्ययनाशनम् ॥ २१ ॥ उच्चस्वर्क्षग्रहे तस्मिञ्छुभं सौख्यं
धनागमः ॥ तच्छून्ये चेदसौख्यं स्यात्तद्दशा न फलप्रदा ॥ २२ ॥
बाधकव्ययषड्रंध्रे राहुयुक्ते महद्भयम् ॥ प्रस्थानं बंधनं प्राप्ती राजपीडा
रिपोर्भयम् ॥ २३ ॥ रव्यारराहुशनयो भुक्तिराशौ स्थिता यदि ॥
तद्राशियुक्ताः पतनं राजकोपान्महद्भयम् ॥ २४ ॥ भुक्तिराशित्रिकोणे
तु नीचखेटः स्थितो यदि ॥ तद्राशौ वा युते नीचे पापे मृत्युभयं
वदेत् ॥ २५ ॥ भुक्तिराशौ स्वतुंगस्थे त्रिकोणे वापि तुंगभे ॥ यदा
भुक्तिदशा प्राप्ता तदा सौख्यं लभेन्नरः ॥ २६ ॥ नगरग्रामनाथत्वं
पुत्रलाभं धनागमम् ॥ कल्याणभौमभाग्यं च सेनापत्यं महोन्नतम् ॥२७॥

पाकेश्वरो जीवदृष्टः शुभराशिस्थितो यदि ॥ तद्दशाय धनप्राप्तिर्मंगलं पुत्रसंमतम् ॥ २८ ॥ सितासितागुगामाश्च सूर्यस्य रिपुराशयः ॥ कौर्पितौलिघटश्चेंदोर्भौमस्य रिपुराशयः ॥ २९ ॥ घटमीननृयुक्तौलिकन्या ज्ञस्य ततः परम् ॥ कर्कमीनालिकुंभाश्च राशयो रिपुवत्स्मृताः ॥ ३० ॥ मेषसिंहधनुःकौर्पिकर्कटाः शनिशत्रवः ॥ वृषतौलिनृयुक्कन्याराशयो रिपवोऽपरे ॥ ३१ ॥ सिंहालिकर्कचापाश्च शुक्रस्य रिपुराशयः ॥ एवं ग्रहांतरदशां चिंतयेत्कोविदो द्विजः ॥ ३२ ॥ ये राजयोगदा ये च शुभमध्यगता ग्रहाः ॥ यस्माद्वा अतितूर्याः स्युः शुभाशुभफलं ग्रहाः ॥ ३३ ॥ तद्दशायां शुभं ब्रूयाद्राजयोगादिसंभवम् ॥ शुभद्वयांतरगतः पापोपि शुभदः फलम् ॥ ३४ ॥ गताशुभदशामध्यं दशासौम्यस्य शोभना ॥ शुभं यस्य त्रिकोणस्य तद्दशापि शुभप्रदा ॥ ३५ ॥ आरंभांतौ मित्रशुभराश्योर्यदि फलं शुभम् ॥ प्रातिराश्यैककोऽब्दं स्याच्चालनीयं शुभं द्विज ॥ ३६ ॥ आरंभात्तत्रिकोणे तु सौम्ये तु शुभमावहेत् ॥ शुभराशौ शुभारंभे दशा स्यादतिशोभना ॥ ३७ ॥ शुभादिराशौ पापश्चेद्दशारंभे शुभौ द्विज ॥ शुभारंभे क्का कथेति आरंभस्य शुभं भवेत् ॥ ३८ ॥ नीचादौ तद्दशाद्यंते भावे भाग्यविपर्ययः ॥ ३९ ॥ यत्रस्थितो नीचखेटास्त्रिकोणे वाथ राशिकः ॥ ४० ॥ तदा राशीश्वरे नीचे संबंधो नीचखेटकैः ॥ भाग्यस्य विपरीतत्वं करोत्येव द्विजोत्तम ॥ ४१ ॥ राहोः केतोश्च कुंभादि वृश्चिकादि चतुष्टयम् ॥ कुंभे तत्र समारंभस्तद्दशायां शुभं भवेत् ॥ ४२ ॥ यद्दशायां शुभं ब्रूयात्स चेन्मकरसंस्थितः ॥ यस्मिन्राशौ दशांतः स्यात्तस्मिन्दृष्टे युतेपि वा ॥ ४३ ॥ शुक्रेण विधिना वा स्याद्राजकोपाद्धनक्षयः ॥ दशांतश्चेदरिक्षेत्रे राहुदृष्टियुतेपि वा ॥ ४४ ॥ इदं फलं शनेः पाके न विचिन्त्यं द्विजोत्तम ॥ दशाप्रदे नक्रराशौ न विचिंत्यमिदं फलम् ॥ ४५ ॥

राहोर्दशांते सर्वस्य नाशो मरणबंधने ॥ देशान्निर्वासनं वा स्यात्कष्टं वा महदश्नुते ॥ ४६ ॥ तत्त्रिकोणगते पापे निश्चयाद्दुःखमादिशेत् ॥ एवं शुभाशुभं सर्वं निश्चयेन वदेद्बुधः ॥ ४७ ॥ राह्वादिसृतराशिः स्याद्दशाप्रदो भवेन्नरः ॥ तत्र कालेपि पूर्वोक्तं चिंतनीयं प्रयत्नतः ॥ ४८ ॥ दशारंभो दशांतो वा मकरे वेत्रशोभनम् ॥ तस्मिन्नेव च राहुश्चेन्निरोधी द्रव्यनाशनः ॥ ४९ ॥ यत्र क्वापि च भे राहौ दशारंभे विनाशनम् ॥ गृहभ्रंशः समुद्दिष्टो धने राहुर्द्धनीकृतः ॥५०॥ चंद्रशुक्रौ द्वादशे चेद्राजकोपो भवेद्ध्रुवम् ॥ भौमकेतू तत्र यदि वधाग्नेर्महती व्यथा ॥ ५१ ॥ चंद्रशुक्रौ धनैर्विप्र यदि राजा प्रयच्छति ॥ दशारंभेन्तरश्याश्च द्वितीयस्थमिदं फलम् ॥ ५२ ॥ एवमर्गलफलार्थं च ब्रह्मदेवप्रदर्शितः ॥ यस्य पापः शुभो वापि ग्रहस्तिष्ठेच्छुभार्गले ॥ ५३ ॥ तेन दृष्टेक्षितं लग्नं प्राबल्यायोपकल्पते ॥ यदि पश्येद्ग्रहस्तत्र विपरीतार्गलस्थितिः ॥ ५४ ॥ सोपि दृष्टे स्थिते लग्नं विपरीते फलं भवेत् ॥ तद्दृष्टेऽपि शुभं ब्रूयान्निर्विशंकं द्विजोत्तम ॥ ५५ ॥ इति बृहत्पाराशरहोरापूर्वखंडसारांशे चरदशाफलकथनं नाम पंचाशत्तमोऽध्यायः ॥ ५० ॥

अथ दशावाहनम् ।

अधुना संप्रवक्ष्यामि दशावाहनमुत्तमम् ॥ प्राणिनां च हितार्थाय कथयामि तवाग्रतः ॥ १ ॥ गर्दभो घोटको हस्ती महिषो जंबुसिंहकौ ॥ काको हंसो मयूरश्च नवैते नरवाहनाः ॥ २ ॥ स्वकीयजन्मनक्षत्राद्गणयेज्जन्मभावधि ॥ नवभिस्तु हरेद्भागं शेषं तु शशिवाहनम् ॥ ३ ॥ दशाप्रवेशे खरवाहनश्च उत्पन्नभोगी जडतासमेतः ॥ लज्जाविहीनो धनधान्यहीनः स्यान्मानवो वस्त्रविवर्जितश्च ॥ ४ ॥ चपलचंचलता बहुभक्षकः प्रकटबुद्धिसघोषचमूपतिः ॥ दृढतनुर्ब-

हुकार्यकरः परस्तुरगयोर्यदि वाहनसंस्थितः ॥ ५ ॥ नानाकार्यकृतो हि मूर्खजननो देवाधिपो वाहनः संतप्तो वहठानता शुभगतिः सेनापतिः शोभनः ॥ ६ ॥ सर्वं सौख्यकरः सुभूषणधरः स्याच्चंचलो दुष्टता पाकोऽयं यदि वाहनो गजपतेर्नानाकलाकौशलः ॥ ७ ॥ माहिषयोर्बलबुद्धिविहीनता जयमयं प्रबलाग्निभयातुरम् ॥ कटकयोः प्रबले बलसंयुतो माहिषयोर्यदि वाहनता भवेत् ॥ ८ ॥ जंबुके बहुतरैव चंचला व्याधिदुःखपरिपीडितांगना ॥ क्लेशता रिपुजनाच्च पीडनं धान्यनाशमतिसंक्षयो भवेत् ॥ ९ ॥ दशाप्रवेशे यदि वाहनश्च सिंहो बलिष्ठो विविधैः प्रकारैः ॥ उत्पन्नभोगी रिपुनाशकारी स्याद्वाहने केसरिणां विशेषः ॥ १० ॥ काके वाहनसंस्थिते यदि दशा स्याच्चंचलो निर्भयो वासारो मलिनः कुवेषधरितो नीचैर्जनैः पूजितः ॥ स्थाने राजभयं तथा रिपुभयं मानापमानं नरा दुष्टार्तिः कलहं कुचेष्टितनरः स्त्रीद्वेषकारी भवेत् ॥ ११ ॥ जनकलानिधिकेलिसमन्वितो द्विजपतेर्बहुजात्मसुखान्वितः ॥ सदशने मतिना प्रबलायिता सुकथिता च चतुष्पदवाहनः ॥ १२ ॥ मयुरवाहनतो बहुलं सुखं धृतिकलाकुशलोऽमलकेलिकृत् ॥ मधुरवाक्ययुतो मधुरप्रियः सदसमेन नरस्य समान्वितः ॥ १३ ॥

अथ सुदर्शनचक्रमाह ।

विश्वचक्रं कालचक्रं दिव्यचक्रं सुदर्शनम् ॥ विष्णोः करांबुजावासमीडे तज्ज्ञानमद्भुतम् ॥ १४ ॥

अथ समस्तज्योतिःशास्त्रतत्त्वकामधेनुरूपं ।
सुदर्शनचक्रमाह ।

सुदर्शनं द्वादशारं जन्मभेंद्वर्कराशितः ॥ केंद्रकोणाष्टगो राहुः पापार्त्यै च शुभो मुदे ॥ १५ ॥ तत्त्वाद्यैर्वर्षमासाद्यद्वयेकघस्रान्प्रव-

तर्येत् ॥ विरिष्फारिशुभैः पापैस्त्रिषडायेषु वै शुभम् ॥ १६ ॥ तं तं
भावं प्रकल्प्यांगं तत्तत्त्वादिजं फलम् ॥ गुरूपदेशात्संवाच्यं
भोजनं स्वप्नपूर्वकम् ॥ १७ ॥ भावेशादिद्वादशानां दशवर्षेषु कल्पयेत्
॥ तदाद्यंतर्दशास्तद्वन्मासादौ तद्बलैः शुभाः ॥ १८ ॥ सुदर्शनं
द्वादशारं वृत्तत्रयसमन्वितम् ॥ पूर्ववृत्ते जन्मलग्नाद्भावाः खेचरसंयुताः
॥ १९ ॥ तदूर्ध्ववृत्ते चंद्राच्च भावाः खेटसमन्विताः ॥ तदूर्ध्ववृत्ते
सूर्याच्च भावा लेख्याः सखेचराः ॥ २० ॥ वृत्तत्रयेऽपि ये
खेटा यत्र राशौ व्यवस्थिताः ॥ ते तंत्र तत्र संलेख्यास्तस्माद्भावान्निरीक्षयेत्
॥ २१ ॥ यद्यद्वृत्ते तु यद्भावात्केंद्रकोणाष्टगस्तमः ॥
पापा वा यत्र बहवस्तत्तद्भावविनाशनम् ॥ २२ ॥ यत्र भावे सैंहिकेयोऽवश्यं
ताद्भावहानिदः ॥ यस्माद्भावात्केंद्रकोणाष्टमे सौम्याः
शुभप्रदाः ॥ २३ ॥ तदा तद्भाववृद्धिः स्यात्त्रिवृत्तेपि शुभा ग्रहाः ॥
केंद्रादिस्थानगास्ते चेच्छुभाधिक्यफलप्रदाः ॥ २४ ॥ तथा पापखगास्तत्र
पापारिष्टफलप्रदाः ॥ शुभेन वीक्षिताः सौम्यं फलं तद्भावजं
समम् ॥ २५ ॥

अस्योदारणमाह ।

शके १६०० पौषकृष्णः ५ चंद्रे घटी १४ पल ५४ पूर्वाफाल्गुन्यां ३२ । ८ उत्तराफाल्गुनीभुक्तघटी ८ पल ३० सौभाग्ययोगघटी ४५ पल ५२ तत्र चापार्कगतांशादौ २३ । ४६ । ४१ श्रीसूर्योदयाद्गतघटीषु ४२ पल ४ जन्मेष्टकालिकाः स्पष्टग्रहाः ८ । २३ । ४६ । ४१ गतिः ६१ । ५ चं ० ४ । २८ । ४६ । १४ गतिः ७७३ । १५ । मं ० ४ । ४ । १४ । १९ बु ० ८ । ६ । २६ । ४० गु ० ११ । ८ । ८ । ४ शुक्रो मार्गे ८ । १५ । ४८ ५४ । श० २ । ३ । १३ । १२ । राहुः १४ । २६ । ५ । के० १४ । २६ । ५ लग्नं ५ । १८ । २० ।

३१ । दशमं २ । १० । ५ । ५२ अत्र वृत्तत्रये तनुभावे रविभौमचंद्रशुक्रा इति शुभग्रहद्वयं चास्तीति देहे बलहर्षादेर्मध्यमत्वम् एवमग्रेऽपि विचार्यम् । तत्रापि स्वोच्चस्वभमित्रभादपि ग्रहो विशेषतः शुभफलदः नीचार्यस्तगोल्पं शुभं पुष्टं दुष्टफलं ददात्येवं शुभमित्रपापयुतदृष्टोपि ज्ञेयः । तत्रापि शुभदृष्टिपादान् गणयित्वा शुभदृष्टिशेषे सत्फलोदयः पापदृष्टिशेषे दौष्ट्याधिक्यं लग्ने बुधे दृष्टिस्त्रिकोणदृष्टित्वाच्चरणद्वयं २ गुरुदृष्टिः संपूर्णा ४ शुक्रदृष्टिरेकचरणमिता एवं दृष्टित्रयचरणैक्यं ७ तत्र तनौ रविदृष्टिरेक १ चरणमिता शनिदृष्टिः त्रि ३ चरणमिता एतयोरैक्यं ४ शुभाऽशुभांतरे कृते शुभदृष्टिशेषः ३ तस्माद्देहनीरोगसुंदरदेहाश्चिरादितनुभावोक्तसत्फलवान् एवं लग्नवृत्तावुपरि चंद्रवृत्ते तनौ बुधदृष्टिस्त्रिचरण ३ मिता गुरुदृष्टिर्नास्ति शुक्रदृष्टिर्द्विचरणमिता २ एतयोरैक्यं ५ तथाऽर्कदृष्टिश्चरणद्वयं २ शनिदृष्टिस्त्रिदशेत्याद्युक्त्या पूर्णा ४ अनयोरैक्यं ६ ॥ एकभस्थत्वाद्भौमदृष्टिः पूर्णरविभौमशनिदृष्टीनामैक्यं १० शुभाशुभशुभांतरं ५ पापशेषत्वाच्चंद्रस्य मनोग्रहत्वान्मनस्यतिदुःखितः तथा चंद्रवृत्तोपरि रविवृत्ते तनौ चंद्रदृष्टिः १ शुक्रस्यैकभस्थत्वात्पूर्णदृष्टिः ४ एवं शुभैक्यं ७ तथा भौमदृष्टिः २ शनिदृष्टिः ४ एतयोरैक्यं ६ शुभाऽशुभांतरं १ शुभशेषत्वादात्मवान्नृपादतः कालात्मा इत्यादि शुभाशुभफलं विशेषतस्तु सूक्ष्मफलम् दृष्टिकला आनीय शुभाशुभं फलं बोध्यम् । अथ तात्कालिकविमर्शः । तन्वाद्यैर्वर्षमासार्द्धद्वयेके घस्रान्प्रवर्तयेदिति तन्वाद्यैर्द्वादशभावे प्रत्येकं जन्माब्दमारभ्यैकैकं वर्षं प्रकल्प्यैवं द्वादशाब्दाः ततो द्वितीयपर्यये तनुभावे त्रयोदशं वर्षं धनभावे चतुर्दशं वर्षमेवं दशाभिः परिवर्तने विंशाधिकशताब्दमायुः स्यादेवं प्रत्यब्दभावं तनुभावं प्रकल्प्य ततस्तस्मिन्नब्दे प्रतिभावेषु

स्वामिशुभमित्रदृष्टयुक्तेषु तद्भावजं शुभं फलं वाच्यं पापादिदृग्युक्तदृष्टेषु दृष्टं फलं वाच्यं ततो यस्माद्वर्षलग्नात्केंद्रकोणाष्टमेषु रविभौमशनिकेतवः स्युस्तद्वर्षं नेष्टं यस्माद्वर्षलग्नात्केंद्रकोणाष्टमेषु शुभग्रहास्तद्वर्षमिष्टं तत्र लग्नाष्टमे चंद्रस्तु जन्मसमये नेष्टः एवमन्यत्रापि प्रतिवर्षं तद्भावराशीशस्य दशायां च एवं मासेषु दिनेष्वपि ज्ञेयम् । अथ मासविमर्शः । वर्तमानवर्षभावविलग्नाद्या द्वादशमासाः ज्ञेयाः एवं वर्षादौ तनुभावः स एव प्रथमो मासः द्वितीयभावो द्वितीयमासः एवं द्वादश मासाः स्युः । तत्र ग्रहविचारो वर्षोक्तिवत् । अथ दिनफलविमर्शः । सार्द्धद्वि २॥ घस्रान्वर्द्धयेदिति तस्मात्सार्द्धद्विघस्रान्वेति विकल्पः इष्टमासभावादितः सार्द्धद्विद्विदिवसाः प्रत्येकं द्वादशभावेषु जानीयात् । यथा वर्तमानमासतनुभावे सार्द्धदिनद्वयं एवं गणनया द्वादशभावेषु त्रिंशद्दिनानि पूर्णानि स्युस्तत्र दिनभावं तनुभावं विधाय वर्षोक्तिद्वादशभावफलं वाच्यं तत्रापि वर्षमासदिनभावेषु यस्य यस्य शुभस्याशुभस्य योगो दृष्टिर्वा स्यात्तद्ग्रहस्य रसभोजनस्वप्नचेष्टाद्यं गुरूपदेशादादेश्यमथैकघस्रानिति इष्टमासभावादेकैकं दिनं प्रतिभावेषु ज्ञेयं एवं सार्द्धद्वयपरिवर्तेन द्वादशभावेषु त्रिंशद्दिनानि स्युः । तत्रापि सार्द्धदिनद्वयद्वादशांशेन घटि १२ पल ३० घटिकाफलमेकादिनस्य द्वादशांशेन घटी ५ घटिकाफलमिति वर्षप्रवेशसमयादिति बोध्यम् ।

अथ पूर्वपद्यार्थः-तत्र कर्कोटकेन वृत्तत्रयमुपर्युपर्यंतरालं विहाय लेख्यं द्वादशकोष्ठकसहितं सुदर्शनचक्रं स्यात्तत्राभ्यंतरवृत्ते जन्मसमयलग्नाद्द्वादश भावाः सग्रहाः लेख्याः ततस्तदूर्ध्ववृत्ते जन्मनि यद्राशौ रविः तस्माद्द्वादशभावाः सग्रहा लेख्याः । तत्र वृत्तत्रयेपि यस्माद्यस्माद्भावात्केंद्र १।४।७।१०त्रिकोणा ९।५ष्टमेषु८राहुस्स्याद्वा बहवः पापा रविभौमशनिकेतवः स्युः तद्भावहानिः स्यात् । उक्तस्थानेषु राहुः रविश्च निषिद्धस्तस्य पृथगुपादानाद्यस्माद्भावात्केंद्रकोणाष्टमेषु शुभग्रहास्तद्भाववृद्धिरित्यर्थात्सिद्धम् ॥ वृत्तत्रये प्रोक्तभावेषु ॥ शुभग्रहाधिक्ये शुभ-

फलाधिक्यं पापाधिक्ये दौष्ट्याधिक्यं साम्ये साम्यमिति यद्राशौ चंद्रस्तस्माद्द्वादशभावाः सग्रहाः लेख्याः ततोप्युपरिवृत्ते जन्मनि. ९

अथ सुदर्शनचक्रम्।



अथ राहुदृष्टिमाह।

सुतमदननवांते पूर्णदृष्टिं तमस्य युगलदशमगेहे चार्धदृष्टिं वदंति ॥ सहजरिपुविपश्यन्पाददृष्टिं मुनींद्रा निजभवनमुपेतो लोचनांधः प्रदिष्टः ॥ २६ ॥

अथ ग्रहाणामुदयवर्षाण्याह।

आकृत्यो २२ जिन २४ संमिता गजकरा २८ नेत्राग्नयः ३२ षोडश १६ स्तत्वा २६ न्यंगगुणा ३६ द्विवेद ४२ प्रमिताः सूर्यादिकानां समाः ॥ यः खेटः स्वगृहे स्वतुंगभवने षड्वर्गशुद्धश्चयस्तस्याब्दे हि नृणां भवेदतिसुखं भाग्योदयो निश्चितम् ॥ २७ ॥

अथ ग्रंथकर्तृप्रशंसा।

श्रीमज्जयपुरे विप्रो धैर्यगांभीर्यवीर्यवान् ॥ नाम्ना जटाशंकरोभूज्ज्योतिःशास्त्रविशारदः ॥ ॥ २८ ॥ दधीचज्ञातिनालिनीनिशाकर इवापरः ॥ दिवाकरस्तेजसाऽहं तत्सुतःश्रीधराभिधः ॥ ॥ २९ ॥ अकार्षं सुमहद्यत्नाद्बृद्धपाराशरीकृतिः ॥ यदा न मिलिता पूर्णा तदा सारांशमेव हि ॥ ॥ ३० ॥ गृहीत्वापूर्वभागस्य पूर्वभागो व्यरचयम् ॥ मया तत्रादितोऽध्याया एकपंचाशदुत्कचाः ॥ ३१ ॥ उत्तरार्धमृषिप्रोक्तं सावसानादिलंभितम् ॥ टीकाविलसितं कृत्वा विदुषां विनिवेदितम् ॥ ३२ ॥ नानानिदर्शनवनाविवेचनाविलोचनम् ॥ पाराशरीपूर्वभागमूरीकुर्वन्तुपण्डिताः ॥ ३३ ॥ इति श्रीबृहत्पाराशरहोरापूर्वखंडसारांशे ज्योतिर्विज्जटाशंकरात्मजश्रीधरविरचिते सुदर्शनचक्रवर्णनं नामैकपंचाशत्तमोध्यायः ॥ ५१ ॥ समाप्तोऽयं पूर्वखण्डसारांशः।

श्रीः ।

अथ बृहत्पाराशरहोरोत्तरभागः सटीकः—

भाषाटीकासहितश्च प्रारभ्यते ।

टीकाकर्तुर्मंगलाचरणं वंशादिवर्णनं च ।

श्रीगणेशाय नमः ॥ वन्दे राधारमणं त्रिजगत्परिपालनाय चिन्मायाम् ॥ आद्यामाश्रित्यादौ यः सगुणो भाति चिन्मयः साक्षात् ॥ ॥ १ ॥ निर्विघ्नाय गणेशः सकलागममूलहेतुरीशो यः ॥ ज्ञानोदयाय शक्तिर्ध्वांतध्वंसाय भास्करो भगवान् ॥ २ ॥ विष्णुर्धर्मसमृद्ध्यै जातस्त्वेकोपि पंचधा तस्मै ॥ अतिनतबुद्ध्या सततं नतिशतमास्तां सुमंगलो मेऽसौ ॥ ३ ॥ सूर्यं ज्योतिष्मतां श्रेष्ठं पराशरमहामुनिम् ॥ नत्वा तदुक्तिबोधाय टीकां कुर्वे यथामति ॥ ४ ॥ आसीज्जयपुरे श्रीमान्नीतिज्ञः सर्वशास्त्रवित् ॥ दध्यङ्ङन्वयवार्धीन्दू राजमान्यो दिवाकरः ॥ ५ ॥ तस्य द्वौ तनुजावास्तां तत्र ज्येष्ठो महायशाः ॥ रामलालः पुराणज्ञो ज्योतिःशास्त्रविशारदः ॥ ६ ॥ गंगादत्तः कनिष्ठस्तु पुराणव्याकृतौ पटुः ॥ वंशीधरस्तत्सुतोऽभूत्पुराणज्ञस्तदात्मजौ ॥ ७ ॥ सूर्यनारायणौ ज्येष्ठः पुराणकुशलः सुधीः ॥ कनिष्ठः श्रीधरो धीमाञ्ज्योतिःशास्त्रविशारदः ॥ ८ ॥ पूर्वोक्तरामलालस्य द्वौ तनूजौ बभूवतुः ॥ शिवशंकरनामाग्र्यो जटाशंकरनामकः ॥ ९ ॥ कनीयान्न्यायमीमांसाशब्दशास्त्रविशारदः ॥ अगृह्णाद्दत्तकं वंशवृद्ध्यै श्रीधरं स माम् ॥ १० ॥ सोऽहं परोपकाराय देशाद्देशांतरं भ्रमन् ॥ बृहत्पाराशरीहोरापुस्तकानि तु यत्नतः ॥ ११ ॥ संगृह्य शोधयित्वा तु विद्वद्भ्यस्तदनंतरम् ॥ सामंतवाटिकावासीधौरेयोपाभिधस्य तु ॥ ॥ १२ ॥ श्रीकृष्णशर्मणः सम्यक् साहाय्येन तथापि च ॥ बृहत्पारा-

शरीटीकां रचयामि यथामति ॥१३॥ क्षमध्वं साहसं धीरा उपकाराधियो मम ॥ क्व पराशरवागाब्धिः क्वाहं मंदमतिबुधाः ॥१४॥ तथापि च यथाबुद्धि रचयामि विशोध्यताम् ॥ सर्वज्ञो न यतो लोके मानुषः परमेश्वरात् ॥ १५ ॥ अत्र तु प्रथमेऽध्याये मैत्रेयप्रश्ननंदितः ॥ पराशरो व्याकरोति शिष्याष्टकवर्गकान् ॥ १६ ॥

मंगलचरण भाषा ।

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ मैं आदौ कहते हैं प्रथम राधारमण जो श्रीकृष्ण उनकूं वंदे नमस्कार करता हूं कैसे हैं जो भगवान् श्रीकृष्ण तीन जगत्के पालन करनेके अर्थ अपनी ज्ञानशक्तिका आश्रय करके स्वतः प्रत्यक्ष ज्ञानरूप हैं सगुण शोभते हैं ॥ १ ॥ जो श्रीकृष्ण विघ्ननाशार्थ गणपतिरूप संपूर्ण शास्त्रोंके निर्माणार्थ मूलभूत शिवरूप, ज्ञानोदयके अर्थ शक्तिरूप, अज्ञानांधकारके नाशार्थ सूर्यरूप ॥ २ ॥ धर्मसमृद्ध्यर्थ विष्णुरूप, धारण करते भये ऐसे एक जो भगवान् पंचस्वरूप होते भये उनोकूं अति नम्रबुद्धिसे निरंतर मेरे शत नमस्कार हों और मेरेकूं मंगलरूप हों ॥ ३ ॥ सर्वज्योतिर्गणोंमें श्रेष्ठ जो सूर्य और महाबुद्धिमान् जो पराशरमुनि उनकूं नमस्कार करके श्रीपराशरोक्तवचनके सुबोधार्थ मैं यथामति भाषाटीका करताहूं ॥४॥ जयपुर नाम करके धन्व देश (ढुंढाड) में प्रसिद्ध नगर वहां श्रीमान्, नीतिमार्गमें निपुण, सकल शास्त्रोंके जाननेवारे दध्यङ् ऋषिका वंशरूप जो समुद्र उसमेंसे जैसे चंद्र तत्तुल्य राजमान्य दिवाकर नाम करके होते भये ॥ ५ ॥ वह दिवाकरजीके दो पुत्र होते भये उनमें ज्येष्ठ पुत्र **रामलाल** करके बडे यशस्वी पुराण और ज्योतिषशास्त्र इनमें निपुण हुये ॥ ६ ॥ कनिष्ठ पुत्र **गंगादत्त** करके पुराण और व्याकरणशास्त्र इनमें कुशल हुये. गंगादत्तके **वंशीधर** नामक पुत्र भये. उनके दो पुत्र भये ॥ ७ ॥ उनमें ज्येष्ठ पुत्र **सूर्यनारायण** नाम करके पुराणविद्यामें कुशल भये. कनिष्ठ **श्रीधर** नाम करके ज्योतिःशास्त्रमें कुशल विद्वान् भये ॥ ८ ॥ पूर्वोक्त जो **रामलाल**

उसके दो पुत्र भये ज्येष्ठ पुत्र **शिवशंकर** कनिष्ठ पुत्र **जटाशंकर** भये ॥ ९ ॥ सो जटाशंकर न्याय वेदांत व्याकरण शास्त्रमें कुशल थे उन्होंने वंशवृद्ध्यर्थ श्रीधर जो मैं सो मेरेकूं दत्तक लिये ॥ १० ॥ सो मैं श्रीधर परोपकारार्थ देशदेशांतरमें परिभ्रमण करके पाराशरहोराके पुस्तक बडे प्रयत्नपरिश्रमसे ॥ ११ ॥ संग्रह करके पीछे विद्वान् लोगोंसे शुद्ध करवायके बाद कोंकणदेशके सामंतवाडी ग्रामके रहनेवाले धौरेय जिनका उपनाम ॥ १२ ॥ ऐसे **श्रीकृष्णशर्मा** शास्त्री उनकी सहायतासे यह पाराशरहोराके ऊपर यथामति मैं टीका निर्माण करता हूं ॥ १३ ॥ यह मेरे साहसकृत्यके विषे उपकारक बुद्धिमान् धीरपुरुषोंने क्षमा करना कारण हे पंडितजनो ! पराशरवाक्यरूपी समुद्र कहां और मंदबुद्धि मैं कहां ॥ १४ ॥ तथापि यथामति ग्रंथ शोधके टीकाकी रचना करता हूं, लोकमें परमेश्वरविना सर्वज्ञ कोई मनुष्य नहीं है ॥ १५ ॥ अब ग्रंथके प्रथमाध्यायमें मैत्रेयके प्रश्नसे प्रसन्न हुये पराशर मुनि शिष्यकूं अष्टकवर्ग कहते हैं ॥ १६ ॥

ग्रंथारंभः ।

मैत्रेय उवाच-भगवन्सर्वमाख्यातं जातकं विस्तरेण मे ॥ ससहस्रायुतग्रंथैरशीत्यध्यायसंयुतैः ॥ १ ॥ संकरात्तत्फलानां तु ग्रहाणां गतिसंकरात् ॥ नान्येन हीदृगस्येदमिति वक्तुमलं नराः ॥ २ ॥ कलौ युगे ततोऽल्पैव बुद्धिः पापोत्तरा नराः ॥ अतो न चास्य प्रचयगमनं न प्रयोजनम् ॥ ३ ॥

अथ श्रीमैत्रेयः मित्रायाः अपत्यं पुमान्स मुनिः पराशरमुखाद्विस्तरतः पूर्वार्धोक्तं जातकमाकर्ण्य कलियुगोत्पत्स्यमानजडमतिस्वल्पायुर्नरास्थितिमाज्ञाय तदुपकाराय ग्रंथलाघवेन सर्वजातकतत्त्वजिज्ञासुर्मुनिं प्रति पुनः पप्रच्छ भगवन्निति। हे भगवन् "उत्पत्तिं विलयं चैव

अगतिं च गतिं तथा ॥ वेत्ति विद्यामविद्यां च भगवान्स निगद्यते'' इत्युक्तषाड्विधलक्षणपरिपूर्णः । अनेन स्वप्रश्नानुरूपप्रत्युत्तरदानसामर्थ्यमृषेः सूचितम् । अपि च भगवन्निति विशेषणेन ग्रंथादौ निर्विघ्नपरिसमाप्तिप्रचयगमनजनकं मंगलमपि ध्वनितम् । सहस्रायुतग्रंथैः ग्रथ्यंते निबध्यंत एभिर्विषया इति ग्रंथाः श्लोकाः सहस्रेण सहिताः ससहस्राः ते च ते अयुताश्च तथोक्ताः सहस्रायुताश्च ते ग्रंथाश्च तैः एकादशसहस्रश्लोकैरित्यर्थः । विस्तृतग्रंथनानाप्रकरणभेदसुखपरिज्ञानाभावशंकां वारयति । अशीत्यध्यायसंयुतैः अशीतिसंख्याका अध्यायाः तत्तत्प्रकरणभेदद्योतका भागा इत्यर्थः । तैः जातकं जातजंतुफलसूचकं शास्त्रं विस्तरेण मे सर्वमशेषमाख्यातं स्फुटतया कथितम् भगवतेति शेषः ॥ १ ॥ ननु स्फुटतया समग्रजातके व्याख्यातेपि कुतः पुनः प्रश्न इति चेत् चतुर्भिः श्लोकैस्तद्धेतुं दर्शयाति–संकरादित्यादिभिः । तत्र प्रथमे विषयकारणं दर्शयाति । संकरादिति । ग्रहाणां गृह्णंति पीडयंति शरीरमनसी इति ग्रहास्तेषां गतिसंकरात् गतिर्गमनं तस्याः संकरः अन्योन्यमिश्रणं तस्मात् फलानां पृथङ्निश्चितफलानां संकरः विपर्यय इत्यर्थः । तस्माद्धेतोः अस्य ग्रंथोक्तवचनस्य अनेन ईदृक्प्रकारेण ईदृक् एवंप्रकारकं फलमिति शेषः । इति एवं हीति निश्चयेन वक्तुं कथयितुं नराः नालं न समर्थाः भवेयुः ॥ २ ॥ ननु विस्तृते ग्रंथे सत्यपि कुतः फलनिश्चयासमर्थत्वमित्याशंक्य बुद्धिहीनत्वादित्याह–कलाविति । कलौ युगे यतः पापोत्तराः पापाधिकाः नराः ततः तेषामिति शेषः । बुद्धिः अल्पैव हीनैव अतः अस्य पूर्वार्द्धस्य विस्तृतग्रंथस्य प्रचयगमनं दीर्घकालप्रवृत्तिः न स्यात् अपि च प्रयोजनं फलज्ञानरूपकार्यमपि न स्यात् ॥ ३ ॥

भाषा–उस प्रथमाध्यायमें प्रथम मैत्रेय ऋषि प्रश्न करते हैं हे भगवन् ! आपने पूर्वभागमें अशीति (८०) अध्याययुक्त ग्यारह हजार (११०००)

श्लोकसे सविस्तर संपूर्ण जातकशास्त्र मेरेकूं वर्णन किया ॥ १ ॥ परंतु पुनः प्रश्न करनेका कारण यह है कि ग्रहोंका गतिका अन्योन्यमिश्रण होनेसे फलोंकाभी विपर्यय हुवा है उसके लिये इस वचनसे ऐसा फल कहना ऐसा निश्चय करनेको कोई मनुष्य समर्थ नहीं होताहै ॥ २ ॥ और प्रश्न करनेका दूसरा प्रयोजन यह है कि पूर्वार्द्ध जो है वो बडा सविस्तर ग्रंथ है, और कलियुगमें मनुष्य अल्पबुद्धि उसमेंभी पापी बहुत उसके लिये वो महान् ग्रंथका विचार होसकता नहीं है और कार्यभी होता नहीं है ॥ ३ ॥

अत्र त्रेतायुगे केचिद्द्वापरे च कृते युगे ॥ कुशाग्रमतयः सर्वे पुण्यभाजश्चिरायुषः ॥ ४ ॥ अतोऽल्पबुद्धिगम्यं यच्छास्त्रमेतद्वदस्व मे ॥ लोकयात्रापरिज्ञानमायुषो निर्णयं तथा ॥ ५ ॥

टीका–कथं तर्ह्येतावंतं कालमस्य प्रयोजनं प्रचयगमनं चासीत् इति शंकायामाह अत्रेति । अत्र कृतयुगे यतः सर्वे नराः पुण्यभाजः धर्मनिष्ठाः ततः चिरायुषः दीर्घायुषः अनेन विस्मृतस्यापि ग्रंथस्य प्रचयगमनहेतुर्दर्शितः कुशाग्रमतयः पुण्यातिशयात् सूक्ष्मबुद्धयः इति ग्रंथोक्तफलज्ञानसामर्थ्यमपि दर्शितम् । तथाभूताः त्रेतायुगे द्वापरेपि केचिदासन् न कृतयुगवत्सर्वे युगकालमनुसृत्योत्तरोत्तरं कालं पुण्यह्रासादित्यर्थः । कलिकालस्तु सर्वथैतद्गुणहीन इति पूर्वश्लोके एवाभिहितः अनेन युगत्रये पूर्वार्द्धस्यैव प्रवृत्तिरासीत् द्वापरांत एवोत्तरार्द्धप्रश्न इति निष्कर्षः ॥ ४ ॥ एवं कलौ पूर्वार्द्धप्रवृत्तिहेतुं दर्शयित्वोत्तरार्द्धविषये मुनिं प्रार्थयते अत इति । अतः पूर्वोक्तहेतोः अल्पबुद्धिगम्यं अल्पबुद्धिभिः हीनमतिभिः गम्यते ज्ञायते तत्तथा शास्त्रं ज्योतिःशास्त्रं मे वदस्व । कथं तच्छास्त्रं लोकयात्रापरिज्ञानं लोकानां जनानां यात्रा सुखदुःखभोगोपगतिरित्यर्थः तस्याः परिज्ञानं यस्मिंस्तत्तथा

यस्मिन् शास्त्रे आयुषो निर्णयः आयुषः जीवनस्य निर्णयः अल्पं मध्यमं पूर्णमिति निश्चयः तथाभूतं शास्त्रमिति संबंधः ॥ ५ ॥

भाषा–फिर तुम कहोगे कि इतने कालपर्यंत इस ग्रंथका उपयोग कैसा भया और अब कैसा नहीं होता ? उसका प्रयोजन आपही कहते हैं, हे मुनीश्वर ! यह त्रेतायुगमें और द्वापर युगमें सत्ययुगमें जो मनुष्य वे कुशाके अग्रसरीखी सूक्ष्मबुद्धि और पुण्यवंत दीर्घ आयुष्मंत होते रहे उसके लिये जो पूर्वार्द्ध भागके देखनेकूं समर्थ थे ॥ ४ ॥ इसवास्ते यह कलियुगमें अल्पमति मनुष्योंके जाननेमें आवे ऐसा शास्त्र मेरेकूं कहो जिसके अभ्यास करनेसे लोकोंका सुखदुःखका परिज्ञान होवे और आयुष्यका निर्णय मालूम होवै सो कहो ॥ ५ ॥

पराशर उवाच–साधु पृष्टं त्वया ब्रह्मन्वदामि तव सुव्रत ॥ लोकयात्रापरिज्ञानमायुषो निर्णयं तथा ॥ ६ ॥ संकरस्याविरोधं च शास्त्रस्यापि च सिद्धये ॥ प्रयोजनस्य लोकानामुपकाराय तच्छृणु ॥ ७ ॥ लग्नादिव्ययपर्यंता भावाः संज्ञानुरूपतः ॥ फलदाः शुभसंदृष्टा युक्ता वा शोभना मताः ॥ ८ ॥ पापदृष्टयुता भावाः कल्याणेतरदायकाः ॥ नितरां शत्रुनीचस्थैर्न च मित्रोच्चगैश्च तैः ॥ ९ ॥

टीका–एवं पंचश्लोकोक्तमैत्रेयप्रश्नानंतरं पराभूतः वसिष्ठशोकरूपशरो यस्मात्स तथा ग्रंथाज्ञानदुःखनिवर्तनश इत्यर्थः तन्नामा ऋषिः उवाच अनुरूपमुत्तरं दत्तवान् । तत्रादौ प्रश्नारंभं प्रशंसयन्नाह साध्विति । सुव्रत सुष्ठु व्रतं वैधाचरणनियमो यस्य एतादृश सुव्रत अत एव ब्रह्मन् श्रेष्ठप्रश्नाधिकारिन्नित्यर्थः त्वया साधु परो-

पकारशालि पृष्टं इति तं सत्कृत्य लोकयात्रापरिज्ञानं तथा आयुषो निर्णयमिति तत्प्रश्नद्वयमेवानूद्य वदामीति प्रतिजानीते ॥ ६ ॥ प्रश्नानुरूपं प्रत्युत्तरं वदामीति पूर्वोक्तमेव विशदयति । संकरस्येति । संकरस्य संकरात्तत्फलानां तु ग्रहाणां गतिसंकरादिति भवदुक्तस्य अविरोधं विरोधाप्राप्तिं शास्त्रस्य सिद्धये कलौ युगे इत्यादिश्लोकोक्तासिद्धिकारणं निवार्यैतच्छास्त्रप्रवृत्तये अपि च प्रयोजनस्य सिद्धये तस्मिन्नेव श्लोके भवत्पृष्टप्रयोजनाभावं निवार्य ग्रंथप्रयोजनसिद्ध्यर्थं लोकानां उपकाराय गतिसांकर्यादिसम्यक्फलज्ञानसिद्ध्युपकारार्थं यद्वादामि तच्छृणु इत्यन्वयः ॥ ७ ॥ वदामीति प्रतिज्ञानमुपचक्रमे लग्नादित्यादि सार्द्धश्लोकेन । लग्नादिव्ययपर्यंताः तन्वादिव्ययमर्यादा द्वादश भावाः संज्ञानुरूपतः संज्ञानुगुणं फलदाः ज्ञातव्याः ते च शुभसंदृष्टाः शुभग्रहावलोकिताः युक्ताः शुभसंयुक्ता वा शोभनाः शुभफलदाः मताः निश्चिताः ते भावाः पापदृष्टयुता पापग्रहैर्दृष्टा वा युताश्च संतः कल्याणेतरं अशुभफलं ददतीति कल्याणेतरदायकाः ज्ञातव्याः । एतदुक्तं भवति । शुभदृष्टयुतस्तनुभावः पुष्टिसौंदर्यादिफलभाक् अशुभदृष्टयुतस्तनुभावः कार्श्यकुरूपादिफलभाक् एवं धनादिभावाः शुभदृष्टयुतास्तत्फलवर्धकाः अशुभदृष्टयुताश्च तत्तत्फलनाशका इति भावः । अत एव षष्ठाष्टमस्थशुभाः शत्रुमृत्युवर्धकाः तत्स्थाः पापाः तन्नाशका इति दिक् ॥८॥ उक्तयोगस्यातिशयत्वमपवादं च कथयति उत्तरार्द्धेन नितरामिति । शत्रुनीचस्थैः तैः शत्रुक्षेत्रनीचस्थानगतैः दृष्टयुता भावा इति पूर्वोक्तमनुसंधेयम् । नितरां अत्यंतं कल्याणेतरदायकाः तैः पापैरपि मित्रोच्चगैः मित्रक्षेत्रोच्चस्थानगतैश्चेद्दृष्टयुता भावाः तर्हि अशुभफलदा न भवंति किं तु शुभफलदा एवेत्यर्थः ॥ ९ ॥

भाषा—तब पराशर कहेते हैं हे मैत्रेय ! तुमने उत्तम प्रश्न किया तेरेकूं लोकोंका सुखदुःख मालूम होवे और आयुष्यप्रमाण मालूम होवे सो कहता हूं ॥ ६ ॥ और तुमने जो प्रथम प्रश्न किया था कि ग्रहोंकी गतिकी संकरतासे फलका विपर्यास होताहै सो शास्त्रकी सिद्धता होनेके वास्ते उसकाभी अविरोध प्रकार और प्रयोजनभी लोकोंके उपकारार्थ कहताहूं सो श्रवण करो ॥ ७ ॥ इस शास्त्रमें लग्नादि व्ययपर्यंत राशिकुंडलीमें बारह स्थान हैं वे बारह भाव हैं वे शुभ ग्रहोंसे अवलोकित होवैं अथवा शुभग्रहयुक्त होवैं तो अपने अपने स्थानानुरूप उत्तम फल देते हैं और पापग्रहावलोकित हो वैं अथवा पापग्रहयुक्त होवैं तो अपने स्थानानुरूप अनिष्ट फल देते हैं ॥ ८ ॥ और उसमेंभी जो वे बारह भाव शत्रुराशिगत, नीचराशिगत अशुभ ग्रहोंसे दृष्ट होवें या मिले हुवे होवें तो बहुत दुःखदायक होवें और मित्रराशि उच्चराशिगत पापग्रहोंसे वे बारह भाव मिले हुवे या दृष्ट होवें तो शुभफल दायक होवे हैं ॥ ९ ॥

एवं सामान्यतः प्रोक्तं होराविद्भिस्तु सूरिभिः ॥ मयैतत्सकलं प्रोक्तं पूर्वाचार्यानुवर्तिना ॥ १० ॥ आयुश्च लोकयात्राश्च शास्त्रेऽस्मिंस्तत्प्रयोजनम् ॥ निश्चेतुं तन्न शक्नोति वसिष्ठो वा बृहस्पतिः ॥ ११ ॥ किं पुनर्मनुजास्तत्र विशेषात्तु कलौ युगे ॥ नष्टादिषु च नातीव द्रेष्काणादिफलेषु च ॥ १२ ॥

टीका—उक्तविषयो न स्वकपोलकल्पित इत्याशयेनाह एवमिति । एवं पूर्वश्लोकोक्तं होराविद्भिः होरा लग्नं तत्प्रयुक्तं शास्त्रं होरा आम्रस्य फलमाम्रमितिवत् तां विदंति जानंतीति तैः ज्योतिःशास्त्रज्ञैरित्यर्थः सूरिभिः पंडितैः सामान्यतः संक्षेपतः प्रोक्तं स्वनिर्मितग्रंथेषु रचितं एतत् इदमेव पूर्वाचार्यानुवर्तिना पूर्वे च ते आचार्याः उपदेष्टारः ज्योतिःशास्त्रोपदेशका इति यावत् ताननुवर्तते अनुसरतीति

तथा तेन मया पराशरेण सकलं समग्रं प्रोक्तं पूर्वार्द्धे इति शेषः ॥१०॥ एतच्छास्त्रस्यातीव दुःखबोध्यतामाह आयुरिति। अस्मिन् शास्त्रे ज्योतिःशास्त्रे आयुः जीवितकालमानं लोकयात्रा लोकानां जनानां यात्राः सुखदुःखमार्गसंसरणानि तत्प्रयोजनं तयोः पूर्वोक्तये प्रयोजनं कारणं यदुक्तं तादिति शेषः। वसिष्ठः साक्षाद्ब्रह्मपुत्रोऽस्मत्पितामहः वा उत च बृहस्पतिः बृहतो वेदागमादिवाक्पटून्पाति ज्ञातृत्ववक्तृत्वादिना संरक्षतीति तथा स चापि निश्चेतुं निर्णेतुं न शक्नोति न समर्थो भवति ॥११॥ किंपुनरिति। तत्र निर्णये अल्पमेधसः हीतमतयः मनुजाः किं न शक्नुयुरिति तात्पर्यम् ॥ विशेषाद्विशेषतः कलौ युगे नष्टादिषु हृताविस्मृतवस्त्वादिषु च द्रेष्काणादिफलेषु द्रेष्काणा आदयो येषां ते सप्तांशादयः तेषां फलेषु सुखदुःखपूर्णस्वल्पायुर्नष्टवस्तुलाभादिषु ज्ञापकेषु अतीव सर्वथैवेत्यर्थः नैव समर्था भवेयुरित्यर्थः ॥ १२ ॥

भाषा–यह फल संक्षेपरीतिसे पूर्वाचार्योंने वर्णन किया है उस रीतिसे मैंने वर्णन किया ॥ १० ॥ यह ज्योतिःशास्त्र वडा दुर्बोध है इस शास्त्रमें आयुष्यप्रमाणका ज्ञान और लोकोंके सुखदुःखका ज्ञान यह मुख्य प्रयोजन है सो यह आयुर्मान् सुखदुःखका निश्चय करनेको वसिष्ठ व बृहस्पति समर्थ नहीं हैं ॥ ११ ॥ वहां मनुष्य समर्थ कहांसे होवेंगे उसमेंसे और कलियुगमें तो विशेष करके नष्ट, चौर, विस्मृत वस्तु लाभादिक कार्यमें द्रेष्काण, सप्तमांश, नवमांश, नवमांशादिक प्रकारसे यथा "द्रेष्काणैस्तस्करादयः" इत्यादि वचनोंसे फल कहनेको बहुत करके समर्थ न होवेंगे ॥ १२ ॥

आचार्यस्य मुखादेतच्छास्त्रं तु शृणुयाद्बुधः ॥ संप्रदायेन यः श्रांतश्चास्मिञ्च्छास्त्रे महामतिः ॥ १३ ॥

कर्मज्ञानविदा वेदो द्विधा यद्वत्तदाऽऽह्वये ॥ होराशास्त्रं द्विधा प्रोक्तं संकीर्णनिश्चयादिति ॥ १४ ॥

प्रोक्तः संकीर्णभागस्तु निश्चयांशस्तु कथ्यते ॥
यो वेत्ति सम्यगेतत्तु दैवज्ञः स उदाहृतः ॥ १५ ॥

टीका–कथं तर्ह्येतच्छास्त्रस्य सम्यक्परिज्ञानमिति चेत्तदुपायमाह आचार्यस्येति । बुधः व्याकरणन्यायादिवेत्ता आचार्यस्य गुरोर्मुखादेतच्छास्त्रं शृणुयात् न स्वयमेवास्याधिकारीत्यर्थः । एवं प्रकारेण यः संप्रदायेन पारंपर्यागतेन श्रांतः एतज्ज्ञानपरिपाकदशां प्राप्तः "श्रमु पाके" अस्मिञ्छास्त्रे महामतिर्विशालबुद्धिः भवतीति शेषः ॥ १३ ॥ एतच्छास्त्रस्य वेदसाम्यं दर्शयति । कर्मेति । कर्म संध्योपासनादि "अहरहः संध्यामुपासीत" इत्यादि श्रुतिगम्यं, ज्ञानं आत्मज्ञानं "सत्यं ज्ञानमनंतं ब्रह्म" इत्यादिश्रुतिगम्यं, तद्वेत्ति जानातीति कर्मज्ञानवित् तेन कर्मकांडज्ञानकांडपरिनिष्णातेन एकोपि वेदः द्विधा द्विप्रकारकः प्रोक्तः यद्वत् तद्वदेतदपि होराशास्त्रमपि आह्वयेऽभिधास्ये कथं तदाह । होराशास्त्रं ज्योतिःशास्त्रं संकीर्णनिश्चयात् संकीर्णनिश्चयाविति भेदद्वयात् द्विधा एकमपि द्विप्रकारकं प्रोक्तमिति ॥ १४ ॥ उक्तप्रकारौ वक्ष्यमाणरीत्या विशदयति प्रोक्तेति । संकीर्णभागः प्रोक्तः पूर्वार्द्धे इत्यर्थः । अधुना तु निश्चयांशः निर्णयभागः कथ्यते विविच्योच्यते इत्युक्तस्य पुनः कथनावश्यकतापि ध्वनिता यः एतद्द्विप्रकारकं शास्त्रं उक्तं वक्ष्यमाणरूपमित्यर्थः सम्यक् प्रागुक्तरीत्या वेत्ति स एव दैवज्ञः । दैवं दिष्टं जानातीति स तथा उदाहृतः कथित इति ॥ १५ ॥

भाषा–तब यह शास्त्रका परिज्ञान कैसे होवे उस ऊपर कहते हैं:–यह शास्त्र गुरुमुखसे श्रवण करके उसके देखनेमें सर्वदा श्रम करेगा तो उत्तरोत्तर बुद्धि चातुर्य बढेगा ॥ १३ ॥ यह शास्त्र वेदतुल्य है, जैसा वेद कर्ममार्ग, ज्ञानमार्ग, प्रतिपादकतासे दो प्रकारका है वैसा ज्योतिःशास्त्रभी

संकीर्णनिश्चयभेदसे दो प्रकारका कहा है ॥ १४ ॥ उसमें संकीर्ण विषय जो था सो तो पूर्वभागमें वर्णन किया है और निश्चय भाग जो है सो यह उत्तरभागमें कहते हैं, यह दो भेदोंको जो जानता है उसको दैवज्ञ कहना ॥ १५ ॥

भावदृष्ट्यादिषु प्रोक्तानर्थान्सम्यग्विचार्य च ॥ समीचीनांस्तु संगृह्य विरुद्धांस्तु परित्यजेत् ॥ १६ ॥ आयुर्दायैः परं योगैः फलान्यष्टकवर्गतः ॥ तन्वादीनां तु भावानां सूक्तैर्भावादिभिः फलैः ॥ १७ ॥ ज्ञात्वाऽऽदौ करणं स्थानं बिंदुरेखे च वर्गणाम् ॥ क्रमादष्टकवर्गस्य पृथक्कृत्य फलं वदेत् ॥ १८ ॥

टीका-संकीर्णस्योक्तस्य निश्चयज्ञानप्रकारमाह । भावेति । भावास्तन्वादयः दृष्टयः सप्तम्यादिस्थानगम्याः पूर्वोक्ताः ता आदयो येषां तेषु आदिशब्देन बलादिविषयेषु पूर्वोक्तानर्थान् कथितार्थान्सम्यग्विचार्य सूक्ष्मतया विचारं कृत्वा तान्समीचीनान्ग्रहबलाधिक्येनानुकूलानित्यर्थः । संगृह्य संग्रहं कृत्वा विरुद्धान्ग्रहलग्नादिनैर्बल्येन प्रतिकूलानित्यर्थः । तांस्तु परित्यजेज्जह्यादिति ॥ १६ ॥ अथ शुभाशुभफलकथनरीतिमाह । आयुर्दायैरिति । ज्ञात्वेति च आयुर्दायैः आयुषो दाया विभागाः तैः आयुर्मानं विचिंत्येत्यर्थः परं योगैः अत्यंतं स्थानं द्वित्रिगृहादिभिः नाभसादिभिर्नानायोगैः परशब्देनात्यंतबलवद्भिरित्यर्थः । आदौ अष्टकवर्गस्य वक्ष्यमाणस्य क्रमात्करणं स्थानं च वक्ष्यमाणं बिंदुरेखे च करणस्थानापरपर्यायौ बोद्धव्यौ अष्टकवर्गतः सकाशात्तन्वादीनां भावानां द्वादशानां सूक्तैः सम्यक्कथितैर्भावादिभिः फलैः केवलभावादिविचारितैः फलैश्च फलानि सर्वसमूहरूपाणि ज्ञात्वा सम्यग्विचार्य फलं निश्चयोपलब्धं फलं वर्गाणां वक्ष्यमाणलक्षणां च ज्ञात्वा वदेत्कथयेत् ॥ १७ ॥ १८ ॥

भाषा—तन्वादिक जो भाव और सप्तमादिक स्थानगम्य जो दृष्टियोग उसका सूक्ष्म बल विचारकरके उत्तम बलको ग्रहण करके हीनबलका त्याग करना ॥ १६ ॥ आगे शुभाशुभ कैसा कहना सो कहते हैं—पहले आयुष्यका मानपरिज्ञान और नाभसादिक योगफल अष्टवर्गजन्य फल उनका उत्तम बलाबल देखके फल कहना ॥ १७ ॥ १८ ॥

तनुस्वायुस्त्रिरिष्फेषु पंच कामे सुखेर्णवाः अरौ भाग्ये त्रयः पुत्रे षट् करौ खे भवे च भूः ॥ १९ ॥ लग्नेंदुजीवशुक्रज्ञास्तनौ खे मरणेपि च ॥ रविभौमार्किचंद्रार्या व्यये ज्ञेंदुसितार्यकाः ॥ २० ॥ सुखे होरेंदुशुक्राश्च धर्मेकार्किकुजा अरौ ॥ होराज्ञार्येंदवः कामे भवे दैत्येंद्रपूजितः ॥ २१ ॥ सहजेकार्किशुक्रार्यभौमाः खे गुरुभार्गवौ ॥ सुतेर्कार्कीन्दुलग्नारशुक्राः स्युः करणं रवेः ॥२२॥

टीका—पूर्वोक्तायुर्दायादिविषयांतर्गताष्टकवर्गविचारमादौ विशदयति तनुरित्यादि यावदध्यायसमाप्ति । तत्रादौ द्वादशभावेषु रवेः करणप्रदनियतसंख्यामाह । तनुरिति । तनुस्वायुस्त्रिरिष्फेषु १ । २ । ८ । ३ १२ भावेषु करणप्रदाः पंच; कामे सुखे च ७ । ४ भावद्वयेऽर्णवाः करणप्रदाश्चत्वारः, अरौ भाग्ये च ६ । ९ भावद्वये करणप्रदास्त्रयः, पुत्रे ५ भावे करणप्रदाः षट् खे १० भावे करौ करणप्रदौ द्वौ, भवे ११ भावे च भूः १ करणप्रद इति ॥ १९ ॥ पूर्वश्लोके संख्यामुक्त्वा तन्नामान्याह लग्नेत्यादिश्लोकत्रयेण । तनौ १ स्वे २ मरणे ८ एतत्स्थानत्रयेऽपि लग्नेंदुजीवशुक्रज्ञाः एतन्नामकाः करणप्रदाः पंच प्रागुक्तसंख्याकाः, व्यये १२ स्थाने रविभौमार्किचंद्रार्याः आर्यो गुरुः स्पष्टमन्यत् एतन्नामकाः पंच, सुखे ४ स्थाने ज्ञेंदुसितार्यकाः बुधचंद्रशुक्र-

गुरवः एतन्नामकाश्चत्वारः, धर्मे ९ भावे होरेंदुशुक्राः होरा लग्नं स्पष्टमन्यत् एते कारणप्रदास्त्रयः, अरौ ६ भावेऽर्कार्किकुजाः रविशनिभौमाः करणप्रदास्त्रयः; कामे ७ भावे होराज्ञार्येंदवः लग्नबुधगुरुचंद्राः करणप्रदाश्चत्वाराः; भवे ११ भावे दैत्येंद्रपूजितः दैत्यानामिंद्रः राजा वृषपर्वा तेन पूजितः शुक्रः एक एव, सहजे ३ भावे अर्कार्किशुक्रार्यभौमाः रविशनिशुक्रगुरुमंगलाः करणप्रदाः पंच, खे १० भावे गुरुभार्गवौ द्वौ, सुते ५ भावे अर्कार्कीन्दुलग्नारशुक्राः रविशनिचंद्रलग्नकुजशुक्राः करणप्रदाःषट् स्युः भवेयुः एवं रवेः करणं ज्ञेयम् ॥२०॥२१॥२२॥

भाषा—अब अष्टवर्गसे शुभाशुभ फल कहते हैं। अष्टकवर्गमें शून्य और रेखा इसका ज्ञान मुख्य है. इस वास्ते प्रथम सूर्यादिकोंका शून्यज्ञान उपपत्तिपूर्वक कहते हैं. शून्यको इस शास्त्रमें करण कहते हैं सो सूर्यकी करणसंख्या सूर्यसे प्रथम भावमें, धनभावमें, अष्टमभावमें, सहजभावमें, द्वादश भावमें, पांच पांच करण जानना, सातवेंमें और चौथेमें चार चार करण देनेवाला जानना. छठे, नवें भावमें तीन तीन करण देनेवाला जानना, पंचमभावमें छः करण, दशमभावमें दो करण, ग्यारहवें भावमें एक करण देनेवाला जानना ॥ ९९ ॥ ऐसी संख्या कहके नाम कहते हैं. सूर्यसे पहले घरमें, दूसरे घरमें, आठवें घरमें लग्न, चंद्र, गुरु, शुक्र, बुध यह पांच करण देनेवाले हैं. बारहवें भावमें सूर्य, मंगल, शनि, चंद्र, गुरु यह पांच करण देनेवाले हैं. चौथे भावमें बुध, चंद्र, शुक्र, गुरु यह चार करण देनेवाले हैं. नवम भावमें लग्न, चंद्र, शुक्र यह तीन करण देनेवाले हैं. छठे भावमें सूर्य, शनि, मंगल यह तीन करण देनेवाले हैं. सातवें भावमें लग्नेश, बुध, गुरु, चंद्र यह चार करण देनेवाले हैं. ग्यारहवें भावमें शुक्र एक करण देनेवाला है. तीसरे भावमें सूर्य, शनि, शुक्र, गुरु, मंगल यह पांच करण देनेवाले हैं. दशवें भावमें गुरु, शुक्र यह दो करण देनेवाले हैं. पांचवें भावमें सूर्य, शनि, चंद्र, लग्न, मंगल, शुक्र यह छः करण देनेवाले हैं. ऐसी यह सूर्यकी करणसंख्या और नाम कहे इसका चक्रभी स्पष्ट दिखाया है ॥ २० ॥ २१ ॥ २२ ॥

भाग्यस्वयोश्च षड्वेश्म मृतिहोरासु पंच च ॥ मानदुश्चिक्ययोरेकः सुते वेदा अरिस्त्रियोः ॥ २३ ॥ त्रयो व्ययेष्टावाये च शून्यं शीतकरस्य तु ॥ होरार्कारार्किभृगवोंगज्ञार्केन्द्वार्किभार्गवाः ॥ २४ ॥ जीवोर्कार्कीन्दुलग्नारा होरेंदुगुरुभास्करौ ॥ सितज्ञार्याः कुजतनुमंदास्ते सितशीतगुः ॥ २५ ॥

टीका–एवं रविभावकरणसंख्यामुक्त्वा चंद्रभावकरणप्रदसंख्यामाह भाग्येति सार्धश्लोकेन । भाग्यस्वयोः ९।२ भावयोः करणप्रदसंख्या षट्, वेश्ममृतिहोरासु ४ । ८ । १ भावेषु करणप्रदाः पंच, मानदुश्चिक्ययोः १० । ३ भावयोः करणप्रदः एकः, सुते ५ भावे करणप्रदा वेदाश्चत्वारः, अरिस्त्रियोः ६ । ७ भावयोः करणप्रदास्त्रयः, व्यये १२ भावे करणप्रदा अष्टौ, आये ११ भावे शून्यं करणाभावः तु निश्चयेन शीतकरस्य शीताः शीतलाः करा मयूखा यस्य तस्य चंद्रस्यैवं करणं ज्ञेयम् ॥ २३ ॥ एवं चंद्रस्य करणप्रदसंख्यामुक्त्वा तन्नामान्याह होरेत्यादिसार्धपंचविंशतिश्लोकपर्यंतम् । तनौ भावे होरार्कारार्किभृगवः लग्नरविभौमशनिशुक्राः करणप्रदाः पंच, धनभावे अंगज्ञार्केन्द्वार्किभार्गवाः लग्नबुधरविचंद्रशनिशुक्राः करणप्रदाः षट्, तृतीयभावे जीवः गुरुरेक एव, सुखभावे अर्कार्कीन्दुलग्नाराः रविशनिचंद्रलग्नभौमाः पंच, सुतभावे होरेंदुगुरुभास्कराः लग्नचंद्रगुरुसूर्याश्चत्वारः , अरिभावे सितज्ञार्याः शुक्रबुधगुरवः त्रयः, जायाभावे कुजतनुमंदाः त्रयः, मृत्युभावे कुजतनुमंदाः सितशीतगू च भौमलग्नशनिशुक्रचंद्राः पंच, भाग्यभावे होरार्कारार्किविज्जीवाः लग्नरविभौमशनिबुधगुरवः षट्, दशमभावे शनिरेक एव, आयभावे खं करणाऽभावः । व्ययभावे सकलाः सर्वे अष्टसंख्याकाः एवं क्रमाच्चंद्रस्य भावकरणप्रदाः ज्ञातव्या इति ॥ २४ ॥ २५ ॥

भाषा–अब चंद्रकी करण (बिंदु) प्रद संख्या कहते हैं चंद्रसे नवमभावमें दूसरे भावमें, करण देनेवाली संख्या छः जानना. चौथे, आठवें, पहिले भावमें करण देनेवाली संख्या पांच हैं. दसवें तीसरे भावमें करण देनेवाली संख्या एक है, पांचवें भावमें करण देनेवाली संख्या चार हैं, छठे सातवें भावमें करण देनेवाली संख्या तीन हैं, बारहवें भावमें करण देनेवालीसंख्या आठ हैं, ग्यारहवें भावमें करण देनेवाली संख्या नहीं है ॥ २३ ॥ अब वह करण देनेवालेके नाम कहते हैंः–चंद्रसे पहिले घरमें लग्न. सू. मं. श. शुक्र यह पांच करण देनेवाले हैं. दूसरे घरमें लग्न, बु. सू. चं. श. शु. यह छः करण देनेवाले हैं. तीसरे घरमें गुरु एकही है. चौथे घरमें सूर्य श. चं. लग्न मं. यह पांच करण देनेवाले हैं. पांचवें घरमें लग्न, चंद्र, गु. सू. यह चार करण देनेवाले हैं. छठे घरमें शुक्र, बु. गु. यह तीन करण देनेवाले हैं. ७ वें घरमें मं. लग्न, श. यह तीन करण देनेवाले है. आठवें घरमें मं. लग्न, श. चं. यह पांच करण देनेवाले हैं. नववें घरमें ल. सू. मं. श. बु. गु. यह छः करण देनेवाले हैं. दशवें घरमें शनि करण देनेवाला एकही है. ग्यारहवें घरमें करण देनेवाला कोई नहीं. बारहवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र, शनि, लग्न यह ८ करण देनेवाले हैं. इस रीतिसे चंद्रकी करण संख्या और करण देनेवालेके नाम कहे इसका स्पष्ट चक्रभी आगे दिखाया है ॥ २४ ॥ २५ ॥

होरार्कारार्किविज्जीवाः शनिः खं सकलाः क्रमात् ॥
व्ययवेश्मसुतस्त्रीषु षट् सप्त धनधर्मयोः ॥ २६ ॥
होरामृत्य्वोः शरा वेदा विक्रमे खे त्रयः क्षते ॥ द्वौ
भवे शून्यमेवं स्यात्करणं भूमिजस्य तु ॥ २७ ॥

टीका–अथ कुजभावकरणप्रदसंख्यामाह व्यय इत्यादि सप्तविंशतिश्लोकपर्यंतम् । व्ययवेश्मसुतस्त्रीषु १२ । ४ । ५ । ७ भावेषु षट् संख्याकाः, धनधर्मयोः २ । ९ भावयोः सप्त, होरामृत्य्वोः १ । ८

भावयोः शराः पंच, विक्रमे ३ भावे वेदाश्चत्वारः, खे १० भावे त्रयः क्षते ६ भावे द्वौ, भवे ११ भावे शून्यं० एवं भूमिजस्य भौमस्य तु करणं करणसंख्या स्यात् ॥ २६ ॥ २७ ॥

भाषा–अब मंगलकी करण (बिंदु) देनेवालेकी संख्या कहते हैं:– मंगलसे बारहवें, चौथे, पांचवें, सातवें भावमें छः करण देनेवाली संख्या जाननी. दूसरे नववें भावमें सात, पहिले आठवें भावमें पांच, तीसरे भावमें चार, दूसरे भावमें तीन, छठे भावमें दो, ग्यारहवें भावमें कोईभी नहीं. यह मंगलके बारह भावोंकी बिंदु संख्या कही ॥ २६ ॥ २७ ॥

कुजस्यार्केंदुविज्जीवासिता लग्नशनी च ते ॥ सितारगुरुमंदाः स्युर्धर्मोक्तेषु कुजं विना ॥ २८ ॥ चंद्रारगुरुशुक्रार्किलग्नानि कुजभास्करी ॥ ज्ञेंद्वर्कसितलग्नार्या एषु शुक्रं विना ततः ॥ २९ ॥ विना शनिं सप्तधर्मे सितेन्दुज्ञा वियत्ततः ॥ अर्कार्किज्ञेंदुलग्नाराः करणं प्रोच्यते क्रमात् ॥ ३० ॥

टीका–एवं भौमभावकरणप्रदसंख्यामुक्त्वा तन्नामान्याह । कुजस्येत्यादिश्लोकत्रयेण । तनुभावे अर्केन्दुविज्जीवासिताः रविचंद्रबुधगुरुशुक्राः पंच, धनभावे लग्नशनी स्पष्टौ ते तनुभावोक्ताश्च अर्केंदुविज्जीवसितलग्नशनयः सप्त, सहजभावे सितारगुरुमंदाः शुक्रभौमगुरुशनयश्चत्वारश्चतुश्चतुर्थभावे धर्मोक्तेषु नवमस्थानवक्ष्यमाणेषु कुजं विना स्युः । रविचंद्रबुधगुरुशुक्रलग्नानीत्यर्थः षट्, सुतभावे चंद्रारगुरुशुक्रार्किलग्नानि षट्, रिपुभावे कुजभास्करी भौमशनी द्वावेव, जायाभावे ज्ञेन्द्वर्कसितलग्नार्याः बुधचंद्ररविशुक्रलग्नगुरवः षट्, मृत्यु भावे एषु जायाभावोक्तेषु शुक्रं विना शुक्राद्दते बुधचंद्ररविलग्नगुरव इत्यर्थः पंच, ततः तदनंतरं धर्मे भावे शनिं विना रविचंद्रभौमबुध

गुरुशुक्रलग्नानि सप्तसंख्याकाः, दशमभावे सितेन्दुज्ञाः शुक्रचंद्रबुधाः त्रयः, ततः आयभावे वियच्छून्यं० करणाभाव इत्यर्थः, व्ययभावे अर्कार्किज्ञेंदुलग्नाराः रविशनिबुधचंद्रलग्नभौमाः षट् एवं क्रमात् क्रमशः कुजस्य करणं प्रोच्यते कथ्यते पूर्वाचार्यैरिति शेषः२८॥२९॥३०

भाषा–अब बिंदु देनेवालेके नाम कहते हैंः–मंगलसे पहिले घरमें सू. चं. बु. गु. शु. यह पांच बिंदु देनेवाले हैं. दूसरे घरमें लग्न, शनि, सूर्य, चंद्र, बुध, गुरु, शुक्र, यह सात बिंदु देनेवाले हैं. तीसरे घरमें शुक्र, मंगल, गुरु, शनि यह चार हैं. चौथे घरमें सूर्य, चंद्र, बुध, गुरु, शुक्र, लग्न, यह छः हैं. पाचवें घरमें चंद्र, मंगल, गुरु, शुक्र, शनि, लग्न यह छः हैं. छठे घरमें मंगल, शनि यह दो हैं. सातवें घरमें बुध, चंद्र, सूर्य, शुक्र, गुरु, लग्न यह छः हैं. आठवें घरमें बुध, चंद्र, सूर्य, गुरु, लग्न, यह पांच हैं. नववें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र, लग्न, यह सात हैं. दशवें घरमें शुक्र, चंद्र, बुध, यह तीन हैं. ग्यारहवें घरमें कोई नहीं है. बारहवें घरमें सूर्य, शनि, बुध, चंद्र, लग्न, मंगल यह छः हैं. ऐसा मंगलके भावोंमें करण संख्या इत्यादिकका चक्र यहां दिखाया है ॥ २८ ॥ २९ ॥ ३० ॥

अथोदाहरणार्थं मंगलकरणकोष्ठकम्.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.	०	०		०	०	०			५
२	द्वि.	०	०		०	०	०	०	०	७
३	तृ.			०		०	०	०		४
४	च.	०	०		०	०	०		०	६
५	पं.		०	०		०	०	०	०	६
६	ष.			०				०		२
७	स.	०	०		०	०	०		०	६
८	अ.	०	०		०	०			०	५
९	न.	०	०	०	०	०	०		०	७
१०	द.		०		०		०			३
११	ए.									०
१२	द्वा.	०	०	०	०			०	०	६

तनुस्वगृहकर्मारिधर्मेष्वग्निर्मृतौ करौ ॥ मातृस्त्रियोरसा लाभे शून्यं पुत्रे व्यये शराः ॥ ३१ ॥ बुधस्याकेन्दुगुरवो गुरुसूर्यबुधाः क्रमात् ॥ लग्नार्कारार्किचं-

द्रार्या ज्ञार्कार्या हि बुधस्य तु ॥ ३२ ॥ जीवारेन्द्वार्किलग्नानि शुक्रमंदधरासुताः ॥ ज्ञेन्दुलग्नार्कशुक्रार्या ज्ञार्कौ जीवेन्दुलग्नकाः ॥ ३३ ॥

टीका–अथ बुधभावकरणप्रदसंख्यामाह । तन्विति । तनुस्वगृहकर्मारिधर्मेषु १ । २ । ४ । १० । ६ । ९ एतेषु गृहभावेषु अग्निः त्रयः करणप्रदाः, मृतौ ८ भावे करौ द्वौ करणप्रदौ, भ्रातृस्त्रियोः ३ । ७ भावयोः रसाः षट्, लाभे ११ भावे शून्यं करणप्रदाभावः, पुत्रे ५ व्यये च १२ भावद्वयेपि शराः पञ्चेति ॥ ३१ ॥ एवं करणप्रदसंख्यामुक्त्वा बुधस्य भावकरणप्रदनामान्याह । बुधस्येति सार्द्धद्वयेन । तनुभावेऽर्केन्दुगुरवः स्पष्टा एते करणप्रदास्त्रयः, धनभावे गुरुसूर्यबुधाः स्पष्टं एते करणप्रदास्त्रयः, सहजभावे लग्नार्कारार्किचंद्रार्याः लग्नरविभौमशनिचंद्रगुरव एते करणप्रदाः षट्, सुखभावे ज्ञार्कार्याः बुधरविगुरवः एते करणप्रदाः त्रयः, सुतभावे जीवारेन्द्वार्किलग्नानि गुरुभौमचन्द्रशनिलग्नानि एते करणप्रदाः पंच, रिपुभावे शुक्रमंदधरासुताः एते करणप्रदाः त्रयः, जायाभावे ज्ञेन्दुलग्नार्कशुक्रार्याः बुधचंद्रलग्नरविशुक्रगुरवः एते करणप्रदाः षट्, मृत्युभावे ज्ञार्कौ बुधसूर्यौ करणप्रदौ द्वौ, धर्मभावे जीवेन्दुलग्नकाः गुरुचंद्रलग्नानि करणप्रदास्त्रयः, दशमभावे अर्कार्यशुक्राः रविगुरुशुक्राः करणप्रदास्त्रयः, आयभावे शून्यं करणप्रदाभावः, व्ययभावे होरेंद्वारार्किभार्गवाः लग्नचंद्रभौमशनिशुक्राः एते करणप्रदाः पंच, एवं बुधस्य भावेषु क्रमात् करणप्रदा ज्ञेया इति ॥ ३२ ॥ ३३ ॥

भाषा–अब बुधके भावमें करण (बिन्दु) देनेवालेकी संख्या कहते हैं:–बुधसे पहिले, दूसरे, चौथे, दशवें, छठे, नवें, घरमें तीन करण देनेवालेकी

संख्या जाननी. आठवेंमें दो, तीसरे, सातवें घरमें छः ग्यारहवें घरमें कुछ नहीं पांचवें बारहवें घरमें पांच करण देनेवालेकी संख्या जाननी ॥ ३१ ॥ ऐसी करण देनेवालेकी संख्या कहके अब उनके नाम कहते हैं. बुधसे पहिले घरमें सूर्य, चंद्र, गुरु, यह तीन करण देनेवाले हैं. धनभावमें गुरु, सूर्य बुध यह तीन करण देनेवाले हैं. तीसरे घरमें लग्न, सूर्य, शनि, चंद्र, मंगल, गुरु यह छः करण देनेवाले जानना. चौथे घरमें बुध, सूर्य, गुरु, तीन करण देनेवाले जानना. पांचवें घरमें गुरु, मंगल, चंद्र, शनि, लग्न यह पांच करण देनेवाले जानना. छठे घरमें शुक्र, शनि, मंगल यह तीन करण देनेवाले हैं. सातवें घरमें बुध, चंद्र, लग्न, सूर्य, शुक्र, गुरु, यह छः करण देनेवाले हैं. आठवें घरमें बुध सूर्य, यह दो करण देनेवाले हैं. नववें घरमें गुरु, चंद्र, लग्न यह तीन करण देनेवाले हैं. दशवें घरमें सूर्य, गुरु, शुक्र यह तीन करण देनेवाले हैं. ग्यारहवें घरमें करण देनेवाला नहीं है. बारहवें घरमें लग्न, चंद्र, मंगल, शनि, शुक्र, यह पांच करण देनेवाले हैं. ऐसी बुधके भावोंमें करण देनेवालोंकी संख्या और नाम कहे उसका चक्रभी दिखाया है ॥ ३२ ॥ ३३ ॥

अथोदाहरणार्थं बुधकरणकोष्ठकम्.

	था.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.	०	०			०				३
२	द्वि.	०			०	०				३
३	तृ.	०	०	०		०		०	०	६
४	च.	०			०	०				३
५	पं.		०	०		०		०	०	५
६	ष.			०			०	०		३
७	स.	०	०		०	०	०		०	६
८	अ.	०			०					२
९	न.		०			०				२
१०	द.	०				०	०			३
११	ए.									०
१२	द्वा.		०	०			०	०	०	५

अर्कार्यशुक्राः शून्यं च होरेन्द्वारार्किभार्गवाः ॥ रूपं धनाययोःखे द्वौ व्यये सप्तकृतेऽर्णवाः ॥ ३४ ॥

टीका–अथ गुरुभावकरणप्रदसंख्यामाह । रूपमित्याद्यर्धकद्वयेन । धनाययोः २।११ भावयोः रूपम् एक एव करणप्रदः, खेः १० दशमभावे द्वौ करणप्रदौ, व्यये १२ भावे सप्त करणप्रदाः, कृते ६

भावे अर्णवाः चत्वारः करणप्रदाः, मृतिविक्रमयोः ८।३ भावयोः करणप्रदाः पंच, शेषेषु उक्तावशिष्टभावेषु १।४।५।७।९। एतेषु भावेषु वह्नयस्त्रयः, इति गुरोः भावेषु संख्या ज्ञेया ॥ ३४ ॥

भाषा—अब गुरुके भावमें करण (बिन्दु) देनेवालेकी संख्या कहते हैं. गुरुसे दूसरे, ग्यारहवें भावमें एक करण देनेवालेकी संख्या जाननी. दशवें घरमें दो हैं, बारहवें घरमें सात हैं. छठे घरमें चार हैं. आठवें, तीसरे घरमें पांच हैं. पहिले, चौथे, पांचवें, सातवें, नववें, घरोंमें तीन करण देनेवालेकी संख्या जानना ॥ ३४ ॥

मृतिविक्रमयोः पंच गुरोः शेषेषु वह्नयः ॥ शुक्रेन्दुमंदा लग्ने स्व आये मंदश्च विक्रमे ॥ ३५ ॥ लग्नारेन्दुज्ञभृगवः सुतेर्कार्यकुजा गृहे ॥ शुक्रमंदेंदवो द्यूने बुधशुक्रशनैश्चराः ॥ ३६ ॥ जीवारार्केन्दवः शत्रौ मंदं सर्वे विना व्यये ॥ कर्मणीन्दुशनी धर्मे मंदारगुरवो मृतौ ॥ ३७ ॥

टीका-एवं करणप्रदसंख्यामुक्त्वा तन्नामान्याह शुक्रेन्द्वित्यादि सार्धसप्तत्रिंशच्छ्लोकपर्यन्तम् । लग्ने १ भावे शुक्रेन्दुमंदाः शुक्रचंद्रशनयः त्रयः, स्वे २ भावे आये ११ भावे च मन्दः शनिरेक एव, विक्रमे ३ भावे लग्नारेन्दुज्ञभृगवः लग्नभौमचन्द्रबुधशुक्राः पंच, सुते ५ भावे अर्कार्यकुजाः रविगुरुभौमास्त्रयः, गृहे ४ भावे शुक्रमन्देन्दवः शुक्रशनिचंद्रास्त्रयः, द्यूने ७ भावे बुधशुक्रशनैश्चराः त्रयः, शत्रौ ६ भावे जीवारार्केन्दुभृगवः गुरुभौमचन्द्रशुक्राश्चत्वारः, व्यये १२ भावे शनिं विना सर्वे, कर्मणि १० भावे इन्दुशनी चन्द्रशनी द्वौ, धर्मे ९ भावे मंदारगुरवः शनिभौमगुरवः त्रयः, मृतौ ८ भावे लग्नार्कसितचन्द्रज्ञाः लग्नशनिशुक्रचन्द्रबुधाः पंच, एवं इदमुक्तप्रकारकं गुरोः करणं ज्ञेयमिति शेषः ॥ ३५ ॥ ३६ ॥ ३७ ॥

भाषा—ऐसी करणप्रदोंकी संख्या कहके उन्होंके नाम कहते हैं गुरुके पहिले घरमें शुक्र, चंद्र, शनि, यह तीन करण देनेवाले जानना. दूसरे घरमें, ग्यारहवें घरमें शनि एकही करण देनेवाला है. तीसरे घरमें लग्न, मंगल, चंद्र, बुध, शुक्र, यह पांच करण देनेवाले जानना. पांचवें घरमें सूर्य, गुरु, मंगल, यह तीन करण देनेवाले जानना. चौथ घरमें शुक्र,शनि, चंद्र, यह तीन हैं. छठे घरमें गुरु, मंगल, चंद्र, शुक्र, यह चार हैं. बारहवें घरमें सूर्य, चंद्र मंगल, बुध गुरु, शुक्र, लग्न यह सात करण देनवाले हैं. दशवें घरमें चंद्र, शनि, यह दो हैं. नवमें घरमें शनि, मंगल, गुरु, यह तीन हैं. आठवें घरमें लग्न, शनि, शुक्र, चंद्र, बुध, यह पांच करण देनेवाले हैं. ऐसी गुरुभावकी करणसंख्या और नाम कहे. उसका स्पष्ट चक्र ऊपर दिखाया है। ३५।३६।३७।

अथोदाहरणार्थं गुरुकरणकोष्ठकम्.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.		०				०	०		३
२	द्वि.							०		१
३	तृ.		०	०	०		०	०		५
४	च.		०				०	०		३
५	पं.	०		०		०				३
६	ष.		०	०		०	०			४
७	स.				०		०	०		३
८	अ.		०		०		०	०	०	५
९	न.	०								१
१०	द.	०	०	०	०				०	५
११	ए.									०
१२	द्वा.		०		०	०	०	०	०	५

लग्नार्किसितचंद्रज्ञाः करणं च गुरोरिदम् ॥ सुतायुर्विक्रमेष्वाक्षितनुस्वव्ययखेष्विषुः ॥ ३८ ॥ अष्टौ त्रियामरौ षड्भूर्धर्मे मित्रेऽग्निखं भवे ॥ लग्ने स्वेऽर्कारविज्जीवमंदाः सर्वे च कामभे ॥ ३९ ॥ अर्कार्यौ विक्रमस्थाने सुतेऽर्कारौ शुभे रविः ॥ सुखेऽर्कबुधजीवाः स्युर्भौमजौ मृत्तिभे द्विज ॥ ४० ॥ शुक्रार्केन्द्वार्किलग्नार्याः शत्रौ शून्यं भवे व्यये ॥ होरार्किबुधशुक्रार्यास्तन्वारज्ञेन्द्विनाश्च खे ॥ ४१ ॥

टीका—अथ शुक्रभावकरणप्रदसंख्यामाह—सुतायुरित्यर्द्धकद्वयेन ।

सुतायुर्विक्रमेषु ५ । ८ । ३ भावेषु अक्षीति लुप्तविभक्तिकं पदं अक्षिणीत्यर्थः । करणप्रदसंख्या अक्षिशब्देन द्वौ, तनुस्वव्ययखेषु १ । २ । १२ । १० भावेषु इषु करणप्रदाः पंचः स्त्रियां ७ भावेऽष्टौ, अरौ ६ भावे षट्; धर्मे ९ भावे भूरेकः, मित्रे ४ भावे अग्नीत्यपि, लुप्तविभक्तिकम् अग्नयस्त्रय इत्यर्थः । भवे ११ भावे खं शून्यं करणप्रदाभावः ॥ ३८ ॥ एवं संख्यामुक्त्वा नामान्याह–लग्नइत्यादिसार्धद्वयेन । लग्ने १ स्वे २ भावद्वये अर्कारविज्जीवमंदाः रविभौमबुधगुरुशनयः करणदाः पंच, कामभे ७ भावे सर्वेऽष्टावपि, विक्रमस्थाने ३ भावे अर्कार्यौ रविगुरू द्वौ सुते ५ भावे अर्कारौ रविभौमौ द्वौ, शुभ ९ भावे रविरेक एव सुखे ४ भावे अर्कबुधजीवाः स्पष्टं, मृतिभे ८ भावे भौमज्ञौ द्वौ, शत्रौ ६ भावे शुक्रार्केन्द्वार्किलग्नार्याः शुक्ररविचंद्रशनिलग्नगुरवः षट्, भवे ११ भावे शून्यं करणप्रदाभावः, व्यये १२ भावे होरार्किबुधशुक्रार्याः लग्नशनिबुधशुक्रगुरवः पंच, खे १० भावे तन्वारज्ञेंद्विनाः लग्नभौमबुधचंद्ररवयः पंच करणप्रदाः, हे द्विज हे मैत्रेय ! स्युर्भवेयुरित्यन्वयः ॥ ३९ ॥ ॥ ४० ॥ ४१ ॥

भाषा–अब शुक्रके भावमें करण (बिंदु) देनेवालेकी संख्या कहते हैं. शुक्रसे पांचवें तीसरे घरमें दो बिंदु देनेवालेकी संख्या है. पहिले, दूसरे, बारहवें दसवें घरमें पांच बिंदु देनेवालेकी संख्या है. सातवें घरमें आठ बिंदु हैं. छठे घरमें छः बिंदु हैं. नवें घरमें एक बिंदु है. चौथे घरमें तीन करण हैं. ग्यारहवें घरमें करणसंख्या नहीं है ॥ ३८ ॥ करण देनेवाले ग्रहोंके नाम कहते हैं. पहिले दूसरे घरमें सूर्य, मंगल, गुरु, बुध, शनि, यह

अथ उदा० शुक्रकरणकोष्ठकम्.

गृ०	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.	०		०	०	०		०		५
२	द्वि.	०		०	०	०		०		५
३	तृ.	०				०				२
४	च.	०			०	०				३
५	पं.	०		०						२
६	ष.	०	०			०	०	०	०	६
७	स.	०	०	०	०	०	०	०	०	८
८	अ.			०	०					२
९	न.	०								१
१०	द.	०	०	०	०				०	५
११	ए.									०
१२	द्वा.				०	०	०	०	०	५

पांच करण देनेवाले जानना. सातवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र, शनि, लग्न यह आठ करण देनेवाले हैं. तीसरे घरमें सूर्य, गुरु, यह, दो करण देनेवाले हैं. पांचवें घरमें सूर्य, मंगल, दो हैं. नववें घरमें सूर्य बुध, गुरु, यह तीन हैं. आठवें घरमें मंगल, बुध, दो हैं. छठे घरमें शुक्र, सूर्य, चंद्र शनि, लग्न, गुरु, यह छः हैं. ग्यारहवें घरमें करण देनेवाला नहीं है, बारहवें घरमें लग्न, शनि, बुध, शुक्र, गुरु, यह पांच हैं. दसवें घरमें लग्न, मंगल, बुध, चंद्र, सूर्य, यह पांच हैं. ऐसे शुक्रभावके बिंदु देनेवालेकी संख्या और नाम कहे. यहां चक्र स्पष्ट लिखा है ॥ ३९ ॥ ४० ॥ ४१ ॥

स्वस्त्रीधर्मेषु सप्तांगं मृतिहोरागृहेषु च ॥ आज्ञा भ्रातृव्यये वेदा रूपं शत्रौ सुते शराः ॥ ४२ ॥ आये शून्यं शनेरेवं करणं प्रोच्यते बुधैः ॥ गृहे तनौ च लग्नार्कौ स्वास्त्रियोश्च रविं विना ॥ ४३ ॥ हित्वा धर्मे बुधं माने लग्नाररविचंद्रजान् ॥ ततो भ्रातरि जीवार्कबुधशुक्राः क्षते रविः ॥ ४४ ॥ व्यये लग्नेंदुमंदार्काः सितार्केन्दुज्ञलग्नकाः ॥ सुते मृतौ बुधार्कौ च हित्वाऽऽये खं शनेर्विंदः ॥ ४५ ॥

टीका–अथ शनिभावकरणप्रदसंख्यामाह स्वेति सार्धेन । स्वस्त्रीधर्मेषु २ । ७ । ९ भावेषु करणप्रदाः सप्त, मृतिहोरागृहेषु ८ । १ । ४ भावेषु अंगं षट् आज्ञाभ्रातृव्यये समाहारद्वंद्वः १०।३।१२ वेदाः चत्वारः शत्रौ ६ भावे रूपम् एक एव, सुते ५ भावे शराः पंच, आये ११ भावे शून्यं करणप्रदाभावः एवं शनेःकरणं बुधैः प्रोच्यते इति ॥ ४२॥ इति संख्यामुक्त्वा शनिभावकरणप्रदानामान्याह–गृहे इत्यादि पंचचत्वारिंशश्लोकपर्यंतम् । गृहे तनौ च ४ । १ भावद्वये लग्नार्कौ विना लग्नसूर्यर-

हिताः सर्वे नामकरणदाः षट्, स्वस्त्रियोः २ । ७ भावयोः रविं विना रविरहिताः करणदाः सप्त, धर्मे ९ भावे बुधं हित्वा शेषाः करणदाः सप्त, माने १० भावे लग्नाररविचंद्रजान्विना चन्द्रगुरुशुक्रशनयश्चत्वारः ततो भ्रातरि ३ भावे जीवार्कबुधशुक्राः चत्वारः, क्षते ६ भावे रविः एक एव, व्यये १२ भावे लग्नेन्दुमन्दार्काः स्पष्टं करणदाश्चत्वारः, सुते ५भावे सिताऽर्केन्दुज्ञलग्नकाः शुक्ररविचंद्रबुधलग्नानि करणदाः पंच, मृतौ ८ भावे बुधार्कौ हित्वा अवशिष्टाः षट्, आये ११ भावे करणप्रदाभावः एवं करणप्रदाः शनेः विदुः पूर्वाचार्या इति शेषः । तनुकरणं तु चतुःषष्टितमे श्लोके वक्ष्यते ॥ ४३ ॥ ४४ ॥ ४५ ॥

भाषा–अब शनिके भावमें करणबिंदु देनेवालेकी संख्या कहते हैं. शनिसे दूसरा, सातवां, नवम घरमें सात बिंदु देनेवालेकी संख्या है. दसवें, तीसरे, बारहवें घरमें चार बिंदु देनेवालेकी संख्या है. छठे घरमें एक बिन्दु देनेवालेकी संख्या है. पांचवें घरमें पांच बिंदु देनेवालेकी संख्या हैं ग्यारहवें घरमें बिंदु देनेवाला नहीं है. ऐसी शनिकी करणसंख्या कही ॥ ४२ ॥ अब बिंदु देनेवालेके नाम कहते हैं. शनिसे चौथे पहिले घरमें चंद्र, मंगल, बुध, गुरु, शुक्र, शनि यह छः बिंदु देनेवाले जानना. दूसरे सातवें घरमें चंद्र, मंगल. बुध, गुरु, शुक्र, शनि, लग्न यह सात बिंदु देनेवाले हैं. नवमें घरमें सूर्य, चंद्र, मंगल, गुरु, शुक्र, शनि, लग्न यह सात बिंदु देनेवाले हैं. दसवें घरमें चंद्र, गुरु, शुक्र, शनि यह चार बिंदु देनेवाले हैं. तीसरे घरमें गुरु,

अथोदाहरणार्थं शनिबिंदु कोष्ठकम्.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.		०	०	०	०	०	०		६
२	द्वि.		०	०	०	०	०	०	०	७
३	तृ.	०			०	०	०			४
४	च.		०	०	०	०	०			६
५	पं.	०	०		०		०		०	५
६	ष.	०								१
७	स.		०	०	०	०	०	०	०	७
८	अ.		०	०		०	०	०	०	६
९	न.	०	०	०		०	०	०	०	७
१०	द.		०			०	०	०		४
११	ए.									०
१२	द्वा.	०	०					०	०	४

सूर्य, बुध, शुक्र, यह चार बिंदु देनेवाले हैं. छठे घरमें सूर्य एकही बिंदु देनेवाले हैं. बारहवें घरमें लग्न, चंद्र, शनि, सूर्य यह चार बिंदु देनेवाले हैं. पांचवें घरमें शुक्र, सूर्य, चंद्र, बुध, लग्न, यह पांच बिंदु देनेवाले हैं. आठवें घरमें चंद्र, मंगल, गुरु, शुक्र, शनि, लग्न यह छः बिंदु देनेवाले हैं. ग्यारहवें घरमें बिंदु देनेवाले नहीं हैं. ऐसी शनिभावकी बिंदु देनेवालेकी संख्या और नाम कहे. इसका चक्र यहां लिखा है लग्नके बिंदुका भेद आगे रेखाके सहित बतावेंगे ॥ ४३ ॥ ४४ ॥ ४५ ॥

उक्ताऽन्ये स्थानदातार इति स्थानं विदुर्बुधाः ॥ अथ
स्थानग्रहान्वक्ष्ये सुखबोधाय सूरिणाम् ॥ ४६ ॥
स्वायुस्तनुषु मंदारसूर्याजीवबुधौ सुते ॥ विक्रमे
ज्ञेन्दुलग्नानि लग्नार्कार्किकुजा गृहे ॥ ४७ ॥ ते च
ज्ञेन्दुस्वभेचाऽऽये सर्वे शुक्रं विना व्यये ॥ लग्नशुक्र
बुधाः शत्रौ ते च जीवसुधाकरौ ॥ ४८ ॥

टीका-अथ संक्षेपतः स्थानान्याह-उक्तान्ये इत्यर्धेन । पूर्वोक्तप्रकरणे ये करणप्रदा उक्ताः तेभ्योऽन्ये नामशेषाः स्थानदातारः स्थानप्रदा बोध्याः । इति एवं प्रकारेण बुधाः विद्वांसः स्थानं रेखापरपर्यायं विदुः । एवं संक्षेपेणोक्त्वा विस्तरेण वक्तुमारभते-अथेत्यादि त्रिषष्टिश्लोकपर्यंतम् । अथेत्यनंतरं सूरीणां विदुषां सुखबोधाय सुगमज्ञानाय स्थानग्रहान् रेखापरपर्यायस्थानप्रदग्रहान् वक्ष्ये कथयामि ॥४६॥ अथादौ रविभावस्थानप्रदान् ग्रहानाह-स्वायुरित्यादिसार्धाष्टचत्वारिंशच्छ्लोकपर्यंतम् ॥ स्वायुस्तनुषु २ । ८ । १ भावेषु मंदारसूर्याः शनिभौमरवयः स्थानप्रदा रेखाप्रदा इति शेषः । त्रयो बोध्याः, सुते ५ भावे जीवबुधौ रेखाप्रदौ, विक्रमे ३ भावे ज्ञेन्दुलग्नानि बुधचंद्रलग्नानि त्रीणि, गृहे ४ भावे लग्नार्कार्किकुजाः लग्नरविशनिभौमाः चत्वारः,

खभे १० भावे ते च ज्ञेन्दुलग्नार्कार्किकुजज्ञेन्दवः षट्, आये ११ भावे शुक्रं विना सर्वे शुक्ररहिताः सप्त, व्यये १२ भावे लग्नशुक्रबुधास्त्रयः, शत्रौ ६ भावे ते च तौ जीवसुधाकरौ लग्नशुक्रबुधगुरुचंद्राः पंच, द्यूने ७ भावे अर्कारार्किशुक्राः सूर्यभौमशनिशुक्राः चत्वारः, धर्मे ९ भावे अर्कारार्किविद्गुरुः सूर्यभौमशनिबुधैः सहितो गुरुः, नाम इमे पंच, अत्र एकवचनं पुंस्त्वं चार्षम् । एवं रविभावरेखाप्रदा बोध्याः ॥ ४७ ॥ ४८ ॥

भाषा–ऐसा सूर्यादि सात सात ग्रहोंके बिंदुओंका निर्णय कहके आगे सूर्यादिकोंके भावोंके रेखानिर्णय कहते हैं. जो पूर्व बिंदु देनेवाले यह कहे उनसे शेष ग्रह जो रहैं वे रेखा देनेवाले हैं. ऐसे संक्षेपसे कहा विस्तारसे आगे कहते हैं ॥ ४६ ॥ अथ सूर्यके बारह भावोंमें स्थान (रेखा) कहते हैं. स्थानरेखाका नाम है सो रेखा देनेवालेके नाम कहते हैं. सूर्यसे दूसरा आठवां पहिला, इन घरोंमें शनि मंगल, सूर्य यह तीन रेखा देनेवाले हैं. पांचवें घरमें गुरु, बुध यह दो रेखा देनेवाले हैं तीसरे घरमें बुध, चंद्र, लग्न रेखा देनेवाले हैं. चौथे घरमें लग्न, सूर्य शनि, मंगल रेखा देनेवाले हैं. दसवें घरमें लग्न, सूर्य, मंगल, शनि, बुध, चंद्र रेखा देनेवाले हैं. ग्यारहवें घरमें सूर्य; चन्द्र, मंगल, बुध, गुरु, शनि लग्न रेखा देनेवाले हैं. बारहवें घरमें लग्न, शुक्र, बुध, रेखा देनेवाले हैं. छठे घरमें लग्न, शुक्र, बुध, गुरु, चंद्र रेखा देनेवाले हैं. सातवें घरमें सूर्य, मंगल, शनि, शुक्र रेखा देनेवाले हैं. नवमें

अथ उदाहरणार्थ सूर्यरेखाचक्रम्.

गृ०	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.	।		।				।		३
२	द्वि.	।		।				।		३
३	तृ.		।		।				।	३
४	च.	।		।				।	।	४
५	पं.				।	।				२
६	ष.		।		।	।	।		।	५
७	स.	।		।			।	।		४
८	अ.	।		।				।		३
९	न.	।		।	।	।		।		५
१०	द.	।	।	।	।			।	।	६
११	ए.	।	।	।	।	।		।	।	७
१२	द्वा.			।	।		।		।	४

घरमें सूर्य, मंगल, शनि, बुध, गुरु, रेखा देनेवाले हैं. यह सूर्य भावकी रेखा कही यहां चक्र स्पष्ट लिखा है ॥ ४७ ॥ ४८ ॥

द्यूनेऽर्कारार्किशुक्राश्च धर्मेर्कारार्किविद्गुरुः ॥ ज्ञेन्दु
जीवाः कुजार्यौं ज्ञार्केन्द्वारार्कितनूशनाः ॥ ४९ ॥
जीवशुक्रबुधा भौमबुधशुक्रशनैश्चराः ॥ रवीन्द्वारार्किलग्नानि
रवीन्द्वार्यज्ञभार्गवाः ॥ ५० ॥ अर्कज्ञजीवाः
शुक्रेन्दू ते च तौ लग्नभूसुतौ ॥ सर्वे शून्यं
क्रमात्प्रोक्तं स्थानं शीतकरस्य च ॥ ५१ ॥

टीका-अथ चन्द्रभावरेखाप्रदानाह-ज्ञेन्दित्याद्येकपंचाशच्छ्लोकपर्यंतम् । तनु १ भावे ज्ञेन्दुजीवाः बुधचन्द्रगुरवः त्रयः, धन भावे कुजार्यौं भौमगुरू द्वौ, सहज ३ भावे ज्ञार्केन्द्वारार्कितनूशनाः बुधरविचन्द्रभौमशनिलग्नसहित उशनाः शुक्रः एते सप्त, सुख ४ भावे जीवशुक्रबुधाः त्रयः, सुत ५ भावे भौमबुधशुक्रशनैश्चराः चत्वारः, रिपुभावे रवीन्द्वारार्किलग्नानि रविचंद्रभौमशनिलग्नानि पंच, जाया भावे रवीन्द्वार्यज्ञभार्गवाः पंच, मृत्युभावे अर्कज्ञजीवाः त्रयः, धर्मभावे शुक्रेन्दू द्वौ, कर्मभावे ते च मृत्युभावोक्ताः तौच धर्मभावोक्तौ लग्नभूसुतौ च नाम अर्कज्ञजीवशुक्रेन्दुलग्नभूसुताः सप्त, आये भावे सर्वे अष्टावपि, व्ययभावे शून्यं रेखाप्रदाभावः । इति शीतकरस्य चंद्रस्य स्थानं प्रोक्तम् स्थानान्युक्तानीति तदर्थः ॥ ४९ ॥ ॥ ५० ॥ ५१ ॥

भाषा-अब चंद्रके बारह भावोंमें रेखा देनेवाले नाम कहते हैं. चन्द्रसे पहिले घरमें बुध, चंद्र, गुरु रेखा देनेवाले हैं. दूसरे घरमें मंगल, गुरु रेखा देनेवाले हैं. तीसरे घरमें बुध, सूर्य, चन्द्र, मंगल, शनि, लग्न, शुक्र रेखा

देनेवाले हैं. चौथे घरमें गुरु, शुक्र, बुध रेखा देनेवाले हैं. पांचवे घरमें मंगल, बुध, शुक्र, शनि, रेखा देनेवाले हैं. छठे घरमें सूर्य, मंगल, शनि, लग्न रेखा देनेवाले हैं. सातवें घरमें सूर्य, चंद्र, गुरु, बुध, शुक्र, रेखाप्रद हैं. आठवें घरमें सूर्य, बुध, गुरु, रेखा देनेवाले हैं, नवें घरमें शुक्र, चंद्र, दो, दसवें घरमें सूर्य, बुध, गुरु, शुक्र, चन्द्र, लग्न, मंगल, रेखा देनेवाले हैं. ग्यारहवें घरवें, सूर्य, चंद्र, मंगल, बुध, शुक्र, शनि, लग्न, रेखा देनेवाले हैं बारहवें घरमें कोई नहीं हैं, ऐसी चंद्रभावकी रेखा कही. स्पष्ट चक्र लिखा है ॥ ४९ ॥ ५० ॥ ५१ ॥

अथ उदा० चन्द्ररेखाकोष्ठकम्.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	त.		।		।	।				३
२	द्वि.			।		।				२
३	तृ.	।	।	।	।		।	।	।	७
४	च.				।	।	।			३
५	पं.			।	।		।			४
६	ष.	।	।	।				।	।	५
७	स.	।	।		।	।	।			५
८	अ.	।			।	।				३
९	न.		।				।			२
१०	द.	।	।	।	।	।	।		।	७
११	ए.	।	।	।	।	।	।	।	।	८
१२	द्वा.									०

लग्नमंदकुजा भौमो होराज्ञेन्दुदिनाधिपाः ॥ मन्दारौ ज्ञरवी ज्ञेन्दुजीवार्कतनुभार्गवाः ॥ ५२ ॥ मंदारौ तौ सितश्चार्किकुजार्कार्यार्किलग्नकाः ॥ सर्वे गुरुसितौ स्थानं भौमस्यैवं विदुर्बुधाः ॥ ५३ ॥

टीका-अथ कुजभावरेखाप्रदानाह-लग्नेत्यादित्रिपंचाशत्पर्यंतम् । तनुभावे लग्नमंदकुजाः त्रयः रेखाप्रदाः, धनभावे भौम एक एव, सहजभावे होराज्ञेन्दुदिनाधिपाश्चत्वारः, सुखभावे मंदारौ द्वौ, सुतभावे ज्ञरवी द्वौ; रिपुभावे ज्ञेन्दुजीवार्कतनुभार्गवाः षट्, जायाभावे मंदारौ द्वौ, मृत्युभावे तौ पूर्वोक्तौ सितश्च मंदारशुक्रास्त्रयः, धर्मभावे आर्किः शनिः, कर्मभावे कुजार्कार्यार्किलग्नकाः पंच, आयभावे सर्वेऽष्टावपि, व्ययभावे गुरुसितौ द्वौ, एवं भौमस्य स्थानं बुधाः विदुरित्यन्वयः ॥ ५२ ॥ ५३ ॥

भाषा—अब मंगलके बारह भावोंमें रेखा देनेवालेके नाम कहते हैं, पाहिले घरम लग्न, शनि, मंगल रेखा देते हैं. दूसरे घरमें मंगल, तीसरे घरमें लग्न, बुध, चंद्र, सूर्य चौथे घरमें शनि, मंगल, दो रेखा देते हैं, पाचेंव घरमें बुध, सूर्य, छठे घरमें बुध, चंद्र, गुरु, सूर्य, लग्न, शुक्र रेखा देते हैं. सातवें घरमें शनि, मंगल, आठवें घरमें शनि, मंगल, शुक्र रेखा देते हैं. नवें घरमें शनि एकही है. दशवें घरमें मंगल, सूर्य, गुरु, शनि, लग्न देते हैं. ग्यारहवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र, शनि, लग्न और बारहवें घरमें गुरु, शुक्र, रेखा देते हैं. ऐसी यह मंगलके बारह भावोंकी रेखा कहीं. ऊपर स्पष्ट चक्र लिखा है ॥ ५२ ॥ ५३ ॥

अथोदाहरणार्थ मंगलरेखाचक्रम्.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.			।			।		।	३
२	द्वि.			।						१
३	तृ.	।	।		।				।	४
४	च.			।				।		२
५	पं.	।			।					२
६	ष.	।	।		।	।	।			५
७	स.			।				।		२
८	अ.			।			।	।		३
९	न.							।		१
१०	द.	।		।		।		।	।	५
११	ए.	।	।	।	।	।	।	।	।	८
१२	द्वा.					।	।			०

लग्नमंदारशुक्रज्ञा लग्नारेन्दुसितार्कजाः ॥ शुक्रज्ञौ लग्नचंद्रार्किसिताराज्ञार्किभार्गवाः ॥ ५४ ॥ जीवज्ञार्केन्दुलग्नानि भूमिपुत्रशनैश्चरौ ॥ तौ च लग्नेन्दुशुक्रार्या मंदारार्कज्ञभार्गवाः ॥ ५५ ॥

टीका—अथ बुधभावरेखाप्रदानाह लग्नेत्यादिसार्द्धद्वयेन । तनुभावे लग्नमंदारशुक्रज्ञाः पंच रेखाप्रदाः, धनभावे लग्नारेन्दुसितार्कजाः पंच, सहजभावे शुक्रज्ञौ द्वौ, सुखभावे लग्नचंद्रार्किसितारा: पंच, सुतभावे ज्ञार्कभार्गवाः त्रयः, रिपुभावे जीवज्ञार्केन्दुलग्नानि पंच, जायाभावे भूमिपुत्रशनैश्चरौ द्वौ, मृत्युभावे तौ पूर्वोक्तौ द्वौ, लग्नेंदुशुक्रार्याश्चत्वारश्चेति षट्, धर्मभावे मंदारार्कज्ञभार्गवाः पंच, कर्मभावे लग्नमंदा-

रविचंद्राः पंच, आयभावे सर्वे अष्टावपि, व्ययभावे जीवज्ञभास्कराः त्रयः इति बुधभावस्थानप्रदाः ॥ ५४ ॥ ५५ ॥

भाषा-अब बुधके बारह भावोंमें रेखा देनेवालेके नाम कहते हैं. बुधसें पहिले घरमें लग्न, शनि, मंगल, शुक्र, बुध, रेखा देते हैं. दूसरे घरमें लग्न, मंगल, चंद्र, शुक्र, शनि, रेखा देते हैं. तीसरे घरमें शुक्र, बुध, रेखा देते हैं, चौथे घरमें लग्न, चंद्र, शनि, शुक्र, मंगल, रेखा देते हैं, पांचवें घरमें बुध सूर्य, शुक्र, रेखा देते हैं. छठे घरमें गुरु, बुध, सूर्य, चंद्र, रेखा देते हैं. सातवें घरमें मंगल, शनि, रेखा देते हैं. आठवें घरमें लग्न, चंद्र, शुक्र, गुरु, मंगल, शनि, रेखा देते हैं. नववें घरमें शनि, मंगल, सूर्य, बुध, शुक्र, रेखा, देते हैं, दसवें घरमें लग्न, शनि, मंगल, बुध, चंद्र, रेखा देते हैं. ग्यारहवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र, शनि, लग्न रेखा देते हैं, बारहवें घरमें गुरु, बुध, सूर्य रेखा देते हैं. ऐसा बुधके बारह भावोंकी रेखा कही. आगे स्पष्ट कोष्ठक बनाया है ॥ ५४ ॥ ५५ ॥

लग्नमंदारंविचन्द्राः सर्वे जीवज्ञभास्कराः ॥ गुरोर्लग्ने सुखे जीवलग्नारार्कबुधा धने ॥ ५६ ॥ चन्द्रशुक्रौ च दुश्चिक्ये मंदार्यार्काः शनिर्व्यये ॥ सुते शुक्रेन्दुलग्नज्ञमन्दाश्चन्द्रं विना त्वरौ ॥ ५७ ॥ लग्नारार्याऽर्कैन्दवोऽस्ते मृतौजीवार्कभूसुताः ॥ धर्मे शुक्रार्कलग्नेन्दुबुधा मंदं विनाऽऽयभे ॥ ५८॥

टीका-अथ गुरुभावरेखाप्रदानाह गुरोरित्यादिसार्धाष्टपञ्चाशत् पर्यंतम् । तनुसुखभावद्वये जीवलग्नारार्कबुधाः पंच, धनभावे पूर्वोक्ताः पंच, चंद्रशुक्रौ चेति सप्त, दुश्चिक्ये ३ भावे मंदार्यार्काः त्रयः, व्यये शनिः एक एव, सुते भावे शुक्रेंदुलग्नज्ञमंदाः अरौ चन्द्रं विना पूर्वोक्ताः

चत्वार अस्ते सप्तमभावे लग्नारार्यार्केन्दवः पंच, मृतौ भावे जीवार्कभूसुतास्त्रयः, धर्मे भावे शुक्रार्कलग्नेन्दुबुधाः पंच, आयभे मंदं विना शनिरहिताः सप्त, माने दशमभावे गुरुबुधारार्केंदुशुक्रहोराः षट्, तथा प्राग्वत् गुरो रेखाप्रदाः विदुरित्यन्वयः ॥ ५६ ॥ ५७ ॥ ५८ ॥

अथोदाहरणार्थं बुधरेखाचक्रमाह.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.			।	।		।	।	।	५
२	द्वि.		।	।			।	।	।	५
३	तृ.				।		।			२
४	च.		।	।			।	।	।	५
५	पं.	।			।		।			३
६	ष.	।	।		।	।			।	५
७	स.			।				।		२
८	अ.		।	।		।	।	।	।	६
९	न.	।		।	।		।	।		५
१०	द.		।	।	।			।	।	५
११	ए.	।	।	।	।	।	।	।	।	८
१२	द्वा.	।			।	।				३

अथ उदाहरणार्थं गुरुरेखाचक्रमाह.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.	।		।	।	।			।	५
२	द्वि.	।	।	।	।	।	।		।	७
३	तृ.	।				।		।		३
४	च.	।		।	।	।			।	५
५	पं.		।		।		।	।	।	५
६	ष.	।			।			।	।	४
७	स.	।	।	।		।			।	५
८	अ.	।		।		।				३
९	न.	।	।		।		।		।	५
१०	द.	।		।	।	।	।		।	६
११	ए.	।	।	।	।	।	।		।	७
१२	द्वा.							।		१

भाषा—अब गुरुके बारह भावोंमें रेखा देनेवालोंके नाम कहते हैं. गुरुसे पहिले, चवथे घरमें गुरु, लग्न, मंगल, सूर्य ,बुध रेखा देते हैं. दूसरे घरमें गुरु, लग्न, मंगल, सूर्य, बुध, चंद्र, शुक्र, रेखा देते हैं. तीसरे घरमें शनि, गुरु, सूर्य रेखा देते हैं. बारहवें घरमें शनि रेखा देता है, पांचवें घरमें शुक्र, चन्द्र, लग्न, बुध, शनि, रेखा देते हैं. छठे घरमें शुक्र, लग्न, बुध, शनि रेखा देते हैं. सातवें घरमें लग्न, गुरु, मंगल, सूर्य, चंद्र रेखा देते हैं, आठवें घरमें गुरु, सूर्य, मंगल, रेखा देते हैं. नववें घरमें शुक्र, सूर्य, चंद्र, बुध रेखा देते हैं. ग्यारहवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र, लग्न रेखा देते हैं. दसवें घरमें गुरु, बुध, सूर्य, शुक्र, लग्न और मंगल रेखा देते हैं. ऐसी गुरुके बारह भावोंकी रेखा कही. यहां चक्रभी दिखाया है ॥ ५६ ॥ ५७ ॥ ५८ ॥

माने गुरुबुधारार्कशुक्रहोरास्तथा विदुः ॥ लग्नशुक्रेंदवस्ते ते ज्ञार्क्यारास्ते ज्ञवर्जिताः ॥ ५९ ॥ सुतभे

लग्नशशिजशशांकार्यार्किभार्गवाः ॥ ज्ञारौ शून्यं सिताऽर्केन्दुगुरुलग्नशनैश्चराः ॥ ६० ॥ सर्वे रविं विना शुक्रगुरुमन्दाश्च मानभे ॥ सर्वे कुजेन्दुरवयः क्रमाद्भृगुसुतस्य च ॥ ६१ ॥

टीका–अथ शुक्रभावरेखाप्रदानाह लग्नेत्यादि एकषष्टिश्लोकपर्यन्तम् । तनुभावे लग्नशुक्रेन्दवः त्रयः, धनभावे ते पूर्वोक्ता एव त्रयः, सहजभावे ते पूर्वोक्तास्त्रयः ज्ञार्क्यारांश्च षट्, सुखभावे ज्ञवर्जितास्ते नाम लग्नशुक्रेंद्वार्काराः पंच, सुतभावे लग्नशशिजशशांकार्यार्किभार्गवाः षट्, रिपुभावे ज्ञारौ द्वौ, जायाभावे शून्यं० रेखाप्रदाभावः, मृत्युभावे सिताऽर्केन्दुगुरुलग्नशनैश्चराः षट्, धर्मभावे रविं विना रविरहिताः सर्वे सप्त, कर्मभावे शुक्रगुरुमंदास्त्रयः, आयभावे सर्वे अष्टावपि, व्ययभावे कुजेन्दुरवयः त्रयः, एते क्रमाद्भृगुसुतस्य शुक्रस्य रेखाप्रदाः स्युरिति ॥ ५९ ॥ ६० ॥ ६१ ॥

भाषा--अब शुक्रके बारह भावोंमें रेखा देनेवालेके नाम लिखते हैं शुक्रसे पहिले घरमें लग्न, शुक्र, चंद्र रेखा देते हैं. दूसरे घरमें लग्न, शुक्र, चंद्र रेखा देनेवाले हैं. तीसरे घरमें लग्न, शुक्र, चंद्र, बुध, शनि, मंगल रेखा देते हैं. चवथे घरमें लग्न, शुक्र, चंद्र, मंगल, सूर्य रेखा देते हैं. पांचवें घरमें लग्न, चंद्र, बुध, गुरु, शनि, शुक्र रेखा देते हैं. छठे घरमें बुध, मंगल, रेखा देते हैं सातवें घरमें रेखा नहीं है. आठवें घरमें शुक्र, सूर्य, चंद्र, गुरु लग्न, शनि रेखा देते हैं. नववें घरमें चंद्र, मंगल, गुरु, बुध, शुक्र, शनि लग्न रेखा देते हैं. दशवें

अथ उदा० शुक्ररेखाकोष्टकमिदम्.

गृ०	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.		।				।		।	३
२	द्वि.		।				।		।	३
३	तृ.		।	।	।		।	।	।	६
४	च.		।	।			।	।	।	५
५	पं.		।		।	।	।	।	।	६
६	ष.			।	।					२
७	स.									०
८	अ.	।	।			।	।	।	।	६
९	न.		।	।	।	।	।	।	।	७
१०	द.						।	।	।	३
११	ए.	।	।	।	।	।	।	।	।	८
१२	द्वा.	।	।	।						३

घरमें शुक्र, शनि, रेखा देते हैं. ग्यारहवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र; शनि, लग्न रेखा देते हैं. बारहवें घरमें मंगल, चंद्र, सूर्य, रेखा देते हैं. ऐसी शुक्रके बारह भावोंकी रेखा कहीं. इसका स्पष्ट चक्र आगे लिखा है ॥ ५९ ॥ ६० ॥ ६१ ॥

शने रवितनू सूर्यौ लग्नेन्दुकुजसूर्यजाः ॥ लग्नार्कौ जीवमन्दाराः सर्वे सूर्यं विना क्षते ॥६२॥ अर्कोऽर्कज्ञौ बुधोऽर्कारतनुज्ञाः सकलास्ताः ॥ कुजज्ञगुरुशुक्राश्च क्रमात्स्थानमिदं विदुः ॥ ६३ ॥ तनौ तुर्ये च वह्निः स्याद्दुश्चिक्ये द्वौ धने शराः ॥ बुद्धिमृत्यंकारिःफेषु षट् खेशक्षतराशिषु ॥ ६४ ॥

टिका—अथ शनिभावरेखाप्रदानाह शनेरित्यादिद्वाभ्याम् । तनुभावे रवितनू द्वौ, धनभावे सूर्यः एक एव, सहजभावे लग्नेन्दुकुजसूर्यजाः चत्वारः, सुतभावे लग्नार्कौ द्वौ, सुते भावे जीवमंदारास्त्रयः, क्षते रिपुभावे सूर्यं विना सूर्यरहिताः सर्वे सप्त जायाभावे अर्कः एक एव, मृत्युभावे अर्कज्ञौ द्वौ धर्मभावे बुध एक एव, कर्मभावे अर्कारतनुज्ञाः चत्वारः । आयभावे सकलाः अष्टावपि, ततः तदनंतरं व्ययभावे कुजज्ञगुरुशुक्राः चत्वारः, इदं शनेः क्रमात्स्थानं विदुरित्यन्वयः ॥ ६२ ॥ ६३॥ एवं ग्रहाणां भावकरणस्थानान्युक्त्वा लग्नस्य भावकरणस्थानान्याह तनावित्यादिसार्धश्लोकेन । तनौ १ तूर्ये ४ भावद्वये च वह्निः स्यात् नाम त्रयः करणप्रदाः स्युः दुश्चिक्ये ३ भावे द्वौ, २ धने भावे शराः पंच, बुद्धिमृत्यंकारिष्फेषु ५।८।९। १२ भावेषु षट्, खेशक्षतराशिषु १०।११।६। भावेषु रूपं एकः, स्त्रियां ७ भावे गुरुं त्यक्त्वा गुरुवर्जिताः सर्वे सप्त, करणप्रदाः । इदं उक्तरूपं लग्नस्य करणं ज्ञेयमिति शेषः ॥ ६४ ॥

भाषा–अब शनिके बारह भावोंमें रेखा देनेवाले ग्रहोंके नाम कहते हैं. शनिसे पहिले घरमें सूर्य, लग्न, दोनों रेखा देते हैं. दूसरे घरमें सूर्य एकही रेखा देता है. तीसरे घरमें लग्न, चंद्र, मंगल, शनि, रेखा देते हैं. चौथे घरमें लग्न, सूर्य रेखा देते हैं. पांचवें घरमें गुरु, शनि, मंगल, रेखा देते हैं. छठे घरमें चंद्र, मंगल, बुध, गुरु, शुक्र, शनि, लग्न रेखा देते हैं. सातवें घरमें सूर्य रेखा देता है. आठवें घरमें सूर्य, बुध, रेखा देते हैं. नववें घरमें बुध रेखा देता है. दसवें घरमें सूर्य, मंगल लग्न, बुध, रेखा देते हैं. ग्यारहवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शुक्र शनि, लग्न रेखा देते हैं. बाहरवें घरमें मंगल, बुध, गुरु, शुक्र रेखा देते हैं. ऐसी शनिकी बारह भावोंकी रेखा कही इसका चक्रभी स्पष्ट लिखा है ॥ ६२ ॥ ६३ ॥

अथोदाहरणार्थं शनिरेखाकोष्ठकम्. ६

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.	।							।	२
२	द्वि.	।								१
३	तृ.		।	।				।	।	४
४	च.	।							।	२
५	पं.			।		।		।		३
६	ष.		।	।	।	।	।	।	।	७
७	स.	।								१
८	अ.	।			।					२
९	न.				।					२
१०	द.	।		।	।				।	४
११	ए.	।	।	।	।	।	।	।	।	८
१२	द्वा.			।	।	।	।			४

अब लग्नके बारह भावोंमें बिंदु देनेवालेकी संख्या कहते हैं लग्नमें और चौथे घरमें तीन संख्या बिंदु देनेवाली हैं. तीसरे घरमें दो संख्या हैं. दूसरे घरमें पांच हैं. पाचवें आठवें नववें बारहेंव घरमें छः संख्या हैं. दसवें, ग्यारहेंवे, छठे घरमें एककी संख्या है. सातवें घरमें सात सात बिंदु देनेवाले हैं. ऐसी लग्नके बारह भावोंकी बिंदुसंख्या कही ॥ ६४ ॥

रूपं स्त्रियां गुरुं त्यक्त्वा लग्नस्य करणं त्विदम् ॥
होरासूर्येन्दवो लग्ने लग्नारेंद्विनसूर्यजाः ॥ ६५ ॥
गुरुज्ञौ लग्नचंद्रारा लसूचंमंबुसौरयः ॥ क्षते शुक्रस्तथा
चैकः कामे सर्वे गुरुं विना ॥ ६६ ॥ मृतौ भृगुबुधौ

त्यक्त्वा धर्मे गुरुसितौ विना ॥ कर्मण्याये तथा शुक्रो व्यये सूर्येन्दुवर्जिताः ॥ ६७ ॥

टीका-एवं करणनियतसंख्यामुक्त्वा तन्नामान्याह-होरेत्यादि सार्धसप्तषष्टिपर्यन्तम् । लग्ने भावे होरासूर्येन्दवः त्रयः, धनभावे लग्नारेंद्विनसूर्यजाः लग्नभौमचंद्ररविशनयः पंच, सहजभावे गुरुज्ञौ द्वौ, सुखभावे लग्नचंद्राराः त्रयः, सुतभावे लग्नसूर्यचंद्रमंगलबुधसौरयः लग्नसूर्यचन्द्रभौमबुधशनयः षट्, तथा तथैव क्षते रिपुभावे शुक्रः एक एव, कामे ७ भावे गुरुं विना गुरुरहिताः सर्वे सप्त, मृतौ ८ भावे भृगुबुधौ त्यक्त्वा शेषाः षट्, धर्मे भावे गुरुसितौः विना सर्वे षट्, कर्मणि भावे तथा आये भावे च शुक्र एक एव, व्यये भावे सूर्येन्दुवर्जिता सूर्येन्दू हित्वा सर्वे करणप्रदाः षट् हे द्विजपुंगव हे मैत्रेय ! इदं लग्नस्य करणं बिन्द्वपरपर्यायं प्रोक्तं कथितं सूरिभिरिति शेषः ॥ ६५ ॥ ६६ ॥ ६७ ॥

भाषा-अब बिंदु देनेवालेके नाम कहते हैं. लग्न घरमें लग्न, सूय, चंद्र, यह तीन बिंदु देते हैं. दूसरे घरमें लग्न, मंगल, चंद्र सूर्य, शनि, बिंदु देते हैं. तीसरे घरमें गुरु, बुध, बिंदु देते हैं. चौथे घरमें लग्न, चंद्र, मंगल बिंदु देते हैं. पांचवें घरमें लग्न, सूर्य, चंद्र, मंगल, बुध, शनि बिंदु देते हैं. छठे घरमें शुक्र एकही बिंदु देता है. सातवें घरमें सूर्य, चंद्र, मंगल, बुध शुक्र, शनि यह सात बिंदु देते हैं. आठवें घरमें सूर्य

अथोदाहरणार्थं लग्नबिंदुकोष्ठकम्.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.	०	०						०	३
२	द्वि.	०	०	०				०	०	५
३	तृ.				०	०				२
४	च.	०	०						०	३
५	पं.	०	०	०	०			०	०	६
६	ष.					०				१
७	स.	०	०	०	०		०	०	०	७
८	अ.	०	०	०		०		०	०	६
९	न.	०	०	०	०			०	०	६
१०	द.						०			४
११	ए.						०			१
१२	द्वा.			०	०	०	०	०	०	६

चंद्र मंगल, गुरु शनि, लग्न यह छः बिंदु देते हैं. नववें घरमें सूर्य, चंद्र, मंगल, बुध, शनि, लग्न यह बिंदु देते हैं. दसवें घरमें और ग्यारहवें घरमें शुक्र एक बिंदु देता है. बारहवें घरमें मंगल; बुध, गुरु, शुक्र, शनि, लग्न यह छः बिन्दु देते हैं. हे मैत्रेय ऋषे ! यह लग्नके बारह भावोंकी बिन्दु संख्या और बिन्दु देनेवालेके नाम कहे हैं ॥ ६५ ॥ ६६ ॥ ६७ ॥

लग्नस्येदं तु संप्रोक्तं करणं द्विजपुंगव ॥ अथ स्थानं प्रवक्ष्यामि लग्नस्य द्विजपुंगव ॥ ६८ ॥ आर्किज्ञशुक्रगुर्वाराः सौम्यदेवेज्यभार्गवाः ॥ हित्वा सौम्यगुरू शेषाः सूज्ञेज्यभृगुसूर्यजाः ॥ ६९ ॥ तथा जीवभृगू बुद्धौ सर्वे शुक्रं विना क्षते ॥ जीव एकस्तथा द्यूने मृतौ सौम्यभृगू तथा ॥ ७० ॥ धर्मे गुरुसितावेव खे सर्वे शुक्रमंतरा ॥ सूर्यचन्द्रौ तथा रिष्फे स्थानं लग्नस्य कीर्तितम् ॥ ७१ ॥

टीका-अथ लग्नभावस्थानप्रदग्रहानाह-अथेत्येकसप्ततिश्लोकपर्यन्तम् । अथ करणकथनानंतरं लग्नस्य संबंधि इति संबंधसामान्यविवक्षायां " षष्ठी शेषे " इति षष्ठी स्थानं रेखासंज्ञं प्रवक्ष्यामि कथयामि हे द्विजपुंगव द्विजश्रेष्ठ मैत्रेय तत्रेति शेषः । तच्छृणित्यध्याहारश्च । लग्नभावे आर्किज्ञशुक्रगुर्वाराः शनिबुधशुक्रगुरुभौमाः स्थानदाः पंच, धनभावे सौम्यदेवेज्यभार्गवाः स्थानदास्त्रयः, सहजभावे सौम्यगुरू हित्वा शेषाः लग्नरविचन्द्रभौमशुक्रमंदाः स्थानदाः षट्, सुखभावे सूज्ञेज्यभृगुसूर्यजाः सूशब्देन सूर्यः " नामैकदेशे नामग्रहणम् " इति न्यायात् स्पष्टमन्यत् । स्थानदाः पंच, सुतभावे जीवभृगू एतौ स्थानदौ द्वौ, क्षते षड्भावे शुक्रं विना सर्वे लग्नरविचन्द्रभौमबुधगुरुशनयः स्थानदाः सप्त, द्यूने सप्तभावे जीव एक एव स्थानदः

मृतौ भावे सौम्यभृगू बुधशुक्रौ स्थानदौ द्वौ, धर्मे भावे गुरुसितौ द्वावेव खे विशेषानुक्तत्वात् करणविचारोपलब्ध्या च आये च एतद्भावद्वये च शुक्रमंतरा सर्वे शुक्रं विना लग्नादयः स्थानदाः सप्त, रिष्फे व्ययभावे सूर्यचंद्रौ स्थानदौ द्वौ एवं लग्नस्य कीर्तितं मयेत्याक्षेपः॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

भाषा—अब लग्नके बारह भावोंमें रेखा देनेवालेके नाम कहते हैं. रेखाकी स्थान ऐसी संज्ञा है. हे मैत्रेय! अब लग्नमें रेखा देनेवालेके नाम सुनो. लग्न घरमें शनि, बुध, शुक्र, गुरु, मंगल यह पांच रेखा देनेवाले हैं. दूसरे घरमें बुध, गुरु, शुक्र, यह रेखा देनेवाले हैं. तीसरे घरमें सूर्य, चंद्र, मंगल, शुक्र, शनि लग्न रेखा देनेवाले हैं. चौथे घरमें सूर्य, बुध, गुरु, शुक्र, शनि रेखा देनेवाले हैं. पांचवें घरमें गुरु, शुक्र दोनों रेखा देनेवाले हैं. छठे घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शनि लग्न रेखा देनेवाले हैं. सातवें घरमें गुरु रेखा देनेवाला है. आठवेंमें बुध, शुक्र, रेखा देनेवाले हैं. नववें घरमें गुरु शुक्र दोनों हैं. दसवें ग्यारहवें घरमें सूर्य, चंद्र, मंगल, बुध, गुरु, शनि, लग्न रेखा देनेवाले हैं. बारहवें घरमें सूर्य, चंद्र, यह दोनों हैं. ऐसी लग्नके बारहभावोंकी रेखा कही यहां स्पष्ट चक्र दिखाया है ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

अथ उदाहरणार्थं लग्नरेखाचक्रम्.

	भा.	सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	सं.
१	ल.			।	।	।	।	।		३
२	द्वि.				।	।	।			३
३	तृ.	।	।	।			।	।	।	३
४	च.	।			।	।	।	।		५
५	पं.					।	।			२
६	ष.		।		।	।	।		।	६
७	स.					।				१
८	अ.	।			।		।			३
९	न.					।	।			२
१०	द.	।	।	।	।	।		।	।	७
११	ए.	।	।	।	।	।		।	।	७
१२	द्वा.	।	।							२

करणं बिंदुवत्प्रोक्तं स्थानं रेखा तथोच्यते ॥ मुनिदिग्वसुवेदाद्रिदिग्घ्वद्रष्टयनवेषवः ॥ ७२ ॥ रुद्राकार्वर्गणा मेषाद्विषयेष्वष्टवायवः ॥ पंक्तिस्वरेषवः सूर्याद्वर्गणा प्रोच्यते बुधैः ॥ ७३ ॥

टीका-एवं रव्यादीनां सप्तग्रहाणां लग्नस्य च करणस्थानान्युक्त्वा करणस्थानपदद्वयेन किं ज्ञेयं तदुच्यते करणमित्यर्धश्लोकेन । करणं बिंदुवत् बिंद्वाकारकं प्रोक्तं कथितं स्थानं तु रेखा इत्युच्यते । अयं भावः करणं शून्याकारं लिखेत् स्थानं रेखाकारं लिखेत् एवं च करणस्थानपदाभ्यां बिन्दुरेखे अवगंतव्ये इति । इति करणस्थानार्थं स्पष्टीकृत्य अग्रे उपयुक्तवर्गणासंज्ञकलग्नग्रहध्रुवांकानाह-मुनीत्यादिसार्धसप्ततिश्लोकपर्यन्तम् । मेषे मुनयः सप्त ७ वर्गणा ध्रुवाङ्काः, वृषे दिक् दश १० वर्गणांकाः, मिथुने वसवः अष्टौ ८ वर्गणांकाः, कर्के वेदाश्चत्वारः ४ वर्गणांकाः, सिंहे दिक् १० वर्गणांकाः, कन्यायां इषवः पंच ५ वर्गणांकाः, तुलायां अद्रयः सप्त ७ वर्गणांकाः, वृश्चिके अष्ट ८ वर्गणांकाः, धनुषि नव ९ वर्गणांकाः, मकरे इषवः पंच ५ वर्गणांकाः, कुंभे रुद्राः ११ वर्गणांकाः, मीनेऽर्कः १२ वर्गणांकाः, इति मेषात् मेषक्रमात् राशिषु वर्गणांका ज्ञेया इति । अथ ग्रहेषु वर्गणांकाः । सूर्यात् सूर्यादिक्रमशः विषयाः ५, इषवः ५, अष्ट ८, वायवः ५, पंक्तिः १०, स्वराः ७, इषवः ५ रविचन्द्रभौमबुधगुरुशुक्रशनीनां क्रमाद्वर्गणा ध्रुवांकाः बुधैः प्रोच्यते शब्द्यते ॥ ७२ ॥ ७३ ॥

भाषा-करण शब्दकरके बिन्दु सरीखा आकार लिखना स्थानकरके रेखाकार लिखना. ऐसा बिन्दु रेखाका निर्णय स्पष्ट कहा अब आगे उपयोगमें आवे ऐसा सूर्यादि ग्रहोंके और लग्नांकादि बारह भावोंके ध्रुवांक कहते हैं. मेषके ७ ध्रुवांक, वृषभके १० दस, मिथुनके ८ आठ, कर्कके ४ चार, सिंहके १० दस, कन्याके ५ पांच, तुलाके ७ सात, वृश्चिकके ८ आठ, धनके ९ नव, मकरके ५ पांच, कुंभके ११ ग्यारहा, मीनके १२ बारहा ध्रुवांक जानना. अब सूर्यादिकोंके ध्रुवांक कहते हैं. सूर्यके ध्रुवांक ५, चंद्रके ५, मंगलके ८, बुधके ५, गुरुके १०, शुक्रके ७, शनिके ५ यह ध्रुवांक कहे ॥ ७२ ॥ ७३ ॥

अष्ट रेखा लिखेदूर्ध्वास्तिर्यग्रेखास्त्रयोदश ॥ तदा चतुरशीतिः स्युर्ग्रहयोगे पदानि तु ॥ ७४ ॥ इति श्रीमद्बृहत्पाराशरहोरायामुत्तरभागेऽष्टकवर्गप्रधानः प्रथमोऽध्यायः ॥ १ ॥

टीका--अथ करणस्थानचक्रलेखनप्रकारं समुच्चित्य पदसंख्यां चाह–अष्टेति। ऊर्ध्वा ऊर्ध्वगामिन्यो रेखाः अष्ट लिखेत् तथा तिर्यग्गामिन्यो रेखाः त्रयोदश १३ लिखेत् एवं कृते पदानि कोष्ठकानि ग्रहयोगे भावेषु ग्रहसंयोगविषये चतुरशीतिसंख्याकानि स्युर्भवंति अर्थात् भावेषु लग्नग्रहसमाहारयोगे तु षण्णवति पदानि भवेयुः। अस्मिन्विषये रेखा अपि ऊर्ध्वगा नव ९ तिर्यंचः चतुर्दश १४ बोध्या इति तात्पर्यम् ॥ ७४ ॥ इति श्रीमद्बृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्ङन्वयकमलाकरकौमुदीनायकवेदशास्त्राद्यनवद्यविद्योतितदिङ्मंडलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचितसुबोधिनीटीकायां प्रथमोऽध्यायः ॥ १ ॥

भाषा–अब अष्टक वर्ग निकालनेके वास्ते चक्र करनेकी विधि बतातें हैं. खडी रेखा ९ नव लिखना. आडी रेखा १४ निकालना, तो छानवे ९६ कोष्ठक होते हैं उनमें सूर्यादिक ग्रह लिखना. मेषादि द्वादश भाव लिखना बीचके कोष्ठकमें बिन्दुरेखा लिखना ॥ ७४ ॥ इति श्रीमद्बृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्ङन्वयजटाशंकरसुनुश्रीधरेण विरचितायां बालबोधिनीभाषाटीकायां प्रथमोऽध्यायः ॥ १ ॥

लग्नं सुखात् सुखं कामात् कामं खात् खं च लग्नतः ॥
त्र्यंशमेकाद्विगुणितं युज्याल्लग्नादिषु क्रमात् ॥ १ ॥
पूर्वापरयुतेरर्धं संधिस्स्याद्भावयोर्द्वयोः ॥ एवं द्वादश भावास्तु भवन्ति च ससंधयः ॥ २ ॥

टीका–श्रीमत्पराशरऋषिः शिष्यायोपदिदेश हि ॥ भावादिकषड्बलान्यस्मिन्नध्याये तु द्वितीयके ॥ १ ॥ अथास्मिन् द्वितीयेऽध्याये भगवान् पराशरः सकलजातकफलविचारोपयोगित्वाद्भावदृष्टिफलसाधनानि मैत्रेयं प्रति स्फुटयति तत्रादौ ससंधिभावसाधनमाह–लग्नमित्यादिश्लोकद्वयेन । अत्रादौ तात्कालिकं सूर्यं स्पष्टं विधाय तस्माल्लग्नमानीय पूर्वाधोक्तं दशमभावं च कृत्वा उभयोः षड्राशिमेलनेन सप्तमचतुर्थभावौ च निर्माय ततः लग्नं तनुभावः, सुखात् सुखभावात् संशोध्य अवशिष्टस्य त्र्यंशं त्रिभिरंशं संपाद्य लग्ने युंज्यात् स द्वितीयभावो भवति, तमेव त्र्यंशं द्विगुणितं द्वाभ्यां गुणयित्वा लग्ने युंज्यात् स सहजभावो भवति, एवमग्रेऽपि । सुखं चतुर्थभावं, कामात् सप्तमभावात् संशोध्य अवशिष्टस्य त्र्यंशं सुखे संयोज्य सुतभावो भवति, तमेव त्र्यंशं त्रिगुणीकृत्य सुखभावे संयोज्य रिपुभावो भवति; एवमेव कामं सप्तमभावं खाद्दशमभावात् संशोध्य, अवशिष्टत्र्यंशं सप्तमभावे संयोज्य मृत्युभावो भवति, तं त्र्यंशं त्रिगुणितं सप्तमभावे संयोज्य भाग्यभावो भवति, एवं खं दशमभावं च लग्नतः तनुभावात् संशोध्य प्राग्वदेव शिष्टत्र्यंशं दशमभावे संयोज्यायभावो भवति, तमेव द्विगुणीकृत्य दशमभावसंयोजिते व्ययभाव इति द्वादशभावा भवंति । अथ संधिनाह । द्वयोः प्राक्परयोर्भावयोः पूर्वापरयुतेः पूर्वभावापरभावयोगः तस्य यत् अर्धं समांशः संधिर्भवति एवमुक्तं भवति तनुधनभावयोगार्धंसंधि तनुभावस्यांत्यसंधिः धनभावस्य च आदिसंधिर्भवति एवं क्रमशः भावसंधयो ज्ञातव्याः । श्रीपथ्वीपतिविक्रमाब्दयुगविंद्वंकद्विजप्रेयसि शाके बाणरिपूरुविक्रममुनिश्रीसूर्यनारायणे । मासेंत्ये गुरुवासरे शुभमहाविष्णोस्तिथौ श्रीधरो जातो लोकहितैककारणतया कीलालनाथे शुभे ॥ १ ॥ ममास्मिन्सुमहाग्रंथ उदाहरणकारणात् ॥ प्राक्षिप्ता पत्रिका सम्यक्परिष्कृत्य स्वचित्ततः ॥ २ ॥

तन्वादयो द्वादशभावाः ससन्धयस्स्युः ।

त.	सं.	२	सं.	३	सं.	४	सं.	५	सं.	६	सं.
० ६ ३ ४२	० २० १६ १६	१ ४ २८ ५०	१ १८ ४१ २५	२ २ ५३ ५९	२ १७ ६ ३३	३ १ १९ ८	३ १७ ६ ३३	४ २ ५३ ५४	४ १८ ४१ १५	५ ४ २८ ५०	५ २० १६ १६
७	सं.	८	सं.	९	सं.	१०	सं.	११	सं.	१२	सं.
६ ६ ३ ४२	६ २० १६ १६	७ ४ २८ ५०	७ १८ ४१ २५	८ २ ४३ ५२	८ १७ ६ ३३	९ १ १९ ८	९ १७ ६ ३३	१० २ ५३ ५९	१० १८ ४१ २५	११ ४ २८ ५०	११ १० १६ १६

संवत् १९०० शाके १७६५ फाल्गुने कृष्णे १२ द्वादश्यां गुरौ २३ । ४३ पूर्वाषाढानक्षत्रे १३ । ५० सिद्धियोगे २३ । ८ तैतिलकरणे श्रीसूर्योदयादिष्टघटी ८ । १६ अस्माद्ग्रंथादहर्गणसाधनमाह । ग्रन्थगताब्दाः ३२३ चक्रं २९ शेषांकाः ४ अधिमासः ३ मध्यमाहर्गणः १८६० अहर्गणः १८३२ पलभाः ६ । ४ रेखापश्चिमे ० । १ चरखंडाः । ६० । ४८ । २० अयनांशाः २२ । १ । ५० ॥ अथाग्रे उदाहरणानि प्रारभ्यंते ॥ अत्र भावोदाहरणम् । लग्नं ०।६।३।४२ सुखभावः ३।१।१९।८ अनयोरंतरम् २।२५।१५।२६ अस्य त्र्यंशः ०।२८।२५।८ अयं लग्ने योजितः जातो धनभावः १।४।२८।५० प्राक्तनत्र्यंशः ० । २८ । २५ । ८ । अयं द्विगुणितः १।२६।५०।१६ लग्ने योजितः २।२६।५३।५८ जातोऽयं सहजभावः एवं सुखसप्तमदशमभावेषु ज्ञेयमिति । अथ संध्युदाहरणम् । लग्नं ०।६।३।४२ धनभावः १।४।२८।५० अनयोर्योगः १।१०।३१।२२ अस्यार्धम् ०।२०।१६।१६ तनुधनयोः सन्धिः एवंरीत्याग्रेऽपि क्रमशः संधयो ज्ञेयाः एवं च द्वादश भावाः तन्वादयः सन्धयो भवंति ॥ १ ॥ २ ॥

भाषा–अब द्वितीयाध्यायमें बलाबलका लक्षण स्पष्ट बताते हैं. उसमें पहिले बारह भावोंका साधन कहते हैं. जन्मकालीन इष्ट घटी पलके समयका

सूर्यादिमध्यमग्रहाः स्युः ।

सू.	चं.	उ.	पा.	मं.	बुके.	गु.	शुके.	श.
१० २ ३२ ११	८ १२ ५१ १५	० २१ ४७ ३०	७ २८ २२ ३	० १६ ४१ ३९	७ १० ५८ ५५	१० २१ ४७ ४१	२ २२ ४९ ५२	९ ११ १८ ४४
५९ ८	७९० ३५	६ ४१	३ ११	३१ २६	९ वे ३६	५ ०	३० ०	२ ०

॥ अथ जन्मांगचक्रम् ॥



सूर्यादिग्रहाःस्पष्टाः स्युः ।

सू.	चं.	मं.	बु.	गु.	शु.	श.	रा.	के.
१० ४ १४ २२	८ २१ ५१ २८	११ २७ ४ ४	९ ४० ३४ ९	१० १५ ३२ ४२	११ ७ १४ ४४	९ ८ १७ ३०	७ २८ २१ ३१	१ २८ २१ ३१
६० ३१	८०८ ३४	४५ १०	३८ ५२	१३ ४४	७२ ३५	६ ४	३ ११	३ ११

स्पष्ट सूर्य करके वे सूर्यसे स्पष्ट लग्न और दशम भाव पूर्वार्धमें कहा है उस रीतिसे करके लग्नमें छः राशि मिलायके सांतवां भाव दशममें छः राशि मिलानेसे चतुर्थ भाव करना, पीछे लग्नको चौथे भावमें कम करके शेष जो रहा उसका तृतीयांश लेके तौ तीसरा भाव भया. ऐसा आगेभी करना जैसा लग्नको चौथे भावमें कमी करके शेषका तृतीयांश निकालके दो भाव बनाये वैसा चौथा सातेवेंमें सातवां दसमें दसवां लग्नमें कमी करके शेषका अंश निकालके पंचम आदि करके भाव करना। अब संधि करनेकि विधि बताते हैं. पहिले घरके भावांक और आगेके भावके अंक इन दोनों भावोंको एकठे मिलायके पीछे उन अंकोंका अर्ध करना सो संधि भए ऐसे बारह संधि करना उसको करनेका उदाहरण संस्कृत टीकामें बताया है और स्पष्ट चक्र यहां दिखाया है ॥ १ ॥ २ ॥

दृश्याद्विशोध्य द्रष्टारं षड्राशिभ्योऽधिका भवेत् ॥
दिग्भ्यो विशोध्य द्वाभ्यां तु भागीकृत्य च दृष्टयः
॥ ३ ॥ शराधिके विना राशिं भागाद्विघ्नाश्च दृष्टयः ॥
वेदाधिके त्यजेद्भूताद्भागाद्दृष्टिस्त्रिभाधिके ॥ ४ ॥ विशो-
ध्यार्णवतो द्वाभ्यां लब्धंत्रिंशद्युतं भवेत् ॥ कराधिके
विनाराशिभागास्तिथियुतास्तथा ॥ ५ ॥

टीका-एवं भावसाधनमुक्त्वा षड्बलसाधनं वक्तुमारभते । तानि तु दृग्बलं ६ स्थानबलं १ दिग्बलं २ कालबलं ३ निसर्गबलं ४ चेष्टाबलं ५ इति बलानि षड्विधानि, तत्र स्थानादिपंचविधस्यैक्यतया दृग्बलस्यैव ऋणधनतया मुख्यत्वादादौ दृग्बलसाधनं वक्तुमाह ग्रहदृष्टिसाधनरीतिमाह दृश्यादिति सार्धत्रिभिः । दृश्यात् द्रष्टुं योग्यः तस्माद् ग्रहाद्भावाद्वा द्रष्टारं पश्यंति ग्रहं विशोध्य ऊनं कृत्वा शेषश्चेत् षड्राशिभ्यः राशिस्थानापन्नषडंकेभ्यः आधिकः भवेत् तर्हि दिग्भ्यः दशराशिभ्यो विशोध्य शेषं भागाकृत्य अवशिष्टराशिभागान्कृत्वा भागेषु संयोज्य द्वाभ्यां हराभ्यां यद्भागादि फलं तदेव दृष्टयः भवंतीति शेषः । तथा शराधिके द्रष्टृनदृश्यावशेषे राश्यंके पंचाधिके सति विना राशिं राश्यंकांस्त्यक्त्वा द्विघ्नाः द्विगुणिताश्च भागाः अंशा एव दृष्टयो भवंति तथा वेदाधिके वेदेभ्यश्चतुर्भ्यः अधिके द्रष्टृनदृश्यावशेषे राश्यंके सति भूतात्पंचभ्यः त्यजेत् विशोधयेत् शेषस्य भागा एव दृष्टयो भवंति तथा त्रिभाधिके त्रीणि च तानि भानि राशयश्च त्रिभानि तेभ्योऽधिके प्राग्वदवशिष्टराश्यंके सति अर्णवतः चतुर्भ्यः विशोध्य द्वाभ्यां यल्लब्धं तत्रिंशद्युतं त्रिंशद्भिः युतं भागस्थानमित्यर्थः । तद्दृष्टिर्भवेत् तथा प्राग्वदवशिष्टे कराधिके राश्यंके सति राशिं विना राश्यंकं परित्यज्य ये अवशिष्टा भागाः ते तिथियुताः कार्या इति तथा प्राग्वद्दृष्टिर्भवेत् तथा रूपाधिके प्राग्वदवशिष्टराश्यंके सति विना राशिं राश्यंकं विहाय भागाः द्वाभ्यां विभाजिताः दृष्टिस्थानम् । अत्र क्रमेणोदाहरणानि तत्रादौ षडधिकोदाहरणम् । द्रष्टा चंद्रः ३।५।२।१ दृश्यः सूर्यः ९।७।८।४३ अस्माद्विशोध्य शेषः ६।२।३।४२अयं दिग्भ्यः विशोध्य अंकाः ३।२७।५६।१८ एतदुपरिस्थराश्यंकभागाः ९० मूलभागाः २७ मिलित्वा जाताः ११७।५६।१८ द्वाभ्यां भाजिताः ५८।५८।९ इयं

दृष्टिरिति । अथावशिष्टशराधिकराश्यंकदृष्ट्युदाहरणम् । द्रष्टा चंद्रः ३।५।२।१ दृश्यः सूर्यः ८।७।५।४३ अस्माद्धीनः शेषं ५।२।३।४२ राश्यंकं विहाय शेषमंशादि २।३।४२ द्विगुणीकृत्य ४।७।२४ इयं दृष्टिरिति अथावशिष्टवेदा ४ धिकराश्यंकदृष्ट्युदाहरम् । द्रष्टा चंद्रः ३।५।२।१ दृश्यः सूर्यः ७।७।५।४३ अस्माद्धीनः शेषांकाः ४।२।३।४२ भूताः ५ शोधिताः शेषाः ०।२७।५६।१८ इयं दृष्टिरिति । अथ त्रिभाधिकशेषराश्यंकदृष्ट्युदाहरणम् । द्रष्टा चंद्रः ३।५।२।२१। दृश्यः सूर्यः ६।७।५।४३ अस्माद्धीनः शेषं ३।२।३।४२ एतत् अर्णवेभ्यः विशोध्यावशिष्टं २।२७।५६।१९। द्वाभ्यां विभज्य लब्धफलं १।१३।५८।९ एतत्रिंशद्युतं ४३।५८।९ जातादृष्टिः । अथकरा २ धिकावशेषराश्यंकोणदाहरणम् । द्रष्टा चंद्रः ६।५।२।१ दृश्यः सूर्यः ५।७।५।४२ अस्माद्धीनः शेषं २।२।३।४२ अत्रत्यराश्यंकं परित्यज्य अवशिष्टाः २।३।४२ इमे तिथि १५ युताः १७।३।४२ इयं दृष्टिरीति । अथ रूपाधिकावशेषराश्यंकोदाहरणम् । द्रष्टा चंद्रः ८।२५।३७।१६ दृश्यः सूर्यः १०।४।१४।२२ अस्माद्धीनः १।८।३।७।६। अत्रत्यराशिं त्यक्त्वा शेषभागाः ८।३७।६ द्वाभ्यां भक्ताः फलं ४।१८।३३ इयं दृष्टिराति ॥ ३ ॥ ४ ॥ ५ ॥

भाषा–अब दृष्टिबल साधन करनेकी रीति बताते हैं. जिस ग्रहके ऊपर जिस ग्रहकी या भावकी दृष्टि है उसमेंसे देखनेवालेको कमी करके शेष जो छः राशिसे ज्यादा होवे तो दस राशिमें गिरायके उसके अवशेषके राशिके अंश करके उसका दोसे भाग लेके जो फल आया ओही दृष्टिबल होता है. और दृश्य द्रष्टाका शोधन करके जो शेष अंक आवै वे पांचसे ज्यादा होवे तो राश्यंक छोडके अंशको द्विगुणित करना ओही दृष्टियां होती हैं. शोधन करके शेष राश्यादिक अंक चारसे ज्यादा होवे तो पांचमें शोधन करके जो

अंश आवे ओही दृष्टि होती है. और शोधन करके शेष राश्यादिक अंक तीनसे ज्यादा होवें तो चारमें शोधन करके दोसे भाग लेके जो लब्धांश अंक है उसमें तीस मिलाना. वह दृष्टि होती है. ऐसा शेषांक जो दोसे ज्यादा होवे तो वे राशिको छोडके अंश जो है उसमें पंदरह मिलाये ओही दृष्टि होती है. शेषांक एकसे ज्यादा होवे तो राशिको छोडके अंशको दोसे भाग लेना जो लब्ध आवे ओही दृष्टि जानना. इसका उदाहरण संस्कृत टीकामें दिखाया है. इसके चक्र स्पष्ट यहां दिखाया है ॥ ॥३॥४॥५॥

अथ ग्रहदृष्टिचक्रमाह.

	सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
सू.	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०
चं.	० ४ २२	० ० ०	० ४४ १३	० ० ०	० १० ४	० २६ ४५	० ० ०	० ० ०
मं.	० ० ०	० १५ ४७	० ० ०	० ८ १५	० ० ०	० ० ०	० ९ ११	० ० ०
बु.	० ० ०	० ० ०	० ३१ ३४	० ० ०	० ० ०	० १३ २०	० ० ०	० ० ०
गु.	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०
शु.	० ० ०	२ ५ ५२	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०
श.	० ० ०	० ० ०	० ५७ ३७	० ० ०	० ० ०	० ५९ २९	० ० ०	० ० ०
शुभ.	० ४ २२	० ५ ५२	० १५ ३२	० ० ०	० १० ४	० ४० ५	० ० ०	० १५ ४५
पाप.	० ० ०	० १५ ४७	० ५० ३७	० ८ १५	० ० ०	० ५७ ५४	० ९ ११	२ १० ४४

रूपाधिके विना राशिं भागा द्वाभ्यां विभाजिताः ॥
त्रिदशे च त्रिकोणे च चतुरस्त्रे क्रमादथ॥६॥शरवेदाः
खरामाश्च तिथयो योजिताः क्रमात् ॥ शनिदेवेज्यभौ-
मानामादौ दृष्टिः स्फुटा भवेत् ॥ ७ ॥

टीका–एवं सर्वग्रहसाधारणदृष्ट्यानयनमुक्त्वा अथानंतरं शनिगुरुभौमानां द्रष्टॄणां स्थानविशेषेण संस्कारविशेषमाह– त्रिदश-इत्यादिसार्द्धश्लोकेन । शनिदेवज्यभौमानां शनिगुरुभौमानां द्रष्टॄणां क्रमात्त्रिदशे ३ । १० स्थानद्वये त्रिकोणे ५ । ९ स्थानद्वये चतुरस्रे ४ । ८ स्थानद्वये च तत्तत्स्थानस्थग्रहे च दृश्ये सति आदौ पूर्वं उक्तसंस्कारेण दृश्याद्विशोध्येत्यादिना संस्कृतेति आदौशब्दार्थः या दृष्टिरुत्पन्ना तत्र क्रमात् क्रमशः शरवेदाः ४५ शनिदृष्ट्यां खरामाः ३० गुरुदृष्ट्यां तिथयः १५ भौमदृष्ट्यां च योजिताः संयुक्ताः कार्याः । अनेन विशेषसंस्कारेण शनिगुरुभौमानां प्रत्येकं उक्तस्थानद्वये दृष्टिः स्फुटा स्पष्टा, भवेदिति अत्रोदाहरणम् तत्र शनेः द्रष्टा शनिः ९।८।१७ दृश्यो भृगुः ११।७।१४ अयं दृश्यः द्रष्टुः शनेः तृतीयस्थानापन्नः अस्माद्दृश्याद्द्रष्टारं विशोध्य शेषांकाः २।२८।५७ रूपाधिके विना राशिमितिं राश्यंकं त्यक्त्वा शेषांकाः २८।५८ एते भागाः द्वाभ्यां विभाजिताः फलं १४।२९ अयं सर्वसाधारणसंस्कारो जातः तस्य विशेषसंस्कारस्तु त्रिदशे शरवेदा इति ४५ इमे योजिताः जाता तृतीयस्थानीयशनिस्पष्टदृष्टिः ५९।२९ एवं रीत्यादशमस्थानेपि ज्ञेयम् । एवमेव प्रकारेण गुरोः ५।९ स्थानयोः पूर्वोक्तसर्वसाधारणदृष्टिसंस्कारं विधाय विशेषस्तु खरामाः ३० योज्याः इति त्रिकोणस्थानयोर्गुरुदृष्टिः स्पष्टा स्यात् एवमेव भौमस्य ४।८ स्थानीयदृष्टिविचारे सर्वसाधारणसंस्कारांते विशेषसंस्कारः तिथयः १५ योजिताः कार्या इति स्पष्टभौमदृष्टिश्चतुरस्रस्थानयोः स्यात् ॥ ६ ॥ ७ ॥

भाषा–ऐसा साधारण सर्व ग्रहोंका दृष्टिबल कहके शनि, गुरु, मंगलका विशेष दृष्टिबल कहते हैं. आगे जो दृष्टिबल लानेका प्रकार बताया है. ओही रीतिसे इन तीनों ग्रहोंका दृष्टिबल लाना. परंतु शनि जो तीसरे १० वें घरमें

देखता होवे तो पहिले लाये हुवे दृष्टिफलमें पैंतालीस और मिलाना वह दृष्टि होती है. गुरुकी जो ५।९ घरमें दृष्टि होवे तो पहिले लाये हुवे दृष्टिफलमें तीस मिलाना. वह दृष्टि स्पष्ट जानना. मंगल जो ४ थे ८ वें घरमें देखता हो तो पहिले लाये हुवे दृष्टिफलमें पंदरह मिलाना. वह दृष्टि स्पष्ट जानना. उदाहरण संस्कृत टीकामें स्पष्ट है ॥ ६ ॥ ७ ॥

अथोच्चबलचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
० ३८ ४	० १७ २९	० ४० १९	० २१ २९	० १३ ३२	० ६३ २४	० ३३ ५४	३ ३८ २

अथ सप्तवर्ग बलचक्रमिदम्.

मू.	स्व.	ऽमि.	मि.	स.	श.	ऽश.
० ४५ ०	० ३० ०	० २० ०	० १५ ०	० १० ०	० ४ ०	० २ ०

अथ तात्कालिकमैत्रीचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्र.
चं. मं. शु. श. बु.	सू. चं. बु. गु. शु. श.	सू. चं. बु. गु. श.	सू. चं. मं. शु. गु.	चं. मं. शु. बु. श.	सू. चं. बु. गु. श.	सू. मं. गु. शु.	मित्र.
गु.	०	शु.	श.	सू.	मं.	बु.	शत्रु.

अथ नैसर्गिकमैत्रीचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्रहाः
चं.मं. गु.	सू.बु.	सू.चं. गु.	सू.शु.	सू.चं. मं.	बु. श.	बु.शु.	मित्र.
बु.	मं.शु. गु.श.	शु. श.	मं.गु. श.	श.	मं. गु.	गु.	सम.
शु. श.	०	बु.	चं.	बु. शु.	सू. चं.	सू.चं. मं.	शत्रु.

नीचोनं तु ग्रहं भार्धाधिके शक्राद्विशोधयेत् ॥
भागीकृत्य त्रिभिर्भक्तं फलमुच्चबलं भवेत् ॥ ८ ॥

टीका--एवं प्रथमं दृग्बलमुक्त्वा क्रमप्राप्तं षड्बलांतर्गतं द्वितीयं पंचविधस्थानबलं उच्चबलं १ सप्तवर्गबलं २ युग्मायुग्मबलं ३ केंद्रादिबलं ४ द्रेष्काणबलं ५ चेति तत्रादौ उच्चबलमाह नीचेति। ग्रहं सूर्याद्यन्यतमं नीचोनं स्वनीचेन ऊनं कृत्वा भार्धाधिके उर्वरिते षड्राश्याधिके सति चक्रात् द्वादशराशिभ्यः विशोधयेत्। अनंतरं नीचोनषडधिकं चक्रतः शुद्धं ग्रहं भागीकृत्य राशिभागान् कृत्वांशे-

षु नियोज्य तात्रिभिर्भक्तं भाजितं लब्धफलं उच्चबलं एतत् संज्ञकं बलं भवेत् स्यात् । अत्रोदाहरणम् । रवि १०।४।१४ नीचं ६।१० ऊनं ३।२४।१४ इदं षड्राश्यूनं भागीकृतं ११४।१४ त्रिभिर्भक्तं ३८।४ इदं सूर्यस्योच्चबलोदाहरणामिति सर्वग्रहेषु ज्ञेयामिति ॥ ८ ॥

भाषा–अब उच्चबल कहते हैं. जिस ग्रहका उच्चबल करना होवे उस ग्रहके राशि अंशमें अपनी नीचकी राशि और अंश कमी करके जो राशि रहै वो राशि जो कभी छः अंशसे ज्यादा होवे तो बारहमें शुद्ध करके राशिके अंश करना. उसमें नीचेके अंश मिलायके तीनसे भाग लिये जो लब्ध आवे उसको उच्चबल कहना ॥ ८ ॥

मूलत्रिकोणस्वर्भाधिमित्रमित्रसमारिषु ॥ अधिशत्रुगृहेचापि स्थितानां क्रमशो बलम् ॥ ९ ॥

टीका–अथ स्थानबलांतर्गतं द्वितीयसप्तवर्गबलमाह मूलेत्यादि सार्धश्लोकद्वाविंतिपदाधिकेन । अत्र यस्य कस्यापि रव्याद्यन्यतमस्य सप्तवर्गजं बलं ग्राह्यमस्ति तद्ग्रहसंबंधिवर्तमानग्रहहोराद्रेष्काणसप्तमांशद्वादशांशत्रिंशांशाधिपतीनां मूलत्रिकोणस्वर्क्षाधिमित्रमित्रसमार्यधिशत्रुगृहस्थितानां क्रमशः भूताब्धि ४५ खराम ३० नख २० तिथि १५ दिक् १० युग ४ द्वि २ परिमितं बलं ग्राह्यं अत्रेत्थं तत्त्वं रव्याद्यन्यतमस्य ग्रहाद्यन्यतमसप्तवर्गपतिः स्वमूलत्रिकोणे एव विद्यते चेत्तद्बलं ४५ ग्राह्यं तत्र चेत्स्वर्क्षस्थे सति तद्बलं ३० ग्राह्यम् तत्रापि न चेदधिमित्रस्थानस्थिते सति तद्बलं २० ग्राह्यम् तत्रापि न चेन्मित्रस्थाने स्थिते सति तद्बलं १५ ग्राह्यम् तत्रापि न चेत्समराशिस्थिते सति तद्बलं १० ग्राह्यम् तत्रापि न चेदरिस्थानस्थिते तद्बलम् ४ तत्राप्यसति अधिशत्रुस्थानजं बलं २ ग्राह्यम् । मूलत्रिकोणादिपूर्वपूर्वाधिके भावे उत्तरोत्तरक्रमशः उपलब्धगौणस्य

ग्राह्यत्वं ज्ञेयम् । मूलत्रिकोणादधिकमुच्चस्थानं तत्रस्थे गृहादिवर्गपतौ उच्चस्थानजमेव ग्राह्यम् । तदभावे मूलत्रिकोणादिजमिति पूर्वार्धे सप्तवर्गबलविचारप्रकरणे उच्चस्थबलग्राह्यत्वप्रामाण्यादिति । ननु कस्यापि ग्रहहोराद्याधिपस्य मूलत्रिकोणस्वक्षेत्रसंबंधद्वये । उच्चमूलत्रिकोणस्वक्षेत्रसंबंधत्रये च कथमिति चेत्पूर्वार्धोक्तिप्रामाण्याद्व्यवस्थोच्यते । तत्र रवेः सिंहराशिवर्तमानस्य मूलत्रिकोणस्वक्षेत्रस्थानद्वयसंबंधः अत्र २० अंशपर्यंतं वर्तमानस्य मूलत्रिकोणोक्तं ४५ बलं ततस्त्रिंशदंशपर्यंतं स्वक्षेत्रजं ३० बलं ग्राह्यम् । एवं वृषराशिवर्तमानस्य चंद्रस्य उच्चमूलत्रिकोणस्थानद्वयसंबंधः अत्र तु ३ अंशपर्यन्तमुच्चोक्तं १।०।० ततस्त्रिंशत्पर्यन्तं मूलत्रिकोणजं ४५ बलं ग्राह्यम् । एवं मेषराशिवर्तमानस्य भौमस्य मूलत्रिकोणस्वक्षेत्रसंबंधद्वयं अत्र १२ अंशपर्यंतं मूलत्रिकोणोक्तं ४५ ततश्च स्वक्षेत्रोक्तं ३० एवं कन्याराशिवर्तमानस्य बुधस्य उच्चमूलत्रिकोणस्वक्षेत्रस्थानत्रयसंबंधः अत्र तु १५ अंशावधि उच्चोक्तं १।०।० ततो विंशत्यंशपर्यन्तं त्रिकोणोक्तं ततस्त्रिंशदंशपर्यन्तं स्वक्षेत्रोक्तं ३० एवमेव धनूराशिस्थगुरोर्मूलत्रिकोणस्वक्षेत्रसंबंधः अत्र १० अंशपर्यंतं मूलत्रिकोणोक्तं ४५ ततः स्वक्षेत्रोक्तं ३० बलं ग्राह्यम् । एवं तुलाराशिस्थशुक्रस्य मूलत्रिकोणस्वक्षेत्रद्वयसंबंधः अत्र १५ अंशपर्यंतं मूलत्रिकोणोक्तं ४५ ततश्च स्वक्षेत्रोक्तं ३० एवं कुंभराशिवर्तमानस्य शनेर्मूलत्रिकोणक्षेत्रद्वयसंबंधः अत्र २० अंशपर्यन्तं मूलत्रिकोणोक्तं ४५ ततश्च स्वक्षेत्रोक्तं ३० बलं ग्राह्यम् । अस्योदाहरणम् । अथात्र क्रमान्मूलत्रिकोणस्वक्षाधिमित्रमित्रसमार्यधिशत्रुस्थानोक्तानि सप्तवर्गबलोदाहरणानि । रविः १०।४।१४।२२ कुंभस्थः तत्पतिः शनिः १०।८।१७।३० स्वमूलत्रिकोणस्थः अतस्तद्बलं स्वमूलत्रिकोणस्थोक्तं ४५ इति विंशत्यंशपर्यन्तम् । ततश्च स्वक्षेत्रस्थोक्तं ३० ग्राह्यमिति क्षेत्रबलविचारे मूलत्रिकोणस्थोदाहरणम् । अत्र तु कल्पितोदाहरणम् चंद्र ३।१०।५।२ अयं च० होरायां व० होरापतिश्चन्द्रः

स्वक्षेत्रस्थः अतः होराफलविचारे स्वक्षेत्रस्थोक्तबलं ३० स्वक्षेत्रोदाहरणम् । रविः १०।४।१४।१० अयं वृश्चिकनवांशे वर्तमानः तत्पतिर्भौमो मीनराशिस्थः तत्पतिगुरुर्भौमस्याधिमित्रः अतः अधिमित्रोक्तं बलं २० नवमांशविचारेणाऽत्र ग्राह्यमित्यधिमित्रबलोदाहरणम् । रविः १०।४।१४।२२ अयं मीनद्वादशांशे वर्तमानः तत्पतिर्गुरुर्मित्रक्षेत्रे वर्तमानः अतोऽत्र मित्रोक्तं बलं १५ ग्राह्यमिति मित्रबलम् । चंद्रः ८।२६।२९।९ अयं द्रेष्काणविशेषसिंहद्रेष्काणे वर्तमानः तत्पतिः सूर्यः समक्षेत्रस्थः अतोत्र समोक्त १० बलं ग्राह्यम् इति समबलोदाहरणम् ॥ ५ ॥ अथ बुधः ९।१०।३४ अयं कन्यासप्तमांशे वर्तमानः तत्पतिर्बुधः शनिक्षेत्रस्थः तस्य बुधेन पंचधा मैत्र्यां शत्रुत्वात् शत्रुबलं ४ ग्राह्यमिति सप्तमांशविचारे शत्रुबलोदाहरणमिति ॥ ६ ॥ रविः १०।८।७।९ अयं कुंभत्रिंशांशे स्थितः तत्पतिःशनिःअधिशत्रुक्षेत्रस्थः अतस्तद्बलं अधिशत्रूक्त २ त्रिंशांशविचारे ग्राह्यमिति अधिशत्रुबलोदाहरणम् ॥ ९ ॥

भाषा—अब सप्तवर्ग बल कहते हैं. जिन सूर्यादिक ग्रहोंका सप्तवर्गबल करना होवे तो वह ग्रह मूल त्रिकोणका होवे तो उसका बल ४५ लेना, स्वराशिका होवे तो तीसका बल लेना, अधिमित्रका होवे तो बीसका बल लेना, मित्रका होवे तो पंदरहका बल लेना, समस्थानका हो तो दसका बल लेना, शत्रुका होवे तो चारका बल लेना, अधिशत्रुका होवे तो दोका बल लेना ॥ ९ ॥

अथ पंचधा मैत्रीचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्रहाः
चं. मं.	सू. बु.	सू.चं.गु.	सू. शु.	चं. मं.	बु. श.	शु.	ऽमित्र.
बु.	मं. गु. गु.श.	बु. श.	मं. गु.	श.	गु.	गु.	मित्र.
गु.शु.श.	०	०	चं.	सू. शु. बु.	सू. चं.	मं.बु.सू.चं.	सम.
०	०	शु.	श.	०	मं.	०	शत्रु.
०	०	०	०	०	०	०	ऽधिशत्रु.

अथ सप्तवर्गचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्र.
११ श. स्व.	९ शु. मि.	१२ गु. मि.	१० श. स्व.	११ श. स्व.	१२ गु. मि.	१० श. स्व.	गृ.
५ सू. स्व.	४ चं. स्व.	५ सू. स्व.	४ चं. मि.	४ चं. मि.	४ चं. मि.	४ चं. मि.	हो.
११ श. स्व.	५ सू. स.	८ मं. ऽमि.	२ शु. मि.	३ बु. श.	१२ गु. मि.	१० श. स्व.	द्रे.
११ श. स्व.	२ शु. मि.	१२ गु. मि.	६ बु. श.	२ शु. मि.	७ शु. मि.	५ सू. स.	स.
८ मं. ऽमि.	८ मं. ऽमि.	१२ गु. मि.	६ बु. श.	११ श. स्व.	६ बु. श.	१२ गु. मि.	न.
१२ गु. मि.	७ शु. मि.	१० श. स्व.	२ शु. मि.	५ सू. स.	२ शु. मि.	१ मं. ऽमि	द्वा.
१ मं. ऽमि.	७ शु. ऽमि.	८ मं. ऽमि.	६ बु. श.	९ गु. ऽमि.	६ बु. श.	६ बु. श.	त्रिं.

अथ सप्तवर्गबलचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्रहाः
० ३० ०	० १५ ०	० १५ ०	० ३० ०	० ३० ०	० १५ ०	० ३० ०	गृ.
० ३० ०	० १५ ०	० १५ ०	० ३० ०	० ३० ०	० १५ ०	० ३० ०	हो.
० ३० ०	० १० ०	० २० ०	० १५ ०	० ४ ०	० १५ ०	० ३० ०	द्रे.
० ३० ०	० १५ ०	० १५ ०	० ४ ०	० १५ ०	० १५ ०	० १५ ०	स.
० ३० ०	० २० ०	० १५ ०	० २० ०	० ३० ०	० ४ ०	० १५ ०	न.
० १५ ०	० १५ ०	० ३० ०	० १५ ०	० १० ०	० १५ ०	० २० ०	द्वा.
० २० ०	० १५ ०	० २० ०	० ४ ०	० १५ ०	० ४ ०	० ४ ०	त्रिं.
३ ५ १	१ ४५ ०	२ १० ०	१ ५८ ०	२ १४ ०	१ २३ ०	१ २४ ०	योग.

भूताब्धयः खरामाश्च नखास्तिथिर्दिशो युगाः ॥
द्वाविंदुशुक्रौ युग्मांशे तिथिरोजांशगाः परे ॥ १० ॥

टीका--अथ स्थानबलांतर्गतं तृतीयं युग्मायुग्मबलमाह--द्वाविंदुशुक्रावित्यर्धेन । अत्र द्वाविति पदं पूर्वान्वयि इंदुशुक्रौ चंद्रभृगू युग्मांशे युग्मश्चासावंशश्च तस्मिन्समांशे ग्रंथांतरप्रामाण्याद्युग्मराशौ च संतौ तिथि १५ संख्याकं बलं दद्याताम् । एवं परे रविभौमबुधगुरुशनयः ओजांशगाः ओजश्चासावंशश्च तस्मिन्नागच्छंतीति तथा विषमांशगा इत्यर्थः । प्राग्वद्विषमराशिस्था अपि तिथिबलं १५

द्द्युरिति अर्थादुक्तान्यराश्यंशगता बलहीना इति ज्ञेयम् । अत्रोदाहरणमाह । अथ युग्मायुग्मबलोदाहरणम् । चंद्रशुक्रौ ८।२६।२९।० इमौ अयुग्मराशिसंबंधियुग्मनवांशे वर्तमानौ अतस्तद्बलं युग्मांशविचारेण ग्राह्यम् । अपि च चंद्रशुक्रौ १।४।४।५ विषमांस्थावपि ग्रंथांतरप्रामाण्यात्समराशिस्थित्या १५ बलं दत्त इतियुग्मबलोदाहरणम् । अथायुग्मबलोदाहरणम् । रविभौमबुधगुरुशनय एते पंच ग्रहाः १।४।५।७ एवं युग्मराशावपि विषमांशस्थित्या अपि च २। ४।५।७ एवं युग्मांशस्था अपि विषमराशिस्थित्या बलं १५ दद्युरित्ययुग्मोदाहरणम् ॥ १० ॥

अथ युग्मायुग्मबलचक्रम्.								अथ केंद्रादिबलचक्रमिदम्.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.	सू.	चं.	म.	बु.	गु.	शु.	श.	यो.
० ० ०	० १५ ०	० ० ०	० १५ ०	० १५ ०	० १५ ०	० ० ०	० ० ०	० ३० ०	० १५ ०	० १५ ०	१ ० ०	० ३० ०	० १५ ०	१ ० ०	३ ४५ ०

भाषा—अब युग्मायुग्म बल कहते हैं. चंद्र और शुक्र यह दोनों समराशि सम नवमांशके होवें तो पंदरहका बल लेना. विषम राशि विषम नवमांशके होवें तो बलहीन शून्य बल जानना. और सूर्य, मंगल, बुध, गुरु, शनि, यह विषम राशि विषम नवमांशके होवें तो १५ का बल लेना. और सम राशि सम नवमांशके होवें तो शून्य बल जानना ॥ १० ॥

केंद्रादिषुस्थिता लग्नात्षष्टिस्त्रिंशात्तिथिः क्रमात् ॥
आदिमध्यावसानेषु द्रेष्काणेषु स्थिताः क्रमात्
॥ ११ ॥ पुन्नपुंसकयोषाख्या दद्युस्तिथिबलं ग्रहाः ॥
स्वषड्वर्गगतास्त्रिंशदेवं स्थानबलं विदुः ॥ १२ ॥

टीका–अथ स्थानबलांतर्गतं चतुर्थं केन्द्रादिबलमाह–केन्द्रेत्यर्धेन । लग्नात्सकाशात्केंद्रादिषु स्थिताः केंद्राणि आदीनि येषु तानि पणफरापोक्लिमानि तेषु केंद्रपणफरापोक्लिमेषु स्थिताः क्रमेण षष्टिः ६० त्रिंशत् ३० तिथिः १५ बलानि दद्युरिति । अथात्र केन्द्रबलोदाहरणम् । जन्मलग्नं ५।२।२७।४ कन्यास्थं अस्य केन्द्राणि कन्याधनुर्मीनमिथुनानि अत्रस्था ग्रहाः षष्टिः ६० बलदाः । तुलामकरमेषकर्काणि पणफरसंज्ञानि अत्रस्था ग्रहाः ३० बलदाः । वृश्चिककुंभवृषभसिंहाख्यानि आपोक्लिमसंज्ञानि अत्रस्था ग्रहाः १५ बलदाः । इति केंद्रादिबलोदाहरणम् । अथ स्थानबलांतर्गतं पंचमं द्रेष्काणबलमाह–आदीतिद्वादशश्लोकपर्यंतम् । ग्रहा रव्यादयः आदिमध्यावसानेषु प्रथममध्यमांत्येषु द्रेष्काणेषु क्रमात् क्रमेण पुंनपुंसकयोषाख्याः एतत्संज्ञकाः स्थिताः वर्तमानाः संतास्तिथिबलं १५ दद्युः । एते एव षड्वर्गगताः स्वेषां षड्वर्गेषु गताः वर्तमानाः संतः त्रिंशत् ३० बलं दद्युः अर्थात् क्रमोक्तान्यद्रेष्काणे वर्तमाना विबला इत्यर्थः । एवमुक्तपंचप्रकारकम् । स्थानबलं विदुः पूर्वाचार्या इत्यध्याहारः । अथ द्रेष्काणबलोदाहरणम् । जन्मलग्नं ५ । ८।२७।४ सूर्यभौमगुरवः एते पुरुषसंज्ञका ग्रहाः ५ । ७ । २ । ९ अथ वा ७।४।११।५ एवं वर्तमानाः कन्याप्रथमद्रेष्काणे वृश्चिकप्रथमद्रेष्काणे वा वर्तमानाः अतः १५ फलदाः पुंस्त्वे सति प्रथमद्रेष्काणे स्थितत्वात् बुधशनी क्लीबसंज्ञौ ५।१३।९।१७ अथ वा ९।१७।१५।१२ एवं वर्तमानाः एवं कन्याद्वितीयद्रेष्काणे मकरद्वितीयद्रेष्काणे वा वर्तमानाः अतः १५ फलदौ भवतः क्लीबत्वे सति द्वितीयद्रेष्काणस्थत्वात् तथा शुक्रचंद्रौ स्त्रीसंज्ञकौ ५।२२।१७।२ अथ वा १०।२५।७।५ एवं कन्यान्त्यद्रेष्काणे कुभांत्यद्रेष्काणे वा वर्तमानौ अतः १५ फलदौ ज्ञेयौ स्त्रीत्वे सति अंत्यद्रेष्काणे स्थितत्वात् तथा एते एव षड्वर्गविभागेन स्ववर्गगताः संतः ३ बलं दद्युरिति ॥ ११ ॥ १२ ॥

भाषा-अब ग्रहोंका केंद्रबल कहते हैं. जन्मलग्नसे जो ग्रह केंद्र स्थानमें १।४।७।१०। बैठा होवे तो साठका बल लेना, और लग्नसे जो ग्रह २।५।८।११ यह पणफर स्थानमें बैठा होवे तो तीसका बल लेना, और लग्नसे ३।६।९।१२ यह आपोक्लिम स्थानमें बैठा होवे तो पंद्रहका बल लेना। अथ द्रेष्काणबल कहते हैं. पुरुषग्रह सूर्य, मंगल, गुरु, यह तीन प्रथम द्रेष्काणमें कहते हैं। दश अंशके अंदर होवे तो १५ का बल लेना. दससे ज्यादा अंश होवे तो बलहीन जानना. ऐसा नपुंसक ग्रह बुध शनि यह दोनों मध्य द्रेष्काणमें अर्थात् दस अंशसे ज्यादा व बीसके अंदर होवे तो १५ का बल लेना अन्यथा बलहीन जानना. स्त्रीग्रह शुक्र चंद्र तीसरे द्रेष्काणमें होवे तो पंद्रहका बल लेना अन्यथा बलहीन जानना. इस द्रेष्काणमें थोडा विशेष कहते हैं. जो ग्रह अपने ग्रह होरा आदि षड्वर्गमें होवे तो तीसका बल लेना ॥ ११ ॥ १२ ॥

अथ द्रेष्काणबलचक्रम्.								अथ पंचानां योगचक्रम्.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.	सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	०	०	०	०	०	०	०	४	२	३	३	३	२	३	२४
१५	१५	०	१५	०	०	०	४५	२८	४७	२५	४५	१२	४६	५७	२७
०	०	०	०	०	०	०	०	४	२९	१९	२९	३३	२४	५४	१२

अर्कात्कुजात्सुखं जीवाज्ज्ञाच्चास्तं लग्नमार्कितः ॥
मध्यलग्नं भृगोश्चंद्राच्छित्वा षड्भाधिके सति ॥ १३ ॥

टीका-एवं षड्वर्गांतर्गतं पंचविधं प्रथमं स्थानबलमुक्त्वा द्वितीयं दिग्बलमाह-अर्कादित्यादिसार्धेन । अर्काद्रवेः कुजाद्भौमात्सुखं चतुर्थभावं विशोध्य षड्भाधिके षड्राश्यधिकेऽवशिष्टे सति चक्रात् १२ अंकात् विशोध्य शेषं भागीकृत्य राशिभागान् भागस्थानांके संयोज्य रामाप्तं त्रिभिर्भक्तं यत्फलं तद्बलं भवति एममग्रे जीवाद्गुरोः ज्ञात्

बुधाच्च अस्तं सप्तमभावं विशोध्य प्राग्वत्संस्कारे कृते बलं भवति एवमार्कितः शनेः लग्नं तनुभावं विशोध्य तथा भृगोः शुक्राच्चंद्राच्च मध्यलग्नं दशमभावं हित्वा विशोध्य प्राग्वत्षड्भाधिके चक्राद्विशोध्य भागीकृत्य च रामाप्तं फलमेव तद्बलं भवति इति दिग्बलम् । अथोदाहरणम् । अर्कः १०।४।१४। अस्माच्चतुर्भावं ३।१।१९ हित्वा शेषं ७।२।५५ इदं षड्भाधिकं चक्राद्विशोध्यावाशिष्टं ४।२७।५ अस्य भागाः १४७।५ त्रिभिर्भक्ताः लब्धं फलं ०।४९।१ जातं रविदिग्बलं एवं सर्वत्र ज्ञेयामिति ॥ १३ ॥

भाषा–अब ग्रहोंका दिशाका बल कहते हैं, राश्यादि सूर्यमें और राश्यादिमंगलमें चतुर्थ भावकी राश्यादिक कमी करके शेषांक छःसे ज्यादा होवे तो बारहमें घटायके राशीको अंशादिक करके तीनसे भाग लेना जो लब्ध आवे वो दिग्बल जानना. ऐसा गुरुबुधमें सप्तम भाव घटायके पूर्वसरीखा बल लाना. और शनिमें लग्न कम करना. शुक्र और चंद्रमें दशमभाव घटायके पूर्वरीतिप्रमाणसे बल जनना। इति दिग्बलम् ॥ १३॥

अथ दिग्बलचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	०	०	०	०	०	०	३
४९	१	३२	३१	४३	२१	२९	२८
१	५६	२५	३०	१२	५८	१५	१७

चक्राद्विशोध्य रामाप्तं भागीकृत्य च तद्बलम् ॥
आमध्याह्नादर्धरात्राद्दिवारात्रिरिति क्रमात् ॥ १४ ॥
अर्कभार्गवसूरीणां द्विघ्ना नाड्यो गता दिवा ॥
भौमचंद्रशनीनां तु षष्टिभ्यो वर्जयेदिमाः ॥ १५ ॥

टीका–अथ षड्बलांतर्गतं तृतीयं कालबलं सार्धविंशतिश्लोकपर्यंतं तत्रादौ आमध्याह्नादित्यादिसपादद्वयेन नतोन्नतबलमाह । आमध्याह्नात् अर्धरात्रं मध्याह्नमारभ्यार्धरात्रपर्यंतं मध्यरात्रिमारभ्य मध्याह्नपर्यंतं दिवा दिवसः रात्रिः प्रसिद्धा इति क्रमात् नतो-

न्नते ग्राह्ये एवमुक्तं भवति मध्याह्नमारभ्यार्धरात्रिपर्यंतं इष्टकालस्य नतं कृत्वा तदेवाग्रिमसंस्कारे ग्राह्यम् । मध्यरात्रिमारभ्य मध्याह्ननतं इष्टकालसमुत्पादितनतस्य उन्नतं कृत्वाग्रिमसंस्कारे ग्राह्यमिति । अथ दिवाशब्दोक्तोन्नतस्य नाड्यो द्विघ्नाः द्विगुणिताः अर्कभार्गवसूरीणां रविशुक्रगुरूणां दिवाबलं भवति तथा उक्तनाड्यः इमाः षष्टिभ्यो वर्जिताः कृत्वा यदवाशिष्टं तत्तेषामेव रात्रिबलं भवति भौमचंद्रशनीनां तु अन्यथा उत्क्रमाविपर्ययेण ज्ञेयम् । एवमुक्तं भवति अर्कभार्गवसूरीणां दिवाबालवत्संस्कृतं भौमचंद्रशनीनां रात्रिबलं भवति तथा तेषां उक्तरात्रिबलवत्संस्कृतम् एषां दिवाबलं भवति इत्यन्यथाशब्देन भौमादित्रयाणां विलोमसंस्कारो ज्ञेय इति तस्य बुधस्य सदा सर्वकालं घटिरेव एतत्संख्याकं कलात्मकं रूपं संज्ञकं बलं ज्ञेयम् तस्य नान्यः संस्कारः नियतत्वादिति । अथैषामुदाहरणम् । इष्टं ८।१६ दिनार्धम् १३।५४ अनयोरंतरं ५।३८ अस्योन्नतं २४।२२ एतद्द्विघ्नं ४८।४४ जातमेतद्रविशुक्रगुरूणां दिवाबलम् एतदेव षष्टिच्युतं ११।१६ जातमेतच्चंद्रभौमशनीना दिवाबलं रात्रिबलं तु अतोन्यथा एताद्विपरीतं तदित्थं प्रागर्कभार्गवसौरिसंस्काराविहित ४८।४४ चंद्रभौमशनिरात्रिबलं जातं तथा च यच्चंद्रभौमशनिविहित ११ । १६ जातमेतदर्कभार्गवसूरीणामर्कबलमिति ॥ १४ ॥ १५ ॥

भाषा–अब नतोन्नत बल कहते हैं. मध्याह्न काल लेके अर्ध रात्रपर्यंत जो समय इष्टकाल होवे तो दिवाबल. नतके तरफसे सूर्य, शुक्र, गुरु देते हैं, और उस बलको साठमें घटानेसे मंगल, चंद्र, शनि दिवाबल देते हैं. मध्यरात्रिसे लेके मध्याह्नपर्यंत इष्टकाल होवे तो रात्रिबल नतको लायके पीछे नतसे उन्नत लायके द्विगुणित करके जो फल आया वो चंद्र, मंगल, शनिका रात्रिबल जानना. और वो बलको साठमें कम किये तो सूर्य, शुक्र, गुरुका रात्रिबल होता है. इसका टीकामें उदाहरण बताया है. और बुधका सदैव साठका बल है ॥ १४ ॥ १५ ॥

दिवाबलमिति प्रोक्तं बलं नैशं ततोऽन्यथा ॥ षष्टिरेव सदा ज्ञस्य चंद्रादर्कं विशोध्य च ॥ १६॥ अंगाधिके विशोध्यार्काद्भागीकृत्यात्रिभिर्भजेत् ॥ पक्षजं बलमिंदुज्ञशुक्रार्याणां तु षष्टितः ॥ १७ ॥

टीका-अथ कालबलांतर्गतं द्वितीयं पक्षबलमाह-चंद्रादित्यादि किंचिदधिकसप्तदशश्लोकपर्यंतम् । चंद्रात्सकाशात् अर्कं विशोध्यावशिष्टं राश्यादिकम् अंगाधिके षडधिके सति अर्कात् १२ राशिभ्यः विशोध्य, अवशिष्टं भागीकृत्य राशिभागान् भागांकेषु संयोज्य त्रिभिर्भजेत् तत उत्पन्नं फलं इंदुज्ञशुक्रार्याणां चंद्रबुधशुक्रगुरूणां पक्षजं पक्षसमुत्पन्नं बलं भवति तथा एतदेव ६० षष्टितः सकाशाद्धित्वाऽवशिष्टं फलम् अन्येषां रविभौमशनीनां पक्षजबलं ज्ञेयमिति । अस्योदाहरणम् । चंद्रः ८ । २५ । २९ अस्मादर्कं १०।४। १४ एवंभूतं विशोध्य ऊनं कृत्वा शेषं १० । २१ । १५ एतदंगाधिकमतः चक्रविशोधितं जातं १ । ८ । ४५ एतद्भागीकृत्य जातं ३८।४५ त्रिभिर्भक्तं लब्ध फलं ० । १२ । ५५ जातं तदिंदुज्ञशुक्रगुरूणां पक्षबलोदाहरणम् एतदेव षष्टितो हित्वा शेषं फलं ० । ४७ । ५ जातमेतद्रविभौमशनीनां पक्षबलोदाहरणम् ॥ १६ ॥ १७ ॥

अथ नतोन्नतबलचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	०	०	०	०	०	०	४
४८	११	११	०	४८	४८	१६	०
४४	१६	१६	०	४४	४४	११	०

अथ पक्षबलचक्रमिदम.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	०	०	०	०	०	०	३
४०	१२	४७	१२	१२	१२	४७	१२
५	५५	५	५५	५५	५५	०	१५

भाषा-अब पक्षबल कहते हैं. स्पष्ट राश्यादि चंद्रमें स्पष्ट राश्यादि सूर्यको घटायके शेष अंक छः से ज्यादा होवे तौ बारहमें घटायके राश्यादि-

कको अंशादिक करकें तीससे भाग लेना. जो लब्ध आवे ओ फल चंद्र, बुध, शुक्र, गुरुका पक्षबल जानना. पीछे ओ फलको साठमें घटाये तो शेष फल जो आवे वो सूर्य, मंगल, शनिका पक्षबल जानना. उदाहरण टीकामें स्पष्ट है ॥ १६ ॥ १७ ॥

हित्वान्येषामहोरात्रिं त्रिभागीकृत्य यत्र तु ॥ जन्मलग्नतदंशाधिपतेः षष्टिबलं भवेत् ॥ १८ ॥ आधाने चित्प्रवेशे तु त्रिंशद्भूतार्णवा बलम् ॥ ज्ञाऽर्कमंदेंदुशुक्राराः पतयः सर्वदा गुरुः ॥ १९ ॥

टीका-अथ कालबलांतर्गतं तृतीयं दिनरात्रीविभागबलमाह-अहोरात्रिमित्याद्येकोनविंशतिश्लोकपर्यंतम् । अहः त्रिभागीकृत्य रात्रिश्च त्रिभागीकृत्य तेषां अहोरात्रिषड्भागानां ज्ञार्कमन्देन्दुशुक्राराः बुधरविशनिचंद्रशुक्रभौमाः क्रमात्षट् पतयो ज्ञेयाः ततः यत्र तु कुत्रापि दिनरात्रित्रिभागे जन्मलग्नं भवति तदंशाधिपतेः तस्य अंशस्य दिनरात्र्यंतर्गतेऽष्टत्रिभागस्य यः अधिपतिः पूर्वोक्तज्ञार्केत्याद्यंतर्गतः तस्य षष्टिबलं रूपबलमित्यर्थः । ग्राह्यं तेनैव क्रमेणाधानकालविचारे त्रिंशत् ३० बलं ग्राह्यम् तेनैव क्रमेण चित्प्रवेशे चितश्चैतन्यस्य प्रवेशः आगमः तस्य विचारे तु भूतार्णवाः ४५ बलं ग्राह्यम् अपि च सर्वदा सर्वरात्रिदिवात्रिभागेषु गुरुः सर्वदा दिनरात्रिसर्वत्रिभागेषु जन्मलग्नाधानचित्प्रवेशविचारे च रूपबलदो ज्ञेयः। अथोदाहरणम् । दिनमानं २७ । ४८ । तस्य त्रिभागः ९ । १६ इष्टं १२ । १७ एतत्कालीनं लग्नं आधानं चित्प्रवेशश्च दिनाद्वितीयभागे वर्तते अतोस्य पतिः रविः लग्ने १ । ० । ० तथा आधाने ० । ३० । ० अर्धबलं तथा चित्प्रवेशे ० । ४५ । ० पादोनम् एवं क्रमेण बलदो ज्ञेयः ।

गुरोस्तु सर्वदा बलदत्वात्स्पष्टमुदाहरणम् एवं सर्वत्र ज्ञातव्यमिति ॥ १८ ॥ १९ ॥

अथ दिनरात्रित्रिभागचक्रम्.								अथ वर्षमासादि चक्रम्.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.	सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
१	०	०	०	१	०	०	२	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	३०	०	०	०	४५	०	१५	३०
०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०

भाषा—अब दिनरात्रिका बल कहते हैं. दिनके तीन भाग और रात्रिके तीन भाग करके वे छः भागके छः अधिपति हैं. बुध, सूर्य, शनि, चंद्र, शुक्र, मंगल ये छः ग्रह हैं, क्रमकरके जानना पीछे जिस भागमें लग्न होवे उस भागका जो अधिपति होवे वो ६० साठ कलात्मक बल देता है. और यही रीतिसे आधानकालका विचार होवे, तो तीस ३० का बल ग्रह देता है. चैतन्यप्रवेशकालका विचार होवे तो पैंतालीस ४५ का बल देता है अन्य ग्रहोंकी बलहीनता जाननी. गुरुका सदैव एक बल है ॥ १८ ॥ १९ ॥

वर्षमासदिनेशानां तिथिस्त्रिंशच्छरार्णवाः ॥
कालहोराधिपस्यैवं पूर्ण बलमुदाहृतम् ॥ २० ॥

टीका—अथ कालबलांतर्गतं चतुर्थं वर्षमासदिनहोरेशबलमाह—वर्षेतिसार्धश्लोकेन । वर्षमासदिनेशानां वर्षमासदिनपतीनां क्रमात् तिथिः १५ त्रिंशत् ३० शरार्णवाः ४५ कालहोराधिपस्य होरापतेः एवं पूर्णरूपं बलम् उदाहृतं कथितम् आधाने तु वर्णादीनां चतुर्णामपि त्रिंशत् ३० अर्धबलं ग्राह्यम् तथा चित्प्रवेशे शरजलाकराः ४५ पादोनं बलं ग्राह्यमिति । अथ वर्षादिपत्युत्पादनं श्लोकोक्तविषयोदाहरणं च अत्र केशव्युदाहरणोक्तश्लोकः । "दिष्टोयं ग्रहलाघवद्युनिचयश्चक्राहतेः षट्शरैः ५६ षट्-

दस्रै २६ श्च युतः सबाणतपनः १२५ सेषु ५ श्च खांगाग्निभिः ॥ ३६० खाज्याशौ ३० र्विहृतः फले गुण ३ यम २ घ्ने चक्रनिघ्नक्षखो ५।० एते द्वि २ त्रि ३ युते नगो ७ र्वरितकेऽस्तेर्कास्तमामासपौ ॥” ग्रहलाघवद्युनिचयः १८३२ चक्रं २९ अनेन हतैः गुणितैः षट्शरैः ५६ जातैः १६२४ युतः ३४५६ सबाणतपनः १२५ एभिर्युक्तः २५८१ खांगाग्निभिः ३६० भक्तं जातं फलं ९ गुण ३ घ्नं २७ एतत् चक्रं २९ अनेन निघ्नाऽक्षाः ५ जाताः १४५ एभिरुपेतं १७२ एतत् द्वि २ युतं १७४ इदं नगोर्वरितं सप्तभिस्तष्टं शेषं जातो रविः क्रमेण षष्ठो वर्षपः शुक्रः विद्यमानो वर्षपः शनिरिति। अथ मासेशानयनोदाहरणम्। द्युनिचयः १८३२ चक्रं २९ तेन हतैः षट्दस्रैः २६ जातैः ७५४ युतः २५८६ सेषुः ५ युतः २५९१ खाज्याशैः ३० एभिर्हृतः फलं ८६ इदं यमघ्नं १७२ चक्रनिघ्नखोपेतं नामांकांतरयोगाभावः ततः त्रियुतं १७५ नगोर्वरितं सप्ततष्टं शेषं० गतो रविः क्रमेण सप्तममासपतिः शनिः वर्तमानो रविरिति । अत्र जन्मवारपतिर्गुरुः अस्मिन्विषये जन्मवारपतिरेव दिनेश इति बोध्यम् । अथ होरेशानयनोदाहरणं मुहूर्तमार्तंडोक्तम् “ द्विघ्नैकोनविलग्नके रविसितज्ञेंद्वार्किजीवासृजो होरेशा द्युपतेः खलेऽह्नि खलजा होरा शुभे मध्यमा ॥” अर्कः १०।४।१४।२२ विलग्नं ०।६।३।४२ एतदर्केण ऊनं जातं २।१।४।२० द्विघ्नं जातं ४।३।३८।४० एतत्सप्ताधिकाभावान्न सप्ततष्टप्राप्तिः अस्य राशिस्थानांक ४ परिमितः द्युपतेः गुरोः सकाशात् रविसितज्ञेंद्वार्किजीवासृज इति क्रमेण चतुर्थं शुक्रः गतहोरापतिः अर्थात् वर्तमानहोरापतिः पंचमो ज्ञः बुधः ज्ञेय इति । एवं च अस्मिन्नुदाहरणे वर्षपतिः शनिः अस्य बलं १५ मासपतिः रविः अस्य बलं ३० दिनपतिः गुरुः अस्य बलं ४५ होरापतिर्बुधः अस्य बलं १।०।० एवं च रवेः नतोन्नतबलं ०।४८।४४ पक्षबलं ०।४७।५।

दिनरात्रिबलं १।०।० वर्षपत्यादिबलं० ।३०। एतेषां चतुर्णां योगः जातं कालबलं सूर्यस्य ३।५।४९ एवं सर्वेषां ज्ञातव्यमिति ॥ २०

भाषा--अब वर्षपति, मासपति, दिनपतिका बल कहते हैं. गणितका उदाहरण टीकामें दिखाया है. उस मार्गसे वर्षेश, मासेश दिनेश निकालके बल लेना. वर्षपतिके बलमें १५ पंदरह कलात्मक बल लेना. मासपतिके बलमें ३० तीस कलात्मक बल लेना दिनपतिके विचारमें दिनपतिका पैंतालीस ४५ कलात्मक बल लेना अन्य ग्रहोंका शून्य है इष्टकालमें जिस ग्रहकी होरा उस ग्रहका होराबल एक लेना. पीछे सब बलोंका ऐक्य करना सो ग्रहोंका कालबल भया ॥ २० ॥

अथ कालबलचक्रम्.

सू	चं.	मं.	बु.	गु.	शु.	श.	यो
३	०	०	१	२	२	१	[illegible]
४५	२४	५८	४७	४६	१	१३	[illegible]
४९	११	२१	५	३९	३८	२१	४

आधाने चित्प्रवेशे तु त्रिंशच्छरजलाकराः ॥ सायनांशग्रहभुजराशीनिष्वब्धिभिः सुरैः ॥ २१ ॥ सूर्यैर्हत्वा क्रमाद्राशिभागः स्यादनुपाततः ॥ एवं राश्यादिके युंज्यादर्करायोंशनःसु च ॥ २२ ॥ राशित्रयमथो युंज्यान्मेषादिस्थेषु तेष्वथ ॥ तुलादिस्थेषु राश्यादींस्त्रिराशिभ्यस्तु वर्जयेत् ॥ २३ ॥ चंद्राक्योर्विपरितं स्यात्सदा युंज्याद्बुधस्य तु ॥ भागीकृत्य त्रिभिर्भक्तं ग्रहाणामायनं बलम् ॥ २४ ॥

टीका-- अथ षड्बलांतर्गतं चतुर्थमयनचेष्टाबलद्वयात्मकं बलं तत्रादौ अयनांशेत्यादिसपादचतुर्विंशतिश्लोकावधि अयनबलमाह । सायनांशग्रहभुजराशीन् अयनांशैः सहितस्य ग्रहस्य यो भुजः स्वल्पता तद्राशिपरिमितानि इष्वब्धिसुरसूर्यसंज्ञकानि खंडानि तैः

हत्वा भागादि गुणयित्वा एवमुक्तं भवति सायनांशभुजराश्यंकज्ञेयानि ध्रुवांकरूपाणि तानि च इष्वब्धि ४५ परिमितं प्रथमं सुर ३३ परिमितं द्वितीयं सूर्य १२ परिमितं तृतीयम् एवं त्रीणि खंडानि क्रमाद्ग्रहभुजाराशिस्थानविद्यमानपूर्णैकाद्विपरिमितस्थानविचारेण ४५। ३३। १२ इमानि अधस्ताद्वर्तमानभागादिगुणकानि ज्ञात्वा गुणयेत् तद्यथा उपरिस्थराश्यंके पूर्णे सति भागादिकं ४५ अनेन गुणयेत् तस्मिन्नेके सति भागादिकं ३३ अनेन गुणयेत् तथा तस्मिन्द्विपरिमिते सति १२ अनेन भागादिकं गुणयेत् तस्माद्यत्त्रिशङ्कफलम् अंशकलाविकलात्मकं तत् गतखंडयुक्तं कार्यं गतखंडद्वये तद्द्वयैक्ययोगः ततश्च भागं त्रिंशद्भिर्भक्त्वा राशिस्थाने योजयेत् अनंतरं एवं राश्यादिके फले पूर्वकृतसायनग्रहे मेषादिषट्कस्थे सति अर्कारार्योशनःसु रविभौमगुरुशुक्रेषु बलार्थं गृह्यमाणेषु सत्सु राशित्रयं युंज्यात् तेषु तुलादिषट्कस्थेषु सत्सु तु त्रिराशिभ्यः वर्जयेत् त्रिपरिमितराशौ पूर्वलब्धं राश्यादिकं हीनं कुर्यात् । अथ च चंद्रार्कयोः चंद्रशनैश्चरयोः विपरीतं विलोमं तद्यथा मेषादिषट्के त्रिराशिभ्यो वर्जनं, तुलादिषट्के राशित्रयसंयोजनं कार्यम् । बुधस्य तु बुधबलविचारे सदा द्वादशराशिष्वपि राशित्रयं युंज्यादेव न तु प्राग्वद्राशिविचारेण विलोमानुलोमतः अपि च भागीकृत्य राशिभागस्थाने संयोज्य त्रिभिर्भक्तंफलं अयनबलं भवति तत्र एवं लब्धबलं द्विगुणीकृतं रविबलं भवतीति रविविषये विशेषसंस्कारः । अत्रोदाहर-

अथ अयनबलचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	योग.
० २७ १५	० ५७ ४०	० ३९ ३२	० ५५ ९	० १८ ५०	० १८ ४५	० ५५ ५३	० २३ ४

णम् । रविः १० । ४ । १४ । अयनांशाः २२ । १ एतद्योगेन रविः १० । २६ । १५ अस्य भुजः १ । ३ । ४५ अस्य राश्यंकः १ तत्परिमितं ४५ खंडं प्रथमं गतं एष्यखंडं द्वितीयम् ३३ अनेन भुजभागादि ३ । ४५ गुणितं जातं १२३ । ४५ एतस्मात् त्रिंशद्भक्तलब्धांशादि फलम् ४ । ७ । । ३० एतद्गतखण्डेन ४५ अनेन युक्तं कृत्वा जाताः ४९ । ७ । ३० एतदंशत्रिंशद्भागलब्धम् राशिस्थानांकः अधःस्थमंशादिकं च १ । १ । ७ । ३ एतत् सायनरवेस्तुलादिषट्कवर्तमानत्वात् त्रिराशिषु हीनं कृत्वा जातम् १ । १० । ५२ । ३० अस्य भागादि ४० । ५२ । ३० एतत् त्रिभिर्भक्त्वा जातं फलम् १३ । ३७ । ३० एतत्सूर्यबलत्वाद्द्विगुणीकृतं जातम् ० । २७ । १५ । ० एवमयनबलम् एवं रीतिः सर्वत्र ज्ञेयेति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

भाषा—अब अयनबल कहते हैं. तात्कालिक स्पष्ट ग्रह करके उन्होंमें अयनांश कला विकला मिलायके उसका भुज करके फेर भुजकी राशि देखना जो राशिके ठिकाने पूर्ण होवे तो शेषांक पैंतालीससे गुणन करना. एक होवे तो तेंतीस ३३ गुणन कराना दो होवे तो बारहसे गुणन करके तीससे भाग लेना. लब्ध अंशादिक फल आवे उसमें गतखंड जोडना पीछे राश्यादि करके तुलादि छः राशिमें होवे तो तीन घटाना मेषादि छः राशिमें होवे तो तीन मिलाना परंतु चंद्र शनि यह दोनोंको उलटा जानना जैसा मेषादि छः राशिमें होवे तो तीन घटाना तुलादि,छः राशिमें होवे तो मिलाना. और बुध ग्रहको तो सर्वकाल १२ बारह राशिमेंसे कोई हो परंतु ३ मिलाना और सूर्यके बल द्विगुणित करना ॥२१॥२२॥२३॥२४॥

रवेर्द्विगुणमेवं स्याद्युध्यतोर्ग्रहयोरथ ॥
विश्लेषं बलयोश्चापि निर्जितस्य बलं भवेत् ॥२५॥

टीका–अथ चेष्टाबलक्रमप्राप्तं भौमादिग्रहयुद्धबलमाह–युध्यतोरित्यादिसार्धपंचविंशतिश्लोकपर्यन्तम् । अथ ग्रहयोः भौमाद्यन्यतमयोर्द्वयोः युध्यतोः युद्धं कुर्वतोः सतोः । अस्यार्थः जन्मकाले ग्रहयोः समराश्यां कलाविकलारूपयोः युद्धं ज्ञेयम् तद्बलं तु इत्थं युध्यतोः ग्रहयोः प्रागुक्तबलैक्ययोः विश्लेषमंतरं कृत्वा निर्जितस्य पराभूतस्य ग्रहस्य बलैक्यमध्ये विश्लेषांतरेऽपनीते हीने कृते सति निर्जितस्य बलं दक्षिणदिग्गतं भवेत् । अथ च जितस्य जेतुः बलैक्यमध्ये विश्लेषांतरे योजिते जितस्य जेतुः उत्तरादिग्गतं बलं भवेत् । अत्र कल्पितमुदाहरणम् । जन्मकाले बुधः । ५ । २ । ७ । ९ शुक्रः ५ । २ । ७ ९ बुधबलैक्यं ३ । २ । १ शुक्रबलैक्यं २ । ५ । ३ अनयोरंतरं० । ५६ । ५८ एतन्निर्जितस्य न्यूनबलस्य शुक्रस्य बलमध्ये २ । ५ । ३० अपनीतं हीनं कृतं जातं १ । ८ । ५ शुक्रबलं तदेवांतरं ० । ५६ । ५८ जितस्य जेतुः बुधस्य बलैक्ये ३ । २ । १ योजितं ३ । ५८ । ५९ एतज्जातं जेतुर्बुधस्य बलमिति ॥ २५ ॥

भाषा–अब ग्रहोंका युद्धबल कहते हैं. युद्धका लक्षण ऐसा कि जन्मकालकी बखत जो ग्रह राशि अंश कला विकलासे दूसरेके समान होवे तो वो दोनों ग्रहोंका युद्ध जानना. इसमें जित पराजितादिकोंका बल लानेकी विधि बतलाते हैं. युद्ध करनेवाले दोनों ग्रहोंका पहले कहा हुवा बलैक्य है उन दोनोंका अंतर करके जो बलमें हीन है वह निर्जित (हारा) जानना. उसके बलैक्यमें अंतरके अंक हीन करना वो दक्षिण दिशाका निर्जितबल जानना. और जिसका बलैक्यका अंक ज्यादा है वो जित हुआ ऐसा जानना. उसके बलैक्यमें अंतर मिलाना तो उत्तर दिशाका बल आया ॥ २५ ॥

अपनीते योजिते तु जितस्य च बलं भवेत् ॥
पष्टिर्वक्रगतेर्वीर्यमनुवक्रगते दलम् ॥ २६ ॥ पादं

विकलभुक्तेः स्याद्दलमेव समागमे ॥ पादं मंदगतेस्तस्य दलं मन्दतरस्य च ॥ २७ ॥

टीका--अथ प्रसंगप्राप्तं गतिबलमाह–षष्टिरिति सार्धसप्तविंशतिश्लोकपर्यन्तम् । वक्रगतेः वक्रा गतिर्यस्य तस्य ग्रहस्य वीर्यं बलं षष्टिः ६० रूपबलम् अनुवक्रगतेः ऋजुगतेरित्यर्थः । दलं त्रिंशत् ३० बल विकलभुक्तेः विकला रविसाहचर्यान्निर्बला भुक्तिर्यस्य तस्य रविसहितस्येत्यर्थः । पादं बलं १५ तथा समागमे समः आगमो गतिर्यस्य तस्य चंद्रसाहितस्येत्यर्थः । दलमेव ३० बलं मंदगतेः मंदा मध्यमा निरल्पा गतिर्यस्य तस्य पादं १५ बलं मंदतरस्य पूर्वतोऽपि अल्पतरगतेः तस्य पादस्य दलं ७।३० बलं शीघ्रभुक्तेः शीघ्रा मध्यमाधिका भुक्तिर्यस्य तस्य पादोनं ४५ बलं शीघ्रतरस्य पूर्वतः अतिशीघ्रगस्य ग्रहस्य दलं ३० बलं एवं गतिबलं ज्ञेयमिति॥२६॥ २७॥

भाषा–अब गतिबल कहते हैं, जो ग्रह वक्री है उसका ६० साठ बल लेना, और जो सरल सीधी गति है, उसका ३० बल लेना. जो सूर्यके साथ है उसका पंदरहका बल लेना. जो चंद्रके साथ है उसका बल ३० लेना. जो मंदगति है उसका १५ का बल लेना. पूर्वसे अल्पगति होवे उसका बल ७३।० लेना. शीघ्रगति ग्रहका बल ४५ लेना अति शीघ्रगति ग्रहका ३० का बल लेना ॥ २६ ॥ २७ ॥

शीघ्रभुक्तेस्तु पादोनं दलं शीघ्रतरस्य तु ॥ मध्यमस्फुटविश्लेषदलयुक्तोनितं स्फुटात् ॥२८॥ मध्यमे त्वधिके न्यूने शीघ्रादत्रास्फुटं त्यजेत् ॥ चेष्टाकेन्द्रं भखेटानां रवींद्वोरयनांशयुक् ॥ २९ ॥

टीका–अथ क्रमप्राप्तं चेष्टाबलमाह–मध्यमस्फुटेत्यादिसपादत्रिंशत्पर्यंतम् । अत्र चेष्टाबलविषये अस्फुटं मध्यस्पष्टं ग्रहं मध्यम-

स्फुटविश्लेषदलयुक्तोनितं मध्मस्पष्टग्रहयोः विश्लेषस्य अंतरस्य यद्दलं अर्धं तेन युक्तोनितं युक्तं हीनं वा स्फुटात्स्पष्टग्रहान्मध्यमे मध्यमग्रहे अधिके न्यूने च सति क्रमात्कृत्वा तं शीघ्राच्छीघ्रोच्चात्त्यजेज्जह्यात् हीनं कुर्यादित्यर्थः । तदित्थं स्पष्टग्रहात् मध्यमे ग्रहेऽधिके सति पूर्वोक्तदलेन युक्तं कृत्वा स्पष्टग्रहात् मध्यमग्रहे न्यूने सति ऊनिते हीनं कृत्वा शीघ्रोच्चात्त्यजेदित्यर्थः । एवं सति भखेटानां भौमादितारग्रहाणां चेष्टाकेंद्रं भवति रवीन्द्वोस्तु पूर्वसंस्कारानंतरं अयनांशयुक्त अयनांशयुक्तं चेष्टाकेन्द्रं भवति तच्चेष्टाकेन्द्रं भखेटानां अंगाधिके षड्राशितः अधिके सति अर्कात् १२ संशोध्य हीनं कृत्वा भागीकृत्य राशिभागान्कृत्वा भागस्थाने संयोज्य त्रिभिर्भजेत् । एवं लब्धफलं चेष्टाबलं भवति । चन्द्रसूर्यौ तु चेष्टाकेन्द्रेंगाऽधिके सति सत्रिराशी त्रिराशिभिः सहितौ कृत्वा ततः प्रोक्तविधिः अर्कात्संशोध्य भागीकृत्य त्रिभिर्भजेदेवं पूर्वोक्तरूपः कार्यः तयो र्लब्धं फलं चेष्टाबलमिति प्रोक्तं सूरिभिरितिशेषः । अथोदाहरणम् । मध्यमो भौमः ०। १६।४०। स्पष्टभौमः ११।२७।४ अनयोरंतरम् ११।१०।२३ अस्य दलं ५।२०।११ एतत्स्पष्टभौमान्मध्यमभौमस्य न्यूनत्वान्मध्यमग्रहे ०।१६।४१ ऊनितं कृत्वा जातं ६।२६।३० एतच्छीघ्रोच्चात् १०।२।३२ अस्मात्त्यक्त्वाऽवशिष्टं ३।६।३ जातमेतद्भौमस्य चेष्टाकेन्द्रम् अस्य भागान् ०।३।० त्रिभिर्विभज्य लब्धं ०।३।२० एतद्भौमचेष्टाबलोदाहरणम् । एवं सर्वत्र ज्ञेयम् । चंद्रसूर्ययोस्तु चेष्टाकेन्द्रे त्रिराशिमेलनमिति विशेषः । अन्यत्सर्वं समानमिति ॥ २८ ॥ २९ ॥

भाषा-अब चेष्टाबल कहते हैं. जिन ग्रहोंको चेष्टाबल करना है सो ऐसा कि पहले ग्रहोंको मध्यम करना, और स्पष्ट ग्रह करना पीछे मध्यम

और स्पष्टका अतर करके जो अंतर आवे उसको अर्ध भाग करके मध्यम ग्रह स्पष्ट ग्रहसे अधिक होवे तो मध्यम ग्रहमें मिलाना अगर स्पष्ट ग्रहसे मध्यम ग्रह कम होवे तो अंतरार्धफलको मध्यमें हीन करना. पीछे उसको शीघ्रोच्चफलमें कम करना जो अंक आवे वो चेष्टाकेंद्र भया उसके अंश करके ३से भाग लेना वह फल आवे वो चेष्टाबल जानना सूर्यचंद्रको पूर्वपरीखा करके ३राशि मिलानेसे चेष्टाबल होता है ॥२८॥२९॥

अथ चेष्टाकेंद्रचक्रम्.

ग्रह.	मध्यम.	स्पष्ट.	अंतर.	दलं.	शीघ्रोच्च.	केंद्र.
श.	९ ११ १८	९ ८ ५७	० २ ३१	० १ १५	१० २ ३२	५ ७ १५
शु.	१० २ ३२	११ ७ १४	१ ४ ४२	० १७ २१	० २५ १६	२ २४ ३७
गु.	१० २१ ४७	१० १५ ३९	० ६ ८	० ३ ४	१० २ ३२	५ १३ ४९
बु.	१० २ ३२	९ १० ३४	० २१ ५८	० १० ५९	५ १३ ३०	१ २१ ५७
मं.	० १६ ४१	११ २७ ४	११ १० २२	५ २० ११	१० २ ३२	३ ६ २

अथ नैसर्गिकबलचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
१	०	०	०	०	०	०	४
०	५१	१७	२६	३४	४३	९	०
०	०	०	०	०	०	०	०

अंगाधि केऽकांतसंशोध्य भागीकृत्य त्रिभिर्भजेत् ॥
सूर्यचंद्रौ सात्रिराशीकृत्वा प्रोक्तविधिस्तथा ॥ ३० ॥
एवं चेष्टाबलं प्रोक्तं नैसर्गिकमथो शृणु ॥ षष्टिरेके-
षवः सप्त दश षड्विंशतिस्ततः ॥ ३१ ॥

टीका—अथ नैसर्गिकबलाबलमाह—नैसर्गिकमित्यादिसार्धैकत्रिंशत्पर्यंतम् । अथ अनंतरं हे मैत्रेयेति शेषः । नैसर्गिकं निसर्गे विद्यमानं स्वाभाविकं बलमित्यध्याहारः । शृणु । तत्र सूर्यस्य षष्टिः ६०, चंद्रस्य एकेषवः ५१, भौमस्य सप्तदश १७, बुधस्य षड्विंशतिः २६, गुरोश्चतुस्त्रिंशत ३४, शुक्रस्य त्रिवेदाः ४३, शनेः अंकाः ९, एते निसर्गजाः स्वाभाविकबलनियताः अंकाः क्रमात्सूर्यादीनां ज्ञातव्या इति ॥ ३० ॥ ३१ ॥

भाषा—अब नैसर्गिक बल कहते हैं. निसर्ग कहिये जो स्वाभाविक बल है. सो हे मैत्रेय! तुम श्रवण करो सूर्यका ६० बल, चंद्रका ५१ निसर्गबल, भौमका १७, बुधके २३, गुरुके ३४, शुक्रके ४३, शनिके ९ ग्रहस्वभाविक निसर्गबल जानना ॥ ३० ॥ ३१ ॥

अथ षड्बलचक्रमाह.

ग्रह.	स्था.	दिग्बलं.	कालबलं	चेष्टाबलं.	नैसर्गिकबलं.	दृग्बलं.	ऐक्यबलं.
श.	३ ५७ ५४	० २९ १५	१ १३ २१	१ ४८ ४८	० ९ ०	० २ १८ ऋ.	७ ३५ ३०
शु.	२ ४६ २४	० २१ ५८	२ १ ३८	० ५६ ५७	१ ४३ ०	० ४ २७ ऋ.	६ ४५ ३०
गु.	३ १२ ३३	० ४३ १२	२ ४६ ३९	१ १३ २६	१ ३४ ०	० २ ३१ ध.	८ ३२ २१
बु.	४ ४९ २९	० ३१ ३०	० ४७ ५	१ १२ २८	१ २६ ०	० २ ४ ऋ.	४ ४४ २८
मं.	३ ५ १९	० ३१ २५	० ५८ २१	० ३२ ०	१ १७ ०	० ६ १३ ध.	५ ३० १८
चं.	२ ४७ १९	० १ ५६	० २४ ११	० ५७ ४०	१ ५१ ०	० २ ३९ ऋ.	४ ४९ ४७
सू.	४ २८ ४	० ४९ १	३ ५ ४९	० २७ १५	१ ० ०	० ० ५ ध.	९ ५१ १४

चतुस्त्रिंशात्रिवेदांकाः सूर्यादीनां निसर्गजाः ॥
शुभपापदृगङ्घ्र्यंशयुतहीनानि तानि च ॥ ३२ ॥

टीका—अथ उक्तानां पंचविधानामपि बलानां दृष्टिबलेन संस्कारमाह—शुभेत्यर्धकद्वयेन । तानि पूर्वोक्तानि स्थानादिपंचविधानि बलानि बलसमूहं शुभपापदृगङ्घ्र्यंशयुतहीनानि शुभाः चंद्रादयः पापाः रव्यादयः एषां दृशां दृष्टीनां यः अङ्घ्र्यंशः चतुर्थांशः तेन युतहीनानि युक्तानि हीनानि वा पूर्वोक्तं समूहं तद्ग्रहोपरि शुभदृष्टियोगे पापदृष्टियोगादधिके सति दृक्चतुर्थांशेन युक्तं कृत्वा तथैव पापैर्दृष्टियोगे शुभदृष्टियोगादधिके सति पूर्वोक्तं समूहं पापदृष्टिचतुर्थांशेन हीनं कुर्यात् । एवंरीत्या एकीकृतानि तानि पूर्वोक्तानि ग्रहाणां षड्बलानि स्युरिति । अत्रोदाहरणम् । रवेः स्थानबलं ४। १८।४ दिग्बलं ०।४९।१ कालबलं ३।५।४९ चेष्टाबलं ०।२७।१५ नैसर्गिकबलं १।०।० एषां योगः ९।४०।९ अयं सूर्योपरिशुभदृष्टि

योगात् ०।४।२२ एवंरूपाद्धेतोः अस्य चतुर्थांशः ०।१।५ अनेन युक्तः कृतो जातः ०।४१।१४ जातमेतत्सूर्यषड्बलम् एवं सर्वत्र ज्ञेयम्। इति ग्रहाणां षड्बलविचारः ॥ ३२ ॥

अथ भावदृष्टिचक्रमिदम्

	त.	ध.	स.	सु.	सु.	रि.	जा.	मृ.	ध.	क.	आ.	व्य.
सू.	० १६ ४९	० ३७ ५३	० ३९ ४१	० २ २५	० ५७ १८	० ४४ ५३	० २९ ६	० १४ ५२	० ० ४१	० ० ०	० ० ०	० ० ७
चं.	० ३९ ४३	० २१ १	० १४ २८	० ५७ ५	० ४१ १८	० २५ ३१	० ९ ४३	० ० ०	० ० ०	० ० ०	० ३ ४२	० २३ ५९
मं.	० ० ०	० ३ ४३	० ३३ ४४	० ५५ ४५	० २४ ११	० १४ ४८	१ ० ०	० ५२ ३६	० २७ ६	० १२ ५३	० ० ०	० ० ०
बु.	० ४० २९	० २३ ३	० ७ ४१	० ४१ ३०	० ४८ ५१	० ३ ३३	० १७ १६	० ३ ३	० ० ०	० ० ०	० ० ०	० ११ ५७
गु.	० १० १२	० ३३ ४९	० ५३ ३७	० २८ ४०	० ३४ २८	० ५० ३६	० ५५ १२	० ३१ ४६	० ६ २३	० ० ०	० ० ०	० ० ०
शु.	० ० ०	० १३ ३७	० ४० ३९	० ३२ ५८	० ५ १	० ५४ २८	० ४५ ३६	० २८ ३१	० १७ ११	० २ ५८	० ० ०	० ० ०
श.	० ४६ ७	० ३१ ५५	० ५ २४	० ४६ ४	० ४७ ४२	० ३१ ५५	० ५४ १४	० ७ २८	० ० ०	० ० ०	० ० ०	० ५२ २२
शु.	१ ३० २८	१ ४१ ३०	१ ५६ २५	२ ४० १३	२ ९ ३८	२ १४ १०	२ ७ ४७	१ ३ २०	० १७ ३४	० २ ५८	० ३ ४२	१ ५ ४६
पा.	१ २ ५६	१ १३ ३०	० ५९ ४५	१ ४४ १४	२ ९ ५१	१ ३० ३६	३ २१ २७	१ १५ ७	० २७ ४७	० १२ ५३	० ० ०	० ५२ ५९
ऽन्त.	० २७ ३२	० २८ ०	० ५६ ४०	० ५५ ५९	० ० १३	० ४३ ३४	० १३ ३३	० ११ ५३	० १० १३	० ९ ५५	० ३ ४२	० १३ १७
दृग्बलं.	० ६ ५३ ध.	० ७ ० ध.	० १४ १० ध.	० १३ ५९ ध.	० ० ३ ऋ.	० १० ५३ ध.	० ३ २३ ऋ.	० २ ५८ ऋ.	० २ ३३ ऋ.	० २ २९ ऋ.	० ० १५ ध.	० ३ १९ ध.

भाषा-अब छठा बल कहते हैं । पहिले जो लाये ग्रहोंके पांच बल (स्थानबल, दिग्बल, कालबल, चेष्टाबल, नैसर्गिकबल) यह पांचोंका एक बल करना. पीछे शुभग्रहका दृष्टियोग करना, और पापग्रहका दृष्टियोग करना. पीछे दोनोंका अंतर करके उसका चतुर्थांश लेके पापग्रह दृष्टियोग ज्यादा होवे तो षड्बलयोगमें हीन करना शुभग्रहदृष्टियोग होवे तो वो फल षड्बलयोगमें मिलाना उसको षड्बल कहते हैं ॥ ३३ ॥

षड्बलानि ग्रहाणां स्युरेवमेकीकृतानि तु ॥
शुभदृष्टिचतुर्थांश युतं स्वज्ञार्यदर्शनैः ॥ ३३ ॥

टीका-अथ भावबलानयनमाह-शुभदृष्टीत्यादिसार्द्धत्रयस्त्रिंशत्पर्यंतम् । स्वामिबलं यस्य भावस्य यः स्वामी तस्य पूर्वोक्तरीत्या आनीतं षड्बलं शुभदृष्टिचतुर्थांशयुतं भावोपरि प्राप्तशुभदृष्टिचतुर्थांशेन युक्तं तथा भावोपरीत्यत्राप्यध्याहारः पापदृगङ्घ्र्यंशैः पापानां दृष्टिचतुर्थांशैः हीनम् ऊनितम् । ततः स्वज्ञार्यदर्शनैः स्वास्मिन् भावे एव यानि ज्ञार्यदर्शनानि बुधगुरुदृष्टयः तैश्च युतं ईदृशं यत्स्वामिबलं भावाधिपबलं तदेव भावबलं ज्ञेयमिति ॥ ३३ ॥

भाषा-अब भावबल कहते हैं जिस भावका जो स्वामी होवे उसका पहिले लाया हुआ जो षड्बल है उसमें शुभपापग्रहदृष्टिका अंतर करके अंतरका चतुर्थांश फल निकालके शुभग्रहदृष्टि ज्यादा होवे तो युक्त करना. पापाधिक्य होवे तो हीन करना. उसको भावबल कहना ॥ ३३ ॥

हीनपापं दृगङ्घ्र्यंशैर्युतं स्वामिबलं बलम् ॥ गुरुज्ञाभ्यां
तु युक्तस्य पूर्णमेकं तु योजयेत् ॥ ३४ ॥

टीका-अथात्र ग्रहविशेषयोगेन विशेषसंस्कारमाह-गुरुज्ञाभ्यामित्यादिसार्धचतुस्त्रिंशच्छ्लोकपर्यंतम् । पूर्वसंस्कारेण संस्कृतभावस्य

गुरुज्ञाभ्यां युक्तस्य एतदन्यतरेण वा युक्तस्य प्राप्तबलमध्ये एकं योजयेत् मेलयेत् । मंदाररवियुक्तस्य एतदन्यतमेन वा युक्तस्य भावस्य तु बलं भावबलं एकेन वर्जितं कृत्वा पूर्णबलं भवति अत्रोदाहरणम् । तनुभावः ०।६।३।४२ मेषाख्यः अस्य स्वामिनो भौमस्य षड्बलैक्यं ५।५९।१६ तनूपरि शुभदृष्ट्यैक्यं १।३०।२४ अस्य चतुर्थांशः ०।२२।३६ भावोपरि पापदृष्टिः १।२।५६ अस्य चतुर्थांशः ०।१५।४४ चतुर्थांशद्वयस्य क्रमाद्योगह्रासत्वात् चतुर्थांशद्वयस्य अनंतरं ०।६।५२ एतच्छुभदृष्ट्यवशेषत्वात्स्वामिबलं युक्तं जातं ६।६।८ ज्ञेज्यदृष्टियोगः ०।५०।४१ अनेनापि युक्तं जातं ६।५६।४९ भावे गुरुज्ञयोगाभावान्नात्रैकयोगः तथा मंदाररवियोगाभावान्नात्रैकहानिरिति दृग्बलग्रहयोगबलसंस्कृतभावबलोदाहरणम् ॥ ३४ ॥

भाषा–अब भावबलमें विशेष संस्कार कहते हैं. जिस भावमें गुरु बुध युक्त होवे तो पूर्वोक्त भावबलमें एक मिलाना. शनि और मंगल इनमेंसे कोईभी मिलाया होवे तो भावबलमें एक कम करना ॥ ३४ ॥

मंदाररवियुक्तस्य बलमेकेन वर्जितम् ॥ दिवा शीर्षोदयाश्चैव संध्यायामुभयोदयः ॥ ३५ ॥

टीका–अथ भावविशेषे तु कालविशेषेण बलाधिक्यमाह–दिवेत्यादिसार्धपंचत्रिंशच्छ्लोकपर्यंतम् । शीर्षोदयाः मिथुनतुलासिंहकन्यावृश्चिककुंभाः दिवाबलाः दिनकाले सबला भवंति उभयोदयाः मीनः संध्यायां प्रातः सायं संध्याद्वयकाले बली तथा पृष्ठोदयाः मेषवृषकर्कमकरधनूंषि नक्तं रात्रौ बलाधिक्ये बलबाहुल्ये उदीरिताः कथिताः इति ॥ ३५ ॥

भाषा--अब भावका कालबल कहते हैं. दिवसका जन्म होवे तो मिथुन, तुला, सिंह, कन्या, वृश्चिक, कुंभ यह भाव बलवान् जानना. बाकीके निर्बल जानना. रात्रिका जन्म होवे तो मेष, वृष, कर्क, मकर, धन यह भाव बलवान्

जानना. अन्य निर्बल हैं प्रातःकाल और सायंकालमें जन्म होवे तो मीन बलवान् जानना. बाकी सर्व निर्बल हैं ऐसा जानना ॥ ३५ ॥

नक्तं पृष्ठोदयाश्चैव बलाधिक्य उदीरिताः ॥ नृयुग्मजूकपाथोनचापपूर्वार्द्धकुंभभात् ॥ ३६॥ मृगचापपरार्धाख्यमेषसिंहवृषादपि ॥ अलेः कर्कटकाच्चापि मृगांत्यार्धाच्च मीनभात् ॥ ३७ ॥ अस्तं सुखं क्रमाल्लग्नं खं हित्वांगाधिके सति ॥ चक्राद्विशोध्य रामैश्च भजेद्भागीकृतं बलात् ॥ ३८ ॥

टीका-अथ भावानां दिग्बलमाह-नृयुगमित्याद्यष्टत्रिंशत्पर्यन्तम् । अस्तं सप्तमभावं नृयुग्मजूकपाथोनचापपूर्वार्द्धकुंभभात् अयं समाहारद्वंद्वः मिथुनतुलाकन्याधनुःपूर्वार्द्धकुंभराशिभ्यः सकाशाद्धित्वा तथा सुखं चतुर्थभावं मृगचापपरार्धाख्यमेषसिंहवृषात् अत्रापि समाहारः मृगपूर्वार्धधनुःपरार्धमेषसिंहवृषेभ्यः हित्वा तथा लग्नं अलेः वृश्चिकात् कर्कटकाच्च हित्वा तथा खं दशमभावं मृगांत्यार्धात् मकरोत्तरार्धान्मीनभान्मीनराशेश्च सकाशात् हित्वा क्रमात् एवं क्रमेण सप्तमचतुर्थलग्नदशमभावैः ऊनिताः ये सर्वे राशयः तेषां शेषेंऽगाधिके सति षडाधिके सति चक्राद्द्वादशराशिभ्यः विशोध्य ऊनयित्वा शेषं भागीकृतं भागान्कृत्वा रामैः त्रिभिर्भजेत् एवं लब्धफलं तत्तद्राशीनां दिग्बलं भवति । अथोदाहरणम् । लग्नं ० । ६ । ४ एतच्चतुष्पादाख्यं अतोस्माच्चतुर्थभावः कर्कः ३।१।१९ अयं शोधितो जातः ९।४।४५ अंगाधिकः अयं चक्रतः १२ अस्माच्छोधितो जातः २ । २५ । १५ भागीकृत्य ८५ । १५ जाताः त्रिभिर्भक्त्वा लब्धफलं ० । २८।२५ एवं सर्वत्र । एवं दिग्बलं पूर्वोक्तदृग्ग्रहयोग-

संस्कृतभावबले ६।५६। ४९ अस्मिन् योजितं जातं ७।२९। १२ जातमेतत्स्पष्टभावबलोदाहरणम् ॥ ३६ ॥ ३७ ॥ ३८ ॥

अथ भावषड्बलचक्रमिदम्.

त.	ध.	स.	सु.	सु.	रि.	जा.	मृ.	घ.	क.	आ.	व्य.	नाम.
८ ४ २०	६ ४५ ३०	८ ४४ २८	४ ४९ ४७	९ ४१ १४	८ ४४ २८	६ ४५ ३०	८ ४ २०	८ ३२ २१	७ ३५ ३०	७ ३५ ३०	८ ३२ २१	भावस्वामिबलं.
० २८ २५	० १८ ५७	० ४१ ३	० २८ २५	० १० ३१	० १० ३१	० ० ०	० ५० ३१	० १८ ५६	० ० ०	० ३८ ५६	० ११ ३	दिग्बलं.
८ ३२ ४५	७ ४ २७	९ २८ ३१	५ २८ १२	९ ५१ ४५	८ ५४ ५९	६ ४५ ३०	८ ३२ ४५	८ ५१ १७	७ ३५ ३०	८ १४ २६	८ ४३ २४	योगबलं.
० ६ ५३ ध.	० ७ ० ध.	० १४ १० ध.	० १३ ५९ ध.	० ० ३ ऋ.	० १० ५३ ध.	० ३ २३ ऋ.	० २ ५८ ऋ.	० २ ३३ ऋ.	० ९ २९ ऋ.	० ० १५ ध.	० ३ १९ ऋ.	दृग्बलं.
९ २९ ३८	७ ११ २७	९ ३९ ४१	५ ४२ ११	९ ५१ ४२	९ ५ ५२	६ ४२ ७	९ २९ ३८	८ ४८ ४४	७ ३३ १	८ १४ ४१	८ ४६ ४३	ब. योगबलं. भ.
० ५० ४१	१ ६ ५२	१ १ १८	१ १० १०	१ २७ १९	० ५४ ९	१ १२ २८	० ३४ ४९	० ६ २३	० ० ०	० ० ०	० ४८ ४३	ज्ञान्यदृग्बलं.
१० २० १९	८ १८ १९	१० ४० ५९	६ ५२ २१	११ १५ १[illegible]	१० ० १	७ ५४ ३५	१० २० १९	६ ५१ ७	७ ३३ १	८ १४ १४	९ ३० २८	षड्बलैक्यं

भाषा--अब भावका दिग्बल कहते हैं. मिथुन, तुला, कन्या, धनका पूर्वार्ध, कुंभ यह राशिभावमें सप्तम भाव कम करना शेष अंक जो आवे वह छः से ज्यादा होवे तो बारहमें शोधके शेषांकका भाग करके तीनसे भाग लेना जो लब्ध आवे वो दिग्बल जानना. ऐसा मकरका पूर्वार्द्ध और धनका उत्तरार्ध, मेष, सिंह, वृषभ, यह राशिमें चतुर्थ भावको कम करके ऊपर लिखी हुई रीतिसे लाना. वैसा वृश्चिक, कर्क राशिमें लग्नको कम करके फल लाना. वैसा मकरका उत्तर भाग और मीन इन राशिमें दशम भावको कम करके ऊपर लिखी हुई रीतिसे फल लाना. उसको दिग्बल कहते हैं ॥ ३६ ॥ ३७ ॥ ३८ ॥

भावानां च ग्रहाणां च बलान्येवं विदुर्बुधाः ॥
अंकाग्नयोऽगरामाश्च खाग्निः करजलाकराः ॥ ३९ ॥
नवाग्नयः सुराः खाग्निर्दशसंगुणिताः क्रमात् ॥
रव्यादयः सुबलिनो राशीनां स्वामिनो वशात् ॥ ४० ॥

टीका—आरब्धं बलप्रकरणमुपसंहरति—भावानामित्यर्धेन । भावानां तन्वादिद्वादशानां ग्रहाणां रव्यादिसप्तानां च एवं पूर्वोक्तरीत्या कथितानि बलानि बुधाः विदुरिति । अथ ग्रहाणां भावानां च उक्तषड्बलैक्ये तेषां सुबलत्वपूर्णबलत्वनियतसंख्यां परिगणयति—अंकेत्यादिसार्धचत्वारिंशच्छ्लोकपर्यन्तम् । तत्र सूर्यस्य अंकाग्नयः ३९, दशसंगुणिताः ३९० षष्टिभाजिताः ६।३० एतावत्संख्यापर्यन्तं षड्बलैक्ये सुबली भवति अतोऽधिके रविः पूर्णबली ज्ञेयः अर्थात् अतोऽल्पे केवलं बली एव । एवमग्रे सर्वत्र । तदित्थं चंद्रस्य अंगरामाः ३६ दशसंगुणिताः ३६० षष्टिभाजिताः ६।० एतत्पर्यन्तं सुबली अतोऽधिके चंद्रः पूर्णबली ज्ञेयः । तथा भौमस्य अंकाः खाग्नयः ३० दशसंगुणिताः ३०० षष्टिभाजिताः ५।० एतत्पर्यंतं सुबली । अतोऽधिके भौमः पूर्णबली । एवं बुधस्य करजलाकराः ४२ गुरोः नवाग्नयः ३९ शुक्रस्य सुराः ३३, शनेः खाग्नयः ३० एते दशसंगुणिताः प्राग्वत् षष्टिभाजिताः ७।३।०।० एतावंतो बुधादीनामंका भवंति तत्तदंतसंख्यापर्यन्तं बुधादयः ०।३०।६०।० सुबालिनः तत्तादधिक पूर्णबालिनः एवं क्रमाद्रव्यादयः सुबालिनः अर्थादतो न्यूने बलिन एवं पूर्णबलिनो वा ज्ञेयाः राशीनां सुबलिनो वा ज्ञेयाः सुबलं पूर्णबलं च स्वामिनो वशात् अधिपबलानुसारतो ज्ञेयम् । एवं च बलं षड्बलैक्यम् एवं पूर्वोक्तसंख्यातः अधिकं अतिरिक्तं चेद्रव्यादयः पूर्णबलिनो मताः इत्यन्वयः अथोक्तसंख्यान्यूनत्वे बलिन एवेत्यर्थः । ननु

दशसंगुणिताः इत्येवोक्ते षष्टिभाजिताः कार्याः इति भवता कथमुच्यत इति चेद्बलस्य षष्ट्यतिरेकानुपपत्तेरिति ज्ञेयम् ॥ ३९ ॥ ४० ॥

भाषा- अब ग्रहोंका और भावोंका सुबलत्वादिभेद कहते हैं सूर्यादिग्रहोंके ध्रुवांकोंको दशगुणित करके साठमें भाग लेना जो लब्ध आवे उन अंकोंसे ज्यादा षड्बल होवे तो वह सुबली जानना जो कभी ध्रुवांकसे कम होवे तो बली जानना । राशिके बल स्वामीके आधीन हैं. सो स्वामीके निमित्तसे सुबल पूर्णबल जानना । पहिले कहे हुए अंकसे कमी होवे तो बली और अधिक होवे तो सुबली । इसका चक्र आगे स्पष्ट दिखलाया है ॥ ३९ ॥ ४० ॥

अधिकं पूर्णमेवं स्याद्बलं चेद्बलिनो मताः ॥ गुरुसौम्यरवीणां तु भूतषट्केंदवो द्विज ॥ ३१ ॥ पंचाग्नयः खभूतानि करभूमिसुधाकराः ॥ खाग्नयश्च क्रमात्स्थानदिक्चेष्टासमयायने ॥ ४२ ॥ सितेन्द्वोर्हयग्निचंद्राश्च खेषवः खाग्नयः शतम् ॥ चत्वारिंशत् क्रमाद्भौममन्दयोः षण्णवक्रमात् ॥ ४३ ॥

टीका-नन्वाचार्येण षड्बलसमुच्चयविषये पूर्णबलज्ञानाय अंकाग्नय इत्यादिसंख्योक्ता, तथा स्थानाद्यवांतरबलविशेषस्य पूर्णत्वं कथं वा ज्ञेयमिति चेत्समाधानायावांतरस्थानादिपंचबलानां पृथक्संख्यामाह-गुरुसौम्येत्यादित्रिचत्वारिंशच्छ्लोकपर्यन्तम् । हे द्विज मैत्रेय ! गुरुसौम्यरवीणां त्रयाणां भूतषट्केन्दवः १६५ षष्टिभक्त्या २।४५ स्थानबले सुबलत्वमतोधिके पूर्णत्वम् तेषां पंचाग्नयः ३५ दिग्बले

सुबलत्वम् अतोऽधिके पूर्णत्वम् तेषां खभूतानि ५० चेष्टाबले सुबलत्वं अतोऽधिके पूर्णत्वं तेषां करभूमिसुधाकराः ११२ षष्टिभक्त्या १।५२ कालबले सुबलत्वं अतोऽधिके पूर्णबलत्वम् तेषां खाग्नयः ३० अयनबले सुबलत्वम् अतोधिके पूर्णबलत्वं एवं सितेन्द्वोः शुक्रचंद्रयोः स्थानबले त्र्यग्निचंद्राः १३३ षष्टिभाजिते २।१३ दिग्बले खेषवः ५० चेष्टाबले खाग्नयः ३० कालबले शतं १०० षष्टिभक्ते १।४० अयनबले चत्वारिंशत् ४० क्रमात्सुबलत्वं पूर्णबलत्वं ज्ञेयम् एवं च भौममंदयोः कुजशन्योः स्थानबले षण्णवति ९६ षष्टिभक्त्या १।३६ दिग्बले त्रिंशत् ३० चेष्टाबले खवेदाः ४० कालबले सप्तांगाः ६७ षष्टिभक्ते १।७ अयनबले नखाः २० एतत्संख्यायां सुबलत्वम् अधिके पूर्णत्वम् अर्थात् उक्तसंख्यान्यूनत्वे बलवत्त्वमेवेति । ननु अत्र षड्बलैक्यांकानियमे पंचबलानामेव भिन्नतया संख्योक्ता षष्ठस्य दृग्बलस्य नियतसंख्या कुतो नोक्ता वेति चेत्तस्य स्थानविशेषोदयलब्ध्याऽनियतत्वादृणधनसाधनभूतत्वाच्चेति ज्ञातव्यम् । अथास्य सुगमतया परिज्ञानाय नियतांकचक्रमग्रे लिख्यते ॥ ४१ ॥ ४२ ॥ ४३ ॥

भाषा—अब गुरु, बुध, सूर्यका सुबलत्वादिक बताते हैं. गुरु, बुध, सूर्य इनका मुख्य क्षेपक १६५ हैं उसको साठसे भाग लिया तो फल लब्ध २ शेष ४५ ऐसा २।४५ स्थानबलमें सुबलत्व जानना उस अंकसे ज्यादा होवे तो पूर्ण बल जानना वैसा दिग्बलमें इनका मुख्य अंक ३५ है साठसे भाग लिया तो लब्ध० शेष ३५ दिग्बलमें सुबलत्व जानना, इससे अधिक होवे तो पूर्ण बली जानना ऐसा आगे सब बलमें ज़ानना. इसका स्पष्ट चक्र आगे दिखाया है ॥ ४१ ॥ ४२ ॥ ४३ ॥

अथ ग्रहाणां भावानां च बलसुबलपूर्णबलत्वज्ञापकनियतांकचक्रमिदम्.

रवेः	चंद्रस्य.	भौमस्य.	बुधस्य.	गुरोः	शुक्रस्य.	शनेः	ग्रहाणाम्.
अंक श्र.	अगरामाः	खाग्नयः	करजला.	नवाग्नयः	सुराः	खाग्नयः	षड्बलैक्ये.
३९ ६ ३९० ३०	२६ ६ ३६० ०	३० ५ ३०० ०	४२ ७ ४२० ०	३९ ६ ३९० ३०	३३ ५ ३३० ३०	३० ५ ३०० ०	सुबलपूर्णबलांकाः
भू. ष. द.	ऽय ग्निचं.	षण्णव.	भू. ष. द.	भू. ष. द.	ऽय ग्निचं.	षण्णव.	स्थानबले.
१६५	१२२	९६	१६५	१६५	१३३	९६	सुबलपूर्णबलांकाः
२ ४५	२ १३	१ ३६	२ ४५	२ ४५	२ १३	१ ३६	
पंचाग्न.	खेषवः	त्रिंशत.	पंचाग्नयः	पंचाग्न.	खेषवः	त्रिंशत्.	दिग्बले.
० ३५	० ५०	० ३०	० ३५	० ३५	० ५०	० ३०	सुबलत्वादिद्योतकांकाः
खभूताः	खाग्राः	खवेदाः	खभूताः	खभूताः	खाग्नयः	खवेदाः	चेष्टाबले.
० ५०	० ३०	० ४०	० ५०	० ५०	० ३०	० ४०	सुबलत्वादिद्योतकांकाः
क्र.भू.सु.	शतं.	सप्तांगाः	करभू सु.	क्र.भू.सु.	शतम्.	सप्तांगाः	कालबले.
११२	१००	६७	११२	११२	१००	६७	सुबलत्वादिद्योतकांकाः
१ ५२	१ ४०	१ ७	१ ५२	१ ५२	१ ४०	१ ७	
खाग्नयः	चत्वारिं.	नखाः	खाग्नयः	खाग्नयः	चत्वारिं.	नखाः	अयनबले.
० ३०	० ४०	० २०	० ३०	० ३०	० ४०	० २०	सुबलत्वादिद्योतकांकाः
६ ३२	५ ५३	४ १३	६ ३२	६ ३२	५ ५३	४ १३	पंचबलसंहतिः

त्रिंशत्खवेदाः सप्तांगा नखाश्च बलिनो विदुः ॥
भावस्थानग्रहैः प्रोक्तयोगे ये योगहेतवः ॥ ४४ ॥
तेषां बली यः कर्तासौ स एवास्य फलप्रदः ॥ योगे-
ष्वाप्तेषु बहुषु न्याय एवं प्रकीर्तितः ॥ ४५ ॥

टीका–अथ प्राप्तेषु बहुषु योगहेतुषु विशेषयोगकर्तृतया फलप्रदज्ञानमाह–भावस्थानेत्यादिपंचचत्वारिंशच्छ्लोकपर्यन्तम् । भावस्थानग्रहैः भावाः तन्वादयः स्थानानि स्वक्षेत्रोच्चत्रिकोणादीनि तेषु वर्तमानाः ये ग्रहाः तैः साधनीभूतैरित्यर्थः । प्रोक्तयोगे कथितफलविषये ये ग्रहाः योगहेतवः फलहेतुभूताः बहव इत्यध्याहारः तेषां

मध्ये यः बली षड्बलाधिक्यवान् स एव असौ ग्रहः अस्य उक्तयोगस्य कर्ता संपादकः अतः स एवास्य योगस्य फलप्रदो ज्ञेयः इति षड्बले विशिष्टफलदत्वं ध्वनितम् एवं बहुषु योगेषु आप्तेषु प्राप्तेषु एवमुक्तप्रकारकन्यायः प्रकीर्तित इत्यन्वयः ॥ ४४ ॥ ४५ ॥

भाषा–अब अनेक बली ग्रहोंमें मुख्य योगफल देनेवाला कौन है, उसका लक्षण कहते हैं. पहिले स्वक्षेत्र मूलत्रिकोणोच्चादिकके होयके तनुधनादिकस्थानमें बैठे जो ग्रह उनमेंसे जो ग्रह ग्रहबलमें अधिक बलवान् होवे वो वक्ष्यमाण योगफलको देनेवाला जानना ॥ ४४ ॥ ४५ ॥

गणितेषु प्रवीणश्च शब्दशास्त्रे कृतश्रमः ॥ न्यायविद्बुद्धिमान् होरास्कंधश्रवणसम्मतः ॥ ४६ ॥ दैवविद्देशिको देवसंमतो देशकालवित् ॥ ऊहापोहपटुः प्राज्ञः पटुः स्वजनसंमतः ॥ ४७ ॥ इति श्रीबृहत्पाराशरहोरायामुत्तरभागे भावषड्बलादिवर्णने द्वितीयोऽध्यायः ॥ २ ॥

टीका–अथ एतच्छास्त्राधिकारिलक्षणमाह–गणितेष्वित्यादि यावदध्यायसमाप्ति । गणितेषु गणितविषयेषु प्रवीणः कुशलः च परं व्याकरणशास्त्रे कृतश्रमः कृतः श्रमो दृढाभ्यासो येन सः च परं न्यायवित् न्यायशास्त्रं वेत्तीति स तथा न केवलं शाब्दिक एव शब्दव्युत्पत्त्या केवलं शब्दग्रहेण दुरूढार्थाग्रहप्रसंगदोषापाकरणस्य शाब्दिकाशक्यत्वादित्यर्थः । बुद्धिमान् बुद्धिरस्यास्तीति स तथा न केवलं अधीतशास्त्रोपि जडधीरिति तत्तात्पर्यम् । एतादृशसाहित्यवान् सन् होरास्कंधश्रवणसम्मतः होरास्कंधः होराशास्त्रसमूहः तस्य श्रवणं तद्विषये संमतः संमान्यः दैववित् दैवं वेत्तीति तथा देशिकः शिक्षणसमर्थः देवसंमतः देवाः संमता यस्य देवतारा-

धक इत्यर्थः । देशकालवित् देशकालज्ञः होराशास्त्रीयफले देशकालतारतम्येन विचारशील इत्यर्थः । ऊहापोहपटुः ऊहः तर्कः अपोहः समाधानं तयोः पटुः कुशलः प्राज्ञः प्रकर्षेण उक्तार्थेष्वपि विशेषतया जानातीति तथा विशेषकल्पक इत्यर्थः । पटुः सर्वप्रकारेण कुशलः स्वजनसंमतः स्वजनाविरोधी एतादृशः पुरुषः एतच्छास्त्रेऽधिकारी भवतीति ॥ ४६ ॥ एवं पराशरोक्तेऽस्मिन् द्वितीयेऽध्यायके मया ॥ यथामति कृता टीका गणेशायार्पितास्तु सा ॥ १ ॥

इति श्रीमद्बृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्ग्वयवेदशास्त्राद्यनवद्याविद्याविद्योतितदिङ्मण्डलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचितायां सुबोधिनीटीकायां द्वितीयोऽध्यायः ॥ २ ॥

भाषा–अब इसका फल कहनेके कौन योग्य है सो कहतेहैं गणितविद्यामें कुशल, व्याकरणमें निपुण, न्यायको जाननेवाला, बुद्धिमान् साहित्य शास्त्रमें कुशल, देवताराधन नित्य करनेवाला, देशकालको जाननेवाला, तर्क समाधान करनेको समर्थ, स्वजनसे मिला रहनेवाला, ऐसा दैवज्ञ पुरुष इस शास्त्र पढनेको और फलादेश कहनेको समर्थ होवेगा ॥ ४६ ॥ ४७ ॥

इति श्रीबृहत्पाराशरहोरायां श्रीधरकृतभाषाटीकायां द्वितीयोऽध्यायः ॥ २ ॥

नीचोनं तु ग्रहं भार्धाधिक्ये चक्राद्विशोधयेत् ॥
उच्चरश्मिर्भवेद्राशिः सैको द्विघ्नांशसंयुतः ॥ १ ॥

टीका–उच्चरश्म्यादीष्टकष्टविचारमुपदिष्टवान् ॥ अध्याये तु तृतीयेऽस्मिन्स्वशिष्यायार्षिराण्मुदा ॥ १ ॥ अथ श्रीपराशरमहर्षिर्भगवानस्मिंस्तृतीयाध्याये इष्टकष्टं विशदयन्नादौ नीचानमित्येकेनोच्चरश्म्यानयनमाह । नीचोनं नीचेन ऊनं हीनं तथोक्तं कृतमिति शेषः ग्रहं रव्याद्यन्यतमं भार्धाधिक्ये भानां द्वादशराशीनां अर्धं षण्मितं भार्धं तस्माद्राशिस्थानीयांकषट्संख्यायाः आधिक्यम्

अधिकस्य भाव आधिक्यं विशेषत्वम् तस्मिन् साति चक्राद्राशिसमूहात द्वादशराशिभ्य इत्यर्थः विशोधयेत् अवशेषयेदित्यर्थः । ततः राशिः राशिस्थानीयांकः सैकः एकसंख्यया सहितः द्विघ्नांशसंयुतः द्वाभ्यां हन्यंते गुण्यंते ते द्विघ्नाः ते च ते अंशाः लक्षणया अंशकलाविकलाः द्विघ्नांशाः तैः संयुतः राश्यंक इत्यर्थः । उच्चरश्मिः भवेदिति । अथोदाहरणम् । सूर्यः १०।४।१४।० अस्य नीचं ६।१०।० अनेन हीनः सूर्यः ३। २४।१४ अयं राशौ सैकः १ जातो राश्यंकः ४ ततः अवशिष्टाः अंशादयः २४।१४।० एते द्विगुणिताः ४८।२८।० एतैर्युक्तो राशिः ४ जात उच्चरश्मिः सूर्यः ४।४८।२८।० एवं सर्वेषु ग्रहेषु उच्चरश्मिसंस्कारो ज्ञेय इति ॥ १ ॥

भाषा–अब उच्चरश्मिका बल कहते हैं. स्पष्ट राश्यादिक ग्रहमेंसे अपना अपना नीच राशि अंशाहीन करके शेष अंकमें राशि छः से ज्यादा होवे तो बारहमें शुद्ध करके पीछे राशीके ठिकाने एक मिलाना. अंश कला विकलाको दुगनी करके साठेस ऊपर चढाना ओ उच्चरश्मि आया ॥ १ ॥

अथोच्चरश्मिचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
४ ४८ २८	२ ४४ ५८	५ १ ५२	३ ८ ५२	२ २१ १८	६ २० २८	४ २३ २६	२८ ४९ २२

सायनांशार्क इंदुश्च सत्रिभो भानुवर्जितः ॥ चेष्टाकेन्द्रं
कुजादीनां पूर्वाध्याये समीरितम् ॥ २ ॥

टीका–अथ शुभाशुभरश्म्यानयनार्थमादौ चेष्टारश्मीन्कथयंस्तत्साधनं चेष्टाकेंद्रमाह–सायनेत्येकश्लोकेन । सायनांशार्कः अयनांशैः सहितः सायनांशः स चासावर्कः रविः इंदुः निरयन एव चंद्रश्च चकारः क्रमद्योतनाय ज्ञेयः स त्रिंशः त्रीणि च तानि भानि राशयश्च त्रिभानि तैः सहितः सत्रिभः भानुवर्जितः भानुना रविणा वर्जितः

हीनश्च क्रमात् सूर्यकेन्द्रं चंद्रकेंद्रं च भवति कुजादीनां भौमादिपंचग्रहाणां तु पूर्वाध्याये ' मध्यमस्फुटे ' त्यादिभिः समीरितं स्पष्टीकृतं बोध्यमीति ॥ २ ॥

अथ शुभरश्मिचक्रम्.								अथाशुभरश्मिचक्रम्.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.	सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
३	२	४	२	४	५	५	२८	८	५	३	५	३	२	२	२६
५०	१	५	५६	२४	३४	१८	४१	९	२८	५४	३	५	२५	११	१८
२०	१४	१६	२३	२८	५१	५८	३९	३१	४६	४४	३७	३२	९	२	२१

भाषा--अब चेष्टारश्मी कहते हैं. सूर्यको सायन करके उसमें तीन राशि जोडके जो राश्यादि अंक भये उनको सूर्यकेन्द्र कहना, और चंद्रको सूर्यमें हीन किया सो चंद्रकेंद्र भया मंगलादि पांच ग्रहोंका चेष्टाकेंद्र द्वितीयाध्यायमें पहिले स्पष्टरीतिसे बताया है ॥ २ ॥

अथ चेष्टारश्मिचक्रम्.							
सू.	च.	मं.	बु.	गु.	शु.	श.	यो.
[illegible]	२	३	२	६	४	६	२८
[illegible]	[illegible]	८	४३	२७	४९	१४	२३
३०	३०	४०	५४	२८	१४	३०	५६

उच्चरश्मिवदानीय चेष्टारश्मि द्वयोर्युतेः ॥ दलं तु शुभरश्मिः स्यादष्टभ्यो वर्जितोऽशुभः ॥ ३ ॥

टीका-अथ चेष्टारश्मीञ्छुभाशुभरश्मींश्चाह-उच्चेति । चेष्टारश्मिं तु उच्चरश्मिवदेव प्रागुक्तरीत्या भार्धाधिके चक्राद्विशोधयेत् इत्यादि ज्ञेयम् । नात्र नीचोनमित्युक्तसंस्कारः । आनीय संपाद्य तं चेष्टारश्मिं जानीयात् । अथ शुभाशुभरश्मीनाह । द्वयोर्युतेः द्वयोः चेष्टारश्म्युच्चरश्म्योः युतेः योगस्य दलमर्धं शुभरश्मिर्भवति स एव शुभरश्मिः अष्टभ्यो वर्जितः अशुभरश्मिर्भवति । अथ चेष्टारश्म्युदाहरणम् । सूर्यः १०।४।१४ अयनांशाः २२।१ एभिर्युक्तो जातः १०।२६।१९ अयं राशित्रयेण युक्तो जातः १।२६।१९ जातमेतद्रविचेष्टाकेन्द्रं एतच्चेष्टाकेन्द्रं सैकं २।२६।१९ एतदंशकलाद्विगुणितं

२।८२।३० जातोऽयं चेष्टारश्मिः । अथ शुभरश्म्युदाहरणम् । सूर्योच्चरश्मिः ४।४८।२८ सूर्यचेष्टारश्मिः २।८२।३० अनयोर्योगः ७।४०।५८ अस्यार्धम् ३।५०।२९ जातोऽयं शुभरश्मिः । अथाशुभरश्म्युदाहरणम् । सूर्यः शुभरश्मिः ३।५०।२९ अयमष्टवर्जितः जातः ४।९।३१ जातोयमशुभरश्मिरिति ॥ ३ ॥

भाषा--अब चेष्टारश्मि, शुभरश्मि और अशुभरश्मि उसके लानेकी रीति कहते हैं. चेष्टारश्मि जो उच्चरश्मि पहिले कही है उस रीतिसे लाना चेष्टारश्मि उच्चरश्मि इन दोनोको मिश्रित करके उसका अर्ध करना वह शुभरश्मि होती है, उसको आठसे घटाया तो अशुभरश्मि भई ॥ ३ ॥

उच्चचेष्टाकरौ व्येकौ दिग्भिर्हत्वा तु योजयेत् ॥
दलयेदिष्टमन्यत्स्यात्षष्टिभ्यो वर्जितं फलम् ॥ ४ ॥

टीका–अथ केवलं ग्रहाणामि इष्टकष्टमाह–उच्चेति । उच्चचेष्टाकरौ उच्चं च चेष्टा उच्चचेष्टे ते च ते करौ रश्मी च तथोक्तौ "किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः ॥ भानुःकरोमरीचिस्त्री " इत्यमरः । द्वंद्वांते श्रूयमाणपदस्य प्रत्येकमभिसंबन्ध्यादेतदर्थलाभः उच्चरश्मिश्चेष्टारश्मिश्चेत्यर्थः । व्येकौ विगतः एको याभ्यां तौ तथा दिग्भिः हत्वा दशभिर्गुणयित्वा तु योजयेत् मिश्रयेदित्यर्थः पुनः दलयेत् दलं कुर्यात् द्वाभ्यां विभजेदित्यर्थः । एवं कृते तत्फलमिष्टं स्यात् इष्टसंज्ञकं भवति तदिष्टं षष्टिभ्यो वर्जितं षष्टितो हीनं फलमवशेषरूपं अन्यत् इष्टेतरत् कष्टसंज्ञकमित्यर्थः । स्यात् इष्टशब्देन शुभम् कष्टशब्देन अशुभं ज्ञेयमिति । अथास्योदाहरणम् सूर्योच्चरश्मिः ४।४८।२८ व्येकः ३।४८।२८ अयं दशगुणितः ३०।४८०।२८० तथैव सूर्यचेष्टारश्मिः

२।५२।३० व्येकः १।५२।३० दिग्घतः १।५२०।३०० व्येकादिग्घतसूर्योच्चचेष्टारश्म्योर्योगः ४०।१०००।५८० अस्य दलं २०।५००।२९० तत् षष्ट्याधिकत्वात् षष्ट्यंशोद्धृतं जातं २८।२४।५० एतादिष्टम् । अथ कष्टोदाहरणम् । इष्टं २८।२४।५० एतत् षाष्टिवार्जितं ३१।३५।१० जातमेतत्कष्टमिति ॥ ४ ॥

भाषा—अब इष्टकष्ट कहते हैं. उच्चरशिमें एक हीन करके उसको दशगुणित करना, और चेष्टाराशिमेंभी एक हीन करके उसको दशगुणित करना पीछे दोनोंको जोडिके उसको अर्ध करना सो इष्टबल जानना उसको साठमें पाडे तो कष्टबल हुवा जानना ॥ ४ ॥

अथ इष्टचक्रम्.								अथ कष्टचक्रम्.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.	सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
२८	१५	३०	१९	३४	४५	४३	२१६	३१	४४	२९	४०	२५	१४	१६	२०२
५४	१२	५२	२३	४	४८	१९	५६	३५	४७	७	३६	५५	११	४०	५३
५०	२०	५०	५०	४०	३०	४०	४०	१०	४०	१०	४८	१०	३०	२०	१०

स्वोच्चे मूलत्रिकोणे च स्वर्क्षेऽधिसुहृदि क्रमात् ॥
मित्रर्क्षे च समर्क्षे च शत्रुभे चातिशत्रुभे ॥ नीचे च
षष्टिरिष्वब्धिः खाग्निः करकरास्तिथिः ॥ नागा वेदाः
करौ शून्यं शुभमेतत्फलं विदुः ॥ ६ ॥ षष्टिभ्यो
वर्जिताश्चैते शिष्टं स्यादशुभं फलम् ॥ तदर्धं तु फलं
प्रोक्तमन्यवर्गे शुभाऽशुभम् ॥ ७ ॥

टीका—अथेष्टकष्टफलसप्तवर्गेषु स्वोच्चादिस्थानविशेषवर्तमानतत्पतिवशाज्ज्ञेयमित्याह—स्वोच्चादिसप्तमश्लोकपर्यंतम् । स्वोच्चे स्वोच्चादिस्थानविचारो द्वितीयाध्याये नवमश्लोकटीकायां विशदीकृतो बोध्यः । स्वंस्वं उच्चं तस्मिन् ग्रहवर्तमानराशिवर्गपतिश्चेत् तदिष्टं फलं षष्टिः ६० कलापरिमितं ज्ञेयं अयमुच्चध्रुवांकः ६० एनं षष्टिभ्यो ६० वर्ज-

यित्वा शिष्टं ०।०।० अशुभं कष्टसंज्ञकं ज्ञेयमिति सप्तश्लोकपूर्वार्धेनान्वयः इति अग्रिमेष्टध्रुवांकेषु कष्टावगमे षष्टिवर्जनावशेषो ज्ञेयः यथा मूलत्रिकोणे वर्तमानराशिवर्गपतिश्चेत् तदिष्टं इष्टाब्धिः ४५ कलात्मकं अयं ।०। ध्रुवांकः एनं षष्टिभ्यो ६० वर्जयित्वा शेषं १५ कष्टं एवमेव स्ववर्गे वर्तमानराशिवर्गपतिश्चेत् तदिष्टध्रुवांकः खाग्निः ३० अस्मिन्षष्टिवर्जिते शेषं ३० कष्टं तथा अधिसुहृदि अधिमित्रक्षेत्रे ग्रहवर्तमानराशिवर्गपतिश्चेत्तदिष्टध्रुवांकः करकराः २२ एतत् षष्टिवर्जावशेषस्तु ३८ कष्टं ज्ञेयं तथा मित्रर्क्षे मित्रक्षेत्रे ग्रहवर्तमानराशिवर्गपतिश्चेत् तदिष्टं तिथिः १५ अयं ध्रुवांकः षष्टिवर्जितः कृतः शेषं ४५ कष्टं तथा समर्क्षे उदासीनक्षेत्रे ग्रहवर्तमानराशिपतिश्चेत्तदिष्टध्रुवांकः नागाः ८ एनं ६० एषु वर्जयित्वा शेषं ५२ कष्टं तथा शत्रुभे शत्रुक्षेत्रे वर्गपतिश्चेत्तदिष्टध्रुवांकः वेदाः ४ एनं ६० एषु वर्जयित्वा शेषं ५६ कष्टं तथा अतिशत्रुभे अतिशत्रुक्षेत्रे वर्गपतिश्चेत्तदा ध्रुवांकः २ षष्टिवर्जनावशेषं ५८ कष्टं नीचे नीचस्थितेऽवर्गपतौ तदिष्टध्रुवांकः शून्यं० षष्टिवर्जनावशेषः ६० एतत्कष्टं एवं उच्चादिस्थानस्थिततत्तद्वर्गपतिवशात् सप्तवर्गेष्टकष्टं ज्ञेयम् । ननु वर्गपतिवशादिति मूलेनुक्तत्वात् तत्तद्वर्गदृष्ट्यैवेष्टकष्टं कुतो न ग्राह्यमितिचेन्न । केशवदैवज्ञैः “ग्रहाधिपवशात् खेटस्य सप्तैक्यजम्” इति स्पष्टमुक्तत्वात् । अपि च प्रौढमनोरमाकारेण सोपपत्तिकं “ स्वगृहादिगतानां यद्ग्रहाणामुदितं बलम् । तदेव सप्तवर्गेपि तदीशस्य वशाद्भवेत् ” इति श्रीधराचार्यादिवचनप्रमाणसहितं च प्रपंचितं तद्बोध्यम् । अत्रानावश्यकत्वाद्ग्रंथविस्तारभिया न प्रतिपादितं एतत्सर्वफलं केवलं गृहवर्गजमेव बोध्यम् । न होराद्रेष्काणादिवर्गजं होरादिवर्गेषु तु तदर्धं त्विति अन्यवर्गे होरादिरूपे तु तदर्धं तस्य स्वोच्चादिविहितपूर्वोक्तस्य अर्धं उक्तध्रुवांकार्धं शुभाशुभं इष्टकष्टसंज्ञकं फलं प्रोक्तं कथितमिति न

तु अन्यशब्देन होरादिस्थानग्रहेण किंमानमिति चेत् श्रीपतिपद्धतौ “ तद्दलं भवति शेषवर्गजम् ” इति । अत्र शेषशब्देन ग्रहेतरहोरादिवर्ग एव स्वीकृतः “ इष्टे गेहे तदूनैकमसदथ दलं षट्सु कार्यं तदेके ” इति केशवदैवज्ञोक्तेः । मनोरमादिटीकाप्रामाण्यात् युक्तियुक्तत्वात् शिष्टानुमतेश्चेतिदिक् । अथास्योदाहरणमाह । सूर्यः १० । ४ । १४ शनिः क्षेत्रगः गृहवर्गपतिः शनिः ९ । ८ । ११ स्वस्थानगः अतः तद्दलं स्वक्षेत्रोक्तम् ० । ३० । ० इष्टबलं प्राप्तं तत् षष्टिवर्जित मवशिष्टम् ० । ३० । ० इतिक्षेत्रजकष्टोदाहरणम् । अथ होराषिदृक्कोदाहरणम् । सूर्यः १० । ४ । १४ रविहोरायां वर्त-

अथ अशुभसप्तकवर्गकष्टफलचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्रहाः
० ३० ०	० ४५ ०	० ४५ ०	० ३० ०	० ३० ०	० ४५ ०	० ३० ०	ग्रह.
० २८ ०	० २२ ३०	० २२ ३०	० २६ ०	० २२ ३०	० २२ ३०	० २२ ३०	होरा.
० १५ ०	० २६ ०	० १२ ०	० २२ ३०	० २८ ०	० २२ ३०	० १५ ०	द्रेष्काण.
० १५ ०	० ० ०	० २२ ३०	० २८ ०	० ० ०	० ० ०	० २६ ०	सप्तांश.
० १९ ०	० १९ ०	० २२ ३०	० १८ ०	० १६ ०	० २८ ०	० २२ ३०	नवांश.
० २२ ३०	० ० ०	० १५ ०	० ० ०	० २६ ०	० ० ०	० १९ ०	द्वादशांश.
० १९ ०	० ० ०	० १९ ०	० २८ ०	० २२ ३०	० २८ ०	० २८ ०	त्रिंशांश.
२ २८ ३०	१ १२ ३०	० ४९ ०	२ २९ ०	२ २४ ०	२ २६ ०	२ ४३ ०	ऐक्य.

अथ शुभसप्तकवर्गइष्टबलचक्रमिदम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्रहाः
० ३० ०	० १५	० १५ ०	० ३० ०	० ३० ०	० १५ ०	० ३० ०	ग्रह.
० ३ ०	० ७ ३०	० ४ ०	० ७ ३०	० ७ ३०	० ७ ३०	० ७ ३०	होरा.
० १५ ०	० ४ ०	० ११ ०	० ७ ३०	० २ ०	० ७ ३०	० १५ ०	द्रेष्काण.
० १५ ०	० ३० ०	० ७ ३०	० २ ०	० ३० ०	० ३० ०	० ४ ०	सप्तांश.
० ११ ०	० ११ ०	० ७ ३०	० ११ ०	० १५ ०	० २ ०	० ७ ३०	नवांश.
० ७ ०	० ३० ०	० १५ ०	० ३० ०	० ४ ०	० ३० ०	० ११ ०	द्वादशांश.
० ११ ०	० ३० ०	० ११ ०	० २ ०	० ७ ३०	० २ ०	० २ ०	त्रिंशांश.
१ ३२ ३०	२ ७ ३०	१ ११ ०	१ ३० ०	१ ३६ ०	१ ३४ ०	१ १७ ०	ऐक्य.

मानः अतो होरापती रविः शत्रुक्षेत्रस्थः तत्रत्यमिष्टं ०।४।० षष्ट्यूनम् ०।५६।० एतन्मूलध्रुवांकतः प्राप्तमपि " तदर्धं तु फलं प्रोक्तमन्यवर्गे" इति विशेषोक्तेः सामान्योक्तिप्राप्तेष्टाः ०।२।० कष्टं तु ०।२८।० एतद्धोराबलोदाहरणम् । अथ द्रेष्काणोदाहरणम् । सूर्यः १०।४।१४। शनिद्रेष्काणस्थः अतस्तत्पतिः शनिः ९।८।११ स्वक्षेत्रगः अतः द्रेष्काणकष्टबलं मूलध्रुवांकतः प्राप्तं स्वक्षेत्रजं ०।३०।० षष्ट्यूनं कष्टं तु ०।३०।० अस्यार्धं ०।१५।०।इष्टं षष्ट्यूनं कष्टम् ०।१५।० एवं रीत्या होरादित्रिंशांश पर्यंतं ध्रुवांकार्धं ज्ञेयम् न तु गृहवर्गवत् समग्रमिति सर्वत्र बोध्यम् ॥ ५ ॥ ६ ॥ ७ ॥

भाषा–अब बृहत् इष्टकष्ट बल कहते हैं. उच्चराशिक ग्रहका बल ६०, मूलत्रिकोणका ४५, स्वराशिका ३०, अधिमित्रका २२, मित्रक्षेत्रका १५. समराशिका ८, शत्रुराशिका ४. अतिशत्रुका २, नीचका० यह शुभका बल कहा यह बलमें अंकोंको साठमें घटाये तो अशुभकष्ट बल होता है. और होरा, द्रेष्काण, सप्तमांश. नवमांश, द्वादशांश, त्रिंशांश इनकी राशियोंमें स्वोच्चादिक होवें तों साठ आदि जो बल कहा है उसका अर्थ फल लेना वैसा पापवर्गमें जानना उसका अन्यवर्ग नाम है उसका बलका निर्णय ऐसा है कि शुभइष्टमें होवे तो शुभका अर्थ लेना पापमें पापका अर्थ लेना ॥ ५ ॥ ६ ॥ ७ ॥

पंचास्विष्टफलं चादौ षष्ठं सममुदाहृतम् ॥ अशुभास्तु
त्रयः प्रोक्ता इति शास्त्रेषु निश्चयः ॥ ८ ॥

टीका– एवं स्वोच्चादिनीचांतनवस्थानवर्तमानवर्गपातितारतम्येन नवविधं सर्ववर्गेष्टफलमुक्तं तन्मध्ये शुभाशुभं विभजते–पंचास्वित्ये-

केन । आदौ पंचसु प्रथमोक्तस्वोच्चत्रिकोणस्वर्क्षाधिमित्रामित्रसंज्ञकेषु पंचसु स्थानेषु वर्तमानवर्गपतेः प्राप्तमिष्टम् इष्टफलं शुभफलकं ज्ञेयम् तत उक्तसमसंज्ञकषष्ठस्थानवर्गपतेः इष्टं सममुदाहृतं तुल्यशुभाशुभफलकं ज्ञेयम् । तत उक्तास्त्रयः शत्र्वधिशत्रुनीचसंज्ञकस्थानत्रयवर्तमाना इष्टप्रदवर्गपतयः अशुभाः दुष्टफलसूचकाः प्रोक्ताः कथिताः अर्थात् शत्र्वधिशत्रुनीचस्थानत्रयवर्गपतिसमुद्भूतम् इष्टं कष्टं च द्वे अपि अशुभफले एव तेन तेषां ग्रहवर्गैरुपमितं होरादिवर्गेषु तदूर्ध्वं संभावितं अशुभमेवेति तात्पर्यम् इति एवं प्रकारकः शास्त्रेषु ज्योतिः शास्त्रेषु निश्चयः निर्णय इति ॥ ८ ॥

भाषा—अब पहिले जो उच्चादि नव प्रकारका बल कहा है उसका शुभाशुभ कहते हैं जो उच्च, मूल, त्रिकोण, स्वग्रह, मित्रक्षेत्र, अधिमित्रक्षेत्र, यह पांच स्थानोंके ग्रहोंका बल शुभ जानना, और समक्षेत्रगत ग्रहका बल सम जानना. नीच, शत्रु अधिशत्रु राशिगतग्रहका बल अशुभ जानना. ऐसा इस शास्त्रका निश्चय है ॥ ८ ॥

दिग्बलं दिक्फलं तस्य तथा दिनफलं भवेत् ॥ तयोः
फलं शुभं प्रोक्तं षष्ट्या वर्ज्यं तथेतरत् ॥ ९ ॥ शुभाधिके
शुभं नेष्टमशुभे चाधिके शुभात् ॥ बलैरेव हते स्यातां
दृष्टिं हन्यात्स्फुटैव सा ॥ १० ॥

टीका—अथ दिग्बलं दिनफलं च शुभाशुभफलसहितमाह—दिग्बलमिति द्वाभ्याम् । अथ विवक्षितग्रहस्य दिग्बलं उक्तरीत्या प्राप्तं तदेव दिक्फलं तथा ग्रहस्य दिनबलम् उक्तरीत्या आनीतं तदेव दिनफलं भवेदिति । नन्वेवं प्राप्ते दिग्दिनफले शुभे अशुभे वा ज्ञेये इति चेदाह तयोः प्राप्तदिग्दिनफलयोः फलं शुभं कल्याणकरं ज्ञेयम् तत्षष्ट्या वर्ज्यं वर्जितं कार्यम् एवं कृते यच्छेषं तत् दिग्बलं दिनफलं

वा इतरत् शुभादन्यत् अशुभमित्यर्थः । एवं संपादितम् उभयरूप फलम् अशुभात् शुभेऽधिके शुभं ज्ञेयं तथैव शुभात् अशुभेधिके नेष्टमशुभमित्यर्थः । अथानयोः दृष्टेश्च स्पष्टीकरणमाह–उभे फले बलैः षड्बलैर्हते गुणिते स्फुटं स्यातां तथैव बलैर्दृष्टिं हन्यात् सापि स्फुटा भवति ॥ ९ ॥ १० ॥

भाषा--अब दिग्बलादिकके ऊपरसे बृहत् इष्टकष्ट लानेकी रीति कहते हैं. दिग्बलका दशसे भाग लेके फल लेना, वैसा दिग्बलका पंदरहमें भाग लेके फल लेना, और दिनोंको इकट्ठे करके जो अंक होवे वो बलको शुभ जानना. उसको साठसे कम किये तो अशुभ बल जानना शुभ जादा होवें तों शुभ जानना, शुभसे अशुभ जादा होवे तो अशुभ जानना. अब इष्ट कष्ट दृष्टि कहते हैं. पहिले जो चार पांचवें श्लोकमें इष्टबल कष्टबल कहा है उससें दृष्टिको गुणन करनेमें इष्टदृष्टि कष्टदृष्टि होती है ॥ ९ ॥ १० ॥

बलैः षड्भिः समेधित्वा समानीतैः पृथक् पृथक् ॥
बलिनश्चोक्तसंज्ञैश्च बलैरेव हरेत्ततः ॥ ११ ॥ तत्तद्बल
फलानि स्युरशुभानि शुभानि च॥ शुभपापफलाभ्यां
च दृष्टिं हन्याद्बलं तथा ॥ १२ ॥

टीका–अथ पूर्वोक्तं शुभाशुभदिग्दिनफलानयनं दृष्टिशुभाशुभ फलानयनं च विस्तरेण स्फुटमाह–बलैरिति सार्द्धद्वयेन । बलिन इति बलमस्यास्तीति बली तस्य विवक्षितग्रहस्येत्यर्थः । पृथक् पृथक् स्थाने षट्स्थाने इत्यर्थः । दिग्बलं दिनबलं च संस्थाप्य समानीतैः पूर्वोक्तरीत्या संपादितैः पृथक् षड्बलैः समेधित्वा सम्यग्वर्धयित्वा गुणयित्वेत्यर्थः । उक्तसंज्ञैः एकीकृतैः षड्बलैः पूर्वोक्तपृथग्गुणितं षट्स्थानस्थं हरेत् पृथग्भाजयेत् । ततः षट्फलानामेकीकृतं फलं बलफलं जातम् एवं शुभानि अशुभानि बलफलानि नाम दिग्बलफ-

लानि दिनबलफलानि च स्युः । अथैवं दृष्टिशुभाशुभफलानि यथा शुभपापफलाभ्यां पूर्वश्लोकसंपादिताभ्यां दृष्टिं हन्याद्गुणयेत् कथं यथाबलं प्रागुक्तदिग्दिनबलं सर्वबलपिंडेनापहृत्य तत्तत्फलं कृतं तथैवैतत् कार्यम्, एवं सति दृष्टेश्च शुभपापोत्थे शुभपापग्रहोत्पन्ने बले इष्टानिष्टबले स्याताम् कथं तदाह तथैव चेति । तथैव दिग्दिनबलशुभाशुभफलवत् दृष्टिशुभाशुभबलफले स्यातामिति ॥ ११ ॥ १२ ॥

भाषा–पहिले जो होरा द्रेष्काणादि छः बल जुदा लाये हैं उसको इकट्ठा करके वो पिंडांक भया. उसका पूर्वोक्त इष्ट कष्ट बलके अंकसे भाग लेना जो फल आवे वो बृहत् इष्ट बृहत्कष्ट बल भया जानना, इष्टबलको शुभ, कष्टबलको अशुभ जानना, और शुभपापफलांकसे दृष्टिको गुणन करना, ऐसा बलको गुणन करना ॥ ११ ॥ १२ ॥

दृष्टेश्च शुभपापोत्थे बले स्यातां तथैव च ॥ भावानां च फले प्रोक्ते पतीनां च फले उभे ॥१३॥ सराशिर्ग्रहयुक्तश्चेद्भावसाधनसंगुणे ॥ फले तस्य शुभे युंज्यादशुभे वर्जयेच्छुभे ॥१४॥ पापश्चेदन्यथा चैवं बले दृष्ट्यां च तेऽत्र तु ॥ युंज्याद्दुश्चादिषु फलमामिश्रादिषु वर्जयेत् ॥ १५ ॥

टीका–अथोक्तमनूद्य सग्रहराशिफलसाधनमाह–भावानामिति सार्द्धद्वयेन । भावानां तन्वादीनां फले इष्टानिष्टसंज्ञके प्रोक्ते तथैव पतीनां भावस्वामिनामपि उभे इष्टानिष्टे द्वे फले प्रोक्ते । अथ सः फलविवक्षितो राशिः ग्रहयुक्तः सग्रहश्चेत् भावसाधनसंगुणे भावफलसाधनविषये इत्यर्थः । शुभे शुभग्रहे भावस्थे सति तस्य भावस्य फले फलमध्ये युंज्यात् शुभग्रहफलं मिश्रयेत् कदा शुभे फले सति अशुभे

भावफले सति वर्जयेत् शुभे ग्रहफले शुभे वर्जयेत् । अथ पापश्चेत् पापग्रहो भावस्थो यदि भवति तदा अन्यथा वैपरीत्यं कार्यम्। पापस्य अशुभफलं मिश्रयेत् पापस्य शुभफलं वर्जयेदित्यर्थः । एवं भावस्थग्रहे भावबलग्रहफलविचारमुक्त्वा भावस्थे ग्रहे बलदृग्बलविचारमाह । अत्र तु भावस्थग्रहविषये बले बलफलविचारे दृष्ट्यां दृष्टिफलविचारे तु भावस्थे ग्रहे उच्चादिषु उच्चत्रिकोणस्वमित्रस्थानवर्तमाने फलं ग्रहे युंज्यात्, अमित्रादिषु भावस्थे ग्रहे अमित्राधिशत्रुनीचस्थानवर्तमाने सति वर्जयेत् भावफलं ग्रहफले वर्जयेदिति ॥ १३ ॥ ॥ १४ ॥ १५ ॥

भाषा–जो फल आवे वो दृष्टिका और बलका शुभाशुभ फल जानना पहिले जो भावबल कहा है और ग्रहबल कहा है उसमें जो भाव राशियुक्त होवे और जो ग्रहका क्षेत्र ग्रहयुक्त होवे तो भावसाधन करके उससे गुणन करना. भाव साधनका प्रकार द्वितीयाध्यायके प्रथम श्लोकमें कहा है. शुभ होय तो फल जोडना, अशुभ होय तो फल हीन करना, और बलका जो फल है उसको अन्यथा जानना, जैसा शुभ होवे तो हीन करना, पाप होवें तो युक्त करना दृष्टिमेंभी ऐसा जानना, यह फल उच्चादिकका होवे तो युक्त करना, शत्रुआदिका होवे तो हीन करना ॥ १३ ॥ १४ ॥ १५ ॥

स्थाने चैवं क्रमात्प्रोक्तं करणे चान्यथा क्रमः ॥ राशिद्वयगते भावे तद्राश्यधिपतेः क्रिया ॥१६॥ स्थानाधिकस्तु भावेन लाभभावः प्रकीर्तितः ॥ तत्समाने च तद्भावे तदानीं स्थानदान् ग्रहान् ॥१७॥ संयोज्य स्थानसंख्यायां दलमेतत्समं भवेत् ॥ १८ ॥ इति श्रीबृहत्पाराशरहोरायामुत्तरभागे इष्टकष्टवर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥

टीका–अथ स्थानकरणविचारमाह–स्थानइत्याद्यध्यायसमाप्तिपर्यंतम् । एवं क्रमात् उक्तक्रमात् स्थाने स्थानविचारेपि कर्तव्यं प्रोक्तं करणे करणविषये तु कर्तव्यस्य अन्यथा क्रमः स्थानापेक्षया विपरीतः क्रमो ज्ञेयः । अथ भावे राशिद्वयगते संधिगते इत्यर्थः । तद्राश्यधिपतेः भावराशिद्वयस्वामिनः क्रिया पूर्ववत् कर्तव्यं बोध्यम् । भावेन सहितः ग्रहः स्थानाधिकश्चेत् स लाभभावः लाभदायको भावः प्रकीर्तितः । तत्समाने ग्रहसमाने तद्भावे तस्य ग्रहस्य भावे सति तदानीं स्थानदान् ग्रहान् संयोज्य स्थानसंख्याया यद्बलमर्धं तत्समं भावफलं ज्ञेयमिति ॥ १६ ॥ १७ ॥ १८ ॥

तृतीयेऽध्यायके चास्मिन्कृतया व्याख्यया मया ॥
गणेशः प्रीयतां देवः सर्वज्ञो बुद्धिचालकः ॥ १ ॥

इति श्रीमद्बृहत्पाराशरहोरायामुत्तरभागे श्रीमद्वेदशास्त्राद्यन-
वद्यविद्याविद्योतितदिग्मंडलज्योतिर्विज्जटाशंकरात्मज-
श्रीधरेण विरचितायां सुबोधिनीटीकायामिष्टक-
ष्टवर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥

भाषा–अब अष्टक वर्गमें रेखाका फल कहा है वो बिंदुमें विपरीत जानना. और भावमें दो राशिका स्वामी कहते हैं. भाव और संधिका स्वामी होवे जो लाभदायक जानना. जिस भावका अधिपति होवे वो भावका लाभ करेगा. और वो भावका बल जो है वो भावकी राशिसंख्यामें मिलायके उसका आधा करना. जो फल आवे वो भावफल जानना ॥ १६ ॥ १७ ॥ १८ ॥ इति बृहत्पाराशरहोरायामुत्तरभागे श्रीधरकृतभाषाटीकायामिष्टकष्टवर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥

अथ राश्मिफलवर्णनाध्यायः ।

विधातृलिखिता या सा ललाटाक्षरमालिका ॥
तस्याः शरीरकथनं वक्ष्यामि च पृथक्पृथक् ॥ १ ॥
लग्नाच्छरीराचिंता च द्वितीयात्स्वं च पैतृकम् ॥
भरणीयं कुटुंबं च पश्वादि च वदेद्बुधः ॥ २ ॥

टीका–द्वादशानां तु भावानां ज्ञेयं फलमथो मुनिः ॥ चतुर्थे राश्मिसंभूतिं तत्फलं चाब्रवीत्स्फुटम् ॥ १ ॥ अथ भगवान् पराशरमहर्षिः मैत्रेयं प्रति चतुर्थाध्याये भावावलोकनीयविषयं रश्म्यानयनं तत्फलं च विशदयति । तत्रादौ पूर्वार्जितकर्मानुरूपविधिलिखितशुभाशुभफलसूचकललाटाक्षरफलं जन्मकालीनभावसाधनेन वक्तुं प्रतिजानीते–विधात्रिति । सा पूर्वोपार्जितकर्मसमुद्भवा अनिर्वाच्या विधातृलिखिता विधात्रा विश्वसृजा ब्रह्मणा लिखितांकिता ललाटे भाले अक्षराणां शुभाशुभज्ञापकवर्णानां मालिका पंक्तिः याऽस्ति तस्याः शरीरकथनं शरीरस्य स्वरूपस्य कथनं वर्णनप्रकारं पृथक्पृथक् तन्वादिद्वादशभावभेदेनेत्यर्थः । वक्ष्यामि कथयिष्यामि ॥ १ ॥ अथ द्वादशभावस्थाने किं किं विचारणीयं तदाह लग्नादित्यादिसार्धपंचश्लोकपर्यंतम् । लग्नात् तनुभावात् सकाशात् शरीरस्य देहस्य चिंताविचारः कार्श्यादिगौरत्वादिविवेक इत्यर्थः । द्वितीयात् धनभावात् स्वं स्वीयं पैतृकं पितृसंबंधि च धनं द्रव्यं तथा भरणीयं पोषणीयं भृत्यादीत्यर्थः । तथा कुटुंबं स्त्र्यादिवर्गमित्यर्थः । तथा पश्वादि पशवः आदयो यस्मिंस्तत् गोश्वपक्षिवृक्षादीत्यर्थः । वदेत् कथयेत् बुधः ज्योतिर्वित् ॥ २ ॥

भाषा–अब तनु आदि करके बारह भावोंका निर्णय कहते हैं. विधाता जो ब्रह्मा उन्होंने संपूर्ण प्राणिमात्रके ललाटमें जो प्रारब्धभोगकर्मकी अक्षरपंक्ति लिखी है उसमें मनुष्यका विशेषकरके फल है. वो अक्षरपंक्ति प्रत्यक्ष

दीखपडती नहीं है, इस वास्त वह अक्षरपंक्तिके देहका वर्णन पृथक् पृथक् कहते हैं. तन्वादिक बारह भावोंका फल कहताहूं ॥ १ ॥ लग्नसे शरीरसंबंधि सब विचार देखना, धनभावसे स्वउपार्जित द्रव्य और पितृसंबंधी द्रव्यका, सेवकका, स्त्री आदि कुटुंबका, पशुवोंका, पक्षी, वृक्षादिकोंका विचार देखना ॥ २ ॥

तृतीयात्सोदरं बुद्धिं दुःपूर्वां विक्रमं विदुः॥ चतुथा-
त्पितरं वेश्म सुखं लालित्यमेव च ॥ ३॥ सौमन-
स्यमपत्यानि प्रज्ञां मेधां च पंचमात् ॥ हानिं
व्याधिमरिं षष्ठान्मैथुनं स्त्रीं जयं ततः ॥ ४ ॥

टीका-तृतीयात्सहजभावात् सोदरं समानमुदरं यस्य तत् साक्षाद् भ्रात्रादि तथा दुःपूर्वां बुद्धिं दुरिति उपसर्गः पूर्वः प्रथमो यस्याः तां दुर्बुद्धिं दुष्टमनीषां तथा विक्रमं पराक्रमं च विदुः बुध्यन्ते । चतुर्थाद् सुहृद्भावात् पितरं स्पष्टं तथा वेश्म गृहं तथा सुखं स्पष्टं तथा लालित्यं ललितस्य सुंदरस्य भावः तथोक्तं च ॥ ३ ॥ पंचमात् भावाद् सौमनस्यं सुष्ठु च तन्मनश्च तस्य भावः मनःप्रसन्नतामित्यर्थः । तथा अपत्यानि पुत्रादीनि तथा प्रज्ञां प्रकर्षेण ज्ञायते अनयेति विशेषबुद्धिं तथा मेधां धारणांवतीं बुद्धिं च विचारयेत् । षष्ठाद् रिपुभावात् हानिं द्रव्यादिनाशं तथा व्याधिं रोगम् अरिं शत्रुं च वदेत् । ततः नाम सप्तमभावात् मैथुनं मिथुनीभावं तथा स्त्रीं भार्यां तथा जयम् उत्कर्षं च वदेत ॥ ४ ॥

भाषा-तीसरे भावसे भाइयोंका, दुष्टबुद्धिका, पराक्रमका, विचार देखना, चौथे भावसे घरोंका, सुखका, सुंदरताका, पितरका विचार देखना ॥ ३ ॥ पंचम भावसे मनःप्रसन्नताका, पुत्रादिकोंका, सुबुद्धिका, धारणाशक्तिका

विचार देखना. सप्तम भावसे हानिका, द्रव्यादिनाशका, व्याधि, रोग, शत्रु इन्होंका विचार देखना. सप्तम भावसे मैथुनका, भार्याका, जयका, उत्कर्षताका विचार कहना ॥ ४ ॥

मृतिं पराजयं दुःखं हानिं व्याधि तथाष्टमात् ॥
सौशील्यभाग्यधर्मांश्च नवमाद्दशमात्तथा ॥ ५ ॥
मानास्पदाज्ञाकर्माणि आयादर्थं व्ययाद्व्ययम् ॥
दिग्भवेष्विषुसप्ताष्टशराः स्वोच्चे करा रवेः ॥ ६ ॥

टीका–अष्टमात् मृत्युभावात् मृतिं मरणं तथा पराजयं पराभवं तथा दुःखं व्यसनं तथा हानिं नाशं तथा व्याधिं रोगं च वदेत् । नवमात् भाग्यभावात् सौशील्यं सुशीलतां च भाग्यं वैभवं धर्मो विध्युक्ताचरणं चेति द्वंद्वसमासः तान्वदेत् । तथा तेन प्रकारेण दशमात् कर्मभावात् ॥ ५ ॥ मानास्पदाज्ञाकर्माणि मानं सत्कारं तथा आस्पदं स्थानं तथा आज्ञां भृत्यादिप्रेरणां तथा कर्माणि शुभाशुभाचरणानि च द्वंद्वः तानि वदेत् । आयादेकादशभावात् अर्थं द्रव्यादभीष्टलाभं वदेत् । व्ययात् द्वादशभावात् व्ययं द्रव्यादिव्ययं चेति कथयेत् । एवं भावविचारणीयमुक्त्वा फलविशेषं वक्तुं रश्मीन्साधयाति दिगित्यादिसार्धसप्तमश्लोकपर्यंतम् । तत्रादौ सर्वरश्मिसाधनाय उच्चरश्मिध्रुवांकानाह । स्वोच्चे उच्चस्थे रव्याद्यन्यतमे ग्रहे सति रवेः सूर्यात्सकाशाद्ग्रहाणां क्रमात् दिशः १०, भवाः ११, इषवः ५, सप्त ७, अष्टौ ८ शरः ५, द्वंद्वसमासः एते क्रमाद्रविचंद्रभौमबुधगुरुशुक्रशनीनां कराः रश्मिध्रुवांका बोध्याः ॥ ६ ॥

भाषा–अष्टमभावसे मरण, पराजय (हारना), दुःख, व्यसन, हानि, व्याधि, रोग कहना. नवम भावसे सुशीलता, भाग्यवैभव, धर्म इसका विचार

करना ॥ ५ ॥ दशम भावसे सत्कार, स्थान, आज्ञा, शुभाशुभ कर्म इसका फल कहना, ग्यारहवें भावसे इच्छित द्रव्यादि प्राप्तिका विचार करना। बारहवें भावसे उत्तम नीच मार्गसे द्रव्यखर्चका विचार देखना. अब ग्रहोंका उच्चरश्मिसाधन कहते हैं. उसमें पहले उच्चके ध्रुवांक कहते हैं, सूर्यके १०, चंद्रके ११, मंगलके ५, बुध ५, गुरु ७, शुक्र ८, शनिके ५, यह रश्मिके ध्रुवांक कहे ॥ ६ ॥

नीचे न चांतरा प्रोक्ता रश्मयस्त्वनुपातजाः ॥ नीचोनं तु ग्रहं भार्धाधिके चक्राद्विशोधयेत् ॥ ७ ॥

टीका–नीचे तु न ध्रुवांका न संति अंतरे उच्चनीचमध्यवर्त्यारोहावरोहमूलत्रिकोणादिसर्वस्थले तु अनुपातजाः अनुपाताद्वक्ष्यमाणाज्जायंते तं तथा रश्मयो बोध्याः । अथानुपातरीतिमाह । ग्रहं रश्मिचिकीर्षमाणं रव्याद्यन्यतमं तु नीचोनं नीचेन हीनं कृत्वा भार्धाधिके षड्राश्यधिकेऽवशिष्टे सति चक्राद्राशिसमूहात् द्वादशराशिभ्यः इति यावत् विशोधयेत् ॥ ७ ॥

भाषा--नीचके ध्रुवांक नहीं हैं, उच्च नीचादि स्थलोंमें अनुपातसे रश्मि जानना. स्पष्ट ग्रहको नीचमें हीन करके छः राशिसे ज्यादा होवे तो बारहमें शोधन करके शेषको अपने रश्मि ध्रुवांक जो पहले कहे हैं उस अंकसे गुणन करना पीछे छःसे भाग लेना जो लब्ध आवे वह रश्मि जानना ॥ ७ ॥

अथ रश्मिचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
५	२	३	१	१	६	२	२४
४०	३१	४५	४३	२२	५३	२६	२३
२३	१२	४६	४१	२५	३८	२६	३२

स्वीयरश्मिहतं षड्भिर्भजेत्स्यूरश्मयः स्वकाः ॥ उच्चस्वर्क्षसुहृत्सूर्यभागेंगाब्धिाद्रिसंगुणाः ॥ ८ ॥

टीका-ततः स्वीयरश्मिहतं स्वस्य विहिताः स्वीयाः अत्र स्वस्य चेति वार्तिकेन कुकाभाव्यं परमार्षत्वे दोषाप्रसंगाभाव इति वेदितव्यम् पूर्वोक्ता दिग्भवेत्यादयः ये रश्मयः तैः हतं कृत्वा षड्भिः ६ अंकैः भजेत् एवं स्वकाः स्वीयाः रश्मयः स्युः भवेयुः । अथास्योदाहरणम् । रविः १० । ४ । १४ । ० । रविनीचं ५।१०।०।० अनेन हीनो जातः ३।२४।१४।० रव्युच्चध्रुवांकाः १० एभिर्गुणनेन जाताः ३० । २४० । १४० । ० अंशादिपरिमाणाधिक्यात्षष्ट्युद्धृता जाताः ३४।२।२०।० एते षड्भक्ताः जाताः ५।४०।२३।० जातोऽयमनुपातजो रविरश्मिः । एवं सर्वत्र ज्ञेयम् ॥ एवं स्वोच्चादिराशिस्थितानां ग्रहाणां रश्म्यानयनमुक्त्वा तेषां स्वोच्चादिराशिवर्तमानानामेतदन्यराशिवर्तमानानामपि द्वादशांशेशवक्ष्यमाणस्वोच्चादिस्थितानां विशेषसंस्कारांतरेण रश्म्यानयनमाह उच्चस्वेत्यादिसार्धाष्टमश्लोकपर्यंतम् । अथ कस्मिन्नपि राशौ उच्चस्वर्क्षसुहृदां स्वोच्चस्वक्षेत्रस्वमित्राणां सूर्यभागे द्वादशांशे सति क्रमात् अंगानि ६, अब्धयः ४, द्वौ २, एभिः सम्यग्गुण्यंते ते संगुणाः गुणिताः कार्या इत्यर्थः । अपि च नीचार्योः स्वनीचस्वशत्र्वोः द्वादशांशे सति तु नृपांशोनाः षोडशांशहीनाः कार्याः । एवमुच्चाद्युक्तपंचकद्वादशांशवर्तमानानां विशेषसंस्कारेण ते पूर्वोक्ताः कराः रश्मयः स्पष्टा भवेयुः । अथास्योदाहरणम् । रविः १० । ४ । १४ । ० अयं मीनद्वादशांशे वर्तमानः द्वादशांशपतिर्गुरुः रवेः पंचधा मैत्र्यां समः अतोऽस्य स्वोच्चाद्युक्तद्वादशांशाभावात् द्वादशांशोपलक्षितविशेषसंस्काराभावः । अथ चंद्रः ८ । २५ । २९ । ० अयं तुलाद्वादशांशे वर्तमानः द्वादशांशपतिः शुक्रः चंद्रस्य पंचधा मैत्र्यां मित्रम् अतोऽस्य द्वादशांशोपलक्षितमित्रद्वादशांशसंस्कारे यथा मूलरश्मिः २। ३१ । १३ अयं द्विगुणितः ५।२।२६ एवं सर्वत्र द्वादशांशोपलक्षितविशेषसंस्कारो बोध्य इति ॥८॥

भाषा–अब षड्वर्ग उच्चरश्मिका विशेष संस्कार कहते हैं. जो ग्रह द्वादशांशमें होवे वहां राशि द्वादशांशकी उच्चकी होवे तो ६ से गुणना, स्वक्षेत्र होवे तो४से गुणन करना, स्वमित्र राशि होवे तो २ से गुणन करना, नीच शत्रु राशिका द्वादशांश होवे तो सोलहका अंश हीन करना. इस रीतिसे उच्चादि पूर्व कहे हुए पंचक, द्वादशांशोंमें वर्तमान विशेष संस्कारसे पूर्वोक्त कर और रश्मि स्पष्ट होते हैं ॥ ८ ॥

अथ द्वादशांशरश्मिचक्रमिदम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	५	२२	०	०	२७	२	५७
०	२	३४	०	०	२४	१७	२८
०	२६	२६	८	०	३२	१७	५१

नीचारिद्वादशांशे तु नृपांशोनाः कराश्च ते ॥
मूलत्रिकोणस्वर्क्षाधिमित्रमित्रनवांशके ॥ ९ ॥
द्रेष्काणेऽपि च होरायां त्रिंशांशे च क्रमात्तथा ॥
अष्टघ्ना द्व्यब्धिषट्सप्तभक्ता युक्तास्तु रश्मयः ॥ १० ॥

टीका–अथ नवांशादिवक्ष्यमाणांशैर्मूलत्रिकोणादिवक्ष्यमाणस्थानस्थितानां विशेषरश्मिसंस्कारांतरमाह–मूलत्रिकोणेत्यादिसार्धदशश्लोकपर्यंतम् । मूलत्रिकोणस्वर्क्षाधिमित्रमित्राणां मध्ये प्रत्येकं मित्रेति लुप्तविभक्तिकं पदं तेनात्र षष्ठीबहुवचनं बोध्यं नवांशके वा द्रेष्काणे वा होरायां वा त्रिंशांशे वा सति मूलरश्मयः अष्टघ्नाः अष्टाअष्टाभिर्हन्यंते गुण्यंते ते तथोक्ताः पश्चात् क्रमात् यथाक्रमं द्व्यब्धिषट्सप्तभिः भक्ताः भाजिताः तथोक्ताः पश्चात् अनेन भागेन युक्ता मिलितास्ते मूलरश्मयः तु स्पष्टं रश्मयो भवंति एतदुक्तं भवति नवांशद्रेष्काणहोरात्रिंशांशान्यतमवर्गे मूलत्रिकोणस्थितस्य ग्रहस्य उक्तध्रुवांकोत्पन्नमूलरश्मयः अष्टघ्नाः कृत्वा द्वाभ्यां भागमाहृत्य ध्रुवांकोत्पन्नरश्मि योजयेत् एवं क्रमात् नवांशाद्युक्तान्यतमवर्गे स्वर्क्षाधिमित्रमित्रान्यतमस्थानस्थितस्य ग्रहस्य ध्रुवांकोत्पन्नमूलरश्मयः अष्टघ्नाः क्रमात् गृहीताब्धिषट्सप्तांशेन

युक्ता मूलरश्मय एव स्पष्टा भवेयुरिति । अथ नवांशद्रेष्काणहोरात्रिंशांशान्यतमवर्गे अरौ अरिस्थाने 'अध्यरि' अत्र विभक्त्यर्थे "अव्ययं विभक्ति" इत्यादिना समासस्याव्ययत्वात् 'अव्ययादाप्सुप' इति विभक्तिलुक् अध्यरिस्थाने अथवा नीचे स्वनीचस्थाने वर्तमानग्रहस्य मूलध्रुवांकोत्पन्नरश्मयः क्रमात् वेदद्वयाखिलहीनकाः यथाक्रमं चतुर्भिः द्वाभ्यां सर्वेण अंशमाहृत्य स्वस्मिन्नेव ऊनयेत् । ते स्पष्टा रश्मयो भवेयुः । अत्रेदं तत्त्वं नवांशाद्युक्तान्यतमवर्गे अरिस्थानस्थितस्य ध्रुवांकोत्पन्नरश्मयः स्वचतुर्थांशहीनाः तथा अध्यरिस्थानस्थितस्य मूलरश्मयः अर्धावशेषिताः तथा नीचस्थानस्थितस्य सर्वेण हीनाः शून्यरूपाः स्पष्टा भवेयुरिति तात्पर्यम् । अत्रोदाहरणम् । रविः १०।४।१४ वृश्चिकनवांशे वर्तमानः तत्पतिर्भौमो रवेः पंचधा मैत्र्यां अधिमित्रं अतः रविध्रुवोत्पन्नरश्मयः ५।४०।३३।एते अष्टघ्नाः४०।३२०।२६४ । षष्ठ्युद्धृताः ४५।२४।२४ अधिमित्रभाजकांकाः ६ एभिर्भाजिताः ७।३४।४० एते मूलरश्मिषु योजिताः १३।१४।३७ जातोयं नवांशेनाधिमित्रस्थानस्थितस्य रवेः विशेषसंस्कारतः स्पष्टरश्मिः । एवं मूलत्रिकोणस्वर्क्षमित्रस्थानेषु सर्वत्र बोध्यम् । अथ नीचस्थोदाहरणम् । चंद्रः ८।२५।२९।० अयं वृश्चिकनवांशे वर्तमानः तत्पतिर्भौमः स च पंचधा मैत्र्यां चंद्रस्य मित्रम् । अत्र मित्रस्थानविहितसंस्कारः, मूलरश्मयोऽष्टघ्नाः तत्सप्तांशयोजिताः स्पष्टा भवेयुः तथापि चंद्रस्य स्वनीचनवांशस्थितत्वात् द्वितीयो नीचांशसंस्कारोपि प्राप्तः तस्मिन्सति रश्म्यभावः शून्यफलकत्वादिति एवं अरावध्यरि च बोध्यम् ॥ ९ ॥ १० ॥

भाषा-अब नवमांश, द्रेष्काण, होरा, त्रिंशांश उच्चरश्मिका विशेष संस्कार कहते हैं. जो कोई स्पष्ट ग्रहका पहिले उच्चरश्मि फल लाये संस्कार

करना, वह ग्रहकी राशि अंश ग्रहकी राशि अंश कलादिकमें देखके नवमांश, द्रेष्काण, होरा, त्रिंशांशमें देखना कि मूलत्रिकोणमें राशि है, या स्वक्षेत्र है, या अधिमित्रकी राशि है मित्रकी राशि है पीछे पहलेका उच्चरश्मिफलको अठगुणा करके मूल त्रिकोणका नवमांशादिक वर्ग होवे तो दोसे भाग लेना, स्वक्षेत्रका वर्ग होवे तो चारसे भाग लेना. अधिमित्रका वर्ग होवे तो छःसे भाग लेना, मित्रका होवे तो सातसे भाग लेना, मूलरश्मिमें मिलाना तो अपने अपने वर्गकी उच्चरश्मी आती हैं. जो कभी पूर्वोक्त ग्रहोंमें नवमांशादि वर्गोंमें शत्रुराशि होवे तो चारका भाग लेके मूलरश्मिमें हीन करना, अति शत्रु राशि होवे तो दोका अंश हीन करना, नीच राशि होवे तो शून्य मांडना ॥ ९ ॥ १० ॥

अ.न.मा.मू.त्रिकोणर.च.मि.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
१३	०	८	५	२	०	५	३३
१४	०	२	१०	५६	०	१३	३८
१३	०	४७	४३	३६	०	४७	६

अथ द्रेष्काणरश्मिचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	५	११	४	०	०	०	२१
०	५९	१७	१०	०	०	०	२७
०	३०	१८	२२	०	०	०	१०

अथ होरारश्मिचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
१७	७	८	०	०	०	०	३३
१	३२	४६	०	०	०	०	२१
९	३९	४७	०	०	०	०	३५

अथ त्रिंशांशरश्मिचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	५	११	०	६	०	०	२२
०	२४	१७	०	५२	०	०	३३
०	२	१८	०	५	०	०	२५

अरावध्यरिनीचे च वेदद्व्याखिलहीनकाः ॥ उच्चे च त्रिगुणं प्रोक्तं स्वत्रिकोणे द्विसंगुणम् ॥ ११ ॥ स्वर्क्षे त्रिघ्ना द्विसंभक्तास्त्वधिमित्रगृहेपि च ॥ वेदघ्ना रामसंभक्ता मित्रभे षड्गुणास्ततः ॥ १२ ॥ पंचभक्तास्तथा शत्रुगृहे द्विघ्नाश्चतुर्हताः ॥ अतिशत्रोः करघ्नाश्च पंचभक्ता न नीचभे ॥ १३ ॥

टीका-अथ रश्मीन्प्रकारान्तरेण स्पष्टयति-उच्चेत्यादित्रयोदशश्लोकपर्यन्तम् । अंशपतावुच्चे सति प्राग्ध्रुवांकोत्पादितरश्मयः त्रिगुणं तत्सर्वं त्रिगुणं प्रोक्तं त्रिगुणिताः स्पष्टास्स्युरित्यर्थः । रश्मिपतौ स्वत्रिकोणे मूलत्रिकोणे सति मूलध्रुवांकोत्पादितं सर्वं द्विसंगणं द्वाभ्यां सम्यग्गुणिताः स्पष्टाः स्युः रश्मिपतौ स्वर्क्षे स्वक्षेत्रगे सति मूलध्रुवांकसाधिता रश्मयः त्रिघ्नाः त्रिभिर्गुणिताः द्विसंभक्ताः द्वाभ्यां भाजिता अर्धावशेषिता इत्यर्थः । अपि च अधिमित्रगृहे रश्मिपतौ मूलरश्मयः वेदघ्नाः चतुर्भिर्गुणिताः रामसंभक्ताः त्रिभिर्भाजिताः तृतीयांशावशेषिता । इत्यर्थः स्पष्टाः स्युः रश्मिपतौ मित्रभे मित्रक्षेत्रगे मूलरश्मयः आदौ षड्गुणाः षड्भिर्गुणिताः ततः पश्चात् पंचभक्ताः पंचभिर्भक्ताः पंचावशेषिता एव स्पष्टाः स्युः तथा तेन प्रकारेण रश्मिपतौ शत्रुगृहे शत्रुक्षेत्रस्थे द्विघ्नाः द्विगुणिता मूलरश्मयः चतुर्हृताः चतुर्भिर्भाजिताः चतुर्थांशावशेषिताः स्पष्टाः स्युः अतिशत्रुगृहे अतिशत्रुक्षेत्रस्थे रश्मिपतौ सति मूलरश्मयः करघ्नाः द्विगुणिताः च पश्चात् पंचभाजिताः पंचांशावशेषिताः स्पष्टाः स्युराति । अथास्योदाहरणम् । चंद्रः ८ । २५ । २९ अयं धनूराशिवर्तमानोऽस्य पतिर्गुरुश्चंद्रस्य पंचधा मैत्र्यां मित्रम् अतोऽस्य मित्रक्षेत्रे विहित संस्कारो यथा मूलध्रुवांकानीतचंद्ररश्मयः २।३१।१३ एते षड्गुणिताः १२। १८६।७८ षष्ट्युद्धृताः १५ । ७ । १८ एते पंचभक्ताः ३ । १ । २७ जातोऽयं विशेषसंस्कृतश्चंद्ररश्मिः स्पष्टइति ॥ ११ ॥ १२ ॥ १३ ॥

भाषा-अब पूर्वोक्त रश्मिबलको विशेषकरके स्पष्ट करते हैं. अंशपति उच्चका होवे तो ध्रुवांकोंसे करी हुई रश्मिको द्विगुणित करनेसे स्पष्ट होती है. रश्मिपति मूल त्रिकोणमें होवे तो पूर्वरश्मिको द्विगुणित करनेसे स्पष्ट होती है. रश्मिपति स्वराशिका होवे तो पूर्व रश्मिको द्विगुणित करके इसका अर्ध भाग करना. सो स्पष्ट रश्मि होती है. रश्मिपति अधिमित्र घरमें होवे

तो पूर्वरश्मिको चतुर्गुणित करके तीनसे भाग लेना, जो लब्ध आवे वो रश्मि बल स्पष्ट जानना. रश्मिपति मित्रराशिमें होवे तो पूर्वरश्मिको छः गुणित करके पांचका भाग लेना, लब्ध जो आवे वो स्पष्टरश्मि जानना. रश्मिपति शत्रुराशिका होवे तो पूर्वरश्मिको दुगुनी करके चारका भाग लेके जो लब्ध आवे वो स्पष्ट रश्मि जानना. रश्मिपति अति शत्रुके राशिमें होवे तो पूर्वरश्मिको दुगुनी करके पांचसे भाग लेना, लब्ध जो आवे वह स्पष्ट रश्मि जानना. रश्मिपति नीचका होवे तो विशेष संस्कार नहीं है ॥ ११ ॥ १२ ॥ १३ ॥

शनिं सितं विना ताराग्रहा अस्तंगता यदि ॥
विरश्मयो भवंत्येवं वक्रादौ द्विगुणास्ततः ॥ १४ ॥
अनुपातोऽन्तरे वक्रं त्यागेऽष्टांशविहीनकाः॥ मंदायां
दशभागोना वस्वंशोनाः कराः स्मृताः ॥ १५ ॥
तथा शीघ्रतरायां च वेदांशोनाः कराः स्मृताः ॥
अंगांशोनाश्च शाघ्रायां केचिदेवं वदन्ति हि ॥ १६ ॥

टीका-अथ मतांतरेण गतिवशाद्रश्मीनां ह्रासवृद्धी आह-शनिमित्यादिषोडशश्लोकपर्यन्तम् । यदि यर्हि शनिं सितं विना शनिशुक्राव्यातिरेकेण ताराग्रहाः भौमादयः अस्तंगताः रविरश्मिलुप्तकिरणाश्चेत् तर्हि भौमबुधगुरवः विरश्मयः रश्मिहीनाः भवेयुः एवं प्रकारेण वक्रादौ वक्रारंभे द्विगुणाः मूलरश्मयः द्विगुणिताः स्पष्टाः स्युः वक्रत्यागे वक्रांते अष्टांशविहीनकाः अष्टभागोनाः स्पष्टाः स्युः अंतरे वक्रं वक्रत्यागमध्यभागे अनुपातः त्रैराशिकगणितेन वक्राद्यंकवक्रत्यागांकानां मध्यांकोत्पादनं तेन मध्यरश्मयः स्पष्टाः स्युः मंदायां रश्मिपतिगतौ दशभागोनाः स्वदशांशहीनाः मूलरश्मयः स्पष्टाः

स्युः मंदतरायामित्यध्याहारः गतौ तु वस्वंशोनाः स्वाष्टांशहीना मूलरश्मयः स्पष्टाः स्युः तथा तेनैव प्रकारेण शीघ्रायां गतौ अंगांशोनाः स्वषष्ठांशोनाः तथा शीघ्रतरायां तु वेदांशोनाः स्वचतुर्थांशहीनाः स्पष्टा रश्मयो भवंति इति केचिद्वदंतीति केचिच्छब्देन नैतन्मुख्यमतामिति ध्वनितम् ॥ १४ ॥ १५ १६ ॥

भाषा–अब मतांतरसे रश्मियोंकी हानिवृद्धिका लक्षण कहते हैं. जो कभी शनि शुक्र यह दोनों विना मंगल, बुध, गुरु यह तीनों ग्रह अस्तंगत होवें तो उनका रश्मि हीन जानना. रश्मिपति वक्रारंभमें होवे तो पूर्व रश्मि द्विगुणित करनेसे स्पष्ट होती है. वक्रीके अंतमें रश्मिपाति होवे तो पूर्वरश्मिको ८ आठसे भागलेना जो लब्ध आवे वह स्पष्ट रश्मि होती है. वक्रगतिसे मध्यभागसे होवे तो त्रैराशिकके गणितमार्गसे फल लायके पूर्वरश्मिको स्पष्ट करना, रश्मिपतिकी गति मंद होवे तो पूर्वरश्मिका दशांश लेके पूर्वही रश्मिमें हीन करना तो स्पष्ट होती है. रश्मिपतिकी गति बहुत मंद होवे तो अष्टमांश हीन करना, शीघ्र गति होवे तो छठा भाग हीन करना. शीघ्रतरगति होवे तो चतुर्थांश हीन करना ऐसा कितनेक ऋषि कहते हैं ॥ १४ ॥ १५ ॥ १६ ॥

अथ मतांतररश्मिचक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
०	३	५	०	१	२०	३	३४
०	१	१	५१	३८	४०	३९	५३
०	२७	१	५१	५४	५४	३९	४६

वक्रानुवक्रा विकला शीघ्रा शीघ्रतरा गतिः ॥
वृद्धिहीने तु शिष्टे द्वे वर्जनीये समासमा ॥ १७ ॥

टीका–अथैकविंशतितमश्लोके रश्मीनां ग्रहगतिसंज्ञारूपतः फलानि निर्णयिष्यन्नादौ अष्टविधसंज्ञा आह–वक्रेति । वक्रा १, अनुवक्रा २, विकला ३, शीघ्रा ४, शीघ्रतरा, ५ अपि च इमे शीघ्रे शीघ्रतरे एव वृद्धिहीने सत्यौ तु वृद्धचा वर्धनेन हीने रहिते तथोक्ते

तु शिष्टेनाम मंदमंदतरे ६ । ७ भवतः अथाष्टमी समा तु द्वे वर्जनीये वर्जितुं योग्ये कृते तु समासमा द्विप्रकारकसमा भवाति। अत्रेत्थं तत्त्वम् । शीघ्रतरा वृद्धिहीना जाता सती मंदसंज्ञका षष्ठी गतिः भवति तथा शीघ्रा वृद्धिहीना सती मंदतरा सप्तमी गतिर्भवाति तथा च मंदया शीघ्रा हीना कृता समा तथैव मंदतरया शीघ्रतरा हीना कृता सती समैव एवं द्विप्रकारेण समत्वं समासमा इति द्विरुक्त्योपलभ्यते इति अष्टमी समा संज्ञका ज्ञेयेति अष्टविधा गतिरुपदिष्टा । एतल्लक्षणानि सूर्यसिद्धांतादिष्ववगंतव्यानि ॥ १७ ॥

भाषा—अब गतिके आठ भेद कहते हैं. वक्रगति १, अनुवक्रा गति २, विकला गति ३, शीघ्रगति ४, शीघ्रतरा गति ५, मंदगति ६, मंदतरगति ७, समासमा गति ८, वो वर्ज करनेयोग्य हैं शीघ्रतरगति वृद्धिहीन भई इसको मंदगति कहना. वैसी शीघ्रगति वृद्धिहीन भई तो अति मंदतर गति कहना. विशेष टीकामें स्पष्ट है ॥ १७ ॥

योगेषु ये ग्रहाः प्रोक्तास्तेषां योगे च रश्मयः ॥
पापसौम्यारिमित्राणां योगे हानिश्च कीर्तिता ॥१८॥
उच्चादिषु च पूर्वोक्तः पापो बलवशाद्भवेत् ॥ १९ ॥

टीका—अथ प्राप्तरश्मिषु योगविशेषेण ह्रासवृद्धी आह—योगेष्विति । योगेषु राजयोगदारिद्र्यादिसंज्ञकेषु ये योगकर्तारो ग्रहाः प्रोक्ताः तेषां योगे सति दुष्टशुभयोगकारकसंबंधतारतम्येन रश्मयः स्पष्टाः स्युः । एतदुक्तं भवति राजयोगकारकग्रहस्य दारिद्र्ययोगकारकग्रहेण योगे एकराशिसंबंधे सति दारिद्र्यकारकग्रहप्राप्तरश्मिभीराजयोगकारकग्रहरश्मीन्संशोध्यावशिष्टा राजयोगकारकग्रहरश्मयो ज्ञेयाः एवं राजदारिद्र्ययोगकारकयोरेव द्वयोस्त्रयाणां वा संयोगे तयोस्तेषां वा रश्मिमीलनेन स्पष्टरश्मयस्तयोस्तेषां वा ज्ञेया

इति दिक्। एवमेव शुभाशुभग्रहयोगेन रश्मीनां ह्रासवृद्धी विशदयत्युत्तरार्धेन। पापः खलः सौम्यः शुभः अरिः शत्रुः मित्रं सुहृत् एतेषां योगे एकराशिसंबंधे सति हानिः पापरश्मिभिः शुभरश्मीनां अरिरश्मिभिः मित्ररश्मीनां हानिः ह्रासः एवमर्थात् सौम्यानां मित्राणां च योगे एव रश्मयः कीर्तिताः कथिता इति ॥ १८॥ अथोच्चादीनां पापानां च रश्मीनाह-उच्चेति । उच्चादिषु नीचांतपूर्वोदितनवस्थानेषु पापानां च रश्मीनाह उच्चादिषु उच्चत्रिकोणस्वर्क्षादिनीचांतनवलक्षणेषु पूर्वोक्तो रश्मिः बोध्यः पापः पापग्रहरश्मिस्तु दलवशात् मूलरश्मिः बलतारतम्येन न्यूनातिरिक्तो भवेत् ॥ १९ ॥

भाषा-अब राजयोग दरिद्रयोग होवे तब रश्मिका विशेष संस्कार कहते हैं. राजयोग करनेवाले ग्रह और दरिद्रयोग करनेवाले ग्रह यह दोनोंका एकराशिसंबंध होवे दरिद्र करनेवाले ग्रहकी रश्मिको राजयोग करनेवाले रश्मिमें न्यून करके जो राजयोग ग्रहकी शेष रहै वो स्पष्ट जानना. ऐसा शुभाशुभ शत्रुमित्रादिक ग्रहोंका एकराशिसंबंधसे ऊपर लिखे हुए प्रकारसे कहना ॥ १८ ॥ अब पहिले जो उच्चादिक नव स्थान कहे हैं उनमें पापग्रहोंकी रश्मिका निर्णय कहते हैं. उच्चादि नव स्थानोंमें रश्मि पहिले सरीखे जानना. पापग्रह रश्मिको बलवानूपना देखके कमजास्त करना ॥ १९॥

चतुर्गुणा राजयोगे पूर्वन्यायेन बोधिताः ॥
पंचाष्टषण्नवाष्टांकवेदाः स्यूरश्मयः स्वकाः ॥२०॥

टीका-अथ राजयोगकारकग्रहाणां ध्रुवांकैः प्राग्वत् रश्मीनाह चतुर्गुणा इति । राजयोगे राजयोगकारकग्रहे पूर्वन्यायेन नीचोनमिति सप्तमश्लोकोक्तेन रश्मयो बोधिता ज्ञापिताः विशेषस्तु दिगित्यादि

षष्ठश्लोकोक्तध्रुवांकस्थानापन्नानन्यध्रुवांकान्रव्यादिसप्तग्रहविहितानाहोत्तरार्धेन । पंच ५ रवेः, अष्टौ ८ चंद्रस्य, षट् ६ भौमस्य, नव ९ बुधस्य, पुनरष्टौ ८ गुरोः, अंकाः ९ शुक्रस्य, वेदाः ४ शनेः इति ध्रुवांकैः प्राग्वद्रश्मीनानीय चतुर्गुणाः कार्याः स्वकाः तत्तद्ग्रहाणां स्वीया रश्मयः स्युः ॥ २० ॥

भाषा--अब पहिले जो रश्मिबल लाये हैं उसमें जो राजयोगकारक ग्रहकी रश्मि हैं, वहां विशेष कहते हैं, सोलह राजयोग जो हैं वो पूर्वभागमें कहे हैं, सो वे ग्रहोंके अब रश्मि संस्कारमें क्षेपक कहते हैं. सूर्यके ५ चंद्रके ८, मंगलके ६, बुधके ९, गुरुके ८, शुक्रके९, शनिके ४ यह ध्रुवांकोंसे पूर्वरीतिप्रमाणसे रश्मि लायके चतुर्गुणित करना अपनी अपनी ग्रहकी रश्मि होवे ॥ २० ॥

द्विग्रहादिषु योगेषु ग्रहभावफलाहताः ॥ गतिसंज्ञानु
रूपेण फलानां निर्णयः स्मृतः ॥ २१ ॥

टीका-अथ द्विग्रहादियोगे रश्मीन्संक्षेपतः फलनिर्णयं चाह द्विग्रहेति । द्विग्रहादिषु द्वौ च तौ ग्रहौ च द्विग्रहौ तौ आदिर्येषां ते द्विग्रहचतुर्ग्रहादयः तेषु योगेषु पंचाष्टेत्यादय उक्तरश्मयः ग्रहभावफलाहताः ग्रहाणां संयुक्तानां यो भावः संयोगवर्तमानभावः तद्रूपं यत्फलं तेन हता गुणिताः तेषां द्व्यादीनां युक्तग्रहाणां स्पष्टा रश्मयो भवंति । अत्रोदाहरणम् । रविः १०।४।१४। गुरुः १०।१५।३९ अनयोर्भावः १०।२।५३ रव्युक्तरश्मयः ५ एभिर्गुणितो भावः ५०।२।२६५ षष्ट्युद्धृताः ५०।१४।२५ ऊर्ध्वांकोंशस्थानापन्नाः त्रिंशद्धीनो जातः २०।१४।२५ अयं रविस्पष्टरश्मिः एवं गुरोरपि रश्मयः । एवं त्रिग्रहादियोगेषु ज्ञेयम् । अथैषां रश्मीनां फलानां निर्णयः निश्चयः गतिसंज्ञानुरूपेण गतीनां याः संज्ञाः प्रागुक्ताः वक्रानुवक्रेत्या-

द्यः तासां अनुरूपेण सादृश्येन स्मृतः यस्य ग्रहस्य या वक्राद्यन्यतमा गतिः तत्सादृश्येन वक्राद्यन्यतमं फलं रश्मीनां ज्ञेयमित्याशयः ॥ २१ ॥

भाषा--अब द्विग्रह, त्रिग्रह, चतुर्ग्रहयोग ग्रहोंकी रश्मिके वहां वे ग्रह रश्मिसे ग्रहस्थित भावांक गुणन करके साठसे भाग लेना, लब्ध जो हैं वो उच्चरश्मि फल आया, रश्मिका फल गतिके अनुसारसे कहना ॥ २१ ॥

इष्टकष्टफलसंगुणास्ततस्तत्करानथच संयुतांस्तु
तान् ॥ निश्चितार्थमखिलं समीक्ष्य तत्प्रस्तुतं तु
सकलं वदेद्बुधः २२ ॥

टीका—एवमिष्टकष्टं रश्मिश्चोक्त्वा एषां प्रयोजनमाह इष्टेति । ततः रश्म्युत्पादनानंतरं इष्टकष्टफलसंगुणानिष्टफलगुणितान् कष्टफलसंगुणितांश्च कृत्वा तानिष्टसंगुणितान्सर्वान्संयुतान्कृत्वा .तान् कष्टसंगुणितांश्च सर्वान्पृथक् संयुतांश्च करान् रश्मीन् कृत्वा अखिलं सर्वं ग्रहजं भावजं राजयोगपरिव्राज्योगादिजं नानाविधं शुभाशुभफलं निश्चितार्थं निश्चितः अर्थः इष्टकष्टरश्मिसंयोगसमुद्भवं फलं यस्मिन्कर्माणि यथा तथा प्रस्तुतस्तं तत्कालीनं पूर्णं समीक्ष्यावलोक्य विचार्येत्यर्थः । बुधो विद्वान् वदेत् कथयेदिति । अथेष्टकष्टबलगुणितरश्म्युदाहरणम् । यथा सूर्येष्टबलं ०।२८।२५ सूर्यरश्मयः ५।४०।२३ इमे गोमूत्रिकारीत्या गुणितांकाः ००।०।१४०।११२०।६४४।१२५। १०००।५७५ जातं अस्यां संख्यायां षष्ट्युद्धृतायां २ । ४१ १२ अयं सूर्येष्टरश्मिः एवं सूर्यकष्टबलम् ० । ३१ । ३५ एते सूर्यरश्मयः ५ । ४० । २३ । इमे गोमूत्रिकारीत्या गुणितांकाः ० । ० । ० । १५५ । १२४० । ७१३ । १७५ । १४०० । ८०५ । जातं अस्यां संख्यायां षष्ट्युद्धृतायां २ । ५५ । १० अयं सूर्यकष्टरश्मिः एवं सर्वत्रानुक्तस्थलेषु बोध्यम् ॥ २२ ॥

भाषा—इष्टकष्टफलसे रश्मिको गोमूत्रिकान्यायसे गुणन करके जो फल आवे उसको इष्टरश्मिकष्टरश्मि हुवे पीछे उसके ऊपरसे शुभाशुभ फल कहना॥ २२॥

एकादि पंचकं यावद्दरिद्रा भृशदुःखिताः ॥ नीचानां
दासतां याता अपि जाताः कुलोत्तमे ॥ २३ ॥

टीका—अथ फलं वदेदित्युक्तं तदेकादिरश्मिसंख्यातारतम्येन स्फुटयति—त्रयोविंशतिश्लोकमारभ्य द्विचत्वारिंशच्छ्लोकपर्यंतम् । तत्र तु एकादित्यादिषड्विंशतिश्लोकपर्यंतमशुभफलं विवृणोति । एवं प्रागुक्तरीत्या संस्कृतरश्मयः एकादि एकमारभ्य यावत्पंचकं पंचांकपर्यंतं प्राप्ताश्चेत्तद्रश्मिवंतो नराः दरिद्राः रंकाः अपि च भृशदुःखिताः अतिव्यथिताः संतः कुलोत्तमे सत्कुलेऽपि जाताः उत्पन्नाः नीचानां हीनानां दासतां दासस्य भावस्तां नीचभृत्यत्वमित्यर्थः । याताः यास्यन्तीत्यर्थः । किं पुनर्नीचजातीया नीचसेवकाः स्युरिति वक्तव्यम् ॥ २३ ॥

अथ इष्टबलचक्रमाह.								अथ कष्टबलरश्मिचक्रम्.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.	सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
२	०	१	०	०	५	१	१३	२	१	४	१	०	१	०	१०
४१	३८	५६	३३	४६	१५	४५	३७	५९	५२	४९	१०	३५	३७	४०	४५
१२	१८	१२	३१	४७	४४	४३	२७	१०	५१	२३	९	३६	४७	४०	४६

भाषा—अब रश्मिका फल कहते हैं, एकसे पांचतक रश्मिका योग होवे तो वो मनुष्य दरिद्री दुःखी होवे. और जो कभी उत्तम कुलमें पैदा हुवा होवे तथापि नीचकी चाकरी करेगा ॥ २३ ॥

परतो दशकं यावत्केवलं जठराय वै ॥ निःस्वाः कदाचिद्दासाश्च भारवाहाः कदाचन ॥ स्त्रीपुत्रग्रहहीनाश्च वंशायोग्यक्रियारताः ॥ २४ ॥

टीका-ततः परतो यावद्दशकं पंचप्रभृति दशपर्यंतं प्राप्ताश्चेत् तेषां जन्म जठराय वै केवलमुदरभरणार्थमेव ज्ञेयं तदेव विशदयति ते निःस्वाः दरिद्राः अतः कदाचिद्दासाः कदाचिदुदरपोषणार्थं भारवाहका भारं वहंति धरंतीति तथाभूताः स्त्रीपुत्रगृहहीनाः भार्यासुतवेश्मरहिताः च परं वंशायोग्यक्रियारताः स्ववंशानुचितकर्मसक्ताश्च भवेयुरिति ॥ २४ ॥

भाषा–छःसे दसतक योग होवे तो केवल उदरपोषण करेगा. कोई बखत द्रव्यहीन, कोई बखत दास, कोई बखत भारवाहक होवेंगे. स्त्रीपुत्रघरसे हीन रहेंगे. वंश कुल जावे ऐसे कर्ममें रत रहेंगे ॥ २४ ॥

एकादशेऽल्पपुत्राः स्वल्पधनाः स्त्रीविमानिता मनुजाः ॥ बिभ्राति कृच्छ्रेण निजं स्वल्पं च कुटुंबमेव तदा ॥ २५ ॥ द्वादशे निर्धना मूर्खा धूर्ताः सत्त्वविनाशकाः ॥ त्रयोदशे च चोराः स्युर्निर्धनाः कुलपांसनाः ॥ २६ ॥

टीका-एकादशे रश्मौ सति मनुजाः अल्पपुत्राः अल्पसंतानाः अल्पधना अल्पद्रव्याः अतः स्त्रीविमानिताः अबलावमानयुक्ताः संतः तदा स्वल्पमपि निजं कुटुंबं कृच्छ्रेणैव कष्टेनैव बिभ्राति पालयंतीति ॥ २५ ॥ अथ द्वादशपरिमिते रश्मौ जाताः निर्धना दरिद्राः मूर्खा बुद्धिहीनाः धूर्ताः परवंचकाः सत्त्वविनाशकाः सतो भावः सत्त्वं उत्तमत्वं तस्य नाशकाः गुणाद्युत्तमत्वत्यागशीला इत्यर्थः । अथ

त्रयोदशमिते रश्मौ जनाः चोराः तस्कराः निर्धनाः स्पष्टं कुलपांसनाः कुलाधमाश्च स्युरिति ॥ २६ ॥

भाषा–ग्यारहरश्मिका योग होवे तो अल्पपुत्रवान् स्त्रियोंसे अपमानित होवेगा. और अपने स्वल्प कुटुंबकाभी पालन बडे कष्टसे करेगा ॥ २५ ॥ बारह रश्मिका योग होवे तो मनुष्य निर्धन मूर्ख धूर्त सत्यहीन होवेगा. तेरह रश्मिका योग होवे तो चोर निर्धन कुलपांसक होवेंगे ॥ २६ ॥

विद्वांश्चतुर्दशे धर्मे रतो मर्षी धनार्जकः॥कुटुंबभरणे
सक्तः कुलयोग्यक्रियो भवेत् ॥ २७ ॥ रश्मिभिः
पंचदशभिरेवं गुणयुतोऽपि सन् ॥ स्ववंशमुख्यो
धनवानित्याह भगवान्मुनिः ॥ २८ ॥

टीका–अथ विद्वानित्यादित्रयस्त्रिंशच्छ्लोकावधि शुभत्वं कथयति तत्र विद्वानिति रश्मिभिरिति च। चतुर्दशपरिमिते रश्मौ विद्वाञ्ज्ञाता धर्मे पुण्यकर्मणि रतः तथा मर्षी मर्षः सहनशक्तिः तद्वान् धनार्जकः धनसंपादकः कुटुंबभरणे सक्तः कुटुंबपालनपरः कुलयोग्यक्रियः स्ववंशोचिताचरणशीलश्च भवेत् ॥ २७ ॥ अथ पंचदशपरिमितैरश्मिभिस्तु एवंगुणयुतोऽपि सन् पूर्वोक्तफलसम्पन्नोऽपि सन् स्ववंशमुख्यः स्वकुलश्रेष्ठः धनवांश्चेति भगवान्पराशरमुनिराहेत्यन्वयः ॥ २८ ॥

भाषा–चौदह रश्मिका योग होवे तो वो मनुष्य धर्मी क्रोधरहित रहै, द्रव्योपार्जन करनेमें तत्पर रहै, कुटुंबपालन करै, कुलयोग्य कर्म करै, ॥२७॥ पंद्रहरश्मिका योग होवे तो सत्ताईसवें श्लोकका फल जो है वो फलसहित होयके और अपने वंशमें मुख्य होवेगा, धनी होवेगा, ऐसा पराशरमुनि कहते हैं ॥ २८ ॥

आविंशतेः कुलेशाना बहुभृत्याः कुटुंबिनः ॥ कीर्तिमंतश्च पूर्णाश्च स्वजनेन च षोडश ॥ २९ ॥ एकविंशतिविख्यातः पंचाशज्जनपोषकः ॥ दानशीलः कृपायुक्तो द्वाविंशे लोभसंयुतः ॥ ३० ॥

टीका–अथ षोडशरश्मिमारभ्य विंशतिरश्मिपर्यंतं फलानि कथयाति–आविंशतेरिति । षोडशाद्रश्मेः सकाशात् आविंशतेः विंशतिरश्मिपर्यंतं जनाः कुलेशानाः कुलपालका बहुभृत्याः प्रचुरसेवकाः कुटुंबिनः कुटुंबवंतः कीर्तिमंतश्च स्वजने पूर्णाश्च भवेयुरिति ॥ २९ ॥ एकेत्यादित्रयास्त्रिंशत्पर्यंतं फलान्याह । एकविंशतिविख्यातः एकविंशतिसंख्याप्रसिद्धो रश्मिश्चेत् नरः पंचाशज्जनपोषकः शतार्धनरपालकः च परं दानशीलः वितरणस्वभावः कृपायुक्तो दयालुः स्यात् । अथ द्वाविंशे रश्मौ लोभसंयुतः अतिलुब्धः ॥ ३० ॥

भाषा–सोलहसे लेके बीसतक रश्मियोग होवे तो कुलको पालनकरनेवाले बहुत सेवक बहुत कुटुंब जिनका और कीर्तिमान् अपने संबंधी लोकोंसे पूर्ण होवेंगे ॥ २९ ॥ इक्कीस रश्मिका योग होवे तो पचास मनुष्यका पालन करेगा, दानशील दयावंत होवेगा, और बाईस रश्मिका योग होवे तो लोभी होवेगा. और धनवान्, शत्रुहीन, समर्थ, अल्पगुणी होवेगा ॥ ३० ॥

धनवानल्परिपुश्च प्रभुः स्वल्पगुणो भवेत् ॥ त्रयोविंशे तु मुख्यश्च विद्याहीनो धनी सुखी ॥ ३१ ॥ आत्रिंशतपरतः श्रीमान्सर्वसत्त्वसमन्वितः ॥ राजप्रियश्च चंडश्च जनश्च बहुभिर्वृतः ॥ ३२ ॥

टीका-धनवान् संपन्नः अल्परिपुः अल्पशत्रुः प्रभुः स्वामी स्वल्पगुणो भवेदिति । मध्यमं शुभाशुभमिश्रफलमुक्तम् । त्रयोविंशे रश्मौ तु मुख्यः जातिश्रेष्ठः विद्याविहीनः समान्यविद्यावान् धनी द्रव्यवान् सुखी सौख्यसंपन्नश्च भवेत् ॥ ३१ ॥ अथ चतुर्विंशतिरश्मिमारभ्य परतः अग्रे आत्रिंशत् त्रिंशद्रश्मिपर्यंतं श्रीमान् लक्ष्मीवान् सर्वसत्त्वसमन्वितः अश्वगोगजादिप्राणियुक्तः राजप्रियः नृपप्रीतिपात्रं चंड उग्रस्वभावः च परं बहुभिः असंख्यातैर्जनैर्वेष्टितः ॥ ३२ ॥

भाषा-तेवीस राश्मिका योग होवे तो विद्याहीन हो जावेगा तथापि सब ठिकाने प्रधानताको पावै धनवान् सुखी होवै ॥ ३१ ॥ चौबीससे लेके तीसपर्यंत रश्मिका योग होवे तो लक्ष्मीवान् सर्वबलयुक्त होवे राजप्रिय प्रतापी और बहुत लोक उसके संग रहाकरें ॥ ३२ ॥

एकात्रिंशे च साचिवो द्वात्रिंशे वाहिनीपतिः ॥
पूर्वभागे समुद्दिष्टफलानि परतो विदुः ॥ ३३ ॥

टीका-एकात्रिंशे च रश्मौ साचिवः मंत्री प्रधान इत्यर्थः । द्वात्रिंशत्परिमिते रश्मौ वाहिनीपतिः सेनारक्षकः अतः परतः त्रयस्त्रिंशद्रश्मिप्रभृतिफलानि पूर्वभागे समुद्दिष्टफलानि विदुः ज्योतिषिका इति शेषः । एवं एकरश्मिमारभ्य यावत् षट्पंचाशद्रश्मिसमागमे सामान्यतः शुभाशुभफलानि कथितानि ज्ञेयानि विशेषतस्तु अग्रे वक्ष्यतीति ॥ ३३ ॥

भाषा--एकतीस रश्मिका योग होवे तो प्रधान पदवीको पावे, बत्तीस रश्मि होवे तो सेनापति होवे वहांसे आगे जो रश्मिका फल है सो पूर्वभागमें कहा है ॥ ३३ ॥

पंक्तिः सूर्यां तिथिनृपात्यष्टिर्धृतिश्च विंशतिः ॥ नखा
मूर्च्छा जिनास्तत्त्वं त्रिंशद्द्वात्रिंशदेव च ॥ ३४ ॥
पंचाशच्चैव षष्टिश्च शतं चैव सुतादयः ॥ आरभ्य
विश्वसंख्यायाः क्रमात्स्वजनपोषकाः ॥ ३५ ॥

टीका—अथारंभतो यावद्रश्मिसमापनं संततिविचारमाह—पंक्तिरित्यादिसार्धश्लोकेन । पंक्तिः दश “द्वात्रिंशे वाहिनीपतिः” इति द्वात्रिंशद्रश्मिपर्यंतं प्राक्सामान्यफलान्युक्तानि तावत्संख्यारश्मिपर्यंतं नवसंख्याकसंततिर्ध्वन्यते, सा च एकरश्मितो द्वात्रिंशद्रश्मिपर्यंतं अनुपाततो ज्ञेया। द्वात्रिंशद्रश्मिषु नवसंततिश्चेत्तन्न्यूनामुकरश्मिषु कियती संततिरिति ततः परं क्रमप्राप्तद्वात्रिंशद्रश्मीनामग्रे भागे त्रयस्त्रिंशद्रश्मिषु सत्सु पंक्तिः दशसंख्याः सुतादयः, चतुस्त्रिंशद्रश्मिषु सूर्याः द्वादश संततिः पंचत्रिंशद्रश्मिषु तिथयः पंचदश संततिः षट्त्रिंशद्रश्मिषु नृपाः षोडश, एवं ३७ रश्मिषु भूयः पुनः नाम प्रागुक्ताः नृपा एव, ३८ रश्मिषु अत्यष्टिः सप्तदश, ३९ रश्मिषु धृतिः अष्टादश, ४० रश्मिषु धृतिः अष्टादशैव, ४१ रश्मिषु नखः विंशतिः; ४२ रश्मिषु मूर्छाः एकविंशतिः ४३ रश्मिषु जिनाः चतुर्विंशतिः; ४४ रश्मिषु तत्त्वं पंचविंशतिः, ४५ रश्मिषु त्रिंशत् संततिः, ४६ रश्मिषु द्वात्रिंशत, ४७ रश्मिषु पंचाशत्, ४८ रश्मिषु षष्टिः, ४९ रश्मिषु शतं सुतादयः अग्रे अनुक्तत्वात् शतसंख्यातोऽधिकाऽसंख्याता ज्ञेयेत्याशयः ॥ ३४ ॥ अथैश्वर्यविचारो रश्मिषु कथ्यते आरभ्येत्यर्धे। तत्र प्राक्सर्वसामान्यविचारे त्रयोदशरश्मिपर्यन्तम् कथ्यते शुभमेव फलमुक्तम् । तावद्रश्मिपर्यंतं दारिद्र्यदुःखाद्यशुभफलत्वादैश्वर्याभाव एव। ततः विश्वसंख्यायाः पुरतः चतुर्दशरश्मिमारभ्य सामान्यफलनिर्णीतद्वात्रिंशद्रश्मिसंख्यापर्यंतंक्रमाद्रश्म्यंकसंख्यापरिमितस्वजनपोषकाः जना ज्ञेयाः ॥ ३५ ॥

भाषा–अब रश्मि ऊपरसे संतानविचार कहते हैं. तेंतीस रश्मिका योग होवे तो दश पुत्रादिक होवें. चौंतीस रश्मियोग होवे तो बारह संतान होवैं, पैंतीस रश्मिसे पंदरह संतान होवें, छत्तीस रश्मिसे सोलह संतान होवें सैंतसि राश्मिसे सोलह संतान होवें, अडतीस रश्मिसे सत्रह संतान होवें, ओगनचालीस राश्मिसे अठारह संतान होवें, चालीस रश्मिसे अठारह संतान होवें, एकतालीस रश्मि हों तो बसि संतान होवें बियाँलीस रश्मि होवें तो एकईस संतान होवें, त्रियालीस रश्मि होवें तो चौवीस संतान होवें, चौवाँलीस रश्मि होवें तो पच्चीस संतान होवें, ४५ रश्मि होवें तो ३० संतान होवें ४६ रश्मि होवें तो ३२ संतान होवें ४७ रश्मि होवें तो ५० संतान होवें, ४८ रश्मि होवैं तो साठ संतान होवें, ओगनपचास रश्मि होवें तो सौ संतान होवें. आगे कहा नहीं है इस वास्ते इसमें अधिक रश्मि होवें तो १०० से अधिक संतान वृद्धि जानना ॥ ३४ ॥ ३५ ॥

अत ऊध्व नृपे श्रांत आपंचात्रिंशतः क्रमात् ॥
शतपंचकमारभ्य सहस्रावधि पोषकः ॥ ३६ ॥

टीका–अथ द्वात्रिंशद्रश्म्यूर्ध्वं प्राग्वद्रश्मिसंख्यां संत्यज्य बहुपोषकत्वं कथयति–अत ऊर्ध्वमिति । अत ऊर्ध्वं द्वात्रिंशद्रश्म्यूर्ध्वं आपंचात्रिंशतः पंचत्रिंशद्रश्मिपर्यंतं शतपंचकं पंचशतान्यारभ्य सहस्रावाध सहस्रं अवधिर्यस्मिन्कर्माणि तत्तथा पोषकाः सहस्रपर्यंतं पालका इत्यर्थः । कया रीत्या पोषकास्तत्साधनं कथयति नृपे राज्ञि राजकर्मणीत्यर्थः । श्रांतः जातश्रमः राजाधिकारक्रमेणेति यावत्क्रमात् त्रयस्त्रिंशच्चतुस्त्रिंशत्पंचात्रिंशद्रश्मिषु फलं ज्ञेयमिति ॥ ३६॥

भाषा–अब रश्मिके मानसे बहुपोषकयोग कहते हैं. ३२ रश्मिका योगसे ४५ पर्यंत, ५०० सौसे १००० पर्यंत मनुष्यका पोषण करेगा ॥ ३६ ॥

अत ऊर्ध्वं तु देशानां संख्याः स्युः पंचविंशतिः ॥
षड्विंशतिश्च भानि स्युस्त्रिंशत् षट्त्रिंशदेव च ॥ ३७ ॥

टीका-अथ पंचत्रिंशद्रश्मिभ्यः परतो देशाधिपत्यं कथयति अतऊर्ध्वमिति । अत ऊर्ध्वं षट्त्रिंशदंशादारभ्य क्रमाद्देशानामाधिपत्ये संख्याश्चत्वारिंशद्रश्मिपर्यंतं पंचविंशत्यादयः स्युः एतदुक्तं भवति षट्त्रिंशद्रश्मिषु पंचविंशतिः २५, सप्तत्रिंशद्रश्मिषु षड्विंशतिः २६, अष्टत्रिंशद्रश्मिषु भानि २७, एकोनचत्वारिंशद्रश्मिषु त्रिंशत् ३०, चत्वारिंशद्रश्मिषु षट्त्रिंशत् ३६, एवं देशानामाधिपत्यं ज्ञेयमिति ॥ ३७ ॥

भाषा-छत्तीस रश्मिका योग होवे तो पचीस गावोंका आधिपति होवे, सैंतीस रश्मिका योग होवे तो छब्बीस गावोंका अधिपति होवे, अडतीस रश्मिका योग होवे तो सत्ताईस गांवोंका अधिपति होवे, उनचालीस रश्मिका योग होवे तो तीस गावोंका अधिपति होवे चालीस रश्मिका योग होवे तो छत्तीस गावोंका आधिपति होवे ॥ ३७ ॥

अत ऊर्ध्वं नृपाः क्षात्रधर्मिणः क्षत्रियोऽथ वा ॥
भूद्वित्र्यब्धीषुषट्सप्तभूभृज्जनपदाधिपाः ॥ ३८ ॥

टीका-अथ रश्मीनां राजफलमाह-अत इति । अत ऊर्ध्वं चत्वारिंशद्रश्म्यूर्ध्वं क्षत्रियः जात्येकवचनं क्षत्रियजातीयाः नृपाः राजानो भवेयुः । अथ च अन्यजातीयाश्चत्वारिंशदधिकरश्मिवंतश्चेत् क्षात्रधर्मिणः क्षत्रधर्मवन्तः संतः नृपाः स्युः तत्र क्रममाह एकचत्वारिंशद्रश्मिमारभ्य सप्तचत्वारिंशद्रश्मिपर्यंतं क्रमात् भू १, द्वि२, त्र्य३, ब्धी४, षु ५, षट्, ६ सप्त७, संख्यानां भूभृतां राज्ञां ये जनपदाः देशाः तेषामाधिपाः स्वामिनो भवेयुः । एतदुक्तं भवति । एकचत्वारिंशद्रश्मिषु सत्सु

भूपसंख्याकभूभृज्जनपदानां अधिपः स्यात् तथा द्विचत्वारिंशद्रश्मिषु द्वि २ संख्याकनृपदेशपालकाः एवं क्रमेण त्रिचत्वारिंशत् ४३ चतुश्चत्वारिंशत् ४४, पंचचत्वारिंशत् ४५, षट्चत्वारिंशत् ४६, सप्तचत्वारिंशत् ४७ रश्मिषु क्रमात् त्र्य ३ ब्धी ४ षु ५ षट् ६ सप्त ७ भूभृज्जनपदानामाधिपत्यं ज्ञेयमिति ॥ ३८ ॥

भाषा–एकेचालीस रश्मिका योग होवे तो एक देशका राज्य करै, बैयालीस रश्मिका योग होवे तो दो देशोंका राज्य करे, तियाँलीस रश्मिका योग होवे तो तीन देशोंका राज्य करे, चौवालीस रश्मियोग होवे तो चार देशोंका राज्य करे. पैंतालीस रश्मियोग होवे तो पांच देशोंका राज्य करे. छँयालीस रश्मिका योग होवे तो छः देशोंका राज्य करे, सैंतालीस रश्मिका योग होवे तो सात देशोंका राज्य करे ॥ ३८ ॥

पंचाशद्रश्मिसंयोगे सम्राट् स्यादनुपाततः ॥
अतऊर्ध्वं तु देवेन्द्रतुल्याः स्युरिति पद्मभूः ॥ ३९ ॥

टीका–अथ सप्तचत्वारिंशद्रश्म्यूर्द्ध्वं सार्वभौमपदातिमाह– पञ्चाशदित्यर्धेन । पंचाशत्संख्याकरश्मिषु सम्राट् सम्यक् राजतेऽसौ तथा सार्वभौम इत्यर्थः । स्यात् ननु मध्यावशिष्टरश्मिद्वयस्य का गतिस्तत्राह । अनुपाततः ५० रश्मिषु पूर्णं साम्राज्यं चेत् एकोनेषु ४९ द्व्यूनेषु ४८ कियत्साम्राज्यमिति त्रैराशिकेन तद्वैगुण्यं ज्ञेयमिति विवेकः । अथ पंचाशदूर्ध्वं साक्षादिंद्रतुल्यत्वमेवाह अत इति । अत ऊर्ध्वं पंचाशद्रश्म्यूर्ध्वं रश्मिसमागमे तु देवेंद्रतुल्या भुवि साक्षादिंद्रतुल्या एव ते नराः स्युरिति पद्मभूर्ब्रह्मा आहेति शेषः ॥ ३९ ॥

भाषा–पचास रश्मिका योग होवे तो सार्वभौम राजा होवे, अडतालीस रश्मिका और उनचास रश्मिका फल वोही जानना. पचासके ऊपर रश्मिका योग होवे तो इंद्रके तुल्य होवे, ऐसा ब्रह्माजीने कहा है ॥ ३९ ॥

उच्चचेष्टोत्थयोगार्धगुणिताः षष्टिभाजिताः॥नरादीनां
तु संख्याः स्युः स्पष्टा इत्याह पद्मभूः ॥ ४० ॥

टीका–अथ नरादिपोष्यसंख्यामाह– उच्चेति । उच्चचेष्टोत्थयोगार्धगुणिताः रश्मय इत्युनुवृत्तम् । उच्चं उच्चबलं च चेष्टा चेष्टाबलं च उच्चचेष्टे ताभ्यां उत्थः संभूतः यो योगः मिश्रणं तस्य यदर्थं द्विभागोपलब्धिः तेन गुणिताः कृतगुणाकाराः ये प्रकरणप्राप्ता रश्मयः ते षष्टिभाजिताः भक्ताः कार्याः । एवं कृते ये लब्धांकाः ते एव नरादीनां नरा मनुष्याः आदयो येषां ते अश्वगजगोप्रभृतिपोष्याः तेषां स्पष्टाः स्फुटाः संख्याः स्युरिति एवं प्रकारकनरादिज्ञानं पद्मभूर्ब्रह्माऽऽह उक्तवानिति ॥ ४० ॥

भाषा–अब रश्मिमें विशेष फल कहते हैं. उच्चरश्मि चेष्टारश्मिका योग करके उसका अर्ध करना पीछे वो अर्ध जो अंक हैं उनसे पूर्व योगको गुणना गोमूत्रिकान्यायसे पीछे साठसे भाग लेना जो लब्ध आवे वो संख्या नर, अश्व, गज गौ आदि पोष्यवर्ग जानना इतने जीवोंका पालन करेगा, ऐसा जानना, ऐसा ब्रह्माजीनें कहा है ॥ ४० ॥

शूद्रादयः कलौ राजधर्मिणो म्लेच्छधर्मिणः ॥
विप्राश्चेच्छ्रीधनैर्युक्ता यज्ञकर्मक्रियारताः ॥ ४१ ॥

टीका–एवमुक्तराजयोगाः कलौ शूद्रादीनामेवेत्याह–शूद्रादय इति । कलौ कलियुगे शूद्रादयो हीनजातीयाः म्लेच्छधर्मिणः म्लेछानां धर्मोस्त्येषामिति ते यवनाश्च राजधर्मिणः राज्यकर्तारः स्युः न ब्राह्मणादयः अर्थात् रश्म्युक्तराजयोगः शूद्रादीनां म्लेच्छानां च ज्ञातव्य इति भावः । ननु अष्टचत्वारिंशत्प्रभृतिसंख्याकरश्मिसमागमे ब्राह्मणादीनां फलाभाव एवेत्याशंकायामाह–राज-

धर्मे सूचकसंख्याकरश्मिवंतो विप्राश्चेच्छ्रीधनैर्युक्ताः श्रीमंतः धनवंतश्च स्युः अपि च राजयोगघटकरश्मियोगात् यज्ञकर्मक्रियारताः स्युः तेन किं राज्यप्रापकक्रियाकरणेन उत्तरजन्मनि स्वर्गराज्यभोक्तारः स्युरिति ध्वनितार्थः । "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति श्रुतिप्रामाण्यात्स्वर्गराज्यप्राप्तिकामस्य यस्य साधननिबंधनत्वादिति दिक् । ननु क्षत्रियवैश्ययोः राजयोगः स्यान्नवेति चेन्महर्षिणा तत्फलानुक्तया शुकभागवतोक्त्या च तज्जातिद्वयस्य कलौ राज्यसत्तानिर्वाहकत्वाभाव एव सूचित इति मंतव्यम् ॥ ४१ ॥

भाषा—वे जो पूर्व राजयोग कहे हैं वे कलियुगमें शूद्रादिक म्लेच्छ धर्मियोंके जानना. और जो यह राजयोग और उत्तम रश्मियोग ब्राह्मणको होवें तो यज्ञयागकर्मनिष्ठ होयके उस पुण्यप्रतापसे स्वर्गराज्य भोगेंगे ऐसा जानना ॥ ४१ ॥

योगरश्मिसमायोगे तदानीं तत्फलं विदुः ॥ नाभसादिषु योगेषु राजयोगे स्थितं तु तत् ॥ ४२ ॥

टीका—ननु रश्मिभिरेव राज्यफलावगमे "भाग्येशात्कारके लग्ने पंचमे सप्तमेऽपि वा । राजयोगप्रदातारौ गजवाजिधनैरपि" इत्यादिग्रहयोगादिना उक्तराजयोगस्य वैफल्यप्रसंगः स्यादिति चेन्न किंतु उभयमपि कारणतया ज्ञेयमित्याह—योगेति । योगरश्मिसमायोगे सति योगाः स्थानकारकादिग्रहसमुद्भवा योगाः अष्टचत्वारिंशदादिसंख्याकराजयोगसूचकरश्मयश्च योगरश्मयः तेषां समायोगे संप्राप्तौ सत्यां तदानीमेव तत्फलम् उक्तरश्मिराजयोगफलं विदुः बुबुधुः कथयामासुरित्यर्थः । आचार्या इति शेषः । अर्थात् न केवलम् उक्तग्रहयोगैः न चापि केवलमुक्तरश्मिभिरेव किंतु राजयोगकारकग्रहयोगरश्मिसमागमेनैव राजयोगफलं ज्ञेयमिति भावः । अथ नाभसादियोगेषु अन-

कग्रहोपलब्धौ आरंभादिक्रमेण योगकर्तॄन्विचिनोति–नाभसादिष्विति श्लोकार्धकाभ्याम् । नाभसादिषु नाभसः आदिर्येषां ते आश्रयादयः रज्ज्वादयश्च तेषु राजयोगे च यत्स्थितं उक्तफलं तत्तु योगकारकानेकग्रहेषु बलिनमधिकबलवंतं ग्रहं योगे नाभसादौ राजयोगे च कर्तारं मुख्यं कारकं विज्ञाय तं पूर्णापूर्णहीनाहीनरश्मिवंतं विचार्य तादृशतारतम्येन फलं विनिर्णयेन्निश्चिनुयात् ॥ ४२ ॥

भाषा–पूर्व जो राजयोग कहे हैं और रश्मियोगका फल कहा है, परंतु केवल राजयोगसे राज्यफल प्राप्ति नहीं होनेकी किंतु राजयोग होयके बाद रश्मियोग राज्यफल दायक होवेगा, तब उक्त फल यथार्थ होवेगा और नाभसादिक जो योग हैं उनमेभी रश्मियोगका फल मिलानेसे यथार्थ मिलेगा॥ ४२॥

योगकर्तारमारभ्य बलिनं च विनिर्णयेत् ॥ पूर्वे भागे
समुद्दिष्टभाग्यकर्मफलानि तु ॥ ४३ ॥

टीका–अथ पूर्वभागोक्तभाग्यादिफलानां व्यवस्थामाह–पूर्वेत्यादिना अन्वित्यादिना च । पूर्वभागे समुद्दिष्टभाग्यकर्मफलानि सम्यगुद्दिष्टानि कथितानि यानि भाग्यफलानि कर्मफलानि च तानि तु अनुपातेन शुभानि विज्ञाय योजयेत् मेलयेत् अनुपातेन अशुभानि विज्ञाय वर्जयेत् घटयेत् अर्थात् एतत्संस्कारनिर्णीतं सिद्धं फलमिति विजानीयादित्यभिप्रायः ॥ ४३ ॥

भाषा–पहिले भागमें जो भाग्यभाव कर्मभावका फल कहा है उसका शुभाशुभ यहांके रश्मि अनुपातसे शुभाशुभ फलको जोडना घटाना ॥४३॥

अनुपातेन विज्ञाय योजयेद्वर्जयेद्बुधः ॥ स्थानवीर्या-
धिके देशे मुख्यः स्यादनुपाततः ॥ ४४ ॥ दिग्बले
विजयश्रेष्टा वीर्ये तु प्रभुता भवेत् ॥ कालवीर्याधिके
कार्ये सदोत्साही तथायने ॥ ४५ ॥

टीका-अथैवमेव अनुपाततः षड्बलव्यवस्थानमाह-स्थानेत्यादि श्लोकद्वयेन। अत्र अनुपाततः सप्तबलमध्येऽधिकावशिष्टस्य स्थानादिकस्य पृथक् सप्तविधं फलं विशदयाति। तादित्थं स्थानबलं दिग्बलाच्चेष्टाबलात्कालबलादयनबलादुच्चबलान्नैसर्गिकबलाच्च अनुपाततः पृथक् संस्कृत्य सर्वेभ्योऽप्यधिके स्थानबले देशे मुख्यः स्यादिति स्थानबलाधिक्यफलम्। एवं स्थानचेष्टादिग्बलैक्यं प्राग्वदनुपाततः पृथक् संस्कृत्य सर्वेभ्योप्यधिकतयावशिष्टे दिग्बले सति विजयः फलं ज्ञेयम् एवमेव सर्वबलेभ्योऽनुपाततः चेष्टावीर्ये चेष्टाख्यबले सति प्रभुता प्रभुत्वं भवेत् एवं प्रागुक्तरीत्या कालवीर्याधिके सर्वबलेभ्यः कालबले अधिके सति कार्ये कर्तव्यकर्माणि सदा सर्वदा उत्साही भवेत् तथा पूर्वोक्तमेव फलम् अयने अयनबलेऽपि ज्ञेयं न भिन्नं॰ अथ स्वोच्चे उच्चबलेऽधिके सति स्ववंशोत्कर्षता निजकुलोन्नतता ज्ञेया तथा नैसर्गे निसर्गबलाधिक्ये जातिनिर्णयः स्वजातिविशेषत्वनिश्चयो बोध्य इति ॥ ४४ ॥ ४५ ॥

भाषा-अब सप्त बलमें जो अधिक बल होवे उससे उच्चरश्मिका फल कहते हैं. स्थानबल १, दिग्बल २, चेष्टाबल ३, कालबल ४, अयनबल ५ उच्चबल ६, नैसर्गिकबल ७, यह सातोंका फल कहते हैं. स्थानबल अधिक होवे तो देशमें मुख्य होवे, दिग्बल अधिक होवे तो विजयी होवे, चेष्टाबल अधिक होवे तो प्रभुताई भोगे, कालबल अधिक होवे तो सर्वकार्यमें कुशल होवे, अयनबल अधिक होवे तो सर्वकाल आनंदमें रहे ॥ ४४ ॥ ४५ ॥

स्ववंशोत्कर्षता स्वोच्चे नैसर्गे जातिनिर्णयः ॥ राशीनां
च ग्रहाणां च स्वभावाः कथिता मया ॥ ४६ ॥
ये चात्र योजनीयाश्च दैवज्ञेन सुबुद्धिना ॥ ४७ ॥

इति श्रीबृहत्पाराशरहोरायामुत्तरार्धे रश्मीष्टकष्टादि-
शासने चतुर्थोऽध्यायः ॥ ४ ॥

टीका—एवं बलाधिक्यफलमुक्त्वा कथयित्वा इत्युपसंहारेणाध्यायं समापयति राशीनामित्यर्धकद्वयेन । मया संहिताकारेण अत्र संहितायां ये केचन राशीनां मेषादीनां ग्रहाणां रव्यादीनां च स्वभावाः स्वानां भावाः यथातथ्येन वर्तमानत्वमित्यर्थः । कथिता वर्णिताः ते दैवज्ञेन ज्योतिर्विदा सुबुद्धिना अतिकुशलप्रज्ञेन योजनीयाः कथनीया इत्यर्थः ॥ ४६ ॥ ४७ ॥

श्रीमत्पाराशरोक्तायां संहितायां परार्धके । टीकाचतुर्थोऽध्यायस्य रचितेश्वरतुष्टये ॥ इति श्रीमद्बृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्कन्वयवेदशास्त्रा० विद्याविद्योतितदिङ्मंडलजटाशंकरसूनुना ज्योतिर्विदा श्रीधरेण विरचितायां सुबोधिनीटीकायां चतुर्थोऽध्यायः ॥४॥

भाषा—उच्चबल अधिक होवे तो अपने वंशमें मुख्यत्व पावे, नैसर्गबल अधिक होवे तो अपना स्वजातिधर्मका विशेष प्रतिपादन करे ॥ ४६ ॥ यह संहितोत्तरभागमें राशिका और ग्रहोंका स्वभाव मैंने कहा सो जहां जैसा चाहिये वैसा कहना ॥ ४७ ॥

इति श्रीमद्बृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्कन्वयवेदशास्त्राध्यन-
व० विद्यावि० दिङ्मंडलजटाशंकरसूनुज्योतिर्विच्छ्री-
धरेण विरचितायां भाषाटीकायां
चतुर्थोऽध्यायः ॥ ४ ॥

अथ लोकयात्रावर्णनाध्यायः ५ ।

मूलस्थानाधिके स्थाने स भावः शुभ इष्यते ॥ न्यूनेऽशुभः समे मातृपितृबंधून्वादिष्यते ॥ १ ॥ स्ववेश्मधर्मकर्मायलग्नैर्द्युम्नं पतिं वदेत् ॥ मृतिव्ययारिभिस्तेषां व्ययं हानिं पृथग्वदेत् ॥ २ ॥

टीका-पंचमे ऋषिराहास्मिन्नध्याये ग्रहजं फलम् । तथा रेखावर्गणादिफलान्यपि सविस्तरम् ॥ १ ॥ अथ श्रीमत्पराशरमहर्षिर्भगवानस्मिन् पंचमेऽध्याये भावगतग्रहविचारेण रेखास्थानादिविचारेण शुभाशुभफलान्युपदिशति तत्रादौ रेखाविचारेण भावविचारः क्रियते-मूलेति । यस्मिन्कस्मिंश्चिद्भावे मूलस्थानाधिके मूलस्थानानि द्वादशभावानां प्रथमाध्याये उक्तानि "ननु स्वायुस्त्रिरिष्फेषु पंच कामे सुखेर्णवा" इत्यादीनि तेभ्यः अधिके बहुले स्थाने रेखायां सति सप्तमी स भावः शुभः शुभफलक इष्यते पूर्वैरित्यध्याहारः । अथ च न्यूने उक्तमूलस्थानतोऽल्पे स्थाने सति स भावः अशुभः तथा समे उक्तपरिमितं स्थाने सति स भावः सम इति शेषः एवं भावान शुभाशुभसमत्वं ज्ञात्वा तदनुरूपं मातृपितृबंधून् मातृपितृबंध्वादिविषयकमित्यर्थः । तत्तद्भावविहितफलं वदिष्यते वद्धातोरात्मने पदे लृट्रूपमार्षम् "प्रयोगश्चांद्रेण वा उभयपदी" इति ॥ १ ॥ अथ भावफलानां बलहानिपालननाशानाह-स्वेति । स्ववेश्मधर्मकर्मायलग्नैः षड्भावैः स्थानरूपं द्युम्नं बलं "द्युम्नं वित्ते बलेऽपि च" इति मोदिनी । तत्तद्भावफलस्य बलातिशयमित्यर्थः । तथा पार्तिं रक्षकं पालनमित्यर्थः । एवं मृतिव्ययारिभिः त्रिभावैः स्थानानुरूपं तत्तद्भावफलानां व्ययं नाशं हानिं ह्रासं च वदेत् । अर्थादवशिष्टैस्त्रिपंचसप्तमैः साम्यं स्थानतुल्यं भावफलं बोध्यमिति ॥ २ ॥

भाषा-अब इस अध्यायमें अष्टकवर्गका फल कहते हैं. जिस ग्रहका जो भावमें रेखा कही है उससे रेखा ज्यादा होवे तो शुभ फल जानना, कम होवे तो अशुभ फल जानना, समको सम फल जानना ॥ १ ॥ दूसरा, चौथा, नववां, दशवां, ग्यारहवां, लग्न, यह छः भाव अपने स्वभावसे उत्तम फल देनेवाले हैं. और आठवां, बारहवां यह भाव खर्च हानि करनेवाले हैं ॥ २ ॥

ये योगाः पूर्वभागे तु द्विग्रहाद्या नभादयः ॥ राजयोगादयः
सर्वे यथान्यायं प्रयोजयेत् ॥ ३ ॥ भरणीयकुटुंबस्य
द्वितीयेन शुभाशुभे ॥ अन्येषां चैव
भावानां स्वनामसदृशं फलम् ॥ ४ ॥ सूर्येण वेश्म
स्थानेन पितुर्मृतिपदं वदेत् ॥ चंद्रेण पंचमेनैव
मातुर्मृतिपदं वदेत् ॥ ५ ॥

टीका-अथ पूर्वभागोक्तयोगानां व्यवस्थामाह-ये इति । पूर्वभागे तु पूर्वार्धे तु द्विग्रहाद्याः तथा नभादय इत्यार्षप्रयोगः नाभसादयः तथा राजयोगादयः ये अनेकप्रकारकाः योगाः मया कथिता इति शेषः । सर्वांस्तान् यथान्यायं बलेष्टकष्टरश्मिभावस्थानकरणादिविचारन्यायमनतिक्रम्य यथा स्यात्तथा प्रयोजयेत्कथयेदित्यर्थः ॥ ३ ॥ अथ भावविचारमाह-भरणीयइति । यद्यथा द्वितीयेन द्वितीयभावेन कुटुंबस्य कुटुंबवर्तिनामित्यर्थः । भरणीये भर्तुं योग्यं पोषणीयं तस्मिन्विषये शुभाऽशुभे पूर्वोक्तरीत्या स्थानकरणविचारेण इष्टानिष्टे वदेदितिशेषः । एवमेव अन्येषां मूर्तिसहजादिभावानां सर्वेषामपि स्थानादिविचारेण शुभाशुभं स्वनामसदृशं भावनामानुरूपं फलं वदेत् । एतदुक्तं भवति । मूर्तौ रेखादिविचारेण देहसौंदर्योच्चत्वपुष्टत्वादिविषये इष्टानिष्टफलं वदेत् एवमेव सहजादिभावेषु बंध्वादिविषये इष्टानिष्टं रेखादिविचारेण वदेदिति ॥ ४ ॥ अथ पितृमात्ररिष्टविचारमाह-सूर्येणेति । सूर्येण तथा वेश्मस्थाने चतुर्थभावेन च पितुः मृतिपदं मृत्युसमयं वदेत्कथयेत् तथैव चंद्रेण तथा पंचमेन पंचमभावेन च मातुः मृतिपदं मृत्युस्थानं वदेदिति ॥ ५ ॥

भाषा--पूर्वभागमें जो नाभसादि योग राजयोग कहे हैं. उनका इष्ट कष्ट रश्मि अष्टवर्ग बलाबल देखके फल कहना ॥ ३ ॥ दूसरे भावसे रेखाशून्यका न्यूनाधिक्यका बल देखके कुटुंबपोषणका शुभाशुभ देखना. दूसरे भावोंका अपने नामसरीखा फल जानना ॥ ४ ॥ सूर्यसे और चौथे घरमें पिताका मरणयोग कहना ॥ ५ ॥

सूर्ये चंद्रे सपापे च तयोश्च मरणं भवेत् ॥ तयोरंतरलिप्ताश्च शतद्वयविभाजिताः ॥ ६॥ अब्दादयोऽशुभस्यापि दृष्ट्या संगुणयेत्ततः॥ षष्ट्याविभज्याब्दाद्याश्च तस्मात्पापे बलोत्तरे ॥७॥ तदा मृतिर्भवेन्न्यूने तद्बलेनैव वर्धयेत् ॥ तदा मृत्युस्तयोर्मृत्युस्थाने पापग्रहे सति ॥ ८ ॥

टीका–ननु कया रीत्या सूर्यवेश्मचंद्रपंचमैः पितृमातृमरणविचार इति चेत्तत्राह–सूर्ये इति त्रिभिः । सूर्ये चंद्रे च चकारात् वेश्मस्थाने पंचमस्थाने च सपापे पापसहिते सति क्रमात् तयोः पितुर्मातुश्च मरणं मृत्युर्भवेत् । ननु कस्मिन् काले इति चेदब्दादीन् कथयति । तयोः सूर्यपापयोः चंद्रपापयोर्वा अंतरलिप्ताः अंतरस्य राश्यादिरूपस्य लिप्ताः कलाः कृत्वा ताः शतद्वयभाजिताः द्विशतैर्भक्ताः अब्दादयः वर्षादिसमयो ज्ञेयः अरिपापे समबले एव अथ न्यूनातिरिक्तसहचारिपापग्रहतारतम्येन विशेषसंस्कारं कथयन्नादौ सहचारिपापबलाधिक्यसंस्कारमाह । तस्मात् सूर्यात् चंद्राद्वा पापे बलोत्तरे सहचारिपापबलाधिक्ये सति ये अब्दादयः संप्राप्ताः ते शुभस्य सहचारिणः पापस्य दृष्ट्या गुणयेत् ततः षष्ट्या विभज्य अब्दादयो ज्ञेयाः च परं तदा मृतिर्ज्ञेया । अथ सहचारिपापबलाल्पत्वे

विशेषसंस्कारमाह । न्यूने सहचारिपापबलेऽल्पे सति तु ये समबलप्राप्ताब्दादयः तान् तद्बलेन सूर्यबलेन चंद्रबलेन वा वर्धयेत् गुणयेत् तदा मृतिः तयोः पितुर्वा मातुर्वा मृतिर्ज्ञेया एवं सपापसूर्यचंद्रसंभूतं तथैवानुवृत्तत्वात् सपापचतुर्थभावपंचमभावाभ्यामिति पितृमात्ररिष्टं वेदितव्यम् । एवं सपापग्रहभावेभ्यः पितृमात्ररिष्टमुक्त्वा सूर्यचंद्राभ्यां चतुर्थपंचमभावाभ्यां च अष्टमपापग्रहसूचकपितृमात्ररिष्टकालविचारमाह । तयोः सूर्यचंद्रयोश्चतुर्थपंचमभावयोश्च संबंधेन अष्टमस्थाने पापग्रहे सति तु पितृमात्ररिष्टविचारमुत्तरश्लोकैर्विशदयाति ॥ ६ ॥ ७ ॥ ८ ॥

भाषा—कौनसी रीतिसे मरणयोग कहना, सो कहते हैं सूर्य चंद्र चतुर्थ पंचम भाव यह पापग्रहोंसे युक्त होवें तो दोनोंका मरण कहना. परंतु कब होवेगा सो कहते हैं. सूर्यादिक और पापग्रह इनका यथाक्रमसे अंतर करके उनकी कला करके दोसौसे भाग लेना, वर्षादिक फल लाना, सो मरणकाल जानना ये समबल होवें तब जानना. न्यूनाधिक्य बल होवे तो उसका निर्णय कहते हैं. सूर्यसे चंद्रसे पापग्रह बलवान् होवे तो उस फलको पापग्रहदृष्टिसे गुणन करना. पीछे साठसे भाग लेके वर्षादिक फल लाना. और जो कभी पापग्रह अल्पबली होवे तो सूर्यबलसे चंद्रबलसे पूर्वोक्त वर्षादिकको गुणन करके ६० से भाग लेके वर्षादि लायके फल कहना. और अष्टम भावमें पापग्रह होवे तो उसके संबंधसे मातापिताका अरिष्ट कहना ॥ ६ ॥ ७ ॥ ८ ॥

तस्याशुभस्य विन्यस्य चाष्टवर्गं ततः क्रमात् ॥
त्रिकोणैकाधिपस्यास्य कुर्याच्छोधनकं बुधः ॥ ९ ॥

टीका—स्थानकरणतारतम्येन नवमश्लोकमारभ्य पंचदशश्लोकपर्यंतं तस्येत्यादिभिः तत्रादौ त्रिकोणशोधनमाह तस्येति सार्धद्वयेन

तस्य पूर्वोक्तसूर्यचंद्रचतुर्थपंचमभावाष्टमस्थानवर्तिनः अशुभस्य पापस्य अष्टवर्गं विन्यस्य क्रमात् वक्ष्यमाणप्रकारेण अब्दादयो बोध्याः । तत्प्रकारमेवाह त्रिकोणैकाधिपत्यस्य त्रिकोणप्रथमपंचमनवमस्थानरूपम् एकाधिपत्यं एकः अधिपतिः ययोस्ते एकाधिपतिनी तयोर्भावः एकाधिपत्यं मेषवृश्चिकवृषतुलादिरूपं तच्च तच्च समाहृत्य त्रिकोणैकाधिपत्यं तस्य कूर्पात् नवमपंचमात् बुधः विद्वान् शोधनकं कुर्यात् ॥ ९ ॥

भाषा–अब आगे स्पष्ट दिखाते हैं. सूर्य चंद्र चतुर्थभाव पंचमभाव अष्टमभाव यहां सहवर्ति जो पापग्रह हैं उनका अष्टवर्ग स्थापन करके उसका त्रिकोण शोधन करना और एकाधिपत्यका शोधन करना ॥ ९ ॥

त्रिषु द्वयोर्वा यन्न्यूनमितरच्च समं भवेत् ॥ एकस्मिन् भवने शून्यं तत्रिकोणं न शोधयेत् ॥ १० ॥

टीका–एतत्कूर्पशोधनं तु त्रिकोणस्यैव संभवति नत्वेकाधिपत्यस्येति बोध्यम् । शोधनप्रकारमाह त्रिषु द्वयोर्वा प्रथमपंचमनवमेषु त्रिषु चतुर्थपंचमयोः पंचमनवमयोः नवमप्रथमयोर्वा द्वयोर्मध्ये यत्स्थानं करणं वा रेखाबिंदुर्वेत्यर्थः । न्यूनम् अल्पं स्यात् तदितरस्थानयोः समं तुल्यं भवेत् । एतदुक्तं भवति त्रयाणां मध्ये एकस्मिन्स्थाने स्थानद्वयापेक्षया या न्यूनसंख्याका रेखा बिंदुर्वा सा स्वस्मिञ्छोधिता सती नष्टा स्यात् एवमेव अन्यस्थानयोः प्राप्तरेखासु शोधिता चेत् स्वसंख्याया न्यूनीकुर्यात् एवं समत्वं बोध्यम् । नतु स्वयमेका चेत्सर्वत्र एकत्र स्थितिरिति । अथ च एकस्मिंस्त्रयाणां स्थानानां मध्ये एकस्मिन् भवने स्थले शून्यं चेत् रेखाभावश्चेत् तत्रिकोणं रेखाशोधनविषये न शोधयेत् न शोध्येत्किंतु यथास्थितमेव स्थाप्यम् । तस्य शोधनाभाव इति यावत् । एवमेव करणविषये बोध्यम् । अथ च सव-

गेहेषु त्रिष्वपि स्थानेष्वित्यर्थः । समत्वं रेखासाम्यं चेद्बुधः विद्वान् सर्वं स्थानत्रयरूपमपि संशोधयेत् वर्जयेत् । तुल्यशोधनेन शेषाभावात् सर्वं शून्यरूपमेव स्थापनीयमित्यर्थः । एवं त्रिकोणशोधनं बोध्यम् । अथोदाहरणम् । सूर्याष्टकवर्गविचारे मेषे रेखे २, सिंहे रेखाः ३, धनुषि रेखाः ४, अत्र न्यूनं मेषस्थं रेखाद्वयम् तन्मेषसिंहधनुस्थरेखासु संशोध्य अवशिष्टं जातं मेषाधः०, सिंहाधः १, धनुरधः २, एवं सर्वत्र बोध्यम् । एकन्यूनत्वोदाहरणम् । अथ त्रिकोणस्थैकभवने रेखाभावोदाहरणम् । मेषे रेखा १, सिंहे रेखाः ५, धनुषि रेखाभावः अत्र शोधनाभावात् यथास्थितमेव स्थाप्यम् अथ त्रिकोणस्थानत्रयेपि समत्वोदाहरणं यथा मेषे रेखाः ४, सिंहे रेखाः ४ धनुषि रेखाः ४ अथ सर्वसमत्वात् सर्वत्र रेखाभाव एव । एवं सर्वभावत्रिकोणेषु त्रिप्रकारेण शोधनं बोध्यम् ॥ १० ॥

भाषा–त्रिकोणशोधनमें तीन ठिकाने दो ठिकानेसे जो कम होवे उससे शोध और जो त्रिकोणमें एक जगहमें शून्य होवे वो त्रिकोणका शोधन ही करना तीन ठिकाने समान होवे तो सर्व ठिकाने शून्य रखना उसका विस्तार टीकामें है ॥ १० ॥

समत्वे सर्वगेहेषु सर्वं संशोधयेद्बुधः ॥ क्षीणेन सह
चान्यस्मिञ्छोधयेद्ग्रहवर्जितम् ॥ ११ ॥ ग्रहयुक्ते
फले हीने ग्रहाभावे फलाधिके ॥ अनेन सह चान्यस्मिञ्छोधयेद्ग्रहवर्जिते ॥ १२ ॥ फलाधिके ग्रहैर्युक्ते
चान्यस्मिन्सर्वमुत्सृजेत् ॥ उभयोर्ग्रहसंयुक्ते न संशोध्यः कदाचन ॥ १३ ॥ उभयोर्ग्रहहीनाभ्यां
समत्वं सकलं त्यजेत् ॥ सग्रहाग्रहतुल्यत्वात्सर्वं

संशोध्यमग्रहात् ॥१४॥ एकत्र नास्ति चेत्सर्वहानिरन्यत्र कीर्तिता ॥ कुलीरसिंहयो राश्योः पृथक् क्षेत्रं पृथक् फलम् ॥ १५ ॥

टीका–अथैकाधिपत्यशोधनप्रकारमाह क्षीणेनेत्यादि सपादपंचदशश्लोकपर्यंतम् अत्रादौ त्रिकोणशोधनेन पूर्वोक्तरीत्या सर्वभावेषु रेखाः संशोध्य अवशिष्टासु अयमेकाधिपत्यविचारः कर्तव्यः । स तथा एकाधिपत्यशोधनं नाम राशिद्वयस्य मेषवृश्चिकरूपस्य तुलारूपस्य मिथुनकन्यारूपस्य धनुर्मीनस्य मकरकुंभरूपस्य अन्योन्यरेखाभिः सग्रहत्वाग्रहत्वतया संस्कारः, कर्कसिंहयोस्तु चंद्रसूर्ययोः एकक्षेत्रत्वान्नैकाधिपत्यसंस्कारप्राप्तिः किं तु भौमादिक्षेत्राणामेवेति तत्प्रकाराणां पदशः टीका तु विस्तरभयान्न लिखिता किंतु कल्पितोदाहरणैरेव स्पष्टीक्रियते । तत्रादौ सग्रहरेखासाम्यैकाधिपत्यराशिद्वयोदाहरणम् यथा मेषत्रिकोणे प्राप्त रेखाः ।।।, वृश्चिके च रेखाः ।।।, एतद्राशिद्वयं प्राप्तसमरेखं सग्रहं च अतः "उभयोर्ग्रहसंयुक्ते न संशोध्यः कदाचन" इति वचनेन शोधनाभावाद्यथास्थितिरेव मेषे रेखाः ।।।, वृश्चिके रेखाः ।।।, इत्येकः प्रकारः । अथ सग्रहराशिद्वये रेखावैषम्योदाहरणम् यथा मेषे त्रिरेखाः ।।।, वृश्चिके त्रिकोणशोधनप्राप्तरेखे ।।, अथोभयत्र सग्रहत्वेपि रेखावैषम्यात् न्यूनरेखा अधिकरेखासु संशोध्य शिष्टं मेषे वृश्चिके "ग्रहयोगेन हानिः स्यात्" इति न्यूनेनाधिकस्य हानिः सग्रहत्वान्न सर्वहानिरिति द्वितीयः प्रकारः । अथ उभयत्र सग्रहत्वेपि एकत्र त्रिकोणशोधनप्राप्तरेखासहितत्वं एकत्र रेखारहितत्वं चेदुभयत्र शून्योदाहरणम् । यथा मेषे त्रिरेखाः ।।।, वृश्चिके त्रिरेखाः ।।।, मेषे कश्चिद् ग्रहोऽस्ति वृश्चिके ग्रहाभावः अतः "एकत्र नास्ति चेत्सर्वहानिरन्यत्र कीर्तिता" इति

वचनात् मेषस्य सग्रहत्वेऽपि वृश्चिके रेखाभावादुभयत्रापि हानिः इति तृतीयः प्रकारः । अथ उभयोस्सग्रहत्वेऽपि उभयत्र रेखाभावे शून्यमेवेति नात्रोदाहरणम् इति चतुर्थः प्रकारः । अथ ग्रहराहितफलसाम्योदाहरणम् यथा मेषे रेखाः ।।।, वृश्चिके ।।।, उभयत्रापि ग्रहाभावः अत्र उभयोर्ग्रहहीनाभ्यां "समत्वं सकलं त्यजेत्" इति उभयत्र समफलशोधनेन फलाभाव एव इति पंचमः प्रकारः । अथ ग्रहराहितोभयविषमरेखोदाहरणम् यथा मेषे रेखाः ।।।, वृश्चिके रेखे ।।, अत्रोभयत्रापि ग्रहराहितत्वं फलवैषम्ये च अतः "क्षीणेन सह चान्यस्मिञ्छोधयेद्ग्रहवर्जितम्" इति हीनमधिकात्संशोध्य शेषमधिकस्थले स्थापितं मेषे रेखाः ।, वृश्चिके० इति षष्ठः प्रकारः । अथ अग्रहं सरेखाकं सग्रहं रेखाराहितं यथा मेषे रेखाः ।।।, अत्र ग्रहाभावः वृश्चिके रेखाभावः अत्रापि "एकत्र नास्ति चेत्सर्वहानिरन्यत्र कीर्तिता" इति उभयत्रापि सर्वहानिः मेष० वृश्चिके० इति सप्तमः प्रकारः । अथ उभयत्र ग्रहराहित्यं रेखाऽभावोऽपि चेदार्थिकमेव फलाभावत्वं नात्रोदाहरणप्रयोजनम् इत्यष्टमः प्रकारः । अथ रेखाधिकसंग्रहन्यूनरेखाकाग्रहे च उदाहरणम् यथा मेषे रेखाः ।।।, एतत्संग्रहे वृश्चिके रेखे ।। एतद्ग्रहं अत्र "फलाधिके ग्रहैर्युक्ते चान्यस्मिन्सर्वमुत्सृजेत्" इति फलाधिकं यथा पूर्वं स्थितं बलहीनं ग्रहराहित्याद्रेखाशून्यमेव मेषे रेखाः ।।, वृश्चिके रेखाः ।।।, इति नवमः प्रकारः । अथ सग्रहाग्रहफलसाम्योदाहरणम् यथा मेषे रेखाः ।।।, सग्रहं वृश्चिके रेखाः ।।।, अग्रहं अत्र "संग्रहाग्रहतुलयत्वात्सर्वं संशोध्यमग्रहात्" इति तुल्यफलत्वेपि सग्रहाग्रहतयोभयत्रापि फलाभावः मेषे० वृश्चिके० इति दशमः प्रकारः । अथ सग्रहन्यूनरेखांकाग्रहाधिकरेखांकोदाहरणम् यथा मेषे रेखाः ।।।, एतत्सग्रहं वृश्चिके रेखाः ।।।।, एतदग्रहं अत्र "ग्रहयुक्ते फले हीने ग्रहाभावे फलाधिके । अनेन सह चान्यस्मि-

च्छोदयेद्ग्रहवर्जिते" इति ग्रहवर्जिताधिकरेखासु सग्रहन्यूनरेखाः संशोध्य शिष्टामग्रहस्थलस्थरेखां सग्रहस्थलमाचकर्ष मेषे रेखा १, वृश्चिके रेखाभावः इत्येकादशः प्रकारः। अथ सग्रहाग्रहद्वयरेखाभावे तु आर्थिकशून्यत्वान्नात्रोदाहरणम् इति द्वादशतमः प्रकारः। अथ उभयत्र सग्रहत्वे एकत्र रेखासहितत्वं एकत्र रेखाभावत्वं अत्रापि "एकत्र नास्ति चेत्सर्वहानिरन्यत्र कीर्तिता" इति त्रयोदशतमः प्रकारः। अथ च कर्कसिंहयोः एकेशस्थानैकत्वात् यथास्थितिरिति शोधनाभावः प्रागेव लिखितः इति एकाधिपत्यशोधनप्रकारः वृषादिसर्वराशिषु ज्ञेयः एवमेव करणशोधनप्रकारः। अथ प्रकृतमेवं प्रकारेण सूर्यचंद्रचतुर्थभावपंचमभावेभ्यः अष्टमे पापे त्रिकोणकाधिपत्यशोधनेन रेखाः करणं च संपाद्यग्रिमसंस्कारः कर्तव्य इति ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

भाषा—अब ऐकाधिपत्यशोधन कहते हैं. एक ग्रहकी दो राशि हैं वहां एक राशिमें रेखा कम हैं दूसरी राशिमें रेखा अधिक हैं और दोनों राशिमें ग्रह नहीं हैं तो अधिक रेखासंख्या राशिकी रेखामें कम रेखा संख्याको न्यून करके शेष रखना. कम जो हैं वहां शून्य रखना. उदाहरण मेषराशिके नीचे रेखा तीन हैं, वृश्चिकके नीचे रेखा दो हैं और दोनों ग्रहरहित हैं. दो तीनमेंसे दो हीन किये तो मेषके नीचे १ रेखा लिखना. वृश्चिकके नीचे शून्य लिखना. यह ऐकाधिपत्य शोधन भया. इस तरहके चौदह उदाहरण टीकामें दिखाये हैं. इसलिये यहां विस्तारके लिये लिखते नहीं ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

ग्रहयोगेन हानिः स्यात् वर्गणाग्रं पृथक् ततः ॥
संयोज्य सप्तभिर्हत्वा सप्तविंशतिभाजिताः॥ १६॥
अब्दादयस्तदा देहनाशः करणदे सति ॥ तस्मिन्

पापे ग्रहे तस्माद्बलिन्येवं विधिः स्मृतः ॥ १७॥ बलहीने तु तं हन्यात्सप्तभिः पंचभिर्भजेत् ॥ आयुस्तयोःस्यात्स्थानस्य ग्रहे चेदशुभे सति ॥ १८॥ मुनिभक्तं वसुघ्नं स्यान्नैवं चेन्नैतयोर्मृतिः ॥ वक्ष्यमाणेन विधिना वदेदाह पराशरः ॥ १९ ॥

टीका-अथ त्रिकोणैकाधिपत्यशोधप्राप्तरेखासु करणेषु च विशेषसंस्कारेण अब्दाद्यानयनं बलाबलतारतम्येन स्थानकरणादिकं चाह वर्गणाघ्नमित्यादि एकोनविंशतिश्लोकपर्यंतम् । वर्गणाघ्नं वर्गणया हन्यते तथोक्तं वर्गणा तु प्रथमाध्यायावसाने "मुनिदिग्वसुवेददिगिष्वब्ध्यष्टनवेषवः । रुद्रार्कवर्गणा मेषाद्विषयेष्वष्टवायवः । पंक्तिस्वरेषवः सूर्याद्वर्गणा प्रोच्यते बुधैः" इत्युक्तध्रुवांकैः पृथक् पृथक्करणं स्थानं वा गुणयेत् ततः राशिफलं ग्रहफलं च पृथक् पिंडीकृत्य उभे अपि संयोज्य सकलं पिंडीभूतं सप्तभिर्हत्वा सप्तविंशतिभाजिताः लब्धं फलं अब्दादयः भवेयुः तदा तस्मिन्नब्दादिकाले देहनाशः पित्रोर्मरणं ज्ञेयम् । अयं विधिः तस्मिन्करणे पापग्रहे बलिनि सति स्मृतः अत्रोदाहरणम् चतुर्थभावादष्टमस्थो रविः पापः चक्रे द्रष्टव्यः अस्य बलं ९ । ४१ । १४ चतुर्थभावादष्टमभावबलं ८ । १४ । ४१ अस्मात्पापबलमाधिकं अतःचतुर्थभावादष्टमस्थबलोत्तरकरणाद्पापग्रहसंभूतपित्रारिष्टाब्दाद्युदाहरणं यथा त्रिकोणैकाधिपत्यशोधनावशिष्टराशिकरणांकाः कुंभे १, कर्कें १, सिंहे १, मकरे ३, अर्कक्रमाद्राशिवर्गणांकाः ११ । ४१ । ० । ५ एभिः क्रमात्पृथग्गुणितांकाः ११।४।१०।१५ एतेषां पिंडः ४० अथ पापग्रहाणां त्रिकोणैकाधिपत्यशोधनावशिष्टग्रहकरणांकाः रवेः १, शनेः ३, सपापबुधस्य ३, एषां ग्रहाणां वर्गणांकाः ५।५। ५ एभिर्गुणिताः करणांकाः

५। १५। १५ एतेषां पिंडः ३५ पिंडद्वयैक्यं ७५ एतत्सप्तगुणितं ५२५ सप्तविंशतिभाजनलब्धादयः वर्षाणि १९ मासाः ५ दिनानि १० घट्यः ० पलानि ० अयं पित्ररिष्टकालो वेदितव्य इति अर्थात् रेखाप्रदे पापिनि बलिनि सति उक्तविधिना प्राप्ताब्दादिकाले आयुर्वेदितव्यमिति भावः। अथ च करणदे बलहीने तु पूर्वोक्तं सकलं पिंडं सप्तभिर्हत्वा पंचभिर्भजेत् न सप्तविंशतिभिरिति पितृमरणकालीनाब्दादयः स्पष्टाः स्युः। अथ च स्थानस्य प्रदे रेखाप्रदे अशुभे बलिनीति पूर्वान्वयेनाध्याहारः सति प्रागुक्तसर्वपिंडं वसुघ्नं अष्टगुणितं मुनिभक्तं सप्तभाजितं कृत्वा प्राप्ताब्दादयः तयोः पित्रोः आयुः सिद्धं स्यात् एवं स्थानप्रदात् आयुरब्दाधिके चेदेतयोर्न मृतिः एवं सूर्याच्चतुर्थभावाद्वा अष्टमस्थपापस्यायुः कथितं एतद् वक्ष्यमाणचतुर्थभावसूर्यरश्म्यायुःसंपादनेन न्यूनातिरिक्तं परमायुर्बोध्यमिति मूलकार एवाह वक्ष्यमाणेन विधिना वक्ष्यमाणप्रकारेण वदेदिति पराशरः आहेति ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

भाषा—अब एकाधिपत्यके ऊपरसे मातापिताका स्पष्ट मरणकाल बताते हैं. एकाधिपत्यके जो अंक मेषादिकमें आये हैं उनको मेषादि ध्रुवांकोंसे गुणन करके जहां ग्रह बैठे होवें तो वे एकाधिपत्यके अंकोंको वो वो ग्रह वांकोंसे गुणन करना पीछे दोनोंके योग करके दोनोंका एक योग करना. सात अंकसे गुणन करके सत्ताईससे भाग लेना तो लब्धांक वर्षादिक माता, पिताके आयुष्यका मान जानना. ये बिंदूसे मृत्युबल कहा परंतु वो पापग्रह बलवान् होवे तो पूर्वकी बात जो कही है वोही रीति जानना और बलहीन होवे तो योगको सातसे गुणन करके पांचसे भाग लेना. वर्षादिक लब्ध जो वो माता पिताका आयुष्य जानना. और रेखाप्रद पापग्रह बलवान् होवें तो पूर्व पिंडको अष्टगुणित करके सातसे भाग लेना. लब्ध वर्षादिक दोनोंका आयुष्य-

प्रमाण जानना. शून्यमतके आयुष्यसे रेखाका आयुष्य अधिक आवे तो मरण नहीं है ऐसा पराशर कहते हैं ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

सूर्यादायुः करौ भूपा मनवोर्का नवार्णवाः ॥ वेदाक्षीणि
तु लग्नस्य वक्ष्याम्यायुस्तथैव तत् ॥२० ॥

टीका-एवं स्थानकरणतारतम्येन सूर्यचतुथभावाष्टमस्थपापायुरुक्त्वा केवलं सूर्यचतुर्थभावाभ्यामेवायुः कथयाति तत्रादौ ग्रहलग्नायुर्ध्रुवांकानाह सूर्यादिति । सूर्याद्रवेः सकाशात् क्रमशो ग्रहाणां आयुरंकाः क्रमशो ज्ञातव्याः करौ २, भूपाः १६, मनवः १४, अर्काः १२, नव ९, अर्णवाः ४, वेदाः ४ इति । अथ लग्नस्य तु आक्षिणी २ इति आयुः तथैव स्थानकरणवदेव वक्ष्यामि ॥ २० ॥

अथ रवेस्त्रिकोणैकाधिपत्यशोधितकरणचक्रम्.

र. गु.	शु.म.	ल.								चं.	श. बु.	
कुं.	मी.	मे.	वृ.	मि	क.	सिं	क.	तु.	वृ.	ध.	म.	राशयः ।
३	४	६	५	४	५	५	१	२	४	४	५	मूलप्राप्तकरणाबिंदवः ।
१	०	२	४	२	१	१	०	०	०	०	४	त्रिकोणशोधनेनावशिष्टाः ।
१	०	०	०	०	१	१	०	०	०	०	३	एकाधिपत्यशोधनावशिष्टाः

भाषा-पाहिले सूर्य चतुर्थभाव अष्टमभावसे आयुर्दाय कहके आगे सूर्यचतुर्थभावमें आयुर्दाय कहते हैं. उसमें सूर्यादि लग्नांतके आयुर्ध्रुवांक कहते हैं सूर्यादिकके ध्रुवांक२।१६।१४।१२।९।४।४।२यह जानना॥ २० ॥

स्वोच्चे नीचे तु पातः स्याद्धरणादिविधिस्ततः ॥ आयु-
स्तयोः स्यात्तौ तस्मिन् भवने तु तथा स्थितौ ॥२१॥

टीका-एवमुक्तायुर्ध्रुवांकाः स्वोच्चस्थ एव ग्रहे ज्ञेया इत्याह स्वोच्चे इत्यादिपादोनद्वाविंशतिश्लोकपर्यंतम् । स्वोच्चे स्वकीयोच्चस्थे ग्रहे सति उक्तध्रुवांकपरिमितमायुर्ज्ञातव्यं नीचे तु ग्रहे नीचस्थानगे सति तु हरणादिविधिः आयुःस्वीकरणादिप्रकारः पातः अनुपातो ज्ञेयः तदित्थं उच्चे चेत्पूर्वोक्तमिति यदायुस्तर्हि उच्चारोहे उच्चच्युते च कियत् ततोपि क्रमशः उच्चाग्रिमराशिषु कियत् एवं नीचे कियदिति अनुपातः एवं तयोः रविचतुर्थभावयोः आयुः स्यात् तौ तथा स्वोच्चनीचादौ भवने स्थाने स्थितौ वर्तमानौ संतौ तयोरनुपातादायुर्ज्ञेयामित्यर्थः । एवं सत्यपि तत्र न कश्चिदपि ग्रहः स्थानदः स्थानदाता स्याच्चेत्तत्काल एव मृतिः भवेत् स्थानदायुर्विशेषालाभात् सा मृतिस्तु शुभयोगे शुभा सुखेनेत्यर्थः । अर्थात् अशुभयोगेन पातराजदंडाग्निजलादिदुःखादित्यर्थः ॥ २१ ॥

भाषा-उच्चका ग्रह होवे तो ध्रुवांकका आयुष्य स्पष्ट जानना, और नीचका ग्रह होवे तो अनुपातसे आयुष्य लाना ॥ २१ ॥

न कश्चित्स्थानदः स्याच्चेत्तत्काले च मृतिर्भवेत् ॥
शुभयोगे शुभा प्रोक्ता तयोः स्याद्रश्मिसंभवः ॥ २२ ॥

टीका-अथ सूर्यानीतसूर्यचतुर्थभावसामान्यायुषः रश्मिविचारेण परमावधितया स्पष्टत्वं मातृपित्रोरिष्टं चाह-तयोरित्यादिपादसहितार्धश्लोकेन । तयोः सूर्यचतुर्थभावयोः रश्मिसंभवः रश्म्युत्पत्तिः स्याच्चेत्तान् रश्मीन् अष्टाभिर्गुणयेत् ततः षड्भिः विभज्य परं आयुः परमायुर्दाय इति यावत् भवेत् । अथास्योदाहरणम् । चतुर्थभावः कर्कः रविः कुंभे वर्तमानः चतुर्थभावो भुक्तः ३ । १ । १९ भाग्यांशाः २८।४१ तदायुरभावः भोग्यत्वात् भुक्तांशाः १।१९ त्रिंशद्भागात्मक लग्नस्याक्षिणीत्युक्तत्वाद्वर्षद्वयमायुश्चेल्लग्नभुक्तस्य अंशः १ कलाः १९

एवंरूपस्य कियदादिरित्यनुपातेन प्राप्तं चतुर्थभावलग्नभुक्तायुः० । १।२ अथ उच्च इत्युक्तत्वात् उच्चत्वाभावत्वात् तत्पतेश्चंद्रस्य उच्चत्वोपलक्षितायुर्गृह्यते तदित्थं चतुर्थभावस्य कर्काख्यस्य पतिश्चंद्रः स च ८।२५।२९ एवं वर्तमानःअस्य उच्चे ग्रहायुःप्रकरणोक्तध्रुवांकाः १६ एवं संख्याकाः परमोच्चे वृषत्रिमितेंशे चेत् अनुपातेन धनराशिपंचविंशतितमांशे वर्तमानस्य चंद्रस्य कियद्वर्षाद्यायुरिति त्रैराशिकेन प्राप्तं चंद्रायुर्वर्षादि ४।५।१४ अथ रविः १०।४।१४ एवं वर्तमानः अस्य ग्रहायुःप्रकरणोक्तं परमोच्चायुर्ध्रुवांकाः करौ इत्युक्तत्वात् मेषराशिदशमांशे वर्तमानस्य रवेः वर्षद्वयं चेत् अनुपातेन कुंभराशिपंचमांशे वर्तमानस्य कियदिति प्राप्तं रव्यायुर्वर्षादि १।३।१५ एवं चतुर्थभावायुः तत्पतिश्चंद्रायुः रव्यायुश्च संयोज्य जातम् ५।१०।१ एतत्सामान्यायुः । अथ रश्म्यायुरित्थं रवेरश्मयः ५।४०।२३ भावस्य रश्म्यभावात् चतुर्थभावपतेश्चंद्रस्य रश्मयः २ । ३१ । १३ अनयोर्योगः ८।११।३६ अष्टसंगुणितः जातम् ६५।३२।४८ अयं षड्भिर्भक्तः लब्धफलम् १४।७।२८ जातमेतद्रश्म्यायुः एतत्सामान्यायुर्योगेन जातं वर्षादि २०।५।२९ एतत्परमायुर्बोध्यम् एतट्टीकाकर्तुरनुभवसिद्धं पित्रारिष्टमिति ॥ २२ ॥

भाषा–और वहां कोई रेखा देनेवाला ग्रह न होवे तो उसी वखत मृत्यु काल जानना. शुभयोग होवे तो मरण उत्तम रीतिसे होवेगा. पापाधिक्य होवे तो दंडपातादिकसे होवेगा ॥ २२ ॥

अष्टभिर्गुणयेत्षड्भिर्विभज्यायुःपरं भवेत् ॥
वेश्मनि स्थानदा न स्युर्जन्मकाले स्फुटीकृतः ॥ २३ ॥

टीका–एवं सपापचतुर्थभावसूर्यायुः तत्तत्सृष्टपापानामस्थानायुः केवलं चतुर्थभावसूर्यायूरश्मिसमुद्भूतपरमायुश्च कथयित्वा अथ वेश्म-

स्थाने रेखाभावे कथमायुर्विचार इत्याह वेश्मनि चतुर्थस्थाने स्थानदाः रेखाप्रदाः ग्रहा न स्युः तत्र केवलं रेखाभावश्चेत् जन्मकाले स चतुर्थभावः स्फुटीकृतः पश्चात्कलीकृतः कलारूपतां प्रापितः खनखैः २०० तं विभज्य क्रमात् अब्दादयः वर्षमासादयः क्रमेण वर्षमासादिनानीत्यर्थः । स्युरित्यध्याहारः ॥ २३ ॥

भाषा–अब रश्मी ऊपरसे आयुष्य कहते हैं. सूर्य चतुर्थभावकी रश्मीके संभवको अष्टसे गुणन करके छःसे भाग लेना. लब्ध परमायुष्य जाननी. टीकामें स्पष्ट है ॥ २३ ॥

कलीकृतश्च खनखैर्विभज्याब्दादयः क्रमात् ॥ एवं शुभाशुभं ब्रूयान्मातापित्रोर्द्विजोत्तम ॥२४॥ करणस्थानदातारःपापपुण्यफलप्रदाः ॥ पुनश्चोच्चादिषु तथा त्रिगुणाद्यास्तु पूर्ववत् ॥ २५ ॥

टीका–एवमित्युपसंहराति । हे द्विजोत्तम ! द्विजवर्य मैत्रेय । एवमुक्तपंचप्रकारकं मातापित्रोः जननीजनकयोः शुभाशुभं समाहारः शुभमायुः अशुभं मृत्युः समाहृत्य तद्ब्रूयादिति ॥ २४ ॥ अथ करणादिविचारेण भावविचारमाह–करणइत्यादि यावदध्यायसमाप्ति । करणस्थानदातारः भावेषु करणानि बिंदवः स्थानानि रेखाः ताः ददति ते करणस्थानदातारः यथासंख्यं पापपुण्यफलप्रदाः पापं अशुभं पुण्यं शुभं ते च ते फले च प्रददतीति पापपुण्यफलप्रदाः करणदाः अशुभफलप्रदाः स्थानदाः शुभफलदा इत्यर्थः । पुनश्चेति प्रकारांतरं तथा तेन प्रकारेण उच्चादिषु उच्चात्रिकोणस्वमित्रादिराशिषु भावफलानि त्रिगुणादीनीति पूर्ववत् त्रिगुणाद्याः त्रिगुणादिफलदातारो भावेषु ग्रहाः बोध्याः शत्रुनीचाधिशत्रूणां स्थानेषु वर्तमानानां ग्रहाणां चापि पूर्ववदेव

ज्ञातव्यम् । तदित्थं पूर्वं रश्मिप्रकरणे “उच्चे च त्रिगुणं प्रोक्तं स्वत्रिकोणाद्विसंगुणम् ॥ स्वर्क्षे त्रिघ्नादि संभक्तास्त्वाधिमित्रगृहेऽपि च ॥ वेदघ्ना रामसंभक्ता मित्रभे षड्गुणास्ततः ॥ पंचभक्तास्तथा शत्रुगृहे द्विघ्नाश्चतुर्हताः ॥ अधिशत्रोः क्रूरघ्नाश्च पंचभक्ता न नीचभे ॥” इत्युक्तप्रकारो बोध्य इति ॥ २५ ॥

भाषा–चौथे घरमें जो रेखाप्रद ग्रह नहीं होवे तो चतुर्थ भावको स्पष्ट करके उसकी कला करके २०० से भाग लेना. वर्षादि आयुष्य आवे ऐसा मातापिताका शुभाशुभ योग कहना ॥२४॥ शून्यके देनेवारे जो जो ग्रह हैं वे पापफल देनेवाले जानना, और रेखाके देनेवारे जो जो ग्रह हैं वे पुण्यफल देनेवारे हैं उससे उच्च नीच मूलत्रिकोणादिकके होवें तो त्रिगुणादिक फल पूर्वसरीखा जानना ॥ २५ ॥

शत्रुनीचाधिशत्रूणां स्थानेष्वपि तु पूर्ववत् ॥ राशिं
हित्वा तु भावानां सर्वत्रैवं क्रिया भवेत् ॥ २६ ॥

टीका–अथ वक्ष्यमाणभावविचारक्रिया अंशादिग्रहणेनैवेत्याह राशिमित्यर्धेन । राशिं राश्यंकं विहाय त्यक्त्वा क्रिया वक्ष्यमाणा भवेदित्येवं सर्वत्र सर्वभावेषु वक्ष्यमाणेषु बोध्यमित्यध्याहारः ॥ २६ ॥

भाषा–जहां भावपरसे आयुष्यका विचार देखना होवे वहां राशिको छोडके अंशादिकका जैसा संस्कार कहा है वैसा करना ये क्रिया राशि छोडनेकी सब ठिकाने जानना ॥ २६ ॥

द्वितीयभावलिप्ताश्च राशिलिप्ता विभाजिताः॥स्ववर्गणाहतास्तत्स्थखेटानां वर्गणाहताः॥२७॥ भावरश्मिभिराहन्यात्सप्तभिश्च विभाजयेत् ॥ मूलरश्मिसमूहेन शिष्टं हन्यात्तथैव तान् ॥२८॥ इष्टानिष्ट-

फलाभ्यां च हत्वांतरमथ द्वयोः ॥ सप्तविंशतिभिर्हत्वा सप्तभिश्च विभाजयेत् ॥ २९ ॥

टीका–अथ तन्वादिद्वादशभावेषु भावोक्तफलविचारे संस्कारविशेषेण विचाररीतिं कथयन् द्वितीयभावमुदाहरति–द्वितीयेत्यादि सार्धैकोनविंशच्छ्लोकपर्यंतम् । द्वितीयभावलिप्ताः द्वितीयश्चासौ भावश्च तस्य लिप्ताः कलाः अत्र “ राशिं हित्वा तु भावानां सर्वत्रैवं क्रिया भवेत्” इति द्वितीयभावस्य राश्यंकं विहाय शिष्टांशलिप्ताः कृत्वेत्यर्थः । राशिलिप्ता विभाजिताः राश्याः याः लिप्ताः एकराश्यंकस्य अंशान्विधाय ३० षष्टिगुणनसंपादिताः १८०० ताभिः विभाजिताः भक्ताः ततः स्ववर्गणाहताः स्वस्य द्वितीयभावस्य वा उक्ता वर्गणा प्रथमाध्यायाग्रे “ मुनिदिग्वसुवेदादिगिष्वंत्र्यष्टनवेषवः ॥ रुद्रार्का वर्गणा मेषात्” इति द्वितीयभावस्य वर्गणा दिक्संख्याका १० तथा हताः गुणिताः तथा तत्स्थखेटानां तस्मिन् द्वितीये भावे तिष्ठंति ते च ते खेटाः ग्रहाश्च तेषां वर्गणा तत्रैवोक्ता “ विषयेष्वष्टवायवः पंक्तिः स्वरेषवः सूर्याद्वर्गणा प्रोच्यते बुधैः ” इति तथा हताः च हत्ता गुणिताः तास्मिन् भावे ग्रहसत्त्वे इति भावः । ततः भावरश्मिभिः आहन्यात् भावस्य रश्म्यभावात्तदाधिपस्य रश्मिभिर्गुणयेदित्यर्थः । ततः सप्तभिः ७ विभाजयेत् भागमाहरेदित्यर्थः । तत्र लब्धांकसंख्याकाः भरणीयकुटुंबानां पुमांसः बोध्याः । अथ तथैवं तेन प्रकारेण शिष्टं अवशिष्टांकाः तन्मूलरश्मिसमूहेन मूलाः प्रथमोत्पादिता ये सर्वग्रहाणां रश्मयः तेषां यः समूहः संहतिर्मेलनमित्यर्थः । तेन हन्यात् गुणयेत् ततः तान् मूलरश्मिगुणितान् इष्टानिष्टफलाभ्याम् । इष्टं च अनिष्टं च ते एव फले ताभ्यां हत्वा गुणयित्वा एकत्र कष्टेन हत्वेत्यर्थः । अथानंतरं द्वयोः उभयोः अंतरं विवरं कृत्वा सप्तविंशातिभिः गुणयित्वा सप्तभिर्विभाजयेत् । एवंरीत्या ये प्राप्तांकाः तत्समाः तत्तुल्याः भर-

णीयकुटुंबानां पोषणीयकुटुंबानां संबंधे षष्ठी स्त्रीः अबलाः विदुः पूर्वाचार्या इत्यध्याहारः । इति एवमेव सर्वभावफलानयनरीतिर्बोध्या । अथास्योदाहरणम् । द्वितीयभावः १ । ४ । २८ । ५० अस्य राश्यंकं विहाय ४ । २८ । ५० अस्य लिप्ताः २६९ राशिलिप्ताः १८०० आभिर्भक्ताः जातं कलारूपं फलम् ० । ९ द्वितीयभाववर्गणांकाः १० एभिर्हत्वा जातम् ० । ९० एतत् विकलास्थमाधिकृत्वा षष्ट्युद्धृतं १ । ३० द्वितियभावे ग्रहभावाद्ग्रहवर्गणागुणनसंस्काराभावः द्वितियभावेशरश्मिः ६ । ५३ । ३८ अनेन गोमूत्रिकया गुणिता जाताः कलाः १० । २० एताः सप्तभाजिताः सत्यः लब्धम् ० ।१।२८ जातेयं भरणीयकुटुंबपुरुषसंख्या । अथ शेषांकाः ४ एते मूलरश्मिसमूहेन २४ । २३ । ३२ एवंभूतेन हताः जाताः ९७ । १४ कलाधिक्यात्षष्ट्युद्धृताः १ । ३७ । १४ भावस्वामिनः इष्टफलम् ० । ४६ । ४८ अनेन गुणिताः ० । ७४ । १३ कलास्थानाधिक्यात्षष्ट्युद्धृताः १ । १४ । १३ जातमेतदिष्टगुणितं फलम् तथा ते एव मूलरश्मिसमूहांकाः १ । ३७ । १४ भावस्वामिनः कष्टं ० । १४ । ११ अनेन हता जाताः ० । २३ । ० अनयोरिष्टकष्टफलहतयोः प्राप्तफलयोरंतरं ० । ५१ । १३ एतत्सप्तविंशतिभिर्गुणितं जातं कलादि फलम् ० । १३८२ । ५१ एतदधिकत्वात् षष्ट्युद्धृतम् २३ । ३ । ० सप्तभिर्भक्तं जातम् ३।९ । एते भरणीयकुटुंबस्त्रीसंख्या इति ॥ २७ ॥ २८ ॥ २९ ॥

भाषा–भावफलमें पहिले द्वितीय भावका उदाहरण बताते हैं. द्वितीय भावके अंशादिककी लिप्ता करके पीछे द्वितीय भावकी राशिकी लिप्ता करके उससे भाग लेना. लब्ध जो कलादिक फल उसको द्वितीय भावके ध्रुवांकसे गुणन करना द्वितीयघरमें ग्रह होवे तो ग्रहध्रुवांकसे और गुणन करना न होवे तो नहीं करना पीछे द्वितीयभावस्वामीकी रश्मिसे गुणन करना, सा-

तसे भाग लेना, लब्ध जो अंक होवे वो भरणीय कुटुंबकी संख्या जानना. शेषको मूलरश्मिसमूहसे गुणन करके भावस्वामीके इष्टफलसे गुणन करके उसी प्रकारसे भावस्वामिकष्टबलांकोंसे मूलरश्मिसमूहको गुणन करके दोनोंका अंतर करके २७ से गुणित करनेसे जो कलादिक फल आवे उसको ७ से भागलेना जो फल आवे वो स्त्रियोंकी संख्या जाननी ॥ २७ ॥ २८ ॥ २९ ॥

भरणीयकुटुंबानां पुंस्त्रियस्तत्समा विदुः ॥ राशीन्
हित्वा तु लग्नादिभावभागादिकान् पृथक् ॥ ३० ॥
गुणयेद्रश्मिभिः स्वैश्च भावभागादयो विदुः ॥ कली-
कृत्य भलिप्ताभिर्विभज्याप्तं फलं ततः ॥ ३१ ॥

टीका-एवं भावगतपुंस्त्रीसंख्यानयनरीतिमुक्त्वा अग्रिमाध्याये तेषां कालपरिज्ञानं विवक्षुरादौ भावसाधनप्रकारांतरेण संख्यानयनं चाह-राशीन् हित्वेत्यादिश्लोकद्वयेन । लग्नादिभावभागान् राशीन् हित्वा राश्यंकं विहाय भावभागादय एव फलज्ञापका इति शेषः । इति विदुः । ते भागादयः भावानां स्वैः स्वैः निजैर्निजैः रश्मिभिः तत्तद्भावपतिरश्मिभिरित्यर्थः । गुणयेत् । ततः कलीकृत्य षाष्टिगुणनेन कलास्थाने संयोज्य पृथक् द्विधा स्थापयित्वा एकत्र भलिप्ताभिः १८०० विभज्य यत् आप्तं तत्फलं भावफलसंज्ञकं फलं बोध्यम् । ततः अन्यत्र स्थापितं फलं सूर्यभक्तावशिष्टं द्वादशभागेन उर्वरितं तद्भावानां लग्नादीनां साधनं साधनसंज्ञकं विदुरिति अग्रिमाध्याय-विषयार्थं साधितं ज्ञेयम् । अथात्रोदाहरणम् । तृतीयभावः २।२।५३।५९ राश्यंकं विहाय जातः २।५३।५९ अस्य स्वामिनो बुधस्य रश्मयः १।४३।४१ एभिर्गोमूत्रिकागुणितो जातः ५।०।३९ अस्य कलाः ३००।३० एताः पृथक् स्थापिताः एकत्र भलिप्ताभिः १८०० आभिर्विभज्य लब्धं जातं फलम् ०।१० एतद्भावफलसंज्ञकं

ज्ञेयम् अन्यत्र स्थापिताः पूर्वोक्ताः कलाः ३००।३९ आसां द्वादशभक्तावशिष्टं फलम् ०।३ एतज्जातं भावसाधनसंज्ञकं ज्ञेयम् ॥ ३० ॥ ३१ ॥

भाषा—राशीको छोडके लग्नादिकोंके जुदे जुदे भावके अंशादिकोंको अपने अपने स्वामीकी रश्मियोंसे गुणन करना उसको भावभागादिक कहते हैं. कला करके दो ठिकाने रखना. राशीकी लिप्तिकासे भाग लेना जो फल आवे उसको भावफल कहना. और दूसरे समूहका बारहसे भाग लेना जो फल आवे वो भावसाधन फल जानना ॥ ३० ॥ ॥ ३१ ॥

सूर्यभक्तावशिष्टं तु भावानां साधनं विदुः ॥ राशीन्
हित्वा ततो लिप्ताः खखनेत्रविभाजिताः ॥ ३२ ॥
साधनघ्ना विभक्ताश्च वर्गणाभिः फलाहताः ॥ उच्चादि
वृद्धिहानिं च कुर्यात्तत्संख्यका भवेत् ॥ ३३ ॥

इति श्रीबृहत्पाराशरहोरायामुत्तरभागे लोकयात्रावर्णनं नाम पंचमोऽध्यायः ॥ ५ ॥

टीका—अथातिसुलभतया प्रकारांतरेण पूर्वोक्तसंख्यासाधनं स्थूलमानेनाह—राशीनित्याद्यध्यायांतम् । राशीन्हित्वा स्पष्टं ततः अवशिष्टस्य लिप्ताः कलाः कार्याः ततः खखनेत्रैः २०० विभाजिताः भक्ताः ततः साधनघ्नाः साधनेन पूर्वसंपादितभावसाधनेन घ्नाः गुणिताः ततः वर्गणाभिः विभक्ताः भाजिताः ते एव फलाहताः पूर्वसंपादितफलेन गुणिताः पश्चादुच्चादिवृद्धिम् उच्चत्रिकोणादितारतम्येन वर्धनं हानिं नीचादितारतम्येन ह्रासं च कुर्यात् । एवं कृते समुच्चयेन पुंस्त्रीसंख्यका भवेदिति अतिस्थूलमानमिति बोध्यम् ॥ ३२ ॥ ३३ ॥

अध्यायेऽस्मिन्पंचमेतु कृताटीकायथामाति ॥
ज्योतिर्विद्भिः शोधनीया कृपया दीनवत्सलैः ॥ १ ॥
श्रीगणेशप्रेरणया त्वार्षेऽध्याये तु पंचमे ॥
कृतया व्याख्यया देवः स एव प्रीयतां मम ॥ २ ॥

इति श्रीमत्० शास्त्रे श्रीमद्ध्यङ्न्वयवेदशा०जटाशं-
करसूनुज्योतिर्विच्छ्रीधरेण वि० सु० टी० लोक-
यात्रावर्णनं नाम पंचमोऽध्यायः ॥ ५ ॥

भाषा—अब पूर्वोक्त कहा उसको सुलभ रीतिसे बताते हैं राशिको छोडके अंशादिककी लिप्तिका करके दोसौसे भाग लेना. जो लब्ध है उसको पूर्वसंपादित भावसाधनसे गुणन करना अपने ध्रुवांकमें भाग लेना पूवसंपादित फलसे गुणन करना. जो अंक आवे वो कुटुंबपोषणकी संख्या जानना ॥ ३२ ॥ ३३ ॥

इति श्रीबृहत्पाराशरहोरोत्तरभागे ज्योतिर्विच्छ्रीधरेण विरचितसुबोधिनीभाषा-
टीकायां लोकयात्रावर्णनं नाम पंचमोऽध्यायः ॥ ५ ॥

भाग्योत्कर्षं भाग्यहानिं कुटुंबं दुःखं हानिं शत्रुमायं
व्ययं च ॥ उद्वाहं स्त्रीपुत्रलाभादिकं च ब्रूयादेवं
चाब्दचर्याक्रमेण ॥ १ ॥ अब्दमासादिनचर्याविधानं
वक्ष्यते खलु मया सुमते ते ॥ वक्ष्यमाणविधिना
परमायुः सम्यगव विदधीत महात्मन् ॥ २ ॥

टीका—अथो पराशरमुनिः षष्ठाध्याये प्रकीर्णकम् ॥ अब्दचर्यादिकं प्राह मैत्रेयाय सविस्तरम् ॥ १ ॥ अथास्मिन् षष्ठेऽध्याये भाग्याद्युत्कर्षह्रासादिकं प्रकीर्णकमुपदिदेश । तत्र प्रथमे अब्दचर्यया भाग्यादिकं ब्रूयादित्याह—भाग्येति । भाग्योत्कर्षं भाग्यवृद्धिं भाग्यहानिं कुटुंबं पोषणीयसमूहं दुःखं कष्टं हानिं ह्रासं शत्रुं रिपुं आयं नाशम् उद्वाहं

विवाहं स्त्रीपुत्रलाभादिकं स्त्रीपुत्रयोः लाभः आदौ यस्मिंस्तत् स्त्रीपुत्रलाभप्रभृति सर्वमित्यर्थः।एवं सर्वं च अब्दचर्याक्रमेण वक्ष्यमाणवर्षगत्यनुक्रमशः ब्रूयात् गणक इत्यध्याहारः ॥ १ ॥ अथ अब्दादिचर्यां वक्तुं प्रतिजानीते– अब्देति । सुमते महात्मन् ! इति मैत्रेयसंबोधनद्वयं ते अब्दमासदिनचर्यविधानम् अब्दानि मासाश्च दिनानि च तेषां च चर्यस्य गतेः विधानं मया वक्ष्यते खलु तदर्थमादौ वक्ष्यमाणविधिना परमायुः सम्यगेव सूक्ष्मतया विदधीत संपादयेत् इति ॥ २ ॥

भाषा–अब छठे अध्यायमें वर्षचर्याके क्रमसे भाग्यका उत्कर्ष, भाग्यकी हानि, कुटुंबका सुख दुःख, शत्रुचिंता, लाभ, खर्च, विवाह, स्त्रीपुत्रादिकोंका फल कहते हैं ॥ १ ॥ हे मैत्रेय । तुम्हारेको वर्षचर्या, मासचर्या, दिनचर्याका विधान निश्चय करके कहताहूं और परमायुभी उत्तम रीतिसे निकालना ॥ २ ॥

भावानां साधनं हत्वा दृष्टिभिश्च बलेन च॥ षड्वर्गादिपतीनां च भावे भावे पृथक् पृथक् ॥ ३ ॥ तेषां च दृग्बलानां च संहत्या भाजयेदथ ॥ स्वामिदृष्टिस्थितानां तु काले भावफलं विदुः॥ ४ ॥ ज्ञानसंभवकालस्तु जन्मकालाद्गला यदा ॥लग्नादिव्ययपर्यन्ता भावाः काले तथा विदुः ॥ ५ ॥

टीका–अथ भावफलज्ञाने चिंत्योयं विषयः कालमाह भावानामिति त्रिभिः । भावानां लग्नादीनां साधनं पूर्वाध्यायाग्रे कथितं दृष्टिभिः तत्तद्भावदृष्टिभिः बलेन तत्तद्भावबलेन च हृत्वा गुणयित्वा भावे भावे प्रतिभावमित्यर्थः । तेषां तेषां षड्वर्गपतीनां ग्रहहोराद्रेष्काणनवांशद्वादशांशत्रिंशांशपतीनां दृग्बलानां दृष्टयश्च

बलानि च तेषां पृथक् पृथक् संहत्या भाजयेत् तेन यल्लब्धं तत्काले तत्तत्फलं ज्ञेयम् । अथानंतरं स्वामिदृष्टिस्थितानां स्वाधिपातिपूर्णदृष्टानां तु काले तत्तत्स्वामिदशासमये भावफलं भावोक्तं फलं स्यादिति विदुः आचार्या इति शेषः । पूर्वस्वामिदृष्टा न चेत् फलस्य जन्मकालात् सकाशाज्ज्ञानसंभवकालस्तु लग्नादिव्ययपर्यंता भावाः ये विद्यंते तेषां मध्ये ये बलाः बलाधिकास्तेषां पतिदशाकाले क्रमात्तन्न्यूनतन्न्यूनबलानां पतिदशाकाले तथा भावसदृशं फलं विदुरित्यन्वयः ॥ ३ ॥ ४ ॥ ५ ॥

भाषा—अब द्वादशभावोक्त फल कब होवेगा, उसका कालप्रमाण कहते हैं स्पष्ट द्वादश भाव करके उसको अपनी अपनी दृष्टिसे गुणन करके पीछे अपने भावबलसे गुणन करना, फिर प्रत्येकके भावके जो षड्वर्गपति और उन्होंकी दृष्टि और बल इन्होंका योग करके भाग लेना जो लब्ध वर्षादिक आवें तो समयमें स्त्रीपुत्रधनादिकोंका फल जानना ॥ ३ ॥ ४ ॥ ५ ॥

लग्नषड्वर्गहोराणां भोक्तारः पतयः स्मृताः ॥ त्रिपंचवेददिक्सप्तमुनिरामांशके फलम् ॥६॥ शुभग्रहास्तु द्रष्टारः स्थानदाः सकलग्रहाः॥ युक्ताः सदा तु सद्भावाः संज्ञानुफलदास्तदा ॥ ७ ॥ पापान् हानिकरान्हित्वा स्वोच्चे कोणसुहृत्स्थितान् ॥ तद्राशिर्यस्य शत्रुर्वा नीचयोर्वा ग्रहो यदि ॥ ८ ॥

टीका—अथ तत्र शुभग्रहपापग्रहभेदेन विशेषमाह—लग्नेत्यादिसार्धत्रयेण । लग्नषड्वर्गहोराणां लग्नस्य संबंधिनः ये षड्वर्गाः ग्रहः होराद्रेष्काणसप्तांशनवांशद्वादशांशत्रिंशांशाः तेषां ये होराः राशयः नाम लग्नस्य अमुकराशिः होराया अमुकराशिः द्रेष्काणस्य अमुक-

राशिः इत्यादयः ये षड्वर्गवर्तमाना राशयः तेषां पतयः अधिपाः क्रमात् भोक्तारः स्वदशायां फलदा इत्यर्थः स्मृताः । अत्र होराशब्देन राशिर्ग्राह्यः न तु राश्यर्धभागः तस्य उक्तषड्वर्गगतत्वादिति ज्ञेयम् । अथ ते भोक्तारः स्वस्य सर्वदशायां फलदा वा दशांशविशेषफलदा इति चेदाह त्रिपंचवेददिक्सप्तमुनिरामांशके लग्नादिवर्गपतयः स्वदशायां क्रमात् त्रिपंचादिदशाविभागे फलं ददतीति शेषः । अथ द्रष्टारो ग्रहाः शुभा एव फलदा न पापाः स्थानदास्तु सकलाः शुभाः पापाश्च फलदाः युक्ताः शुभग्रहयुक्ताः सद्भावाः शुभभावा ज्ञेयाः सदा सर्वदा संज्ञानुफलदाः तनुधनसहजादिनामानुसारफलदातारः भवंति तद्वत् पापाः पापग्रहयुक्ताः हानिकराः तन्वादिनामानुसारहानिकर्तारो भवंति तथापि स्वोच्चकोणसुहृत्स्थितान्पापान्हित्वा अन्ये पापाः अथ भावस्थितग्रहस्य वर्तमानराशिर्यदि शत्रुः यदि वा यो ग्रहो नीचे भवति तदा तत्फलस्य दृष्टियोगानुपाततः दृष्टियोगानुरूपं पूर्णदृष्टेः पूर्णहानिश्चेत् अमुकदृष्टेः कियती हानिरिति त्रैराशिकेन हानि फलस्येति शेषः कुर्यात् विद्धीतेति ॥ ६ ॥ ७ ॥ ८ ॥

भाषा–लग्न षड्वर्गका जो फल है वो उसके पतियोंकी दशामें प्राप्त होता है सोभी ३।५।४।१०।७।७।३ यह संख्या अंशमें होवेगी. ग्रह जो हैं उनकी दृष्टि शुभग्रहोंकी फल देती है. पापग्रहकी नहीं और स्थानमें (रेखामें) शुभ पाप दोनों ग्रहोंका शुभाशुभ फल होता है. और जो जो भावमें जो जो ग्रह पाप या शुभ उच्च नीच मूल त्रिकोणादिकके होवें, शत्रुमित्रादिकके होवें, दृष्टि युक्त दृष्टिरहित होवें उन ऊपरसे वे भावोंका शुभाशुभ फल कहना ॥ ६ ॥ ७ ॥ ८ ॥

हानिं कुर्यात्तदा तस्य दृष्टियोगानुपाततः ॥
उद्वाहकारकौ चंद्रशुक्रौ ज्ञो वा तपोऽथ वा ॥ ९ ॥

टीका–अथ कारकसंज्ञकान् ग्रहानाह–उद्वाहेति । उद्वाहकारकौ उद्वाहं विवाहं कुरुत इति उद्वाहकारकौ विवाहकारकसंज्ञौ चंद्रशुक्रौ ज्ञेयौ वा विकल्पेन ज्ञो बुधः तपो गुरुर्वा ज्ञेयः मृतिकरः मृतिं मरणं करोतीति तथा शनिः ज्ञेयः भौमरवी च नीचासतीपती नीचा कुलटा सती पतिव्रता ते पातिः इति तथा ज्ञेयाविति ॥ ९ ॥

भाषा–अब कारक ग्रह कहते हैं. विवाहके करानेवाले चंद्र शुक्र हैं. इस वास्ते चंद्र शुक्र विवाहकारक जानना. विकल्प मतांतरसे विवाहकारक बुध वा गुरु जानना. शनि मरणकारक है. मंगल कुलटाकारक है. सूर्य पतिव्रता-कारक है ॥ ९ ॥

शनिर्मृतिकरो भौमरवी नीचासतीपती ॥ गुरुः
शुभकरः पुत्रे कुजो भ्रातरि शत्रुभे ॥ १० ॥ मंदश्चाये
शुभाः सर्वे स्वोच्चगौ भौमसूर्यजौ ॥ भाग्येऽशुभाः
शुभाः पापा अशुभाः स्वपतिं विना ॥ ११ ॥

टीका–अथ भावेषु शुभाशुभग्रहानाह–गुरुरिति सार्धेन । पुत्रे पंचमस्थाने गुरुः शुभकरः शुभावहः पुत्रकारक इत्यर्थः । भ्रातरि तृतीयस्थाने कुजः भौमः शुभकरः शत्रुभे षष्ठस्थाने मंदः शनिः शुभकरः शत्रुरोगादिनाशक इत्यर्थः । आये एकादशस्थाने सर्वे शुभाः पूर्णचंद्रापापबुधगुरुशुक्राः शुभाः भाग्यकारका इत्यर्थः । अथ च भाग्ये पापाः क्षीणचंद्रसपापबुधरविभौमशनिराहुकेतवः अशुभाः भाग्यनाशकाः किंतु स्वपतिं विना स्वस्य भाग्यभावस्य अधिपव्यतिरेकेण अशुभाः अर्थात् पापोपि भाग्यपतिः सन् भाग्ये स्थितश्चेत् भाग्यकारक एव ज्ञेयः तथा भौमसूर्यजौ कुजशनी स्वोच्चगौ मकरतुला-वर्तमानौ भाग्ये स्थितौ संतौ शुभकराविति ॥ १० ॥ ११ ॥

भाषा—अब भावगत ग्रहोंका शुभाशुभ फल कहते हैं. गुरु ५ शुभ, मंगल, ३ शुभ, शनि ६ शुभ, सर्व ग्रह ११ शुभ हैं. मंगल शनि उच्चके होवें तो उत्तम जानना. नवम स्थानमें शुभ ग्रहोंका फल उत्तम जानना. पापग्रहोंका फल अशुभ जानना. परंतु नवम स्थानमें भाग्यमें जो पापग्रह अपना पति होके बैठा होवे तो भाग्यवृद्धि करनेवाला जानना ॥ १० ॥ ११ ॥

पूर्वभागे समुद्दिष्टदृग्बलेन फलानि तु ॥ विरुद्धानि परित्यज्य समीचीनानि संग्रहेत् ॥ १२ ॥

टीका—अथ पूर्वभागोक्तदृग्बलसिद्धफलव्यवस्थामाह—पूर्वभाग इति । पूर्वभागे पूर्वार्धे समुद्दिष्टदृग्बलेन कथितदृष्टिबलेन यानि फलानि संति तन्मध्ये विरुद्धानि अनिष्टानि परित्यज्य त्यक्त्वा समीचीनानि शुभानि संग्रहेत् गृह्णीयात् यतः शुभानामेवात्र प्रकरणे उपयोगित्वादिति भावः ॥ १२ ॥

भाषा—पूर्वभागमें दृष्टिबलसे फल कहा है उसमें अनिष्ट फल छोडके शुभ फलका संग्रह करना ॥ १२ ॥

ग्रहराशिस्वभावेन पुंस्त्रियोराशिमेव च॥स्वभावं च वदेद्बुद्ध्या देशकालकुलानुगः ॥ १३ ॥

टीका—अथ स्त्रीपुंस्वभावविचारमाह—ग्रहेति द्वाभ्याम् । ग्रहराशिस्वभावेन ग्रहाश्च रव्यादयः राशयः मेषादयश्च एतेषां यथा स्वभावः तेन तथा पुंस्त्रियोः नृनार्योः राशिं लग्नं विचार्य देशकालकुलानुगः देशाश्च कालाश्च कुलानि च तानि अनुगच्छति अनुसरतीति तथा गणक इत्यध्याहारः । पुंस्त्रियोः नरनार्योः स्वभावं निसर्गं बुद्ध्याऽतिसूक्ष्मविवेकेनेत्यर्थः । विचार्येति शेषः । वदेत् कथयेत् । एतदुक्तं भवति गुरुगौरः कस्यचिल्लग्ने वर्तमानः तदीयोत्पत्तिदेशः बहुशः कृष्णवर्णन-

रप्रायः तर्हि देशतारतम्येन गौरत्ववैगुण्यम् तथा शनिः कृष्णः कस्यचिल्लग्ने वर्तमानः तदीयोत्पत्तिदेशो बहुशो गौरवर्णनरप्रायः तर्हि देशतारतम्येन कार्ष्ण्यवैगुण्यमिति देशानुसारवर्णविचारः एवमेव स्वभावादिविचारः तद्वदेव कालविचारः लग्ने शुभग्रहोपि जन्मकालो व्यतीपातग्रहणादिदुष्काले चेत्तारतम्येन सौशील्यदुःशीलत्वमिश्रणं वदेत् एवमेव कुलविचारः शुक्रसौम्यादिशुभग्रहयुतेऽपि लग्ने म्लेच्छादिक्रूरस्वभावकुलोत्पन्नस्य सौम्यत्वक्रौर्यादिमत्त्वं मिश्रणेन वक्तव्यमिति दिक् ॥ १३ ॥

भाषा—अब मनुष्योंका जो स्वभाव गुण हैं सो ग्रहोंके और राशियोंके गुणानुसारसे तथा देश काल कुल देखके बहुत सूक्ष्म दृष्टिके विचारसे कहना ॥ १३ ॥

तेषामिष्टफले वृद्धिस्त्वशुभाख्यफलादयः ॥ अन्यथा
त्वसदेवस्यात्तस्यतस्मान्मृतौफलम् ॥ १४ ॥ रवि-
स्तु पाचको ज्ञेयश्चंद्रमा बोधकः सदा ॥ पाचको
बोधकश्चैव कारको वेधकः क्रमात् ॥ १५ ॥

टीका—अथ तत्तत्स्वभावस्य ह्रासवृद्धी आह— तेषामिति । तेषां सुस्वभावदुःस्वभावगौरत्वादीनां इष्टफले लग्नवर्तमानग्रहस्य कष्टाधिकेष्टफले वृद्धिः उत्तरोत्तरं वर्धनम् अन्यथा एवं न चेदशुभाख्यफलात् कष्टफलाधिक्यात् असदेव स्वभाववर्णादीनामुत्तरोत्तरं हानिरेव स्यात् एवं तस्मादिष्टकष्टादेव मृतौ मृत्युस्थाने फलं स्यात् एतदुक्तं भवति मृत्युस्थानस्थितस्य तदधिपस्य वा कष्टादिष्टफले अधिके सति वक्ष्यमाणप्रकारेण प्राप्तायुषः इष्टफलाधिक्यतारतम्येन वृद्धिः न्यूनत्वतारतम्येन ह्रासः स्यादिति भावः । एवं सर्वभावेषु बोध्यम् ॥ १४ ॥ अथ शुभाशुभफलविशेषज्ञानार्थं रव्यादीनां पाचकादे-

संज्ञाः स्थानविशेषसंबंधेनाह—रविरित्यादित्रयोविंशतिश्लोकपर्यन्तम् । तत्रादौ रविचंद्रयोः पाचकादिसंज्ञा निसर्गत एव रविरिति । रविस्तु पाचकः निसर्गत एव पाचकसंज्ञकः चंद्रमास्तु बोधकः निसर्गत एव बोधकसंज्ञकः सदेति स्वभावत इत्यर्थः । क्रमात् क्रमशः पाचकसंज्ञयोक्तो रविः कारकः कारकसंज्ञः बोधकसंज्ञयोक्तश्चंद्रः वेधकसंज्ञक इति तयोरेव निसर्गसिद्धसंज्ञांतरमुक्तमिति ॥ १९ ॥

भाषा—जो जो भावके फल सुख दुःखादिक कहे हैं उनकी उत्तरोत्तर वृद्धि या हानि कैसी जानना सो कहते हैं. जिस भावका इष्ट बल अधिक होवे तो शुभ फल उत्तरोत्तर ज्यादा होवेगा. कष्टबल अधिक होवे तो अशुभ फल उत्तरोत्तर ज्यादा होवेगा ॥ १४ ॥ सूर्यको पाचक जानना. चंद्र बोधक जानना. और सूर्य जो पाचक है उसको कारकभी कहना. चंद्रमा बोधक है उसको वेधक जानना ॥ १५॥

रव्यादीनां च विज्ञेया मंदारेज्यासितास्तथा ॥ शुक्रा-
रमंदरवयो रवीन्दुशनिचंद्रजाः ॥ १६॥ चंद्रेज्यासित-
भौमाश्च मंदारेन्दुदिनेश्वराः ॥ भौमज्ञसूर्यमंदाः स्युः
सितेन्दुगुरुभूमिजाः ॥ १७ ॥ षट्सप्तनवरुद्रेषु सप्त-
मंदभवात्रिषु॥ द्विषडायव्ययेष्वेवं द्विवेदेन्द्रियखाहिषु
॥ १८॥ षट्पंचसप्तरिष्फेषु द्विषड्व्ययखचतुर्ष्वपि ॥
त्रिरुद्रषट्सप्तमेषु स्थिताः स्थानेषु ते ग्रहाः ॥ १९ ॥
पाचकाद्यास्तु चत्वारः सूर्यादिभ्यः क्रमादिह ॥
पीडर्क्षे वाप्यपीडर्क्षे केंद्रे लग्नं विना तथा॥ २० ॥ षट्
सप्तधर्मकर्मायमृतिष्वेव गताः क्रमात् ॥ पाचकाद्या-
श्चतुर्थे च बलवंतः समीरिताः ॥ २१॥ कारको मंद-

फलदो वेधको विघ्नकृत्स्मृतः ॥ बोधकः शीघ्रफलदः पाचको विफलप्रदः ॥ २२ ॥ तदंशकालस्यान्ते वाप्यादावंत्यांशकेऽपि च ॥ अंत्यांशकेऽपि फलदाः पाचकाद्याः क्रमादिह ॥ २३ ॥

टीका-अथ रव्यादीनां स्थानसंबंधेन पाचकादिग्रहानाह-रव्यादीनामित्यादित्रयोविंशतिश्लोकपर्यंतम् । रव्यादीनां सूर्यप्रभृतिसप्तग्रहाणां पीडर्क्षे शत्रुराशौ अपीडर्क्षे मित्रराशौ अपि वर्तमानाःलग्नं विना लग्नव्यतिरेकेण जन्मलग्नात् केन्द्रे चतुर्थसप्तमदशमस्थाने गताः सर्वे ग्रहाः पाचकाद्या बलवंतः स्युः । अपि च लग्नादेव सकाशात् षट् ६ सप्त ७ धर्म ९ कर्मा १० य ११ मृति ८ चतुर्थेषु ४ स्थानेषु गताः क्रमात् क्रमेण वर्तमानाः पाचकाद्याः सप्त रव्यादयो बलवंतः स्युः अन्यथा पाचकाद्याः सामान्या एव स्युः । तत्क्रममाह रवेः मंदारेज्यसिताः रविस्थानात् षट्सप्तनवरुद्रेषु ६।७।९।११ क्रमात् स्थानेषु स्थिताः क्रमात् पाचकबोधककारकवेधकसंज्ञकाश्चत्वारो भवन्ति। एवं चंद्रस्य शुक्रारमदरवयः चंद्रस्थानात् सप्तनंदभवत्रिषु ७।९।११।३ स्थानेषु स्थिताः क्रमात् पाचकबोधककारकवेधकसंज्ञकाश्चत्वारो भवंति। एवं भौमस्य रवींदुशनिचंद्रजाः भौमस्थानात् द्विषडायव्ययेषु २।६।११।१२ स्थानेषु स्थिताः क्रमात् पाचकादिसंज्ञकाश्चत्वारो भवंति एवं बुधस्य चंद्रेज्यसितभौमाः बुधस्थानात् द्विवेदेन्द्रियवाह्निषु २।४।५।३ स्थानेषु स्थिताः क्रमात्पाचकादिसंज्ञकाश्चत्वारः एवं गुरोः मंदारेन्दुदिनेश्वराः गुरुस्थानात् षट्पंचसप्तरिःफेषु ६।५।७।१२ स्थानेषु स्थिताः क्रमात्पाचकादिसंज्ञकाः एवं शुक्रस्य भौमज्ञसूर्यमंदाः शुक्रस्थानात् द्विषड्व्ययचतुर्षु २।६।१२।४ स्थानेषु स्थिताः क्रमात् पाचकादिसंज्ञकाः । एवं शनेः सितेन्दुगुरुभू-

मिजाः शनिस्थानात् त्रिरुद्रषट्सप्तमेषु ३।११।६।७ स्थानेषु स्थिताः क्रमात् पाचकबोधककारकवेधकसंज्ञकाश्चत्वारो ज्ञेयाः एते पाचकादयश्चत्वारः लग्नात् लग्नव्यतिरिक्ते केंद्रराशित्रये वर्तमाना-श्चद्बलिनः स्युः तथा एते पाचकादिसंज्ञासंज्ञिताः रविचंद्रभौमबुध-गुरवः क्रमात् लग्नतः ६।७।९।१०।११।८।४ स्थानेषु स्थिताश्चेत्तेऽपि बलिनो ज्ञेया इति । अथैषां फलान्याह । कारकः कारकसंज्ञकः स्वसंज्ञाप्रापकग्रहस्य मन्दफलदः न्यूनफलदः स्यात् तथा वेधकसंज्ञको ग्रहः स्वसंज्ञाप्रापकस्य विघ्नकृत तदधिकारानुरूपफलविषये विघ्नकर्ता भवेत् तथा बोधकसंज्ञकः स्वसंज्ञाप्रापकस्य तदधिकारानुरूपफलविषये शीघ्रफलदः स्यात् तथा पाचकसंज्ञकः स्वसंज्ञाप्रापकस्य ग्रहस्य विफलदः तदधिकारानुरूपफलविषये वैफल्यकारक इति । अथैतत्फलदानकालमाह–तदिति । पाचकाद्याः पाचकबोधककारकवेधकाः तदंशकालस्य तस्य स्वसंज्ञाप्रापकग्रहस्य क्रमात् अंते अंतिमनवमांशकाले आद्य आद्यनवांशे अंत्यांशके अंत्यनवांशके अंत्यनवांशके च अपि फलदाः फलदातारो ज्ञेयाः अपिशब्देन फलदाने सर्वदा त्वनियमः सूचितः इति ॥ १६ ॥१७॥ ॥ १८॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

भाषा–अब सूर्यादिकोंका स्थानसंबंधसे पाचकादिक भेद कहते हैं.

पाचकादि ग्रह बनानेका चक्र.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्र.
श ६	शु. ७	सू. २	चं. २	श. ६	भौ. २	शु. ३	पाचक.
भौ. ७	भौ. ९	चं. ६	गु. ४	भौ. ५	बु. ६	चं. ११	बोधक.
गु. ९	श. ११	श. ११	शु. ५	चं. ७	सू. १२	गु. ६	कारक.
शु. ११	सू. ३	बु १२	भौ. ३	सू. १२	श ४	भौ ७	वेधक.

सूर्यादिपाचकादि चक्र.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ग्र.
०	०	०	०	०	०	०	पाचक.
०	०	०	०	०	०	०	बोधक.
०	०	श.	०	०	सू.	०	कारक.
शु.	सू.	०	मं.	०	०	०	वेधक.

सूर्यसे छठे सातवें नववें ग्यारहवें इन स्थानोंमें क्रमसे शनि, मंगल, गुरु, शुक्र, बैठे होवें तो पाचक, बोधक, कारक, वेधक जानना. जैसा सूर्यसे ग्यारहवें घरमें शुक्र होवे तो वेधक जानना. उसका फल यह है कि जो भावमें बैठा होवेगा वो भावगत कार्यका विघ्न करेगा. ऐसा सब ग्रहोंका जानना. यह वार्ता टीकामें स्पष्ट है. यहां चक्रभी स्पष्ट दिखाया है ॥ १६ ॥ १७ ॥ ॥१८ ॥ १९ ॥२० ॥ २१ ॥ २२ ॥ २३ ॥

आदौ फलप्रदौ भौमरवी मध्ये सितार्यकौ ॥
सर्वदा ज्ञः शशी मंदस्त्ववसाने फलप्रदौ ॥ २४ ॥

इति श्रीमद्बृहत्पाराशरहोरोत्तरभागे लोकयात्रावर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥

टीका-अथ रव्यादीनां दशागोचरादिफलकालमाह-आदाविति भौमरवी कुजसूर्यौ आदौ आद्यत्रिभागे स्वदशागोचरादिफलप्रदौ भवतः सितार्यकौ शुक्रगुरू मध्ये मध्यत्रिभागे फलदौ, ज्ञो बुधः सर्वदा समग्रदशादौ फलदः स्यात्, शशी चंद्रः मंदः शनिश्च एतौ द्वौ अवसाने अंत्यत्रिभागे फलदा स्यातामिति ॥ २४ ॥ एवं पराशरोक्तेऽस्मिन् षष्ठाध्याये यथामति ॥ गणेशप्रीतये टीका कृता शोध्या मनीषिभिः ॥ १ ॥

इति श्रीमत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्कन्वयवेदशास्त्राद्यनवद्यविद्याविद्योतितदशादिङ्मंडलसूनुज्योतिर्विच्छ्रीधरेण विरचितायां सुबोधिनीटीकायां षष्ठोऽध्यायः ॥ ६ ॥

भाषा--सूर्य मंगल आद्य प्रथम त्रिभागमें फल देते हैं. शुक्र गुरु मध्य त्रिभागमें फल देते हैं. बुध सर्वकाल फल देता है. चंद्र शनि अंतिम त्रिभागमें फल देते हैं ॥२४॥ इति श्रीबृहत्पाराशरहोराशास्त्रे भाषाटीकायां लोकयात्रावर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥

धनहानिभयानां च व्याधीनां दिवसास्तथा ॥
शुभाशुभानि कर्माणि यात्रादि विजयादि च ॥ १ ॥
मासचर्याविधानेन ब्रूयादन्येन चेतरान् ॥
लग्नारिमृतिरिःफेषु वर्गणां च पतींस्तथा ॥ २ ॥
करणेशान्समालोच्य कथयेन्मुनिपुंगव ॥ रसेषवो
मुनिः खाष्टो रविभूपा दिशस्तथा ॥ ३ ॥ द्विशतं च क्रमात्सूर्याद्दिवसाश्चाष्टमे स्थिताः ॥ द्वितीयेऽर्धं त्वंतरे च
त्रैराशिकवशेन तु ॥४॥ इति श्रीमद्बृहत्पाराशरहोरोत्तरभागे मासचर्यादिवसात्फलज्ञानकथनं नाम
सप्तमोऽध्यायः ॥ ७ ॥

टीका–नत्वा श्रीमद्गणेशानं सप्तमेऽध्यायके मया ॥ क्रियते विशदा व्याख्या परोपकृतये मुदा ॥ १ ॥ सप्तमेऽध्यायकेऽस्मिंस्तु पराशरमहामुनिः ॥ व्याध्यादिदिवसानाह रव्यादीनां यथाक्रमम् ॥ २ ॥ अथ भगवान्महर्षिः शिष्याय मासचर्यया शुभाशुभदिवसज्ञानमाह–धनेत्यादिचतुःश्लोक्या । धनहानिभयानां धनं द्रव्यलाभः हानिर्द्रव्यनाशः भयं शत्रुरोगाद्यनिष्टजं तेषां व्याधीनां शरीरे प्राप्तरोगाणां च दिवसान् वक्ष्यमाणान् जानीयादित्यध्याहारः । अथ शुभाशुभानि इष्टानिष्टानि कर्माणि व्यापारान् यात्रादि गमनागमनादि विजयादि उत्कर्षादि सर्वं मासचर्याविधानेन ब्रूयात् इतरानन्यान् उक्तावशिष्टान् प्रकारान् अन्येन दिनचर्यावर्षचर्याविधानेन ब्रूयात् । तथा लग्नारिमृतिरिःफेषु लग्नषष्ठभावमृत्युभावव्ययभावेषु फलविषये वर्गणां प्रागुक्तान्पतीन् स्वामिनः करणेशान् करणपतींश्च कस्मिन् भावे कः कियान् फलद इति सम्यग्विचार्य

हे मुनिपुंगव ! कथयेत्फलमिति शेषः । अथ रव्यादीनां अष्टमभावादिद्वितीयभावांतं द्वितीयभावाद्यष्टमभावपर्यंतं वर्तमानानां रव्यादीनां फलदाने दिवसानाह । अष्टमे भावे रसेषवः ५६ रवेः, मुनिः ७ विधोः, खाष्टौ ८० भौमस्य, रवयः १२ बुधस्य, भूपाः १६ गुरोः, दिशः १० शुक्रस्य, द्विशतं २०० शनेः । एवमष्टमभावे सूर्यात् सकाशात् क्रमादिवसाः द्वितीयभावे तु अर्धमुक्तदिवसार्धं अंतरे अष्टमद्वितीयभावयोर्मध्यभावेषु तु त्रैराशिकवशेन द्वितीयाष्टमयोः अमुकदिवसाश्चेदमुकमध्यभावे कति दिवसा इति त्रैराशिकरीत्या ज्ञेया इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

एवं प्रकारतोऽध्याये सप्तमेऽस्मिन् यथामति ॥
कृता टीका ज्योतिषिकैः शोधनीया प्रयत्नतः ॥ १ ॥

इति श्रीमद्बृहत्पाराशरहो० श्रीधरेण विरचितायां सुबोधिनीटीकायां प्रकीर्णकवर्णनं नाम
सप्तमोऽध्यायः ॥ ७ ॥

भाषा–अब फलादेश कहते हैं. धनकी प्राप्ति, धनका नाश, शत्रुभय, रोग इनकी प्राप्तिके दिन और शुभाशुभ कर्म, जय पराजय उत्कर्ष इनका निर्णय मासचर्याके अनुसारसे कहना. और दूसरे जो कार्य हैं वे सब दिनचर्या-वर्षचर्यानुसारसे वर्णन करना. उसमें १।६।८।१२ यह भावोंके पति और बिंदुके अधिपतियोंको देखके अच्छा विचार करके फल कहना. अब सूर्यादिकोंके फलदायक दिन कहते हैं. सू० ५६ चं० ७ मं० ८० बु० १२ गु० १६ शु० १० श० २०० यह संख्या अष्टम भावकी जाननी. और दूसरे भावमें पूर्वोक्त संख्याकी अर्ध संख्या जाननी. दूसरा और अष्टम यह भाव छोडके जो अन्य भाव हैं वहां त्रैराशिकमतसे कहना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति श्रीमद्बृहत्पाराशरहो० भाषाटीकायां प्रकीर्णकवर्णनं
नाम सप्तमोऽध्यायः ॥ ७ ॥

तेषां भंगमथो वक्ष्ये यथाह कमलासनः ॥ गर्गाय भगवान्सोऽपि ममाहाहं तव द्विज ॥ १ ॥ तथा च रिःफषष्ठाष्टस्थानानां करणाधिपाः ॥ तत्तद्भावस्य भंगस्य कर्तारः सति संभवे ॥ २ ॥

टीका–अथ पूर्वोक्तयोगानां भंगमाह पराशरः ॥ अध्यायेऽस्मिन्नष्टमे च मैत्रेयाय महामुनिः ॥ १ ॥ एवं वर्षमासादिनचर्याभिर्भावफलान्युक्त्वा अथाष्टमाध्याये पूर्वोक्तयोगानां भंगं कथयति तत्र परंपरामाह–तेषामिति । हे द्विज मैत्रेय ! तेषां पूर्वोक्तयोगानां भंगं नाशं कमलासनो ब्रह्मा गर्गाय मुनये आह सोऽपि गर्गोऽपि मम मह्यं भंगमाह अहं तव तं भंगं वक्ष्ये कथयिष्ये ॥ १ ॥ स्थानविशेषकरणाधिपसंभवेन भंगमाह तथेति । लग्नात् रिःफषष्ठाष्टस्थानानां द्वादशषष्ठाष्टसंज्ञकस्थलानां करणाधिपाः करणानां बिंदूनां स्वामिनः करणदातारो ग्रहा इत्यर्थः । सति संभवे उक्तस्थानत्रयकरणसंभवे तथा स्थानत्रयकरणसंभवेऽपि स्थानत्रयकरणेशानां संयोगसंभवे दृष्टिसंभवे सति वा तद्युतदृष्टभावस्य भावफलस्येत्यर्थः भंगकर्तारो नाशकर्तारः स्युः ॥ २ ॥

भाषा–अब योगभंग कहते हैं. हे मैत्रेय ! पूर्व जो योगभंग ब्रह्माजीने गर्गको कहे, गर्गने मेरेको कहे सो मैं अब तुम्हारेको कहताहूं सो सुनो ॥ १ ॥ लग्नसे १।२।६।८ घरोंमें बिंदु देनेवाले ग्रह वहां बैठे होवें या वे स्थानोंके अधिपतिके साथ बिंदु देनेवारे ग्रहोंका संयोग होवे तो वो भावोंका भंग करनेवाले जानना ॥ २ ॥

तत्तद्भावाष्टवर्गोत्थसंख्या तद्वर्गणाहता ॥ रविभक्ता ततः शिष्टा राशिर्मेषादिका भवेत् ॥ ३ ॥ षष्ठाष्टरिःफे

राशिश्चेद्भंग एष प्रकीर्तितः ॥ फलं च मुनिसंवृद्धं रविभक्तं तथा भवेत् ॥ ४ ॥

टीका–अथ राश्यानयनेन भंगांतरमाह–तत्तादिति । तत्तद्भावाष्टवर्गोत्थसंख्या तन्वाद्यन्यतमविचारणीयभावस्य या अष्टवर्गसमुत्पन्नकरणांकसंख्या तद्वर्गणाहृता तस्यैव भावस्य वर्गणया गुणिता ततः रविभक्ता द्वादशभाजिता सती या शिष्टा स्यात् योंऽकः शिष्टः स्यादित्यर्थः सा मेषादिका राशिर्भवेत् एकादिशिष्टांकपरिमितेत्यर्थः ॥ ३ ॥ अथास्या राशेः प्रयोजनमाह–षष्ठेत्यर्धेन । एषः पूर्वोक्तप्रकरोत्पन्नो राशिः षष्ठाष्टारिःफश्चेत् भंगः पूर्ववत्तद्भावभंगः प्रकीर्तितोऽवगंतव्य इति । अथ द्वादशभक्तावशिष्टांको राशिर्जातः लब्धांकस्य किं प्रयोजनं तदाह फलमित्यर्धेन । फलं प्रागानीत द्वादशभागलब्धं यत् मुनिसंवृद्धं मुनिभिः सप्तभिः सम्यक् वृद्धं गुणितमित्यर्थः तथा रविभक्तं द्वादशभिर्भक्तं तथा भवेत् राशिरूपं भवेत् तत्रापि षष्ठाष्टरिष्फान्यतमत्वं चेद्भंगः स्यात् ॥ ४ ॥

भाषा–जो जो भावके अष्टवर्गोंसे संख्या और जो कोई अष्टवर्गसमुत्पन्नक बिंदु संख्याको वर्गणासे गुणकरके बारहसे भाग लेना जो शेषांक आवे वो राशि जानना ॥ ३ ॥ यह पूर्वश्लोकमें कही जो राशि वो ६।८।१२ घरमें आवे तो वो भावका भंग करेगा. अब वो राशि जो शेषांकसे लाये परंतु लब्धांक जो आये उसको सातसे गुणित करके बारहसे भाग लेना जो शेष रहे वो राशि जानना. वो राशि ६।८।१२ वें घरमें आवे तो वो भावका भंग जानना ॥ ४ ॥

शिष्टमेवं यदि तदा शत्रुभं वाथ भंगदम् ॥ तद्भावानिष्टफलकं तच्छत्रुफलसंगुणम् ॥५॥ सप्तातं शिष्टमेवात्र

पापरश्मिगुणं ततः ॥ अर्कांशिष्टं यदि भवेत्षष्ठारिःफाष्टमेऽपि वा ॥ ६ ॥ शत्रुभं वापि भंगर्क्षं हानिस्तस्य प्रकीर्तिता ॥ यथोत्तरमितीवाप्तं क्षयवृद्धिस्ततो भवेत् ॥ ७ ॥

टीका–ननु एवं मुनिगुणितं रविभागोपलब्ध्यनंतरमपि अवशिष्टं चेत्किंकार्यं तत्राह शिष्टमित्यादिसप्तश्लोकांतम् । एवं नाम पूर्वप्रकारे कृतेऽपि शिष्टं यदि ऽथवाशिष्टं अवशिष्टोंऽको यदि राशिरूपं शत्रुभं लग्नेशस्य शत्रुराशिः स्यात् वा अथ वा भंगदं सोंऽको राशिरूपः लग्नात् भंगदषष्ठाष्टारिःफरूपः स्यात् तदा तद्भावानिष्टफलकं यद्भावस्यायं संस्कारः कृतः तद्भावस्यानिष्टफलको बोध्यः । अथ पुनस्तस्याप्यवशिष्टस्य संस्कारं कथयति तत् यच्छत्रुभं वा भंगदं भं वावशिष्टं तत् तच्छत्रुफलसंगुणं सचासौ शत्रुश्च तच्छत्रुः तस्य यत्फलं कष्टफलं तेन संगुणं सम्यग्गुणितं सम्प्राप्तं सप्ताभिर्भक्तमपि अत्रावशिष्टमेव चेत्तदा पापरश्मिगुणं पापस्य शत्रोः ये रश्मयस्तैर्गुणयित्वा अर्कांशिष्टम् अर्कैर्द्वादशाभिः अवशेषितं यद्यपि षष्ठारिःफाष्टमे लग्नात् षष्ठे वा रिःफे वा अष्टमे वा स्थाने तच्छत्रुभं वा भंगदं भं वा भवेच्चेत्तर्हि तस्य भावस्य भंगोऽवगंतव्यः । ननु एकप्रकारेण भंगे सिद्धेऽपि पुनः पुनः भंगप्रकारकथने किं प्रयोजनं तत्राह यथेत्यर्धेन । यथोत्तरं उत्तरोत्तरम् यथास्यात्तथा उक्तप्रकारेषु एवमेव षष्ठारिःफाष्टमराशिः शत्रुराशिर्वा स्याच्चेत्ततः तदनुरूपं क्षयवृद्धिः क्षयस्य भावनाशस्य वृद्धिः वर्धनं एकद्वित्र्यादिप्राप्तप्रकारसंख्याकभंगवृद्धिरित्यर्थः भवेदिति ॥ ५ ॥ ६ ॥ ७ ॥

भाषा–अब दूसरी बखत भाग लेनेसे विशेष रहे तो पुनः संगुण कहते हैं. पूर्वोक्त राशि लग्नेशकी शत्रुराशि होवे अथवा लग्नसे भंगसूचक होवे तो वे

भावका अनिष्ट फल कहना. अब जो शेष है, जिस भावका भंग करता है उस भावके कष्टफलसे गुणन करके सात ७ से भाग लेना. यहां अवशेष रहे तो शत्रुकी रश्मिसे गुणना, बारहसे भाग लेना. शेष राशि ६ । ८ । १२ में होवे तो वो भावका भंग जानना. वारंवार भंग कहते हैं, उसका क्या कारण सो कहते हैं उक्त रीतिसे जो भंग आता है उसकी क्षय वृद्धि एकद्वित्र्यादि आये जो प्रकार उस संख्यासे क्षय वृद्धि कहना ॥ ५ ॥ ६ ॥ ७ ॥

षष्ट्यंशे च कलांशे च त्वप्रकाशग्रहोदये ॥ राहुकालसमायोगे तद्भावफलभंगदः ॥ ८ ॥ अनिष्टाख्यं च रश्मिं च तद्भावफलसंगुणम् ॥ द्वादशाप्तावशेषं च पूर्ववत्फलमीरितम् ॥९॥

टीका-अथ प्रकारांतरेण भावभंगमाह-षष्ट्यंश इति । षष्ट्यंशे यस्य भावस्य भंगविचारस्तस्य षष्ट्यंशे वा कलांशे षोडशांशे अप्रकाशग्रहोदये अप्रकाशग्रहाः धूमपातपरिधिचापध्वजाः तदन्यतमग्रहस्य उदये सति राहुकालसमायोगे च सति तद्भावफलस्य भंगदः भंगकारकयोगो ज्ञेयः । अप्रकाशग्रहोदयज्ञानं तु पूर्वार्धे ज्ञेयम् । तद्यथा उदयकालीनस्पष्टरवौ राशयः ४ अंशाः १३ कलाः २० संयोज्य यद्राश्यादिकमुपलभ्यते तद्धूमोदयकालीनमवगंतव्यम् । यतः रविधूमयोस्तत्परिमितांशाद्यंतरं पूर्वार्द्धे उक्तमिति । अथ च तदेव राश्यादिकं द्वादशराशितः शोधितं तत्पादोदयकालीनं राश्यादिकं ज्ञेयं तथैव तत्पादोदयकालीनराश्यादिकं षड्राशियुक्तं परिध्युदयकालीनं ज्ञेयम् । एवं तत्परिध्युदयकालीनराश्यादिकं द्वादशराशिशोधितं चापोदयकालीनं ज्ञेयं तच्चापोदयकालीनम् अंशाः १६ कलाः ४० एतद्युक्तं ध्वजोदयकालिकं

राश्यादिकं ज्ञेयमिति । अथ राहुकालसमायोगस्तु " मेषादुत्क्रमतो राहुर्वृषात्कालः क्रमाच्चरेत् " इत्यादि अष्टादशाध्याये व्याख्यास्यामि ॥ ८ ॥ अपि च प्रकारांतरमाह—अनिष्टाख्यमिति । भंगविचारणीयभावेशस्य अनिष्टाख्यं रश्मि तद्भावफलं संगुणं तस्यैव भावस्य फलेन कष्टाख्येन संगुणितं द्वादशाप्तावशेषं द्वादशभागोर्वीरितं फलं पूर्ववत् तद्भावभंगदं समीरितं कथितमिति ॥ ९ ॥

भाषा—अब प्रकारांतरसे भावभंग कहते हैं, जिस भावका भंगविचार करना होवे उस भावके षष्ट्यंशमें या षोडशांशमें धूम, पात, परिधि, चाप, ध्वज इनमेंसे कोई एककाभी उदय होवे तो वो भावका भंगकारक योग जानना ॥ ८ ॥ और प्रकारांतर कहते हैं. जिस भावका भंग विचारना है उसकी अरिष्टरश्मिको वोही भावके इष्टबलांकसे गुणन करना, बारहसे भाग लेना शेष राशि जानना. राशिसंख्या तुल्यभावका भंग जानना ॥ ९ ॥

यद्यत्फलं प्रोक्तमथोत्तरत्र तत्सर्वमन्यत्र च योजनीयम् ॥ भंगं च भंगं च मुनिश्च गर्गः प्रोवाच यद्वन्मुनिपुंगवाहम् ॥ १० ॥ षष्ट्यंशे च कलांशे च त्रिषवेकोऽपि यदा न चेत् ॥ अधिमित्रं च मित्रं च भंगभंगः प्रकीर्तितः ॥ ११ ॥

इति श्रीमद्बृहत्पाराशरहोरायामुत्तरभागे लोकयात्रायां भावभंगोपदेशोऽष्टमोऽध्यायः ॥ ८ ॥

टीका—अथास्योक्तभंगस्योत्तरत्र सर्वतो योजनमाह—यादित्यर्धेन । अत्र यद्यत्फलं प्रोक्तं तत्तत् अथो अनंतरं उत्तरत्र वक्ष्यमाणभावविचारेऽपि अन्यत्र क्वापि भावविचारे योजनयिमिति । अथ स्वोक्तं प्रमाणयति भंगमित्यर्थेन । गर्गो मुनिः यं यं भंगं भंगमिति वीप्सा-

यां द्विरुक्तिः। मामिति शेषः प्रोवाच कथितवान् तं . तं भंगं हे मुनिपुगव मैत्रेय ! अहमपि तवोपादिष्टवानित्यन्वयः ॥ १०॥ षष्ट्यंशइति । षष्ट्यंशे स्पष्टं कलांशे षोडशांशे च त्रिषु शत्रुराशिं प्राप्त्यप्रकाशग्रहोदयकालराहुसमायोगेषु त्रिष्वपि योगेषु मध्ये यदा एकोपि योगो न चेत् अथ वा तत्राधिमित्रं मित्रं वा लग्नेशस्य अस्ति चेत्भंगभंगः भंगस्य रिपुरिःफषष्ठान्यतमोत्पादितराशिजनितस्य भंगो नाशः अपवाद इत्यर्थः प्रकीर्तितः कथितः इति । एवमुक्तं भवति पूर्वप्रकारैरुत्पादितराशिः लग्नात् द्वादशाष्टरिपुस्थानापन्नोऽपि लग्नेशस्य शत्रुषोडशषष्ट्यंशेन तथा तत्र षोडशांशषष्ट्यंशयोः अप्रकाशग्रहोदयोऽपि न तथा तत्र षोडशांशषष्ट्यंशयोः राहुकालसमायोगेऽपि न तर्हि स भावराशिः लग्नात् षष्ठाष्टमद्वादशतमो भावभंगदोपि उक्तयोगत्रयाभावे भावभंगदो न भवेदिति भावः ॥ ११ ॥ एवं पराशरे होराशास्त्रस्यास्योत्तरार्धके ॥ अध्याये त्वष्टमे टीका कृतेयं तु यथामाति ॥ १ ॥ गणेशप्रीतये धीराः परोपकृतिहेतुना ॥ शोधनीया भवद्भिः सा प्रार्थयेहं पुनः पुनः ॥ २ ॥ मुमुहुः कालशास्त्रेऽस्मिन् दुर्गमत्वान्मनीषिणः ॥ किमहं मंदधीस्तत्र गगने मशको यथा ॥ ३ ॥ इति श्रीबृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्न्वयवेदविद्याविद्योतितदशदिङ्मंडलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचितायां सुबोधिनीटीकायामष्टमोऽध्यायः ॥ ८ ॥

भाषा–यह जो मैंने भावभंगादिक फलविचार कहा है सो उत्तरोत्तर आगे जहां जहां उपयोग होवे वहां देखना जो जो भंग गर्गमुनिने कहेहैं वोही भंगोंका लक्षण मैंने कहा है ॥ १० ॥ अब पहिले जो भंग कहे हैं उन्होंका भंगखंडन कहते हैं. जो अभीष्टभावके षष्ट्यंशमें, या षोडशांशमें, शत्रुराशिमें अप्रकाश धूमादिक ग्रहोंका उदयकाल राहुसमायोग इन्होंमेंसे कोईभी एक

योग न होवे और अधिमित्र या मित्र होवे, तो लग्नका पूर्वोक्त भंगका परिहार जानना ॥ ११ ॥

इति बृहत्पाराशरहोरा० भाषाटीकायां लोकयात्रा-
वर्णनं नामाऽष्टमोऽध्यायः ॥ ८ ॥

आत्मा शरीरं होरा च कल्पं लग्नं च मूर्तयः ॥ स्वं कुटुंबं च दुश्चिक्यं विक्रमं सहजं सहः ॥ १ ॥ पातालं हिबुकं वेश्म मित्रबंधूदकं सुखम् ॥ त्रिकोणं प्रतिभा बुद्धिमातृविद्यासुतास्ततः ॥ २ ॥ व्याधिक्षतारिभंगाश्च क्रोधो लाभोऽथ मत्सरः ॥ कामो विवाहो यात्रा स्त्री रतिद्यूनं मदोऽज्ञता ॥ ३ ॥ पराभवो मृतिर्बंधो रंध्रायुर्निधनं च्युतिः ॥ शुभं धर्मस्ततो भाग्यं त्रिकोणं च गुरुर्विभुः ॥ ४ ॥ व्यापारास्पदमेषूरणमानाज्ञा च कर्म खम् ॥ भावाय लाभाय तपो रिःफं हानिर्व्ययः स्मृतः ॥ ५ ॥ यात्रायां दशमेनैव निवृत्तिः सप्तमेन तु ॥ वृद्धिश्चतुर्थलग्नेन त्रितयं संप्रकीर्तितम् ॥ ६ ॥ स्वोच्चमित्रस्ववर्गस्था एवमर्थाश्च सप्तातिः ॥ नीचारिवर्गगाश्चान्यत्पुष्टं चापुष्टमेवच ॥ ७ ॥

टीका-विद्यानिधिं गणेशं च हृदि ध्यात्वा यथामति ॥ नवमाध्यायके टीका कुर्वेऽज्ञोपकृतावथ ॥ १ ॥ अध्याये नवमेऽस्मिंस्तु मुनिः शिष्यं पराशरः ॥ विचारे भावखेटानां शशास व्यासतो मुदा ॥ २ ॥ अथास्मिन्नध्याये द्वादशभावविचारसिद्धये तत्तद्भाव-

विचारणीयार्थसूचकान्येव तषां नामानि कथयित्वा गृहस्थानादिविचारः क्रियते—आत्मेत्यादियावदध्यायसमापनम् । तत्रादौ आत्मेत्यादिसप्तश्लोकपर्यन्तं द्वादशभावेषु सप्ततिसंख्या कार्या । विचारभावं नामभिः सूचयाति । अथ लग्नसंज्ञा—आत्मा, शरीरं, होरा, कल्पं, लग्नं, मूर्तयः, षट् ६ । अत्र मूर्तिशब्दस्य बहुवचन छंदःसाधकम् । अथ द्वितीयभावसंज्ञे--स्वं, कुटुंबं चेति द्वे २ । अथ तृतीयभावसंज्ञा--दुश्चिक्यं, विक्रमं, सहजं, सहः इति चतस्रः ४ । अथ चतुर्थभावसंज्ञा—पातालं, हिबुकं, वेश्म, मित्रं, बंधुः, उदकं, सुखं, इति सप्त ७ । अथ पंचमभावसंज्ञा--त्रिकोणं, प्रतिभा, बुद्धिः, मात्रभिधं, विद्या, सुतः, इति षट् ६ । अथ षष्ठभावसंज्ञा—व्याधिः, क्षतम्, अरिः, भंगः, क्रोधः, लोभः, मत्सरः, इति सप्त ७ । अथ सप्तमभावसंज्ञा—अत्र भावे कामः, विवाहः, स्त्री, रतिः, द्यूनं, मदः, अज्ञता, इति सप्त ७ । अथाष्टमभावसंज्ञा—पराभवः, मृतिः, बंधः, रंध्रः, आयुः, निधनं, च्युतिः, इति सप्त ७ । अथ नवमभावसंज्ञा—शुभं, धर्मः, भाग्यं, त्रिकोणं, गुरुः, विभुः, इति षट् ६ । अथ दशमभावसंज्ञा—व्यापारः, आस्पदं, मेषूरणं, मानः, आज्ञा, कर्म, खं इति सप्त ७ । अथैकादशभावसंज्ञा—भावः, आयः, लाभः, अयः, तपः, इति पंच ५ । अथ व्ययसंज्ञा—रिःफं, हानिः, व्ययः, इति तिस्रः ३ । एवं सप्तषाष्टि ६७ संज्ञानुरूपतावत्संख्या कार्या । अपि च दशमेन यात्रायां गमनविषये विचारः १ । सप्तमभावेन निवृत्तिः पुनर्निवर्तनविचारः २ । चतुर्थलग्नेन वृद्धिविचारश्च ३ । एतत्पुनः संप्रकीर्तितं त्रितयं च संयोज्य एवं नामानुरूपं सप्ततिः ७० अर्थाः विचारणीयाः कया रीत्या तदाह स्वोच्चमित्रस्ववर्गस्थाः स्वानाम् उच्चानि पूर्वोक्तानि मित्राणि ग्रहमैत्रविचारोक्तानि स्ववर्गाः ग्रहहोराद्रेष्काणादयः तेषु वर्तमानाः संतो

यस्मिन् भावे ग्रहा भविष्यंति स भावः पुष्टम् उक्तसंज्ञानुरूपं पूर्णं फलं दास्यतीत्यध्याहारः । अथ च येषु भावेषु नीचारिवर्गगाः नीचानि पूर्वोक्तानि अस्य ग्रहमैत्रविचारोक्ताः तेषां वर्गेषु गच्छंति ते स्वनीच-वर्गस्थाः स्वशत्रुवर्गस्थाश्च ग्रहाः वर्तंते स भावः अपुष्टम् उक्तसंज्ञानुरूपं फलवैगुण्यं दास्यतीति ॥१॥२॥३॥४॥५॥६॥७॥

भाषा—अब भावगत फलोंका निर्णय कहनेके लिये प्रथम भावके नाम कहते हैं—अथ लग्नके नामः—आत्मा, शरीर, होरा, कल्प, लग्न, मूर्ति. अब, दूसरे भावके नामः—स्व, कुटुंब, अब तीसरे भावके नामः—दुश्चिक्य, विक्रम, सहज, सह. अब चौथे भावके नामः--पाताल, हिबुक, वेश्म, मित्र, बंधु, उदक, सुख. अथ पंचमभावके नामः--त्रिकोण, प्रतिभा, बुद्धि, मात्रभिध, विद्या, सुत. षष्ठभावके नामः--व्याधि, क्षत, अरि, भ्रम, क्रोध, लोभ, मत्सर. सातवें भावके नामः—काम, विवाह, स्त्री, रति, द्यून, मद, अज्ञता. अष्टम भावके नामः—पराभव, मृति, बंध, रंध्र, आयु, निधन, च्युति. नवम भावके नामः—शुभ, धर्म, भाग्य, त्रिकोण, गुरु, विभु. अब दशवें भावके नामः--व्यापार, आस्पद, मेषूरण, मान, आज्ञा, कर्म, ख. अब ग्यारहवें भावके नामः--भव, आय, लाभ, अय, तप. अब व्यय भावके नामः—रिःफ, हानि, व्यय. ऐसे सडसठ अर्थ भये, और दशम घरसे गमनविचार, सप्तम भावसे पीछे फिरना, चौथे घरसे वृद्धि ऐसे ७० अर्थोंका विचार करना जो यह मित्र उच्च स्वक्षेत्रगत या षड्वर्गमें होवे तो पूर्वोक्त फल सर्व उत्तम देता है. शत्रु नीच शत्रुवर्गादिकका होवे तो अनुभवफल देता है ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

रविः शरीरे होरायां स्वे च भ्रातरि वेश्मनि ॥ सुते
व्याधौ क्षते शत्रौ मृतौ तपसि कर्मणि ॥ ८ ॥ आये
व्यये फलं दद्याच्छीघ्रगुर्विक्रमे सुखे ॥ कुटुंबे भ्रातरि
क्रोधे प्रतिभायां शुभे मृतौ ॥ ९ ॥

टीका-एवं भावेषु विचारणीयमुक्त्वा सप्तग्रहेष्वेवमेव विचारमाह-रविरित्यादिदशश्लोकैः । तत्र रविरिति सपादेन रविविचारमाह । रविः सूर्यः शरीरं देहे होरायां लग्नविचारे स्वे द्वितीयभावे भ्रातरि बंधौ वेश्मनि चतुर्थभावे सुते पुत्रे व्याधौ रोगे क्षते क्षतविचारे शत्रौ अरौ मृतौ मृत्यौ तपसि तपस्यायां कर्मणि कृत्ये आये लाभे व्यये नाशे एवमर्थकभावेषु एवमुक्तफलेषु च फलं दद्यादिति ॥ ८ ॥ अथ चंद्रविचारमाह शीतगुरित्यादिसपादेन । विक्रमे प्रतापे सुखे कुटुंबे पोष्ये भ्रातरि क्रोधे प्रतिभायां बुद्धिविशेषे शुभे मृतौ भाग्ये त्रिकोणे पंचमनवमभावविचारे क्रयविक्रयादिरूपे लाभे रिःफे च इत्युक्तफलविचारे चंद्रात् उक्तफलदभावविचारेऽपि शीतगुश्चन्द्रः फलप्रदः ॥ ९ ॥

भाषा-अब सूर्यका फलविचार कहते हैं. सूर्य शरीरमें लग्नके विचारमें फल देता है. दूसरे भावमें भाईके घरमें चौथे घरमें पुत्रके घरमें रोग होवे क्षय विचार शत्रुका विचार मृत्युका विचार नवम घरमें तपस्याका दसवेंमें कृत्यका लाभ खर्चेका यह सब फल देता है ॥ ८ ॥ अब चंद्रमा प्रताप कुटंब पोष्यवर्ग भाई क्रोध बुद्धि विशेष कर्म मृत्यु भाग्य पंचम नवमभावविचार क्रयाविक्रयादि विचार लाभ व्यय पदार्थको फल देता है ॥ ९ ॥

भाग्ये त्रिकोणे व्यापारे लाभे रिःफे फलप्रदः ॥ कुजः
शरीरे होरायां कल्पविक्रमबंधुषु ॥ १० ॥ सहजे च
सहे शत्रौ क्रोधे लोभे च रंध्रके ॥ क्रियायामायतौ
हानौ जये भंगे फलप्रदः ॥ ११ ॥

टीका-अथ भौमविचारमाह-कुज इति सार्धेन । कुजो भौमः शरीरे होरायां लग्ने कल्पे शास्त्रविशेषे विक्रमे प्रतापे बंधौ भ्रातरि ॥ १० ॥ सहजे सहोत्पन्ने सहे तृतीयभावे शत्रौ क्रोधे लोभे रंध्रे

अष्टमभावे क्रियायां कर्मणि आयतौ प्रभावे हानौ नाशे जये उत्कर्षे भंगे घाते इत्युक्तफलविचारे तस्मादुक्तफलभावविचारे च फलप्रदः ॥ ११ ॥

भाषा—अब मंगल शरीर लग्न शास्त्रविशेष विचार प्रताप भाई तृतीय भाव शत्रु क्रोध लोभ अष्टम भाव कर्म प्रभाव हानि उत्कर्ष घात यह पदार्थको फल देता है ॥ १० ॥ ११ ॥

बुधो मनसि विद्यायां बुद्धौ हिबुकवेश्मनि ॥ लोभे
शिल्पे च गानादिप्रिये स्वे लाभरिःफयोः ॥ १२ ॥

टीका—अथ बुधविचारमाह—बुधेति । मनसि विद्यायां बुद्धौ हिबुके चतुर्थस्थानविचारे वेश्मनि गृहे लाभे शिल्पे गानादिप्रिये स्वे धने लाभे भावे रिःफे च फलदः स्यात् ॥ १२ ॥

भाषा—अब बुध मानसिक विचार विद्या चतुर्थभाव गृह लाभ शिल्प गानादिक विचार धन ग्यारहवां भाव व्यय यह पदार्थोंका फल देता है ॥ १२ ॥

गुरुर्धर्मे च तपसि त्रित्रिकोणे त्रिकोणके ॥ आज्ञायां
च सुते हानौ कारागृहनिवेशने ॥ १३ ॥ अभिशापे
तथा व्याधौ स्वे कल्पे मूर्तिवेश्मसु ॥ विद्याबुद्धिसुखे
भावे शांत्यादिषु फलप्रदः ॥ १४ ॥

टीका—अथ गुरुविचारमाह—गुरुरितिद्वाभ्याम् । धर्मे तपसि त्रित्रिकोणे नवमर्क्षे त्रिकोणे पंचमनवमस्थानयोः आज्ञायां सुते हानौ कारागृहनिवेशने अभिशापे प्रमादे व्याधौ स्वे कल्पे मूर्तौ वेश्मनि गृहे विद्यायां बुद्धौ सुखे भावे चतुर्थभावे शांत्यादिषु शांतिपुष्ट्यादिषु च फलप्रदः ॥ १३ ॥ १४ ॥

भाषा–अब गुरु धर्म तप नवम पञ्चमभाव भाव आज्ञा पुत्र हानि कारागृहप्रवेश अभिशाप व्याधि स्वकल्प मूर्ति गृह विद्या चतुर्थभाव शांति पुष्ट्यादि कर्म यह पदार्थोंका फल देता है ॥ १३ ॥ १४ ॥

कामान्यस्त्रीविवाहेषु गीतनृत्यप्रियादिषु ॥ सुखे वेश्मनि
दुश्चिक्ये स्वे कुटुंबे च वेश्मनि ॥ १५ ॥
आज्ञाक्रियातपोभाग्ये लाभायव्ययहानिषु ॥
वदान्यत्वे दयायां च भार्गवः फलदः सदा ॥
॥ १६ ॥ शनिर्मृतौ व्यये रिःफे दुश्चिक्ये क्षतचेतसि॥सहजे च सहे भावे बधने फलदो भवेत् १७॥

टीका–अथ शुक्रविचारमाह–कामेत्यादिद्वाभ्याम् । कामे अन्यस्त्रियां तत्संग इत्यर्थः । विवाहे गीते नृत्ये प्रिये सुखे वेश्मनि गृहे दुश्चिक्ये भावे स्वे धने कुटुंबे भावे वेश्मनि भावे आज्ञायां क्रियायां तपसि तपस्यायां भाग्ये लाभे भावे आये व्यये हानौ नाशे वदान्यत्वे दातृत्वे दयायां भार्गवः शुक्रः सदा फलद इत्यन्वयः ॥ १५ ॥ ॥ १६ ॥ अथ शनिफलमाह–शनिरिति । शनिः मृतौ व्यये नाशे रिःफे भावे दुश्चिक्ये भावे क्षते चेतसि चित्ते एकवचनं समाहारद्योतकं सहजे बंधौ सहे तृतीयभावे बंधने च फलदो भवेदिति । एवं विचारस्तत्तद्ग्रहैः फलविचारे तथा तत्तद्ग्रहेभ्योऽपि तत्तद्भावसकाशादवगन्तव्यः ॥ १७ ॥

भाषा–अब शुक्र काम अन्यस्त्रीसमागम विवाह गायन नृत्य प्रिय सुख गृह तृतीयभाव धन द्वितीयभाव चतुर्थभाव आज्ञा क्रिया तप भाग्य लाभ ग्यारहवां भाव व्यय हानि दातृत्व दया यह पदार्थोंका फल देता है ॥ १५ ॥ १६ ॥ मृत्यु नाश व्ययभाव तृतीयभाव क्षत चित्त सहजभाव बंधु बंधन यह पदार्थोंका फल देता है ॥ १७ ॥

कालहोराद्दकाणेशाः क्षेत्रार्कनवभागपाः ॥ सप्तांश
त्रिंशदंशेशा होरेशश्चाष्टमो भवेत् ॥ १८ ॥
क्रमादावृत्तितः प्रोक्ता बलिष्ठः पूर्वतो यथा ॥
सूर्यादयो ग्रहा लग्नपतिश्चावृत्तितः क्रमात् ॥ १९ ॥

इति श्रीमद्बृहत्पाराशरहोरायामुत्तरभागे लोकयात्रायां
ग्रहभावफलविचारे नवमोऽध्यायः ॥ ९ ॥

टीका-अथोक्तफलविचारः । कालहोरेशाद्यष्टभिर्बलिष्ठपूर्वकैर्ग्रहैः कर्तव्य इत्याह-कालेति सार्धेन । कालहोरौ होरे विषमेऽर्कंद्वोः समे राशौ चंद्रतीक्ष्णांश्वोरित्युक्ताः तदाशाः हकाणेशाः हकाणाः द्रेष्काणाः प्रथमपंचमनवमपानामित्युक्ताः तदीशाः क्षेत्रेशाः स्थानपतयः " भेशा मंशुबुचंरबुशुमंगुशः शोगुः " इत्युक्ताः अनर्कभागपाः स्वतो द्वादशांशा इत्युक्ता द्वादशांशपतयः नवभागपाः अजमकरतुलाकुलीराद्याः इत्युक्ता अधिपा सप्तांशेशाः " सप्तांशपास्त्वोजगृहे गणनीया निजेशतः । युग्मराशौ तु विज्ञेयाः सप्तमर्क्षादिनायकाः" इत्युक्ताः त्रिंशांशेशाः कुजयमजीवज्ञसिताः पंचेन्द्रियवसुमुनींद्रियांशानां विषमेषु समर्क्षेषूत्क्रमेण त्रिंशांशका ज्ञेया इत्युक्ताः होरेशाः होरा लग्नं तस्याधिपाः प्रागुक्ताः एतेषु यो बलिष्ठः फलदः पूर्वं यथाकालहोराद्यष्टपतीनां मध्ये बलिष्ठस्य प्रथमावृत्त्या फलं ज्ञेयम् । ततस्तदल्पबलस्य तृतीयावृत्त्या फलं ज्ञेयमित्याद्यष्टावृत्तिभिरष्टानां क्रमात्फलकालो ज्ञेय इति दिक् ॥ १८ ॥ अथ प्रकारांतरेणोक्तग्रहफलविचारमाह-सूर्यादय इति । अथवा अन्यरीतिः यथा सूर्यादयः सप्त ग्रहाः लग्नपतिश्चाष्टमः । तेषां मध्ये यो बलिष्ठः स पूर्वावृत्त्या फलदः इत क्रमादष्टावृत्तितः फलविचार इति ॥ १९ ॥

एवं गणेशसंतुष्ट्यै नवमाध्यायके कृता ॥
टीका शिशूपकृतये शोधनीया मनीषिभिः ॥१॥

इति श्रीमद्बृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्कन्वयवे० श्रीधरेण विरचितायां सुबोधिनीटीकायां नवमोऽध्यायः ॥ ९ ॥

भाषा-अब यह पूर्वोक्त फलोंका विचार कहते हैं. काल होरेश द्रेष्काणेश क्षेत्राधीश द्वादशांशेश नवमांशेश सप्तांशेश त्रिंशांशेश होरेश यह क्रमसे गणनाक्रम कहा एकएकसे आगे आगे बलवान् हैं ॥ १८ ॥ सूर्यादि सात ग्रह अष्टम लग्नपति यह आठमें जो बलिष्ठ वो प्रथम फल देनेवाला जानना. आठ बखत पुनः पुनः वारंवार फल विचार कहना ॥ १९ ॥

इति बृ० भाषाटीकायां नवमोऽध्यायः ॥ ९ ॥

वक्ष्येहमथ दायोत्थं नृणामायुः परं मुने ॥ पैंड्यो द्वादशधा प्रोक्तो ध्रुवरश्मिसमुद्भवौ ॥ १ ॥ अंशकाष्टकवर्गोत्थौ प्रत्येकं तु चतुर्विधम् ॥ विषयोक्तौ द्विधा प्रोक्तौ नक्षत्रांशकसंभवौ ॥ २ ॥

टीका-श्रीगणेशपदे ध्यात्वा दशमाध्यायके मया ॥ विरच्यतेऽथ टीकेयं यथामति सुबोधिनी ॥ १ ॥ अथास्मिन्दशमेऽध्याये त्वायुर्दायं व्यनक्ति हि ॥ ग्रहाष्टकाद्यनेकैस्तु प्रकारैः श्रीपराशरः ॥ २ ॥ अथ श्रीमहर्षिः पराशरः भगवान् शिष्याय परमायुः कथयन् पिंडांशकादि द्वात्रिंशद्भेदविचारेणास्मिन् दशमाध्याये उपदेष्टुं प्रतिजानीते तत्र तावदादौ तद्भेदान् प्रकाशयति-वक्ष्य इत्यादिसार्धद्वयेन । हे मुने मैत्रेय ! दायोत्थं दायः हरणं रश्मिध्रुवादिना ग्रहेभ्यः उक्तरीत्या यद्धरणं स दायः "दायः सोल्लुंठभाषणे ॥ विभक्तव्यपितृद्रव्ये तथा हरणदानयोः" इति मेदिनी । दायादुत्थम् उत्पन्नं दायो-

त्थं नृणां मनुष्याणां परमायुः परमत्यंतमायुः । अथानंतरमहं वक्ष्ये तवेति शेषः । तमेव दायं विभजति पैंड्यो द्वादशधा पिंडायुः द्वादशप्रकारकः (१२) प्रोक्तः ध्रुवरश्मिसमुद्भवौ अंशकाष्टकवर्गोत्थौ च प्रत्येकं तु चतुर्विधो नाम ध्रुवोद्भवः ४ रश्म्युद्भवः ४ अंशोद्भवः ४ अष्टवर्गोद्भवश्च ४ एते चत्वारश्चतुर्विधा इत्यर्थः। विषयोक्तौ विषयशब्देन कथितौ नक्षत्रांशकसंभवौ प्रत्येकं द्विधा प्रोक्तौ नक्षत्रसमुद्भवो द्विप्रकारकः (२) अंशसमुद्भवो द्विप्रकारक इत्यर्थः । एवं प्रकारेण नृणामिह परमायुः द्वात्रिंशद्भेदभिन्नं द्वात्रिंशत्संख्याकैर्भेदैः भिन्नं विभक्तं स्यादिति ॥ १ ॥ २ ॥

भाषा–अब आयुर्दायविभागका निर्णय कहते हैं. हे मैत्रेय ! अब तुम्हारेको आयुष्यका निर्णय कहता हूं, इसमें प्रथम पैंड्यायुर्दाय कहते हैं. पैंड्यायुर्दाय बारह प्रकारका है और ध्रुवायु इसका नामांतर निसर्गायु कहते हैं. रश्म्यायु १ इसका नामांतर स्वरांशआयु कहते हैं. अंशायु १ अष्टकवर्गायु १ ऐसे चार भेद हैं. चारोंके चार चार भेद हैं. नक्षत्रायु अंशायु १ इसका नामांतर कालचक्रायु कहते हैं. इनके दो दो भेद हैं यह सब मिलायके ३२ भेद होते हैं ॥ १ ॥ २ ॥

द्वात्रिंशद्भेदभिन्नं स्यात्परमायुर्नृणामिह ॥ अतिधृतिरर्कस्येन्दोस्तत्त्वानि भूमिसुतस्य पंचदश ॥ ३ ॥ द्वादश बुधस्य च गुरोस्तिथिः कवेर्मूर्छना नखाश्चार्कैः ॥ परमोच्चे नीचेऽर्धं परेषु भावेषु वा तथा प्रोक्ताः ॥ ४ ॥ अनुपातः कर्तव्यस्त्वंतः संस्थेषु खेटेषु ॥ खखभूमेः खयुग्मंद्रोः स्वांशाः पूर्ववत् कृतौ च विज्ञेयौ ॥ ५ ॥

टीका–अथ पिंडायुर्ध्रुवांकानाह–अतिधृतिरित्यादिपंचमश्लोकपर्यन्तम् । अर्कस्य रवेः अतिधृतिः १९ इंद्राश्चंद्रस्य तत्त्वानि २५ भूमिसुतस्य भौमस्य पंचदश १५ बुधस्य च द्वादश १२ गुरोः तिथिः १५, कवेः शुक्रस्य मूर्छनाः २१, आर्केः शनेः नखाः २० एते ध्रुवांकाः रव्यादीनां परमोच्चे ज्ञेयाः । नीचे परमनीचे तु अर्धं उक्तध्रुवांकदलं वा इति निश्चयेन परेषु अन्येषु संस्थेषु अन्तरखेटेषु नीचोच्चमध्यस्थेषु ग्रहेषु अनुपातः कर्तव्यः । उक्तांकाः त्रैराशिकेन ग्राह्या इत्यर्थः एते पूर्ववत्कृतौ पूर्वोक्तावित्यर्थः । खखभूमेः १०० शतवर्षायुर्मानप्रकारस्य खयुग्मेंद्रोः १२० विंशत्यधिकशतवर्षायुर्मानप्रकारस्य च विज्ञेयौ सप्तग्रहाणामपि पूर्वोक्तायुर्ध्रुवांकाः द्विप्रकारस्याप्यायुर्मानस्य ज्ञेया इत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥

भाषा–अब पिंडायुके ध्रुवांक कहते हैं. सूर्यके १९, चं. २५, मं. १५, बु. १२, गुं. १५, शु. २१, शनिके २०, यह ध्रुवांक परमोच्चके जानना. नीचके अर्ध लेना. और त्रैराशिकके भेदसे लेना. यह भेद शतायुका और एकसौ बीस वर्षका आयुष्यका प्रमाण जानना ॥ ३ ॥ ४ ॥ ५ ॥

कृतिरेको यमौ रत्नमष्टादश नखाः क्रमात् ॥ सैकतानामिनादीनां
दाये नैसर्गिके स्मृतम् ॥ ६ ॥ षोडश
विंशतिरेको नवाष्टनवपंचाविंशतिः क्रमशः ॥ षड्विंशतिस्तथोच्चे नीचे चार्धं त्विमेऽथ इतरे वा ॥ ७ ॥

टीका–अथ ध्रुवायुर्ध्रुवांकानाह–कृतिरिति । रवेः कृतिः २०, चंद्रस्य एकः १ भौमस्य यमौ २, बुधस्य रत्नं ९, गुरोः अष्टादश १८, शुक्रस्य नखाः २०, शनेः सैकतानं ५० एवं इनादीनां रव्यादीनां नैसर्गिके स्वाभाविकायुर्दाये स्मृतं उक्तं अनुक्रमसंबंधत्वादि-

दमेव ध्रुवायुर्दाये ग्राह्यमिति ध्वनितोऽर्थः ॥ ६ ॥ अथ रश्म्यायुर्दायध्रुवांकानाह-षोडशेति । रवेः षोडश १६, इंदोः २० विंशतिः, भौमस्म एकः १, बुधस्य नव ९, गुरोः ८ अष्ट, शुक्रस्य नव ९, शनेः पंचविंशतिः २५, षड्विंशतिर्वा २६ इमे तु उच्चे ज्ञेयाः नीचे तु अर्धं उक्तांकार्धाः इतरे नीचोच्चमध्ये तु अनुपातः कर्तव्य इत्यार्थिकं ज्ञेयम् ॥ ७ ॥

भाषा-अब ध्रुवायुर्दायके ध्रुवांक कहते हैं. सूर्यके २०, चं १, मं. २ बु. ९, गु. १८, शु. २०, शनिके ५०, यह सूर्यादिकोंका निसर्गायुर्दायका स्वाभाविकायुर्दाय कहा ॥ ६ ॥ अब रश्म्यायुर्दायके ध्रुवांक कहते हैं. सूर्य १६, चं. २०, मं. १, बु. ९, गु. ८, शु. ९, शनि २५, अथवा २६, यह ध्रुवांक उच्च ग्रहके जानना. नीच राशिके ग्रह होवें तो अर्ध कहेहैं. दूसरे जो हैं उनका अनुपात करना ॥ ७ ॥

कलीकृतं ग्रहं व्योमखाब्धिनेत्रावशेषितम् ॥ शतद्व-
येनाभिभजेदब्दमासादयः क्रमात् ॥ ८ ॥

टीका--एवं ध्रुवांकानुक्त्वा पिंडध्रुवरश्मिसंज्ञकानां तेषां वर्षमासाद्यायुरुत्पादनप्रकारमाह-कलीकृतमिति सार्धेन । ग्रहं रव्यादिं राश्यादिवर्तमानं कलीकृतं कलारूपं कृत्वा खखाब्धिनेत्राऽवशेषितं चतुःशताधिकसहस्रद्वयेन २४०० चतुर्विंशति संख्याकांकेनेत्यर्थः । अवशेषितं तष्टं शतद्वयेन २०० अभिभजेत् भागं गृहीत्वा शेषादवशिष्टात् सूर्यादिगुणितात् सूर्यादीनाम् उक्तत्रिप्रकारान्यतमध्रुवांकविवक्षितायुर्विहितसूर्यादिध्रुवांकैः गुणितात् पुनः शतद्वयेन भागं गृहीत्वा प्राग्लब्धभागं वर्धयेत् युंज्यादित्यर्थः । तानि अब्दानि भवेयुः पुनः शेषं पुनः शेषं द्वादशगुणितं द्विशतभक्तं मासाः स्युः त्रिंशद्गुणितं द्विशतभक्तं दिनानि स्युः पुनः शेषं षष्टिगुणितं द्विशतभक्तं घटिकाः

पुनः शेषं तथा कृतं पलानि स्युरिति । अथास्योदाहरणम् । रविः १०।४।१४।२२ अयं राश्यादिः अस्य कलाः १८। २५४।२२ इमाः चतुर्विंशतिशतैः २४०० तष्टाः १४५४।२२ अवशिष्टाः इमाः शतद्वय २०० विभाजिताः तल्लब्धांकः ७ शिष्टांकः ५४।२२ अयं पिंडायुरुक्तरविध्रुवांकैः १९ गुणितः १०३२। ५८ अयं शतद्वयविभाजितः लब्धं ५ एतत् पूर्वलब्धांके नियुक्तं जातं १२ अब्दानि जातानि अवशिष्टांकः ३२।५८ द्वादशांकैर्गुणितो जातः ३९५।३६ शतद्वयविभाजितः लब्धं १ जातोऽयं मासांकः पुनः शेषं १९५।३६ त्रिंशद्गुणिताः ५८६८ शतद्वयविभाजनेन लब्धम् २९ जाता दिवसाः पुनः शेषं ६८ षष्टिघ्नं ४०८० शतद्वयभागलब्धं २० जाता घटिकाः पुनः शेषं ८० षष्टिघ्नं ४८०० शतद्वयभागेन लब्धं २४ पलानि एवं पिंडायुर्दाये जातः सूर्यायुर्दायः १२।१।२९।२०।२४ एवं चंद्रादीनां ज्ञातव्यः एवं प्रकारेणैव ध्रुवान् रश्म्यायुर्दायं बुध्यात् ॥ ८ ॥

मध्यमापिंडायुर्ध्रुवक्रमाः.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
१२	१९	१२	२	१७	८	२०	९३
१	३	९	०	८	७	९	४
२९	१७	१९	१७	६	२२	०	२३
२०	४४	४८	३८	३	५५	०	३१
२४	३६	०	२४	३६	१३	०	२

मध्यमध्रुवायुर्नैसर्गायुर्ध्रुवक्रम.							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
१२	७	११	१	२२	८	३५	९९
५	७	२	६	६	५	५	३
७	२३	२६	१३	२६	२०	१५	११
१२	२	३८	१२	९	२४	०	३९
०	२४	२४	४८	१८	०	०	५४

भाषा–अब ऊपर लिखी हुई तीनों आयुर्दायकों वर्षादिक लानेकी रीति कहते हैं सूर्यको कलात्मक करके उसमें यह अंकका २४०० भाग लेके दोसौसे भाग लेना. लब्ध जो वर्ष आवे उसको जुदा मांडके शेषांकको अपने ध्रुवांकसे गुणन करके दोसौसे भाग लेके वर्षादिक फल लेना पूर्ववर्षमें जोड देना सो मध्य-

म०सत्तायुर्नामिस्वरांशायुर्ध्रुवक्र०							
सू.	चं.	मं.	बु.	गु.	शु.	श.	यो.
११	१९	१२	१	१५	६	२३	९१
४	११	५	६	७	६	८	१
[illegible]	१०	९	१३	१	२२	३	६
५५	४८	५०	१३	४०	४०	०	५९
३६	०	२४	४८	४८	४८	०	३४

मायु होवे, इसका उदाहरण टीकामें है और चक्रभी दिखाया है. ये क्रमसे पिंडायु ध्रुवायु रश्म्यायु लाना ॥ ८ ॥

सूर्यादिगुणिताच्छेषाद्वृद्धिं कुर्याद्यथोत्तरम् ॥ स्वोच्चहीन ग्रहं ज्ञात्वा कर्कादि च मृगादि च ॥९॥ गृहीत्वा तु भुजं कोटिं कृत्वा लिप्तीकृतं तु तम् ॥हत्वा नवांशदायेन भजेद्भत्रयलिप्तिभिः ॥ १० ॥ वत्सराद्या भवंत्येते वर्जयेन्मकरादिके ॥ केन्द्रे नवांशदाये स्वे त्रिघ्ने कर्कटकादिके ॥ ११ ॥

टीका-अथ नवांशायुर्दायोत्पादनप्रकारमाह-स्वोच्चेत्यादिसपादैकादशश्लोकपर्यन्तम् । ग्रहं रव्यादिं विवक्षितं स्वोच्चहीनं स्वकीयोच्चेन हीनं वर्जितं कृत्वा तत्केंद्रं भवति तत्कर्कादि कर्कसिंहकन्यातुलावृश्चिकधनुरन्यतमराशिवर्तमानं मृगादि मकरकुंभमीनमेषवृषमिथुनान्यतमराशिवर्तमानं वा ज्ञात्वा तस्य भुजं गृहीत्वा नाम त्रिभोनं कृत्वेत्यर्थः । तस्य कोटिं कृत्वा प्राप्तभुजो राशित्रये वर्जयित्वेत्यर्थः । तथाभूतं तं तं कोटिं लिप्तीकृतं गणितरीत्या कलास्थाने संपादितं तं नवांशदायेन नवांशदायस्तु पंचमूच्छैत्यादिना वक्ष्यमाणः तेन हत्वा गुणयित्वा भत्रयलिप्तिभिः टाबंतलिप्ताशब्दस्य इकारांतत्वमार्षं छंदोभंगभिया वेति ज्ञेयम् । राशित्रयलिप्ताभिः ५४०० आभिः भजेत् तेन लब्धांका वत्सराद्या भवंति । एते वत्सराद्याः प्रागानीतकेन्द्रे मकरादिके मकराद्यन्यतमषड्राशिस्थे सति त्रिघ्ने त्रिगुणिते स्वे स्वकीये नवांशदाये वक्ष्यमाणनवांशध्रुवांके वर्जयेदूनयेत् । अथ तस्मिन्केंद्रकर्कटकादिके कर्काद्यन्यतमराशिस्थे सति तस्मिन् ध्रुवांके अर्धीकृते अर्धावशेषिते युंज्यात् मेलयेत् तेन

स्पष्टनवांशायुर्दायो भवतीति । अथास्योदाहरणम् । रविः १०।४।१४ २२ अस्योच्चं ०।१० अनेन हीनः ९।२४।१४।२२ जातमेतद्रविकेंद्रं मकरादि अस्य भुजः २।५।४५।३८ अस्य कोटिः ०।२४।१४।२२ अस्य कलाः १४५४।२२ एताः नवांशध्रुवांकेन ५ अनेन गुणिताः ७२७१।५०। एताः भत्रयलिप्ताभिः ५४०० आभिः भाजिताः लब्धं १ एतन्नवांशायुर्वर्षं अवशिष्टम् । १७७१ । ५० द्वादशगुणितं २१२६२ एतत् ५४०० आभिर्भाजितं लब्धं ३ एते मासाः अवशिष्टं ५०६२ एतत्रिंशघ्नम् १५१८६० एतत् उपरिष्टभाजककलाभिर्भक्तं लब्धं २८ एते दिवसाः शेषं ६६० षष्टिघ्नं३९६०० उपरिष्टभाजकेन भक्तं लब्धं ७ एता घटिकाः शेषं १८०० एतत्षष्टिघ्नं १०८०० भाजकेन भक्तं लब्धं २० एतानि पलानि एवं संपादितो वर्षादिसमूहांकः १।३। २८ । ७ । २० अयं मकरादिकेन्द्रत्वात् मूलध्रुवांकः ५ त्रिगुणितः १५ अस्मिन्वर्जयित्वा १३।८।१।५२।४० जातोऽयं स्पष्टरविनवांशायुर्दायः एवं चंद्रादिनवांशायुर्दायो बोध्यः इति ॥ ९ ॥ १० ॥ ११॥

भाषा–अब नवांशायुर्दाय कहते हैं. स्पष्ट ग्रहको नीचमें हीन करके उसका भुज करके पीछे कोटि करके कला करना पीछे नवांशके ध्रुवांकसे गुणन करके इसका ५४०० से भाग लेना. लब्ध आवे वो वर्ष जानना. बाकी जो शेष है उसको बारहसे गुणन करके इस ५४०० से भाग लेना लब्ध मास जानना. ऐसा दिन घटी पल लाना. इसको मकरादि कर्कादि केंद्र देखके ऋण धन करना. ध्रुवांकोंमें कैसा. जो मकरादि केंद्र होवे तो ध्रुवांकको तीन गुणा करके पूर्व जो लाये वर्षादिक लब्ध उसको घटा देना. और कर्कादि केंद्र होवे तो ध्रुवांकोंको अर्ध करके जोड देना. सो नवमांशमध्यायु भया ॥९॥१०॥११॥

मध्यम अंशायुश्चक्रम्.

चं.	मं.	बु.	गु.	शु.	श.	या.
१९	१८	७	१०	२५	११	११६
३	७	०	५	६	५	०
०	१	२९	२३	४	२३	१६
४४	५३	९	३२	७	२०	९
४८	५२	२४	०	४	२	८

युंज्यादर्धीकृते तस्मिन् प्रक्रमानुगतो मतः ॥ द्विघ्ने
त्वपनयेत्तस्मिन्युंज्यादेव दलीकृते ॥ १२ ॥

टीका-अथ प्रक्रमानुगतायुर्दायमुत्पादयति-प्रक्रमेत्यादिसपादार्धेन । प्रक्रमानुगतो मतः प्रागुक्तनवांशायुर्दाय एव प्रकमानुगतसंज्ञकः तत्र विशेषस्तु मकराद्यन्यतमषड्राशिस्थे केन्द्रे साति मूलध्रुवांको द्विघ्नः कार्यः न त्रिघ्नः कर्कादिकेन्द्रे साति दलीकृते युंज्यादिति प्राग्वत् अन्यत्सर्वं समानामीत ॥ १२ ॥

भाषा--अब प्रक्रमानुगतायुर्दाय कहते हैं, पूर्व जो नवांशायुर्दायका प्रकार बताया उसीको मकरादि छः राशिमें होवे तो मूल ध्रवांकको दुगुना करके हीन करना. कर्कादि छः राशिमें होवे तो मूल ध्रुवांकको अर्ध करके जोड देना आयुर्दाय भया ॥ १२ ॥

निक्षिप्याष्टकवर्गं तु राशिचक्रे तु पूर्ववत् ॥ त्रिकोणै-
कपशुद्धिं च कृत्वा तु गुणयेद्गुणैः ॥ १३ ॥ खवह्नि-
भक्तमन्दाद्याः क्रमाद्भिन्नाष्टवर्गजाः ॥ एवं कृत्वा तु
संयोज्य भातमन्दादयः स्मृताः ॥ १४ ॥ कृत्वा
करणैरेवं स्वात्पन्नौ दायसंज्ञितौ ॥ प्रत्येकं भिन्नदा-
योत्था एवं त्रिंशाद्धिदा मताः ॥ १५ ॥

टीका-अथाष्टकवर्गायुर्दायोत्पादनरीतिमाह-निक्षिप्येत्यादिपंचदशश्लोकपर्यंतम् । पूर्ववत् पूर्वं पंचमाध्याये उक्तवत् राशिचक्रे राशिकुंडलिन्यां अष्टकवर्गं स्थानकरणरूपं निक्षिप्य उद्धृत्य त्रिकोणैकपशुद्धिं त्रिकोणशोधनं एकाधिपत्यशोधनं च पूर्वोक्तरीत्या कृत्वा तेषां भावानां गुणैः प्रथमाध्यायोक्तवर्गणारूपैः पृथक् गुणयेत् तथा प्रागुक्तमनांकगुणकेन च गुणयेत् ततः खवह्निभक्तं खवह्निभिः

३० एभिर्भक्तं यत्फलं तत् अब्दरूपं शेषं द्वादशाद गुणितं त्रिंशद्भक्तं मासादि स्यात् एवं क्रमात् ।भिन्नाष्टकवर्गजाः भिन्नाष्टवर्गसमुद्भूताः अब्दाद्या भवति । एवं प्रकारेण तान् भिन्नान् कृत्वा विधाय ततः संयोज्य एकीकृत्य भात सप्तविंशतिभागलब्धं फलम् अब्दादयः सामुदायिकाष्टकवर्गीयवर्षादयः स्मृताः उक्ता इत्यर्थः । एवं रेखाशोधनायुर्दायवत् करणदैरपि करणत्रिकोणैकाधिपत्यशोधनाद्यायुर्दायं संपादयेदित्यर्थः । एवं स्वोत्पन्नौ स्वयोर्दायसंज्ञितौ भवतः नामरेखोत्पन्नो रेखाष्टवर्गायुर्दायसंज्ञकः करणोत्पन्नः करणायुर्दायसंज्ञक इत्यर्थः । प्रत्येकं प्रतिग्रहं भिन्नदायेन उत्पन्नाः त्रिंशद्भिदाः त्रिंशत्प्रकारका मताः तदित्थं पिंडायुर्दायः भिन्नसप्तग्रहोत्पन्नः सप्तकारकः ७ ध्रुवायुर्दायः भिन्नसप्तग्रहोत्पन्नः सप्तप्रकारकः ७ रश्म्यायुर्दायः भिन्नसप्तग्रहोत्पन्नः सप्तप्रकारकः ७ अंशायुर्दायः भिन्नसप्तग्रहोत्पन्नः सप्तप्रकारकः ७ रेखाष्टकवर्गोत्थः १ करणाष्टकवर्गोत्थश्चे १ त्येवं त्रिंशद्भेदभिन्न इति तात्पर्यम् ॥ १३ ॥ १४ ॥ १५ ॥

भाषा—अब अष्टकवर्गायु कहते हैं । प्रथम अष्टकवर्ग सिद्ध करके उसका त्रिकोण शोधन करके एकाधिपत्य शोधन करके वो संख्याको राशिगुणकसे गुणन करके उसका पिंड लाना। पिंडको ३० तीससे भाग लेना वर्षादिक भिन्नाष्टक वर्गायु भया । अब समुदायाष्टकायुर्दाय कहते हैं । इस आयुर्दायकी रीति ऊपर बताई है या रीतिसे लाना परंतु विशेष इतना है कि भाग, तीसके ठिकाने २७ का देना इसी तरहसे करणायुभी जानना इस रीतिसे यह दशामें तीस ३० भेद बताये हैं सो टीकामें स्पष्ट हैं ॥ १३॥१४॥१५॥

पंच मूर्च्छा सप्त रत्नं दश षोडश वारिधिः ॥ नवांशा
विधितः प्रोक्ता अत्यात्प्रोक्तास्तु भादितः ॥ १६ ॥

टीका-अथ नवांशायुर्दायं ध्रुवांककथनसहितमाह-पंचेति । अथ नवांशायुर्दाये ध्रुवांकाः रवेः पंच ५, इंदोः मूर्च्छा २१, भौमस्य सप्त ७, बुधस्य रत्नं ९, गुरोः दश १०, शुक्रस्य षोडश १६, शनेः वारिधिः ४ एते ध्रुवांकाः । नवांशगणनाप्रकारमाह । अंत्यात् प्राप्तनवांशतो नवमनवांशमारभ्य विलोमतः आदितः प्राप्तनवांशमारभ्य नवमनवांशांतं अनुलोमतः नवांशविधितः पूर्वार्धोक्तविधिना नरस्य जन्मकाले वा प्रश्नकाले यदंशक इत्यादि एकोनपंचाशदध्याये क्रमो ज्ञेयः ॥ १६ ॥

भाषा-अब नवांशायुर्दायके ध्रुवांक कहते हैं, इसको काल चक्रभी कहते हैं. सूर्यका ध्रुवांक ५, चंद्रका २१, मं. ७, बु. ९, गु. १०, शुक्र १६, शनि ४ यह सूर्यादि ग्रहोंके ध्रुवांक हैं ॥ १६ ॥

रवींद्वाराहिजीवार्किबुधकेतुसिताः क्रमात् ॥ आग्नेया-
द्भगणेशाः स्युः स्वामिनो वत्सराः क्रमात् ॥ १७ ॥
षडाशाः सप्त धृतयो नृपा एकोनविंशतिः ॥ अत्यष्टिः
सप्त च नखा उच्चे नीचेऽर्धमुच्यते ॥ १८ ॥
अस्मिंस्तु हरणं तस्मात्पूर्वस्मिंस्तु द्वयं हितम् ॥
अनयोः पापदायादावंते स्युरपमृत्यवः ॥ १९ ॥

टीका-अथ नक्षत्रायुर्दायमाह-रवीत्यादिएकोनविंशतिश्लोकपर्यन्तम् । आग्नेयात् अग्नेः इदमाग्नेयं अग्निदेवताकं "अग्निकलिभ्यां ढक् वक्तव्यः" इति ढक् । कृत्तिकाख्यं तस्मात् भगणेशाः भानां नक्षत्राणां गणः सप्तविंशतिसंख्याकसमुदायः तस्य ईशाः क्रमात्पतयः स्युः । के ते ? रवींद्वाराहिजीवार्किबुधकेतुसिताः । एतदुक्तं भवति रविः कृत्तिकापतिः इंदुः रोहिणीपतिः आरो भौमो मृगपतिरीति

क्रमेण पूर्वापर्यन्तं क्रमात् पतयः ते एव रव्यादयः पुनर्द्वितीयपर्याये उत्तरादिनवनक्षत्रेषु पतयो गणनीयाः त एव पुनरुत्तराषाढादिभरण्यंतं नव नक्षत्रपतयो भवंति स्वामिनः जात्येकवचनं तेषां स्वामिनां क्रमादायुषो वत्सराः वर्षाणि षट् रवेः, आशा दश चंद्रस्य, सप्त भौमस्य, धृतयोऽष्टादश राहोः, नृपाः षोडश गुरोः, एकोनविंशतिः शनेः, अत्यष्टिः सप्तदश बुधस्य, सप्त केतोः, नखा विंशतिः शुक्रस्येति वर्षाणि । अस्मिन्नक्षत्रेशसमूहे उच्चे सति ज्ञेयानि अस्मिन्नक्षत्रेशसमूहे नीचे सति तु तस्मात्पूर्वोक्तांकजातात् अर्धं हरणं नाश उच्यते नाशः कार्यं इत्यर्थः । अथोक्तेषु सप्तस्वप्यायुर्दायेषु शुभाशुभत्वं विभजते । पूर्वस्मिन् पैंड्यध्रुवरश्म्यंशाष्टकवर्गाणामायुर्दाये द्वयं शुभाशुभग्रहजनितफलद्वयं हितं शुभं ज्ञेयम् । अनयोः नवांशनक्षत्रायुर्दाययोस्तु पापदायादावंते पापानां रविक्षीणेंदुभौमसपापबुधशनिराहुकेतूनां यो दायः आयुर्दायः तस्य आदौ आयुर्दायारंभे अंते आयुर्दायावसाने अपमृत्यवो ज्ञेयाः अर्थात् पूर्णचंद्रबुधगुरुशुक्रायुर्दायाः शुभे इति विशेषो ज्ञेयः इति ॥ १७॥ ॥ १८ ॥ १९ ॥

भाषा--अब नक्षत्रायुर्दाय कहते हैं. उसमें ग्रहका क्रम नक्षत्रक्रम वर्षक्रम कहते हैं. कृत्तिका नक्षत्र आदि लेके तीन बखत भ्रमणसे सूर्यादि वर्षसहित ग्रह जानना. सूर्य ६, चंद्र १०, मं ७, राहु १८, गुरु १६, शनि १९ बुध १७, शुक्र २० यह ध्रुव उच्चके कहे नीचका ग्रह होवे पूर्वोक्त ध्रुवोंका अर्ध लेना बाकीकी राशिमें होवे तो अनुपातसे लेना उसमें पाप ग्रहोंका जो दाय है उसके आदि अंतमें अपमृत्यु देनेवाला है और शुभ ग्रहोंका दाय शुभ फल देता है ॥ १७ ॥ १८ ॥ १९ ॥

द्वात्रिंशद्भेदभिन्नोयमायुषो निर्णयः कृतः ॥ लोकयात्रापरिज्ञानहेतवे दायनिर्णयः॥२०॥ भावानां संप्रव-

क्ष्यामि शृणुष्व मुनिपुंगव ॥ आयुश्च परमं हत्वा स्वेन स्वेन बलेन च॥२१॥विभजेद्बलयोगेन भावानां दाय एव सः ॥ अथ वांशर्क्षदायेन वर्गेशानां बलेन तु ॥२२॥स्थानाद्यैश्च समुद्भूतःषड्विधो दाय उच्यते ॥२३॥ इति श्रीमद्बृहत्पाराशरहोराशास्त्रे आयुर्दायकथने दशमोऽध्यायः ॥ १० ॥

टीका–अस्यायुर्दायकथनस्य हेतुमाह–द्वात्रिंशदिति । अथ द्वात्रिंशद्भेदाभिन्नः आयुषो निर्णयः मया कृतः कुतः यतः अयमिति शेषः दायनिर्णयः लोकयात्रापरिज्ञानहेतवे लोकयात्रायाः परिज्ञानस्य हेतवे हेत्वर्थं भवतीति ॥ २० ॥ एवं सप्तविधमायुर्दायमुक्त्वा अष्टमं भावायुर्दायमाह–भावानामिति सार्धेन । हे मुनिपुंगव मैत्रेय ! भावानामायुर्दायं संप्रवक्ष्यामि कथयिष्यामि तं शृणुष्व परमं आयुः प्रागुक्तसप्तान्यतमविवक्षितं आयुर्गृहीत्वा स्वेन स्वेन विवक्षितभावबलेन हत्वा बलयोगेन सर्वभावबलसमूहेन विभजेत् तेन यल्लब्धं वर्षादि स एव भावानां दायो ज्ञेय इति ॥ २१ ॥ अथ प्रकारांतरेण भावायुर्दायमाह । अथवेति प्रकारांतरसूचनम् । नवांशऋक्षदायेन परमऋक्षदायेन परमायुर्दायं हत्वा वर्गेशानां षड्वर्गपतीनां बलेन भजेत् लब्धं वर्षादि भावायुर्दाय इति ॥ २२ ॥ एवमवांतरभेदेन द्वात्रिंशद्विधोपि मुख्यतया षड्विध एवेत्याह–स्थानाद्यैरित्यर्धेन। स्थानाद्यैः स्थानशब्देन भावो गृह्यते भावदायः १, नक्षत्रदायः २, नवांशदायः ३ अष्टकवर्गदायः ४, अंशदायः ५, पैंड्यदायश्चेति षट्प्रकारैः समुद्भूतः दायः अनेकविधोपि षड्विध एवं षट्प्रकारांतरगत एवेति उच्यते कथ्यते इति ॥ २३ ॥

एवं दशमकऽध्याये कृता टीका यथामति ॥ श्रीकृष्णप्रीतये सा तु संशोध्यैव मनीषिभिः ॥ १ ॥ इति श्रीमद्बृह० शास्त्रे श्रीमद्ध्यङ्कन्वयवेदशास्त्राद्यनवद्यविद्याविद्योतितदशादिङ्मंडलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचितसु० टी० आयुर्दायकथने दशमोऽध्यायः॥ १०॥

भाषा—अब आयुर्दाय कहनेका हेतु कहते हैं. मैंने लोकके सुख दुःख जाननेके हेतुसे यंह बत्तीस भेदसे आयुष्यका निर्णय कहा ॥ २० ॥ ऐसा बत्तीस भेदयुक्त जो सात प्रकारका आयुर्दाय सो कहके आगे आठवां भावायुर्दाय कहते हैं. हे मैत्रेय ! भावोंका आयुर्दाय कहता हूं. पूर्वोक्त सात आयुष्योंमेंसे कोईभी एक आयुर्दाय लेके अपने अपने भावबलसे गुणन करके सर्व भावबलसमूहसे भाग लेना लब्ध जो वर्षादि आवे वो आयुर्दाय जानना । अब प्रकारांतरसे भावायुर्दाय कहते हैं. नवांशायुर्दायसे परमायुष्यको गुणन करके षड्वर्ग पतियोंके बलसे भाग लेना लब्ध वर्षादि भावायु जानना ॥ २२ ॥ ऐसा स्थानादिक क्रमसे छः प्रकारका आयुर्दायभेद कहा ॥ २३ ॥

इति श्रीबृ० भाषाटीकायां दशमोऽध्यायः ॥ १० ॥

आरार्की वक्रिणौ मृत्युश्चान्योन्यभवनास्थितौ ॥
वेश्मषण्मृत्युरिःफस्थाः क्षीणेन्दूत्पत्तिपाष्टमाः ॥ १ ॥
अष्टमस्था ग्रहाः सर्वे पापदृष्टियुतास्तु वा ॥
भौममंदर्क्षगाश्चेत्तु शुभदृष्टिविवर्जिताः ॥ २ ॥

टीका—अथैकादशकेऽध्याये ह्रासवृद्धिविधिं मुनिः ॥ उक्तायुर्दायविषये तद्योगाद्याह विस्तरात् ॥ १ ॥ अथ भगवान् पराशरः एकादशाऽध्याये प्रागुक्तायुर्हानितद्वृद्धिमारकयोगायुर्दायादिविषया-

नुपादिशति तत्रादौ मारकयोगमाह–आरेत्यादिश्लोकद्वयेन । आरार्कौ भौमशनी वक्रिणौ संतौ अन्योन्यभवनास्थितौः अन्योन्ययोः परस्परयोः भवनवर्तमानौ चेन्मृत्युः मृत्युकारकयोगो ज्ञेयः क्षीणेन्दूत्पत्तिपाष्टपाः क्षीणेन्दुः कृष्णदशम्यादिशुक्लपंचम्यंतं वर्तमानश्चंद्रः, उत्पत्तिपः उत्पत्तेर्जन्मलग्नस्याधिपतिः, अष्टपो लग्नादष्टमभावेशश्च, एते त्रयः । वेश्मषण्मृत्युरिष्फस्थाः लग्नाच्चतुर्थषष्ठाष्टमद्वादशस्थानगताः मृत्युकारकाः । वा अथवा अष्टमस्थाः सर्वेऽपि मृत्युकारकाः । वा सर्वे ग्रहास्तु भौममंदर्क्षगा मेषवृश्चिकमकरकुंभसंस्थाः शुभदृष्टिविवर्जिताः शुभग्रहदृष्टिराहिताः संतः पापदृष्टियुताः स्युस्तदाऽपि मारकयोगो ज्ञेयः इति ॥ १ ॥ २ ॥

भाषा–अब मृत्युकारक योग कहते हैं. मंगल शनि वक्री होव, परस्पर स्थानमें बैठे होवें, तो मृत्युकारक योग जानना. क्षीण चंद्र, जन्मलग्नपति, अष्टमभावेश यह तीनों ग्रह लग्नसे ४।६।८।१२स्थानोंमें होवें तो मृत्युकारक योग जानना अथवा अष्टम घरमें सब मृत्युकारक जानना, अथवा सब ग्रह मेष वृश्चिक मकर कुंभराशियोंमें बैठे होवें और शुभग्रहकी दृष्टि न होवे पापदृष्टि होवै तो मारकयोग जानना ॥ १ ॥ २ ॥

केन्द्रत्रिकोणे च शुभाश्च पापाः षष्ठे तृतीये न च
मृत्युसस्थाः॥अष्टोत्तरं जीवति वर्षमायुर्नरो गुणाढ्यो
नवतिः सुशीलः ॥ ३ ॥ लग्ने गुरौ दैत्यगुरौ चतुर्थे
बुधे सुते षष्ठगते च सूर्ये॥स्थानं च शत्रोश्च मृतिं च
हित्वा त्वन्ये स्थिताश्चेन्नवतिश्च षट् च ॥ ४ ॥

टीका–अथायुर्योगमाह–केन्द्रेति । शुभाः शुभग्रहाः केन्द्रत्रिकोण ४।७।१०।५।९ स्थाने वर्तमानाः अथवा पापाः पापग्रहाः षष्ठे तृतीये भावे स्थिताः तदा मृत्युसंस्थाः अष्टमस्थाः केपि ग्रहा न

चेत् नरः स सुशीलः सुस्वभावः गुणाढ्यः सुगुणसंपन्नः सन् क्रमेण अष्टोत्तरं वर्षम् जात्येकवचनं क्रियाविशेषणं वा प्रथमयोगे नवतिः ९० द्वितीययोगे क्रमाज्जीवति इति ॥ ३ ॥ अथ पुनर्योगांतरमाह लग्नेति। लग्ने गुरौ सति चतुर्थे दैत्यगुरौ सति सुते पंचमभावे बुधे सति षष्ठगते सूर्ये च सति नवतिः नवति ९० वर्षाणि आयुः स्यात् अन्ये गुरुशुक्रबुधारविरहिताः चंद्रभौमशनय इत्यर्थः शत्रोः स्थानं स्वशत्रुक्षेत्रं मृतिमष्टमभावं च हित्वा अन्यस्थानवर्तिनश्चेत् तत् ९६ आयुर्मानं बोध्यम् ॥ ४ ॥

भाषा—अब आयुर्दाय योग कहते हैं शुभ ग्रह केन्द्रत्रिकोणमें होवे तो १०८ वर्षका आयुष्य, पापग्रह छठे तीसरे होवे आठवेंमें कोई न होवे तो ९० वर्षका आयुष्य जानना. और सुशील सुस्वभाव गुणसंपन्न होवे ॥ ३ ॥ और लग्नमें गुरु चौथे घरमें शुक्र, पांचवें घरमें बुध, छठे घरमें सूर्य होवे तो ९० वर्षका आयुर्मान जानना. और चंद्र, मंगल, शनि, यह तीन ग्रह अपनी अपनी शत्रुराशिको और अष्टम भावको छोडके बाकी कोईभी स्थानमें होवे तो ९६ वर्षका आयुष्य जानना ॥ ४ ॥

सुखादिकेंद्रेषु गुरुः स्थितश्चेत्तत्पंचमे ज्ञे तु भृगौ तु षष्ठे ॥ षडुत्तरा सप्ततिरष्टयुक्ता त्वशीतिरेकोत्तरतः प्रदिष्टा ॥ ५ ॥

टीका—अथ गुरुबुधशुक्रयोगायुर्मानमाह—सुखादीति । सुखादिकेन्द्रेषु चतुर्थसप्तमदशमभावेषु । लग्नव्यतिरिक्तेष्वित्यर्थः । लग्नस्थगुरुयोगफलस्य पूर्वश्लोके कथितत्वादिति भावः। गुरुः स्थितश्चेत्तर्हि तस्मात्पंचमगो बुधः तस्माद्गुरोः षष्ठो भृगुश्च यदि स्यात्तर्हि क्रमात् चतुर्थकेन्द्रस्थगुरोः षडुत्तरा सप्ततिः षट्सप्ततिः ७६ आयुर्मानं तथा सप्तमकेन्द्रस्थगुरोः उक्तस्थानगतयोर्बुधशुक्रयोः सतोः अष्टयुक्ता

अशीतिः आयुर्मानं तथा दशमकेन्द्रस्थगुरोः उक्तस्थानस्थबुधशुक्रयोगे एकोत्तरतः अशीतिः एकाशीति ८१ रित्यर्थः । आयुर्माने संख्या प्रदिष्टेति ॥ ५ ॥

भाषा–अथवा लग्नसे चौथे घरमें गुरु होवे, गुरुसे पांचवें घरमें बुध, छठे घरमें शुक्र होवे तो ७६ वर्षका आयुष्य जानना, अथवा लग्नसे सातवें घरमें गुरु होवे, गुरुसे ५ बुध, छठे शुक्र होवे तो ८८ वर्षका आयुष्य जानना. अथवा लग्नसे दशवें गुरु होवे, गुरुसे ५ वें बुध और ६ शुक्र होवे तो ८१ वर्षका आयुष्य जानना. ॥ ५ ॥

केन्द्रादिस्थाः शतं दद्युर्नवाष्टादींश्च दिग्गुणान् ॥
मिश्रं संयुज्य दलिता अनुपातेन वत्सराः ॥ ६ ॥
शत्रुनीचसमांशेषु दिग्विधेषु न चेत्स्थिताः ॥
शवायुर्योगहीनास्तु सर्वे प्रोक्ताः कलौ युगे ॥ ७ ॥

टीका–केन्द्रादीति श्लोकद्वयेन पुनर्योगांतरमाह । केन्द्रादिस्थाः सर्वे ग्रहाः केन्द्रादिस्थाः केंद्राणि आदीनि येषां तानि पणफराणि आपोक्लिमानि च तेषु स्थिताश्चेत् क्रमात् शतं १०० नवदिग्गुणान् ९० अष्टौ दिग्गुणान् ८० आयुर्ददाति । ननु स्थानत्रये स्थानद्वये च ग्रहाणां मिश्रीभावे कियत्परिमाणकमायुरिति चेदाह । मिश्रं संयुज्य योगद्वयमिश्रणे दलम् अनुपातेन अर्थात् योगत्रयमिश्रणे त्रयं संयुज्य अनुपातेन तृतीयांशायुर्दायमानं बोध्यम् एवं दशयोगजन्यमायुर्मानं कथितम् । तत्र विशेषविचारमाह–शत्रिवति द्वाभ्याम् । दिग्विधेषु दशप्रकारेषु ते दश प्रकारास्तु तृतीयश्लोके १०८।९० द्विविधाः, चतुर्थश्लोके ९०।९६ द्विविधाः, पंचमश्लोके ७६।८८।८१ त्रिविधाः षष्ठश्लोके केन्द्रपणफरापोक्लिमयोगोद्भवाः १००।९०।८० एतेषु दशविधेषु ग्रहाः शत्रुनीचसमांशेषु शत्रुक्षेत्रनीचस्थानोदासी-

नक्षेत्राणां ये अंशा नवमांशास्तेषु न स्थिता न वर्तमानाश्चेदुक्तदशविधायुर्मानम् उक्तत्रयनवांशे वर्तमानाः चेद्भंगो ज्ञातव्य इति । अथ कलौ आयुरवधिमाह । सर्वे नराः कलौ युगे शतायुर्योगहीनाः शतवर्षपरिमितायुर्योगादल्पायुषो ज्ञेया इति ॥ ६ ॥ ७ ॥

भाषा—अब केंद्रादि आयुष्य कहते हैं. सब ग्रह केंद्रस्थानमें होवें तो सौ वर्ष १०० का आयुष्य, सब ग्रह पणफरमें होवें तो ९० वर्षका आयुष्य, सब ग्रह आपोक्लिममें होवें तो ८० वर्षका आयुष्य जानना और दोनों स्थानोंमें ग्रह होवें तो दोनोंका योग करके अर्ध भाग लेना. तीनों स्थानोंमें ग्रह होवें तो तीनोंका योग करके तृतीयांश आयुर्मान जानना. और शत्रु नीच तथा नवांशादि सब तरहसे दशविध जो कहा योगायु नहीं बनै तब गुणितायु जानना ॥ ६ ॥ ७ ॥

दायानां हरणं वक्ष्ये शृणुष्व मुनिपुंगव ॥ आयुर्दाये तु हरणं षड्विधं संप्रकीर्त्यते ॥ ८ ॥ व्ययादिहरणं पूर्वमस्तारिहरणे तथा ॥ क्रूरोदयस्थहरणं चंद्रयुक्ततमस्तथा ॥ ९ ॥

टीका—अथोक्तदायहरणं वक्तुं प्रतिजानीते—दायानामित्यर्धेन । हे मुनिपुंगव मैत्रेय ! दायानां पूर्वकथितानां षड्विधानामपि हरणं ह्रासं वक्ष्ये तच्छृणुष्वेत्यन्वयः । तदेवाह—आयुरित्यादिसार्धनवमश्लोकपर्यंतम् । अस्मिन्नायुर्दाये हरणं ह्रासस्तु षड्विधं वक्ष्यमाणं षट्प्रकारकं संप्रकीर्त्यते कथ्यते व्ययादिहरणं व्ययादिसप्तमानं वामचारेण वक्ष्यमाणरीत्या हरणं पूर्वं प्रथमम् १ अस्तारिहरणे अस्तगतग्रहहरणम् २ अरिक्षेत्रस्थग्रहहरणं ३ क्रूरोदयस्थहरणं लग्नगतपापहरणमित्यर्थः ४ चंद्रयुक्ततमोग्रहहरणं सचंद्रराहुहरणं ५ व्ययस्थः पापस्तु हे द्विजोत्तम ! सर्वदायं हराति ६ एवं षड्विधं भवति ॥ ८ ॥ ९ ॥

भाषा–अब पूर्वोक्त जो आयुष्य दिखाया है उसमें हानि कितनी करना सो कहते हैं. उसके छः भेद हैं. उनमें पहिला हानिका पहिला भेद बारहवें घरसे सातवें घरतक वाम मार्गसे १ अस्तंगत ग्रहका हरण २ शत्रुक्षेत्रगत ग्रहका हरण ३ क्रूरोदयस्थ ग्रहका हरण ४ चंद्रसहित राहुका हरण ५ बारहवें घरका पापग्रहका हरण ६ ऐसे छः भेद हैं ॥ ८ ॥ ९ ॥

पापो व्ययस्थो हरति सर्वदायं द्विजोत्तम ॥ अथ
द्वित्रिचतुःपंचषडंशोनं क्रमादमी ॥ १० ॥

टीका–अथ प्रथमप्रकारोक्तव्ययादिहरणप्रकारमाहै–पापो व्ययस्थ इत्यादिपादोनैकादशश्लोकपर्यंतम् । पापः पापग्रहः व्ययस्थः द्वादशस्थः सर्वदायं हे द्विजोत्तम ! हरति नाशयति । अथेति । येऽवाशिष्टा लाभादयः पंच तत्र कर्तव्यविशेषसूचना तदेवाह लाभादिसंस्थिताः एकादशभावादिपंचभावपर्यन्तं वर्तमानाः ग्रहाः वामतः विलोमतः क्रमेण द्वित्रिचतुःपंचषडंशोनम् आयुः कुर्वन्ति एतदुक्तं भवति लाभस्थो ग्रहः द्व्यंशोनमायुर्हरति अर्थात् अर्धमवशेषयतीत्यर्थः । तथा दशमस्थो ग्रहः तृतीयांशोनमायुः करोति तथा नवमस्थो ग्रहः चतुर्थांशोनमवशेषयति तथाष्टमभावस्थः पंचमांशोनमवशेषयाति तथा सप्तमभावस्थः षडंशोनमवशेषयाति इति बोध्यम् । एवं वामतः विलोमतः लाभभावात् उक्तां प्रक्रियां शृणु जानीहीत्यर्थः । इयं प्रक्रिया पापग्रहविषय एव । शुभग्रहविषये तु सौम्याः शुभग्रहास्तु प्रोक्तार्धं उक्तार्धमितसंख्यांशमायुर्हरन्ति । अथायुर्दायहान्युदाहरणम् । अंशायुश्चक्रार्धहानिः रविः एकादशस्थाने वर्तमानः अत एव प्राप्तमायुः १३। ८। १। ५२। ४० अर्धहानिः ६। १०। ०। ५६। २० पुनः भौमो व्ययस्थाने स्थितः अतः स सर्वायुर्हानिकरः अत एव भौमस्यायुः १८। ७। १। ५३। ५२ अत्र च भौमस्यायुरभावः ०।०। ०।०।० शनिर्दशमस्थानस्थः अतस्तस्यायुः ११। ५। २३।

२०तस्य तृतीयांशश्च ३।९।२७।४७ अयं यथागतायुष ऊनीकृतश्चेत् ७।७।२९।३३। एवं जातं परं गुरुबुधभृग्वादीनाम् अशुभग्रहाः संयुक्ताः अतोऽर्धहानिसंस्कारः चंद्रो नवमस्थः अतस्तस्य प्राप्तमायुः १९।३।०।४।४८ अस्याष्टमांशः २।४।२६।२०।३६ अयं यथागतायुषो हीनः कृतश्चेदुर्वरितं १६।१०।४।२४।१२ इदं चंद्रायुः स्पष्टम्। एवं पिंडाद्यायुर्हानिसंस्कारो बोद्धव्यः॥ १०॥

भाषा–अब आयुष्य कितना हरण करता है सो कहते हैं. बारहवें घरमें पापग्रह होवे तो संपूर्ण आयुष्यका हरण करता है ग्यारहवें घरमें, ग्रह होवे तो अर्ध आयुष्य हरण करता है दशवें घरमें ग्रह होवे तो आयुष्यका तृतीय भाग हरण करता है. नववें घरमें ग्रह होवे वो आयुष्यका चतुर्थांश हरण करता है. आठवें घरमें ग्रह होवे वो आयुष्यका पांचवां भाग हरण करता है, ७ वें घरमें ग्रह होवे तो आयुष्यका छठा अंश हरण करता है यह पापग्रहकी रीति कही शुभग्रह होवे तो उक्त संख्या आयुष्यका अर्ध भाग हरण करते हैं. और लग्नका आयुष्य लानेकी रीति आगे अठारहवें श्लोकमें कहेंगे॥ १०॥

स्पष्टांशायुश्चक्रम्.

सू.	चं.	मं.	बु.	गु.	शु.	श.	ल.	यो.
६	१६	०	३	५	१७	७	१	५९
१०	१०	०	६	२	९	७	९	८
०	४	०	१४	२६	२	२५	२४	८
५६	२४	०	३४	४६	३	३३	१९	३७
२०	१२	०	४२	०	३२	०	३६	३२

लाभादिसंस्थिताः खेटा वामतः प्रक्रियां शृणु॥ हरंति सौम्याः प्रोक्तार्धं लग्नद्वादशसंधिषु॥ ११॥

टीका–अथ भावसंधिगतग्रहायुर्हरणमाह–लग्नेतिसपादार्धेन। अथोति विषयांतरम् उत्तरे अनंतरोक्तायुर्विषयेऽपि पापः पापग्रहश्चेत्सकलं वक्ष्यमाणपरिमितं हराति शुभश्चेद्दलमर्धं हरतीति ज्ञेयम्॥ ११॥

भाषा-अब संधिगत ग्रहोंका आयुर्हरण भेद कहते हैं पापग्रह होवे तो जो मान लिखा है उतना हरण करते हैं शुभग्रह होवे तो अर्ध हानि करते हैं ॥ ११ ॥

पापश्चेत्सकलं हंति शुभो दलमथोत्तरम् ॥ लग्नाद्द्वादशसंधौ च ग्रहान्पापान्विवर्जयेत् ॥ १२ ॥ राश्यभावे तु भागादीन् दायघ्नान् षष्टिभाजितान् ॥ दाये द्विघ्ने तु सौम्यस्य राशिरेको दलं यदि ॥ १३ ॥ अधिकेनापहृत्तत्तु क्रमाद्राशिं विना कृतम् ॥ दायद्विगुणया सौम्यो लब्ध्वा वाऽपचये समाः ॥ १४ ॥

टीका-अथास्य प्रक्रियामाह-लग्नादित्यादिचतुर्दशश्लोकपर्यंतम् । लग्नादारभ्य द्वादशसंधौ जात्येकवचनं संधिषु पापान्वर्तमानपापग्रहान् विवर्जयेत् त्यजेत् सौम्यग्रहेष्वप्येवमेव कुर्यात् शेषान् षष्टिभाजितान् कृत्वा लब्धं०हरसंज्ञं फलं ज्ञेयम् अयं विचारो राशिसत्त्वे एव, राश्यभावे तु पापशुभयोः कृतिभेदः तदित्थं पापस्य राश्यभावे भागान् अंशादीन् दायघ्नांस्तत्तद्ग्रहोक्तं दायगुणितान् कृत्वा षष्टिभाजितांश्च कृत्वा लब्धमंशादि यत् तत्संधौ विवर्जयेत् ततोऽवशिष्टं आयुर्हरणफलं स्यात् शुभग्रहस्य राश्यभावे तु दाये द्विनिघ्ने दायं द्विगुणितं कृत्वा तेन दायान् भागान् भागकलाविकलाः संगुण्य षष्ट्या विभज्य लब्धमंशादि संधौ विवर्जयेत् शिष्टम् आयुर्हरणफलं स्यात् तत्रैकत्र राशिर्वा एकत्र दलं वा संधौ आनीतफले वा स्याद्यदि तर्हि अधिके न्यूनमपहृत् वर्जितं कृतम् आयुर्हरणफलं भवति एवं क्रमात् राशिं विना कृतं राशिव्यातिरिक्तविषये कृतं केवलदायगुणनेन पापस्य दायद्विगुणया सौम्यस्य च ये लब्धांकाः ते अपचये आयुर्हरणे समाः वर्षाणि बोध्यानि ॥ १२ ॥ १३ ॥ १४ ॥

भाषा—लग्नसे लेके बारह संधितक पापग्रह या शुभग्रह होवें उनके अंशादिकोंको अपने अपने दाय वर्षसे गुणन करके साठसे भाग लेके जो लब्ध अंशादिक आवे वो संधिमें कमी करके जो शेष रहे सो आयुष्यका हरण फल भया इसमें जो और विशेष कृति है सो टीकामें स्पष्ट है ॥ १२ ॥ १३ ॥ १४ ॥

बहवश्चेद्बली हंति समाश्चेत्प्रथमो मतः ॥ अंशकं
ग्रहयोगे च द्वयोः पापे हरत्युत ॥ १५ ॥ सौम्योपि
पापवर्गे च स्थितो रिःफादिषट्सु चेत् ॥ त्रिषु
भावगतानां च पापानां करणं स्मृतम् ॥ १६ ॥

टीका—अथात्रानेकग्रहयोगे किं कार्यमित्यत्राह—बहव इत्यर्धेन । एतदुक्तभावसंधिषु एकग्रहयोगे उक्तम् अथात्र बहवो ग्रहाश्चेत्तर्हि बली अधिकबलवान् ग्रहः हंति आयुर्हारको भवति । अथात्र समाः सर्वे समबलिनश्चेत्तत्र प्रथमो रव्याद्यन्यतमः क्रमप्राप्तः प्रथमगणनीयो ग्रहो हरति हारकः स्यादिति । अथ ग्रहद्वययोगे विशेषमाह अंशकमित्यर्धेन । अंशकं एतत् उक्तायुर्हरणम् अंशकायुर्दायविषयकम् । अथ प्राग्बहुयोगे व्यवस्थामुक्त्वा अत्र द्विग्रहयोगे सत्याह द्वयोः शुभाशुभयोः योगे समागमे तत्रस्थः पापः एव आयुर्हरात न शुभ इति ज्ञेयम् उत अपि इति शुभहरणं क्वचिद्वक्ष्यमाणस्थले स्यादिति ध्वनिः ॥ ॥ १५ ॥ अथ शुभद्वययोगे विशेषमाह—सौम्यइति । सौम्योऽपि शुभग्रहद्वययोगे सौम्यः शुभः सन्नपि पापवर्गे स्थितश्चेत् रिःफादिषट्सु व्ययादिषट्स्थानेषु आयुर्हारको भवति एवं भावगतानां व्ययादिषड्भाववर्तमानानां पापानां रविक्षीणेन्दुभौमसपापबुधशनीनां पंचानां मध्ये त्रिषु रविभौमशनिष्वेव हरणं स्मृतम् उक्तं सर्वेष्विति भावः । अथात्र व्ययादिषड्भावेषु पापानां करणं वक्ष्यमाणफलानाम् उत्पादनमपि स्मृतामिति ॥ १६ ॥

भाषा–यह संधिगत ग्रह एकका विधि पहिले कहा अब जो संधिमें बहुत ग्रहोंका समागम होवे तो जो बलवान् होवे वो हरण करे और दो ग्रह होवें तो पापग्रह आयुष्य हरण करे, शुभग्रह नहीं करे ॥ १५ ॥ दो शुभग्रहोंका योग होवे तो जो पापवर्गमें होवे बारहवें घर आदि छः घरमें होवे तो आयुष्यका हारक होता है और पूर्वोक्त १२।११।१०।९।८।७ घरमें रवि मंगल शनिका हरण कहा है ॥ १६ ॥

कुटुंबभरणं चापि दुश्चित्तं लाभमेव च॥मेधां च प्रतिभां शांतिं मंदक्रोधं करिष्यति ॥ १७ ॥

टीका–तदेवाह कुटुंबेति । तथा नाम व्ययादिवर्तमानः पापो भवेचेत् तथा आयुर्हरणमुक्तं तथैव कुटुंबभरणादीनां षण्णां करणं स्यात् तदित्थं पापो व्ययस्थश्चेत् कुटुंबभरणं करणं नाम कुटुंबभरणकर्ता स्यादित्यर्थः । एवमग्रे सर्वत्र पापो लाभस्थश्चेद्दुश्चित्तं तथा सः दशमस्थश्चेत् लाभं करिष्यति तथा नवमस्थः मेधां धारणावतीं बुद्धिं प्रतिभां प्रत्यक्षज्ञानजनकबुद्धिं करिष्यति तथा सः अष्टमस्थः शांतिं तथा सः सप्तमस्थः मंदक्रोधम् अल्पक्रोधं करिष्यतीति करणं बोध्यम् ॥ १७ ॥

भाषा–अब पूर्व जैसी आयुष्यहरणकी बात कही वैसी करणकी बात कहते हैं पापग्रह १२ घरमें होवे तो कुटुंबका पोषण कर्ता होवे . पापग्रह ११ घरमें होवे तो दुश्चित्त करे, पापग्रह १० वें घरमें होवे तो लाभ करेगा. पापग्रह ९ वें घरमें होवे तो धारणावती बुद्धि ज्ञानबुद्धिको देवे. पापग्रह ८ वें घरमें होवे तो शांति देवे. ७ वें घरमें होवे तो थोडा क्रोध करे ॥ १७ ॥

अस्तंगतानां सर्वेषां दलं दायः स्मृतस्तदा॥राशिसंख्यासमाश्चाब्दा लग्नेऽब्जे बलवत्तरम् ॥ १८ ॥

अंशान् लिप्ताहतान् कृत्वा खखाक्षिभ्यां समाहताः॥
शेषा मासादयः प्रोक्ता वर्त्तमानाब्दयोजने ॥ १९ ॥

टीका—अथास्तंगतग्रहाणां दायहरणमाह—अस्तमित्यर्धेन । सर्वेषां चंद्रादिशुभपापानाम् अस्तंगतानां सतां तदा दायः प्राप्तायुर्भागः दलम् अर्धम् अवशिष्टः स्मृत उक्त इति । अथ लग्नायुर्दायमाह—राशीत्यादिसार्धेन । लग्नायुर्दायेऽस्मिन् लग्ने लग्नस्थाने अब्जे चंद्रे बलवत्तरे सति राशिसंख्यासमाः राश्यंकपरिमितवर्षाणि ग्राह्याणि यदि च लग्ने बलहीनचंद्रः स्यात् वा लग्ने चंद्रो न स्याच्चेत्तदा तु अंशान् लग्नराश्यंकं त्यक्त्वा अंशांकान् लिप्ताहतान् लिप्ताभिः षष्टिपरिमितांकैः हतान् गुणितान् कृत्वा खखाक्षिभ्यां शतद्वयेन समाहताः भाजिताः संतः लब्धाः वर्तमानाब्दयोजने राश्यंकमेलने सति समाः स्युः । एवं बलवत्तरचंद्रयुतलग्ने निर्बलचंद्रयुतलग्ने चंद्ररहितलग्ने च सति लग्नायुर्वर्षाणि कथयित्वा प्रकारत्रयेऽपि मासाद्यानयनमाह । शेषाः अब्दानयानंतरमवशिष्टांकान् द्वादशगुणितान् द्विशतभक्तान् कृत्वा लब्धफलं मासाः एवं शेषं त्रिंशद्गुणनेन षष्टिगुणनेन च द्विशतभागलब्धं क्रमाद्दिनघटीपलादिरूपं स्यात् । अथ लग्नायुरुदाहरणम् । लग्नम् ० । ६ । ३ । ४२ अत्र राशिं विहायांशान् कलीकृत्य जातम् ३६३ । ४२ इदं शतद्वयम् २०० विभाजितं सल्लब्धं वर्षं १ शेषं १६३ । ४२ इदं द्वादशभिर्गुणितं सञ्जातं १९६४ । २४ इदं शतद्वय २०० विभाजितं सल्लब्धं ९ मासाः शेषं १६४ । २४ इदं त्रिंशद्भिर्गुणितं सल्लब्धं ४९३२ इदं शतद्वय २०० विभाजितं सल्लब्धं २४ दिवसाः शेषं १३२ इदं षष्टि ६० घ्नं सत् ७९२० जातं तच्छतद्वयविभाजितं विधाय लब्धं ३९ एता घट्यः शेषम् १२० इदं षष्टि ६० घ्नं कृत्वा जातं ७२०० एतच्छतद्वय २०० विभाजितं कृत्वा लब्धं ३६ एतानि पलानि स्युः । एवं च लग्नायुर्वर्षादि १ ।

९ । २४ । १९ । ३६ एतद्वर्षादिमध्ये लग्नराश्यंकसंख्यां योजयेत् । अत्र तु लग्नराश्यंकसंख्यां संयोज्य जातम् १ । ९ । २४ । १९।३६ एवं जातमिति सुधीभिरधिगंतव्यम् ॥ १८ ॥ १९ ॥

भाषा–अब लग्नायुर्दाय कहते हैं. लग्नस्थ चंद्र बलवान् होवे तो वो राशिसमान वर्ष लेना. अथवा लग्नमें चंद्र बलहीन होवे या चंद्र न होवे तो लग्नके अंशोंको षष्टिगुणित करके दो सौ२०० से भाग लेके लब्ध वर्षादिक जानना ॥ १८॥१९ ॥

क्रूरे क्रूरोदयघ्नं तमष्टोत्तरशतैर्हृतम् ॥ लब्धं चापनयेद्दाये स्वे तथा परमायुषि॥ २० ॥ स्वोच्चे मूलत्रिकोणे च लब्धस्यार्धं विवर्जयेत् ॥ मित्रेऽधिसुहृदि प्रोक्तं पादोनेनापनायनम् ॥ २१ ॥ भावेष्वेवं विधिः प्रोक्तो वर्गाणामधिपेषु च ॥ तिष्ठंतौ शुभपापौ चेत्पापोदयविधिः स्मृतः ॥ २२ ॥

टीका–अथ लग्ने क्रूरग्रहसमागमे उक्तायुर्हानिसंस्कारमाह–क्रूर इत्यादिद्वाविंशतिश्लोकपर्यंतम् । क्रूरे पापग्रहे लग्नस्थे सति तमंशादिरूपं भावं क्रूरोदयघ्नं क्रूरोदयेन क्रूरोदये वर्तमाननवांशराशिपरिमितेनांकेन घ्नं गुणितं कृत्वा अष्टोत्तरशतैः हृतं १०८ एतैः विभाजितं तेन यल्लब्धं वर्षादि तत् स्वे दाये लग्नदाये तथा परमायुषि परमायुर्दाये च अपनयेत् वर्जयेत् । एवं कृते स्पष्टदायः स्यात् । अथ च स्वोच्चे क्रूरे स्वोच्चभूतलग्ने वर्तमाने सति स्वमूलत्रिकोणभूतलग्ने च वर्तमाने सति तु लब्धस्यार्धं प्रागुक्तरीत्यानयनेन यल्लब्धं तस्यार्धं स्वे तथा परमायुषि च वर्जयेत् । तथा क्रूरे मित्रे मित्रक्षेत्रे भूतलग्ने वा अधिसुहृदि अधिसुहृत्क्षेत्रभूतलग्ने वर्तमाने सति तु पादोनेन प्रागुक्तरीत्या लब्धं चतुर्थांशन्यूनं कृत्वा शेषेण अपनायनं वर्जनं कुर्या-

दिति प्रोक्तं आचार्यैरिति शेषः। एवं विधिः हरणप्रकारः भावेषु लग्नेषु वर्तमानक्रूरहरणप्रकारः तथा वर्गाणां षण्णामपि क्रूरेषु अधिपेषु सत्सु लग्ने क्रूराभावेऽपि अयं हरणसंस्कारः कथितः। ननु शुभपापग्रहद्वययुतलग्ने किमिति चेदाह शुभपापौ च लग्ने तिष्ठंतौ वर्तमानौ चेत् पापोदयविधिरेव कर्तव्यः न शुभस्येति। लग्नस्थक्रूराधिक्ये सति बली हंतीति अनुवृत्तो न्यायो ग्राह्य इति ॥२०॥२१॥२२॥

भाषा—लग्नमें पापग्रह होवे तो लग्नके अंशादिरूप भावको पापग्रहके वर्तमान नवांशराशितुल्य अंकसे गुणन करके १०८ से भाग लेना. जो वर्षादि लब्ध आवे वो लग्नदायमेंसे निकालना, सो स्पष्ट आयुर्दाय होवे. लग्नमें पापग्रह अपने उच्चराशिका होवे या मूलत्रिकोणका होवे तो पूर्वोक्त रीतिसे जो लब्धांक है, उसका अर्ध करके परमायुष्यमें कमी करना और जो वो पापग्रह मित्रराशिका अधिमित्रका होवे तो पूर्वोक्त रीतिप्रमाणसे लब्ध चतुर्थांश न्यून करके शेष आयुष्य जानना. यह पापग्रहोंका हरणप्रकार कहा अब पापग्रह शुभग्रहयुक्त लग्न होवे तो पापग्रहका विधि करना पापग्रह बहुत होवें तो बलवान् ग्रहसे पूर्वोक्त विधि करना ॥ २० ॥ २१ ॥२२ ॥

क्रूरेष्टमेष्टमांशेन भावस्याप्यनुपाततः ॥ लग्नाधिपेत-
राष्टांशं पापो हरति मृत्युगः ॥ २३ ॥ बहवश्चेद्बली
सौम्यपापेष्वेवंविधिः स्मृतः ॥ तयोर्दायांतरं दायः
केन्द्रस्य च विधीयते ॥ २४ ॥

टीका—अथाष्टमभावे केंद्रभावेषु वा पापयोगे तथा शुभपापमिश्रयोगे च हरणविधिमाह—क्रूर इत्यादिचतुर्विंशतिश्लोकपर्यंतम् । अष्टमेऽष्टमभावे प्राग्वल्लब्धस्याभावस्य भावायुषोऽनुपाततः त्रैराशिकेन संपादिताष्टमांशेन हरणं कुर्यात् । तत्र विशेषस्तु मृत्युगोऽष्टमस्थः

पापः लग्नाधिपेतराष्टांशं लग्नेशायुर्दायव्यातिरिक्तायुर्दायाष्टमांशं हरतीति ॥ २३ ॥ तत्र बहवः पापाश्चेद्बली बलाधिको हंति । अथ च तत्र सौम्यपापेषु सत्सु तयोर्दायांतरं सौम्यपापयोः दायद्वयस्यांतरं विवरं कृत्वा दायः स्यात् एवं विधिः स्मृतः एवमेव केंद्रस्य पापसहितस्य पापसौम्ययुतस्य च प्रकारो विधीयते संपाद्यत इति ॥ २४ ॥

भाषा–आठवें भावमें पापग्रह होवे तो लग्नपतिविना दूसरेके आयुष्यका अष्टमांश हरण करताहै ॥ २३ ॥ वहां बहुत पापी होवें तो जो बलवान् पापी होवे वो आयुष्य हरण करे अथवा पाप शुभ दोनों ग्रहोंका आयुष्यका अंतर करके जो रहे वो आयुष्य जानना. ऐसा केन्द्रस्थानमेंभी शुभ पापाधिक ग्रहोंका पूर्वोक्तवत् फल जानना ॥ २४ ॥

सेन्दौ राहौ दशा राहोरानीता मूलदायवत् ॥ चंद्रायुः पिंडतः शोध्या तद्राहुकरणं स्मृतम् ॥ २५ ॥

टीका–अथ सचंद्रराह्वायुर्दायमाह–सेन्दावित्यादिसार्धेन । सेन्दौ चंद्रयुते राहौ सति मूलदायवत् प्रागुक्तायुर्दायवत् दशा आनीता सा पिंडीकृता चंद्रायुःपिंडतः चंद्रायुषः पिंडं गृहीत्वा तस्माच्छोध्या वर्जनीया अवशिष्टं राहुकरणं स्मृतं तेन करणेन अंशदायक्रमेणैव प्रागुक्तांशायुर्दायरीत्या एव तमसो राहोरब्दाः आयुर्वर्षाणि समीरिताः कथिताः ॥ २५ ॥

भाषा–अब सचंद्र राहुका आयुर्दायविचार कहते हैं. चंद्रयुक्त राहु होवे तो पहिले सरीखा दशा लायके चंद्रायुष्यका पिंड करके उसमें शोधन करके जो शेष सो राहुका करण कहा वो करणसे अंशायुक्रमसे राहुका वर्षादि कहा ॥ २५ ॥

अंशदायक्रमेणैव तमसोऽब्दाः समीरिताः ॥ तस्मिन्सचन्द्रे तल्लग्नभावसाधनतस्त्वतः ॥२६॥ तत्तद्दृष्टिहतं

कृत्वा षष्ट्याप्तं धनशोधने ॥ सोदये च सराह्विंदावेवं न्यायः समीरितः ॥ २७ ॥

टीका-अथ लग्नगतसचंद्रराह्वायुर्दायमाह-तस्मिन्नितिसार्धेन । तस्मिंल्लग्ने सचंद्रे चंद्रयुते, राहौ सति तल्लग्नभावसाधनतः तच्च तल्लग्नं च तस्य भावायुर्दायवत् साधनं कृत्वा तत्तद्दृष्टिहतं तस्य तस्य राहोश्चंद्रस्य च दृष्ट्या गुणयित्वा षष्ट्याप्तं षष्टि ६० भागलब्धं धनशोधने धनऋणे प्रागुक्तवत् मकरादौ कर्कादौ कल्पनीयमिति । एवं करणं कदा सराह्विंदौ राहुयुतचंद्रे सोदये जन्मलग्नसहिते सति न्यायो रीतिः समीरितः कथित इति ॥ २६ ॥ २७ ॥

भाषा-अब लग्नगत सचंद्र राहुका आयुर्दाय कहते हैं. लग्नमें सचंद्रराहु होवे तो लग्नभावसरीखा आयुर्दाय करके साधन, राहुदृष्टिसे और चंद्रदृष्टिसे गुणन करके साठसे भाग लेना लब्ध आवे सो मकरादि होवे तो धन करना कर्कादि होवे तो ऋण करना ॥ २६ ॥ २७ ॥

स्थानवृद्धिः क्षयः कार्यो द्रेष्काणर्क्षं सराशिकम् ॥ अस्तंगतानामर्धं स्याद्विना भृगुसुतं शनिम् ॥ २८ ॥ तयोर्वेदांशहीनं स्यात्त्र्यंशोनं शत्रुगस्य तु ॥ अंगारकं वर्जयित्वा शत्रुक्षेत्रगतैर्ग्रहैः ॥ २९ ॥

टीका-अथ द्रेष्काणवशात्स्थानवृद्धिक्षयावाह-स्थानेति अर्धेन । द्रेष्काणर्क्षं सराशिकं राशिना समानं सराशिकं एकराशिकमित्यर्थः । एवंभूतं द्रेष्काणर्क्षं द्रेष्काणराशिश्चेदेतदुक्तं भवति लग्नं स्वद्रेष्काणे वर्तमानं चेत् भावस्थानफलस्य वृद्धिः स्थानवृद्धिः कार्या । अर्थात् लग्नं स्वातिरिक्तान्यद्रेष्काणवर्ति चेत् स्थानस्य क्षयः कार्यः अत्र स्थानवृद्धिक्षयौ आयुर्विषयकौ ज्ञेयौ ॥ २८ ॥ अथास्तंगतग्रहायुर्दायहानिमाह-अस्तमिति सपादार्धेन । अस्तं गतानां

ग्रहाणां प्राङ्गीतायुर्दायस्य अर्धं स्यादर्धं ग्राह्यम् तत्र विशेषस्तु विना भृगुसुतं शनिं शुक्रशनिव्यतिरेकेण अथ तयोरस्तंगतयोः सतोः वेदांशहीनं चतुर्थांशोनं स्यादिति ॥ २९ ॥

भाषा–अब द्रेष्काणयोगसे वृद्धि क्षय कहते हैं, स्थानकी और द्रेष्काणकी राशि एक होवे तो भावस्थानफलकी वृद्धि जाननी भिन्न होवे तो क्षय जानना अस्तंगत ग्रहोंका जो आयुर्दाय होवे उसका अर्ध लेना परंतु शुक्र शनि जो अस्तंगत होवें तो चतुर्थांश न्यून करना ॥ २८ ॥ शत्रुक्षेत्रगत जो ग्रह हैं उनमें मंगलविना दूसरे ग्रहोंका आयुर्दायका तीसरा अंश न्यून करता है. शत्रुक्षेत्रगत ग्रहोंका तृतीयांश कमी करना ऐसा कहा है, परंतु मित्रवर्गका ग्रह होवे तो तृतीयांशका अर्ध कमी करना ॥ २९॥

सुहृद्वर्गगतानां तु तद्दलं हरति स्वकम् ॥ एवं भावेषु
सर्वेषु षड्विधं हरणं न हि ॥ ३० ॥

टीका–अथ शत्रुक्षेत्रगतग्रहायुर्हानिमाह–त्र्यंशोति पादद्वयेन । शत्रुगस्य शत्रुक्षेत्रवर्तिनः अंगारकं भौमं वर्जयित्वा भौमव्यतिरेकेणेत्यर्थः। अन्यो ग्रहः स्वायुर्दायं त्र्यंशोनं कुर्यात् । अथ शत्रुक्षेत्रगतानामपि सुहृद्वर्गगतानां सतां विशेषमाह–शत्र्विति सपादार्धेन । शत्रुक्षेत्रगतैर्ग्रहैः यत्प्रागुक्तं त्र्यंशोनमिति स्वकमायुः तद्दलं त्र्यंशार्धमित्यर्थः। तेषां सुहृद्वर्गगतानां शत्रुक्षेत्रगतत्वेऽपि मित्रवर्गसंबंधेनेत्यर्थः । त्र्यंशार्धं हरति नश्यतीत्यर्थः न त्र्यंशमिति । एवं षट्प्रकारकं ग्रहायुर्हरणमुक्त्वैतद्भावेषु नेत्याह एवमित्यर्धेन । एवमुक्तषट्प्रकारकं हरणं भावेषु लग्नादिषु नहि नास्तीत्यर्थः । किंतु ग्रहाणामेवेति भावः ॥३०॥

भाषा–ऐसा छःप्रकारसे आयुष्यका हरण विधि कहा सो ग्रहोंका जानना भावोंका नहीं ॥ ३० ॥

हरणं नैव कर्तव्यमंशदायेऽष्टवर्गजे ॥ स्वोच्चे च
त्रिगुणे प्रोक्तं स्ववर्गे द्विगुणं तथा ॥३१॥ अधिमि-

त्रगृहे सार्धं त्र्यंशं मित्रगृहे युतम् ॥ अरावध्यरि-
भावे च त्र्यंशखंडविवर्जितम् ॥ ३२ ॥ अष्टवर्गोत्थ-
दायेषु प्रोक्तोऽयं विधिरंजसा ॥ भावदायेषु सर्वेषु
प्रोक्तोयं विधिरुत्तमः ॥ ३३ ॥

टीका-एवमेव अष्टवर्गजेंऽशायुषि मित्रादीनां वृद्धिः शत्र्वादीनां हरणं चाह-हरणमित्यादित्रयास्त्रिंशच्छ्लोकपर्यन्तम् । अष्टकवर्गजे अष्टवर्गसमुद्भवे अंशदाये हरणं ह्रासो न कर्तव्यं न कार्यं तत्र तु योग एव कार्यः । तदेवाह । स्वोच्चे उच्चस्थे ग्रहे त्रिगुणं प्रोक्तं प्राप्तदायः त्रिगुणः कर्तव्यः स्ववर्गे स्वकीयवर्गस्थे सति स्वराशिस्थे सति द्विगुणं कार्यं तथा अधिमित्रगृहे वर्तमानस्य ग्रहस्यायुः सार्धं अर्धेन सहितं कार्यं तथा मित्रगृहे स्थितस्य त्र्यंशयुतम् प्राक्तनदाये त्र्यंशयुक्तं कार्यम् एवं योगमुक्त्वाऽत्रापि हरणमाह अरौ अरिक्षेत्रगे अध्यरिभावे अधिशत्रुगृहे च स्थितस्य प्राप्तायुस्त्र्यंशखंडविवर्जितं स्वतृतीयांशोनं कर्तव्यम् अयं विधिः अंजसा उत्तमप्रकारेणेत्यर्थः । अष्टवर्गोत्थदायेषु अष्टवर्गसमुद्भवायुर्दायेषु प्रोक्तः अयमेव विधिः सर्वेष्वपि भावदायेषु उत्तमः प्रोक्त इति ॥ ३१ ॥ ३२ ॥ ३३ ॥

भाषा-अष्टकवर्गोत्पन्न जो अंशदाय है उसका हरण नहीं करना, योग करना, उच्चका ग्रह होवै तो प्राप्त आयुष्यको त्रिगुणित करना, स्वराशिका होवे तो द्विगुणित करना, अधिमित्रका होवे तो अर्ध अधिक करना मित्रक्षेत्रका होवे तो तृतीयांशयुक्त करना, शत्रुक्षेत्रका होवे वा अधिशत्रुका होवे तो तृतीयांश कमी करना. यह विधि अष्टकवर्गोत्पन्न आयुर्दायमें जानना और सर्वभावायुर्दायमेंभी जानना ॥ ३१ ॥ ३२ ॥ ३३ ॥

दायगस्य तु सर्वस्य सहगस्य दलं भवेत् ॥
सुतधर्मगयोस्त्र्यंशं पादं मृतिसुखस्थयोः ॥३४॥

टीका–अथैवमुक्तदाय एव दशासंज्ञको ज्ञेयस्तत्रांतर्दशाभागमाह–दायगस्येत्यादिसपादचतुस्त्रिंशच्छ्लोकपर्यंतम् । सर्वस्य दायगस्य दायं गमयतीति तस्य दायपतेरित्यर्थः । सर्वदायसंबंधि दलं अर्धं सहगस्य सहवर्तमानस्य भवेत् सहगोऽर्धविभागी भवतीत्यर्थः । तथा दायपतेः सुतधर्मगयोः पंचमनवमस्थयोः ग्रहयोः सर्वदायसंबंधकं त्र्यंशं तृतीयांशमितो भागो भवति एवं मृतिसुखस्थयोः अष्टमचतुर्थस्थयोः सर्वदायसंबंधि पादं चतुर्थांशदशाभागो भवति तथा सप्तमस्थस्य सर्वदायसंबंधि सप्तांशं सप्तमांशांतर्दशा भवतीति ॥ ३४ ॥

भाषा–अब अंतर्दशा भाव कहते हैं आयुर्दायका जो अधिपति है उसका जो दाय है उसका अर्ध भाग दायपतिके साथ जो रहनेवाला ग्रह है वो लेता है और दायपतिसे पांचवें नववें जो ग्रह हैं वे सर्व दायका तृतीयांश लेते हैं और सप्तमस्थ जो ग्रह है वो सर्व दायका सातवां अंश लेता है ॥ ३४ ॥

सप्तांशं सप्तमस्थस्य प्रक्रिया प्रोच्यतेऽधुना ॥
अंशान्परस्परहताञ्छेदेनैव विभाजितम् ॥३५॥
तत्तदंशविभक्तं च स्वस्य स्वस्य समं भवेत् ॥
नीचार्धपक्षे सर्वत्र विधिरेष विधीयते ॥ ३६ ॥

टीका–अथोक्तांतर्दशानयनप्रकारमाह । प्रक्रियासाधनरीतिः प्रोच्यते कथ्यते अंशान् तत्तत्स्थानोक्तान् परस्परहतान् कृत्वा वामतो गुणनेन अग्रिमांकः सर्वांशभागग्रहणे सामुदायिकः सिद्ध्याति तं तेन तेनांशांकेन विभज्याप्तं तत्तदंशस्य पृथग्गुणकच्छेदो भवति सप्तांशभागहरणे मूलदायस्य गुणकः तथा सर्वांशच्छेदसमूहे सर्वेषामप्यंशानां भाजको ज्ञेयः । एवं तत्तदंशगुणकेन संगुण्य सर्वांशगुणकसमुदायेन विभज्याप्तं तदंशदायफलमुत्पद्यते इति तात्पर्यम् । एष एव विधिः

सर्वत्र नीचार्धपक्षे नीचाद्यर्धानयनविषये विधीयत इति । अथांतरदशोदाहरणम् । अथ दशापतिश्चंद्रः ततः सकाशाल्लग्नस्य त्रिकोणस्थितत्वात्पंचमस्थानस्थितत्वेन तृतीयांशभोक्तृत्वं लग्नस्य सुस्पष्टतरं जातं शुक्रभौमयोश्चंद्रात्सुखस्थानस्थितत्वाच्चतुर्थांशभोक्तृत्वम् अथोपरिष्टादुक्तग्रहाणां स्थितिप्रकारं तावद्दिशदयामः । एते ग्रहाः परस्परं छेदहृताः कृताश्चेज्जायमाना अंशसंख्या ४८ । १६ । १२ । १२ इति एते मूलदायस्य गुणकांकाः संजाताः एते एकीकृताः संतः जायमानसंख्या ८८ इति एषा संख्या मूलदशांकभागहारा भवति मूलदशांकाश्च १६।१०।४।२४।१२ स्वांशसंख्यया ४८ इत्यनेन गुणयित्वा समुदिता संख्या च ८०८।७।१।२१।३६ इयं संख्या भागहरेण ८८ इत्यनेन विभाज्य जाता ९।२।७।५१।२३ इदं चंद्रमध्ये चन्द्रान्तरम् । मूलदशा १६।१०।४।२४।१२ लग्नांशेन १६ गुणिता जायमानसंख्या २६९।६।१०।२७।१२ इमां संख्यां भागहरेण ८८ संख्यांकेन विभज्य लब्धं ३।०।२२।३७।१ इदं चंद्रमध्ये लग्नांतरम् । मूलदशा १६।१०।४।२४।१२ इयं भृग्वंशेन १२ इत्यनेन भौमांशेन १२ इत्यनेन च गुणिता सती जाता संख्या २०२।१।२२।५०।२४ इयं भागहरेण ८८ संख्यांकेन विभाजिता सती जात २।३।१६।५७।५४ इदं चंद्रमध्ये भृगोरंतरम् भौमस्य चांतरं जातम् एवं सर्वेषामंतरं बोद्धव्यम् ॥ ३५ ॥ ३६ ॥

भाषा—अब अंतर्दशा लानेका प्रकार कहते हैं. यहां अंश च्छेद और समच्छेद करके अंशाधिक समूलदशाको गुणन करना और इसका इकट्ठा पिंड करके भाग देना तो अंतर्दशा आवेगी . इसका उदाहरण टीकामें बताया है, और यहां चक्रभी दिखाया है ॥ ३५ ॥ ३६ ॥

नीचाभावेष्टवर्गोत्थं भावदायेंऽशकक्रमे ॥ नायं
विधिः स्मृतस्तत्र बहवश्चेत्तु तेऽखिलम् ॥ ३७ ॥

केन्द्रादिगा ग्रहाः सर्वे ददत्येवापहृत्य च॥ अर्धंत्र्यंशंच पादं च हरणाभावसम्मतौ ॥ ३८ ॥

टीका–एवमुक्तसमच्छेदाभावस्थानान्याह–नीचेत्यादिअष्टत्रिंशच्छ्लोकपर्यंतम् । अयं पूर्वोक्तः हरणविधिः नीचाभावे नीचरहिते तथा

अथ दशाक्रमचक्रमाह.

शु.	श.	गु.	मं.	ल.	सू.	बु.	चं.	योग.
१७ ९ २ ३ ३२	७ ७ २५ ३३ ०	५ २ २६ ४६ ०	० ० ० ० ०	१ ९ २४ १९ ३६	६ ९ २७ ३८ ०	३ ६ १४ ३४ ४२	६ १० ४ २४ १२	५९ ८ ७ ३४ २२
१९००	१९१८	१९२६	१९३१	१९३१	१९३३	१९४०	१९४३	१९६०
१० ४ १४ २२	७ ६ १७ ५४	३ १ ५० ५४	५ २८ ३६ ५४	५ २८ ३६ ५४	३ २२ ५६ ३०	१ २ ३४ ३०	८ ५ ९ १२	६ ९ ३३ २४

अंशच्छेदचक्रम्.

चं.	ल.	शु.	भौ.
१	१	१	१
१	३	४	४

समच्छेदचक्रमाह.

चं.	ल.	शु.	भौ.
४८	१६	१२	१२
४८	४८	४८	४८

चंद्रान्तरदशाचक्रम्.

चं.	ल.	शु.	भौ.	योग.
९ ७ ५१ २३	३ ० २२ ३७ १	२ ३ १६ ५७ ५४	२ ३ १६ ५७ ५४	१६ १० ४ २४ १२
१९४३	१९५२	१९५५	१९५८	१९६०
८ ८ २७ ३२	१० १६ १८ ५५	११ ८ ५५ ५६	२ २५ ५३ ५०	६ १२ ५१ ४४

अष्टवर्गोत्थदायभावे अष्टवर्गायुर्दायप्रक्रियायां तथा अंशकक्रमे अंशायुर्दायविषये च न स्मृतः नोक्तः अतः तत्र विषयत्रये बहवोऽनेके ग्रहाश्चेत् ते तु अखिलं सर्वमायुर्ददाति ॥ ३७ ॥ अथ केन्द्रादिस्थानेषु

विशेषमाह । सर्वेऽपि ग्रहाः केन्द्रादिगाः केन्द्रपणफरापोक्लिमस्थाः क्रमादर्धं त्र्यंशं पादं चापहृत्य अत्र हरणाभावसंमतौ हरणराहित्यस्य संमतिः प्रमाणं यस्य तस्मिन्नुक्तविषयत्रयेऽपि शेषं ददतीति तावत्यायुर्दाय एवांतराणि भवंतीत्यर्थः ॥ ३८ ॥

भाषा—अब समच्छेद जहां नहीं होता वो स्थान कहते हैं. यह हरणविधि नीच स्थानका जहां न होवे अष्टवर्गायुर्दायविषयमें अंशायुर्दायविषयमें नहीं कहा इस वास्ते यह तीन ठिकानेपर बहुत ग्रह होवें तो सम्पूर्ण आयुष्य देते हैं ॥ ३७ ॥ सब ग्रह केन्द्र पणफर आपोक्लिममें होवें वहां क्रमसे अर्ध, तृतीयांश, चतुर्थांश कमी करके शेष आयुष्य देते हैं ॥ ३८ ॥

सर्वार्द्वित्रित्रिवेदाश्च त्रिषट्सप्ताष्टपाणयः॥ स्वर्क्षहोराद्दकाणेशास्त्रिंशांशेशाद्रिभागपाः ॥ ३९ ॥ नवार्ककालहोरेशाःषष्ट्यंशेशकलांशपौ ॥भुंजते च क्रमात्सर्वे त्वंतर्दायाविधौ तथा ॥ ४० ॥

टीका—अथोक्तांतर्दायेंऽतर्दायोपभोक्तृक्रममाह—सर्वेत्यादिचत्वारिंशच्छ्लोकपर्यंतम् । अंतर्दायेशः स्वर्क्षे स्वराशौ वर्तमानः सर्वं प्राप्तांतर्दायं भुंक्ते स च होरेशश्चेद्द्वितीयांशं प्राप्तांतर्दशार्धं भुंक्ते एवं सद्द्काणेशः द्रेष्काणपतिश्चेत्तृतीयभागं त्रिंशांशश्चेदपि तृतीयांशम् आद्रिभागपः सप्तांशपतिश्चेद्वेदांशं प्राप्तांतर्दायचतुर्थांशं नवांशेशश्चेत्त्र्यंशम् अर्कांशेशो द्वादशांशपतिश्चेत्षष्ठांशं कालहोरेशश्चेत्प्राप्तांतर्दायसप्तमांशं षष्ट्यंशश्चेदष्टमांशं कलांशपः षोडशांशपतिश्चेत्पाणी द्वितीयांशमित्यर्थः । एवं क्रमात् सर्वे अंतर्दायपतयो ग्रहाः अंतर्दायविधौ अंतर्दशाविधाने स्वांशं भुंजते इति अंतर्दशापाचकक्रमः प्राप्तांतर्दशाहरणक्रमं चोपदिशति ॥ ३९ ॥ ४० ॥

भाषा–अन्तर्दशाका अधिपति स्वराशिमें होवे तो सर्वायुर्दाय भोगता है, वा ग्रह होरापति होवे तो दूसरा भाग भोगता है, द्रेष्काणपति होवे तो तीसरा भाग भोगता है. त्रिंशांश स्वामी होवे तो तीसरा भाग भोगता है, सप्तांशक स्वामी होवे तो चतुर्थांश भोगता है, नवमांशेश होवे तो तृतीयांश भोगता है, द्वादशांशेश होवे तो छठा अंश भोगता है कालहोराधिपति होवे तो सातवां भाग भोगता है, षष्टयंशका स्वामी होवे तो आठवां भाग भोगता है षोडशांशका स्वामी होवे तो दूसरा भाग भोगता है. यह रीतिसे सब ग्रह अपने अपने अन्तर्दशामें अपना अपना अंश भुक्तमान करते हैं. ऐसा अंतर्दशाका पाचकक्रम कहा ॥ ३९ ॥ ४० ॥

ग्रहाद्भावात्ततस्तस्मात्स्थितानां द्वादशस्वपि ॥
भावानां च क्रमात्प्रोक्ता भागांशाश्च स्वयंभुवा ॥४१॥
सर्वंद्विवेदसप्ताष्टषट्त्रिरत्नदिशाऽद्रयः ॥ वेदांगा
हारका एव ग्रहाणां सुमुदीरिताः ॥ ४२ ॥

टीका–अथ ग्रहेभ्यो भावेभ्यश्च द्वादशस्थानेषु भागांशानाह-ग्रहादिति द्वाभ्याम् । ततः अंतर्दायानयनानंतरं तस्माद् ग्रहात् तस्माद्भावाद्वा स्थितानां भावानां उत्तरश्लोकस्था भागांशाः क्रमाद्द्वादशस्वपि स्थानेषु स्वयंभुवा ब्रह्मणा प्रोक्ताः ॥ ४१ ॥ तानेव भागांशानाह । प्राप्तसर्वः प्रथमभावे द्वितियांशः प्राप्तार्धमित्यर्थः । द्वितियभावे वेदश्चतुर्थांशस्तृतीयभावे सप्तांशश्चतुर्थभावे अष्टांशः पंचमभावे षष्ठांशः षष्ठभावे त्रिः तृतीयांशः सप्तमभावे रत्नं नवांशोष्टमभावे दिशो दशांशो नवमभावे अद्रयः सप्तमांशो दशमभावे वेदश्चतुर्थांशः एकादशस्थाने अंगः षष्ठांशो द्वादशस्थाने एते भागांशाः ग्रहाणां हारकाः एव समुदीरिता इति एतैर्हरणं कार्यमिति भावः ॥ ४२ ॥

भाषा-अब ग्रहोंसे और भावोंसे बारह स्थानोंके भागांश जो ब्रह्मदेवने कहे हैं सो आगेके श्लोकमें कहते हैं ॥ ४१ ॥ प्रथमभावका सर्वदाय दूसरे भावका अर्ध दाय, तीसरे भावका चतुर्थांश, चौथे भावका सप्तांश, पंचम भावका अष्टमांश, छठे भावका षष्ठांश, सातवें भावका तृतीयांश, आठवें भावका नवांश, नवम भावका दशांश, दशम भावका सप्तांश, ग्यारहवें भावका चतुर्थांश, और बारहवें भावका षष्ठांश, यह ग्रहोंके हारक भागांश जानना ॥ ४२ ॥

हत्वा दायं बलैः स्वैस्तु बलं योगेन भाजयेत् ॥
आयव्यये तु भावानां ग्रहाणां वियदादिषु ॥४३ ॥
सर्वद्वित्रीषुवेदात्रिपंच सप्त ततः क्रमात् ॥ स्थानांतरे
तु भागांशाः सर्वभावेषु कीर्तिताः ॥ ४४ ॥

टीका-अथावशिष्टस्य व्यवस्थामाह-हत्वेति द्वयेन । तत्र आयव्यये स्थानद्वये तु हरणावशिष्टदायं स्वैर्बलैर्हत्वा सर्वबलयोगेन भाजयेत् लब्धम् आयव्ययस्यांतर्दशास्वरूपं ज्ञेयम् तथा वियदादिषु तृतीयादिदशममर्यादेष्वष्टसु सर्वः सर्वांशः द्विः द्वितीयांशः त्रिः तृतीयांशः इषुः पंचमांशः वेदश्चतुर्थांशः त्रिः तृतीयांशः पंच पंचमांशः सप्त सप्तमांशः एतान्संयोजयेदिति ध्वनिः । स्थानांतरेऽवशेषस्थानद्वये प्रथमे द्वितीये च भागांशाः ये प्रथमं भागांशाः कथिताः त एवांतर्दशारूपा ज्ञेयाः एवं सर्वभावेषु कीर्तिता इति ॥ ४३ ॥ ४४॥

भाषा-अब भावके भागांश कहते हैं. बारहवें ग्यारहवें भावका निर्णय ऐसा है कि, हरण करके बाकी रहा जो दाय उसको अपने अपने बलसे गुणन करके सर्वबलयोगसे भाग लेना, लब्ध जो हैं सो ग्यारहवें बारहवें भावका अन्तर्दशास्वरूप जानना. तीसरे भावका सर्वांश, चौथे भावका दूसरा अंश, पांचवें भावका तीसरा भाग, छठे भावका पांचवां भाग, सातवें भावका

चतुर्थांश, आठवें भावका तीसरा भाग, नववें भावका पंचमांश, दसवें भावका सप्तमांश, प्रथम भावका सर्व दाय, दूसरे भावका अर्ध दाय, यह भावके भागांश कहे ॥ ४३ ॥ ४४ ॥

सर्वत्रिसप्तरामेषुषट्त्र्याग्निद्वियमाः क्रमात् ॥ कालांशा अर्धहोरांशाः पतयोऽथ हरा यथा ॥ ४५ ॥

इति श्रीमद्बृहत्पाराशरहोरोत्तरभागे दायवर्णने एकादशोऽध्यायः ॥ ११ ॥

टीका-अथ कालांशपत्यर्धहोरांशपतिहरानाह-सर्वेति । अथानंतरं कालांशा कालाख्या अंशा येषां ते अर्धहोरांशाः अर्धहोराख्या अंशा येषां ते च ये पतयः अधिपाः तेषामिति शेषः । हरा यथा क्रमाज्ज्ञेया इति अन्वयः । ते च सर्वः, तृतीयांशः, सप्तांशः, रामः त्रयः, इषवः पंच, षट् त्र्यंशः, अग्नयस्त्र्यंशः, द्वौ यमौ, द्वौ, इति ॥ ४५ ॥ एवमेकादशेऽध्याये गणेशप्रीतये मुदा ॥ यथामति कृता टीका संशोध्येयं मनीषिभिः ॥१॥ इति श्रीमद्बृहत्पाराशरहोरोत्तरभागे श्रीमदध्यक्षान्वयवेदशास्त्राध्ययनवद्यविद्योतितदशादिङ्मंडलजटाशंकरसूनु-ज्योतिर्विच्छ्रीधरेण वि० सु० टी० एकादशोऽध्यायः ॥ ११ ॥

भाषा-अब कलांशपति अर्धहोरांशपति कहते हैं. सर्व, तृतीयांश, सप्तांश, तृतीयांश, पंचमांश, षष्ठांश, तृतीयांश, द्वितीयांश, द्वितीयांश, यह अधिपति और हारक जानना ॥ ४५ ॥

इति बृ० भाषाटीकायां एकादशोऽध्यायः ॥ ११ ॥

ग्रहेषु सर्वेषु बलोत्तरेषु स्वोच्चांशगेषु प्रबलस्य वर्गे ॥ दिग्वीर्यचेष्टाबलपूर्तियुक्ते पैण्ड्येषु नीचार्धकृतापहराः ॥ १ ॥ अष्टत्रिंशद्भिदाः संति ताः स्वोच्चादिसुसंस्कृताः ॥ लग्नादिभावगानां च ग्रहाणां स्थितिभेदतः ॥ २ ॥ द्विघ्नाश्चतुरशीतिश्च भिदाः संति द्विजोत्तम ॥ स्वोच्चादिस्थितिभेदेन भिन्नाः सूर्येषुभूमयः ॥ ३ ॥

टीका–द्वादशेऽस्मिन्नथाऽध्याये टीकायां धिषणाप्रदः ॥ सिद्धिबुद्धिपतिः श्रीमान् गणेशः पातु सर्वदा ॥ १ ॥ पूर्वोक्तदायग्रहणं खेटरश्मिबलादिना ॥ विचार्यतेऽथ मुनिना द्वादशेऽत्र सविस्तरम् ॥२॥ अथ श्रीमत्पराशरो द्वादशाऽध्याये रश्मिबलादितारतम्येनायुर्दायमुपदिशति–तत्रादौ पैंड्यायुषि भेदान् गणयति ग्रहेष्वित्यादित्रिभिः । पैंड्येषु "पैंड्यो द्वादशधा प्रोक्तः" इति प्रागुक्तेषु पिंडायुर्दायेषु नीचार्धकृतापहाराः नीचार्धेन कृतः अपहारो यासां ताः अष्टत्रिंशत् ३८ संख्याका भिदा भेदाः संति कस्य ग्रहस्य तदाह सर्वेषु ग्रहेषु बलोत्तरेषु सत्सु अथ वा सर्वेषु स्वोच्चांशगेषु सत्सु प्रबलस्याधिकबलस्य दिग्वीर्यचेष्टाबलपूर्तियुक्ते पूर्णदिग्बलपूर्णचेष्टाबलसहिते वर्गे वर्तमानस्य ग्रहस्येति । अथ ताः अष्टत्रिंशद्भिदाः स्वोच्चादिसुसंस्कृताः स्वकीयोच्चादिभिः सुसंस्कृताः सत्यः द्विघ्ना द्विगुणितसंख्याका ७६ भवंति । अथ लग्नादिभावगानां लग्नादिद्वादशभाववर्तिनां ग्रहाणां स्थितिभेदतः स्थितिभेदेन चतुरशीतिभेदा ८४ भवंति । हे द्विज ! स्वोच्चादिस्थितिभेदेन स्वकीयोच्चमूलत्रिकोणादिस्थितिवशाद्भिन्नाः सूर्येषुभूमयः १५१२ द्वादशाधिकपंचदशशतभेदा भवंति इति ॥ १ ॥ २ ॥ ३ ॥

भाषा-अब पिंडायुदार्यके भेद कहते हैं. पहिले पिंडायुदार्यके बारह भेद कहते हैं. पीछे नीचमें अर्धहानि करनेसे ३८ भेद हैं. अब यह ३८ भेदमें अपने उच्चादिक संस्कृत होवें तो द्विगुणित ७६ भेद होते हैं. बारह भावके अनुवर्ति ग्रहोंके स्थितिके योगसे चौराशी भेद होते हैं. और हे मैत्रेय ! अपने स्वराशि उच्च मूल त्रिकोणादि स्थान स्थिति निमित्तसे १५१२ भेद होते हैं ॥ १ ॥ २ ॥ ३ ॥

सलग्नानां बलैः सर्वैराधिकानां क्रमाद्विज ॥ अंशोद्भवस्तथा पैंड्यो निसर्गोत्थाभिधः परः ॥ ४ ॥ शतस्वरांशो भौमाच्च नक्षत्रांशकसंज्ञकौ ॥ स्वरांशश्चेतरो दायः करदायस्तथेतरः ॥ ५ ॥

टीका-अथ लग्नग्रहबलतारतम्येन अंशाद्यन्यतमायुर्दायग्रहणमाह-सलग्नानामित्यादिपंचश्लोकपर्यन्तम् । सलग्नानां लग्नसहितानां रव्यादिग्रहाणामित्यर्थः । एतेषामष्टानां मध्ये बलैरधिकानां बलाधिक्यानां अधिकबलतारतम्येन इत्यर्थः हे द्विज मैत्रेय ! क्रमात् क्रमशः आयुर्दायो ग्राह्य इति भावः । कोऽसौ क्रमस्तदाह लग्ने बलवति अंशोद्भवः अंशोत्पन्नः तथा रवौ बलवति पैंड्यः चंद्रे बलवति निसर्गोत्थाभिधः निसर्गोत्थः निसर्गोत्पन्न इत्यभिधा नाम यस्य सः तथा भौमान् नाम भौमे बलवति शतःस्वरांशः शतस्वरांशसंज्ञकः तथा बुधे बलवति नक्षत्रसंज्ञकः तथा गुरौ बलवति अंशसंज्ञकः नवांशनामक इत्यर्थः। तथा शुक्रे बलवति स्वरांशसंज्ञकः तथा शनौ बलवति करदायः एतत्संज्ञकः दायो ग्राह्य इति ॥ ४ ॥ ५ ॥

भाषा-अब कौनके बलसे कौनका आयुर्दाय लेना सो कहते हैं. हे मैत्रेय ! लग्न बलवान् होवे तो अंशायुर्दाय लेना. सूर्य बलवान् होवे तो पैंड्यायुष्य

लेना. चंद्र बलवान् होवे तो निसर्गायु लेना. मंगल बलवान् होवे तो शतस्वरांशायुर्दाय लेना. बुध बलवान् होवे तो नक्षत्रायुष्य लेना. गुरु बलवान् होवे तो नवांशायुदाय लेना. शुक्र बलनान् होवे तो स्वरांशायुर्दाय लेना. शनि बलवान् होवे तो करदाय नामक आयुष्य लेना ॥ ४ ॥ ५ ॥

स्वोच्चनीचसुहृच्छत्रुवर्गगैश्च चतुर्विधः॥ अतिनीचातिशत्रोश्च भागराशिगतस्य च ॥ ६ ॥ समुदायाष्टवर्गश्च भिन्नाष्टक उदीरितः॥ तत्र मूलत्रिकोणे च भिन्नवर्गे च वृद्धिकृत् ॥ ७ ॥

टीका-अथ स्वोच्चाद्यधिकारतारतम्येन आयुर्ग्रहणे विशेषमाह स्वोच्चेति सार्धेन । स्वोच्चनीचसुहृच्छत्रुवर्गगैः चतुर्विधो ग्राह्यः तथा षड्वर्गांतर्गतस्वोच्चवर्गवर्तमानस्य पैंड्यो ग्राह्यः तथा स्वनीचवर्गवर्तमानस्य निसर्गः एतत्संज्ञकः दायः तथा सुहृद्वर्गवर्तमानस्य शतस्वरांशः तथा शत्रुवर्गगतस्य नक्षत्रसंज्ञकः तथा अतिनीचनवांशराशिवर्तमानस्य समुदायाष्टवर्गसंज्ञकः तथातिशत्रुनवांशराशिवर्तमानस्य भिन्नाष्टकसंज्ञकः उदीरितः कथित इति ॥ ६ ॥ तत्र हानिवृद्धी आह-अत्रेति अर्धद्वयेन । तत्र तस्मिन्नायुर्दाये मूलत्रिकोणे मित्रवर्गे च वर्तमानस्य ग्रहस्य वृद्धिकृत् प्रागुक्तरीत्या वृद्धिः कार्येत्यर्थः। अर्थात् नीचातिशत्रुवर्गे प्रागुक्ता हानिरिति भावः। तथा तेन प्रकारेण समारिवर्गे उदासीनशत्रुवर्गवर्तमानस्य न वृद्धिहरणे प्रागुक्तवृद्धिहरणे नस्त इति ॥ ७ ॥

भाषा-उच्चादिकके बलसे विशेष कहते हैं. स्वोच्चवर्गमें होवे तो पैंड्यायुष्य लेना. स्वनीचवर्गमें होवे तो निसर्गायुष्य लेना. त्रिवर्गमें होवे तो स्वरांशायु लेना. शत्रुवर्गमें होवे तो नक्षत्रायु लेना. आति नीच नवांशमें होवे तो समुदायाष्टकवर्गायुष्य लेना. अति शत्रु नवांश राशिमें होवे तो भिन्नाष्टक

वर्गायु लेना ॥ ६ ॥ जो ग्रह मूलत्रिकोणमें त्रिवर्गमें होवे तो पूर्वोक्त रीतिसे वृद्धि करना. नीचशत्रुवर्गमें होवे तो हानि करना. समशत्रुवर्गके ग्रहकी आयुष्यमें वृद्धि हानि नहीं करना ॥ ७ ॥

तथा समारिवर्गे च न वृद्धिहरणे तथा ॥ सूर्याद्यः
क्रमाल्लग्नगताश्चेद्बलवत्तराः ॥ ८ ॥

टीका-अथ लग्नगतबलवद्ग्रहतारतम्येन आयुराह-सूर्यादय इति सपादार्धकद्वयेन। सूर्यादयः क्रमात्सप्त ग्रहाः बलवत्तराः बलानि संति येषां ते बलवंतः अतिशयेन बलवंतो बलवत्तराः अतिबलिन इत्यर्थः । एवंभूताः लग्नगताः लग्ने वर्तमानाश्चेत्पैंड्यः ध्रुवः समुदायाष्टवर्गः भिन्नाष्टवर्गः प्रक्रमानुगतः अंशकः करदायः ग्राह्य इति ॥ ८ ॥

भाषा-सूर्योदय इस विषयमें और विशेष कहते हैं. सूर्यादि ग्रह बलवान् होके लग्नमें बैठे होवे तो क्रमसे आयुर्दाय लेना सूर्यसे पैंड्य १ चन्द्रसे ध्रुव २ मंगलसे समुदायाष्टवर्ग ३ बुधसे भिन्नाष्टवर्ग ४ गुरुसे प्रक्रमानुगत ५ शुक्रसे अंशकायु ६ शनिसे करदाय ७ यह क्रमसे लेना ॥ ८ ॥

पैंड्यो ध्रुवोऽष्टवर्गोत्थः प्रक्रमानुगतोंऽशकः ॥ कर-
दायः क्रमाल्लग्ने रव्यादौ तु स्थिते सति॥९॥पैंड्यः
स्वरांशो ध्रुवदाय एव तत्प्रक्रमांशश्च तथांशकोत्थः॥
भिन्नाष्टवर्गः समुदायसंज्ञः करोत्थ उच्चादिषु
योजनीयः॥ १० ॥

टीका-उच्चाद्यधिकारवशाल्लग्नगतानामायुःक्रममाह-क्रमादित्याद्यर्धसहितदशमश्लोकेन । लग्ने जन्मलग्ने क्रमात् क्रमशः रव्यादौ सूर्यप्रभृतिग्रहे उच्चादिषु उच्चमूलत्रिकोणादिसंबंधेन स्थिते वर्तमाने

एते आयुर्दायाः योजनीयाः इत्यन्वयः । तानेवाह पैंड्यः पिंडायुर्दायः लग्नस्थाने रव्यादौ उच्चस्थे सति ग्राह्याः एवं त्रिकोणस्थे सति स्वरांशो ग्राह्यः तथा स्वर्क्षस्थे सति ध्रुवो ग्राह्यः अधिमित्रस्थानस्थे प्रक्रमांशः तथा मित्रक्षेत्रस्थेंऽशायुर्दायः तथा शत्रुक्षेत्रस्थे सति भिन्नाष्टवर्गः तथा अधिशत्रुक्षेत्रस्थे सति समुदायाष्टवर्गः स्वनीचस्थे सति करः अंशायुर्दायः ननु समक्षेत्रलग्नगश्चेत् किमित्याकांक्षायां तत्राभाव एव बोध्यः एवं यवनाचार्यादीनामपि मतमिति ॥ ९ ॥ १० ॥

भाषा-जन्मलग्नमें उच्चादिस्थित सूर्यादिग्रहोंसे आयुष्यका भेद कहते हैं. लग्नमें उच्चाराशिका सूर्यादिक ग्रह होवे तो पिण्डायुर्दाय लेना. त्रिकोणका होवे तो स्वरांशायु लेना. स्वराशिका होवे तो ध्रुवायुष्य लेना. अधिमित्रका होवे तो प्रक्रमांश लेना. मित्रक्षेत्रका होवे तो अंशायुर्दाय लेना. शत्रुक्षेत्रका होवे तो भिन्नाष्टकवर्ग लेना. अधिशत्रुक्षेत्रका होवे तो समुदायाष्टवर्ग लेना. स्वनीचका होवे तो अंशायुर्दाय लेना. समका होवे तो अभाव जानना ॥ ९ ॥ १० ॥

ध्रुवः सुखस्थस्य तु सप्तमस्य पैंड्यः स्वरांशः खलु कर्मगस्य ॥
द्वितीयसंस्थस्य च पैंड्य उक्तस्तृतीयधीधर्मगतस्य चैव ॥ ११ ॥
षष्ठव्ययस्थस्य तु भिन्नसंज्ञस्तथेतरो मृत्युगतस्य चैवम् ॥
पैंड्यः स्वरांशो ध्रुव आय उक्तः पैंड्यो भवेदाद्यगतस्य चैव ॥ १२ ॥

टीका-अथ प्रकारांतरेणायुर्दायग्रहणमाह-ध्रुव इति द्वयेन । सुखस्थस्य लग्नाच्चतुर्थभावगतस्य ध्रुवः आयुर्दायो ग्राह्यः सप्तमस्थस्य पैंड्यः तथा कर्मगस्य दशमस्थस्य द्वितीयसंस्थस्य च स्वरांशो ग्राह्यः तथा तृतीयधीधर्मगतस्य लग्नात् तृतीयपंचमनवमस्थस्य

पैंड्यो ग्राह्यः षष्ठस्थस्य तु भिन्नवर्गायुः तथा मृत्युगतस्य अष्टमस्थस्य तथेतरः समुदायाष्टवर्गायुर्ग्राह्यः आये वर्तमानस्य पैंड्यः वरांशध्रुवदायान्यतमः तथा आद्यगतस्य लग्नस्थस्य पैंड्य उक्त इति ॥ ११ ॥ १२ ॥

भाषा–मतांतर कहते हैं. लग्नसे चौथे घरमें ग्रह हो तो ध्रुवायुष्य लेना. सातवें होवे तो पैंड्य लेना. दसवें घरमें और दूसरे घरमें ग्रह होवे तो स्वरांश आयु लेना. तीसरे पांचवे नववें घरमें होवे तो पैंड्य लेना. छठे घरमें होवे तो भिन्नाष्टकवर्ग लेना. आठवें घरमें होवे तो समुदायाष्टकवर्ग लेना. ग्यारहवें घरमें होवे तो पैंड्य स्वरांश ध्रुव यह तीनोंमेंसे एक लेना. लग्नमें होवे तो पैंड्य लेना ॥ ११ ॥ १२ ॥

लाभे रवींद्वारबुधेज्यशुक्रमंदाः स्थिताः प्रक्रमदाय एव ॥ लग्नार्यभौमज्ञरवीन्दुमन्दशुक्रास्तृतीये सुतभे च धर्मे ॥ १३ ॥ स्वे शुक्रमंदार्यबुधार्कभौमचंद्राः सुखेऽस्ते निधनेऽपि चैव ॥ बुधात्क्रमाद् व्युत्क्रमतश्चचंद्राद्भौमार्कमंदार्यसितज्ञचंद्राः ॥ १४ ॥ षष्ठे व्यये कर्माणि लाभगा वा रवीन्दुशुक्रार्किकुजार्यसौम्याः ॥ सौम्यात्कुजाद्भार्गवतः क्रमात्स्युर्मिश्रे तु दाये क्रमशः प्रदिष्टम् ॥ १५ ॥

टीका–अथ द्वादशभावेषु ग्रहाणां मिश्रायुर्दायग्रहणक्रममाह–लाभे इत्यादिपंचदशश्लोकपर्यंतम् । लाभे एकादशस्थाने मिश्रायुर्विषये प्रक्रमदाय एव ग्राह्यः तत्र क्रमः रवींद्वारबुधेज्यशुक्रमंदाः क्रमेणायुर्दाये स्थिता ज्ञेया लग्ने अत्र सप्तमीविभक्तिलोप आर्षः लग्नस्थाने तथा तृतीये सुतभे पंचमे धर्मे नवमे

च एतेषु भावेषु आर्यभौमज्ञरवीन्दुमंदशुक्राः क्रमेणायुर्दायस्थिताः ज्ञेयाः । स्वे द्वितीयभावे क्रमेण शुक्रमंदार्यबुधार्कभौमचंद्रा आयुर्दातारः तथा सुखे चतुर्थभावे बुधात् पूर्वोक्तक्रमे बुधसकाशाद् ग्रहक्रमो ग्राह्यः ४ । १ । ३ । २ । ६ । ७ । ५ एते ग्राह्या इत्यर्थः । अस्ते चंद्रादुत्क्रमतः नामप्रथमोक्तः क्रमः विलोमतो ग्राह्यः २ । ३ । १ । ४ । ५ । ७ । ६ । एवं क्रमादित्यर्थः । निधनेऽष्टमभावे भौमार्कमंदार्यसितज्ञचंद्राः क्रमादायुर्दातारो ग्राह्याः । षष्ठे रवींदुशुक्रार्किकुजार्यसौम्याः क्रमाद्ग्राह्याः । व्यये द्वादशभावे सौम्यात् बुधात् प्रथमोक्तक्रमो ग्राह्यः ४ । १ । २ । ६ । ७ । ३ । ५ एते इत्यर्थः । कर्मणि दशमभावे कुजात् प्रथमोक्तप्रकारो ग्राह्यः ३ । ५ । ४ । १ । २ । ६ । ७ एवमित्यर्थः । लाभे वा प्रथमतः अन्यः क्रम उक्त एव तत्र विकल्पेन भार्गवतः पूर्वक्रमे शुक्रादितः क्रमो ग्राह्यः ६ । ७ । ३ । ५ । ४ । १ । २ एवं मिश्रायुर्दाये क्रमशः सर्वभावेषु ग्रहणं प्रदिष्टं कथितमिति ॥१३॥१४॥१५॥

भाषा—द्वादश भावोंमें ग्रहोंका मिश्रायुर्दाय लेनेका क्रम कहते हैं. ग्यारहवें घरमें मिश्रायु लेनेके वास्ते सू. चं. मं. बु. गु. शु. शनि यह आयुर्दाय स्थित जानना. लग्नम तथा । ३।५। ९ । में घरमें क्रम करके गु. मं. बु. सू. चं. श. शुक्र यह आयुर्दायु देनेवाले जानना. दूसरे घरमें क्रमसे शु. श. गु. बु. सू. मं. च. आयुदाय देनेवाले जानना. चौथे घरमें क्रमसे बु. सू. मं. चं शु. श. गु. आयुर्दाय देनेवाले जानना. ७ वें घरमें चं. मं. सू. बु. गु. श. शु. यह आयुर्दाय देनेवाले जानना. ८ वें घरमें मं. सू. श. गु. शु. बु. चं. यह क्रमसे आयुर्दायक जानना. ६ वें घरमें सू. चं. शु. श. मं. गु. बु. क्रमसे लेना. १२ वें घरमें बु. सू. चं. शु. श. मं. गु. यह क्रमसे लेना. १० वें घरमें मं. गु. बु. सू. चं. शु. श. यह क्रमसे लेना. ग्यारहवें घरमें शु. श. मं. गु. बु. सू. चं. यह क्रमसे आयुर्दाय देनेवाले कहे हैं ॥ १३ ॥ १४ ॥ १५ ॥

नक्षत्रदायोंऽशकपिंडदायो भिन्नाष्टवर्गः समुदायसंज्ञः ॥ स्वरांशदायौ क्रमशः प्रदिष्टौ विशेषतस्त्वत्र वदामि यस्मात् ॥ १६ ॥

टीका-अथोक्तायुर्दायान् गणयति-नक्षत्रेति । नक्षत्रदायः, अंशदायः, पिंडदायः, भिन्नाष्टवर्गायुर्दायः समुदायसंज्ञकाष्टवर्गायुर्दायः, शतस्वरांशः, स्वरांशायुर्दायः, नवमांशायुर्दायश्चेति मिश्रायुषि उक्ताः । तत्र यस्मादायुर्दायात् यावंतो भेदाः उत्पद्यंते तद्विशेषतो वदामि कथयामि ॥ १६ ॥

भाषा-अब आयुर्दायकी गणना कहते हैं. नक्षत्रायु, त्र्यंशायु, पिंडायु, भिन्नाष्टकवर्गायु, समुदायाष्टकवर्गायु, स्वांशायु, शतस्वरांशायु, नवमांशायु यह आयुष्योंसे आगे जो भेद उत्पन्न होते हैं सो कहते हैं ॥ १६ ॥

अष्टत्रिंशदमिश्रे तु अंकसूर्यकलांशकैः ॥ मूर्छाक्षिणीभिदाः संति रश्मिजास्त्रिंशदेव हि ॥ १७ ॥ एकस्य विषये द्वौ चेदाययोगदलं भवेत् ॥ ज्यादयश्चेद्गुताह्यादिसंख्याताश्च दशा भवेत् ॥ १८ ॥

टीका-अथामिश्रायुर्दायभेदानाह-अष्टत्रिंशदिति । आमित्रायुर्दायेऽष्टत्रिंशद्भेदाः मुख्याः तत्रापि अंकसूर्यकलांशकैः नवांशद्वादशांशषोडशांशैः मूर्च्छाक्षिणीभिदाः २२१ एकविंशत्याधिकाद्विशतभेदाः अवांतराः सन्ति तथा तत्रैव रश्मिजाः रश्मिसमुद्भवाः त्रिंशदेव ३० हीति प्रसिद्धम् ॥ १७ ॥ अथ मिश्रायुर्दायदशाग्रहणरीतिमाह एकस्येति । एकस्य ग्रहस्य विषये सहवर्तमानौ द्वौ आयुर्दातारौ प्राप्तौ चेत् दाययोगदलं भवेत् दायद्वयस्य योगं कृत्वाऽर्धावशेषेण

दशा भवति तथा एकस्य ग्रहस्य विषये त्र्यादयः त्रिप्रभृतयः ग्रहाः सहवर्तमानाश्चेत्तदा त्र्यादिसंख्याप्ता प्राप्तत्र्याद्यायुर्दाययोगं कृत्वा त्र्यादिमिश्रणसंख्याकांकैः भागं गृहीत्वा तत्तद्दशा ज्ञेयेति ॥ १८ ॥

भाषा -अब अमिश्रायुर्दायके भेद कहते हैं. अमिश्रायुके ३८ भेद हैं. उनमें भी नवांश, द्वादशांश, षोडशांशके भेदसे २२१ भेद होते हैं. और रश्मिआयुष्यके तीस भेद हैं ॥ १७ ॥ एक घरमें दो आयुष्य देनेवाले होवें तो दोनोंका योग करके उसका अर्ध लेना. तीन आदि लेके ग्रहोंका योग होवें वो जितने होवें उनका आयुर्योग करके वो संख्यासे भाग लेना. सो आयुष्यदशा जानना ॥ १८ ॥

रवावुच्चगते चान्ये बलिष्ठा मूलकोणगाः ॥ स्वोच्चस्थेषु बलिष्ठेषु सर्वेषु शशहंसके ॥१९॥ एवं चिरायुषां योगेष्वन्येषु गणितेषु च ॥ चंद्रयोगेषु त्रिषु च चंद्रे तु बलवत्तरे ॥ २० ॥

टीका-अथोक्तेषु नक्षत्राद्यायुर्दायेषु पिंडायुर्दायग्रहणस्थलान्याह-रवावित्यादिसार्धविंशतिश्लोकपर्यन्तम् । रवौ सूर्ये उच्चगते उच्चास्थिते सति अन्ये ग्रहा बलिष्ठाः मूलत्रिकोणगा वा स्युः तथा सर्वेषु ग्रहेषु बलिष्ठेषु, उच्चस्थेषु सत्सु वा तथा शशयोगे हंसयोगे वा एवं प्रकारेण अन्येषु गणितेषु उक्तान्यचिरायुर्दायकारकगणनांतर्गतेषु योगेषु सुनफा अनफादुर्धरासंज्ञकेषु त्रिषु चंद्रयोगेषु चंद्रसमुद्भवेषु योगेषु चंद्रे बलवत्तरे सति तथा सर्वेषु राजयोगेषु सत्सु पराशरः पैंड्यं पिंडायुर्दायग्रहणमाहेति ॥ १९॥ २० ॥

भाषा-पिंडायुर्दाय लेनेका भेद कहते हैं सूर्य उच्चका होवे, दूसरे ग्रह बलिष्ठ होवें, शशयोग, हंसयोग, और दीर्घायुयोग, सुनफा, अनफा, दुरुध-

रायोग, चंद्रयोग, और राजयोग, यह योग होवें चंद्र बलवान् होवे तो. पिंडायुर्दाय ग्रहण करना ऐसा पराशर कहते हैं ॥ १९ ॥ २० ॥

**राजयोगेषु सर्वेषु पैंड्यमाह पराशरः ॥ लग्ने गुरौ
कर्मगते च भानौ चंद्रे सुखे वाऽस्तगते बलिष्ठे ॥ पूर्णे
त्रिकोणोपचये शुभेषु पापेष्वथात्रोक्तमसंस्थितेषु ॥
॥२१॥ शुभाश्च केंद्रे त्रिषडायभेऽन्ये विपर्यये पैंड्य-
मतः प्रदिष्टम् ॥ रिःफाष्टषष्ठेषु सहस्ररश्मौ भौमे
क्रमाच्छीतकरे तु पैंड्यः ॥ २२ ॥**

टीका--अथ प्रकारांतरेण पैण्ड्यायुर्ग्रहणमाह—लग्ने इत्यादिपादोनत्रयोविंशतिपर्यन्तम् । लग्ने गुरौ सति कर्मगते दशमस्थे भानौ सति सुखे चतुर्थस्थाने वाऽस्तंगते सप्तभावस्थे बलिष्ठे बलवति पूर्णे चंद्रे सति तथा त्रिकोणोपचये त्रिकोणं च उपचयं चानयोः समाहारस्तस्मिन् समाहारैकवचनं "सनपुंसकम्" इति नपुंसकत्वम् । पंचमनवमतृतीयषष्ठदशमैकादशभावेष्वित्यर्थः । शुभे शुभग्रहे सति तथाऽत्रोक्तं स्थानं प्रति असंस्थितेषु अवर्तमानेषु पूर्वोक्तान्यस्थानास्थितेषु द्वादशभावलग्नधनसप्तमाष्टमभावे स्थितेषु सत्सु तथा केन्द्रत्रिषडायभे च शुभाश्चेत् लग्नचतुर्थसप्तमदशमतृतीयषष्ठैकादशेषु शुभेष्वित्यर्थः । तथाऽन्ये नाम पापाः विपर्यये उक्तान्यस्थाने वर्तमानाश्चेत् पैण्ड्यं पिंडायुः प्रदिष्टं कथितं तथा रिःफाष्टषष्ठेषु १२।८।६। सहस्ररश्मौ रवौ भौमे शीतकरे च क्रमात् स्थितेषु सत्सु पैंड्यः ग्राह्यः तथा लग्नेऽष्टमे सप्तमे वा पापाः अथ वा षष्ठे कर्मभे दशमे रिःफभे द्वादशभावे च सौम्याश्चेत् नीचाभावे नीचराशिरहिते सति पैंड्यदायः प्रदिष्ट इति ॥ २१ ॥ २२ ॥

भाषा-अब प्रकारांतरसे पिंडायुष्यका ग्रहण कहते हैं. गुरु लग्नमें, सूर्य १०, चंद्र ४, वा ७, शुभग्रह ५।९।३।६।११, पापग्रह १२।१।२।७।८। शुभग्रह १।४।७।१०।३।६।११, सूर्य १२, मंगल ८, चंद्र ६, ऐसे ग्रह पूर्वोक्त योग होवें तो पिंडायुष्य लेना अथवा पापग्रह १।८।७ शुभग्रह ६।१०।१२ नीचवर्जित होवें तो पिंडायुष्य लेना ॥ २१ ॥ २२ ॥

पापाल्लग्ने चाष्टमे सप्तमे वा सौम्याः षष्ठे कर्मभे रिःफभे वा ॥ नीचाभावे पैण्ड्यदायः प्रदिष्टो मंदे लग्ने स्वोच्चगे च ध्रुवाख्यः ॥ २३ ॥

टीका-अथ ध्रुवाद्यन्यायुर्दायग्रहणं वक्तुं मंदेत्यादि तत्रादौ ध्रुवायुर्ग्रहणमाह-मंद इति पादेन । लग्ने स्वोच्चे तुलास्थे इत्यर्थः । मंदे शनैश्चरे सति ध्रुवाख्यः आयुर्दायो ग्राह्य इति ॥ २३ ॥

भाषा-ध्रुवायुष्य ग्रहण करनेका नियम कहते हैं. जन्मलग्नमें तुलाराशिका होके शनि बैठा होवे तो ध्रुवायुष्य लेना ॥ २३ ॥

वीणायां कार्मुके चक्रे गदायामर्धचन्द्रके ॥ रवौ पैंड्योऽशको लग्ने ध्रुवश्चन्द्रे च भूमिजे ॥२४॥ भिन्नाष्टवर्गः सौम्ये तु नक्षत्रांशसमुद्भवः॥ गुरौ नक्षत्रदायः स्यात्प्रक्रमानुगतः सिते ॥२५ ॥

टीका-अथ योगविशेषेण बलवत्तरलग्नसप्तमग्रहेषु पृथक् दायविशेषग्रहणमाह-वीणायामित्यादिसार्धपंचविंशतिश्लोकपर्यन्तम् । वीणायां पूर्वार्धोक्तवीणायोगे कार्मुके योगे चक्रे योगे गदाख्ययोगे अर्धचंद्रके योगे वा सति रवौ बलवत्तरे सति पैंड्यो ग्राह्यः लग्ने बलवत्तरेंऽशकः चन्द्रे बलवत्तरे ध्रुवः भूमिजे भौमे बलवत्तरे भिन्नाष्टवर्गः

सौम्ये बुधे बलवत्तरे नक्षत्रांशसमुद्भवः गुरौ नक्षत्रदायः सिते बलवति प्रक्रमानुगतः मंदे बलवत्तरे तु समुदायाष्टवर्गः आयुर्दायो ग्राह्य इति ॥ २४ ॥ २५ ॥

भाषा—अब योग विशेषसे आयुर्दायका ग्रहण कहते हैं. वीणायोग, कार्मुकयोग, चक्रयोग, गदायोग, अर्धचंद्रयोग होवे, सूर्य बलवान् होवे तो पिंडायुष्य लेना. रवि बलवान् होवे तो पिंडायुष्यलेना. लग्न बलवान् होवे तो अंशकायु लेना. चंद्र बलवान् होवे तो ध्रुवायु लेना. मंगल बलवान् होवे तो भिन्नाष्टक वर्गायु लेना. बुध बलवान् होवे तो नक्षत्रांशाय लेना. गुरु बलवान् होवे तो नक्षत्रायु लेना. शुक्र बलवान् होवे तो प्रक्रमानुगतायु लेना. शनि बलवान् होवे तो समुदायाष्टकवर्गायु लेना ॥ २४ ॥ २५ ॥

**समुदायाष्टवर्गस्तु मंदे तु बलवत्तरे ॥ वाप्यां पाशे
शरे पद्मे समुद्रार्कादिषु क्रमात् ॥ २६ ॥ बलिष्ठेषु
नवांशोत्थो ध्रुवः पैण्ड्यः स्वरांशकः ॥ भिन्नाष्टवर्गो
ह्यंशोत्थो नक्षत्रांशक ईरितिः ॥ २७ ॥**

टीका—पुनःप्रकारांतरमाह—वाप्यामित्यादिसप्तविंशतिश्लोकपर्यन्तम् । वापीपाशशरपद्मसमुद्राख्यपंचयोगेषु सत्सु उक्तान्यतमैके इत्यर्थः । अर्कादिषु सप्तसु बलिष्ठेषु सत्सु क्रमात् अर्के नवांशः चंद्रे ध्रुवः भौमे पैंड्यः बुधे स्वरांशः गुरौ भिन्नाष्टवर्गः शुक्रेऽशोत्थः शनौ नक्षत्रांशकश्च ईरितः काथितः ॥ २६ ॥ २७ ॥

भाषा—और प्रकारांतर कहेत हैं. वापी, पाश, शर, पद्म, समुद्र, यह पांच योगोंमेंसे कोईभी एक आदि योग होवे, सूर्यादि सात ग्रहोंमेंसे जो बलवान् होवे तो क्रमसे आयुष्य लेना. सूर्य बलवान् होवे तो नवांशायु, चन्द्र ध्रुवायु, मं. पैंड्यायु, बु. स्वरांशकायु, गु. भिन्नाष्टकवर्गायु, शु. अंशायु, श. नक्षत्रांशायु कहा है ॥ २६ ॥ २७ ॥

रज्जौ विहंगे मालायां नले च मुसले क्रमात्॥ पैंड्यो
ध्रुवः क्रमात्प्रोक्तो रव्यादौ तु बलोत्तरे ॥ २८ ॥

टीका-पुनः प्रकारांतरमाह-रज्जाविति । रज्जुविहंगमालानलमुसलेषु पूर्वाधोक्तेषु पंचसु पंचान्यतमे एकास्मिन्नव्यादौ बलोत्तरे सति क्रमात् पैंड्यो ध्रुवश्च ग्राह्यः यथा रज्जौ पैंड्यः विहंगे ध्रुवः मालायां पैंड्यः नले ध्रुवः मुसले पैंड्य इति ॥ २८ ॥

भाषा-प्रकारांतर कहते हैं. जन्मकुंडलीमें रज्जुयोग होवे तो पैंड्यायु लेना. विहंग होवे तो ध्रुव, माला होवे तो पैंड्य, नल होवे तो ध्रुव, मूसल होवे तो पैंड्य लेना ॥ २८ ॥

गंडे शक्तौ च शकटे यूपे केदारशूलयोः ॥ प्रक्रमा-
नुगतश्चाथ राश्मिजौ ध्रुवसंज्ञितौ ॥ २९ ॥ अष्टवर्ग-
समुद्भूतौ क्रमादेवं बलोत्तरे ॥ नौछत्रवज्रदामाख्ये
स्वरदायोऽतिनीचगे ॥ ३० ॥

टीका-पुनः प्रकारांतरमाह-गंडे इति सार्धेन । गंडशक्तिशकटयूपकेदारशूलाख्यषड्योगान्यतमे योगे सति क्रमाद्रव्यादौ बलवत्तरे प्रक्रमानुगतः राश्मिजः ध्रुवसंज्ञितः अष्टवर्गसमुद्भूत आयुर्दायश्च क्रमाद्ग्राह्य इति ॥ २९ ॥ पुनर्योगांतरमाह-नावित्यर्धेन । नौयोगे छत्रयोगे वज्रयोगे दामाख्ययोगे च अतिनीचगे रव्यादौ सति स्वरदायः स्वरांशायुर्दायो ग्राह्यः ॥ ३० ॥

भाषा-गंड होवे तो प्रक्रमायु, शक्ति होवे तो रश्म्यायु, शकट होवे तो ध्रुवायु, यूप होवे तो अंशायु, केदार होवे तो भिन्नाष्टकवर्गायु शूल होवे तो समुदायाष्टकवर्गायु सूर्यादि बलवान् ग्रह होवे तो लेना ॥ २९ ॥ नौकायोग,

छत्र, वज्र, दाम यह योग होवे, सूर्यादि अति नीचके होवें तो स्वरांशायु लेना ॥ ३० ॥

कूटे गंडे शरे नागे गोले शृंगाटके पुनः ॥ कालकूटे क्रमात्प्रोक्ताः पैंड्याद्याः सप्त वै द्विज ॥३१॥ पैंड्यास्त्रयो ध्रुवाश्चांशदायाश्चाष्टकवर्गकौ ॥ द्रेष्काणेषु नवांशेषु द्वादशांशेषु च क्रमात्॥ कलांशेषु नव प्रोक्ता दायाश्चैव पुनः पुनः ॥ ३२ ॥

टीका–पुनर्योगांतरमाह–कूटेति । कूटे गंडे शरे नागे गोले शृंगाटके कालकूटे च क्रमात्पैंड्याद्याः पैण्ड्यध्रुवाष्टवर्गोत्थप्रक्रमानुगतांशायुः स्वरांशरश्म्याख्याः सप्तैव ग्राह्याः हे द्विज मैत्रेयेति ॥ ३१ ॥ पुनः प्रकारांतरमाह–पैंड्या इति सार्धेन । द्रेष्काणेषु त्रिषु पैण्ड्यकाद्यास्त्रयः पैंड्यध्रुवस्वरांशाः क्रमाद् ग्राह्यः नवांशेषु ध्रुवाख्या नव ग्राह्याः द्वादशांशेषु अंशदायाः द्वादशभेदाभिन्नाः क्रमाद् ग्राह्याः । कलांशेषु उच्चादिनवस्थानगतेषु ग्रहेषु अष्टकवर्गसंज्ञकौ द्विविधौ पुनः पुनर्ग्राह्याः तद्यथा कलांशेन उच्चे वर्तमानस्य ग्रहस्य भिन्नाष्टवर्गसमुदायाष्टवर्गसंज्ञकाः षोडश क्रमाद्ग्राह्याः एवं त्रिकोणादिषु वर्तमानेषु ग्रहेषु ते एव समुदायाष्टकभिन्नाष्टकायुर्दायाः षोडशैव पुनः पुनः प्रोक्ता इति ॥ ३२ ॥

भाषा–हे मैत्रेय ! कूट होवे तो पैंड्य लेना, गंड होवे तो ध्रुवायु, शर होवे तो अष्टवर्गायु, नाग होवे तो प्रक्रमायु लेना, गोल होवे तो अंशायु, शृंगाटक होवे तो स्वरांशायु, कालकूट होवे तो रश्म्यायु लेना ॥ ३१ ॥ प्रकांरातर कहते हैं. प्रथम द्रेष्काणमें लग्न होवे तो पैंड्य लेना, दूसरे द्रेष्काणमें ध्रुव लेना, तीसरे द्रेष्काणमें स्वरांश लेना, नवांशमें ध्रुवादि नव आयुष्य क्रमसे लेना, द्वादशांशमें अंशादि लेना, उच्चादिक नव

स्थानोंमें जो ग्रह होवे तो भिन्नाष्टक समुदायाष्टक वर्गायुष्य क्रमसे लेना. वारंवार संख्यापूर्ति पर्यन्त गणना ॥ ३२ ॥

त्रिंशत्सवेदाः स्वरपाचकाश्च सुराश्च दंताः क्षितिपावकाश्च ॥ षट्त्रिंशदिष्वग्नय एव भानि छंदांसि मूर्च्छाश्च जिनाः कराश्चेत् ॥ ३३ ॥ पैंडयस्तथा द्वादशधा प्रभिन्नः क्रमेण दायो नियतः प्रदिष्टः ॥ तत्त्वाग्निनंदाग्नय एव रत्नदस्राग्निदस्रा ध्रुवदायभेदाः ॥ ३४ ॥ एकास्त्रयश्चेत्समुदायसंज्ञस्ततस्तु वेदा इतरोऽष्टवर्गः ॥ पंचादिकेष्वंशकदाय उक्तो रुद्राश्च सूर्या यदि पैंडय आद्यः ॥ ३५ ॥ विश्वे मनुश्चेत्स्वरभागदायो नक्षत्रदायास्थितिसंज्ञकश्चेत् ॥ ३६ ॥ नृपेऽत्यष्टित्रये प्रोक्ता आद्यपैंडयभिदास्तथा ॥ प्रक्रमानुगतो विंशत्यष्टात्रिंशेऽष्टवर्गजः ॥ ३७ ॥ चत्वारिंशत्त्रये पैंडयो नक्षत्रांशस्त्रये ततः ॥ शेषेषु षट्सु पैंडयः स्यादाद्यो गर्गोऽयमाह च ॥ ३८ ॥ इष्टरश्म्यधिकप्रोक्तक्रम एव कराधिके ॥ केंद्रादिषु ग्रहाणां च बलोत्तरवशात्क्रमः ॥ ३९ ॥

टीका-अथ रश्मिवशादायुर्ग्रहणमाह-त्रिंशदित्याद्येकोनचत्वारिंशच्छ्लोकपर्यन्तम् । त्रिंशत् ३० सवेदास्त्रिंशत ३४ स्वरपाचकाः ३७ सुराः ३३ दंताः ३२ क्षितिपावकाः ३१ षट्त्रिंशत ३६ इष्वग्नयः ३५ भानि २७ छंदांसि २६ मूर्च्छा २१ जिनाः २४ एतत्संख्याकाः कराः रश्मयः संति चेद्द्वादशधा प्रभिन्नः द्वादशप्रकारः पैण्डयः पिंडायु-

र्दायः क्रमेण क्रमशः नियतो निश्चितः प्रादिष्ट उक्तः तथा तत्त्वानि २५ नंदाग्नयः ३९ रत्नदास्रः २९ त्रिदस्राः २३ एतत्संख्याकेषु राश्मिषु ध्रुवायुर्दायभेदाश्चत्वारः क्रमशो ग्राह्याः । तथा एकात्रयः एकरश्मिमारभ्य रश्मित्रयपर्यंतम् १।२।३ एतत्संख्याकेषु राश्मिष्वित्यर्थः । समुदायसंज्ञः समुदायाष्टवर्गदायो ग्राह्यः । ततः तदनंतरं वेदाः ४ चत्वारो रश्मयश्चेदितरोऽष्टवर्गः भिन्नाष्टवर्ग इत्यर्थः । ग्राह्याः तथा पंचादिकेषु अग्रिमोक्तरुद्रसंख्याप्राग्वर्तमानेषु ५।६।७।८।९।१० एष्वित्यर्थः। राश्मिषु अंशदाय उक्तः तथा रुद्राः ११ सूर्याः १२ यदि एतत्संख्याका रश्मयः तर्हि आद्यः पैण्डचदायो ग्राह्यः तथा विश्वे १३ मनुः १४ एवं राश्मिषु स्वरभागदायः स्वरांशायुर्दायो ग्राह्यः । तिथिसंख्याकः १५ राश्मिश्चेत् नक्षत्रदायः ग्राह्यः नृपे १६ षोडशसंक्याके रश्मौ अत्यष्टित्रये १७।१८।१९ एतेषु राश्मिष्वित्यर्थः । आद्यपैंडच्यभिदाः पिंडायुर्दायादिमभेदाः ग्राह्याः तथा विंशे २० रश्मौ प्रक्रमानुगतः ग्राह्यः अष्टत्रिंशे ३८ रश्मौ अष्टवर्गजः अष्टवर्गसंज्ञको ग्राह्यः चत्वारिंशत्त्रये चत्वारिंशत्संख्याकरश्मयः यत्र यस्मिन् ४० । ४१।४२ एतेष्वित्यर्थः । पैंडचो ग्राह्यः तथाऽग्रिमत्रये ४३।४४।४५ एतेषु नक्षत्रांशः ग्राह्यः । शेषेषु २२।२८।४६।४७।४८।४९ एतेष्ववशिष्टेषु पैंडचो दायः स्यात् आद्याः आद्यषड्भेदा इत्यर्थः । अयं रश्म्यायुर्दायः मां प्रति गर्ग आहेति अयं इष्टरश्म्याधिकप्रोक्तः क्रमः बलवत्तरवशात् पूर्वं यः केन्द्रादिषु स्थानेषु उक्तः तदतिरिक्तस्थानेषु कराधिके रश्म्यधिके सति अयमुक्तक्रमः रश्म्यायुर्दायक्रम एव प्रोक्तः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

भाषा—अब रश्मिके मतसे आयुष्य लेनेका भेद बताते हैं. जन्मकालमें रश्मि ३०।३४।३७।३३।३२।३१।३६।३५।२७।२६।२१।२४। इनमेंसे कोईभी संख्या रश्मियोंकी होवे तो पिंडायुर्दाय लेना तथा २५।३९।२९।

३३ राश्मि होवे तो ध्रुवायुष्य लेना, तथा १।२।३ रश्मि होवे तो समुदायाष्टवर्गायु लेना तथा ४ राश्मि होवे तो भिन्नाष्टवर्ग लेना तथा ५।६।७।८।९।१० राश्मि होवे तो अंशायु लेना, तथा ११।१२ राश्मि होवे तो पहिला पिंडायु लेना, १३।१४ रश्मि होवे तो स्वरांशायु लेना, १५ रश्मि होवे तो नक्षत्रायु लेना, १६।१७।१८।१९ रश्मि होवे तो पहिला पिंडायुष्य लेना, २० रश्मि होवे तो प्रक्रमायु लेना, ३८ रश्मि होवे तो अष्टवर्गायु लेना, ४०।४१।४२ रश्मि होवे तो पिंडायु लेना, ४३।४४।४५ रश्मि होवे तो नक्षत्रायु लेना,२२।२८।४६।४७।४८।४९ रश्मि होवे तो पैंड्यायु लेना, यह रश्म्यायुर्दाय गर्गऋषिने मेरेको कहा है ॥ ३३ ॥ ३४ ॥३५॥३६॥३७॥ ॥३८॥३९॥

बलोत्तरवशादेव स्थानेतरवशात्तथा ॥ इष्टात्फलक्रमादेव रश्म्युक्तविधिना क्रमात् ॥ ४० ॥ कल्पादौ भगवान् गर्गः प्रादुर्भूय महामुनिः ॥ ऋषिभ्यो जातकं सर्वमुवाच कलिमाश्रितः॥४१॥अस्मिन्नुत्तरभागे तु मयानुक्तं च यद्भवेत् ॥ तत्सर्वं गर्गहोरायां मैत्रेय त्वं विलोकय ॥४२॥

इति श्रीबृहत्पाराशरहोरोत्तरभागे दायप्रकरणं नाम द्वादशोऽध्यायः॥१२॥

टीका-अथ उक्तमनुवदति-बलोत्तरवशादिति । बलोत्तरवशात् बलाधिक्यतारतम्येन स्थानांतरवशात् स्थानांतराणि स्वमित्रशत्रुक्षेत्रादीनि तद्वशात् इष्टफलक्रमात् इष्टकष्टफलवशात् तथा रश्म्युक्तविधिना एवं क्रमादायुर्दायो मयोक्त इति ॥ ४० ॥ अत्र पुनर्गर्गं प्रमाणयति-कल्पादाविति ॥ भगवान् गर्गः कल्पादौ

प्रादुर्भूतः महामुनिः महामननशीलः भूतभविष्यद्वर्तमानकालज्ञः कलिमाश्रितः कलिकालीनफलाश्रयेण सर्वं जातकं ऋषिभ्यः शिष्यभूतेभ्यः उवाच कथितवान् ' वक्ष्यत्येव कलिं श्रितः ' इति पाठे कल्पादौ प्रादुर्भूय यदुक्तवान् तत् कालबाहुल्यात् अज्ञपरंपरया मलिनत्वभिया पुनः कलिं श्रितः कलौ प्रादुर्भूतः वक्ष्याति कथयिष्यतीत्यन्वयः । अन्यत्समानम् ॥४१॥ अथ स्वोक्तशेषं गर्गशास्त्रेण पूरयति–अस्मिन्निति । अस्मिन् उत्तरभागे मया विस्तरभिया यदनुक्तम् अकथितं भवेत्स्यात् तत्सर्वं गर्गहोरायां गर्गहोराशास्त्रे सविस्तरं हे मैत्रेय ! त्वं विलोकय पश्य इति ॥ ४२ ॥ एवं यथामति व्याख्या गणेशप्रीतये कृता ॥ मयेयं शोधनीयैव कृपया प्राज्ञसत्तमैः ॥ १ ॥ इति श्रीबृहत्पाराशरहोरोत्तरभागे श्रीमद्दध्यङ्ङन्वयवेदशास्त्राद्यनवद्यविद्याविद्योतितदशदिङ्मंडलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचि० सुबो० टीकायां द्वादशोऽध्यायः ॥ १२ ॥

भाषा–यह आयुर्दायके भेद व बलकी तारतम्यतासे मित्रादि स्थानबलकी तारतम्यतासे इष्टकष्ट बलयोगसे रश्मिके निमित्तसे मैंने बताये हैं ॥ ४० ॥ ऐसा यह जातक शास्त्र कलियुगके प्रारंभसे गर्गमुनि अपना प्राकट्य करके अपने शिष्योंको कहते भये अथवा कहेंगे ॥ ४१ ॥ यह उत्तर भागमें जो मैंने नहीं कहे हैं यह सब गर्गहोरामें, हे मैत्रेय ऋषे ! तुम देखलेओ ॥ ४२ ॥

इति बृ. भाषाटीकायां द्वादशोऽध्यायः ॥ १२ ॥

भाग्यं कर्म च वक्ष्यामि मैत्रेय शृणु सुव्रत ॥ भाग्यादेव नृणां सिद्धिर्भाग्यादेव धनायती ॥ १ ॥ यशांसि भाग्यतो भाग्यविपर्यासाद्विपर्ययः ॥ करिष्यमाणकर्माणि ज्ञातव्यानि प्रयत्नतः ॥ २ ॥

टीका–अथ त्रयोदशाध्यायः सम्यग्व्याख्यायते मया ॥ श्रीगणेशप्रेरणया यावद्बुद्धिबलोदयम् ॥ १ ॥ अस्मिंस्त्रयोदशाऽध्याये भाग्यं कलांशजादिकम् ॥ फलं विस्तरशः प्राह मैत्रेयाय महामुनिः ॥ २ ॥ अथ भगवान् पराशरऋषिः सकलव्यवहारसुखसाधनीभूतभाग्यादिविचारम् अस्मिंस्त्रयोदशाध्याये वक्तुं प्रतिजानीते–भाग्यमिति द्वयेन । हे सुव्रत मैत्रेय ! भाग्यं वैभवं कर्म साध्वसाधु व्यापारं च ते वक्ष्यामि अस्मिन्नध्याये कथयिष्यामि शृण्वाकर्णयेत्यभिमुखीकरणं यतो नृणां जनानां भाग्यादेव सिद्धिः सकलकार्यसाधनं यतो भाग्यादेव धनायती धनं द्रव्यम् आयतिः प्रभावः ते यतो भाग्यत एव यशांसि कीर्तयः भाग्यविपर्ययात् अभाग्यात् उक्तानां सर्वेषां विपर्ययः नाश इत्यर्थः । अतः करिष्यमाणकर्माणि भाग्यसूचकानि अभाग्यकारकाणि वेति प्रयत्नतो ज्ञातव्यानि इति तज्ज्ञानं वक्ष्यामीति प्रतिजानीते ॥१॥२॥

भाषा–हे मैत्रेय ! अब वैभव और शुभाशुभ व्यापार कहता हूं और धनप्राप्ति यशकी प्राप्ति यह सब भाग्योदयसे होती है इस वास्ते भाग्योदयका लक्षण कहता हूं ॥१॥२॥

लग्नादिन्दोश्च नवमं भाग्यं बलवशाद्भवेत् ॥ शुभपापारिमित्राख्यैर्ग्रहैरेवं शुभाशुभैः ॥ ३ ॥ उच्चादिपंचकाद्वृद्धिरन्यस्माद्धानिरिष्यते॥ स्वस्मिन्नन्यत्र विषये स्वदेशेतरदेशयोः ॥४॥

टीका–अथ भाग्यविचाररीतिमाह–लग्नादित्यादिसार्धचतुःश्लोकपर्यंतम् । भाग्यं भाग्यस्थानं तु लग्नात् इंदोश्च सकाशान्नवमं ज्ञेयम् । तच्च बलवशात् बलतारतम्येन अल्पाधिकभाग्यकारकं भवेत् एवमेव शुभपापारिमित्राख्यैः शुभाः सौम्याः पापाः खलाः अरयः शत्रवः

मित्राणि इष्टाः इति आख्या येषां तैर्ग्रहैश्च भाग्यस्य वृद्धिहानी भवतः एवं भाग्ये उच्चादिपंचकात् उच्चात्रिकोणस्वर्क्षमित्राधिमित्रस्थानसंबंधेन भाग्ये स्थितैः भाग्यदर्शकैश्च शुभपापग्रहैः शुभैः पापैश्च सर्वैरपि ग्रहैरित्यर्थः । वृद्धिः भाग्यवर्धनं तथाऽन्यस्मात् समशत्र्वधिशत्रुनीचस्थानसंबंधेन भाग्ये स्थितैः सर्वग्रहैः हानिः भाग्यनाशः इष्यते कथ्यते इत्यर्थः । तथा स्वास्मिन् स्वीये विषये स्थाने भाग्यपतिश्चेत्स्वदेशेऽन्यत्र विषयेऽन्यक्षेत्रे भाग्येशश्चेदितरदेशे वा भाग्याप्तिः अथवा हे ज्योतिर्विन्मैत्रेय ! भाग्यगतैर्ग्रहैः स्वेषु दशसु वर्गेषु स्थितैः दशवर्गगणनया स्ववर्गस्थितैः स्वदेशे भाग्याप्तिः तैश्चान्येषु स्वेतरेषु दशसु वर्गेषु स्थितैः परदेशे भाग्यं ज्ञेयमिति ॥ ३ ॥ ४ ॥

भाषा–भाग्यस्थान लग्नसे और चंद्रसे नवम घर जानना, परंतु इसमेंभी बलाबल देखके भाग्यकी वृद्धि या हानि कहना. जैसा उच्च, स्वगृही, मित्रक्षेत्री, अधिमित्रक्षेत्री, मूलत्रिकोणी होके जो ग्रह भाग्यमें होवे तो भाग्यवृद्धि जानना. नीच, शत्रुक्षेत्री आधिशत्रुक्षेत्री, समका होके भाग्यमें बैठा होवे तो भाग्यकी हानि जानना. और भाग्यपति स्ववर्गमें होवे तो स्वदेशमें भाग्योदय परवर्गमें होय तो परदेशमें भाग्योदय जानना ॥ ३ ॥ ४ ॥

स्वेष्वन्येषु तु वर्गेषु ज्योतिर्विद्दशसु स्थितैः ॥ अ-
ध्यंशो राशिलिप्तायाः सप्तांशः संप्रकीर्तितः ॥५॥
अष्टादशर्क्षकांशस्तु कलांश इति कीर्तितः ॥
षष्ट्यंश एव षष्ट्यंशः क्रमेण पतयः स्मृताः ॥६॥
भाग्यत्रिकोणोपगतैः शुभं स्याद्भाग्यं तु केन्द्रो-
पगतैः शुभैश्च ॥ ७ ॥

टीका–अथोक्तं दशवर्गरीत्या स्वदेशपरदेशभाग्यं तद्वदेव सप्तांशषोडशांशषष्ट्यंशरीत्यापि स्वदेशपरदेशभाग्यज्ञानं भवति अत-

स्तानंशानाह अद्यंश इत्यादिसप्तमांतम् । सप्तांशमाह राशिलिप्तायाः राश्यंकस्य लिप्ताः कृत्वा ताभ्यः अद्यंशः सप्तभिर्भागः सप्तांश इति संप्रकीर्तितः षोडशांशमाह अष्टादशर्क्षकांशस्तु अष्टादशैर्यः ऋक्षांशः राश्यंशः स कलांशः षोडशांश इति कीर्तितः षष्ट्यंशमाह राशिकलाभ्यः षष्टिभिर्यो भागः स एव षष्ट्यंशः एवं क्रमेण सप्तांशादीनानीय पतयः स्मृताः तत्तत्पतयो ग्राह्या इत्यर्थः । अथ प्रकारांतरेण षोडशांशमाह सावने दिवसे चक्रनक्षत्रांशः राशिचक्रस्य सप्तविंशतिभिर्भागः कलांशकः षोडशांशः । मतांतरमाह । इतरैरन्यैराचार्यैः राशिषु यः षष्ट्यंशः सोऽपि कलांशकः षोडशांशः स्मृतः कथित इति ॥ ५ ॥ ६ ॥ ७ ॥

भाषा—अब सप्तांश, षोडशांश, षष्ट्यंश कहते हैं. राशि अंशकी कला करके सातसे भाग लेना.जो भाग आवे वो सप्तांश जानना. अठारहसे बारहका जो भाग लेना उसको षोडशांश कहते हैं राशि अंशकी कला करके साठसे भाग लेना. उसको षष्ट्यंश कहते हैं सावन दिवसको राशिचक्रको सत्ताईससे भाग लेना उसको षोडशांश कहते हैं ॥ ५ ॥ ६ ॥ ७ ॥

पापैस्तथा स्यादशुभ च भाग्यं मित्रादिभिः स्या-
न्नियमो विशिष्टात् ॥ ८ ॥

टीका—फलितमाह—भाग्यादिति सार्धेन । भाग्यात् लग्नचंद्राभ्यां नवमभावात् त्रिकोणोपगतैः पंचमनवमस्थानस्थैः केंद्रोपगतैः प्रथम चतुर्थसप्तमदशमस्थानस्थैश्च शुभैः ग्रहैः शुभं भाग्यं स्यात् भाग्यवृद्धिरित्यर्थः । तथा लग्नचंद्राभ्यां नवमात् त्रिकोणकेंद्रगतैः पापैस्तु अशुभं भाग्यं भाग्यहानिरित्यर्थः । तत्र मित्रादिभिः मित्रस्वक्षेत्रोच्चादिसंबंधेन तु विशिष्टात् पूर्वोक्तविशेषानियमः तत्रतत्रस्थे पापेऽपि

भाग्यवृद्धिः मित्रादिक्षेत्रस्थत्वादिति भावः । एवंप्रकारेण भावानां संबंधिनौ भाग्यविपर्यासौ भाग्यवृद्धी भाग्यहानी तथा उक्तप्रकारेण वदेत्कथयेदिति ॥ ८ ॥

भाषा–अब भाग्यस्थानका विशेष फल कहते हैं. लग्नचंद्रसे जो नवम घरमें वहांसे ५ । ९ । १ । ४ । ७ । १० घरमें शुभग्रह होवै तो भाग्योदय उत्तम जानना. और जो ऊपर लिखे हुवे घरोंमें पापग्रह होवें तो भाग्यकी हानि जानना. परंतु वहां विशेष ग्रह हैं कि पूर्वोक्त घरोंमें बैठे हुये ग्रह स्वराशिके मित्रराशिके उच्चके होवें तो अति उत्तम फल देवेंगे. नीचादिकके होवें तो नष्ट फल देवेंगे ॥ ८ ॥

एवं भाग्यविपर्यासौ भावानां च वदेत्तथा॥ भावग्रहांतरकला द्विशत्याप्ताः समादयः ॥ ९ ॥ द्विघ्नाद्विघ्नाः करघ्नाश्च षष्ट्याप्ताश्च समादयः ॥ अथेष्टादिफलघ्नं च समयो भाग्यभावयोः ॥ १० ॥

टीका–अथ भावफलसमान्याह–भावेति सार्धश्लोकेन । भावग्रहांतरकलाः भावग्रहयोः अंतरं विवरं कृत्वा तस्य कलाः कृत्वा ताः द्विशत्याप्ताः शतद्वयेन भक्ताः फलं समादयः वर्षमासदिनादि स्यात् ते समादयः द्विधा स्थाप्याः एकत्र द्विघ्ना द्विगुणिताः षष्ट्याप्ताः फलं समादयः तत्समादिकम् इष्टादिफलघ्नं कृत्वा भाग्यभावयोः समयः भवति ॥ ९ ॥ १० ॥

भाषा–अब भाग्योदयादिक भावफल कौनसे वर्षमें होवेगा उसका निर्णय कहते हैं. भावका और ग्रहोंका अंतर करके उसकी कला करके २०० से भाग लेना. लब्ध वर्षमासदिनादिक जानना. पीछे ग्रहवर्षादिकोंको द्विगुणित करके दो ठिकाने लिखना. पीछे एक ठिकानेके वर्षादिकोंको द्विगुणित

करके ६० से भाग लेना लब्ध जो वर्षादिक फल उसका और पूर्व जो स्थापित अंक है उसमें अंतर करना जो शेष वो भाग्यभावका समय जानना ॥ ९ ॥ १० ॥

फलेन च दशघ्नेन रश्मिना च हतास्तथा ॥ ११ ॥
भावाष्टवर्गोत्थसमाहितत्तद्ग्रहान्तरोत्थास्तु समादयः स्युः ॥ तत्तद्ग्रहोत्थाब्दहतास्तथा स्युरेवं तथा भाग्यफलानि तत्र ॥ १२ ॥ स्थानानि नव वर्गाश्च तेषां भाग्यफलं शृणु ॥

टीका–अथ प्रकारांतरेण समाद्यानयनमाह–फलेनेति । दशघ्नेन दशगुणितेन फलेन भावग्रहांतरफलेन हता गुणिताः ततः रश्मिना तत्तद्ग्रहरश्मिना च हताः ॥ ११ ॥ भावाष्टवर्गोत्थसमाः तत्तद्ग्रहांतरोत्थाः तत्तद्ग्रहभावांतसमुत्पन्नाः स्पष्टतराः समादयः स्युरिति समुच्चयेनाह तत्तदिति । एवं सर्वेषां भावानां अब्दादयः तत्तद्ग्रहोत्थाब्दहताः तथा स्युः स्पष्टाः स्युरिति ॥ १२ ॥ अथ तत्र फलानि तु कथं ज्ञेयानि ग्रहाणां स्थानानि नववर्गाश्च संति तेषां संबंधि भाग्यं फलं शृणु कथयामीत्यध्याहारः ॥

भाषा–अब प्रकारांतर कहते हैं. ग्रहभावका अंतर करके जो शेष फल उसको दशगुणित करके फिर उसको वो ग्रहकी राश्मिसे भाग लेना. शेष वर्षादिक भाग्यसमय जानना. अथवा अष्टवर्गोत्थ वर्षोंसे भाग्योदयका फल कहना ॥ ११ ॥ इस रीतिसे सर्वभावका फलप्राप्तिसमय वे वे भावाधिपतिके संबंधसे ऊपर लिखी हुई रीतिसे कहना. और भावफलका विशेष निर्णय नववर्गसे कहना ॥ १२ ॥

रव्यादीनां क्रमाच्छृंगचामरादेश्च विक्रये ॥ कृषिकर्मणि सेवायां पैशुन्ये लिपिकर्मणि ॥ १३ ॥ धनार्ज-

ने व्यये व्याधौ गमनागमविक्रये ॥ विवादे प्रेतकार्यें च भ्रातॄणां कलहे तथा ॥ १४ ॥ धनार्जने सुते दारग्रहणे लिपिकर्मणि ॥ उच्चादिस्थानवर्गेषु लाभदश्च रविः क्रमात् ॥ १५ ॥

टीका-अथोच्चादिस्थानविशेषेण फलशेषं क्रमाद्रव्यादीनामाह । तत्रादौ रविफलमाह-रव्यादीनामित्यादिपंचदशश्लोकपर्यंतम् । रविः सूर्यः उच्चादिस्थानवर्गेषु उच्चादीनि उच्चात्रिकोणस्वर्क्षमित्रर्क्षादीनि स्थानानि राशय इत्यर्थः । तथा तेषां वर्गाः ग्रहादयः षट् उच्चवर्गस्वत्रिकोण वर्गस्वराशिवर्गस्वमित्रराशिवर्गादयः तेषु वर्तमानः एवं फलदो भवति । तान्येव फलान्याह शृंगविक्रये लाभद एवं पदं सर्वत्र १, चामरादि राजचिह्नविक्रये २, कृषिकर्मणि स्पष्टम् ३, सेवायां ४, पैशून्ये "पिशुनो दुर्जनः खलः" इत्यमरः । पिशुनस्य दुर्जनस्य कर्म पैशुन्यं तस्मिन् ५, लिपिकर्मणि लेखनक्रियायां ६, धनार्जने द्रव्यसंपादने ७, व्यये द्रव्यवितरणे ८, व्याधौ रोगे लाभदत्वं रोगनाशनेत्यर्थः ९ । गमनागमविक्रये, गमनागमनाभ्यां यो विक्रयः तेन, नत्वेकस्थानास्थित्येत्यर्थः । १०, विवादे ११, प्रेतकार्यें १२, भ्रातॄणां संबंधिनि कलहे १३, धनार्जने १४, सुते, संततावित्यर्थः । १५, दारग्रहणे विवाहे १६, लिपिकर्मणि १७, इति रविफलानि ॥ १३ ॥ १४ ॥ १५ ॥

भाषा-अब सूर्यादि ग्रहोंका उच्चादिकके अनुसारसे फलविशेष कहते हैं. उसमें प्रथम सूर्यका कहते हैं. सूर्य उच्च, त्रिकोण, स्वराशि, मित्रराशि, अधिमित्रराशिका होवे या उच्चादिक राशिके वर्गमें होवे तो क्रमसे नीचे लिखे हुवे पदार्थोंका विक्रय करनेमें लाभ होवेगा. शृंग १, चामरादि राजचिह्न २, कृषिकर्म ३, सेवा ४, दुर्जनकर्म ५, लिपिकर्म ६, धनसंपादन ७, रोगनाशनकर्म ८, द्रव्यवितरण ९, गांवगांव फिरके माल बेंचना

१०, विवाद ११, प्रेतकार्य १२, भ्रातृकलह १३, पुत्रसे १४, धनार्जन १५, विवाह १६, लेखनकर्म १७, यह १७ कर्म करनेमें द्रव्यलाभ होवेगा. इति सूर्यफलम् ॥ १३ ॥ १४ ॥ १५ ॥

शंखमाणिक्यमुक्तानां लाभे तत्क्रयविक्रये ॥ सुरते स्त्रीषु मैत्रे च राज्ञः पुरुषमित्रता ॥ १६ ॥ धनायतिस्तथा तत्र मैत्रं च कृषिकर्मणि ॥ वस्त्रादिधनसिद्धिश्च ब्राह्मणेन विरोधता ॥ १७ ॥ धननाशो भवेद्युद्धे पराजयपराभवौ ॥ कलांशाद्यर्धहोरांशफलानि क्रमशः स्थिते ॥ १८ ॥

टीका-अथ कलांशार्धहोराभ्यां स्वराशिस्ववर्गस्वचंद्रस्य फलान्याह-शंखेत्यादिअष्टादशश्लोकपर्यंतम् । कलांशाद्यर्धहोरांशफलानि एवं वक्ष्यमाणानि ज्ञेयानि कदा कलांशादिषु स्थिते वर्तमाने चंद्रे इति प्रकरणक्रमप्राप्तोर्थः।शंखादीनां लाभे १, तत्क्रयविक्रये तेषां शंखमाणिक्यमुक्तानां क्रयविक्रयकर्मणि २, सुरते मैथुने ३, स्त्रीषु रामासु मैत्रे स्नेहे लाभद इत्यर्थः ४, तथा राज्ञः पुरुषमित्रता समासाभाव आर्षः । राजपुरुषमित्रतेत्यर्थः ५; धनायतिः धनलाभः ६ तथा तत्र लाभे कृषिकर्मणि च मैत्रं स्नेहः स्यात् ७, वस्त्रादिधनसिद्धिः ८, ब्राह्मणेन विरोधता द्विजजातिविरोधः ९, युद्धे धननाशः तथा पराजयपराभवौ पराजयः स्वोत्कर्षहानिः पराभवः स्वदेशद्रव्यबलादिहानिः १० इति फलं भवेत् । इति चंद्रफलानि ॥ १६ ॥ १७ ॥ १८ ॥

भाषा-अब चंद्र उच्चादि राशिका होवे वा उच्चादिराशीके वर्गमें होवे तो क्रमसे नीचे लिखे हुवे पदार्थोंमें लाभ होवेगा. शंखादिक्रयविक्रय १, मैथुन २, स्त्रीमैत्री ३, राजपुरुषमित्रता ४, धनलाभ ५, कृषिकर्म ६, वस्त्रादिव्या-

पार ७, ब्राह्मणविरोध ८, स्वोत्कर्षहानि ९, स्वदेशद्रव्यबलादिहानि १० यह फलहोवे. इतिचंद्रफलम् ॥ १६ ॥ १७ ॥ १८ ॥

स्वर्णसिद्धिर्जयो वस्त्रलाभो मित्रसमागमः ॥ विवादो भ्रातृभिः शत्रुकर्म स्त्रीचंचलाक्षकः ॥ १९ ॥ स्त्रीलाभो दासलाभश्च कृतस्नेहा च बलक्षयः ॥ बलैर्धनायतिः स्वोच्चे क्षेत्राद्यैर्न्यायतो भवेत् ॥ २० ॥ मूलत्रिकोणे क्षेत्रेण राज्ञो वाथ धनायतिः ॥ स्वर्क्षे वस्त्रं कांचनादिसिद्धिश्चाथ सुहृत्फलम् ॥ २१ ॥ धान्यायातिश्च मैत्री च क्रूरकर्मप्रवर्तनम् ॥ कुष्ठं चाप्यग्निभीतिश्च गृहदाहोऽतिशत्रुभे ॥ २२ ॥

टीका-अथ भौमफलानि-स्वर्णसिद्धिरित्यादिसार्धद्वाविंशतिश्लोकपर्यंतम् । स्वर्णसिद्धिः १, जयः २,वस्त्रलाभः ३, मित्रसमागमः ४, भ्रातृभिर्विवादः ५, शत्रुकर्म शत्रुकृत्यं ६, स्त्रीचंचलाक्षकः स्त्रीषु चंचलनेत्रः ७, स्त्रीलाभः ८, दासलाभः ९, कृतस्नेहा सर्वेच्छा १०, बलक्षयः ११, बलैः धनायतिः धनप्राप्तिः १२, एवं फलानि भाग्यगे स्वोच्चस्थे स्वक्षेत्रस्थे स्वक्षेत्राद्यैर्युते वा भौमे न्यायतः न्यायेन स्युः तत्रस्थे मूलत्रिकोणगे भौमे क्षेत्रेण कृषिणा राज्ञः सकाशाद्वा धनायातिः धनप्राप्तिः स्यात्। भाग्यगे स्वर्क्षे वर्तमाने तु वस्त्रकांचनादिसिद्धिः। अथ सुहृत्फलं भाग्यस्थसुहृत्क्षेत्रवर्तमानभौमस्य फलं तु धान्यायतिः धान्यानां प्राप्तिः मैत्री इति । अथ भाग्यस्थाऽतिशत्रुभे भौमे सति क्रूरकर्मप्रवर्तनं कुष्ठम् अग्निभीतिः गृहदाहः ग्रहणी संग्रहणी गुल्मरोगश्चेति व्याधयः स्युः धननाशश्च स्यात् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

भाषा-अब मंगलका फल कहते हैं. मंगल उच्चादि राशिका होवे अथवा उच्चादि वर्गका होवे तो क्रमसे नीचे लिखा हुवा फल जानना. सुवर्णसिद्धि १

जय २, वस्त्रलाभ ३, मित्रसमागम ४, बंधुविवाद ५, शत्रुकर्म ६, स्त्रीविषयमें चंचलनेत्र ७, स्त्रीलाभ ८, दासलाभ ९, सर्वइच्छा १०, बलक्षय ११, बलकरके धनप्राप्ति १२, इतना फल मंगल उच्चस्वक्षेत्रका होवे तो जानना. और जो मंगल भाग्यमें मूलत्रिकोणराशिका होके बैठा होवे तो कृषिकर्मसे वा राजाके निमित्तसे धन मिले. जो मंगल स्वराशिका होके भाग्यमें होवे तो वस्त्रसुवर्णादिकका लाभ जानना. जो मंगल मित्रराशिका होके भाग्यमें बैठा होवे तो धान्यप्राप्ति बहुत होवे जो मंगल अधिशत्रु राशिका होके भाग्यमें बैठे तो क्रूरकर्ममें प्रवृत्त करे. अग्निभय, कुष्ठ, संग्रहणी, गुल्म आदि रोग होवे, धननाश होवे ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

ग्रहणीगुल्मरोगश्च धननाशश्च तत्र तु ॥ विद्यार्जने सुखे स्त्रीभिः कलहश्च धनायतिः ॥ २३ ॥ क्षेत्रदासादिलाभं च कृषिकृत्यं धनायतिः॥ विवादो बंधुभिर्युद्धे जयश्चै पराजयः ॥ २४ ॥ विद्याबुद्धिधनक्षेत्रयशांसि च फलंति च ॥ राज्ञस्तत्पुरुषेणैव स्वर्णक्षेत्रायतिस्तथा ॥ २५ ॥ स्वर्क्षे धनायतिः प्रोक्ता लिपिना शिल्पकर्मणा ॥ वस्त्रस्वर्णादिसिद्धिश्च राजस्त्रीभिर्धनायतिः ॥ २६ ॥ कायस्थ कर्मणा त्वायो विद्यानाशः स्वकर्मणा ॥ धननाशोऽश्मरी कुष्ठं कलांशादिफलं ततः ॥ २७ ॥ विवादाद्बंधुभिर्दायो देशपर्यटनाद्धनम् ॥ क्षेत्रसिद्धिर्जयो विद्यालाभो धान्यविवर्धनम् ॥ २८ ॥

टीका-अथ भाग्यगतबुधफलान्याह-विद्येत्यादिपदाधिकसार्धाष्टाविंशतिश्लोकपर्यंतम् । विद्यार्जने विद्यासंपादने १, सुखे सुखप्राप्तौ

२, इष्टफलद इत्यर्थः । शत्रुराशिगतभाग्यस्थे बुधे स्त्रीभिः कलहः ३, मित्रराशिगतभाग्यस्थे बुधे तु धनायातिः धनलाभः ४, क्षेत्रदासादिलाभः ५, कृषिकृत्यं ६, धनायातिः ७, नीचादिस्थे बंधुभिर्विवादः ८, युद्धेऽजयः जयाभावः ९, पराजयः पराभवः १०, उच्चादौ विद्याबुद्धिधनयशांसि फलंति ११, राज्ञः नृपात्तथा तत्पुरुषेण राजपुरुषयोगेन स्वर्णक्षेत्रायातिः स्वर्णभूमिलाभः १२, स्वर्क्षे सति लिपिना लिपिकर्मणा शिल्पकर्मणा शिल्पकृत्येन च धनायातिः द्रव्यलाभः १३, वस्त्रस्वर्णादिलाभः १४, राजस्त्रीभिः धनायतिः राजस्त्रीयोगेन धनागमः १५, उदासीनक्षेत्रस्थे तु कायस्य कर्मणा साक्षाच्छरीरकृत्येन आयः धनप्राप्तिः १६, अतिशत्रुस्थे विद्यानाशः १७, स्वकर्मणा निज व्यापारेण धननाशः १८, अश्मरी रोगविशेषः १९, कुष्ठम् २०, कलांशादिफलं स्वषोडशांशादिवर्तमानफलं तु बंधुभिर्विवादात् दायः स्वभागप्राप्तिः २१, देशपर्यटनात् धनं लभेत २२, क्षेत्रसिद्धिः २३, जयः २४, विद्यालाभः २५, धान्यविवर्धनं २६, कृषिकर्मसमुद्योगः २७, सेवाकरणकौशलं सेवाकृत्यकुशलत्वं २८, विद्यार्जनं विद्यासंपादनं चेति बुधफलानि ॥२३॥२४॥२५॥२६॥२७॥२८॥

भाषा—अब भाग्यस्थानगत बुधका फल कहते हैं. बुध उच्चराशिका होयके भाग्यके घरमें होवे तो विद्यासंपादन करनेमें और सुखप्राप्ति करनेमें फलप्राप्ति होवे. शत्रुराशिका होके बैठे तो स्त्रियोंसे कलह, मित्रराशिका होवे तो धनलाभ, क्षेत्रदासादिकका लाभ, खेतीमें लाभ, नीचराशिका होवे तो बंधुविरोध, युद्धमें हानि, पराभव होवे, उच्चादिकका होके बैठे तो विद्या बुद्धि धन यश स्वर्ण भूमि राजपुरुष इनोंसे लाभ होवे, स्वराशिका होवे तो लेखनकर्मसे, शिल्पकर्मसे, राजस्त्रीयोगसे, वस्त्र स्वर्णादिकसे, धनप्राप्ति होवे. समराशिका होके बैठे तो शरीरकृत्यसे धनप्राप्ति, अधिशत्रुका होवे तो विद्यानाश, व्यापारमें नाश, अश्मरीरोग. कुष्ठरोग होवे,, अपने

षोडशांशमें होवे तो बंधुविवादमें धनप्राप्ति, और देशांतर फिरनेसे धन प्राप्त होवे, क्षेत्र सिद्धि होवे. जय होवे, विद्यालाभ, धान्यवृद्धि, खेतीका उद्योग सेवकीके कर्ममें कुशलता, विद्यासंपादनमें कुशलता होवे इति बुधफलम् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

कृषिकर्मसमुद्योगः सेवाकरणकौशलम् ॥ विद्यार्जनमथ प्रोक्तं गुरोः श्रीमान् सुखी गुणी ॥ २९ ॥
बह्वायतिरमात्यत्वं सर्वसंपत्समन्वितः ॥ धननाशः प्रमोहेण क्षेत्रनाशः पराभवः ॥ ३० ॥ विद्यार्जनं तथा सेवाकरणं संपदस्तथा ॥ पुत्रैर्धनायतिर्मित्रैः स्त्रीभिश्च कृतकर्मणा ॥ ३१ ॥

टीका-अथ भाग्यगतगुरुफलमाह-अथेत्यादिसार्धैकत्रिंशच्छ्लोकपर्यंतम् । अथानंतरं गुरोः फलं प्रोक्तं भाग्यस्थस्येति शेषः । श्रीमान् लक्ष्मीवान् १, सुखी २, गुणी गुणाः दयादाक्षिण्यादयः संति यस्येति तथा ३, बह्वायतिः बहुप्राप्तिः भवेदित्यर्थः ४, अमात्यत्वं प्रधानत्वम् ५, सर्वसंपत्समन्वितः स्पष्टं ६, अत्र शत्रुक्षेत्रगतस्य फलं धननाशः द्रव्यनाशः ७, प्रमोहेण प्रमादेनेत्यर्थः । क्षेत्रनाशः ८, पराभवः पराजयः ९, अथ मित्रक्षेत्रस्थभाग्यगतगुरुफलं विद्यार्जनं विद्यासंपादनं १०, तथा सेवाकरणं दास्याचरणं ११; अथाधिमित्रक्षेत्रस्थस्य फलं संपदः ऐश्वर्याणि १२, पुत्रैः मित्रैश्च धनायतिः द्रव्यागमः १३, स्त्रीभिः तथा कृतकर्मणा आचरितव्यापारेण च धनप्राप्तिः १४, विवाहः १५, धनलाभः १६, क्रमात् एवमुक्तप्रकारेण फलं वदेत् कथयेदिति ॥ २९ ॥ ३० ॥ ३१ ॥

भाषा-गुरु भाग्यमें होवे तो लक्ष्मीवान् १, सुखी २, गुणवान् ३, बहुतप्राप्ति ४, प्रधानपना ५, सर्वसंपत्तिवान् ६, शत्रु राशिका होवे तो

द्रव्यनाश ७, क्षेत्रानाश ८, पराजय ९ होवे. मित्रराशिका होवे तो विद्यासंपादन करना १०, सेवा करना. अधिमित्रका होवे तो ऐश्वर्यप्राप्ति पुत्रमित्रादिकनसे धनप्राप्ति, स्त्रीनिमित्तसे धन प्राप्ति, विवाह इत्यादि मार्गसे धन मिले. इति गुरुफलम् ॥ २९ ॥ ३० ॥ ३१ ॥

विवाहो धनलाभश्च क्रमादेवं फलं वदेत् ॥ राज्ञां कृत्यकरः श्रीमान्पुत्रबंधुसमन्वितः ॥३२॥ सेनानाथस्तथामात्यो विद्यार्जनपरो धनी ॥ पाठको याजकश्चाथ बहुस्त्रीकोऽतिशत्रुभे ॥३३॥ स्त्रीसक्तो निर्धनो मूर्खः पातकी भारको भवेत् ॥ सेनाधिकारी राज्ञश्च प्रियैर्बन्धुभिरायतिः ॥ ३४ ॥ सेवावृत्त्या च कृष्या च विद्यायाः पूर्तकर्मणा ॥ सर्वसंपद्युतः श्रीमान् शुक्रस्यैवं फलं लभेत् ॥ ३५ ॥

टीका—अथ भाग्यगतशुक्रफलमाह—राज्ञामित्यादिपंचत्रिंच्छ्लोकपर्यंतम् । राज्ञां नृपाणां कृत्यकरः कर्मकर्ता १, श्रीमान् २, पुत्रबंधुसमन्वितः स्पष्टं ३, सेनानाथः सेनापतिः ४, तथाऽमात्यः प्रधानः ५, विद्यार्जनपरः विद्यासंपादनोत्सुकः ६, धनी द्रव्यवान् ७, पाठकः अध्यापकः ८, याजकः, ऋत्विक् ९, बहुस्त्रीकः बह्व्यः स्त्रियो यस्य सः तथा १०, आतिशत्रुभेऽतिशत्रुक्षेत्रस्थे सति फलमाह । स्त्रीसक्तः स्त्रीलालसः ११, निर्धनः दरिद्रः १२, मूर्खः बुद्धिशून्यः १३, पातकी दोषी १४, भारकः भारवाहक इत्यर्थः भवेत् १५, स्वक्षेत्रस्थफलमाह राज्ञः भूपस्य सेनाधिकारी सैन्याधिकारवान् १६, प्रियैः इष्टैः बंधुभिः बांधवैश्च आयातिः इष्टप्राप्तिः १७, सेवावृत्त्याऽन्यसेवाचरणेन तथा कृष्या कृषिकर्मणा विद्यया वेदशास्त्रप्रभृत्या पूर्तकर्म-

णा खातादिकृत्येन च सर्वसंपद्युतः अखिलसंपत्तिसहितः स्यात् १८, श्रीमांश्च १९, एवं प्रकारेण शुक्रस्य फलं भवेदिति ॥ ३२ ॥ ॥ ३३ ॥ ३४ ॥ ३५ ॥

भाषा–अब शुक्रका फल कहते हैं–शुक्र उच्चादिकका होके भाग्यमें होवे तो क्रमसे राज्यकार्य करनेवाला १, लक्ष्मीवान्. २ पुत्रसे भाइयोंसे सुखी ३, सेनापति ४, प्रधान ५, विद्यासंपादन करनेमें बहुत सुखी ६, धनवान् ७, अध्यापक ८, ऋत्विक् ९, बहुत स्त्रियोंसे युक्त १० होवे. अधिशत्रुराशिका होके बैठे तो स्त्रीलालसी ११, दरिद्री १२, बुद्धिहीन १३, पातकी १४, भारवाहक १५ होवे. स्वक्षेत्रका होवे तो सेनाधिकारी १६, प्रियबांधवोंसे इष्टप्राप्ति १७, दूसरेकी सेवा करनेसे १८, कृषिकर्मसे १९, विद्यासे २०, इष्ट पूर्त वापी कूप तलावादिक्रमसे २१, सर्वसंपत्तिवान् होवे श्रीमान् होवे । इति शुक्रफलम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

कुजोच्चादिफलं चार्केः कलांशादिफलं भवेत् ॥
कलांशादिषु यत्प्रोक्तं कलांशादि फलं त्विदम् ॥ ३६ ॥

टीका–अथ शनिफलमाह–कुजेति सार्धेन । कुजोच्चादिफलं यत्कुजस्य उच्चादिवर्तमानस्य शुभफलमुक्तं तदेव आर्केः शनैश्चरस्य कलांशादिफलं षोडशांशादिवर्तमानफलं भवेज्जानीयादित्यर्थः । कुजस्य कलांशादिषु षोडशांशादिषु यत्फलं प्रोक्तं तदेव शनेः कलांशादिवर्तमानस्य फलं भवेत् तथा कुजस्य उच्चादिषु यत्प्रोक्तं तदेव उच्चादिवर्तमानस्य शनेः एवं फलं विचिन्तयेदिति ॥ ३६ ॥

भाषा–अब शनिका फल कहते हैं, शनिका फल पहिले जो मंगलके विषयमें लिखा है वोई जानना ॥ ३६ ॥

उच्चादिषु तथा प्रोक्तं फलमेवं विचिंतयेत् ॥
स्वभाग्यर्क्षगतानृक्षान्न्यूनांश्चाप्याधिकांस्ततः ॥ ३७ ॥

स्वरश्मिघ्नान् ग्रहे युक्ते तद्रश्मिघ्नांस्तथोत्तरम् ॥
त्रिभिर्विभज्य निःशेषे त्वोजराशौ नवांशके ॥ ३८ ॥
आदिमध्यावसाने स्याद्युग्मे तत्र नवांशके ॥ आदौ
मध्येवसाने स्याद्युग्मे चौजे नवांशके ॥ ३९ ॥
मध्येऽवसाने चाद्ये च युग्मे मध्यांतिमादिमे ॥ आदौ
मध्येवसाने स्यादेवं चेद्भाग्यलक्षणम् ॥ ४० ॥
ओजराशौ नवांशे चेद्युग्मे मध्यांतिमादिमे ॥ युग्मे
राशौ नवांशे चेदोजे मध्येऽन्तिमेऽपि च ॥ ४१ ॥
प्रथमेपि वयस्येवं युग्मे मध्येंऽतिमादिमे ॥ शेषं
द्वयं चेदेकं स्यात्कालो व्यत्यासतो भवेत् ॥ ४२ ॥
कलाभ्यां चाहते तद्वच्चराद्यंशे चरे च भे ॥ आदौ
मध्येवसाने स्यात्स्थिरेंऽते मध्यमादिमे ॥ ४३ ॥

टीका–एवं भाग्यस्थानगतग्रहवशात्फलान्युक्त्वाऽथ तत्तत्फलागमकालं नवांशतारतम्येनाह–स्वभाग्येत्यादिसार्धत्रिचत्वारिंशच्छ्लोकपर्यंतम् । स्वभाग्यर्क्षगतान् स्वस्य यत् भाग्यर्क्षं भाग्यराशिः तत्र गतान् वर्तमानान् ऋक्षान् नवांशराशीन् ततः न्यूनान् आधिकान्वापि वर्तमानान् स्वरश्मिघ्नान् स्वकीयरश्मिगुणितान् कृत्वा भाग्यर्क्षे ग्रहयुक्ते सति तथा तद्रश्मिघ्नान् तस्य ग्रहस्य रश्मिभिर्गुणितान् कृत्वा उत्तरमनंतरं त्रिभिर्विभज्य त्रिसंख्यया भागमाहृत्य निःशेषे शेषरहिते सति ओजराशौ विषमराशौ आदिमध्यावसाने युग्मे नवांशे सति आदौ मध्येऽवसाने वा यथाक्रमं भाग्यफलं ज्ञेयम् तथा युग्मे राशौ ओजनवांशके मध्येऽवसाने आद्ये सति मध्यमांतप्रथमे सति अथवा युग्मे राशौ मध्यांतिमादिमे मध्यमांतिमे प्रथमे

युग्मे नवांशके सति च आदौ मध्येऽवसाने वा चेत् क्रमात् भाग्यलक्षणम् एवं स्यात् एवमेव ओजराशौ मध्यमांतिमादिमे मध्यमांतिमप्रथमे युग्मे नवांशे सति अथवा युग्मे समे राशौ मध्ये मध्यमेंऽतिमे प्रथमे वा ओजे विषमे नवांशे सति तथा युग्मे राशौ मध्यांतिमादिमे नवांशे सति च एवं पूर्वोक्तकाले फलं ज्ञेयम् । एतत् त्रिभागे गृहीते शून्यावशेषे सति ज्ञेयम् । अथ च त्रिभागग्रहणानंतरं एकं द्वयं वा शेषं स्याच्चेद्व्यत्यासतः वैपरीत्येनेत्यर्थः कालः । भाग्यसमयः भवेत्स्यात् अथ चरभे भाग्यगतचरलग्ने कलाभ्यां भाग्यकलासंयुक्तग्रहकलाभ्यां हते गुणिते तद्वत्प्राग्वत् त्रिभिर्विभज्येत्यर्थः । चराद्यंशे चरस्थिरद्विस्वभावसंज्ञके प्राप्तेऽर्थादादौ मध्येऽवसाने फलं स्यात्तथा स्थिरे स्थिरलग्नेंऽते मध्यमादिमेऽवसाने मध्ये आदौ चेत्यर्थः । फलं बोध्यम् तथा उभये द्विस्वभावलग्ने मध्यमेंऽते आदौ च फलं स्यात् एवं प्रकीर्तिताः अंशा इत्यर्थ इति ॥ ३७ ॥ ३८ ॥ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

भाषा–पूर्व जो भाग्यस्थानका फल कहा है उस फलकी प्राप्ति कौन समयमें होवेगी वा समयका ज्ञान अब कहते हैं. भाग्यस्थानकी नवमांश राशिको भाग्यभावकी रश्मिसे गुणन करके और वहां जो ग्रह बैठा होवे वो ग्रहकी रश्मिसे गुणन करना पीछे तीनसे भाग लेना. शून्य शेष रहे ताका फल कहते हैं भाग्यस्थानकी विषमाराशि होवे तो आद्य मध्य अवसानमें चरादिक क्रमसे फल जानना और युग्म नवांश होवे तो आद्य मध्य अवसानमें फल जानना तथा भाग्यराशि युग्म होय और नवमांश विषम होवे तो मध्य अंत आदिमें फल जानना और युग्मराशि युग्मनवमांश होवे तो मध्य अंत आदिमें और आदि मध्य अंत्य क्रमसे भाग्यफल जानना. यह विषय टीकामें स्पष्ट किया है ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

उभये मध्यमेऽन्ते च आदावेवं प्रकीर्तिताः ॥ भावानां चैव सर्वेषां चंद्रलग्नात्तु लग्नतः ॥ ४४ ॥ अंशदायो-

क्तवत्कृत्वा शुभपापदृगाहतम् ॥ षष्ट्याप्तं तद्बलाप्तं
स्याद्भ्रात्रादीनां च संस्त्यक्ता ॥ ४५ ॥ रश्मिघ्नं
च बलाप्तं च त्वनिष्टमपवादगम् ॥ ४६ ॥

इति श्रीमद्बृहत्पाराशरहोरायामुत्तरभागे कलांशादिफले त्रयोदशोऽध्यायः ॥ १३ ॥

टीका–अथ भ्रात्रादिसंख्यामाह–भावानामित्यादि यावदध्यायसमाप्तिं । अथ सर्वेषां भावानां चंद्रलग्नाच्चंद्रराशेः तथा लग्नतः जन्मलग्नाच्च विचारः कर्तव्यः स तु अंशदायोक्तवत्कृत्वा प्रागुक्तांशायुर्दायवत् गणितं विधाय ततः शुभपापदृगाहतं एकत्र शुभदृष्टिहतं एकत्र पापदृष्टिहतं कृत्वा च तत्क्रमात्षष्ट्याप्तं तथा तद्बलाप्तं भावबलाप्तमित्यर्थः । प्राप्तफलं भ्रात्रादीनां शेषसंख्या नष्टसंख्या च ज्ञेया । अथ च तदेव अंशदायोक्तवत्कृतमेव रश्मिघ्नं रश्मिगुणितं ततः बलाप्तं बलभाजितं फलं अनिष्टं अपवादकं शुभं च ज्ञेयमिति ॥४४ ॥ ४५ ॥ ४६ ॥ एवं त्रयोदशेऽध्याये कृता टीका यथामति ॥ गणेशप्रीतये सा च शोधनीया बुधैर्मुदा ॥ १॥ इति श्रीबृ० उत्तरभागे श्रीमद्ध्यङ्कन्वयवेदशास्त्रज्योतिर्विच्छ्रीधरेण वि० सु० टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥

भाषा–अब द्वादश भावोंका विचार कहते हैं. चंद्रलग्नसे करना, और जन्मकालसेभी करना. पहिले जैसा अंशायुर्दाय लाते हैं, वसा गणित करके दो ठिकाने लिखके एक ठिकाने शुभदृष्टियोंगसे गुणना, अन्यत्र पापदृष्टियोगसे गुणना. पीछे दोनों ठिकाने ६०. से भागलेना. वैसा भावबलसे भाग लेना. शेष रहे भावबंधकी संख्या जाननी. अन्यप्रकार पूर्वोक्त गणितको रश्मिगुणित करके भावबलसे भाग लेना. शेष शुभाशुभ फल जानना ॥ ४४ ॥ ४५ ॥ ४६ ॥

इति श्रीमद्बृहत्पाराशरहोरा त्रयोदशोऽध्यायः ॥ १३ ॥

नाडीद्वयं मुहूर्तः स्याद्विनाडीद्वयमेव च ॥ रवेरुदयतो मेषात्क्रमात्सर्वजितः स्मृतः ॥ १ ॥ आर्द्राश्लेषानुराधाश्च मघाश्चाथ धनिष्ठिकाः ॥ उत्तराषाढसंज्ञश्च सर्वजिद्रोहिणी तथा ॥ २ ॥ विशाखा च ततो ज्येष्ठा मूलं च शततारकम् ॥ भरणीपूर्वफाल्गुन्यौ विश्वजिच्च ततो भवेत् ॥ ३ ॥ उत्तराप्रोष्ठपाच्चैव रेवती च ततः परम् ॥ अभिजिच्चोत्तरा चाथ कृत्तिका रोहिणी ततः ॥ ४ ॥ मूलं च रोहिणी चाथ मृगशीर्षं च हस्तकम् ॥ पुष्यश्च श्रवणो हस्तचित्रे स्वाती क्रमात्स्मृताः ॥ ५ ॥

टीका-अथो चतुर्दशाध्याये गणेशप्रेरितो ह्यहम् । कुर्वे यथामति व्याख्यां विद्वांसः शोधयंत्विमाम् ॥ १ ॥ अथ भगवान् पराशरो महर्षिः चतुर्दशेऽस्मिन्नध्याये वर्षचर्यामुपदिदेश । तत्रादौ मुहूर्तलक्षणमाह-नाडीत्यर्धेन । नाडीद्वयं घटिकाद्वयं मुहूर्तः स्यान्मुहूर्तो भवति एतत्सामान्यमानं त्रिंशद्घटिकात्मकदिनमानविषयं ज्ञेयम् । न्यूनातिरिक्तदिनमाने तु विनाडीद्वयं तद्यथा त्रिंशद्घट्यूनदिनमाने कतिचिद्विगतपलनाडीद्वयं तथा त्रिंशद्घट्यधिकदिनमाने तु तत्तारतम्येन विशेषपलसहितनाडीद्वयं मुहूर्तो भवतीति भावः । एवमेव रात्रिमानतारतम्येन मुहूर्तलक्षणं ज्ञेयमिति । अथ लग्नान्याह-रवेरिति पादेन । रवेः सूर्यस्य उदयतः औदयिकलग्नमारभ्य इत्यर्थः। मेषात्सकाशान्मीनपर्यंतं क्रमेण द्वादशलग्नानि पुनरुदयपर्यंतं भवंतीति भावः । अथोक्तनाडीद्वयमुहूर्तेषु प्रत्यहं दिवा पंचदश रात्रौ पंचदशेति त्रिंशन्नक्षत्रसंज्ञा आह सर्वजित् इत्यादि सार्धपंचश्लोकपर्यंतम् । अथ सर्वजितः सर्वाणि दिननक्षत्राणि तत्तन्मुहूर्ते स्वसदृशफलदानेन जयंति ताः सर्वजितः

संज्ञाः प्रत्यहं सूर्योदयमारभ्य क्रमेण नाडीद्वयमुहूर्तानां त्रिंशन्मितानां स्मृता उक्ताः ताश्च आर्द्रा १, आश्लेषा २, अनुराधा ३, मघा ४, धनिष्ठा ५, उत्तराषाढा ६, सर्वजित् नाम अभिजित् ७, रोहिणी ८, विशाखा ९, ज्येष्ठा १०, मूलम् ११, शततारका १२, भरणी १३, पूर्वाफाल्गुनी १४, विश्वजित् अभिजित् १५ एता दिनमुहूर्तसंज्ञाः सर्वजित्संज्ञकाः पंचदश । अथ उत्तराप्रोष्ठपात् उत्तराभाद्रपदा १, रेवती २, अभिजित् ३, उत्तरा ४, कृत्तिका ५ रोहिणी ६, मूलं ७, रोहिणी ८, मृगशीर्षं ९, हस्तकं १०, पुष्यः ११, श्रवणः १२, हस्तं १३, चित्रा १४, स्वाती १५, एता रात्रिमुहूर्तसंज्ञाः पञ्चदश १५ विश्वजित्संज्ञकाः हे द्विज ! हे मैत्रेय ! नाडीद्वयमुहूर्तानां एताः संज्ञाः विश्वजित्संज्ञकाः ज्ञेया इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

भाषा–अब मुहूर्तलक्षण कहते हैं. दो घडीका एक मुहूर्त होता है सर्व दिनके मुहूर्त १५ रात्रिके मुहूर्तके १५ कम जास्त नहीं होते. इसवास्ते दो घडीका मुहूर्तप्रमाण लिखा, परंतु दिनमानकी वृद्धि होनेसे मुहूर्तके दो घडीमें जास्त कम होताहै. अब लग्नमान कहते हैं. सूर्य जिस राशिका होता है उसी लग्नका प्रथम उदय होता है. पीछे अपने २ क्रमसे दूसरे दिनके प्रातःकालपर्यंत बारह लग्न भुक्त होजाते हैं । अब दिनरात्रिके मुहूर्त ३० हैं उनके नाम कहते हैं. दिनके जो पंदरह १५ मुहूर्त हैं वे सर्वजित् नामक हैं. आर्द्रा १, आश्लेषा २, अनुराधा ३, मघा ४, धनिष्ठा ५, उत्तराषाढा ६, सर्वजित् नाम अभिजित् ७, रोहिणी ८, विशाखा ९, ज्येष्ठा १०, मूल ११, शततारका १२, भरणी १३, पूर्वाफाल्गुनी १४, अभिजित् १५, यह दिनमुहूर्त जानना. अब रात्रिके मुहूर्त कहतेहैं. उत्तराभाद्रपदा १, रेवती २, अभिजित् ३, उत्तरा ४, कृत्तिका ५, रोहिणी ६, मूल ७, रोहिणी ८, मृगशीर्ष ९, हस्त १०, पुष्य ११, श्रवण १२, हस्त १३, चित्रा १४, स्वाती १५, यह पंद्रह रात्रिके विश्वजित् नामक मुहूर्त जानने ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

नाडीद्वयमुहूर्तानां संज्ञा एताः क्रमाद्द्विज ॥ सर्वजिद्भरणीहस्ताविश्वाजिद्रोहिणी तथा ॥ ६ ॥ दस्रश्च मृगशीर्षश्च शर्वः पुष्योऽथ रुद्रभम् ॥ उत्तरा विश्वजिच्छ्रोणी चित्रा पुष्यश्च वायुभम् ॥७॥ अभिजिद्वसुभं पौष्णं कृत्तिका च पुनर्वसु ॥ पूर्वोत्तरप्रोष्ठपदौ शततारा च विश्वभम् ॥ ८ ॥ ज्येष्ठा सूर्यं च मूलं च भाग्यश्च क्रमशः स्मृताः ॥ ज्येष्ठा चाथ विशाखा च मूलं च शततारका ॥ ९ ॥

टीका–अथ विनाडीद्वयमुहूर्तसंज्ञाः द्वात्रिंशदाह–सर्वजिदित्यादिसार्धनवश्लोकपर्यंतम् । अथ सर्वजित्संज्ञकाः विनाडसिंज्ञकाः यथा भरणी १, हस्त २, विश्वाजित् पूर्वाषाढा ३, रोहिणी ४, दस्रः अश्विनी ५, मृगशीर्षः ६, शर्व आर्द्रा ७, पुष्यः ८, रुद्रभम् आर्द्रा ९, उत्तरा १० विश्वजित्पूर्वाषाढा ११, श्रोणी श्रवणं १२, चित्रा १३, पुष्यः १४, वायुभं स्वाती १५, आभिजित् १६, वसुभं धनिष्ठा १७, पौष्णं रेवती १८, कृत्तिका १९, पुनर्वसु २०, पूर्वाप्रोष्ठपत् पूर्वाभाद्रपदा २१, उत्तराप्रोष्ठपत् उत्तराभाद्रपदा २२, शततारका २३, विश्वभं स्वाती २४, ज्येष्ठा २५, सूर्यं हस्तः २६, मूलं २७, भाग्यः पूर्वाफाल्गुनी २८, ज्येष्ठा २९, विशाखा ३०, मूलं ३१, शततारका ३२, एवं क्रमशः विनाडीद्वयरूपाणां मुहूर्तानां सर्वजित्संज्ञानामानि ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

भाषा--अब विनाडी संख्यात्मक बत्तीस मुहूर्त कहते हैं. उनके नाम भरणी आदि लेके शततारकापर्यंत टीकामें स्पष्ट हैं ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

नामानि च मुहूर्तानां विनाडीद्वयरूपिणाम् ॥ आवृत्या षष्टि ताः प्रोक्ताः कालांशा नाडिरूपिणः॥ १०॥

टीका—एवं नाडीद्वयमुहूर्तसंज्ञाः विनाडीद्वयमुहूर्तसंज्ञाश्चोक्त्वा षष्टिनाडीसंज्ञा आह—आवृत्त्या इत्यर्धेन । याः द्विनाडीरूपिण्यः त्रिंशत्संज्ञाः प्रागुक्ताः ता एव पुनरावृत्त्या षष्टि इति विभक्तिलोप आर्षः । षष्टिसंख्याकाः नाडीरूपिणः एकघटिकास्वरूपाः ते एव कलांशसंज्ञका इति ॥ १० ॥

भाषा--अब षष्टिनाडी मुहूर्त कहते हैं. जो पहिले दो घटिकात्मक रात्रिदिनके ३० मुहूर्त कहे हैं, उनको द्विरावृत्तिसे घडी घडीका मानें तो साठ मुहूर्त कलांशनामक होते हैं ॥ १० ॥

नक्षत्रसंज्ञया प्रोक्ताः षष्ट्यावृत्त्या कलांशकाः॥ मेषो
यमो वृषः कुंभो झषो जूकश्च कर्कटः ॥ ११ ॥
सिंहोऽथ वृश्चिकश्चापो मृगः कन्या क्रमाद्भवेत्॥ राशिचक्रकलांशे
तु क्रमादेवं प्रकीर्तिताः ॥ १२ ॥

टीका—अथ कलांशानाह—नक्षत्रेत्यर्धेन । या विनाडीसंज्ञाः द्वात्रिंशत् प्रागुक्ताः ता एव पुनरावृत्त्या दिनरात्रिषाष्टिभागात्मकनाडीरूपिण्यः पुनरावृत्त्या नक्षत्रसंज्ञया कलांशकाः षष्ट्या षष्टिसंख्यया ज्ञेया इति । अथ राशिचक्रकलांशसंज्ञाः पंचघटिकात्मिका उदयात् द्वादशाह—मेष इति द्वादशश्लोकांतम् । उदयात् पंच घटिकाः मेषः १, ततः पंचमो मिथुनः २, ततः पंच वृषः ३, ततः पंच कुंभः ४, ततः पंच झषो मीनः ५, ततः पंच जूकः तुला ६, ततः पंच कर्कटकः ७, ततः पंच सिंहः ८, ततःपंच वृश्चिकः९, तत पंच चापः धनुः१०,ततः पंच मृगो मकरः ११, ततः पंच कन्या १२, एवं क्रमात् राशिचक्रकलांशे संज्ञाः प्रकीर्तिताः कथिताः इति ॥ ११ ॥ १२ ॥

भाषा--अब कलांशमुहूर्त कहते हैं. जो पहिले बत्तीस मुहूर्त नाडीनामक कहे हैं उनको पुनरावृत्तिसे घटिकात्मक लेके गिनना. वे नक्षत्रकलांश

मुहूर्त होते हैं. अब राशिचक्रकलांश मुहूर्त कहते हैं. सूर्योदयसे लेके पांच-पांच घटिकाका मेषादिराशिकलांश जानना, मेष १, मिथुन २, वृषभ ३, कुंभ ४, मीन, ५, तुला ६, कर्क ७, सिंह ८, वृश्चिक ९, धन १०, मकर ११, कन्या १२, यह क्रमसे राशिकलांशक हैं ॥ ११ ॥ १२ ॥

मेषो गौर्यमकर्की च लेयकन्यातुलालयः ॥ धनुर्मृगघटोमीनमुदयाद्घटिकासु च ॥ १३ ॥ सिंहान्मेषाच्च चापाच्च नक्षत्रक्रम ईरितः॥चंद्रज्ञशुक्रधूमार्कपरिवेषारकार्मुकाः ॥१४॥ गुरुः पातः शनिः केतुर्ग्रहाः स्युर्द्वादश क्रमात् ॥ चक्रलिप्तांशके चैवं केत्वादिस्तारकांशके ॥ १५ ॥

टीका–अथ नित्योदयक्रममाह–मेष इति। मेषः १, गोर्वृषः २, यमो मिथुनः ३, कार्किः ४, लेयः सिंहः ५, कन्या ६, तुला ७, अलिः वृश्चिकः ८, धनुः ९, मृगो मकरः १०, घटः कुंभः ११, मीनः १२, एवं क्रमेण उदयादुदयकालीनलग्नात् घटिकासु ग्रंथांतरोक्तासु नित्योदयसंज्ञा ज्ञेयाः। ताश्च "मीने मेषे चतुर्नाड्यः सार्धाश्च वृषकुंभयोः। मकरे मिथुने पंच शेषाः सार्धाः प्रकीर्तिताः॥" एवमिति ॥ १३ ॥ अथ नक्षत्रक्रमग्रहणप्रकारभेदानाह–सिंहादित्यर्धेन। सिंहात् सिंहराश्यारंभनक्षत्रात् मघासकाशादित्यर्थः। आश्लेषांतमिति भावः इत्येकः प्रकारः। चापात् धनूराश्यारंभनक्षत्रात् मूलसकाशादित्यर्थः ज्येष्ठांतमिति भावः इति द्वितीयः प्रकारः। मेषात् मेषराश्यारंभनक्षत्रात् अश्विनीनक्षत्रसकाशादित्यर्थः रेवत्यंतमिति भावः इति तृतीयः प्रकारः। एवं प्रकारत्रयेण नक्षत्राणां परिगणनक्रमः ईरितः कथितः। अथ प्रकारत्रयेण प्रत्यहं रात्रिं दिनकाले द्वादशग्रहक्रम-

माह । चंद्रः १, ज्ञो बुधः २, शुक्रः ३, धूमः पूर्वार्धोक्तो ग्रहः ४, अर्कः ५, परिवेषः पूर्वार्धोक्तः ६, आरो भौमः ७, कार्मुकः पूर्वार्धोक्तः ८, गुरुः ९, पातः पूर्वार्धोक्तः १०, शनिः ११, केतुः १२, एते द्वादश ग्रहाः क्रमात् उक्तक्रमेण चक्रलिप्तांशके विषये सिंहात् सिंहलग्नोदयात् सकाशात् द्वादशलग्नेषु भवंति तत्तल्लग्नकाले उदयंते इत्यर्थः । एवं तारकांशके विषये मेषात् मेषलग्नात् सकाशात् केत्वादिः केतुरादिर्यस्येति सः प्रागुक्तः क्रमः विलोमतः चित्रांतं ग्राह्य इत्यर्थः । तथा घटिकांशके विषये अर्कादिधूमपर्यंताः प्रथमोक्तक्रमांतरगतरविसकाशात् धूमांतं चापात् धनोदयात् द्वादश उदयविषये ग्राह्या इत्यर्थः ॥ १४ ॥ १५ ॥

भाषा—अब नित्योदयलग्नक्रम टीकामें स्पष्ट है. अब तात्कालिक बारह ग्रह लानेका क्रम कहते हैं. जन्मलग्न जो होवे उसको पहिले देखना, कि सिंहादि है, या चापादि है, या मेषादि है. वो देखके तीन क्रममेंसे जिस क्रममें आया होवे वो क्रम मुख्य गिनके वहांसे अनुक्रमसे चंद्र १, बुध २, शुक्र ३, धूम ४, सूर्य ५, परिवेष ६, मंगल ७, कार्मुक ८, गुरु ९, पात १०, शनि ११, केतु १२, पर्यंत जो राशि आवे वो राशि लेके उस राशिके ग्रह मांडना. जैसा वृश्चिक लग्न जन्मका है तो सिंहादि है इस वास्ते तात्कालमें सिंहराशिका चंद्र, कन्याका बुध, तुलाका शुक्र, वृश्चिकका धूम इत्यादि कर्कका केतु इत्यंत जानना. नक्षत्रक्रममें मेषके क्रमसे ग्रह केतु आदि चन्द्रांत गिन जहांतक पूर्वराशिके अनुसारसे नक्षत्र आवें वो नक्षत्रका ग्रह जानना. जैसा अश्विनीका केतु, यहांसे गिनना तो उत्तराफाल्गुनीके चतुर्थ चरणका चंद्र आया, वैसे सब लायके पूर्वाभाद्रपदाका तीसरी वक्त गिननेसे केतु, पुनः आया तो केतु पूर्वाभाद्रपदाके चौथे चरण मीनराशिका है इत्यादि. विशेष टीकामें स्पष्ट है ॥ १३ ॥ १४ ॥ १५ ॥

अर्कादिधूमपर्यंताः क्रमात्स्युर्घटिकांशके ॥ सत्र्यंशा घटिकास्तिस्रो मेषानिमिषयोर्द्विज ॥ १६ ॥ चतस्रः कुंभवृषयोस्तथा मकरयुग्मयोः ॥ वित्र्यंशाः पंच सत्र्यंशास्ताः कर्किधनुषोः स्मृताः ॥ १७॥ सिंहवृश्चिकयोः षट्‌ च अंशोनाः सप्त शेषयोः ॥ नित्यं मानमिदं प्रोक्तं मेषादुदयराशिजम् ॥ १८ ॥

टीका–अथ प्रागुक्तमेषादिनित्योदयानां प्रत्यहं भोगकालमानघटिकामाह–सत्र्यंशा इत्यादि अष्टादशश्लोकपर्यंतम् । हे द्विज मैत्रेय ! मेषानिमिषयोः मेषामीनयोः लग्नयोः नित्यं मानं सत्र्यंशाः तिस्रो घटिकाः विंशतिपलाधिकघटिकाद्वयमित्यर्थः । कुंभवृषयोः नित्यभोगमानचतस्रः घटिकाचतुष्टयात्मकं तथा तेन प्रकारेण मकरयुग्मयोः मकरमिथुनयोः वित्र्यंशाः पंच तृतीयांशोनाः पंचचत्वारिंशत्पलाधिकघटिकाचतुष्टयात्मकमित्यर्थः । नित्यमानं ज्ञेयं ताः पंच सत्र्यंशाः तृतीयांशसहिताः पंच नाम विंशतिपलाधिकपंचघटिकाः नित्यमानं कर्किधनुषोः स्पष्टं स्मृताः तथा सिंहवृश्चिकयोः षट् घटिका नित्यमानं च परं शेषयोः उक्तावशिष्टयोः कन्यातुलयोरित्यर्थः । अंशोनाः सप्त अत्र अंशशब्देन घटिकातृतीयांशो ग्राह्यः । चत्वारिंशत्पलाधिकषड्घटिका इत्यर्थः । एवं इदम् उक्तप्रकारकं मेषलग्नात् सकाशात् उदयराशिजं लग्नविहितमित्यर्थः । नित्यं मानं प्रोक्तं कथितमिति ॥ १६ ॥ १७ ॥ १८ ॥

भाषा–अब नित्य लग्नकी घटीपलात्मक मान कहते हैं. हे मैत्रेय ! मेषमीनका प्रमाण घटी ३ पल २०, वृषकुंभका प्रमाण घ० ४ पल०, मिथुनमकरका प्रमाण घ० ४ प० ४०, कर्कधनका प्रमाण घ० ५ प० २०,

सिंहवृश्चिकका प्रमाण घ० ६ प० ०, कन्यातुला प्रमाण घ० ६ प० ४०, यह लग्नमान कहा ॥ १६ ॥ १७ ॥ १८ ॥

रव्याक्रांतात्तथा प्रोक्ता एकद्वित्रिचतुर्घटी ॥ मानानि मेषतः सिंहाच्चापादर्कोदयात्ततः ॥१९॥ दशवर्गाधिपाश्चित्याः प्रोक्ताश्चेंदुनवांशकाः ॥ अन्यत्र कीर्तिताः प्रश्ने नष्टद्रव्यविनिश्चये ॥ २० ॥

टीका–अथ प्रकारांतरमाह–रव्याक्रांतादिति द्वाभ्याम् । रव्याक्रांतात् अर्कोदयात् रविसहितात् उदयलग्नादित्यर्थः । लग्नमानानि मेषात् चतुर्णां सिंहाच्चतुर्णां चापाच्चतुर्णां क्रमात् एकद्वित्रिचतुर्घटीमानं प्रकारांतरेण बोध्यम् तत्र दशवर्गाधिपाः तत्तल्लग्नोक्तमानेषु विभाजनीयाः तथा इंदुनवांशकाः चन्द्रराशिनवांशकाश्च विभाजनीयाः। तत्प्रयोजनमाह–नष्टद्रव्यविनिश्चये नष्टद्रव्यस्य विनिश्चयः निर्णयः यस्मिन् तथाभूते प्रश्ने प्रश्नविचारे एते इंदुनवांशकाः अन्यत्र कीर्तिताः अन्यमतोक्ता इति ॥ १९ ॥ २० ॥

भाषा–अब प्रकारांतर कहते हैं. उदयलग्नसे मेषसे ४, सिंहसे ४, धनसे ४, यह बारह राशिमें एक दो तीन चार घटिका क्रमसे कालप्रमाण जानना. दशवर्गका और चन्द्रनवांशका चिंतवन करना. नष्टद्रव्यप्रश्नादिकमें भी इसका प्रयोजन है ॥ १९ ॥ २० ॥

श्रीमान् रिक्तश्च मूर्खश्च कुशलो वंचनः पटुः ॥ स्त्रीसक्तो वेदविद्वीरो मंदाग्निस्तीव्ररोषणः ॥ २१ ॥ मूलरोगी च पिशुनः सदाऽटनपरोऽशुचिः॥ सेवाकरः सुभाषी च धनवाँल्लोभसंयुतः ॥ २२ ॥ प्रख्यातो विद्यया भीरुर्बुद्धिश्रीमान्सुशीलकः ॥ परदाररतः

श्रीमान्सुशीलो बलवान्गुणी ॥ २३ ॥ अध्वन्यो निगमव्यग्रः पातकी च तपोयुतः ॥ परदाररतो वेश्यासक्तोऽसत्फलवासनः ॥ २४ ॥ सिंहासनस्थो रिक्तश्च जटिलः कुलपांसनः॥ योगी बुद्धश्च संन्यासी सेनानीर्बुद्धिमान्सुखी ॥ २५ ॥ कुष्ठी भूतकरः श्रीमानेकपुत्रसमन्वितः ॥ शास्त्रज्ञो दासकृत्यश्च चंडरोषसमन्वितः ॥ २६ ॥ स्त्रीसक्तः परदारोक्तो भृत्यः पटुररोगवान् ॥ कुरूपश्चापि कुशलो जितारिः पुत्रवर्जितः ॥ २७ ॥ शूरो वीरश्च चंडश्च कुशलः कुक्षिरोगवान् ॥ ग्रामणीर्विटपो धूर्तः सतीपतिररिंदमः ॥ २८ ॥ वंध्यापतिः सुरापी च रिक्तसाध्यपतिः सुखी ॥ विजयी युद्धभीरुश्च चोरोऽमर्षी धनार्जकः ॥ २९ ॥ धनार्जनाय सततमकृत्यशतकारकः॥ वृषलीपतिरिन्द्रश्च सेनानीः सत्यवाक्छुचिः ॥ ३० ॥ शिरोरोगी च कुष्ठी च मेही च पिशुनः सुखी ॥ जलवद्रोगसंयुक्तः कृतज्ञो निर्घृणो घृणी ॥ ३१ ॥ विवादशीलः सुमुखः क्रोधनः कामुकः पटुः ॥ चलचित्तो धनी वाग्ग्मी विद्यार्जनपरः सुखी ॥ ३२ ॥ अपुत्रः कृषिकृद्धीरः परादाररतः शुचिः ॥ विद्याहीनश्च मूर्खश्च बुद्धिमाञ्छास्त्रपारगः ॥ ३३ ॥ सदाभीरुर्जडो वाग्ग्मी कृत्येषु कुशलः सुखी ॥ नीतिज्ञो लेखको नीचजातिकृत्यरतः पटुः ॥ ३४ ॥ प्रेष्यो गोमयविक्रेता वदान्यो

धनवंचकः ॥ सेनानीः क्षेत्रवान्वीरो लेखवृत्त्या
च जीवति ॥ ३५ ॥ मूर्खो जितेंद्रियो वाग्मी
सदा कृत्यपरः सुखी ॥ अन्नदाता च मिष्टाशी
शिवभक्तो जितेंद्रियः ॥ ३६ ॥ कुब्जो वक्रशरीरश्च
जात्यंधो बधिरः शठः॥ अमर्षी नर्तकः क्रुद्धो दुर्जनो
वेदपारगः ॥ ३७ ॥ वक्ता च गायकः श्रीमान् सर्वदा
च जनार्जकः ॥ तालज्ञो विद्यया युक्तः पंचपंचा-
शदुत्तरम् ॥ ३८॥ शतं गुणाश्च श्रीयोगा एकयोगा-
वसानकम्॥पूर्वपूर्वयुता ओजे युग्मे राशौ तु वामतः
॥ ३९ ॥ चरे क्रमः स्थिरे वाममुभयोर्धपदादितः ॥
आदौ त्रिंशद्गुणा अंते वामतस्त्रिंशदेव हि ॥ ४० ॥
षष्ट्यंशे तु गुणाः प्रोक्ताः प्राग्वदोजचरादिकाः ॥

टीका—अथ दशवर्गादिषु फलान्याह—श्रीमानित्यादिसार्धचत्वारिंशच्छ्लोकपर्यंतम् । श्रीमान् १, रिक्तः २, मूर्खः ३, कुशलः ४, वंचनः ५, पटुः ६, स्त्रीसक्तः ७, वेदवित् ८, धीरः ९, मंदाग्निः १०, तीव्ररोषणः अतिकोपी ११, मूलरोगी मूले मूलस्थाने यो रोगः सोऽस्यास्तीति तथा १२, पिशुनः दुर्जनः १३, सदाऽटनपरः सर्वकाले भ्रमणशीलः १४, शुचिः १५, सेवाकरः दासः १६, सुभाषी पटुवाक् १७, धनवान् १८, लोभसंयुतः १९, विद्यया प्रख्यातः प्रसिद्धः २०, भीरुः २१, बुद्धिश्रीमान् बुद्ध्या श्रीमान् २२, सुशीलकः २३, परदाररतः २४, श्रीमान् २५, सुशीलः २६, बलवान् २७, गुणी २८, अध्वन्यः मार्गस्थः २९, निगमव्यग्रः वेदाभ्यासे निमग्नः ३०, पातकी ३१, तपोयुतः ३२, परदाररतः ३३, वेश्यासक्तः ३४, असत्फलवासनः मिथ्याफलाभिकांक्षी ३५,

सिंहासनस्थः, ३६ रिक्तः निरुद्योगी ३७, जटिलः जटाधारी ३८, कुलपांसनः नीचः ३९, योगी ४०, बुद्धः ज्ञाता ४१, संन्यासी ४२, सेनानीः सेनापतिः ४३, बुद्धिमान् सूक्ष्मधीः ४४, सुखी ४५, कुष्ठी कुष्ठरोगी ४६, भूतकरः ४७, श्रीमान् ४८, एकपुत्रसमन्वितः ४९, शास्त्रज्ञः ५०, दासकृत्यः ५१, चंडरोषसमन्वितः तीव्रकोपी ५२, स्त्रीसक्तः ५३, परदारोक्तः परदारैः उक्तः भाषितः लोभित इत्यर्थः ५४, भृत्यः ५५, पटुः ५६, अरोगवान् रोगरहितः ५७, कुरूपः ५८, कुशलः ५९, जितारिः जितशत्रुः ६०, पुत्रवर्जितः ६१, शूरः ६२, वीरः ६३, चंडोऽतिकोपी ६४, कुशलः ६५, कुक्षिरोगवान् जठररोगी ६६, ग्रामणीः ग्रामपतिः ६७, विटपः स्त्रैणपालकः ६८, धूर्तो वंचकः ६९, सतीपतिः ७०, अरिंदमः शत्रुहा ७१, वंध्यापतिः ७२, सुरापी ७३, रिक्तसाध्यपतिः रंकप्राप्यस्त्रीसेवी ७४, सुखी ७५, विजयी ७६, युद्धभीरुः ७७, चोरः ७८, अमर्षी क्रोधी ७९, धनार्जकः द्रव्यसंपादकः ८०, धनार्जनाय द्रव्यसंपादनाय सततं निरंतरम् अकृत्यानां शतानि करोतीति तथा ८१, वृषलीपतिः शूद्रस्त्रीनिषेवी ८२, इंद्रः ८३, सेनानीः ८४, सत्यवाक् ८५, शुचिः ८६, शिरोरोगी ८७, कुष्ठी ८८, मेही मेहरोगवान् ८९, पिशुनः दुर्जनः ९०, सुखी ९१ जलवद्रोगसहितः जलोदरादियुक्तः ९२, कृतज्ञः उपकारज्ञः ९३, निर्घृणो निर्दयः ९४, घृणी दयावान् ९५, विवादशीलो वादस्वभावः ९६, सुमुखः सुंदराननः ९७, क्रोधनः ९८, कामुकः ९९, पटुः कुशलः १००, चलचित्तः १०१, धनी २, वाग्मी वक्ता ३, विद्यार्जनपरः ४, सुखी ५, अपुत्रः ६, कृषिकृद्वीरः कृषीवलश्रेष्ठः ७, परदाररतः ८, शुचिः ९, विद्याहीनः ११० मूर्खः ११, बुद्धिमान् १२, शास्त्रपारगः शास्त्रांतज्ञः १३, सदाभीरुः १४, जडः १५, वाग्मी १६, कृत्येषु कुशलः कार्यपटुः १७,

सुखी १८, नीतिज्ञः न्यायज्ञः १९, लेखकः १२०, नीचजातिकृत्यरतः अन्येभ्यो नीचजातिकारयिता २१, पटुः २२, प्रेष्यो दूतः २३, गोमयविक्रेता २४, वदान्यो दाता २५, धनवंचको धनप्रतारकः २६, सेनानीः २७, क्षेत्रवान् २८, वीरः २९, लेखवृत्त्या च जीवति लेखनक्रियया निर्वाहकः १३०, मूर्खः ३१, जितेंद्रियः शमदमसंपन्नः ३२, वाग्मी ३३, सदा कृत्यपरः सदोद्योगी ३४, सुखी ३५, अन्नदाता ३६, मिष्टाशी मधुरभुक् ३७, शिवभक्तः ३८, जितेंद्रियः ३९, कुब्जः बुद्धिशरीराभ्यां वक्रः १४०, वक्रशरीरः शरीरेणैव वक्रः ४१, जात्यंधो जन्मांधः ४२, बधिरः श्रवणहीनः ४३, शठो धूर्तः ४४, अमर्षी क्रोधी ४५, नर्तको नटः ४६, क्रुद्धः संजातकोपः ४७, दुर्जनो दुष्टः ४८, वेदपारगः वेदानां पारं समाप्तिं गच्छतीति तथा ४९, वक्ता १५०, गायकः ५१, श्रीमान् लक्ष्मीवान् ५२, सर्वदा जनार्जकः जनमनःसंपादकः ५३, तालज्ञः गानसाधनविशेषज्ञः ५४, विद्यया युक्तो विद्वान् १५५, एवं पंचपंचाशदुत्तरम् एकयोगावसानकम् एकयोगोऽवसाने यस्य तत् शतं पंचपंचाशदुत्तरगुणाः श्रीयोगा ज्ञेयाः इति ओजे ओजराशौ पूर्वे पूर्वयुताः पूर्वनवांशे प्रथमसहिताः क्रमाद्योगाः ज्ञेयाः । युग्मे समे राशौ तु वामतः वैपरीत्येन प्रथमनवांशे अवसानीययोगमारभ्य क्रमो ज्ञेयः । चरे चरराशौ उत्क्रमः, स्थिरे राशौ तु वामं विलोमतो यथा स्यात् तथा, उभये द्विस्वभावे राशौ अर्धपदादितः तथा आदौ राश्यारंभे त्रिंशद्गुणा योगाः आरंभतः अंते राश्यंते वामतः विलोमतः त्रिंशदेव हि षष्ट्यंशे तु प्राग्वत्पूर्वोक्तरीत्यैव ओजचरादिकाः विषमसमचरस्थिरादिकाः गुणा बोद्धव्या इति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

भाषा–अब दशवर्ग ऊपरसे योगफल कहते हैं. सो योगोंके नाम टीकामें स्पष्ट लिखे हैं इस वास्ते भाषामें फिर नहीं लिखे हैं. ॥ २१ ॥२२॥२३॥ ॥ २४ ॥ २५ ॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥३४॥ ॥३५॥३६॥३७॥३८॥ यह श्रीमान् आदि लेके विद्वान्पर्यंत एकसौ पंचावन १५५ योग कहे. वे विषम राशिके नवांशमें श्रीमान् योगसे गिनती करना, समराशिका नवांश होवे तो विद्वान् योगसे आरंभ करके श्रीमान् योगपर्यंत क्रम जानना. चर राशिमें क्रमसे, स्थिर राशिमें विलोमसे, द्विस्वभावराशिमें अर्धभागसे क्रम लेना ॥ ३९ ॥ ४० ॥

मेषादुत्क्रमते राहुः केतुर्याति वृषात्क्रमात् ॥ ४१ ॥

टीका–अथ राहुकेतुगतिमाह–मेषादित्यर्धेन । राहुः मेषात् मेषराशिसकाशात् उत्क्रमते विपरीतगतिक्रमेण . क्रमशो याति तथा केतुः वृषाद्वृषराशेः सकाशात् क्रमात् अनुलोमगतिक्रमेण याति ॥ ४१ ॥

भाषा–अब राहुकेतुकी गति कहते हैं–राहु मेषसे विपरीत क्रमसे जाताहै, केतु वृषभसे क्रमसे जाता है ॥ ४१ ॥

ऋक्षसंध्यंतरे जातः प्रष्टाऽसौ म्रियते भृशम् ॥
केतुराहुस्थिते राशौ भसंधौ मरणं भवेत् ॥४२॥
इतरेषां त्रयाणां च प्रकाशे व्याधिपीडितः ॥
दुर्बलो बुद्धिहीनश्च जायते न मृतो यदि ॥ ४३ ॥

टीका–उक्तस्य प्रयोजनमाह–ऋक्षेति । ऋक्षसंध्यंतरे ऋक्षस्य यद्राहुकेत्वोः प्रवेशसंध्यंतरं तस्मिन्नसौ प्रष्टा प्रश्नकर्ता जातश्चेत् भृशमिति निश्चयेन म्रियते नश्यति, तथा केतुराहुस्थिते केतुराहुसंयुक्ते राशौ यः भसंधिः राशिसंधिः तस्मिन् प्रष्टुः मरणं भवेत्, एवं

राहुकेतुवत् इतरेषां त्रयाणां धूमकार्मुकपरिवेषाणां प्रकाशे उदयराशौ प्रष्टा व्याधिपीडितो भवाति, कदा यादि न मृतश्चेत् दुर्बलो बुद्धिहीनश्च जायते इति ॥ ४२ ॥ ४३ ॥

भाषा—अब राहुकेतुगतिका फल कहते हैं—राहुकेतुका एकराशिमें संयोग होवे तो प्रश्न करनेवालेका मरण जानना, धूम कार्मुक परिवेषका भी फल ऐसा जानना ॥ ४२ ॥ ४३ ॥

कलांशराशितोऽरिष्टे नक्षत्रारिष्टसंभवे ॥ पित्रादीनां
सुतस्यापि तद्वशाच्चिंतयेत्सुधीः ॥ ४४ ॥ पापशत्रुग्रहाक्रांता
भावास्तद्दृष्टिसंयुताः ॥ सौम्यपापादयश्चैवं
शुभाशुभफलप्रदाः ॥ ४५ ॥ एकाद्वित्रिचतुःपंचषट्सप्ताष्टांकादिग्धराः
॥ सूर्येन्दुनृपमूर्च्छेन्द्रनृपभार्कनृपा
जिनाः॥४६॥पंचाष्टवसुभूतेषु सुरदंताजिनाद्रयः॥
नखास्त्रिंशत्खवेदाः षट्सप्ततिःषष्टिराद्रियुक् ॥४७॥
नवतिश्च शतं मूर्च्छा जिना दंता जिना दिशः ॥
एवं नवशतं प्रोक्ताः क्रमादेवं तु तत्र तु॥४८॥ पूर्वपूर्वयुता
संख्या लक्ष्मीयोगफलप्रदा ॥ नक्षत्रे राशिचक्रे
तु दिवसे वामतः स्मृता ॥ ४९ ॥

टीका—अथ पित्राद्यरिष्टमाह—कलांशेत्यादि एकोनपंचाशच्छ्लोकपर्यंतम् । कलांशराशितः षोडशांशराशिसकाशात् अरिष्टे प्राप्ते साति तथा नक्षत्रारिष्टसंभवे नक्षत्रतः अरिष्टजनिते अरिष्टे साति पित्रादीनां सुतस्यापि तद्वशात्कलांशनक्षत्रांशशुभाशुभवशात्सुधीः शुभाशुभं चिंतयेत् तद्रीतिमाह—पापशत्रुग्रहाक्रांताः पापग्रहैः

शत्रुग्रहैर्वा सहिताः तद्दृष्टिसंयुता वा भावाः यदि भवेयुः तदा सौम्यपापादयः यथाक्रमं शुभाशुभफलप्रदा इष्टानिष्टफलदा ज्ञातव्याः । तत्रांशानाह-एक १ द्वि २ त्रि ३ चतुः ४ पंच ६ षट् ६ सप्त ७ अष्ट ८ अंक ९ दिक् १० धरा १ सूर्यः १२ इंदुः १ नृपः १६ मूर्छा २१ इंद्रः १४ नृपाः १६ भानि २७ अर्कः १२ नृपाः १६ जिनाः २४ पंच ५ अष्ट ८ वसुः ८ भूतानि ५ इषु ५ सुर ३३ दंत ३२ जिन २४ अद्रि ७ नखाः २० त्रिंशत् ३० खवेदाः ४० षट्सप्तति ७६ षष्टिः अद्रियुक् ६७ नवतिः ९० शतं १०० मूर्च्छाः २१ जिनाः २४ दंताः ३२ जिनाः २४ दिशः १० एवंप्रकारेण नवशतं ९०० उक्तयोगाः अनुलोमविलोमक्रमेण ज्ञेयाः । तत्र तु पूर्वपूर्वयुता संख्या अनुक्रमोक्तांशसंख्या लक्ष्मीयोगफलप्रदा सौम्ययोगे भवति सैव पापयोगे तन्नाशकेति इयं संख्या नक्षत्रचक्रे राशिचक्रे च ज्ञेया दिवसचक्रे तु वामतः विलोमतः स्मृता ॥ ४४ ॥ ४५ ॥ ४६ ॥४७॥ ४८ ॥ ४९ ॥

भाषा-अब पितृभ्रातृपुत्रादिकोंका अरिष्ट कहते हैं,-षोडशांशरीतिसे अरिष्ट आवे नक्षत्रमतसे अरिष्ट आवे और वे भावके ऊपर पापग्रहोंकी दृष्टि होवे या पापग्रह बैठे होवें तो पित्रादिकोंका अशुभफल जानना. शुभदृष्टियोगोंसे शुभ जानना, बाकीके नवसौ ९०० योग जो हैं उनका विचार पूर्वापर निर्णय करके देखना. तो स्पष्ट मालूम होवेगा ॥ ४४ ॥ ४५ ॥ ४६ ॥ ॥ ४७ ॥ ४८ ॥ ४९ ॥

शुभमित्रग्रहाक्रांता भावास्तद्दृष्टिसंयुताः ॥
द्वित्रिपंच च षट् सप्त वसुनंदादिशोऽद्रयः ॥ ५० ॥
त्रिंशद्दिशो नखाः षष्टिसूर्यमूर्च्छाजिनाजिनाः ॥
आकृतिर्भानिभार्काग्निनखाश्छंदः शतं नखाः ॥ ५१ ॥

त्रिंशत्खवेदा दिग्विश्वे शतं षष्टिः शतं जिनाः ॥
वेदाः खवेदाः पूर्वार्द्धे परार्धे प्राग्वदत्र तु ॥ ५२ ॥
एते योगबलाच्चैव केवलं दुर्गतिप्रदाः ॥

टीका–अथ सुगतिदुर्गतिप्रदानंशानाह–शुभामित्रेत्यादिसार्धद्विपंचाशच्छ्लोकपर्यन्तम् । शुभमित्रग्रहाक्रांताः शुभग्रहैर्मित्रैर्वा युताः तद्दृष्टिसंयुता वा भावाश्चेत् द्वि २ त्रि ३ पंच ५ षट् ६ सप्त ७ वसुः ८ नंदाः ९ दिशः १० अद्रयः ७ त्रिंशत् ३० शः १० नखाः २० षष्टिः ६० सूर्यः १२ मूर्छाः २१ जिनाः २४ आकृतिः २१ भानि २७ अर्काः १२ अग्नयः ३ नखाः २० छंदः २६ शतं १०० नखाः २० त्रिंशत् ३० खवेदाः ४० दिक् १० विश्वे १३ शतं १०० षष्टिः ६० शतं १०० जिनाः २४ वेदाः ४ खवेदाः ४० एते राशिपूर्वार्द्धे शुभाः परार्द्धे तु प्राग्वत् विलोमतः केवलं दुर्गतिप्रदा भवंति ॥ ५० ॥ ५१ ॥ ५२ ॥

भाषा–अब सुगति दुर्गतिका ज्ञान कहते हैं–भाव शुभ मित्रग्रहोंसे युक्त होवे या उनकी दृष्टि होवे तो यह योग २।३।५।६।७।८।९।१०।७।३०। १०।२०।६०।१२।३१।२४।२१।२७।१२।३।२०।२६।१००। २०।३०।४०।१०।१३।१००।६०।१००।२४।४।४०। राशिके पूर्वार्द्धमें जानना. परार्द्धमें विलोमक्रमसे लेना. केवल दुर्गति देनेवाले हैं ५० ॥ ५१ ॥ ५२ ॥

दिनर्क्षं चक्रसख्याः स्युरादिमध्यावसानिकाः॥५३॥
सप्तविंशतिसप्तत्यां शते षष्ट्यां शतद्वये ॥ ५४ ॥
कुब्जः कलांशे मूकस्तु शतद्वयशतत्रये ॥ ५५ ॥
सहस्रे द्विशते जातः पंचमे पापसंयुते ॥

द्वित्रिपंचाष्टदिग्विश्वनृपतिधृतिभूमयः ॥ ५६ ॥
नवदिग्भसुरैस्तानैस्तिथिविश्वाष्टकैः क्रमात् ॥
गुणेनवामतः प्रोक्तो लक्ष्म्यंशे श्रीसमन्वितः ॥ ५७॥

टीका–अथ दिनादिभागग्रहणरीतिं फलं चाह–दिनेत्यादिसप्तपंचाशच्छ्लोकपर्यंतम् । दिनानि दिवसाः, ऋक्षाणि नक्षत्राणि, चक्रं राशिचक्रं एतेषां संख्याः आदिमध्यावसानिकाः प्रथमद्वितीयांत्यभागभवाः ज्ञेयाः । सप्तविंशतिः २७ सप्तत्यां ७० शते १०० षष्ट्यां ६० शतद्वये २०० षट् ६ पंचाशति ५० विंशे २० षण्णवत्यां ९६ अशीतिके ८० षष्टिभागे ६० विंशत्यां २० शते १०० षष्ट्यां ६० शतद्वये २०० जातः कुब्जः स्यात् कलांशे तु शतद्वये २०० शतत्रये ३०० सहस्रे १००० द्विशते २०० पंचमे ५ पापसंयुते सति मूको भवतीति तथा ते अंशाः द्वि २ त्रि ३ पंच ५ अष्ट ८ दिक् १० विश्वे १३ नृपाः १६ धृतिः १८ भूमयः १ नव ९ दिक् १० भं २७ सुराः ३३ ताना ४९ तिथिः १५ विश्वे १३ अष्टकैः ८ एतैः वामतः गुणेन गुणनेन प्राप्तलक्ष्म्यंशे एतत्संज्ञके भागे जातः श्रीसमन्वितः प्रोक्तः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

भाषा–अब कुब्जादि योगका ज्ञान कहते हैं, दिन नक्षत्र राशि इनकी संख्या आदि मध्य अवसानसहित मिलायके जो संख्या सो यह आवे तो २७ । ७० । १०० । ६० । २०० । ६ । ५० । २० । ९६ । ८० । ६० । २० । १०० । ६० । २०० कुब्ज होवेगा, २०० । ३०० । १००० । २०० और पंचम भावमें पापग्रह होवे तो मूक होवेगा, २ । ३ । ५ । ८ । १० । १३ । १६ । १८ । १ । ९ । १० २७ । ३३ । ४९ । १५ । १३ । ८ यह योगसे श्रीमान् होवेगा ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

रविचंद्रतमःपातकालेष्वरिभवेषु च ॥ पंचाशीतिशते वेदे मनौ द्वित्रिशते पुनः ॥ ५८ ॥ खाब्दिपंचसु दिग्भागे सहस्रे चाक्षिचंद्रगे ॥ खखानि रूपं विश्वाष्टत्रिचंद्रखखभूमिपैः ॥ ५९ ॥

टीका-अथ योगांतराण्याह-रवीत्यादि एकोनषष्टितमश्लोकपर्यंतम् । रविचंद्रतमःपातकालेषु सूर्यचंद्रराहुपातकालेषु अरिभवेषु ६।११ एषु तथा पंचाशीतितमे ८५ शते १०० वेदे ४ मनौ १४ द्वि २ त्रि ३ शते १०० खाब्धि ४० पंच ५ दिग्भागे १० सहस्रे १००० खाक्षि २० एतेषु चंद्रगे चंद्रसहिते भागे सति खखानि रूपं १०० विश्वे १३ अष्ट ८ त्रि ३ चंद्र १ खखभूमिपैः १६०० शताधिके षष्टिसंयुते भागे च जातः बधिरः स्यात् ॥ ५८ ॥ ५९ ॥

भाषा-अब योगांतर कहते हैं. सूर्यचंद्रराहुपातकालके विषे ६ । ११। ८५ । १०० । ४ । १४ । २ । ३ । १०० । ४० । ५ । १० । १००० । ३० । १०० । १३ । ८ । ३ । १ । १६०० यह योगमें चन्द्रसहित भाग होवे तो बहिरा होवे ॥ ५८ ॥ ५९ ॥

शताधिके च जातोस्मिन्बधिरः षष्टिसंयुते ॥ कर्किवृश्चिकमीनांशे तद्राशीशांशके तथा ॥ ६० ॥ पातकेत्वोश्च शग्वृक्षगतयोरंशके पुनः ॥ एकादित्रिशतैर्यावत्क्रमात्तास्तु सुभाजिताः ॥ ६१ ॥ आकाशपूर्णधृतयो निःशेषं लब्धसंख्यके ॥ सदोषेऽनंतरांशे तु जातस्यैतेऽपमृत्यवः ॥ ६२ ॥

टीका-अथाऽपमृत्युकालमाह-कर्कीत्यादिद्विषष्टिश्लोकपर्यंतम् । कार्किवृश्चिकमीनांशतद्राशीशांके कर्किः वृश्चिकः मीनः एतेषां यो नव-

मांशः तस्मिन् अथवा तद्राशीशांशके ते च पूर्वोक्तास्त्रयश्च राशयः कर्किवृश्चिकमीनाख्याः तेषां ये ईशाः चंद्रभौमगुरवः तेषां येऽशाः कर्कमेषवृश्चिकधनुर्मीनाख्याः तेषु जात्येकवचनं तथा पातके पाते अथवा औच्चशत्रुक्षगतयोः उच्चराशिशत्रुराशिस्थयोः ग्रहयोः अंशके राशिनवांशे यावदेकादित्रिशतम् एकांकमारभ्य शतत्रयांकपर्यंतं ये अंकाः तैः सुभाजिताः ये आकाशपूर्णधृतयः १८०० अष्टशताधिकसहस्रांकाः यावत् निःशेषं भवेयुः तावद्भाजनीयाः ततः लब्धसंख्यके अंशे सदोषे पापसाहित्यादिरूपे जातस्य उत्पन्नस्य जंतोः अपमृत्यवः ज्ञेया इति ॥ ६० ॥ ६१ ॥ ६२ ॥

भाषा—अब मृत्युकाल कहते हैं—कर्क, वृश्चिक, मीनांशके स्वामी क्रमसे चंद्र, भौम गुरु जानने. कर्क, मेष, वृश्चिक, धन, मीन इनके विषे और पातके विषे उच्चराशि शत्रुराशिके ग्रहके अंशोंके विषे एक एकसे लेके तीनसौ अंकपर्यंत जो अंक हैं उनके भाग लेना अठारहसौका जहांतक निःशेष होवे वहांतक भाग लेके लब्ध जो हो वो संख्यातुल्य अंकमें अंश पापग्रहका आवे तो उतने बरसोंमें अपमृत्यु जानना ॥ ६० ॥ ६१ ॥ ६२ ॥

पंचाशतः षडावृत्त्या स्वल्पमध्यचिरायुषः ॥
क्रमेणोत्क्रमशस्ते तु त्रैराशिकविधानतः ॥ ६३ ॥

टीका—अथ स्वल्पमध्यचिरायुर्ज्ञानमाह—पंचाशत इति । पंचाशतः ५० षडावृत्त्या आवृत्तिषट्केन किंचिदधिकाष्टांकेन मुहुर्मुहुर्गणनया स्वल्पमध्यचिरायुषः क्रमेणोत्क्रमशः त्रैराशिकविधानतः अनुपातरीत्या गणनेन स्वल्पमध्यचिरायुषो ज्ञेयाः । प्रथमावृत्तौ स्वल्पायुषः, द्वितीयावृत्तौ मध्यमायुषः, तृतीयावृत्तौ चिरायुषः अयं क्रमः । उत्क्रमस्तु चतुर्थावृत्तौ चिरायुषः, पंचमावृत्तौ मध्यमायुषः, षष्ठावृत्तौ स्वल्पायुष इति । तत्र वर्षाण्याह—शराः ५, दिशाः १०, तिथयः १५, नखाः २० तिथयः १५, दश १० एवं षडिति ॥ ६३ ॥

भाषा–अब थोडेमें स्वल्पायुषका मत कहते हैं–पचास ५० कुब्ज आवृत्तिके वर्षसे वारंवार त्रैराशिकरीतिसे गणना करके स्वल्प, मध्य, चिरायु क्रम उत्क्रमसे जानना. प्रथमावृत्तिमें स्वल्पायु, द्वितीयावृत्तिमें मध्यमायु, तृतीयावृत्तिमें दीर्घायु उसको क्रम कहते हैं. चौथी आवृत्तिमें दीर्घायु, पांचवीं आवृत्तिमें मध्यमायु, छठी आवृत्तिमें स्वल्पायु यह उत्क्रम जानना. आवृत्तिके वर्ष ५ । १० । १५ । २० । १५ । १० जानना ॥ ६३ ॥

खाक्ष्यद्रयस्तु षष्ट्यंशास्त्रिंशांशाः खरसाग्नयः ॥ ६४ ॥
अष्टषड्भूमयः कालहोराः सप्तदिनेषु च ॥
वेदेंद्रा द्वादशांशाः स्युर्नवांशा गजखेन्दवः ॥ ६५ ॥
सप्तांशा वेदनागास्तु द्रेष्काणास्तु षडग्नयः ॥
अर्द्धहोरा जिनाः प्रोक्ता नक्षत्राणि च राशयः ॥ ६६ ॥
भुंजते च ग्रहाश्चैवं मनुसंख्याश्च भुंजते ॥
राशयश्च ग्रहाश्चैव नक्षत्राणि च भुंजते ॥ ६७ ॥
रव्यादिशिखिपर्यंता नव भूभेंद्रकार्मुकौ ॥
पातश्च परिवेषश्च कालश्चेति चतुर्दश ॥ ६८ ॥

टीका–अथ चतुर्दशग्रहाणां नवग्रहाणां च षष्ट्यंशत्रिंशांशादीनाह–खाक्ष्यद्रय इत्यादिसार्धाष्टषष्टिश्लोकपर्यंतम् । खाक्ष्यद्रयः ७२० संख्याका षष्ट्यंशाः भवंति तथा खरसाग्नयः ३६० त्रिंशांशाः भवंति अष्टषड्भूमयः १६८ कालहोराः सप्तदिनेषु संहत्या भवंति वेदेंद्राः १४४ द्वादशांशाः स्युः गजखेंदवः १०८ नवांशाः स्युः वेदनागाः ८४ सप्तांशाः स्युः षडग्नयः ३६ द्रेष्काणाः स्युः जिनाः २४ अर्धहोराः स्युः एवं नक्षत्राणि राशयश्च प्रोक्ताः तान् ग्रहाः मनुसंख्याकाः रविचंद्रभौमबुधगुरुशुक्रशनिराहुकेतुभूभेंद्रकार्मुकपात-

परिवेषकालाख्याः चतुर्दश ग्रहाः भुंजते कदा तेषां प्रादुर्भावे सति भूभेंद्रकार्मुकादीनां प्रकटीभावे सति अन्यदा अन्यकाले तु नवग्रहाः रव्यादिकेत्वन्ता एवेति ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥

भाषा—अब चौदह ग्रहोंके षष्ट्यंशादिकोंके अंक कहते हैं, षष्ट्यंशको बारह राशिसे गुणन किये तो षष्ट्यंश योगांक ७२० भये वैसे आगे जानना. त्रिंशांशके ३६० कालहोराके १६८ द्वादशांशके १४४ नवांशके १०८ सप्तांशके ८४ द्रेष्काणके ३६ अर्धहोराके २४ यह अनुक्रमसे नक्षत्र राशि सूर्य १ चंद्र २ मंगल ३ बुध ४ गुरु ५ शुक्र ६ शनि ७ राहु ८ केतु ९ भूभा १० इन्द्रचाप ११ पात १२ परिवेष १३ काल १४ इनका ऊपर लिखे हुवे अंशोंमें प्रगट होने पीछे फलका विचार देखना ॥ ६४ ॥ ६५ ॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥

तेषां प्रादुर्भवे चैवमन्यदा तु नवग्रहाः ॥
दस्रात्पंच भगात् षट् च पंचाद्रार्द्वारुणादपि ॥६९॥
कूर्पात्सप्त क्रमात्प्रोक्तास्तत्तदंशेषु सर्वदा ॥
अक्षिणी पंचदश च नखास्तत्त्वं तथामराः ॥७०॥
सत्र्यंशाश्च षडंशोनाश्चत्वारिंशत्क्रमादथ ॥
शतं खेष्विदवः प्रोक्ता विनाडीतनवोऽपि च ॥७१॥

टीका—अथ नक्षत्राणि गणयति—दस्रादितिसार्धैकसप्ततिश्लोकपर्यंतम् । दस्रात् अश्विनीनक्षत्रात् पंच ५, भगात् पूर्वानक्षत्रात् षट् ६, आर्द्रायाः पंच ५, वारुणात् शततारकासकाशात् चत्वारि ४, कूर्पात् वृश्चिकराशिविहितात् पूर्वोक्तभगादिषट्कानंतरप्रथमप्राप्तात् अनुराधासकाशादित्यर्थः । सप्त ७ एवं क्रमात् तत्तदंशेषु सर्वदा ताराः प्रोक्ताः ज्ञेयाः तत्र विनाडीतनवः विनाडीरूपाणि अक्षिणी २ पचदश १५, नखाः २०, तत्त्वानि २५, अमराः ३३ सत्र्यंशा

अमराः त्र्यंशसहिताः ३३, षडंशोनाः अमराः षष्ठांशोनाः ३३ चत्वारिंशत् ४०, शतं १००, खेष्विदवः १५० अयं कलांशाद्यर्धहोरांशभोगकालः कलांशादीनाम् अर्धहोरांशस्य च भोगकालः प्रकीर्तितः कथितः ॥६९॥७०॥७१॥

भाषा—अब नक्षत्रकी गणना कहते हैं--अश्विनीसे ५ पूर्वासे ६, आर्द्रासे ५, शततारासे ४, अनुराधासे ७ यह क्रमसे तारा कहे हैं. वहां कलांश २।१५।२०।२५।३३।३३।३३ । ४० । १०० । १५० । यह कलांशका भागकाल कहा ॥ ६९ ॥ ७० ॥ ७१ ॥

कलांशाद्यर्धहोरांशभोगकालः प्रकीर्तितः ॥
प्रमाणराशयश्चैते भागहाराः कलात्मकाः ॥ ७२ ॥
तत्तदंशकला इच्छाराशयो गुणराशयः ॥
कटुको मधुरस्तिक्तः कषायो लवणाम्लकौ ॥७३॥
कलांशे क्रमशो गण्याः षष्ट्यंशे व्युत्क्रमात्स्मृताः ॥
त्रिंशांशे तु कषायादिः कालहोरांशके पुनः ॥ ७४ ॥
तिक्तादि द्वादशांशेषु मधुरादि नवांशके ॥
अम्लादि मुनिभागे तु द्रेष्काणे मधुरादितः ॥ ७५॥

टीका—प्रमाणेति । अयं श्लोकस्त्रैराशिकगणितप्रकारेण प्रमाणीभूतः । कलात्मकाः घटिकात्मकाः एते प्रमाणराशयश्च भागहाराः भागं हारयंति तथाभूताः भागहरणसाधनीभूता इत्यर्थः । भवंतीति शेषः च परं तत्तदंशकलास्तेषां तेषामंशानां कलाभूता इच्छाराशयः इच्छासंज्ञकराशयः गुणराशयो भवंति इति ॥ ७२ ॥ अथ कलांशादिषु उत्पन्नस्य प्रियरसानाहः—कटुक इत्यादिसार्धपंचसप्ततिश्लोकपर्यंतम् । कलांशे जातस्य अंशक्रमात् कटुस्तिक्तः मधुरो मिष्टः तिक्तः कटुः कषायः तुवरः लवणः क्षारः आम्लः स्पष्टः एते क्रमशः पुनः पुनः

प्रीतिविषये गण्याः षष्ट्यंशे तु व्युत्क्रमात् अम्लादिः क्रमशः कटुकांतं षट् मुहुर्गणनीयाः त्रिंशांशे तु कषायादितिक्तान्तं षट् कालहोरांशके तिक्तादिमधुरांतं षट्, द्वादशांशेषु मधुरादिकटुकांतं षट्, नवांशके अम्लादि लवणांतं षट्, मुनिभागे सप्तमांशे द्रेष्काणे चापि तु मधुरादितः कटुकांतं षट्, तद्वदेव अर्धहोरांशकेऽपि एषु अंशेषु जातस्य उक्तरसेषु तत्तदंशसंख्यया मुहुर्गणने रसेषु प्रीतिर्जायते इति ॥७३॥७४॥७५॥

भाषा-अब कलांशादिकमें उत्पन्न हुवेका फल कहते हैं. कलांशमें जो उत्पन्न भया उसको क्रमसे कटुक, मिष्ट, तिक्त, तुवर, क्षार, अम्ल यह क्रमसे जानना. षष्ट्यंशमें जो उत्पन्न भया है उसका फल अम्लसे लेके कटुपर्यंत गिनना. त्रिशांशमें जो उत्पन्न भया है उसका फल कषायादि तिक्तांत क्रमसे गिनना, कालहोरांशमें उत्पन्न भया होवे तो तिक्तादि क्रमसे गिनना द्वादशांशमें मधुरादिक्रमसे गिनना. नवांशमें अम्लादिक्रमसे गिनना. सप्तांशमें, अर्धहोरामें, द्रेष्काणमें मधुरादिक्रमसे गिनना. वे वे अंशसंख्या तुल्यवर्षमें रसप्रीति उत्पन्न होती है ॥७२॥७३॥७४॥७५॥

अर्धहोरांशके तद्वज्जातस्यैष्वेव जायते ॥
वेदाष्टदशभैरामैः प्रषष्ट्यंशे च भास्करे ॥ ७६ ॥
त्रिषट्नवात्रिखार्काब्धिजिनदंतसुराः क्रमात् ॥
नवदिग्भैर्जिनार्कैश्च सूर्यैस्तानैस्त्रिपंचाभिः ॥ ७७ ॥

टीका-अथ षष्ट्यंशोत्पन्नकन्यायाः वंध्यात्वादिज्ञानमाह-वेदेत्यादिसार्धसप्ततिश्लोकपर्यंतम् । वेदाष्टदशभैः४ । ८ । १० । २७ । रामैः ३ एतत्संख्याकैः अंशैः प्रषष्ट्यंशे भास्करे सूर्ये सति उत्पन्ना कन्या वंध्या भवति, तथा त्रि३षट् ६ नव ९ त्रि ३ ख० अर्क १२ अब्धि ४ जिन २४ दंत ३२ सुराः ३३ एते अंकाः क्रमात् नव ९ दिक् १० भानि २७ जिनाः २४ अर्काः १२ सूर्याः १२ तानाः ४९ त्रयः ३

पंच ५ पंचाशत् ५० एतैः गुण्याः प्राप्तांकपरिमिते षष्ट्यंशे वंध्या पूज्या । प्रकीर्तिता कथिता ॥ ७६ ॥ ७७ ॥

भाषा–अब षष्ट्यंशमें जो कन्या उत्पन्न होवे उसका वंध्यायोग कहते हैं ४।८।१०।२७।३ यह अंशोंमें सूर्य होवे तो यह षष्ट्यंशोत्पन्न कन्या वंध्या होती है, तथा ३।६।९।३।०।१२।१४।२४।३२।३३ यह क्रमसे अंक९। १०।२७।२४।१२।१२।४९।३४।५।५० यह षष्ट्यशंमें कन्या उत्पन्न भई होवे तो पूज्य होवे ॥ ७६ ॥ ७७ ॥

पंचाशद्भिः क्रमाद्गुण्या वंध्यावंध्या प्रकीर्तिता ॥
त्रिवेदाद्र्यंकविश्वेंद्रनखच्छंदोजिना यमाः ॥ ७८ ॥
पंचाशच्च शतं पूर्वयुता मृतसुता स्मृता ॥
पुत्राणां तु कलांशे तु शेषे जाता मृता द्विज ॥ ७९ ॥

टीका–अथ मृतसुताज्ञानमाह–त्रिवेदेत्यर्धकद्वयेन । त्रयः २ वेदाः ४ अद्रयः ७ अंकाः ९ विश्वे १३ इंद्राः १४ नखाः २० छंदांसि २६ जिनाः २४ यमाः २ पंचाशत् ५० शतं १०० एतान् पूर्वांकयुतान् कृत्वा तस्मिन् भास्करे जाता कन्या मृतसुता ज्ञेया॥७८॥ अथ प्रकारांतरमाह–पुत्राणामित्यर्धेन । कलांशे शेषे नाम उक्तावशिष्टे षोडशांशे भास्करे सति पुत्राणां मध्ये केचिज्जाता अपि मृता ज्ञेयाः । हे द्विजेति ॥ ७९ ॥

भाषा–अब मृतसुतायोग कहते हैं–३।४।७।९।१३।१४।२०।२६। २४।२।५०।१०० इन अंकोंमें पूर्वके अंक युक्त करके उन अंशोंमें सूर्य होवे तौ मृतसुतायोग जानना ॥७८॥ अब मृतपुत्रज्ञान कहते हैं–षोडशांशमें सूर्य होवे तो पुत्रोंमें कितनेक पुत्र मृत हुये जानना ॥ ७९ ॥

द्वादशे च चतुर्विंशे चतुस्त्रिंशे सुरांशके॥
द्विसप्तांशे नवांशांशे षष्ट्यत्तरशतांशके॥ ८० ॥

षट्शते च सहस्रे च खखाहींद्वंशके पुनः ॥
खांशतिथ्यंशके जातो भवेत्प्रव्रजितो नरः ॥ ८१ ॥

टीका-अथ जातस्य संन्यासित्वज्ञानमाह-द्वादशेत्यादि एकाशीतिश्लोकपर्यन्तम् । द्वादशांशे १२ चतुर्विंशांशे २४ सुरांशे ३३ द्विसप्तांशे ७२ नवांशे ९ षष्ट्युत्तरशतांशे १६० षट्शतेंशे ६०० सहस्रेंशे १००० खखाहींद्वंशके १८०० एतत्संख्याके खांश१०तिथ्यंशके १५ दशांशपंचदशांशके जातो नरः प्रव्रजितः संन्यासी भवेत् ॥ ८० ॥८१॥

भाषा-अब संन्यासीका योग कहते हैं१२ । २४ । ३३ । ७२ । ९। १६०।६००।१०००।१८००।१५।१० यह संख्यातुल्य अंशमें जन्म होवे तो संन्यासी होवे ॥ ८० ॥ ८१ ॥

गुरुशुक्रोदये राशौ तयोः परमहंसकः ॥
शत्रुराशिगतौ तौ चेदप्रकाशयुतौ तु वा ॥ ८२ ॥
भ्रष्टः स्यात्तु तथा ज्ञे तु त्रिदंडी वा बहूदकः ॥
रवौ जटाधरः शैवः कुजे नग्नोऽटनः स्मृतः ॥ ८३ ॥
मंदे बौद्धोऽथ वाग्मी स्याद्राहौ केतौ तथैव च ॥
धूमे कापालिकाश्चापे काले तु परिवेषके ॥ ८४ ॥
गूढपापो यथा लिंगी कुलमार्गगतस्तथा ॥

टीका-अथ परमहंसादियोगानाह-गुर्वित्यादिसार्धचतुरशीतिश्लोकपर्यन्तम् । यस्मिन्राशौ गुरूदयः शुक्रोदयो वा तयोः राश्योः जातः परमहंसो भवति, तौ गुरुशुक्रौ स्वशत्रुराशिगतौ अप्रकाशयुतौ धूमादिग्रहयुतौ वा संतौ भ्रष्टः परमहंसधर्मात् च्युतः स्यात्, तथा ज्ञे तद्वाति बुधे सति तु त्रिदंडी संन्यासी बहूदको वा भवेत् । तथा रवौ सति जटाधरः शैवः जटाधारी शिवभक्तो भवेत् तथा कुजे भौमे सति नग्नः वस्त्रहीनः स्यात् अटनः भ्रमणशीलः स्यात् तथा मन्दे शनौ सति बौद्धो बुद्धधर्मवान् सन् वाग्मी वक्ता स्यात्, तथैव राहौ केतौ वा जन्मराशौ

सति वाग्मी बौद्धः स्यात् तथा धूमे ग्रहे सति कापालिकः स्यात्, तथा चापे काले परिवेषके वा ग्रहे सति गूढपापः छन्नपापः तथा लिंगी पाखण्डी कुलमार्गगो वा स्यात् इति ॥ ८२ ॥ ८३ ॥ ८४ ॥

भाषा–अब परमहंसयोग कहते हैं–जिस राशिमें गुरुका वा शुक्रका उदय होवे उस राशिमें जन्म होवे तो परमहंसयोग जानना अथवा गुरु शुक्र धूमादिकसे युक्त होवे तो धर्मभ्रष्ट परमहंस होवे. गुरु शुक्र सरीखा बुधका योग होवे तो त्रिदंडी संन्यासी होवे, वा बहूदक होवे. अथवा सूर्य होवे तो शिवभक्त होवे. मंगल होवे तो वस्त्रहीन भ्रमण करता फिरे. शनि होवे तो बौद्धधर्म बोलनेवाला होवे. राहु केतु जन्मराशिमें होवें तो बौद्धधर्मी होवे. धूम ग्रह होवे तो कापालिक धर्मी होवे. चाप काल परिवेष ग्रह होवे तो गुप्तपापी पाखंडी कुलमार्गसे चलनेवाला होवे ॥ ८२ ॥ ८३ ॥ ॥ ८४ ॥

षष्ट्यंशे ऋक्षसंध्यंशे सार्पे पौष्णेंद्रभांशके ॥ ८५ ॥
त्रिंशांशे कालहोरांशे तत्त्वंशांशकेऽपि च ॥
नव मूर्च्छासुरांशे तु यथा षष्टितमे युतः ॥ ८६ ॥
सुतांशे खाब्धितिथ्यंशे द्वादशांशे नवांशके ॥
राश्यंतांशे तु सप्तांशे ऋक्षसंधिमृगांतिके ॥ ८७ ॥
मृगकर्कालिसिंहादिर्मीनतूलांशकादिमे ॥
अंत्यांशेऽपि च जातस्य षडर्थाऽक्षि जिने रदे॥८८॥
द्रेष्काणेनार्धहोरायां त्रिसप्तेन नखेषु तु ॥
जातः प्रव्रजितश्चैषु सर्वत्रैकयुतेष्वपि ॥ ८९ ॥

टीका–पुनः परिव्राड्धर्मज्ञानमाह–षष्ट्यंश इत्यादि एकोननवतिश्लोकपर्यंतम् । षष्ट्यंशे ६० ऋक्षसंध्यंशे सार्पे आश्लेषांशे पौष्णे रेवत्यंशे इन्द्रभांशके ज्येष्ठांशे त्रिंशांशे कालहोरांशे नवांशे मूर्च्छांशे ४९ सुरांशे ३३ षष्टितमंशे शतांशे खाब्धितिथ्यंशे १५४० द्वादशांशे नवांशे राश्यंतांशे राश्यवसानांशे सप्तांशे ऋक्षसंधौ नक्षत्रसंधौ मृगांतिमांशे

मकरकर्कवृश्चिकसिंहमेषमीनतुलानाम् आदिमेंऽशे अंत्यांशे वा जातस्य तथा परिव्राड्धर्मः स्यात्, षट् ६ अर्थः ५ अक्षिणी २ जिनाः २४ रदाः ३२ एष्वंशेषु द्रेष्काणे अर्धहोरायां त्रिसप्ते नखे अंशे च जातः प्रव्रजितः संन्यासी स्यात् अथवा सर्वत्र उक्तेषु अंशेषु एकयुतेषु जातश्चापि प्रव्रजितः स्यात् इति ॥८५॥८६॥८७॥८८॥८९॥

भाषा—अब फिर संन्यासीके धर्मोंका ज्ञान कहते हैं—षष्ट्यंश६०में, नक्षत्रसंध्यंशमें, आश्लेषांशमें, रेवत्यंशमें, ज्येष्ठांशमें, त्रिंशांशमें, कालहोरांशमें, नवांशमें, राशिअवसानांशमें, सप्तांशमें, नक्षत्रसंधिमें, मकर कर्क वृश्चिक सिंह मेष मीन तुलाओंके आदि अंत्य अंशोंमें जो उत्पन्न हुआ तो संन्यासधर्मनिष्ठ होवे ६, ५, २, २४, ३२, यह अंशोंमें द्रेष्काणमें अर्धहोरामें अथवा पूर्वोक्त अंकमें एक युक्त करके जो अंक होवे वो अंशमें उत्पन्न होवे संन्यासधर्ममें निष्ठ होवे ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥

पापाप्रकाशसंयोगे कलत्रे त्वशुभं भवेत् ॥
रवौ वंध्या तु शीतांशौ क्षीणे तु व्यभिचारिणी ॥९०॥
कुजे तु म्रियते मन्दे दुर्भगा राहुसंयुते ॥
परदाररतिः स्वीयनिषेकाभावतोऽसुताः ॥९१॥

टीका—अथांशविशेषजातस्य स्त्रीलक्षणमाह—पापेति द्वाभ्याम् । कलत्रे सप्तमस्थाने पापाप्रकाशसंयोगे पापग्रहधूमाद्यप्रकाशग्रहयुते अशुभं कलत्रं भवेत्, तदेव प्रकाशयति रवौ सति वंध्यालाभः स्यात् । सप्तमस्थाने शीतांशौ चंद्रे क्षीणे सति व्यभिचारिणी स्त्री स्यात् । तथा कुजे सति म्रियते स्त्री नश्यति, तथा मंदे दुर्भगा राहुसंयुते परदाररतिः स्यात्, तद्योगेन स्वीयनिषेकाभाववशादसुताः अपि स्युः ॥ ९० ॥ ९१ ॥

भाषा—अंश अंशके ऊपरसे स्त्रीके लक्षण कहते हैं--सातवें घरमें पापग्रह होवे वा धूमादि अप्रकाश ग्रह होवे तो स्त्री दुष्ट होवे. अब प्रत्येकका फल

जुदा कहते हैं--सूर्य वंध्या क्षीणचन्द्र व्यभिचारिणी, मंगल स्त्रीनाश, शनि होवे तो दुर्भागिनी, राहु होवे तो परदाररत होवे ॥ ९० ॥ ९१ ॥

धूमे विवाहहीनः सन् म्रियते कार्मुके सति ॥
परिवेषे तु दुःशीला केतौ वंध्याऽसती भवेत् ॥९२॥
काले भावस्तु पापे तु गर्भस्रावेण संयुता ॥
सुशीला स्त्रीप्रसूता च पूर्यमाणे तु शीतगौ ॥९३॥
बुधे त्वपुत्रा जीवे तु गुणयुक्ता सुपुत्रिणी ॥
शुक्रे सौभाग्यसंयुक्ता श्रीमती पुत्रिणी भवेत्॥९४॥

अपि च धूम इत्यादि चतुर्नवतिश्लोकपर्यंतम् । सप्तमस्थे धूमे सति विवाहहीनः सन् म्रियते, कार्मुके सत्यपि तथैव सप्तमे परिवेषग्रहे सति दुःशीला स्यात्, तत्र केतौ सति वंध्या स्यात्, अथवा असती भवेत्. काले ग्रहे सति अभावः स्त्रीराहित्यं स्यात् । पापे सति गर्भस्रावेण संयुता स्यात्, सप्तमे पूर्णचंद्रे सति सुशीला स्त्रीप्रसूता कन्यासूः स्त्री स्यात्, बुधे सति अपुत्रा स्यात्, जीवे गुरौ सति तु गुणयुक्ता सुपुत्रिणी स्यात्, शुक्रे सति सौभाग्यसंयुक्ता श्रीमती पुत्रिणी च भवेत् ॥ ९२ ॥ ९३ ॥ ९४ ॥

भाषा-धूम होवे तो विवाह न होते मरे, कार्मुक ग्रह होवे तो पूर्वोक्त फल, परिवेष होवे तो दुःशीला स्त्री होवे, पात ग्रह होवे तो गर्भस्रावी स्त्री होवे, केतु होवे तो वंध्या वा दुष्टा होवे, कालग्रह होवे तो स्त्रीरहित होवे, पूर्णचंद्र सातवें घरमें होवे तो सुशीला और कन्याप्रजावती होवे, बुध होवे तो अपुत्रा होवे, गुरु होवे तो सुपुत्रिणी होवे, शुक्र होवे. तो सौभाग्ययुक्ता होवे ॥९२॥९३॥९४॥

एष्वेवं दशमे पापपुण्यकर्मरतो भवेत् ॥
पंचाशद्भिःसुरैस्तत्त्वैर्नृपैश्च मुनिभिर्ग्रहैः ॥ ९५ ॥

अष्टभिः षड्भिरेवाथ सप्तादिभिरनुक्रमात् ॥
पंचादिभिश्च होराः स्युरेकोत्तरचयैरथ ॥ ९६ ॥
पापपुण्यक्रियाकर्ता क्रमाल्लब्धांतरांशजः ॥
आवृत्तिरुत्तरा प्रोक्ता पापपुण्यक्रिया रतिः ॥ ९७ ॥
मिश्रे तु मिश्रं त्वधिकवशादेव तु निर्णयः ॥

टीका–अथ दशमभावतारतम्येन शुभाशुभकर्मरतिज्ञानमाह–एष्वेवमित्यादिसार्धसप्तनवतिपर्यंतम् । एवमेव दशमभावे पापपुण्यग्रहवशात् दुष्टशुभकर्मफलं, मिश्रे तु मिश्रं मिश्रितं स्यात्, तत्र मिश्रिते अधिकवशादेव निर्णयः । पापाधिके अशुभं, पुण्याधिके शुभं ज्ञेयम्, तच्च विशेषतः एष्वंशेषु इत्याह–पंचाशद्भिः ५० सुरैः ३३ तत्त्वैः २५ नृपैः १६ मुनिभिः ७ ग्रहैः ९ अष्टभिः ८ षड्भिः ६ सप्तभिः ७ पंचादिभिः एकावसानकैः तथा एकोत्तरचयैः उक्तांशेषु एकसहितैः अंशैः पापपुण्यमिश्रक्रियाः ज्ञेयाः इति ॥ ९५ ॥ ९६ ॥ ९७ ॥

भाषा–अब दशम भावके तारतम्यसे विशेष फल कहते हैं–जैसा सातवें घरमें स्त्रीका फल कहा वैसा दशवें घरमें व्यापार शुभाशुभ कर्म फल देखना, दशवें घरमें शुभग्रहयुक्त या दृष्टि होवे तो शुभकर्म फल जानना, पापग्रहयुक्त या दृष्टि होवे तो अशुभकर्मफल जानना, शुभ पाप समान होवें तो मिश्रफल कहना, न्यूनाधिक होवे तो वो देखके अधिक जो होवे उसका फल कहना. उसमें भी यह आगे जो अंश लिखे हैं ५० । ३३।२५। १६।७।९।८।६।७ पांच लेके एक अवसानपर्यंत और पूर्वोक्त अंकोंमें एक युक्त करना. उन अंकोंमें जन्म होवे तो पापादिकके योगसे पापपुण्यमिश्र कर्मफल जानना ॥ ९५ ॥ ९६ ॥ ९७ ॥

वर्णाश्रमाचारविहीनबुद्धिः स्त्रियां च पापी परदारसक्तः ॥ क्षेत्रापहारी च परस्वसर्वं निहत्य योगं

सकलं करोति ॥ ९८ ॥ परस्य चोत्कर्षविघातकारी
विषाग्निदः पातककर्मकृच्च ॥ ९९ ॥ ग्रामस्य
देवस्य च विप्रवर्य ! धनापहारी व्यसने कृतार्थः ॥
मृतिप्रदं कर्म करोति सूर्यात्प्राप्यप्रकाशः सितशी-
तगोश्च ॥ १०० ॥ दयारतो दानरतः सुतेजाः
स्वाचारपाती विजितेंद्रियश्च ॥ इष्टं च पूर्तं च करोति
जीवे शुक्रे वदान्यः कृतदारशीलः ॥ १०१ ॥

टीका-अथ ता एव विशदयति-वर्णेत्यादिसैकशतश्लोकपर्यंतम् । वर्णाश्रमाचारविहीनबुद्धिः वर्णाः ब्राह्मणादयः, आश्रमाः ब्रह्मचर्यादयः, तत्संबंधी यः आचारः विहिताचरणं तद्विषये विहीना नष्टा बुद्धिर्यस्य तथा स्त्रियां स्त्रीसंबंधे पापी पापकर्ता परदारसक्तः परस्त्रीलंपटः क्षेत्रापहारी परभूम्यपहारकर्ता, परस्वं सर्वं निहत्य विनाश्य सकलम् आत्मनः योगं इष्टप्राप्तिं करोति तथा परस्य अन्यस्य उत्कर्षविघातकारी उत्कर्षनाशकः, विषाग्निदः विषाग्नी ददातीति तथा विषदः ग्रामादिदाहक इत्यर्थः । अत एव पातककर्मकृत् । ग्रामस्य देशस्य च संबंधिनः ये विप्रवर्याः तेषां धनापहारी व्यसने कृतार्थः व्यसने द्यूतादिरूपे कृतार्थः कृतेच्छः, सूर्यात् मृतिप्रदं मारकं कर्म करोति. बुधात् पापी भवति, शीतगोः प्रकाशः प्रख्यातः भवति, भौमाद्दयावान् दानरतः सुतेजाः स्वाचारपाती आचारपालकः विजितेंद्रियश्च भवति तत्र जीवे सति इष्टं पूर्तं खातादि कर्म करोति तत्र शुक्रे वदान्यः दाता भवति तत्र शनौ कृतदारशील इति ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥

भाषा-उन्ही कर्म फलको स्पष्ट दिखाते हैं-वर्णाश्रमके आचारमें बुद्धिहीन होवे परस्त्रीलंपट होवे, दूसरेकी भूमि चोरलेवे, दूसरेका सर्वस्व हरण करे, दूसरेका उत्कर्ष नाश करे, विष देवे, ग्राम जलादेवे, ब्राह्मणोंका धन लेवे,

सूर्य होवे तो मारक कर्म करे, बुध होवे तो पापकर्म करे, चंद्रसे प्रख्यातकीर्ति, मंगलसे दयायुक्त, गुरुसे इष्टपूर्त कर्म करे, शुक्रसे दाता होवे, शनिसे स्त्रीशील होवे ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥

मेषे त्वगम्यागमनप्रियश्च त्वभक्ष्यभक्ष्यो वृषभे सुशीलः ॥ देवेशदेवालयधर्मकारी युग्मे विरक्तोऽत्यधनैर्विहीनः ॥ १०२ ॥ चांद्रे च तीव्रं च करोति पापं परस्वहर्त्तापि च पूतकारी ॥ सिंहे तु देवस्य विघातकारी पाथोनके धर्मरतिः सुकृत्यः॥ १०३॥ जूके परेषां धनदश्च पूर्तं करोति चापेऽपि च वृश्चिके तु ॥ परस्वहर्ता परदारसक्तो मृगेऽपि चैवं घटभे कृतज्ञः॥ १०४॥ यज्ञस्य कर्ता झषभे तथैव पूर्तादिकारी बहुयोजकः स्यात् ॥

टीका-अथ मेषादिराशिजातफलमाह-मेषे इत्यादिसार्धचतुःश्लोकपर्यंतम् । मेषे जातस्य फलम् अगम्यागमनप्रियः अगम्यागमनं प्रियं यस्य, अभक्ष्यभक्ष्यः अभक्ष्यं भक्ष्यं यस्य तथा भवति । वृषे तु सुशीलः सुस्वभावः देवेशदेवालयधर्मकारी देवेशाः शिवविष्णवादयः तेषां देवालयं मंदिरं तत्र धर्मकर्ता भवति युग्मे मिथुने विरक्तः वैराग्यसंपन्नः, अत्यधनैः अतिशयेन ये अधनाः दरिद्राः तैः विहीनः रहितः भवति। चांद्रे चंद्रदैवत्ये कर्के जातः तीव्रं पापं करोति, परस्वहर्त्ता भवति तथा पूर्तकारी पूर्तकर्म करोति। सिंहे तु देवस्य देवतास्थानस्य विघातकारी नाशकः, पाथोनके कन्यायां जातः धर्मरतिः सुकृत्यश्च भवति । जूके तुलायां परेषां धनदः अन्येषां धनदाता द्रव्येण पूर्णं करोति । चापेऽपि धनुष्यापि पूर्वोक्तं फलं बोध्यम् । वृश्चिके तु परस्वहर्ता परद्रव्यापहारी परदारसक्तः परस्त्रीलंपटो भवति । मृगे

मकरेऽपि एवमेव फलं ज्ञेयम् । घटभे कुंभे राशौ कृतज्ञः कृतं जानातीति तथा यज्ञस्य कर्ता भवति, झषभे मीने पूर्तादिकारी तडागादिकर्ता बहुयोजकः बहून्योजयतीति तथा स्यात् ॥१०२॥१०३॥१०४॥

भाषा—मेष राशिमें जन्म होवे तो अगम्यागमनशील, अभक्ष्यको भक्षण करे. वृषभ राशिमें अच्छा स्वभाव, शिवविष्णुके मंदिरमें धर्म करे. मिथुन राशिमें वैराग्यसपन्न, अति दरिद्ररहित होवे. कर्कराशिमें बडा पाप करे, परधन चोरे, बावडी कूवा खुदावे. सिंहराशिमें देवस्थानका नाश करे, कन्याराशिमें धर्मकर्ममें रत होवे, तुला राशिमें धन दूसरोंको धन देवे, धनराशिमें दूसरेको धनसे पूर्ण करे. वृश्चिक राशिमें दूसरोंको देवे. परस्त्रीमें लंपट, मकर राशिमें पूर्वफल जानना. कुंभ राशिमें यज्ञ करे उपकार जाने. मीनरीशिमें तालावादिक करे, और बडे कामोंकी तजवीज करे॥ १०२॥ १०३॥ १०४॥

नर्तको गायको बंदी शिल्पी याच्ञापरस्ततः १०५॥
गायको नर्तको भारवाही प्रणतियोजकः ॥
प्रेष्यश्च भारको बंदी याचको धातुवादकः ॥१०६॥
वेदाध्यायी स्मृतिज्ञस्तु शैवाश्रमकृतश्रमः ॥
शिल्पलेखनकर्ता च मीमांसान्यायतर्कवित॥ १०७॥
पंचरात्रार्थशास्त्रज्ञ इतिहासपुराणवित् ॥
आयुधश्रमहेतुश्च आयुर्वेदकृतश्रमः ॥ १०८ ॥
अर्कात्कलांशतश्चैव क्रमादेवं प्रकीर्तिताः ॥

टीका—अथ सूर्यादीनां कालांशवशात्फलमाह—नर्तक इत्यादि सार्धाष्टोत्तरशतश्लोकपर्यंतम् । नर्तकः नटः, गायकः, बंदी राजस्तावकः, शिल्पी सूपादिकर्मकुशलः, याचकः याच्ञापरो याचनातत्परः, गायकः नर्तकः, भारवाही. प्रणतियोजकः नमःशीलः, प्रेष्यो दूतः, भारको भारवाही, धातुवादकः, वेदाध्यायी, स्मृतिज्ञः, शैवाश्रमकृत-

श्रमः शिवदीक्षायत्नशीलः, शिल्पलेखनकर्ता शिल्पक्रियो लेखनक्रियश्च, मीमांसान्यायतर्कवित् मीमांसादिशास्त्रज्ञः, पंचरात्रार्थशास्त्रज्ञः आगमज्ञः, इतिहासपुराणवित् भारतादिवेत्ता, आयुधश्रमहेतुः आयुधकर्ता, आयुर्वेदकृतश्रमः वैद्यः एवं कालांशतः कालांशमानने अर्काच्छन्यंतं क्रमाद् गुणाः प्रकीर्तिताः ॥१०५॥१०६॥१०७॥ १०८ ॥

भाषा–अब सूर्यादिकोंका कालांशपरसे फल कहते हैं–नाचना १, गाना २, बंदिवान् (राजाका स्तवनकार) होना ३, रसोईमें और दूसरे कारीगरीके काममें कुशल होना ४, मांगनेवाला (याचक) ५, गायक ६, नर्तक ७, भारवाही ८, नम्रतासे रहनेवाला ९, दूतपना करना १०, भार उचलनेवाला ११, बंदी १२, याचक १३, धातु बनानेवाला १४, वेदाध्ययन करनेवाला १५, स्मृति शास्त्र जाननेवाला १६, शिवदीक्षामें प्रवीण होना श्रम करना १७, शिल्पकर्म लेखन कर्म करना १८, मीमांसा न्याय तर्क जाननेवाला १९, आगमतंत्र जाननेवाला २०, भारत पुराण जाननेवाला २१, शस्त्र करनेवाला २२, वैद्यपना करनेवाला २३, यह फल सूर्यसे लेके शनिपर्यंत क्रमसे कालांशप्रमाणसे कहे हैं॥ १०५॥ १०६॥ १०७॥ १०८ ॥

अध्यापकस्तु वेदानां सेवकः शास्त्रपाठकः ॥१०९॥
अश्वसादीभसादी च लिपिलेखनतत्परः ॥
मंदुराबंधको नट्यो देशिको याज्ञिको गुरुः ॥११०॥
दानशीलस्तु तृणको ग्रामणीर्व्यसनाधिपः ॥
आरामकरणोद्युक्तः पुष्पविक्रयतत्परः ॥ १११ ॥
राजकार्यरतः सेनालतापुष्पफलक्रयी ॥
नृत्यगीते च कुशलस्तांबूलफलविक्रयी ॥ ११२ ॥
निषिद्धाविक्रयकरो ग्रामाणामधिकारकृत् ॥
बंदी च देशिकः प्राज्ञो धूपकश्चौषधिक्रियः॥ ११३ ॥

कायस्थ करणोद्युक्तो भारको भांडविक्रयी ॥
कृषिकृच्च वणिग्धातुचर्मकारी च कर्षकः ॥ ११४ ॥
शास्त्राधिकारी विज्ञानी पुंस्तेको रंजको वणिक् ॥
वेदवेदांगवेत्ता च शास्त्रज्ञो बंदिपाठकः॥ ११५ ॥
ग्रामणीरधिकारी च गणको दंडकारकः ॥
मारकश्चेंधनाहारी फलमूलादिविक्रयी ॥ ११६ ॥
शांतकृत्स्वर्णकारी च कृषिकृत्पल्लविक्रयी ॥
याजकोऽध्यापकोऽध्यक्षः प्रतिग्रहपरः फली ॥ ११७॥
क्रमाद्व्युत्क्रमतश्चैव षष्टिः स्यादंशकेषु तु ॥

टीका–अथ षष्टयंशफलान्याह–अध्यापकास्त्विति सार्धसप्तदशोत्तरशतश्लोकपर्यंतम् । वेदानाम् अध्यापकः १, सेवकः २, शास्त्रपाठकः ३, अश्वसादी ४, इभसादी आधोरणः ५, लिपिलेखनतत्परः ६, मंदुराबंधकः वाजिशालाधिकृतः ७, नटचः ८, देशिकः पाठशालाध्यापकः ९, याज्ञिकः १०, गुरुः ११, दानशीलः १२, तृणकः १३, ग्रामणीः १४, व्यसनाधिपः १५, आरामकरणोद्युक्तः १६, पुष्पविक्रयतत्परः १७, राजकार्यरतः १८, सेनालतापुष्पफलक्रयी १९, नृत्ये गीते च कुशलः २०, तांबूलफलविक्रयी २१, निषिद्धविक्रयकरः २२, ग्रामाणामधिकारकृत् २३, बंदी २४, देशिकः २५, प्राज्ञः २६, धूपकः २७, औषधिक्रियः २८, कायस्य शरीरस्य करणोद्युक्तः अलंकारकर्ता बहुरूपीत्यर्थः २९, भारकः ३०, भांडविक्रयी ३१, कृषिकृत् ३२, वणिक् ३३, धातुचर्मकारी ३४, कर्षकः ३५, शास्त्राधिकारी ३६, विज्ञानी ३७, पुंस्तेकः ३८, रंजकः ३९, वणिक् ४०, वेदवेदांगवेत्ता ४१, शास्त्रज्ञः ४२, बंदिपाठकः ४३, ग्रामणीः ४४, अधिकारी ४५, गणकः ४६, दंडकारकः ४७, मारकः ४८, इंधनाहारी ४९, फलमूलादिविक्रयी ५०

शांतकृत् ५१, स्वर्णकारी ५२, कृषकृत् ५३, पलविक्रयी मांसविक्रेता ५४, याजकः ५५, अध्यापकः ५६, अध्यक्षः ५७, प्रतिग्रहपरः ५८, फली ५९, षष्टितमस्य फलाभावः ६०, एतानि फलानि मेषाद्योजराशिषु क्रमाद्वृषादिषु व्युत्क्रमतः विलोमतः षष्ट्यंशेषु फलानि ज्ञेयानि ॥ १०९ ॥ ११० ॥ १११ ॥ ११२ ॥ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥

भाषा–अब षष्ठ्यंशका फल कहते हैं–वेद पढना १, सेवा करना २, शास्त्र पढना ३, अश्वके ऊपर बैठनेमें कुशल ४, हाथीके काममें कुशल ५, पुस्तकादि लेखनमें कुशल ६, घोडेकी शालाका अधिकारी ७, नाचनेवाला ८, पाठशाला पढानेवाला ९, यज्ञ करानेवाला १०, गुरुपद पानेवाला ११, दानशील १२, घास बेचनेवाला १३, सारे गांवका चौधरीपना करनेवाला १४, दुःख देनेमें कुशल १५. बागबगीचा करनेमें कुशल १६, फूल मालाका रोजगार करनेवाला १७, राजकाम करनेवाला १८, शाक फूल फल खरीद करनेवाला १९, नृत्यगीतमें कुशल २०, तांबूल फल बेचनेवाला २१, निंद्य पदार्थ बेचनेवाला २२, गांवोंका अधिकार करनेवाला २३, राजसेवकी २४, दैशिक २५, बुद्धिमान् २६, भूपपदार्थका बेचनेवाला २७, औषध बेचनेवाला २८, बहुरूपीका स्वांग लेनेवाला २९, भार उ चलनेवाला ३०, धातुपात्र बेचनेवाला ३१, खेती करनेवाला ३२, बनियेकी दूकान करनेवाला ३३, धातुचर्मका व्यापारी ३४, खेतीकर्म करनेवाला ३५, शास्त्राधिकार जाननेवाला ३६, अनुभव जाननेवाला ३७ पुस्तकसंग्रह करनेवाला ३८, रंगारेका काम करनेवाला ३९, बनियेकी दूकान करनेवाला ४०, वेदवेदांग जाननेवाला ४१, शास्त्र जाननेवाला ४२, राजसेवा बालक पढानेवाला ४३, गांवका चौधरीपना करनेवाला ४४, अधिकारपदवी पानेवाला ४५, गणितशास्त्रको जाननेवाला ४६, दंड देनेवाला ४७, मारक ४८, जलानेकी लकडी चोरनेवाला ४९, फल

मूलको बेचनेवाला ५०, शांतकर्म करनेवाला ५१, सोनेका कर्म करनेवाला ५२, खेती करनेवाला ५३, मांसविक्रय करनेवाला ५४, यज्ञ करनेवाला ५५, विद्या पढानेवाला ५६, स्वामिपना करनेवाला ५७, सबोंका दान लेनेवाला ५८, फलोंका उपभोग करनेवाला ५९, समानता ६०, यह फल विषमराशिका लग्न होवै तो लिखे हुवे क्रमसे जानना और सम लग्न होवे तो समानतासे लेके अध्यापकतक उत्क्रमसे जानना ॥ १०९ ॥ ११० ॥ ॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥

रवीशहरिविष्णवीशदुर्गागणपतिष्वथ ॥ ११८ ॥
चंडिकायां च चंडेशचंद्राविष्णवीशपावके ॥
त्रिपुराचेंदिराविष्णुहरिशंकरशंभुषु ॥ ११९ ॥ क्षेत्रेशे
गरुडे स्कंदे शास्तारि ब्रह्मणीश्वरे ॥ विषापहरणोद्युक्ते
जिने बुद्धे क्रमात्तथा ॥ १२० ॥

टीका–अथ षष्टचंशेषु अंशद्वयैक्येन त्रिंशत्फलानि रवीत्यादिसार्धद्वयेनाह । रवौ १ ईशे २ हरौ ३ विष्णौ ४ ईशे हिरण्यगर्भे ५, दुर्गायां ६, गणपतौ ७, चंडिकायां ८, चंडे ९, ईशे महादेवे १०, चंद्रे ११, विष्णौ १२, ईशे १३, पावके १४, त्रिपुरायाम् १५, इंदिरायां १६, विष्णौ १७, हरौ १८, शंकरे १९, शंभौ २०, क्षेत्रेशे २१, गरुडेशे २२, स्कंदे २३, शास्तारि २४, ब्रह्माणि २५, ईश्वरे २६, विषापहरणोद्युक्ते गरुडे २७, जिने २८, बुद्धे २९, अंतिमे प्राग्वत्फलाभावः ३०॥ ११८ ॥ ११९ ॥ १२० ॥

भाषा–अब षष्टचंशके दो दो अंश एकत्र किये तो तीस अंश होते हैं सो तीस अंशका फल कहते हैं–सूर्यके विषे १, ईश २, हरि ३, विष्णु ४, हिरण्यगर्भ ५, दुर्गा ६, गणपति ७, चंडिका ८, चंड ९, महादेव १०, चंद्र ११, विष्णु १२, ईश १३, अग्नि १४, त्रिपुरा १५, इंदिरा १६, विष्णु १७, हरि १८, शंकर १९, शंभु २० क्षेत्रेश २१, गरुड २२,

स्कंद २३, शास्ता २४, ब्रह्मा २५, ईश्वर २६, गरुड २७, जिन २८, बौद्ध २९, सर्वसमान ३० यह क्रमसे जो अंशमें जन्मनक्षत्र होवे उस देवताका भक्त होवे ॥ ११८ ॥ ११९ ॥ १२० ॥

ज्वरश्लेष्मातिसारासृग्जठरव्याधिमूलरुक् ॥
मेहग्रहणिपिटिकापावकावनिशस्त्रतः ॥ १२१ ॥
दाहज्वरविषाभ्यां तु सूर्यात्कालांतिमे मृतिः ॥
राशौ ग्रहांशके पित्तवातश्लेष्मजरोगतः ॥ १२२ ॥
पित्तवातकफश्लेष्मपित्तवातैः क्रमात्स्मृतः ॥

टीका--अथ सूर्यकालांतिमे मरणे निमित्तान्याह–ज्वरेति एकपदोनैकपादाधिकेन सार्धेन श्लोकेन । सूर्यात्सकाशात् कालांतिमे कालमर्यादे चतुर्दशान्यतमग्रहे जन्मराशौ सति तथा जन्मनि तद्ग्रहांशे सति च क्रमाच्चतुर्दश फलानि । ज्वरः १, श्लेष्मा २, अतिसारः ३, असृक् ४, रक्तव्याधिः ५, मूलरुक् मूलव्याधिः ६, मेहः ७, ग्रहणी ८, पिटिका ९, पावकः १०, अवनिः ११, शस्त्रतः १२, दाहात् १३, ज्वरात् विषेण वा उभाभ्यां वा १४ मरणं ज्ञेयमिति ॥ १२१ ॥ अथ प्रकारांतरेण जन्मलग्नस्थसूर्यादिनवग्रहवशान्मृतिनिमित्तमाह–पित्तेति चरणसहितार्द्धेन श्लोकेन । सूर्ये पित्तेन १, चंद्रे वातेन २, भौमे श्लेष्मणा ३, बुधे पित्तात् ४, गुरौ वातात् ५, शुक्रे कफात् ६, शनौ श्लेष्मणा ७, राहौ पित्तेन ८, केतौ वातेन ९ इति क्रमात् मृतिप्रदानि ज्ञेयानि ॥ १२२ ॥

भाषा–अब मरणका निमित्त कहते हैं–सूर्यसे लेके कालनामक ग्रहपर्यंत १४ चौदह ग्रह हैं उनमेंसे जो ग्रह जन्मराशिमें होवे वो नीचे लिखे हुवे निमित्तसे मरण जानना. सो निमित्त कहते हैं. ज्वर १, कफ २, अतिसार ३, लोहूका व्याधि ४, जठरव्याधि ५, मूलव्याधि ६, प्रमेह ७, संग्रहणी ८, पिटकरोग ९, अग्नि १०, अवनी ११, शस्त्र १२, दाह १३,

ज्वर विष १४, यह क्रमसे फल जानना ॥ १२१ ॥ अब प्रकारांतरसे फल कहते हैं-सूर्य होवे तो पित्तसे १, चंद्र होवे तो वायुसे २, भौम होवे तो कफसे ३, बुध होवे तो पित्तसे ४, गुरु होवे तो वायुसे ५, शुक्र हो तो कफसे ६, शनि हो तो कफसे ७, राहु हो तो पित्तसे ८, केतु होवे तो वायुसे मरण होवेगा. यह क्रमसे मृत्युक्रम जानना ॥ १२२ ॥

ज्वरसन्निपातजठरामयांत्ररुग्रामप्रमेहजलकाज्जलाग्नितः ॥ ज्वरसान्निपाततोत्रभवेन्मृतिः क्रियपूर्वकस्तु निधनांशकेषु तु ॥ १२३ ॥

टीका-अथ नवांशफलानि निधननिमित्तान्याह-ज्वरेति सार्द्धकद्वयेन । ज्वरेण १, सान्निपातेन २, जठरामयेन ३, अंत्ररुजा ४, रामप्रमेहेण त्रिविधप्रमेहरोगेण ५, जलात् ६, अग्नितः ७, ज्वरात् ८, सन्निपाततः ९, मेषपूर्वकद्वादशराशिषु निधनांशकाः मरणकालीननवांशाः तेषु एवं मृतिर्ज्ञेया ॥ १२३ ॥

भाषा-अब नवांशके निमित्तसे मरणनिमित्त कहते हैं-प्रथम नवांशमें जन्म होवे तो ज्वरनिमित्तसे १, सान्निपातसे २, जठररोगसे ३, आंतडेके रोगसे ४, प्रमेहसे ५, जलसे ६, अग्निसे ७, ज्वरसे ८, संनिपातसे ९, मेषादिद्वादशराशिके जन्मलग्नके नवांशके निमित्तसे फल जानना ॥ १२३ ॥

गुल्मोदरज्वराविषाग्निजलादिपातशस्त्रादिपातगुदकीलभगंदरोत्था ॥ रक्तातिसारजठरज्वरमेहगुल्मकुष्ठातिसारपिटकादिभिरश्मरीयैः ॥१२४॥ शूलाशनिक्षतजापितसमावृतानि शीतज्वरप्रभृतिराशिवशात्क्रमेण ॥ १२५ ॥

टीका-अथ राशिवशान्मरणनिमित्तान्याह-गुल्मोदरेति सार्धेन । गुल्मः १, उदरज्वरः रोगविशेषः २ एतैः विषाग्निजलपातात् विषं

स्थावरं जंगमं तेन अग्निजलादिपातात् ३, शस्त्रादिपातात् ४, गुदकीलभगंदरोत्थात् गुदकीलः गुदस्थानीयरोगविशेषः तस्मात् भगंदराद्वा ५, रक्तातिसारजठररोगज्वरैः ६, मेहगुल्माभ्याम् ७, कुष्ठातिसाराभ्याम् ८, पिटकादिभिरश्मर्यादिभिश्च ९, शूलाशनिक्षतजेन शूलेन वज्रपातोत्पन्नरुधिरेण १०, पित्तसमावृतेन ११, शीतज्वरप्रभृतिना च १२, मृतिर्भवतीति क्रमेण बोद्धव्यम् ॥ १२४ ॥ १२५ ॥

भाषा—अब राशिके निमित्तसे मरण कहते हैं—मेष राशिमें गुल्मरोगसे १, वृषमें उदररोग ज्वर इन रोगोंसे मृत्यु होवे २, विष अग्नि जलके निमित्तसे ३, शस्त्रादिपातसे ४, गुदकील रोग भगंदररोगसे ५, रक्तातिसार ज्वर जठररोगसे ६, प्रमेह गुल्म रोगसे ७, कुष्ठ अतिसारसे ८, पिटक रोग अश्मरी रोगसे ९, शूल वज्रपातादिकसे उत्पन्न हुए रुधिरसे १०, पित्तरोगसे ११, शीतज्वरादिकसे १२ मृत्यु होवेगा ॥ १२४ ॥ १२५ ॥

कालादिरव्यंतखगोक्तजाता चेद्दुर्गपातपतनज्वरसन्निपातात् ॥ गोपातसत्त्वजनिता च मृतिः क्रमेण वामेन चापि पुनरेवमथांशकेषु ॥ १२६ ॥

टीका—अथ कालादिरव्यंतचतुर्दशग्रहांशवशान्मृत्युमाह—कालादीतिश्लोकेन । कालादि कालग्रहमारभ्य रव्यंतचतुर्दशखगोक्तम् जाता तथा तत्तदंशेषु च मृतिः क्रमेण एवं ज्ञेया । तामाह—दुर्गपातात् १, पतनात् २, ज्वरात् ३, सन्निपातात् ४, गोः वृषभात् ५, पातात् ६, सत्त्वजनिता प्राणिसमुद्भूता च ७; पुनः वामेन क्रमेण विलोमतः क्रमेण सत्त्वजनितादिदुर्गपातांतं सप्त ७ एवं चतुर्दशग्रहवशात्तन्नवमांशवशाच्च मृतिरिति ॥ १२६ ॥

भाषा—अब कालादि सूर्यांत चौदह ग्रहोंके अंशनिमित्तसे मृत्युज्ञान कहते हैं—कालग्रहके अंशमें दुर्गपातसे मृत्यु होवे १, पतनसे २, ज्वरसे ३,

सन्निपातसे ४, वृषभके निमित्तसे ५, पन्ननसे ६, प्राणिनिमित्तसे ७।८, पतनसे ९, वृषभके निमित्तसे १०, सन्निपातसे ११, ज्वरसे १२, पतनसे १३, दुर्गपातसे १४ मृत्यु होवे यह क्रमसे चौदह ग्रह निमित्तसे उसके नवांशनिमित्तसे मृत्यु जानना ॥ १०६ ॥

आचतुर्थात्खभूतानि त्रयो द्वादश हारकौ ॥
अथ स्यादष्टमात्षष्टिः पंचाष्टौ दशमात्ततः ॥ १२७ ॥
पञ्चपञ्चाशदब्दाःस्युस्त्रयोरत्नानि हारकाः ॥
एकादशेऽष्टषष्टिः स्यात्सप्तकाष्ठाश्च हारकाः ॥ १२८
त्रयोदशे च तानाः स्युर्द्विसप्ततिरथो मनौ ॥
रश्मयः पंचदश चेत्पंचसप्ततिरेव च ॥ १२९ ॥
वेदपंचरसा हारा दश रुद्राश्च रश्मयः ॥
आत्रिंशतः क्रमादब्दा अशीतिरथ सप्ततिः॥ १३० ॥
खेषवः खाब्धयः खाद्रिवेदाद्रिवेदसप्ततिः ॥
षष्टीरष्टाद्रिरष्टेषु पञ्चसप्ततिराद्रियुक् ॥ १३१ ॥
एकाशीतिश्चतुर्युक्ता चत्वारिंशत्स्मृताः समाः ॥
सप्तांकरसतर्केषु नवाद्रिरसषट्कराः ॥ १३२ ॥
रुद्रा दिङ्नवतर्कार्का अब्दहाराः क्रमादमी ॥

टीका–अथ रश्मिवशेन अब्दानयने अब्दानब्दहरांश्चाह–आचतुर्थादित्यादिसार्धद्वात्रिंशदधिकशतश्लोकपर्यंतम् । आचतुर्थात् चतुर्थरश्मिमारभ्य सप्तरश्मिपर्यंतं खभूतानि ५० अब्दाः तत्र त्रयः ३ द्वादश १२ एतौ हारकौ ज्ञेयौ अथाष्टमात् रश्मेः षष्टिः ६० अब्दाः तत्र पंच ५ अष्टौ ८ हारकौ, ततः दशमाद्रश्मेः सकाशात्

पंचपंचाशत् ५५ अब्दाः स्युः । तत्र त्रयः ३ रत्नानि ९ हारकौ एकादशे रश्मौ अष्टषष्टिः ६८ अब्दाः तत्र सप्तसप्ततिः ७७ अब्दाः तत्र वेदपंच ५४ रसाः ६ हाराः तथा दश १० रुद्राः ११ ततः आत्रिंशतः षोडशरश्मिमारभ्य त्रिंशद्रश्मिपर्यंतं क्रमादब्दाः अशीतिः ८० सप्ततिः ७० खेषवः ५० खाब्धयः ४० खाद्रयः ७० वेदाद्रयः ७४ वेदसप्ततिः ७४ षष्टिः ६० अष्टाद्रिः ७८ अष्टेषुः ५८ पंचसप्ततिः ७५ अद्रियुक् सप्ततिः ७७ एकाशीतिः ८१ चतुर्युक्ता एकाशीतिः ८५ चत्वारिंशत् ४० एते समाः अब्दाः स्मृताः कथिताः अथ तत्र क्रमात् षोडशमारभ्य त्रिंशत्पर्यंतं हाराः सप्त ७ अंक ९ रस ६ तर्काः ६ इषवः ५ नव ९ अद्रयः ७ रसाः ६ षट् ६ कराः २ रुद्राः ११ दिक् १० नव ९ तर्काः ६ अर्काः १२ ॥ अमी क्रमादब्दहाराः पूर्वोक्ताब्दांकानां हारांकाः इति रश्म्यायुर्दायहाराः कथिताः इति ॥१२७॥१२८॥१२९॥१३०॥१३१॥१३२॥

भाषा—अब रश्मिके निमित्तसे वर्ष लानेके हैं उनमें वर्षहार कहते हैं. चक्रमें स्पष्ट है ॥ १२७ ॥ १२८ ॥ १२९ ॥ १३० ॥ १३१ ॥ १३२ ॥

अथ रश्मिवर्षाहाराज्ञानचक्रम्.

रश्मयः	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९
वर्षाणि.	०	०	०	५०	५०	५०	५०	६०	०	५५	६८	०	४९	७५	७५	८०	७०	५०	४०
हारकांकाः	०	०	०	३	३	३	३	५	०	३	७	०	७२	५४	१०	७	९	६	६
	०	०	०	१२	१२	१२	१२	/.	०	९	१०	०	०	६	११	०	०	०	०

रश्मयः	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०
वर्षाणि.	७	७४	७४	६०	७८	५८	७५	७७	८१	८५	४०
हारकांकाः	५	९	७	६	६	२	११	१०	९	६	१२

रुद्रा दिङ्नवतर्कार्का अब्दहाराः क्रमादमी ॥ रुद्रार्कमनुविश्वेष्टिः सप्तांकेष्वर्कदिक्छराः ॥ १३३ ॥

टीका—अथांशायुषि हारानाह—रुद्रेत्यर्धकद्वयेन । रुद्राः ११ अर्काः १२ मनवः १४ विश्वे १३ अष्टिः १६ सप्त ७ अंकेषवः ५९ अर्काः १२ दिक्‌ १० शराः ५ वेदेषवः ५४ वेदांकाः ९४ एते अंशहाराः अंशायुर्दायहारांकाः प्रकीर्तिताः कथिता इति ॥ १३३ ॥

भाषा—अब अंशायुष्यके हार कहते हैं. ११।१२।१४।१३।१६।७।५९।१२।१०।५।५४।९४ यह अंशायुर्दायके हारक हैं ॥ १३३ ॥

वेदेषुर्वेदकांकाः स्युरंशहाराः प्रकीर्तिताः ॥ पंचानां
च चतुर्णां च तत्तत्षण्णवतिः शतम् ॥ १३४॥ दश रुद्रा
नखा मूर्छा हाराः स्युः क्रमशः स्मृताः॥शते रसार्क-
रुद्राश्च दशविंशोत्तरं शतम् ॥ १३५ ॥ एते हाराः
क्रमात्प्रोक्ताः केषांचित्परमायुषः ॥ केषांचिदन-
योर्योगदलमब्दा विशेषतः ॥ १३६ ॥

टीका—एवं द्वादशराश्यंशायुर्दायहारांकानुक्त्वाऽथ नवांशायुर्दायांकानाह—पंचानामित्यर्धकद्वयेन । नवांशेषु प्रथमपंचांशानां तन्नाम पंच पुनस्तन्नाम चत्वारः षट्‌ ६ नवतिः ९० शतं १०० एते हाराः तथा अग्रिमचतुर्णामंशानां दश १० रुद्राः ११ नखाः २० मूर्छाः २१ एते हाराः क्रमशः स्मृताः ते तत्तदंशेषु स्युरिति ॥ १३४ ॥ अथ शतायुर्दायानाह—शत इति अर्धकद्वयेन । शते शतायुर्दाये परमायुषः हारांकाः रसाः ६ अर्काः १२ रुद्राः ११ दश १० विंशोत्तरं शतं १२० एते केषांचिन्मतेन शतायुषः क्रमात्प्रोक्ताः हारांका इति ॥ १३५॥ अथमतांतरमाह । केषामित्यर्धेन । केषांचिन्मतेन अनयोः हारशतायुषोर्योगदलं संयोगार्धं विशेषतः विशेषेण अब्दाः कथिता इति ॥ १३६ ॥

भाषा—नवांशायुर्दायके अंक कहते हैं ५।४।६।९०।१००।१०।११।२०।२१ यह क्रमसे हार जानना ॥ १३४ ॥ अब शतायुर्दार्य कहते हैं. सौ बरसका परमायुष्य होवे वहां हार६।१२।११।१०।१२० क्रमसे जानना ॥ १३५ ॥ अब मतांतर कहते हैं कोई मतसे हारशतायुष्यका योग करके उसका अर्ध करना वो वर्ष जानना ॥ १३६ ॥

दशमं यावदायातः स्वकुटुंबं बिभर्ति च ॥ कृच्छ्रेण
दशमे पुत्रबाहुल्यानेकसंयुतः ॥ १३७ ॥ एकादशे
तु विद्वांसो निर्धना जगतीं सदा ॥ अटंति द्वादशे
नित्यं निर्धनाः कुलपांसनाः ॥ १३८॥ स्वदेहार्थधना
दासा अतो यावत्तु विंशतिः ॥ अतः परं मृतिं याता
बाल्य एव यथागताः ॥ १३९ ॥

टीका—अथ उक्तस्य फलान्याह--दशमेत्यादिसार्धैकोनचत्वारिंशच्छ्लोकपर्यंतम् । दशमं यावद्दशमरश्मिपर्यंतं रश्मिरायातश्चेत्तस्य फलं तु कृच्छ्रेण कष्टेन स्वकुटुंबं बिभर्ति । दशमे तु पुत्रबाहुल्यानेकसंयुतः पुत्रबाहुल्येन अनेकनरनारीसंयुतो भवति। एकादशे तु पुत्रा भविष्यंति विद्वांसश्च स्युः किंतु निर्धना अत एव सदा जगतीं पृथ्वीं अटंति भ्रमंति । द्वादशे रश्मौ तु निर्धना दरिद्राः कुलपांसना नीचाश्च स्युः अतः त्रयोदशमारभ्य विंशतिपर्यंतं रश्मिषु स्वदेहार्थधनाः स्वशरीररक्षणाय द्रव्यार्जकाः तथा दासाश्च स्युः अतः परं जातपुत्राः यथागताः तथा बाल्ये एव जाताः मृताः स्युः एषां वत्सराः अब्दास्तु प्रथमे रश्मिप्रकरणे उत्तरे एतदध्यायोक्तरश्म्यब्दप्रकरणे च प्रोक्ताः ते एव एतत्फले एव स्मृताः एतत्फलविषये एव स्मृता इति ॥१३७॥ ॥ १३८ ॥ १३९ ॥

भाषा—अब रश्मिफल कहते हैं. दशरश्मिपर्यंत योग होवे तो कष्टसे कुटुंबका पोषण करे. दशरश्मि होवे तो पुत्र बहुत होवें. ग्यारहरश्मि होवे तो विद्वान् पुत्र होवें परंतु निर्धनतासे पृथ्वीमें फिरते रहैं. बारहरश्मि होवे तो निर्धन कुलाधम नीच होवें तेरहरश्मिसे लेके बीस रश्मिपर्यंत अपने शरीरके रक्षणार्थ धन पैदा करना, दास्यपना करना, कितनेक बाल्य अवस्थामेंही मृत्यु पावें ॥ १३७ ॥ १३८ ॥ १३९ ॥

एवं प्राग्वत्सराः प्रोक्ताः प्रथमे चोत्तरे स्मृताः ॥ १४० ॥ केंद्रत्रिकोणेष्वशुभा ग्रहास्तु त्रिलाभषष्ठाष्टमगाः शुभाश्चेत् ॥ द्वितीयवेश्मास्तगताश्च भौमक्षीणेंदुमंदा यदि वा च वामम् ॥ १४१ ॥ स्थानेषु धनदेष्वेवं शत्रुवर्गगता यदि ॥ रव्याराार्किंतमःक्षीणचंद्राः स्यूरेकदा इमे ॥ एवं त्रिकादियोगानां संयोगो रेकदो गुणैः ॥ १४२ ॥ अन्यथा तारतम्येन कादाचित्को भवेद्द्विज ॥ लग्ने द्विधर्मकर्मायसुखपुत्रास्तविक्रमे ॥ ॥ १४३ ॥ स्थितः स्थितौ स्थिताः खेटाः शत्रुग्रहनिरीक्षिताः ॥ आदौ वयसि मध्येऽन्ते दरिद्राः स्युः क्रमाद्भवेत् ॥ १४४ ॥

टीका—अथ योगानाह--केंद्रेत्यादिसार्धचत्वारिंशच्छ्लोकपर्यंतम् । केंद्रत्रिकोणेषु १ । ४ । ७ । १० । ५ । ९ एषु स्थानेषु अशुभा ग्रहाः तथा त्रिलाभषष्ठाष्टमगाः ३ । ११ । ६ । ८ एषु स्थिताः शुभग्रहाश्चेत अथवा द्वितीयवेश्मास्तगताः २ । ४ । ७ एषु स्थानेषु गताः यदि भौमक्षीणेंदुमंदाः मंगलक्षीणचंद्रशनयः अथवा यदि वामं विपरीतम् एषु धनादिषु स्थानेषु शत्रुवर्गगता यदि वा रव्याराार्किंतमः-

क्षीणचंद्राः रविभौमशनिराहुक्षीणचंद्राः स्युः तदा रेकदाः दरिद्रयोगकारका इमे ज्ञेयाः एवं त्रिकादियोगानां षष्ठाष्टमद्वादशादिस्थानेषु योगानामुक्तानां संबंधी योगश्चेत् गुणैः रेकदो योगो ज्ञेयः अन्यथा हे द्विज मैत्रेय ! उक्तान्यतमस्थाने कादाचित्को योगो भवेदिति तारतम्येन ज्ञेयः तथा लग्नाद्विधर्मकर्मायसुखपुत्रास्तविक्रमे १।२।९।१०।११।४।५।७।३ एतत्स्थाने स्थितः एकः स्थितौ द्वौ स्थितास्त्र्यादयः वा खेटाः शत्रुग्रहनिरीक्षिताः स्वशत्रुग्रहेण विलोकिताश्चेत् एकग्रहे आदौ ग्रहद्वये मध्ये वयसि त्र्यादिग्रहेषु अंते वयसि दरिद्रकारकाः स्युः एवं क्रमाद्भवेत् इमे नव योगाः त्रिषु स्थानेषु षष्ठाष्टमद्वादशस्थानेषु रेकदा दारिद्र्यदा भवंति इति ॥१४०॥१४१॥ ॥ १४२ ॥ १४३ ॥ १४४ ॥

भाषा–अब योग कहते हैं इन १।४।७।१०।५।९ स्थानोंमें पाप ग्रह होवें और ३।६।११।८ इन स्थानोंमें शुभ ग्रह होवें अथवा २।४।७ इन स्थानोंमें मंगल, क्षीणचंद्र, शनि होवें तो वा रवि मंगल शनि राहु क्षीण चंद्र होवें तो दरिद्रयोग जानना ऐसा ६।८।१२ इन स्थानोंमें संबंध होवे तो गुणयुक्त दरिद्रयोग जानना. अथवा १।२।९ १०।११।४।५।७।३ इन स्थानोंमें एक ग्रह होवे और शत्रुदृष्टि होवे तो आद्य अवस्थामें दरिद्र होवे दो ग्रह होवे तो, मध्य अवस्थामें तीन आदि लेके ग्रह होवें तो अंतिम अवस्थामें दरिद्रयोग होवे ॥१४०॥१४१॥ ॥१४२॥१४३॥१४४॥

नव योगा इमे प्रोक्तास्त्रिषु स्थानेषु रेकदाः ॥ कर्कटा-
द्वृश्चिकान्मीनाच्चतुर्ष्वेव क्रमात्स्थिताः ॥ १४५ ॥
शत्रुगेहे स्थिताः पापा मध्येंऽते प्रथमे क्रमात् ॥ सुखा-
न्मृत्योऽर्थयात्पुत्राद्धर्माल्लग्नात्तथैव च ॥ १४६ ॥

टीका-अथ योगांतराण्याह-कर्केत्यादिसार्धषट्चत्वारिंशच्छ्लोकपर्यंतम् । कर्कटात् वृश्चिकात् मीनाद्वा चतुर्षु चतुर्षु राशिषु क्रमात् स्थिताः ग्रहाः शत्रुगेहे स्थिताः शत्रुग्रहेण विलोकिताः पापा वा स्युश्चेत् कर्कटाच्चतुर्षु मध्ये वयसि फलदाः वृश्चिकाच्चतुर्षु अंते वयसि फलदाः मीनाच्चतुर्षु क्रमात् प्रथमे वयसि फलदाः तथा सुखात् चतुर्थान्मृत्योः अष्टमात् व्ययात् द्वादशात् पुत्रात्पंचमात् धर्मान्नवमाल्लग्नात् जन्मलग्नात् एवं तथैव पूर्वप्रकारेणैव फलं ज्ञेयम् अत्र अष्टवर्गसमुद्भवाः अक्षाः यदि न्यूनाः स्युस्तर्हि इति ॥ १४५ ॥ १४६ ॥

भाषा-अब योगांतर कहते हैं. कर्कसे लेके चार राशिके अंदर शुभ वा पापग्रह होवें और शत्रुग्रहोंकी दृष्टि होवे तो मध्य अवस्थामें योग फल देवेंगे वृश्चिकादि चार राशिमें होवें तो अंत्य अवस्थामें योगफल जानना, मीनादि चार राशियोंमें होवें तो प्रथम अवस्थामें योगफल जानना ॥ १४५ ॥ १४६ ॥

एवमक्षा यदि न्यूनाश्चाष्टवर्गसमुद्भवाः ॥ केंद्रेषु च त्रिकोणेषु शुभा उपचये परे ॥ १४७ ॥ धनदेषु शुभाश्चान्ये परेषु च यदि स्थिताः ॥ इष्टराशिमफलाधिक्यैकश्च द्वौ च त्रयोपि वा ॥ १४८ ॥ उच्चादिपंचकस्थाने नवांशेष्वेव वा यदि ॥ लक्ष्मीयोगा इमे प्रोक्तास्सुहृद्दृष्टास्तथा परे ॥ १४९ ॥

टीका-अथ शुभयोगानाह-केंद्रेष्वित्याद्येकोनपंचाशच्छ्लोकपर्यंतम् । केंद्रेषु १ । ४ । ७ । १० एषु त्रिकोणेषु ५ । ९ एषु शुभाः तथा उपचयस्थाने परे नाम अशुभाः धनदेषु स्थानेषु शुभाः परेषु धनदव्यतिरिक्तेषु अन्ये नाम पापाः यदि स्थिताः इष्टराशिमफलाधिक्ये सति एकः अत्र संधिरार्षः द्वौ वा त्रयोपि वा उच्चादिपंचकस्थाने उच्चत्रिकोणस्वातिमित्रमित्रस्थानेऽथवा नवांशेषु उच्चादि-

नवांशेषु यदि स्युस्तर्हि इमे लक्ष्मीयोगाः प्रोक्ताः तथा परे उक्तान्यस्थाने सुहृद्दृष्टास्तर्ह्यपि लक्ष्मीयोग इति ॥ १४७ ॥ १४८ ॥ १४९ ॥

भाषा–अब शुभयोग कहते हैं. १ । ४ । ७ । १० । ५ । ९ इन स्थानोंमें शुभ ग्रह होवें. ३ । ६ । ११ इन स्थानोंमें पापग्रह होवें वो धनस्थानमें शुभ ग्रह होवें इष्टराश्मिफल ज्यादा होवे उच्च मूल त्रिकोण राशिके एक दो तीन ग्रह होवें अथवा उच्चादिकके नवांश होवें तो लक्ष्मीयोग जानना ॥ १४७॥ १४८ ॥ १४९ ॥

रेके प्रोक्ताधिकाक्षांशाः शुभा रिःफाष्टषड्विना॥उच्चौ
द्वौ वा त्रयः कोणे चत्वारोऽतिसुहृत्स्थिताः ॥ १५०॥

टीका–पुनर्लक्ष्मीयोगांतरमाह–रेके इति सार्धेन । रेके दरिद्रयोगे प्रोक्ताधिकाक्षांशाः प्रोक्तसंख्यायाः अधिकाः अक्षांशा येषां ते तथा शुभाः शुभग्रहाः रिःफाष्टषड्विना द्वादशाष्टषष्ठस्थानव्यतिरेकेण द्वौ उच्चौ त्रयः उच्चाः कोणे वा चत्वारः अतिसुहृत्स्थानस्थिताः अथ वा मित्रे मित्रस्थाने च पंचषट्सप्तखेटाश्चेच्छ्रीप्रदाः लक्ष्मीदायकाः स्मृताः कथिता इति ॥ १५० ॥

भाषा--अब पुनः लक्ष्मीयोग कहते हैं. दरिद्रयोगमें जो अधिक अक्षांश कहे हैं वे और १२ । ८ । १६ इन स्थानोंको छोडके अन्य शेष कोईभी स्थानोंमें बैठे होवें और उच्च त्रिकोणके होके एक दो, तीन वा चार ग्रह होवें और अतिमित्रस्थानगत होके पांच, छः सात ग्रह होवें तो श्रीलक्ष्मीयोग जानना ॥ १५० ॥

मित्रेण पंच षट् सप्त खेटाश्चेच्छ्रीप्रदाः स्मृताः॥ द्वि-
र्द्वादशे शुभौ चंद्रात्सप्तमे वा तनोस्तथा ॥ १५१॥ गुरौ
लग्ने द्वितीये ज्ञे व्यये शुक्रेऽथवा भवेत् ॥ भावदृग्ब-
लकष्टेष्टफलभावस्वभावतः ॥ १५२ ॥

टीका-अथ पुनर्योगांतरमाह-द्विर्द्वादशेत्यादिसार्धेन । चंद्रात्सकाशात् शुभौ शुभग्रहौ द्विर्द्वादशे द्वितीयद्वादशस्थाने अथवा तनोः लग्नात्सकाशात्सप्तमे स्थाने सति तथा लग्ने गुरौ सति तथा द्वितीये धनस्थाने ज्ञे बुधेऽथवा व्यये द्वादशे शुक्रे सत्यपि लक्ष्मीयोगो भवेत् किंतु भावदृग्बलकष्टेष्टफलभावस्वभावतः भावानां दृग्बलं तथा कष्टेष्टफल तथा भावानां स्वभावाः यथा तथा तत्तारतम्येन मीनातिरिक्तश्रीयोगो ज्ञेय इति ॥ १५१ ॥ १५२ ॥

भाषा-अब और योगांतर कहते हैं. चंद्रसे २ । १२ घरमें शुभ ग्रह होवें, लग्नसे ७ घरमें चंद्र होवे, लग्नमें गुरु होवे, २ घरमें बुध, १२ घरमें शुक्र होवे तो लक्ष्मीयोग जानना. परंतु भावबल, दृष्टिबल, इष्टकष्टफल देखके तारतम्यतासे कहना ॥ १५१ ॥ १५२ ॥

दायानां च फलैरेव भाववर्गेशसंयुतैः ॥ रश्म्यंशसंभवादेव वर्षचर्यां तु दैववित् ॥ १५३ ॥ एषामंशाश्च संभूताः कारकादिग्रहैरपि ॥ मासचर्यां दिनोत्थां नाप्यष्टवर्गसमुद्भवात् ॥ १५४ ॥

टीका--अथान्यच्चाह--दायानामित्यादिद्वयेन । दायानां आयुर्दायानां फलैः भाववर्गेशसंयुतैः भावास्तन्वादयः वर्गाः गृहादयः एषां ये ईशाः स्वामिनस्तैर्युतैः रश्म्यंशसंभवात् रश्म्यंशोक्ताद्दैवज्ञः वर्षचर्यां वदेत् तथा एषां दायानां रश्मीनां च येंऽशाः संभूताः तत्तारतम्येनेत्यर्थः । तथा कारकादिग्रहैरपि मासचर्यां दिनोत्थां चर्यां च अष्टवर्गसमुद्भवात्फलाज्जानीयात् ॥ १५३ ॥ १५४ ॥

भाषा-अब और योग कहते हैं आयुर्दायका फल द्वादश भावका शुभाशुभफल वर्गोंका फल ग्रहस्वामीका फल राशिफल यह सबोंका विचार करके वर्षचर्या कहना. राश्मियोंके अंशोंकी तारतम्यतासे मासचर्या कहना अष्टवर्गके फलादेशसे दिनचर्या कहना ॥ १५३ ॥ १५४ ॥

भावदृष्ट्योः प्रधानत्वात्कारको बोधको बले ॥
इष्टकष्टफले त्वन्ये पाचको रश्मिसंभवे ॥ १५५ ॥
अंतर्दाये तु भावानां प्रधानो वेधकः स्मृतः ॥ अंत-
र्दाये दशानां तु कारको बोधकस्तथा ॥ १५६ ॥
भावस्वभावविषये पाचकस्त्वन्यथा भवेत् ॥ पाच-
कस्त्वन्यथा सूर्यश्चंद्रमा बोधकः स्मृतः ॥१५७॥
इति श्रीबृहत्पाराशरहोरायामुत्तरभागे अब्दचर्या-
वर्णनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥

टीका—अथाऽन्यच्चाप्याह—भावेत्यादि यावदध्यायावसानम् । भावदृष्ट्योः भावविचारे दृष्टिविचारे च प्रधानत्वान्मुख्यत्वात्कारको ग्राह्यः बलाबलविचारे प्रधानत्वाद्बोधको ग्राह्यः इष्टकष्टफलविचारे रश्मिसंभवे विचारे च प्रधानत्वात्पाचको ग्राह्यः । अंतर्दायविचारे च सर्वभावानां वेधकः प्रधानो मुख्यः स्मृतः दशानामंतर्दाये च बोधकारकौ प्रधानौ तथा भावस्वभावविषये अन्यथा दशाविचारमंतरा पाचकः प्रधानो भवेत् । सूर्यः स्वभावतः पाचकः चंद्रमास्तु बोधकः स्मृत इति ॥ १५५ ॥ १५६ ॥ १५७ ॥ अध्यायेऽस्मिन्यथाबुद्धि कृता टीका मया बुधाः ॥ शोधनीया भवद्भिः सा यत ईशो हि सर्ववित् ॥ १ ॥ एवं परोपकृतये यावद्बुद्धिबलोदयम् ॥ कृतया व्याख्यया श्रीमद्गणेशः प्रीयतां मम ॥ २ ॥ इति श्रीबृहत्पाराशरहोरायामुत्तरार्द्धे श्रीमद्दध्यङ्ङन्वयवेदशास्त्राद्यनवद्याविद्याविद्योतितादिङ्मंडलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचितायां सुबोधनीटीकायां अब्दचर्यावर्णने चतुर्दशोऽध्यायः ॥ १४ ॥

भाषा–अब बलाबल लेनेका योग कहते हैं, भावविचारमें दृष्टिविचारमें मुख्य कारक लेवे. बलाबलविचारमें बोधक लेना. इष्टकष्टविचारमें पाचक लेना. अंतर्दायविचारमें वेधक लेना. दशाके अंतर्दायविचारमें बोधक, कारक लेना. भावस्वभावविचारमें पाचक लेना. सूर्य स्वभावसे पाचक है. चंद्रमा बोधक है ॥ १५५ ॥ १५६ ॥ १५७ ॥ इति बृ० उत्तरार्धे भाषाटीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

षष्ठादिरश्मिष्वाद्येंऽशे जनको जन्मतो भृशम्॥ धनादिहीनो रिक्तश्च द्वितीयेंऽशे पितुर्मृतिः ॥ १ ॥ निःस्वस्तृतीये दासश्च चतुर्थे रंकसंयुतः ॥ व्याधिभिः पीडितस्तद्वत्पंचमे भृशदुःखितः ॥ २ ॥ नवमे दशमे चैवं षष्ठेंऽशे सप्तमेऽपि च ॥ व्याधियुक्तो दरिद्रश्च यदि जीवति जीवति ॥ ३ ॥ एकादशेऽपि रश्मौ चेदाद्येंशे पितृलालितः ॥ पितुर्धनव्ययकरो द्वितीये बंधकीपतिः ॥ ४ ॥ वेश्यासक्तस्तृतीये स्यान्निर्धनः कुलपांसनः ॥ मृतपुत्रोऽथ वाऽभाग्यश्चतुर्थे स्त्रीविमानितः ॥५॥ पंचमे त्वल्पपुत्रः स्यात्षष्ठे चाप्यरुजा युतः ॥ श्रीयोगे धनवान्कश्चित्सप्तमे दुःखितोऽधनः ॥ ६ ॥ आद्येंऽशे द्वादशे रश्मौ नैव तस्य शुभाशुभौ ॥ द्वितीये बलवान्मूर्खश्चौर्यद्रव्येण जीवति ॥७॥ तृतीये च चतुर्थे च वेश्यापतिररिंदमः ॥ नृपपूरुषमृत्युश्च भार्याहीनोऽसुतोऽधनी ॥ ८ ॥

टीका–अथ पंचदशाध्यायेऽब्दचर्यादिफलं मुनिः ॥ आह तद्व्याकृतौ श्रीमद्गणेशः प्रेरयोद्धि माम् ॥ १ ॥ अथ श्रीमद्भगवान्प-

राशरऋषिः मैत्रेयायाऽस्मिन्पंचदशाध्याये अब्दचर्यादिफलमुपदिशति तत्रादौ रश्म्यंशफलमाह–षष्ठादीत्यष्टमश्लोकपर्यंतम् । षष्ठादिरश्मिषु षष्ठरश्मिमारभ्य आग्रिमरश्मीनां अंशवशात्फलानि यथा षष्ठे रश्मौ आद्येंऽशे सति तस्य जन्मतः जनकः पिता भृशं अत्यंतं धनादिहीनः धनधान्यादिरहितः स्यात् तथा रिक्त उद्योगहीनश्च स्यात् तथा द्वितीयेंऽशे जन्मतः तत्समये एव पितुर्मृतिः स्यात् । तृतीयेंऽशे निःस्वो दरिद्रः दासः सेवकश्च स्यात् चतुर्थेंऽशे रंकसंयुतः दरिद्रयुक्तः व्याधिभिः पीडितश्च स्यात् । तद्वत्तेन प्रकारेण पंचमेंऽशे भृशदुःखितः अत्यंतं पीडितः नवमे षष्ठे सप्तमे चांशे व्याधियुक्तः रोगी दरिद्रः रंकः यदि जीवति तदा जीवति अनेन जीवनेऽपि संशय एवोदितः । एकादशे रश्मौ आद्यंशे पितृलालितः पित्रैव पोषितः मृतमातृक इत्यर्थः । तथा पितुर्धनव्ययकरः पितृधनहर्ता स्यात् द्वितीयेंऽशे बंधकीपतिः पुंश्चलीभर्ता वेश्यासक्तः स्यात् तृतीयेंशे निर्धनः तथा कुलपांसनः कुलहीनः अथवा मृतपुत्रः अभाग्यो वा स्यात् चतुर्थेंऽशे स्त्रीविमानितः स्त्रीपराजितः स्यात् पंचमेंशे तु अल्पपुत्रः स्यात्षष्ठेंशेऽरुजा युतः अरुग्णः श्रीयोगेन धनवान्स्यात् सप्तमेंऽशे दुःखितः अधनश्च स्यात् द्वादशे रश्मौ आद्येंऽशे जातस्य तस्य शुभाशुभे नैव स्तः फलाभाव इत्यर्थः । द्वितीये बलवान्मूर्खः अतश्चौर्यद्रव्येण जीवति । तृतीयेंऽशे चतुर्थें चांऽशे वेश्यापतिस्तथा अरिंदमः शत्रुनाशनः नृपपूरुषमृत्युः स्यात् राजपुरुषात्तस्य मृत्युः जीवन्सन् भार्याहीनः असुतः अधनश्च स्यात् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ॥ ६ ॥ ७ ॥ ८ ॥

भाषा–अब आगे वर्षचर्याका फल कहते हैं. उसमें प्रथम रश्मिका फल कहते हैं. छठी रश्मिके प्रथमांशमें जन्म होवे तो उसका पिता धनधान्यहीन होवे. दूसरे अंशमें जन्म होवे तो जन्म होते पिताकी मृत्यु होवे.

तीसरे अंशमें जन्म होवे तो दारिद्र सेवक होवे. चौथे अंशमें जन्म होवे तो दरिद्री व्याधिग्रस्त होवे, पांचवें अंशमें होवे तो अत्यंत पीडित होवे. नवम, दशम, षष्ठ, सप्तम अंशमें होवे तो रोगी दरिद्री जीवे तो जीवे जीनेकाभी संशय है. ग्यारहवीं रश्मिके आद्यंशमें जन्म होवे तो पिता लालन, पोषण करे, पितृधनका हरण करे. दूसरे अंशमें होवे तो पुंश्चली स्त्रीका पति होवे, वेश्यासक्त होवे. तीसरे अंशमें होवे तो निर्धन और कुलहीन होवे. अथवा मृतपुत्र वा अभाग्य होवे. चौथे अंशमें जन्म होवे तो स्त्रीपराजित होवे. पांचवें अंशमें अल्पपुत्र होवे. छठे अंशमें निरोगी होवे. स्त्रीके योगसे धन प्राप्त होवे. सातवें अंशमें दुःखी और निर्धन होवे बारह रश्मिके प्रथमांशमें जन्म होवे तो शुभाशुभ समान है. दूसरे अंशमें बलवान् तथा मूर्ख, चोर होवे. तीसरे चौथे अंशमें वेश्यापति होवे. शत्रुका नाश करे. राजपुरुषके हाथसे मृत्यु होवे. और जो कभी जीवे तो भार्याहीन, पुत्रहीन, धनहीन होवे ॥ १ ॥ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

विद्वांश्चतुर्दशे त्वाद्ये पितृभ्यां लालितःसुखी ॥ द्वितीये
क्लेशभाग्वापि शत्रुजिच्च रणाजिरे ॥ ९ ॥ पितृभ्यां
हीन एवाथ लब्धार्किंचिद्धनार्जकः ॥ देशाद्देशमटत्येव
तृतीये धनतत्परः ॥ १० ॥ सद्भिरीड्यः सुखी ख्यातः
शांतबुद्धिररिंदमः ॥ चतुर्थे धनवान् क्षेत्री विद्ययार्जित-पोषकः ॥ ११ ॥ सतीश्रीयोगसंयुक्तः पंचमे दुःखभा-ग्धनी ॥ पुत्रादिसंपत्संयुक्त एवं पंचदशे भवेत् ॥ १२ ॥
अस्मिन्षष्ठे धनी प्राज्ञो विद्यया सद्यशो भवेत् ॥ एवं
च षोडशे चांशे त्वतीवधनवान्भवेत् ॥ १३ ॥ स्वबंधु-भ्योऽधिकोऽन्येंऽशे विद्ययाऽथ धनेन वा ॥ पुत्रादि-संयुतः श्रीमांस्त्र्यंशे स्यात्स्वजनेश्वरः ॥ १४ ॥ इष्टा-

पूर्तेन संयुक्तस्त्वष्टादशोनविंशके ॥ पूर्ववद्विंशरश्मौ तु लब्धधामपरायणः ॥ १५ ॥ वदान्यः पूर्वधर्माणामनुवद्बहुपुत्रकः ॥ एकविंशे धनैर्युक्तमाद्येऽनंतरभागके ॥ १६ ॥ तृतीये तु भुवि ख्यातो दानेन च धनेन च ॥ द्विनामत्वं तु वा यज्वा यानवाहनसंयुतः ॥ १७॥ श्रीमान्बहुधनानां च साधकश्च चतुर्थके ॥ अग्निमांद्येन रोगार्तश्चतुर्थे धनवान्सुखी ॥ १८ ॥ पंचमे देशयोर्विद्वान्वदान्यो दंतुरोऽथवा ॥ सप्तमे धनहानिः स्याद्राजयोगैश्च मृत्युयुक् ॥ १९ ॥ अष्टमे निर्धनस्थानां जनानां पोषणे रतः ॥ द्वाविंशे प्रथमेंऽशे तु पितुः पुत्रो धनस्य तु ॥ २० ॥

टीका–पुनश्चतुर्दशादिषु फलान्याह–विद्वानित्यादिविंशतिश्लोकपर्यंतम् । चतुर्दशे रश्मौ आद्यांशे विद्वान् द्वितीये पितृभ्यां लालितः सुखी च तृतीयेंऽशे क्लेशभाक् क्वापि शत्रुजित् रणाजिरे स्यात् तथा पितृभ्यां हीन एव किंचिद्धनार्जको भवति देशादेशमटाति चतुर्थे तु धनतत्परः सद्भिरीड्यः सुखी ख्यातः प्रसिद्धः शांतबुद्धिः आरिंदमश्च पंचमे तु धनवान् क्षेत्री क्षेत्रवान् विद्यया अर्जितपोषकः संपादितस्य पालकः ॥ ९ ॥ १० ॥ ११ ॥ सतीश्रीयोगसंयुक्तः सद्भार्यालक्ष्मीसमन्वितः षष्ठे दुःखभाग् धनी पुत्रादिसंयुक्तश्च पंचदशे रश्मौ एवमेव फलानि पंचांशपर्यंतं आस्मिन्षष्ठे तु धनी प्राज्ञः विद्यया सद्यशाश्च भवेत् एवमेव षोडशे रश्मौ चकारात्सप्तदशे तु आद्यंशे अतीव धनवान् स्वबंधुभ्योऽधिकः द्वितीयेंऽशे भवति विद्यया धनेन च युक्तः पुत्रादिसंयुतः श्रीमांश्च त्र्यंशे स्यात् स्वजनेश्वरः चतुर्थेंशे स्यात् । इष्टापूर्तेनसंयुक्तः पंचषष्ठांशे स्यात् अष्टादशोनविंशके रश्मौ तु पूर्ववत्सप्त-

दशरश्म्युक्तफलं ज्ञेयं विंशतिरश्मौ तु लब्धधामपरायणः लब्धस्थानतत्परः वदान्यो दाता मनुवद्बहुपुत्रकः इति एकविंशे रश्मौ तु धनैर्युक्तः आद्येंशेऽनंतभागके द्वितीयेंऽशेपि तथैव तृतीये तु भुवि ख्यातः दानेन धनेन भवति द्विनामत्वं च स्यात् द्विनामा भवतीत्यर्थः । यज्वा यानबाहनसंयुतः श्रीमान्बहुधनानां साधकश्च चतुर्थे अग्निमांद्येन रोगार्तः धनवान् सुखी पंचमेंशे भवतिं देशयोः स्वदेशे परदेशे च विद्वान् वदान्यः दंतुरः षष्ठे भवाति सप्तमे तु धनहानिः राजयोगैः नृपसमागमैः मृत्युयुक् च अष्टमे तु निर्धनस्थानां दरिद्राणां जनानां पोषणे रतः । अथ द्वाविंशे रश्मौ प्रथमांशे पितुः धनस्य पोषकः पुत्रो भवति ॥१२॥१३॥१४ ॥१५ ॥१६॥१७॥१८॥१९॥२०॥

भाषा—चौदहवीं रश्मिके प्रथमांशमें विद्वान् होवे. दूसरे अंशमें मातापितासे लालित होवै सुखी होवे. तीसरे अंशमें क्लेश पावे. शत्रुको जीतै मातापितासे हीन होवे. देशदेश फिरे. चौथे अंशमें धनतत्पर होवै. सुखी होवै. प्रसिद्ध, शांतबुद्धि, शत्रुनाशकर्ता, अच्छे पुरुष जिसकी स्तुति करें. पांचवें अंशमें धनी भूमियुक्त, विद्यासे पोषण करनेवाला, उत्तम भार्यायुक्त होवै. छठे अंशमें दुःखी, धनपुत्रसे सुखी होवै. पंदरहवें रश्मिका अंशफल पांच रश्मि अंशपर्यंत ऊपर लिखे सरीखा फल जानना. छठे अंशमें बुद्धिमान् धनवान् होवै. सोलहवीं रश्मिके और सतरहवीं रश्मिके प्रथम अंशमें बहुत धनी होवै दूसरे अंशमें अपने बंधुसे प्रतापी ज्यादा होवै. तीसरे अंशमें विद्या तथा धन पुत्रादिकसे सुखी होवै. चौथे अंशमें अपने लोकोंमें अधिकारपदवी पावे. पांचवें छठे अंशमें यज्ञ याग करे, बावडी, कूवा, तलाव बगीचा बनावे. अठारहवीं और उन्नीसवीं रश्मिका फल सतरहवीं रश्मि सरीखा जानना. वीसवीं रश्मिमें मिली हुई जगहमें लुब्ध रहै. दानशील, बहुपुत्रवान् होवै. एकवीस रश्मिके प्रथम अंशमें व दूसरे अंशमें धनी होवै, तीसरे अंशमें दानधर्मसे ख्यात होवे, वाहन मिलै यज्ञ करै. श्रीमान् बहुधनवान् सुखी होवै. चौथे

अंशमें अग्निमांद्यसे रोगी होवै. धनी सुखी पांचवें अंशमें होवै. वदान्य, दंतुर छठे अंशमें होवै. सातवें अंशमें धनहीन होवै. राजानिमित्तसे मृत्यु होवै. आठवें अंशमें निर्धन, दरिद्रीका पोषण करे, बाईसवें अंशके प्रथम अंशमें पितृधनका पोषण करे ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

द्वितीये धनहीनश्च किंचित्कृषिकरः सुखी ॥ तृतीये राजकार्यार्थी तत्कमार्जितवित्तकः ॥ २१॥ चतुर्थे तु प्रभुश्चान्यनामभाग्दृढबंधनात् ॥ पंचमे तद्वदेव स्यात्षष्ठे कार्यस्य हानिकः ॥ २२ ॥

टीका–अग्रिमाणां चाह--द्वितीयइत्यादिद्वाविंशतिश्लोकपर्यंतम् ॥ द्वाविंशे रश्मौ प्रथमांशफलं पूर्वमुक्तं द्वितीये तु धनहीनः किंचित्कृषिकरः सुखी च तृतीयेंऽशे राजकार्यार्थी तत्कर्मार्जितवित्तकः तत्सेवासंपादितद्रव्यश्च चतुर्थे तु प्रभुः अन्यनामभाक् परनामधारी अत्र हेतुः दृढबंधनादिति पंचमे तद्वदेव प्राग्वदेव फलं षष्ठे कार्यस्य हानिकः सर्वव्ययः रिक्तश्च सप्तमे रोगयुग्धनी च ॥ २१ ॥ २२ ॥

भाषा--बाईसवीं रश्मिके दूसरे अंशमें धनहीन, थोडी खेती करे. सुखी होवे. तीसरे अंशमें राजकर्मसे धन मिलावे. चौथे अंशमें समर्थ होवे. दूसरेका नाम धारण करे. पांचवें अंशमें चौथे सरीखा फल छठे अंशमें कार्यकी हानि करनेवाला होवे सातवें अंशमें रोगी और धनी होवे ॥ २१ ॥ २२ ॥

सर्वव्ययश्च रिक्तश्च सप्तमे रोगयुग्धनी ॥ त्रयोविंशे तु जनकलालितश्च सुखी भवेत् ॥२३॥ तृतीये मूर्खकृत्येन पराभवसमन्वितः॥ चतुर्थे चौरकृत्येन पंचमे व्याधिसंभवः ॥२४॥ षष्ठे दरिद्रः पुरुषो व्याधिना

पीडितो भवेत् ॥ श्रीमान्पुत्रश्चतुर्विंशे प्रथमे लालितो भृशम् ॥ २५ ॥ स्वजात्यनुगुणो विद्वान्प्रथमे च द्वितीयके ॥ तेन ख्यातस्तृतीये स्यात्स्वतंत्रः सर्वसंमतः ॥ २६॥ क्षेत्रदारसुहृत्पुत्रकलत्रैर्बहुभिर्वृतः ॥ पंचमे व्याधितः षष्ठे बहुव्ययपरायणः ॥ २७ ॥

टीका-अथ त्रयोविंशादिरश्मिषु फलमाह-त्रयोविंशइत्यादिसप्तविंशतिपर्यंतम् । त्रयोविंशे रश्मौ तु जनकलालितः प्रथमेंऽशे द्वितीये तु सुखी भवेत् तृतीये मूर्खकृत्येन पराभवसमन्वितः चतुर्थे चोरकृत्येन युक्तः पंचमे व्याधिसंभवः षष्ठे दरिद्रः व्याधिना पीडितश्च पुरुषो भवेत् । अथ चतुर्विंशे रश्मौ श्रीमान्पुत्रः पित्रा भृशं लालितः स्वजात्यनुगुणः विद्वांश्च प्रथमांशे भवति द्वितीये तेन गुणेन ख्यातः प्रसिद्धः तृतीये स्वतंत्रः सर्वसंमतश्च चतुर्थे क्षेत्रदारसुहृत्पुत्रैर्बहुभिर्वृतो भवति पंचमे व्याधितः षष्ठे बहुव्ययपरायणः ॥ २३ ॥ २४ ॥ ॥ २५ ॥ २६ ॥ २७ ॥

भाषा-तेईस रश्मिके प्रथमांशमें पितासे सुखी दूसरे अंशमें सुखी होवे. तीसरे अंशमें मूर्खताके काममें हार जावे. चौथे अंशमें चोर होवे. पांचवें अंशमें रोगकी उत्पत्ति होवे. छठे अंशमें दरिद्री, रोगपीडित होवे. चौबीसवीं रश्मिके प्रथमांशमें लक्ष्मीवान् पितासे सुखी विद्वान् स्वजातिके गुणसे युक्त होवे दूसरे अंशमें प्रथमांशका फल जानना. तीसरे अंशमें स्वतंत्र सर्व संमत होवे. चौथे अंशमें घर स्त्री पुत्र सगे संबंधियोंसे भरपूर रहै. पांचवें अंशमें रोगी होवे. छठे अंशमें बहुत खर्च करे ॥ २३ ॥ २४ ॥ ॥ २५ ॥ २६ ॥ २७ ॥

पंचविंशे तु षष्ठांशे फलहीनस्तु जीवति॥ षड्विंशे प्रथमांशे तु दरिद्रः स्यात्सुतोऽपि सन् ॥ २८ ॥ पितुः

कार्यें तु वृद्धिः स्याद्द्वितीये पितृवेश्मतः ॥ अन्यत्र गत्वा तत्रैव स्वयोग्येन च कर्मणा ॥ २९ ॥ स्वदेहपोषकोऽन्येंऽशे धनी च कृत्यवित् स्थितः ॥ चतुर्थे पंचमे चैव पट्टबंधादिसंयुतः ॥ ३० ॥ अतीव धनवान्स स्यात्षष्ठे त्वंशे स्वदेहभाक् ॥ क्षेत्रदारादिवृद्ध्या तु व्यथाव्याधिसमन्वितः ॥ ३१ ॥ नवमे धनहानिः स्यात्पुत्रदाराविवर्जितः ॥ यावद्दश नवांशाश्च षड्विंशवदथ द्वये ॥ ३२ ॥

टीका–अथ पंचविंशादिरश्मिफलान्याह–पंचविंश इत्यादिसार्धद्वात्रिंशच्छ्लोकपर्यंतम् । पंचविंशे रश्मौ षष्ठांशे फलहीनः फलरहितः सन् जीवाति । अथ षड्विंशे रश्मौ प्रथमांशे दरिद्रसुतः पितुः कार्ये भवाति वृद्धिश्च स्यात् द्वितीये पितृगृहादन्यत्र गत्वा स्वयोग्यकर्मणा स्वदेहपोषको भवाति अन्ये तृतीयेंशे धनी कृत्यविच्च स्थितः चतुर्थे पंचमे च पट्टबंधादिसंयुतः दीक्षितः पुरग्रामपट्टनपट्टबंधाग्रहारसंयुतो वेत्यर्थः । षष्ठे अतीव धनवान् सप्तमेंऽशे स्वदेहभाक् अष्टमेंशे क्षेत्रदारादिवृद्ध्या जीवाति व्यथाव्याधिसमन्वितः नवमे भवाति दशमे धनहानिः पुत्रदारादिवर्जितः यावन्नवांशदशांशफलान्युक्तानि तान्येव अथ द्वये सप्तविंशतिरश्मौ अष्टाविंशतिरश्मौ च ज्ञेयानि विशेषस्तु राजप्रियः चंडः शुद्धः इति तत्र ज्ञेयः ॥२८॥२९॥३०॥३१॥३२ ॥

भाषा–पचीसवीं रश्मिके छठे अंशमें निष्फल जीना होवे. छब्बीसवीं रश्मिके प्रथमांशमें दरिद्री पिताका काम करनेवाला होवे। दूसरे अंशमें अपने घरको छोडके दूसरे ठिकाने जायके उत्तम कर्मसे देहपोषण करे. तीसरे अंशमें धनवान् कामको जाननेवाला होवे. चौथे पांचवें अंशमें पट्टबंधनादिकसे युक्त दीक्षित होवे. छठे अंशमें धनवान् होवे. सातवें अंशमें देह

पोषण होवे आठवें अंशमें खेत और स्त्रियादिकोंकी वृद्धि कर जीवन करे, नववें अंशमें मानसदुःखी रोगी होवे; दशवें अंशमें धनहीन स्त्रीपुत्ररहित होवे. सत्तावीस अट्ठावीस रश्मिके अंशोंमें पूर्वोक्त फल जानना ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

राजप्रियस्ततश्चंडः शुद्धः स्यादंशके ततः ॥ एकोनत्रिंशे
रश्मौ तु सुखी स्याच्च द्वितीयके ॥ ३३ ॥ राजसेवी
तृतीयेंशे कृत्याकृत्यविदीश्वरः ॥ बहुबंधुयुतः
श्रीमान्मानवाहनसंयुतः ॥ ३४ ॥ देशग्रामाधिकारी
च त्रिंशे त्वेतैःसमन्वितः ॥ सेनानीर्नीतिमाञ्छूरः पंचमांशे
भवेदिदम् ॥३५॥ षष्ठे तु विजयो युद्धे सप्तमेऽपि
रुजा युतः॥ न्यूनायतिस्तु वस्वंशे नवांशे त्वधिकायतिः॥३६॥
त्रयस्त्रिंशें तु राजानः षष्ठांशे वा तृतीयके॥अभिषिक्तो भवेद्यद्वा पट्टबंधस्तु योगतः॥३७॥
रश्मौ तथा चतुस्त्रिंशे चतुर्थांशे पराजयः ॥ तृतीये
पंचमे षष्ठ युद्धे तु विजयी भवेत् ॥ ३८ ॥ अष्टमे
नवमेंऽशे तु वृद्धिः स्याद्दशमे न हि ॥ षडंशविषये
यस्माच्चत्वारिंशत्ततः परे ॥ ३९ ॥ द्वितीये च तृतीये
च चतुर्थे चाद्यके तथा ॥ राजा स्यात्पंचमे षष्ठे सप्ताष्टनवमे
ततः ॥ ४०॥ दशमे च क्रमाद्युद्धव्याधिर्वाऽथ
पराजयः ॥ इतरांशेषु संख्यातः सवसंपत्समन्वितः
॥४१॥ ततः परं च सम्राट् स्याच्चतुर्थे पंचमे
जयी॥ अंशास्तुल्यास्तु तेष्वेवं विपरीतफलं विदुः॥४२॥

व्याधिरुक्तवदेव स्याद्यावद्विंशतिरश्मयः ॥ यद्यप्यंशाः परं नाऽत्र अधिकारं भजन्ति ते ॥४३॥

टीका–अथैकोनत्रिंशादिरश्मीनां फलान्याह–एकोनत्रिंश इत्यादित्रिचत्वारिंशत्पर्यंतम्। एकोनत्रिंशे रश्मौ प्रथमांशे सुखी स्यात् द्वितीये राजसेवी स्यात् तृतीयेंऽशे कृत्याकृत्यवित् कार्याकार्यज्ञः ईश्वरोधिपतिः बहुबंधुयुतः श्रीमान्मानवाहनसंयुतः. देशग्रामाधिकारी च चतुर्थादिनवांशपर्यंतं क्रमात्स्यात् त्रिंशे रश्मौ एतैरुक्तफलैः समन्वितः एकत्रिंशे रश्मौ तु सेनानीः नीतिमान् शूरः इदं पंचमांशे फलं भवति षष्ठे तु युद्धे विजयः सप्तमे रुजा युतः न्यूनायतिः वस्वंशेऽष्टमेंशे भवति नवांशे तु अधिकायातिः एवमेव द्वात्रिंशद्रश्मौ ज्ञेयं तत्र विशेषानुक्तत्वात् त्रयस्त्रिंशे रश्मौ षष्ठांशे तृतीये वा राजानो भवंति यद्वा योगतः योगवशात्पट्टबंधः स्यात् अथवा राज्याभिषिक्तो भवति चतुस्त्रिंशे रश्मौ चतुर्थांशे पराजयः तृतीयपंचमषष्ठेषु तु युद्धे विजयी भवेत् अष्टमे नवमेंऽशे तु वृद्धिः स्यात् दशमे षडंशविषये न हि फलाभावः तस्माच्चतुस्त्रिंशद्रश्मेः सकाशात् यावच्चत्वारिंशद्रश्मिपर्यंतं येऽपरेऽन्ये रश्मयः संति तेषामेकमेव फलमुच्यते तदेव द्वितीयतृतीयचतुर्थाद्येषु राजा स्यात् सप्ताष्टनवमदशमेषु क्रमात् युद्धं व्याधिः पराजयः इति फलानि ज्ञेयानि इतरांशेषु सर्वसंपत्समन्वितः संख्यातः कथितः ततः परं चतुस्त्रिंशद्रश्म्यनंतरं रश्मिषु सत्सु सम्राड् चक्रवर्ती स्यात्तत्र पंचमचतुर्थांशयोः जयी जेता सम्राट् भवति एवमुक्तसंख्यया तुल्या अंशा नैव चेन्नामैतदवशिष्टांशे इत्यर्थः। विपरीतफलं विदुः उक्तविपर्यासः स्यात्तत्र प्रथमादि यावद्विंशतिरश्मिपर्यंतं उक्तवत्तुल्यरश्मिराहित्ये व्याधिः स्यात् अथात्र यद्यपि परं अंशा नोक्तास्तथापि तेषु स्वाधिकारफलं भजंतीति ज्ञेयम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

भाषा–उगतीसवीं रश्मिके प्रथमांशमें सुखी होवे. दूसरे अंशमें राजसेवी होवे तीसरे अंशमें सत्कर्मको जाने चौथे अंशमें अधिपति होवे. पांचवें अंशमें बहुत बंधुसमागममें रहै. छठे अंशमें श्रीमान् होवे. सातवें अंशमें सन्मान पावे, वाहन मिले. आठवें अंशमें देशाधिपति होवे. नवम अंशमें ग्रामाधिकारी होवे. तीस रश्मिके अंशफलविचारमें पूर्वोक्त फल जानना. एकतीसवीं रश्मिके पांचवें अंशमें सेनाधीश, नीतिमान्, शूर होवे. छठे अंशमें युद्धमें जय पावे. सातवें अंशमें रोगयुक्त होवे. आठवें अंशमें लाभ थोडा होता रहे. नवम अंशमें बहुत लाभ होवे. बत्तीस रश्मिके अंशमें पूर्वसरीखा फल जानना. तेंतीस रश्मिके छठे तीसरे अंशमें राजा होते हैं. चौंतीस रश्मिके चौथे अंशमें पराजय (हार) होवे. तीसरे, पांचवें, छठे अंशमें जीत होवे, आठवें नवम अंशमें वृद्धि होवे. चौंतीस रश्मिसे लेके चालीस रश्मितक जो रश्मि हैं उनके प्रथम, द्वितीय, तृतीय, चतुर्थ यह अंशोंमें राजा होवे. सातवें अंशमें युद्ध, आठवें अंशमें व्याधि, नवम अंशमें व्याधि, दशम अंशमें पराजय होवे. बाकीके अंशोंमें सर्व संपत्ति प्राप्त होवे ॥ ३३ ॥ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ॥ ४२ ॥ ४३ ॥

अथ स्थानगतानां तु रव्यादीनां क्रमात्फलम् ॥
ततो रविः शिरोरोगं बंधूनां च विरोधताम् ॥४४॥
द्वितीये धनहानिश्च तृतीये मित्रवर्द्धनम् ॥ धनलाभं-
सुखे सौख्यं शत्रुभिश्च समागमम्॥४५॥पंचमे पुत्र-
लाभं च बुद्धिमुद्यमसिद्धिकृत् ॥ षष्ठे धनं जयं
कुर्यात्सप्तमे स्त्रीविरोधनम् ॥ ४६ ॥ अष्टमे व्याधिं
हानिं च नवमे मित्रबंधनम् ॥ भाग्यहानिं च दशमे

धनलाभं सुखं जयम् ॥ ४७ ॥ एकादशे धनानां
च सिद्धिं मित्रसमागमम् ॥ द्वादशे धनहानिं च जयं
वा कुक्षिरुक् क्रमात् ॥ ४८ ॥

टीका—अथ रव्यादीनां स्थानवशात्फलान्याह । तत्रादौ रविस्थानफलान्याह—अथेत्यादि अष्टचत्वारिंशच्छ्लोकपर्यंतम् । अथाऽनंतरं स्थानगतानां तन्वादिस्थानस्थितानां रव्यादीनां ग्रहाणां क्रमाद्वावक्रमेण प्रथमादिद्वादशांतामित्यर्थः । तदेवाह रविः सूर्यः तनुगतः शिरोरोगं शिरःशूलं बंधूनां विरोधतां बांधवविरोधतां बांधवविरोधमिति द्वितीयभावे धनहानिं करोति तृतीये भावे मित्रवर्धनं धनलाभं करोति सुखे चतुर्थभावे सौख्यं तथा शत्रुभिः समागमं करोति पंचमे भावे पुत्रलाभं बुद्धिं उद्यमे सिद्धिकृद्भवति षष्ठे भावे धनं जयं च कुर्यात् सप्तमे भावे स्त्रीविरोधनं कुर्यात् अष्टमे भावे व्याधिं हानिं च कुर्यात् नवमे भावे मित्रबंधनं भाग्यहानिं च कुर्यात् दशमे भावे धनलाभं सुखं जयं च कुर्यात् एकादशे भावे धनानां सिद्धिं मित्रसमागमं च कुर्यात् द्वादशे भावे धनहानिं व्ययं कुक्षिरुजं च क्रमाद्वा कुर्यादिति ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

भाषा—अब सूर्यादिग्रहोंका बारह भावोंका फल कहते हैं. सूर्य तनु भावमें होवे तो शिरोरोग बंधुविरोध करे १. धनहानि करे २. मित्रकी वृद्धि धनलाभ करे ३. सुख करे, शत्रुसमागम करे ४. पुत्रलाभ, बुद्धिवृद्धि, उद्योगकी सिद्धि करे ५. धनप्राप्ति जयप्राप्ति करे ६. स्त्रीविरोध करे ७. व्याधि और हानि करे ८. मित्रका बंधन भाग्यकी हानि करे ९. धनलाभ सुख, जयप्राप्ति करे १०. धनसिद्धि, मित्रसमागम करे ११. धनहानि, खर्च कुक्षिरोग करे १२ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

चंद्रे लग्ने च कलहं द्वितीये धनयोजनम् ॥ तृतीये
भ्रातृभिर्लाभं धनवस्त्रादिसंग्रहम् ॥ ४९ ॥ चतुर्थे

धनवस्त्रादिवाहनादिसुसंयुतम् ॥ ५० ॥ तीक्ष्णे धनी सुतयुतः परिपूर्णसंपत्षष्ठे तु रोगसहितं कुमतिं च कामे ॥ विद्याधनक्षितिसुखादि समन्वितश्च मृत्यौ च मृत्युविषयः खलु कुक्षिरोगी ॥ ५१ ॥ स्त्रीस्वर्णदासायतिरेव धर्मे माने सुचारित्रगुणं धनं च ॥ लाभे तु चैतत्सकलं व्यये तु धनस्य रिःफं कुरुते शशी तु ॥ ५२ ॥

टीका-अथ भावेषु चंद्रफलमाह-चंद्रइत्यादिसार्धैकपंचाशच्छ्लोकपर्यंतम् । चंद्रः लग्ने वर्तमानः कलहं करोति द्वितीये धनयोजनं करोति तृतीये भ्रातृलाभं धनवस्त्रादिसंग्रहं च करोति चतुर्थभावे धनवस्त्रादिसंयुतं वाहनादिसंयुतं च करोति तीक्ष्णे पंचमे सुतयुतः धनी परिपूर्णसंपद्युतः स्यात्षष्ठे तु रोगसहितं कुमतिं च करोति कामे सप्तमभावे विद्याधनक्षितिसुखादियुक्तः भवेत् मृत्यौ अष्टमभावे मृत्युविषयः कुक्षिरोगी च भवति धर्मे नवमभावे स्त्रीस्वर्णदासानामायतिर्भवेत् माने दशमभावे सुचारित्रं गुणं धनं च करोति लाभे एकादशभावे एतत्सकलं पूर्वोक्तं फलं व्यये द्वादशभावे तु शशी धनस्य रिःफं द्रव्यनाशं करोति ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

भाषा-अब चंद्रका द्वादशभावका फल कहते हैं, चंद्र कलह करे १. धनप्राप्ति करे २. भाईसे लाभ वस्त्रादिकका संग्रह करे ३. धनवस्त्रवाहनप्राप्ति करे ४. धनपुत्रसर्वसंपत्तिकी प्राप्ति करे ५. रोग कुबुद्धि करे ६. विद्याधन भूमि सुखकी प्राप्ति करे ७. मृत्यु दुःख कुक्षिरोग होवे ८. स्त्रीसुवर्णदासोंकी प्राप्ति करे ९. उत्तम गुणकी और धनकी प्राप्ति करे १० । ग्यारहमें दशोंकासा फल जानना ११. द्रव्यनाश होवे १२ ॥ ४९॥५०॥५१॥५२॥

कुजे लग्ने तु चापल्यात्क्षतं स्वे धननाशनम् ॥
विक्रमे भ्रातृमरणं धनलाभः सुखं यशः ॥

चतुर्थे बंधुमरणं शत्रुवृद्धिर्धनव्ययम् ॥ ५३ ॥ पंचमे पितृहानिं च धनायातिसुतौ यशः ॥ षष्ठे रिपुसमृद्धिं च जयं बंधुसमागमम् ॥ ५४ ॥ अर्थवृद्धिं स्त्रियां दारमरणं नीचसेवनम् ॥ नीचस्त्रीसंगमो मृत्यौ धननाशं पराभवम् ॥ ५५ ॥ पराभवमनर्थं च धर्मे पापरुचिक्रिया ॥ धनव्ययं च दशमे धनलाभं कुकर्म च ॥५६॥ लाभे धनं सुखं वस्त्रं स्वर्णक्षेत्रादिसंग्रहम् ॥ व्यये नेत्ररुजं भ्रातृनाशं च कुरुते कुजः॥५७॥

टीका–अथ भावेषु भौमफलान्याह–कुजे इत्यादिसप्तपंचाशच्छ्लोकपर्यंतम् । लग्नस्थाने कुजे भौमे सति चापलयाच्चपलत्वात् क्षतव्याधिः स्यात् स्वे द्वितिये भावे धननाशं विक्रमे तृतीयभावे भ्रातृमरणं धनलाभः सुखं यशश्च चतुर्थभावे बंधुमरणं शत्रुवृद्धिः धनव्ययश्च पंचमे पितृहानिः धनायातिः पुत्रलाभः यशश्च षष्ठे भावे रिपुसमृद्धिः जयो बंधुसमागमोऽर्थवृद्धिश्च स्त्रियां सप्तमभावे दारमरणं नीचसेवनं नीचस्त्रीसंगमश्च मृतौ अष्टमभावे धननाशः पराभवः अनर्थश्च धर्मे नवमभावे पापरुचिक्रिया धनव्ययश्च दशमे भावे धनलाभः कुकर्म च लाभे एकादशभावे धनं सुखं वस्त्रं स्वर्णक्षेत्रादिसंग्रहश्च व्यये भावे नेत्ररुजं भ्रातृनाशः एवं कुजः फलं कुरुते ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥५७॥

भाषा–अब मंगलका द्वादशभावफल कहते हैं. मंगल १ होवे तो चपलस्वभावके हेतुसे घावकी व्याधि होवे. धननाश करे २. भाईका नाश धनलाभ, सुख, यशप्राप्ति करे ३. बंधुमरण, शत्रुवृद्धि, धनप्राप्ति खर्च करे ४. पिताकी हानि, धनप्राप्ति, पुत्रलाभ, यशप्राप्ति करे ५. शत्रुवृद्धि,

जय, बंधुसमागम, अर्थवृद्धि करे ६. स्त्रीमरण नीचसेवन, नीचस्त्रीसंग करे ७. धननाश, पराभव, अनर्थ करे ८. पापकर्ममें रुचि, धन खर्च करे ९. धनलाभ, कुकर्म करे १०. धनसुख, वस्त्र, सुवर्णभूमीका लाभ करे ११. नेत्ररोग, भाईका नाश करे १२ ॥५३॥५४॥५५॥५६॥५७॥

बुधः षष्ठेऽरिवृद्धिं च युद्धे सति पराजयम् ॥ मृतौ
बंधुविहीनत्वं बंधनं व्ययभे व्ययम् ॥ ५८ ॥

टीका-अथ भावेषु बुधफलान्याह-बुध इति सार्धेन । बुधः षष्ठे भावेऽरिवृद्धिं युद्धे सति पराजयं च मृतौ अष्टमस्थाने बंधुहीनत्वं बंधनं च व्ययभे द्वादशभावे व्ययं नाशं परेषु शेषेषु भावेषु भावोक्तफलवृद्धिं तत्तद्भावविहितफलाधिक्यं कुरुते इति ॥ ५८ ॥

भाषा-अब बुधका द्वादशभावका फल कहते हैं. बुध शरीरमें सुख करे १. धनवृद्धि करे २. बंधुवृद्धि करे ३. भूमिघरका सुख करे ४. पुत्रवृद्धि, विद्याप्राप्ति करे ५. शत्रुकी वृद्धि करे. युद्धमें पराजय करे ६. स्त्रीसुख करे ७. बंधुहीन बंधनफल करे ८. भाग्यवृद्धि करे ९. व्यापारवृद्धि करे १० लाभ करे. ११ खर्च करावे १२ ॥ ५८ ॥

भावोक्तफलवृद्धिं तु परे तु कुरुते तथा ॥ गुरुशुक्रौ
तृतीये तु शत्रुवृद्धि धनक्षयम् ॥ ५९ ॥ षष्ठे पराजयं
व्याधिमष्टमे बंधनं तथा ॥ रिःफे चोरहृतस्वं तु नेत्ररोगपराजयम् ॥ ६० ॥ सप्तमे च चतुर्थे च सेनापत्यधनायतिः ॥ सर्वसंपत्समृद्धिं च नवमे राजसंपदम् ॥ ६१ ॥

टीका-अथ भावेषु गुरुशुक्रफलम् गुर्वित्यादिसार्धैकषष्टिश्लोकपर्यंतम् । अथ गुरुशुक्रौ तृतीयभावे धनवृद्धिं धनक्षयं च

कुरुतः षष्ठे पराजयं व्याधिं च कुरुतः अष्टमे बंधनं कुरुतः रिःफे द्वादशभावे चोरहृतस्वं चोरैः हृतं स्वं द्रव्यं यस्य तथा तं कुरुतः अपि च नेत्ररोगं पराजयं चेति सप्तमे चतुर्थे च भावे सेनापत्यधनायतिः सर्वसंपत्समृद्धिश्च नवमे राजसंपत्पूर्वोक्तफलसंयोगं पूर्वोक्तफलप्राप्तिं च कुरुतः अन्येष्ववशिष्टेषु भावेषु समं तत्तद्भावतुल्यं फलं भवेदिति ॥५९॥६०॥६१॥

भाषा-अब गुरु और शुक्रका द्वादशभावका फल कहते हैं गुरु शुक्र घरमें शरीरसुख करे १, धनवृद्धि करे २, धनवृद्धि, धनखर्चभी करे ३, घर भूमिका सुख करे ४, विद्याप्राप्ति पुत्रसुख करे ५, पराजय और व्याधि करे ६, स्त्रीसुख करे ७, बंधन करे ८, भाग्योदय करे ९, व्यापार राजसन्मान १०, लाभ करे ११, द्रव्य चोरीमें जाता रहे १२॥५९॥ ६० ॥ ६१ ॥

पूर्वोक्तफलसंयोगमन्येष्वपि समं भवेत् ॥ कुजवद्रविवन्मंदः पापत्र्यंशं दलं गतः ॥ ६२ ॥ पादोनमेकं मित्राधिमित्रस्वर्क्षे च कोणभे ॥ उच्चे तु नीचे त्रिगुणमध्यरौ द्विगुणं ततः ॥ ६३ ॥

टीका-अथ मंदफलमाह-कुजेति पादेन ।.मंदः शनिः कुजरव्युक्तद्वादशभावफलदो भवति । अथाधिमित्रादिस्थानस्थितानां भावोक्त मित्राधिमित्रस्वर्क्षत्रिकोणोच्चेषु वर्तमानेषु ग्रहेषु पूर्वोक्तभावफलं क्रमात्पादत्र्यंशदलपादोनैकांशफलदा ग्रहाः स्युः नीचे वर्तमानेषु त्रिगुणम् अध्यरौ अधिशत्रुस्थाने द्विगुणम् अरौ शत्रुक्षेत्रे वर्तमानेषु ग्रहेषु सार्धं क्रमात्कालफलजो निर्णयः ॥ ६२ ॥ ६३ ॥

भाषा-अब शनिका जो फल है सो सूर्य मंगल यह दोनोंके भावमें जो फल कहा है वो जानना. अब भावोक्त फलकी ह्रास वृद्धि कहते हैं. जो ग्रह मित्रक्षेत्री होवे तो पादमात्र भावफल जानना अधिमित्रका होवे तो तृतीयांश

भावफल जानना. स्वक्षेत्रका होवे तो तीनभाग फल जानना. त्रिकोणका होवे तो तीनभाग फल जानना. उच्चराशिका होवे तो संपूर्ण फल जानना. नीचराशिका होवे तो त्रिगुणहीन फल जानना. अधिशत्रुका होवे तो द्विगुणहीन फल जानना. शत्रुक्षेत्रका होवे तो अर्धहीन फल जानना ॥६२॥६३॥

अरौ सार्धं क्रमात्कालफलजस्त्वेव निर्णयः ॥ शुभैर्दृष्टो रवी राजसेवाफलधनायतिः ॥ ६४ ॥ शत्रुभीः कलहं दुःखं रुजं जठरनेत्रयोः ॥ मित्रदृष्टौ जयं बंधु लाभं पापैश्च रोगिताम् ॥ ६५ ॥

टीका-अथ रव्यादीनां दृष्टिवशात्फलं कथयन्नादौ रविफलमाह शुभैरिति पंचषष्टिश्लोकपर्यंतम् । अथ रविः शुभैः शुभग्रहैः दृष्टः विलोकितश्चेत्तस्य फलं राजसेवा धनायतिश्च, एवं शत्रुभिः दृष्टो रविश्चेत्कलहं दुःखं जठरनेत्रयोः रुजं चेति फलानि, मित्रदृष्टो रविश्चेज्जयः बंधुलाभश्चेति, पापैः पापग्रहैर्दृष्टो रविश्चेद्रोगितां रुग्णत्वमिति रविफलानि दृष्टिवशाज्ज्ञेयानि ॥ ६४ ॥ ६५ ॥

भाषा-अब सूर्यके दृष्टिका फल कहते हैं सूर्य शुभग्रहकी दृष्टिसे युक्त होवे तो राजसेवा धनप्राप्ति करे. शत्रुग्रहोंकी दृष्टि होवे तो कलह, दुःख नेत्र रोग होवे. मित्रग्रहोंकी दृष्टि होवे तो जय, बंधुलाभ होवे. पापग्रहोंकी दृष्टि होवे तो रोगी होवे ॥ ६४ ॥ ६५ ॥

धनहानिं शशी पापैः शिरोनेत्ररुजं तथा ॥ शत्रुभिः पापकरणं धननाशं गमागमौ ॥६६॥ शुभैररोगतां सौख्यं धनलाभं च बंधुभिः ॥ मित्रलाभं जयं क्षेत्रदेशलाभं करोति हि ॥ ६७ ॥

टीका-अथ दृष्टिवशाच्चंद्रफलान्याह-धनेत्यादिसप्तषष्टिश्लोकपर्यंतम् । शशी चंद्रः पापैर्दृष्टश्चेच्छिरोनेत्ररुजं व्यथां धनहानिं च

करोति शत्रुभिः दृष्टश्चेत्पापकरणं पापाचरणं धननाशं गमागमौ भ्रमणमित्यर्थः । तथा शुभैर्दृष्टश्चेदरोगतां सौख्यं बंधुभिः धनलाभं मित्रलाभं जयं क्षेत्रदेशलाभं च करोतीति ॥ ६६ ॥ ६७ ॥

भाषा–अब चंद्रका फल कहते हैं. चंद्रके ऊपर पापग्रहोंकी दृष्टि होवे तो शिरोरोग; नेत्ररोग, पीडा धनहानि करे. शत्रुग्रहोंकी दृष्टि होवे तो पापकर्म करे. धननाश होवै नित्य भ्रमण करे, शुभग्रहोंकी दृष्टि होवै तो नीरोगीपना, सुख, बंधुसमागम, धनलाभ, मित्रलाभ, जय, क्षेत्र, देशलाभ करे ॥ ६६ ॥६७॥

पापैर्दृष्टः कुजः क्षेत्रधनधान्यादिनाशनम् ॥ शत्रुभिर्बन्धनं रोगं चाहवं दूरवासनम् ॥ ६८ ॥ शुभैस्तु विजयं देशक्षेत्रलाभं सुहृच्छुभम् ॥ मित्रैश्च धनसंसिद्धिं करोति हि न संशयः ॥ ६९ ॥

टीका–अथ दृष्टिवशाद्भौमफलमाह पापैरित्यादिएकोनसप्ततिश्लोकपर्यंतम् । अथ कुजो भौमः पापैर्ग्रहैर्दृष्टो विलोकितः क्षेत्रधनधान्यादिनाशं करोति शत्रुभिर्विलोकितः बंधनं रोगं आहवं युद्धं दूरवासनं प्रवासं च करोति । शुभैर्दृष्टो भौमः विजयं पराक्रमं देशक्षेत्रलाभं सुहृच्छुभं सुहृद्भ्यः कल्याणं करोति मित्रैर्दृष्टश्चेद्धनसंसिद्धिं धनप्राप्तिमित्यर्थः । हि निश्चयेन करोति न संशय इति ॥ ६८ ॥ ६९ ॥

भाषा–अब मंगलका फल कहते हैं. मंगलके ऊपर पापग्रहोंकी दृष्टि होवे तो भूमिधनधान्यादिकका नाश करे. शत्रुग्रहोंकी दृष्टि होवे तो बंधन, रोग, युद्ध, वास करे. शुभग्रहोंकी दृष्टि होवे तो विजय, पराक्रम, देश, भूमि मित्रवर्गसे सुखकरे. मित्रग्रहोंकी दृष्टि होवे तो धनप्राप्ति होवे ॥ ६८ ॥ ६९ ॥

शुभैर्बुधो लिपिज्ञानं विद्यालाभं च कौशलम् ॥ मित्रैर्भूषाधनक्षौमरत्नलाभं च शत्रुभिः ॥ ७० ॥ अतिसारं च दुर्बुद्धिं प्रतीकेषु सदोद्यमम् ॥ पापैर्महाविषादं च कुक्षौ शूलं च वर्द्धते ॥ ७१ ॥

टीका–अथ दृष्टिवशाद्बुधग्रहफलान्याह--शुभैरित्यादिश्लोकद्वयेन । बुधः शुभैर्दृष्टः लिपिविज्ञानं विद्यालाभं कौशलं च करोति मित्रैर्दृष्टो बुधः भूषाधनक्षौमरत्नलाभं करोति शत्रुभिर्दृष्टः अतिसारं रोगं दुर्बुद्धिं प्रतीकेषु गात्रेषु विषये सदा उद्यमम् उद्योगं करोति पापैर्दृष्टश्चेन्महाविषादं अतिखेदं कुक्षौ शूलं च वर्धते ॥ ७० ॥ ७१ ॥

भाषा–अब बुधकी दृष्टिका फल कहते हैं बुधके ऊपर शुभग्रहोंकी दृष्टि होवे तो लिपिज्ञान, विद्यालाभ, कुशलता प्राप्त करे. मित्रग्रहोंकी दृष्टि होवे तो वस्त्रालंकार, रत्न लाभ करे. शत्रुग्रहोंकी दृष्टि होवे तो अतिसाररोग, दुर्बुद्धि सदा उद्योग करे. पापग्रहोंकी दृष्टि होवे तो बहुत खेद कुक्षिमें शूलवृद्धि होवै ॥ ७० ॥ ७१ ॥

गुरुः शुभैस्तु संदृष्टो धर्मकार्योद्यमं सुखम् ॥ जयं
धनायातिर्मित्रैर्दारक्षेत्रादिसंग्रहम् ॥ ७२ ॥ शत्रुभिः
कुष्ठरोगं च त्वग्दोषकलहं रणम् ॥ पापैः पराजयं
बुद्धेः केदारादिवियोजनम् ॥ ७३ ॥

टीका–अथ दृष्टिवशाद्गुरुफलमाह–गुरुरित्यादित्रिसप्ततिश्लोकपर्यंतम् । शुभैः संदृष्टो गुरुः धर्मकार्योद्यमं विहिताचरणोद्योगं सुखं जयं धनायतिं च करोति मित्रैर्दृष्टः दारक्षेत्रादिसंग्रहं करोति शत्रुभिर्दृष्टः कुष्ठरोगं त्वग्दोषं कलहं रणं च करोति पापैर्दृष्टः युद्धे पराजयं केदारादिवियोजनं करोति ॥ ७२ ॥ ७३ ॥

भाषा–अब गुरुकी दृष्टिका फल कहते हैं. गुरुके ऊपर शुभग्रहोंकी दृष्टि होवे तो धर्मकामका उद्योग, सुख, जय, धनप्राप्ति करे. मित्रग्रहोंकी दृष्टि होवे तो स्त्री भूमि आदि पदार्थोंका सग्रह करै. शत्रुग्रहोंकी दृष्टि होवे तो कुष्ठरोग, त्वचारोग, कलह, संग्राम करे ॥ ७२ ॥ ७३ ॥

शुभैः शुक्रः सुखं योषालाभं भूषा धनायातिम् ॥ मित्रैस्तु पट्टबंधादि देशलाभादि चाखिलम् ॥ ७४॥ पापैः पराजयं योषावियोगं धननाशनम् ॥ शत्रुभिर्याप्यरोगं च मूत्रकृच्छ्रादिकं तथा ॥ ७५ ॥

टीका-अथ दृष्टिवशाच्छुक्रफलान्याह-शुभैरित्यादिपंचसप्ततिश्लोकपर्यंतम् । शुभैर्दृष्टः शुक्रः सुखं योषालाभं स्त्रीलाभं भूषाधनायतिं भूषणधनप्राप्तिं करोति मित्रैर्दृष्टः पट्टबंधादि देशलाभादि चाखिलेष्टं करोति पापैर्दृष्टः पराजयं योषावियोगं धननाशं च शत्रुभिर्दृष्टः याप्यरोगं कष्टसाध्यरोगं मूत्रकृच्छ्रादिकं च करोति ॥ ७४ ॥ ७५ ॥

भाषा-अब शुक्रकी दृष्टि फल कहते हैं. शुक्रके ऊपर शुभग्रहोंकी दृष्टि होवै तो सुख स्त्रीलाभ करे. अलंकारकी, धनकी प्राप्ति करे, मित्रग्रहोंकी दृष्टि होवै तो पट्टबंधादि देशलाभ, इष्टप्राप्ति करे. पापग्रहोंकी दृष्टि होवे तो पराजय, स्त्रीवियोग धननाश करै. शत्रुग्रहोंकी दृष्टि होवे तो याप्य कहिये कष्टसाध्य रोग, मूत्रकृच्छ्र रोग करे ॥ ७४ ॥ ७५ ॥

मंदः पापैस्तथा कुक्षिरोगं बंधनकं क्षयम् ॥ शत्रुभिः शत्रुबाधां च पराभवमथामयम् ॥ ७६ ॥

टीका-अथ दृष्टिवशाच्छनिफलान्याह-मंद इति सार्द्धेन । पापैर्दृष्टो मंदः शनिः कुक्षिरोगं बंधनं क्षयं च करोति तथा शत्रुभिर्दृष्टः शत्रुबाधां पराभवं आमयं च करोति शुभैर्दृष्टः अरोगतां मित्रैर्दृष्टः बंधुसमागमं च करोति ॥ ७६ ॥

भाषा-अब शनिकी दृष्टिका फल कहते हैं. शनिके ऊपर पापग्रहोंकी दृष्टि होवे तो कुक्षिरोग बंधन क्षय करे. शत्रुग्रहोंकी दृष्टि होवे तो शत्रुकी बाधा, पराभव, रोग करे. शुभग्रहोंकी दृष्टि होवे तो रोगरहित करे. मित्रग्रहोंकी दृष्टि होवे तो बंधुसमागम करे ॥ ७६ ॥

शुभैररोगतां मित्रैर्दृष्टो बंधुसमागमम् ॥ रवौ स्थानबले
पूर्णे स्वदेशे विद्यया बली ॥७७॥ चंद्रे प्रभुतया
भौमे ग्रामण्येन बुधे सति ॥ श्रौतया विद्यया वाऽऽर्यलिपिलेखनकर्मणा
॥ ७८ ॥ जनैर्धनैरमात्येषु
बुद्ध्या च बलवान्गुरौ ॥ यद्वा स्वदेशराजस्तु कार्येणैव
बली मतः॥७९॥ शुक्रे स्वदेशमुख्यो वा त्वाधिपत्येन
योषिताम् ॥ मंदे भृतकदासानां मुख्यः स्याद्बलवानपि
॥ ८० ॥ उक्तैस्तु पीडितः प्रेष्यः स्थानवीर्योनितेषु
तु ॥ समन्यूनाधिकाद्वीर्याद्दृष्टोत्कर्षात्फलं
वदेत् ॥ ८१ ॥

टीका-अथ स्थानबलवशाद्रव्यादीनां फलान्याह-रवावित्याद्येकाशीतिश्लोकपर्यंतम् । रवौ स्थानबले पूर्णे सति स्वदेशे विद्यया बली भवति । चंद्रे स्थानबले पूर्णे प्रभुतया प्रभुत्वेन बली भवति । भौमे स्थानबले पूर्णे ग्रामण्येन ग्रामे मुख्यत्वेन बली भवति तथा बुधे सति श्रौतया वाऽअथवा आर्यलिपिलेखनकर्मणा जनैः धनैः अमात्येषु च बुद्ध्या बलवान् भवेत् एवं स्थानबले पूर्णे गुरौ सति स्वदेशराजः स्वदेशेऽभिमानः कार्येण कृत्येनैव बली बलवान्मतः तथा भूते शुक्रे तु स्वदेशमुख्यः वा योषितामाधिपत्येन बली भवति तथा बलिनि मंदे सति भृतकदासानां वेतनोपजीविकानां मुख्यः स्यात् तथा शरीरेणापि बलवान्भवति एवं फलानि स्थानबलपूर्णे उक्तानि स्थानवीर्योनितेषु स्थानबलहीनेषु उक्तैः पीडितः उक्तफलवशात्पीडायुक्तः प्रेष्यो दासश्च भवेत् अतः समन्यूनाधिकाद्वीर्यान्न्यूनातिरिक्तबलात् यः दृष्टो विलोकितः उत्कर्षः तस्मान्यूनातिरिक्तं फलं वदेदिति पूर्णस्थानबलविचारः ॥ ७७ ॥ ७८ ॥ ७९॥ ८० ॥ ८१ ॥

भाषा–अब सूर्यादिकोंका स्थानादिक बलसे फलादेश कहते हैं. सूर्य स्थानबलमें पूर्ण होवे तो अपने देशमें विद्यासे बलवान् होवे. चंद्र स्थानबलमें पूर्ण होवे तो प्रभुताईकी पदवी पावे. मंगल स्थानबलमें पूर्ण होवे तो गांवमें प्रभुताईकी पदवीसे बली होवे. बुध स्थानबलमें पूर्ण होवे तो श्रौतविद्यासे, लेखनकर्मसे, बुद्धिके बलसे बलवान् होवे. गुरु स्थानबलमें पूर्ण होवे तो अपने देशमें शोभायमान होवे, कर्म करनेसे बलवान् होवे. शुक्र स्थानबलमें पूर्ण होवे तो अपने देशमें मुख्य होवे, स्त्रियोंके आधिपत्यसे बलवान् होवे. शनि स्थानबलमें पूर्ण होवे तो दासदासीमें और वेतनजीविका करनेवालेमें मुख्य होवे. शरीरसे बलवान् होवे. स्थानबलमें हीनबली ग्रह होवे तो पीडा युक्त दास्यत्व करे. इति स्थानबलविचारः ॥७७॥७८॥७९॥८०॥८१॥

दिग्बलेनाधिके सूर्ये वाणिज्येन धनायतिः ॥ यशश्च
धनवृद्धिश्च चंद्रे तु राजसेवया ॥ ८२ ॥ भौमे तु
सेवया ख्यातिर्वेदाभ्यासेन सर्वदा ॥ बुधे धनायतिः
कृष्या यशः स्याद्बुद्धिमत्तया ॥ ८३ ॥ गुरौ धनायतिस्तेन वीर्येण धनशुभ्रता ॥ राजकार्येण शुक्रे च
वदान्यत्वेन वा यशः ॥ ८४ ॥ मंदे दासाधिपत्येन
धनायतिररिंदमात् ॥ कालायनबलाधिक्ये रवौ भौमे
शनैश्चरे ॥ ८५ ॥ मंत्रोपदेशविधिना पाखंडिपदसंश्रयात् ॥ दासभावेन कृष्णेंदौ कृषितो विद्ययान्यथा
॥ ८६ ॥ गुरौ शुक्रे बुधे पाथोनिधिजे चात्रिसंभवे ॥
विद्याया बाधने संख्याबलदिग्बलवृद्धितः ॥ ८७ ॥
नानाविद्यायतिः प्रोक्ता इति चेष्टाधिकेषु तु ॥ कवि-

द्रवो यथापूर्वं विशेषादेव निर्णयः ॥ ८८ ॥ बलिष्ठो दायरश्म्युक्तफलं सर्वं करोति वै ॥ न्यूनाधिकेनुपातेन फलमेवं विचिंत्यताम् ॥ ८९ ॥

टीका-अथ कालायने चेष्टाबलेष्वन्यतमाधिके ग्रहाणां फलान्याह-दिग्बलेनेत्यादिनवाशीतिश्लोकपर्यन्तम् । अथ सूर्ये दिग्बलेन अधिके इतरबलाधिक्ये सति वाणिज्येन वणिक्कर्मणा धनायतिः यशः धनवृद्धिश्चेति फलानि चंद्रे तथाभूते सति राजसेवया धनवृद्धिः भौमे दिग्बलाधिक्ये सति सेवया ख्यातिः प्रसिद्धिः सर्वदा वेदाभ्यासेन च प्रसिद्धिः वदान्यत्वेन सर्वदेत्यपि पाठः तत्पक्षे दातृत्वेनेत्यर्थः । बुधे तथाभूते कृष्या कृषिकर्मणा धनायतिः बुद्धिमत्तया बुधिमतो भावः बुद्धिमत्ता तया यशः कीर्तिः स्यात् गुरौ दिग्बलाधिक्ये धनायतिः तेन वीर्येण द्रव्यबलेन राजकार्येण धनशुभ्रता संपत्प्रकाश इत्यर्थः । शुक्रे दिग्बलाधिध्ये वदान्यत्वेन दातृतया यशः कीर्तिः मंदे तथाभूते सति दासाधिपत्येन दासश्रेष्ठतयाऽरिंदमाच्छूराद्धनायतिः एवं सप्तग्रहाणां दिग्बलाधिक्यफलमुक्त्वा कालबलाधिक्येऽयनबलाधिक्ये च फलांतरमाह रवौ भौमे शनैश्चरे च मंत्रोपदेशविधिना तथा पाखंडिपदसंश्रयाद्दासभावेन च यथासंख्यं वर्तनं कृष्णेंदौ कृष्णचंद्रे कालायनबलाधिक्ये सति कृषितः कृषिकर्मणाऽन्यथा विद्यया वा वर्तनं गुरौ शुक्रे बुधे च तथा पाथोनिधिजे शुक्लचंद्रे अत्रिसंभवे इति तस्यैव विशेषणं विद्यायाः वा धने धनविषये च संख्याबलदिग्बलयोः वृद्ध्या आधिक्येन लक्षणं ज्ञेयम् एवं चेष्टादिकेषु चेष्टाबलाधिक्येषु सूर्यादिग्रहेषु सत्सु नानाविधायतिः प्रोक्ता कथिता कविद्रवः शुक्रबुधगुरवः यथापूर्वं पूर्वोक्तं फलं विशेषदृष्ट्या निर्णयेदित्यर्थः तदेव विशदयति कविद्रवः शुक्रबुधगुरवः बलिष्ठाश्चेत् दायोक्तं रश्म्युक्तं

च फलं सर्वं करोति कुर्वंतीत्यर्थः । वेति निश्चयेन न्यूनाधिके बले तु अनुपातेन एवं फलं विचिंत्यतां विचार्यतामिति ॥ ८२ ॥ ८३ ॥ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥

भाषा-अब सूर्यादिकोंका दिग्बलादिकोंका फल कहते हैं. सूर्य दिग्बलमें अधिक होवें तो वणिग्व्यापारसे धनप्राप्ति, यशप्राप्ति, धनकी वृद्धि होवे, चंद्र दिग्बलमें अधिक होवे तो राजसेवासे वृद्धि होवें. मंगल दिग्बलमें अधिक होवे तो सेवासे, वेदाभ्याससे प्रसिद्ध होवे. बुध दिग्बलमें अधिक होवे तो बुद्धिसे यश कीर्ति होवे. गुरु दिग्बलमें अधिक होवे तो धनप्राप्तिसें प्रकाशित यश होवे. शुक्र दिग्बलमें अधिक होवे तो दानशीलतासे यश कीर्ति मिले, शनि दिग्बलमें अधिक होवे तो श्रेष्ठतासे, शूरतासे, धनप्राप्ति होवे. अब कालबलाधिक्य और अयनबलाधिक्यका फल कहते हैं. सू० मं० श० काल और अयनबलमें अधिक होवें तो मंत्रोपदेशसे पाखंड करनेसें दास्यत्व करके निर्वाह होवे, कृष्णपक्षका चंद्र काल अयन बलमें अधिक होवे तो खेतीसे विद्यासे निर्वाह होवे. गुरु, शुक्र, बुध, शुक्लपक्षका चंद्र काल अयनबलमें अधिक होवे तो विद्यासे, धनसे निर्वाह होवे. अब चेष्टाबलाधिक्यका फल कहते हैं सूर्यादिग्रह चेष्टाबलमें अधिक होवें तो नानाप्रकारकी विद्यासे धनप्राप्ति होवे. ऐसा निश्चय करके जानना ॥ ८२ ॥ ८३ ॥ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥

सौम्येष्विष्टफलाधिकेषु नितरां श्रीमान्सुशीलो गुणी
मित्रेष्वेवमतीव धर्मनिरतो दाता सुखी सत्त्ववान् ॥
पापेष्वेवमथापि पापनिरतः शत्रुष्वथो शत्रुभिर्वीर्ये-
णाथ पराजयो जय इमान्पर्यायतः प्राप्नुयात् ॥ ९० ॥

टीका-अथेष्टबलाधिक्यवशात्फलान्याह-सोम्योति । इष्टफलाधिकेषु सोम्येषु ग्रहेषु सत्सु नितरां श्रीमान् मित्रेषु सुशीलः

अतीव धर्मनिरतः एवं दाता सुखी सत्त्वावांश्च भवेत् एवं पापेषु कष्टफलाधिकेषु सत्सु शत्रुषु पापनिरतो भवेत् अथो शत्रुभिः वीर्येण पराजयः अथवा जयः इमान् श्रीमत्त्वादिफलप्रकारान्पर्यायतः ग्रहस्थित्यनुसारेण प्राप्नुयात् ॥ ९० ॥

भाषा-अब इष्टकष्टबलाधिक्यका फल कहते हैं. शुभग्रह बुध, गुरु, शुक्र, चन्द्र इष्टबलमें अधिक होवें तो अत्यंत लक्ष्मीवान् होवे. मित्रोंके ऊपर सुशीलता, धर्मरत, दानशील, सुखी, बलवान् होवे. पापग्रह सूर्य, मंगल, शनि इष्टबलमें अधिक होवें तो शत्रुओंके उपर पापबुद्धि होवे पराजय होवे॥ ९०॥

अधिकेष्वशुभेष्वेवमनिष्टाख्यफलानि तु ॥ ९१ ॥
व्याधिभिः कलहैर्मित्रैः पीड्यते नात्र संशयः ॥ एवं
पापेषु दुश्चेष्टः पातकी भवति ध्रुवम् ॥ ९२ ॥ शत्रुष्वे
वं सदा रोगी मित्रैर्बन्धुविवर्जितः ॥ सर्वद्वेष्टृबलाधिक्ये
सर्वत्राफलदो ग्रहः ॥ ९३ ॥ शुभेषु च
फलेष्वेव स्पष्टमेव फलप्रदः ॥ अत्यनिष्टफलः
खेटः शुभेषु त्वफलप्रदः॥९४॥ अनिष्टफलदोऽन्येषु
खेटः सर्वत्र सर्वदा ॥ स्वोच्चादिस्थानषट्स्थाः स्युस्तथा
दिग्वर्गगा अपि ॥ ९५ ॥ क्षेत्रपुत्रकलत्रादिधनधान्यसमृद्धिदाः
॥ यदि मित्रादिवर्गस्था धनधान्याविवर्द्धनाः
॥ ९६ ॥

टीका-अथ फलांतराण्याह-अधिकेष्विति षण्णवतिश्लोकपर्यंतम् । अशुभेषु पापग्रहेषु सत्सु अनिष्टाख्यफलानि भवंति तानि तु व्याधिभिः ज्वरादिभिः कलहैः मित्रैः पीड्यते एवं पापेषु ग्रहेषु दुश्चेष्टः दुष्टा

चेष्टा यस्य स पातकी ध्रुवं भवाति। एवं शत्रुषु शत्रुग्रहेषु सदा रोगी बंधुभिः मित्रैश्च वर्जितो रहितः स्यात् सर्वद्वेष्टबलाधिक्ये साति स ग्रहः सर्वत्र अफलदः शुभेषु अधिकेषु फलदेषु सत्सु स्पष्टं फलप्रदो भवति तथा अत्यनिष्टफलः खेटः शुभेषु ग्रहेषु अफलप्रदः फलदो न भवति अन्येषु पापेषु अनिष्टफलदो भवाति एवं सर्वत्र सर्वदा फलविचारः कर्तव्यः। अथ स्वोच्चादिस्थानषट्स्थाः स्वोच्चस्वत्रिकोणस्वामित्रस्वाधिमित्रस्वोदासीनक्षेत्रस्थाः तथा स्वादिग्वर्गगाः स्वकीयदशवर्गस्थाः आपि क्षेत्रपुत्रकलत्रादिदातारः धनधान्यसमृद्धिदाश्च भवंति यादि मित्रादिवर्गस्थाः तर्ह्यापि धनधान्यविवर्धनाः भवंति इति ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥

भाषा–अब फलांतर कहते हैं. पापग्रह बलाधिक्यमें होवे तो ज्वरपीडित, दुश्चेष्ट, पातकी होवै. शत्रुग्रहमें होवे तो सदा रोगी, मित्रवर्ग बंधुवर्गरहित होवै, सर्वद्वेषी ग्रहबलाधिक्य होवै तो वो ग्रह निष्फल जानना. और स्वोच्च, मूल, त्रिकोण, स्वक्षेत्र, मित्रक्षेत्र, अधिमित्रक्षेत्र उदासीन क्षेत्रस्थ ग्रह अथवा अपने दश वर्गमें जो ग्रह हैं वे सब क्षेत्र, स्त्री, पुत्र, धन, धान्यकी समृद्धि करनेवाले होते हैं ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥

व्याधिदुर्गतिदा प्रोक्ता दशारम्भे तु शतिगोः॥स्वोच्चा-
दि संस्थिता दायप्रारंभे शुभदा दशा॥९७॥ अन्यथा-
ऽशुभदा प्रोक्ता प्रारंभे ज्योतिषां दशा ॥ केंद्रधूम्रगताः
खेटा दशायां शुभदाः सदा ॥ ९८ ॥ द्रव्यकर्मगुणा
यस्य स्वभावाः कथिताः पुरा ॥ ते सर्वे स्वदशाकाले
योज्या भावदृगादिषु ॥ ९९ ॥ भावदृष्टिबलेष्टानि
फलानि कथितानि च ॥ भावाध्यायोक्तरव्यादिफ-
लान्यत्रैव योजयेत् ॥ १०० ॥

टीका-अथ दशाविचारः-व्याधीत्यादिशतश्लोकपर्यंतम् । शीतगोश्चंद्रस्य दशा आरंभे व्याधिदुर्गतिदा प्रोक्ता स्वोच्चादिसंस्थितानां ग्रहाणां दशा प्रारंभे शुभदा भवति अन्यथा स्वोच्चाद्यन्यस्थानस्थानां ज्योतिषां ग्रहाणां दशा प्रारंभेऽशुभदा अनिष्टा ज्ञेया । केंद्रधूम्रगताः केन्द्रधूमस्थानस्थिताः दशायां सदा संपूर्णदशायां शुभदा भवंति । अथ ग्रहाणां द्रव्याणि कर्माणि गुणाश्च यस्य यः स्वभावः स च एते विषयाः पुरा पूर्वार्द्धे कथिताः उक्ताः ते सर्वे स्वस्वदशाकाले योज्याः तथा भावदृष्ट्यादिविषयफलेष्वपि योज्याः तथा भावफलानि दृष्टिफलानि षड्बलफलानि इष्टकष्टफलानि यानि पुरा कथितानि भावाध्यायोक्तरव्यादिफलान्यपि अत्रैव दशाकाले एवं योजयेदिति ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥

भाषा-अब दशाका फल कहते हैं, चंद्रकी दशा प्रारंभमें व्याधि और दुर्गतिको देनेवाली है उच्चादि छः स्थानोंमें बैठेहुए जो ग्रह हैं उनकी दशा प्रारंभमें शुभफल देनेवाली है उच्चादि छः स्थान विना जो अन्य स्थानमें बैठे हुवे ग्रह हैं उनकी दशा प्रारंभमें अनिष्ट फल देनेवाली है. केंद्रधूम्रस्थानगत जो ग्रह हैं उनकी दशा संपूर्ण कालमें फल देनेवाली है और ग्रहोंके द्रव्य, कर्म, गुण, स्वभाव यह सब पूर्वार्धमें कहे हैं वे सबोंकी अपनी अपनी दशाके कालमें फलकी योजना करनी. और भावदृष्टि षड्बल इष्टकष्टबल जो पहिले केहैं उनका भी फल दशाकालमें जानना ॥९७॥९८॥९९॥१००॥

आदौ बलफलं प्रोक्तं ततो दृष्टिफलं स्मृतम् ॥ ततो भावफलं प्रोक्तमिष्टानिष्टफलावहम् ॥१०१॥ चेष्टाबलफलं चादौ स्थानवीर्यं ततो भवेत् ॥ दिग्बलं च ततः प्रोक्तं कालायनबले ततः ॥ १०२ ॥

इति श्रीबृहत्पाराशरहोरायामुत्तरभागे अब्दचर्यादिफलवर्णनं नाम पंचदशोऽध्यायः ॥ १५ ॥

टीका-मुख्यत्वेन बलग्रहाणामनुक्रममाह-आदाविति द्वाभ्याम् । बलविचारे आदौ प्रथमतः बलफलं निसर्गबलफलं प्रोक्तं कथितम् एतन्मुख्यं ततः दृष्टिफलं स्मृतं ततो भावफलं ततः इष्टानिष्टफलं ततः चेष्टाबलफलं ततः स्थानबलं ततः कालबलं ततः अयनबलं चेति क्रमेण बलविचारः कर्तव्य इति ॥ १०१ ॥ १०२ ॥ पाराशरागाधवारिनिधिनिर्मंथनं मया ॥ कृत्वा यथामति कृता टीका पंचदशाह्वये ॥ १ ॥ इति श्रीबृहत्पाराशरहोरायामुत्तरार्द्धे श्रीमद्ध्यङ्कन्वयवेदशास्त्राद्यनवद्यविद्याविद्योतितदिङ्मण्डलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचितायां सुबोधिनीटीकायामब्दचर्याफलवर्णनं नाम पंचदशोऽध्यायः ॥ १५ ॥

भाषा-अब बलोंका मुख्यत्वसे क्रम कहते हैं. पहिले निसर्गबल मुख्य कहा है, तदनंतर दृष्टिबल, तदनंतर भावबल, मुख्य, उससे इष्टाऽनिष्टबल मुख्य, उससे चेष्टाबल मुख्य, उससे स्थानबल मुख्य, उससे कालबल मुख्य, उससे अयनबल मुख्य, ऐसा यह क्रमसे बलविचार जानना ॥ १०१ ॥ १०२ ॥

इति बृ० पंचदशोऽध्यायः ॥ १५ ॥

भावांशैः समतां गतः खलु खगः पूर्णं विधत्ते फलं
संधिस्थो न फलप्रदोऽन्तरगतैस्त्रैराशिकेनैव च ॥ भाव-
न्यूनमथ ग्रहस्य गुणयेदंशादिकं चार्णवैर्हृत्वा
चास्य चसंधितोऽधिकमथो प्रोक्तं फलं भावजम् ॥ १ ॥
ऊर्ध्वमुखो रवियुक्तो राशिसमेतस्त्वधोमुखो ज्ञेयः ॥
तिर्यङ्मुखोऽखिलयुतो राशिर्भावाः परेऽप्येवम् ॥ २ ॥

टीका-गणेशः पातु मां देवो यथार्थज्ञानकारकैः ॥ करफूत्कारसंभूतैः शीकरैस्तापहारकैः ॥ १ ॥ अध्याये षोडशेऽस्मिंस्तु भावसं-

स्थग्रहोद्भवम् ॥ संध्यादितारतम्येन फलमाह पराशरः ॥ २ ॥ अथ परमऋषिः पराशरः संध्यादिविचारेण भावगतफलान्याह–भावांशैरिति । भावांशैः भावस्था ये वर्तमानांशास्तैः समतां गतः तुल्यतां प्राप्तः ग्रहः पूर्णफलं विधत्ते खलु यथोक्तमिति शेषः । संधिस्थः भावसंधिवर्तमानः ग्रहः फलप्रदो न भवति विफलः इत्यर्थः । अंतरगतैः भावमध्यवर्तमानैः ग्रहैः त्रैराशिकेन अनुपातेन फलं ज्ञेयम् । अथ ग्रहस्य अंशादिकं यदि भावन्यूनं भावांशाल्पं तर्हि तदर्णवैः चतुर्भिर्गुणयेत् । यदि अस्य ग्रहस्य भावांशादंशादिकमधिकं भवेत्तर्हि भावसंधितः हित्वा वर्जयित्वा शेषं भावजं फलं प्रोक्तं कथितमिति ॥ १ ॥ अथ ग्रहयोगेन भावलक्षणमाह–ऊर्ध्वमुख इति । रवियुक्तो राशिः ऊर्ध्वमुखः राशियुक्तः ग्रहरहितः अधोमुखो ज्ञेयः अखिलयुतः चंद्रादियुक्तः तिर्यङ्मुखो राशिर्भवति एवं परे सर्वे भावाः ज्ञेया इति ॥ २ ॥

भाषा–अब भावफल कहते हैं जो ग्रह जिस भावमें बैठा है वो भावके जो अशं हैं वो अंशके तुल्य ग्रहका अंश होवे तो वो ग्रह उक्तप्रमाणसे संपूर्ण फल देताहै और जो संधिस्थ ग्रह है वो फल नहीं देता विफल है; भावके मध्यमें ग्रह होवे तो अनुपातसे फल जानना. भावांशसे ग्रहांश कमी होवे तो ४ से गुणन करना. वो भावफल आवे और जो कभी ग्रहके अंश भावांशसे अधिक होवें तो भावसंधिमेंसे हीन करके शेष भावफल जानना ॥ १ ॥ अब भावका विशेष फल कहते हैं. जो भाव सूर्ययुक्त होवे वो ऊर्ध्वमुख जानना. ग्रहरहित होवे वो भाव अधोमुख जानना. चंद्रादिग्रहसे युक्त होवे तो तिर्यङ्मुख स्वभाव जानना ॥ २ ॥

अन्यजातीययोगे तु तत्तद्भावफलं वदेत् ॥ स्वजातीयेषु योगेषु त्रिंशाद्यंशा भवंत्युत ॥ ३ ॥

टीका–अथैषां तिर्यङ्मुखादीनां भावानां फलकथनरीतिमाह–अन्येति । अन्यजातीययोगे भावेषु ग्रहादिसंभूतान्यजातीययोगे

अमुकभावेऽमुकग्रहादिसंभूतो योगः अतः अस्य भावस्यामुकं सदसत्फलमिति भावदृष्ट्यैव फलं कथयेत् स्वजातीययोगेषु तु नाम अन्यजातीयरोगरा केवलं स्वजातीयाः भावजातीया एव योगाश्चेत्तत्र फलं त्रिंशाद्या येंशास्ते एव फलं फलभूता भवंतीति ॥ ३ ॥

भाषा—अब तिर्यङ्मुखादिभावका फल कहते हैं इस भावका यह शुभाऽशुभ फल है सो भावदृष्टिसे कहना. और जो भावके स्वजातीय शुभाशुभ योग हैं, उनका फल तीस अंशरूप है ॥ ३ ॥

तत्त्वमाकृतिरेकाक्षिच्छंदस्तत्त्वं चतुस्त्रयः ॥ एकोनविंशतिच्छन्दो नवाक्षी षट्ट्त्रयस्तथा ॥४ ॥

टीका—अथ भावस्थानांकसंख्या आह—तत्त्वेति सार्धेन । तनुभावे स्थानसंख्यातत्त्वम् २५, धनभावे आकृतिः २२, सहजे एकाक्षि २१, सुहृदि छंदः २६, सुते तत्त्वं २५, रिपौ चतुस्त्रयः ३४, जायाभावे एकोनविंशतिः १९, मृत्यौ छंदः २६, धर्मे नवाक्षी २९, कर्मणि षट्त्रयः ३६, आये वेदेषवः ५४, व्यये नृपाः १६, एताः स्थाने स्थानविषये भावानां संख्याः क्रमात्प्रकीर्तिताः इति ॥ ४ ॥

भाषा—अब भावके स्थानांक कहते हैं. तनुभावके ३१, धनभावके २२, सहजके २१, सुखभावके २६, सुतभावके २५, शत्रुभावके ३४, स्त्रीभावके १९, मृत्युभावके २६, धर्मभावके २९, दशमभावके ३६, ग्यारहवें भावके ५४ बारहवें भावके १६ यह क्रमसे जानना ॥ ४ ॥

वेदेषवो नृपाः स्थाने भावसंख्याः प्रकीर्तिताः ॥
एकात्रिंशत्त्रयास्त्रिंशद्धानि त्रिंशत्तथैव च ॥ ५ ॥
एकात्रिंशद्विनेत्रे च मुनिरामाः खपावकाः ॥ भानि
त्रिंशातिरेकद्वौ खवेदाः करणस्य तु ॥ ६ ॥

टीका-अथ भावेषु करणांकसंख्या आह-एकत्रिंशदिति अर्धसहितेन। तनौ करणांकसंख्या एकत्रिंशत् ३१, धने त्रयस्त्रिंशत् ३३, सहजे भानि नक्षत्राणि २७, सुहृदि त्रिंशत् ३०, सुते एकत्रिंशत् ३१, रिपौ द्विनेत्रे २२, जायायां मुनिरामाः ३७, मृत्यौ खपावकाः ३०, धर्मे भानि २७, कर्माणि विंशतिः २०, आये एकद्वौ २१, व्यये खवेदाः ४०, एवं भावकरणस्य संख्या ज्ञेया इति ॥ ५ ॥ ६ ॥

भाषा-अब भावके करणांक कहते हैं. तनुभावके ३१, धनभावके ३३, सहजभावके २७, सुखभावके ३०, सुतभावके ३१, शत्रुभावके २२, स्त्रीभावके ३७, मृत्युभावके ३०, धर्मभावके २७, दशमभावके २०, ग्यारहवें भावके २१, व्ययभावके ४०, यह १२ बारह भावोंके करणांक जानना ॥ ५ ॥ ६ ॥

विषमायां क्रमादोजे युग्मे स्यातां शुभाशुभे ॥
समायां भवतस्तद्वत्पापसौम्यफले क्रमात् ॥ ७ ॥

टीका-अथोक्तस्थानकरणानां विषमसमसंख्यया क्रमाच्छुभाऽशुभे आह-विषमायामिति। ओजे राशौ विषमायां स्थानविषमसंख्यायां तथा करणसमसंख्यायां क्रमाच्छुभाशुभे फले ज्ञेये एवं युग्मे समे राशौ समायां स्थानसमसंख्यायाम् अर्थाद्युग्मराशौ करणविषमसंख्यायां च क्रमात्पापसौम्यफले अशुभशुभफले ज्ञेये इति ॥ ७ ॥

भाषा-अब स्थानकरणके सम विषम संख्याके क्रमसे शुभाशुभ फल कहते हैं. विषमराशिमें स्थानसंख्या विषम होवे तो शुभफलदायक है. और समराशिमें स्थानसंख्या सम होवे तो अशुभफलदायक है. और विषम राशिमें करणसंख्या सम होव तो अशुभफलदायक है. विषम करणसंख्या होवे तो शुभफलदायक है ॥ ७ ॥

ओजे व्याधिः समे हानिर्यावत्तु दशकं भवेत् ॥ परतः पंचकं चौजे समे व्याधिरथान्यथा ॥ ८ ॥

टीका–अथ विषमसमराशिषु स्थानकरणसंख्यया व्याधिहानी आह–ओजे इति सार्धेन । ओजे विषमराशौ यावत्तु दशकं भवेत् स्थानकरणानां दशसंख्यापर्यंतं व्याधिर्नाशः फलं समे राशौ दशसंख्यापर्यंतं हानिः फलं ज्ञेयं ततः परतः दशसंख्योर्ध्वं पंचसंख्यापर्यंतम् ओजे समे च राशौ व्याधिफलं अथ परतः पंचदशसंख्यामारभ्य यावद्दशकं भवेत्पंचविंशतिसंख्यापर्यंतमित्यर्थः प्राग्वद्व्याधिहानी ओजसमे ज्ञेये ततः परतस्तद्वदेव फलं वदेदिति ॥ ८ ॥

भाषा–विषमराशिमें दशमसंख्यापर्यंत स्थानकरण संख्या होवे तो व्याधिका नाश होवे. यह फल जानना. समराशिमें स्थानकरणकी दश संख्यापर्यंत हानिफल जानना. उस दशके आगे पांच संख्यापर्यंत व्याधि होवे, पंदरहके ऊपर पच्चीसतक समराशिमें व्याधिफल, विषमराशिमें हानिफल जानना ॥ ८ ॥

यावत्तु दशक प्रागवत्ततस्तद्वत्फलं वदेत् ॥ शिरोरोगाक्षिरोगाश्च रक्तासृक्कामलाज्वरः ॥ ग्रहणी शीतको मेहप्लीहो गुल्मलतः क्रमात् ॥ ९ ॥ रत्नैर्धान्यैश्च हेमैश्च गोभिः क्षेत्रैश्च राजभिः ॥ दासैश्च महिषैरुष्ट्रगजाश्वैर्वृद्धयः स्मृताः ॥ १० ॥

टीका–अथ पंचविंशतिमारभ्य दशपर्यंतं फलान्योजे आह–शिर इति । शिरोरोगः १ आक्षिरोगः २ रक्तासृक् ३ कामला ४ ज्वरः ५ ग्रहणी ६ शीतकः ७ मेहः ८ प्लीहः ९ गुल्मलतः १० एते क्रमाज्ज्ञेयाः एषां स्वरूपाणि वैद्यके इति ॥ ९ ॥ अथ पंचविंशतिमारभ्य दशपर्यंतं

समराशौ फलान्याह–रत्नैरिति । रत्नैः १ धान्यैः २ हैमैः हेमभिः सुवर्णैरित्यर्थः ३ गोभिः ४ क्षेत्रैः ५ राजभिः ६ दासैः ७ महिषैः ८ उष्ट्रैः ९ गजाश्वैः १० वृद्धयः स्मृताः भवंतीति ॥ १० ॥

भाषा–अब विषमराशिमें छब्बीस स्थानकरणसंख्या होवे तो शिरोरोग, सत्ताईस संख्या होवे तो नेत्ररोग, अट्ठाईस संख्या होवे तो रक्तविकार, उनतीस संख्या होवे तो कामला हलीमक रोग होवे, तीस संख्या होवे तो ज्वररोग, एकतीस संख्या होवे तो संग्रहणी रोग, बत्तीस संख्या होवे तो शीतरोग, तैंतीस संख्या होवे तो प्रमेह रोग, चौंतीस संख्या होवे तो प्लीह रोग, पैंतीस संख्या होवे तो गुल्मलत रोग होवे ॥ ९ ॥ अब समराशिमें स्थानकरणसंख्या छत्तीस होवे तो रत्नवृद्धि जानना. सैंतीस संख्या होवे तो धान्यवृद्धि जानना. अडतीस संख्या होवे तो सुवर्णवृद्धि. उनचालीस संख्या होवे तो गोपशुकी वृद्धि जानना. चालीस संख्या होवे तो क्षेत्रभूमि वृद्धि जानना. एकचालीस संख्या होवे तो राजसे वृद्धि जानना. बयालीस संख्या होवे तो दाससे वृद्धि जानना. तियालीस संख्या होवे तो महिष्यादि वृद्धि जानना. चौवालीस संख्या होवे तो उष्ट्रादिक वृद्धि जानना. पैंतालीस संख्या होवे तो गजाश्ववृद्धि जानना ॥ १० ॥

जात्या देशस्य कालस्य स्वानुरूपं फलं वदेत् ॥
तत्तद्भावानुसंज्ञं च ग्रहाद्भावात्फलं वदेत् ॥ ११ ॥
उच्चादिषु नवस्वेव कलांशादिषु यत्फलम् ॥ भाग्याध्यायोक्तमप्यत्र योजयेत्तु विशेषतः ॥ १२ ॥

इति श्रीबृहत्पाराशरहोरायामुत्तरभागे मासचर्याफलवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥

टीका–अथ फलानि वक्तुं जात्यादितारतम्येन फलान्याह–जात्येति । यानि अस्मिञ्छास्त्रे फलान्युक्तानि तानि जातिदेशका-

लतारतम्येन जात्यादिस्वानुरूपं यथा भवति तथा फलं वदेदिति ॥११॥ पुनश्च फलविचारमाह उच्चेति । अथ उच्चादिषु उच्चत्रिकोणादिस्थानस्थितेषु ग्रहेषु तथा कलांशादिषु स्थितेषु ग्रहेषु यदुक्तं फलं तथा भाग्याध्यायोक्तमपि तत्सर्वमत्र मासचर्याफलविचारे विशेषतः योजयेदिति ॥ १२ ॥ एवं षोडशकेऽध्याये गणेशप्रीतये मया ॥ यथामति कृता टीका संशोध्या विबुधैर्मुदा ॥ १ ॥ इति बृ० उत्तरभागे जटाशंकरसूनुज्योतिर्विच्छ्रीधरेण विरचिता० सु० टीकायां मासचर्याफलवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥

भाषा–यह स्थानकरणसंख्याका फल जो कहा सो सब जाति, देश, कालतारतम्यतासे अपने स्वरूपसदृश फल जानना ॥ ११ ॥ पूर्वोक्त जो उच्चादिस्थानगत फल और कलांशादिस्थित ग्रहफल और भाग्याध्यायोक्त सर्व फल यह सब स्थानकरणफलविचारमें योजना करना ॥ १२ ॥

इति बृ० उत्तरभागे भाषाटीकायां षोडशोऽध्यायः ॥ १६ ॥

अर्केन्दुगुरवः शुक्रः क्रमादन्ये बलक्रमात् ॥ भवंति स्थानदाः खेटाश्चत्वारश्च यदैकदा ॥ १ ॥ धनादीनां यथा लब्धिः पंच चेत्पूज्यतायुतः ॥ आरोग्यं वस्त्रलाभश्च षट्सु पट्टस्य बन्धनम् ॥ २ ॥ सप्त चेद्राज्यलाभः स्यादेवं करणदा यदि ॥ धनहानिस्ततो व्याधिस्ततस्तु विपदादयः ॥ ३ ॥ सप्तभिर्मरणं प्रोक्तमक्षाभावे मृतिर्भवेत् ॥ तत्र तिष्ठति चेत्खेटे त्वन्यास्मिन्यदि वामतः ॥ ४ ॥ उच्चसंख्याधिका अंशाश्चंद्रस्य स्थानदाः परे ॥ शुभाख्याः शुभदाः प्रोक्ता राशिनात्र क्रमात्फलम् ॥ ५ ॥

टीका—ध्यात्वा गणेशपादाब्जे व्याख्येयं क्रियते मया ॥ अध्याये सप्तदशके यथामति सुबोधिनी ॥ १ ॥ अथ स्थानदखेटानां नैकत्र सहवासतः ॥ फलानि तु विचित्राणि ऋषिः पाराशरोऽब्रवीत् ॥ २ ॥ अथ भगवान्महर्षिः पराशरः ग्रहयोगफलानि कथयन्स्वशास्त्रमुपसहरति । तत्र स्थानदग्रहवशात्फलान्याह—अर्केत्यादिपंचभिः । अथार्केन्दुगुरवः शुक्रः रविचंद्रगुरुशुक्राः क्रमादथ वाऽन्ये भौमबुधशनयः एते बलक्रमात् निसर्गबलक्रमतः चत्वारोपि यदा एकदैव स्थानदाः स्थानप्रदा भवंति तदा धनादीनां यथावल्लब्धिः प्राप्तिः स्यात् पंचमे स्थानदे सति पूज्यतायुतः तथाऽऽरोग्यं वस्त्रलाभश्च स्यात् षट्सु स्थानदेषु ग्रहेषु सत्सु पट्टस्य बंधनं पट्टाभिषेकः स्यात् सप्त ग्रहाः स्थानदाश्चेत् राज्यलाभः स्यादिति स्थानफलानि । अथ एवंप्रकारेण यदि करणदातारः तर्हि चतुर्षु धनहानिः पंचसु व्याधिः षट्सु विपदादयः सप्तभिः करणदैः मरणं प्रोक्त तथा अक्षाभावे केवलं करणाभावे मृतिर्भवेत् तत्र करणाभावस्थाने यदि वामतः अन्यस्मिन्खेटे तिष्ठति न मृतिः अथ चंद्रस्य उच्चसंख्याधिका अंशाः ० । ३ । एतदधिकाः चेद्ग्रहा स्थानदाः स्थानफलदाः भवंति परेऽन्ये शुभाख्याः शुभसंज्ञकाः एते सर्वे शुभदाः प्रोक्ताः अत्र क्रमाद्राशीनां फलं प्रोक्तं भाववदिति ध्वनिः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

भाषा—अब स्थानादिबलसे ग्रहोंका फल कहते हैं. सू० चं० गु० शु० और मं० बु० श० यह स्थानप्रद एकही समय होवें तो धनप्राप्ति होवे. पांचवें स्थानद होवें तो पूज्य होवे. आरोग्य वस्त्रलाभ होवे. स्थानद छः ग्रह होवें तो पट्टाभिषेक होवे. स्थानद सात ग्रह होवें तो राज्यलाभ होवे. अब करणफल कहते हैं. करणद ग्रह चार होवें तो धनहानि. पांच होवें तो व्याधि छः होवें तो विपत्ति. सात होवें तो मरण फल जानना. करणका अभाव

होवे तोभी मृत्यु होवे. अन्य ग्रह होवें तो मृत्यु न होवे. चंद्रका उच्चांश० । ३ हैं. इससे ग्रह अधिक होवें तो स्थानफलदायक ग्रह जानना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

होराशास्त्रमिदं सर्वं भाषितं तव सुव्रत ॥ पुण्यं यशस्यं धन्यं च त्रिकालज्ञानकारणम् ॥ ६ ॥ विना मनुतपस्ये च शास्त्रज्ञानेन केवलम् ॥ हस्तामलकवत्सर्वं जगतां लोकयेत्फलम् ॥ ७ ॥ पुत्राय शिष्याय च धीमते च तपस्विने मंत्रविदे च दात्रे ॥ दद्यादिमं शास्त्रमहासमुद्रं यथेव शम्भुः शिशवे पयोधिम् ॥ ८ ॥ बुद्धिहीनाय दाम्भाय दांभिकाय त्वमार्षिणे ॥ न दद्याद्यदि दद्याच्चेद्विद्या स्वस्य विनश्यति ॥ ९ ॥ एवं ते कथितं शास्त्रं त्वयि स्नेहाद्द्विजोत्तम ॥ जातकांशं विद्यांशं किं भूयस्त्वं श्रोतुमिच्छसि ॥ १० ॥

इति बृ० उ० भागे दिनचर्यादिफलवर्णनं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

टीका–अथोक्तशास्त्रस्य फलानि कथयन्नुपसंहरति–होरेति पंचभिः । हे सुव्रत ! मैत्रेय इदं सर्वं होराशास्त्रं तव मया भाषितं कथितम् एतत्पुण्यं पुण्यकारकं यशस्यं यशस्करं धन्यं धन्यत्वसंपादकम् त्रिकालज्ञानकरणं भूतभविष्यद्वर्तमानज्ञानकारकं विना मनुतपस्ये मंत्रजप्यातिरेकेणापि केवलमेतच्छास्त्रज्ञानेनैव सर्वं जगद्धस्तामलकवत्करगृहीतामलकवत्सर्वं फलं लोकयेद्विलोकयेत् एतादृशमिदं शास्त्रं पुत्राय शिष्याय धीमते बुद्धिमते तपस्विने मंत्रविदे दात्रे वा

दद्यात् इमं शास्त्ररूपं महासमुद्रं अगाधमित्यर्थः । बुद्धिहीनाय दंभवते दंभकराय वाऽमर्षिणे क्रोधशालिने च न दद्यात् एतद्दोषरहिताय शिशवेऽपि दद्यात् । अत्र दृष्टांतमाह । यथा शंभुः तपस्विने शिशवे उपमन्यवे पयोधिमदात् । एवं यदि दुष्टाय दद्याच्चेदियं विद्या स्वस्य वक्तुः विनश्यति हीयते हे द्विजोत्तम ! ब्राह्मणश्रेष्ठ ! त्वयि स्नेहादेवं शास्त्रं ते कथितं अनंतरं जातकांशं विद्यांशं जातकांशभूतांशं भूयः किं वा त्वं श्रोतुमिच्छसि ॥ ६ ॥ ७॥ ८ ॥ ९ ॥१०॥ इति सप्तदशेऽध्याये व्याख्येयं तु यथामति ॥ कृता गणपतिप्रीत्यै परोपकृतयेऽपि च ॥ १ ॥ इति श्रीबृहत्पाराशरहोराशास्त्रे श्रीमद्ध्यङ्कन्वयवे० शा० ज्योतिर्विच्छ्रीधरेण विरचितायां सु० टीकायां सप्तदशोऽध्यायः ॥ १७ ॥

भाषा–अब शास्त्रका फल और उपसंहार समाप्तिविषय कहते हैं. हे मैत्रेय ! यह सब होराशास्त्र तुमको मैंने कहा. यह पुण्यकारक, यशकारक, धनधान्यसंपादक, भूतभविष्यद्वर्तमानकालका शुभाऽशुभसूचक शास्त्र है, इस शास्त्रका उत्तम ज्ञान करनेसे मंत्राराधन, देवताराधन करे विना हाथमें जैसा आमलकीफल लिया होवै वैसा संपूर्ण जगत्‌का शुभाऽशुभ देखता है. यह शास्त्र पुत्रको, शिष्यको, बुद्धिमान्‌को मंत्रवेत्ता पुरुषको देना. यह शास्त्र समुद्र सरीखा अगाध है. यह शास्त्र दंभीको, क्रोधीको दुष्टको देना नहीं. देवे तो कहनेवालेकी विद्या नष्ट होती है. और यह पूर्वोक्त दोषरहित बालकभी होवे तो उसको यह शास्त्र पढाना जैसा शिवजीने तपस्वी जो उपमन्यु बालक उसको पयोधि दिया. हे मैत्रेय ! तेरे स्नेहके लिये यह जातकांश मैंने कहा. आगे पुनः क्या श्रवण करनेकी इच्छा है सो कहो ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

इति बृ० भाषाटीकायां सप्तदशोऽध्यायः ॥ १७ ॥

मैत्रेय उवाच । भगवन्प्रश्नशास्त्रं तु सूचिकानां प्रकाशितम् ॥ कलौ युगे तु मंदानां यज्ज्ञातुं तद्वदस्व मे ॥ १ ॥

टीका–अथाष्टादशकेऽध्याये शास्त्रज्ञानस्य सिद्धये ॥ यथावत्कथितौ मंत्रावन्यच्चापि प्रकीर्णकम् ॥ १ ॥ गणेशो मां प्रेरयतु तद्व्याचिख्यासुमर्भकम् ॥ अष्टादशतमेऽध्याये दयालुर्विश्वपालकः ॥ २ ॥ अथ भगवान्महर्षिः अष्टादशेऽध्याये मैत्रेयाय यथार्थज्योतिर्ज्ञानप्रदौ मंत्रौ प्रश्नादिप्रकीर्णं चाह । मैत्रेयः पृच्छति भगवन्निति । मैत्रेयऋषिः पराशरात्सर्वं ज्योतिःशास्त्रं श्रुत्वा एतज्ज्ञानाय कलिजडधियां पूर्णज्ञानजनकोपायं ज्योतिःशास्त्रं पृच्छति–भगवन्निति । हे भगवन् ! सूचिकानां सूचीवद्वेधकबुद्धीनां बुद्धिमतामित्यर्थः । ज्योतिःशास्त्रं ज्ञातुं अवगंतुं प्रश्नशास्त्रं प्रकाशितं किं तु अस्मिन्कलियुगे मंदानां यथावज्ज्ञातुं यच्छक्तं भवति तन्मे वदस्व ॥ १ ॥

भाषा–अब यह अठारहवें अध्यायमें मैत्रेयऋषि पराशरगुरुके मुखसें संपूर्ण जातक शास्त्रका श्रवण करके मनमें विचार किया कि यह जातकशास्त्रका उत्तम ज्ञान कलियुगमें होना दुर्लभ है; कारण कि मानव, जडबुद्धि बहुत हैं. इस वास्ते कलिमें पूर्ण ज्ञान जिससे होवे, ऐसा ज्योतिःशास्त्र पूछते हैं. हे भगवन् ! जिनकी सूक्ष्म वेधक बुद्धि है उनको ज्ञानदायक प्रश्नशास्त्र तुमने प्रकाशित किया. यह कलियुगमें मंदबुद्धिको जैसा ज्ञान होवे वो उपाय कहो ॥ १ ॥

कृते युगे तु धमस्य पूर्णत्वात्तपसान्विताः ॥ सर्वे जानंति भूतं च भवद्भावि द्विजोत्तम ॥ २ ॥ त्रेतायां तपसा युक्ताः केचिज्जानन्ति वै द्विजाः ॥ पश्यन्ति द्वापरे शास्त्रज्ञानेन तपसाऽपि च ॥ ३ ॥ कलौ युगे तु धर्मस्य पादमात्रव्यवस्थितिः ॥ तपःशक्त्या तु तज्ज्ञातुं न शक्ता मानवा भुवि ॥ ४ ॥

टीका-एवं प्रश्नं कृत्वोपायं वक्तुं उपक्रमते-कृते इति चतुर्भिः हे द्विजोत्तम मैत्रेय ! कृते युगे धर्मस्य पूर्णत्वात्सर्वे जनाः तपसान्विताः अत एव एतच्छास्त्रं जानंति अज्ञासिषुरित्यर्थः । तेन भूतं प्राक्कालीनं भवद्वर्तमानकालीनं भावि भविष्यत्कालीनं च विदुः ततस्त्रेतायां तपसा युक्ताः केचिद्द्विजाः जानंति । सर्वे द्वापरे तपसा शास्त्राभ्यासेन च पश्यंति । एवं युगत्रये एतच्छास्त्रस्य सम्यक् ज्ञातारो बभूवुः । अस्मिन्कलियुगे तु धर्मस्य पादमात्रव्यवस्थितिः धर्मपादावशेषत्वम् अतः तपःशक्त्या तच्छास्त्रं ज्ञातुं भुवि मानवा न शक्ताः संति तस्माद्यथार्थस्तव प्रश्न इति ॥ २ ॥ ३ ॥ ४ ॥

भाषा-पराशरजी कहते हैं. हे मैत्रेय ! सत्ययुगमें सब लोक तपश्चर्यामें रहते. इस वास्ते इस शास्त्रको जानते उससे त्रिकाल ज्ञान कहते. बाद त्रेता युगमें लोक तपसे रहते. कितनेक ब्राह्मण उससे जानते हैं. सब जानते नहीं हैं. द्वापर युगमें तप और शास्त्राभ्याससे देखते हैं. ऐसा तीन युगोंमें इस शास्त्रको उत्तम तरहसे जाननेवाले होते भये. इस कलियुगमें धर्म एकपादमात्र रहा है. इस वास्ते तपःशक्तिविना इस शास्त्रको जाननेको पृथ्वीमें मनुष्य समर्थ नहीं हैं, इस वास्ते तुम्हारा प्रश्न यथार्थ है ॥ २ ॥ ३ ॥ ४ ॥

तथाऽत्र परमः शंभुर्लोकानुग्रहकांक्षया ॥ लक्षीकृत्य
निजां शक्तिं विद्यामाधात्स ईश्वरः ॥ ५ ॥ कलावधि
च भक्तानां त्रिकालज्ञानदायिनी ॥ वेदादि वाग्भव
गौरिवदद्वयमथो गिरि॥ ६ ॥परमैश्वर्यसिद्ध्यर्थं वाग्भवं
स्यादयं मनुः ॥ सर्वज्ञेतिपदं पूर्वं नाथ तं पार्वतीपते
॥ ७ ॥ सर्वलोकगुरो पश्चाच्छिवेति द्वयमक्षरम् ॥
शरणं तु पदं पश्चात्त्वां प्रपन्नोऽस्मि तत्परम् ॥ ८ ॥

टीका–अथ ज्ञानोपायमाह–तथेत्यादिसार्धाष्टश्लोकपर्यंतम् । तथा अपकृष्टज्ञानानत्र भूमंडले मानवान्दृष्ट्वा परमः सर्वोत्कृष्टः शंभुः सदाशिवः लोकानुग्रहकांक्षया परोपकाराय निजां शक्तिं स्वकीयज्ञानशक्तिं लक्ष्यीकृत्य स्मृत्वा सः ईश्वरः विद्यां आद्यां निर्ममे इत्यर्थः । तत्र मंत्रोद्धारः । वेदादिः प्रणवः वाग्भवं वाग्बीजं ऐमिति गौरीति संबोधनं वदद्वयं वदवदेत्येवंरूपम् अथोऽनंतरं गिरि ततः परमैश्वर्यसिद्ध्यर्थं ऐमिति मंत्रनिष्कर्षः "ॐ ऐं गौरि वद वद गिरि परमैश्वर्यसिद्ध्यर्थं ऐं" अयं शक्तिमंत्रः । अथ शिवमंत्रोद्धारः । पूर्वं सर्वज्ञ इति ततः नाथ इति पदं ततः पार्वतीपते इति पदं ततः सर्वलोकगुरो इति पदं ततः शिवेति पदं ततः शरणमिति पदं ततस्त्वां प्रपन्नोऽस्मीति पदं ततः पालयेति पदं ततः ज्ञानमिति पदं ततः प्रदापयेति पदम् । "सर्वज्ञ नाथ पार्वतीपते सर्वलोकगुरो शिव शरणं त्वां प्रपन्नोस्मि पालय ज्ञानं प्रदापय" इति स्पष्टमंत्रनिष्कर्षः । एवं रूपौ ज्योतिःशास्त्रज्ञानाय शक्तिशिवमंत्रौ महाविद्येति निर्ममे इति ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

भाषा–अब ज्ञान होनेका उपाय कहते हैं. इस भूमंडलमें अपकृष्टज्ञानी मनुष्योंको देखके सर्वोत्कृष्ट सदाशिवने परोपकारार्थ अपनी ज्ञानशक्तिका स्मरण करके विद्या निर्माण कियी. सो शक्तिशिवके दोनों मंत्र स्पष्ट दिखाते हैं, "ॐ ऐं गौरि वद वद गिरि परमैश्वर्यसिद्ध्यर्थं ऐं" यह शक्तिका मंत्र. अब शिवका मंत्र कहते हैं. "सर्वज्ञ नाथ पार्वतीपते सर्वलोकगुरो शिव शरणं त्वां प्रपन्नोऽस्मि पालय ज्ञानं प्रदापय" यह शिवका मंत्र कहा ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

पालयेति पदं ज्ञानं प्रदापय ततः परम् ॥ ऋषिस्तु दक्षिणामूर्तिर्गौरी परमेश्वरी तथा ॥ ९ ॥ सर्वज्ञश्च शिवो देवो गायत्रीच्छंद ईरितम् ॥ अनुष्टुप् च

षडंगं स्याद्वाग्भवेन हृदादि च ॥ १० ॥ अनेनाभ्यां द्विजश्रेष्ठ बुद्धिस्तु विमला भवेत्॥ जपमात्रेण सिद्धिः स्याद्दैवज्ञत्वं प्रकाशते ॥ ११ ॥

टीका-अथ सर्वमंत्राणां ऋष्यादिस्मरणं विना मंत्रसिद्ध्यभावः न्यासेन विना मंत्रस्य भुजंगत्वापत्तिः ध्यानेन विना इष्टसिद्ध्यभावः तंत्रे प्रसिद्धः । अतः ऋष्यादीनाह-ऋषिरित्येकादशश्लोकपर्यंतम् । अनयोर्मंत्रयोः दक्षिणामूर्तिर्ऋषिः गौरी परमेश्वरी सर्वज्ञः शिवश्च देवते गायत्र्यनुष्टुभौ छंदसी वाग्भवेन ऐं इत्याकारकेन हृदादि अंगुष्ठादि न्यासः । हे द्विजश्रेष्ठ ! आभ्यां मंत्राभ्यां अनेन विधानेन जपाद्बुद्धिः विमला भवेत् जपमात्रेणैव सिद्धिः स्यात् न पुरश्चर्याद्यावश्यकत्वमनेन दैवज्ञत्वं ज्यौतिषिकत्वं प्रकाशते विराजते प्रश्नकथनपाटवं प्रवर्धते इत्यर्थः इति ॥ ९ ॥ १० ॥ ११ ॥

भाषा-अब शक्तिशिवके दोनों मंत्रके ऋषि देवता छंद कहते हैं. “अनयोर्मंत्रयोः दक्षिणामूर्तिर्ऋषिः गौरी परमेश्वरी सर्वज्ञः शिवश्च देवते गायत्र्यनुष्टुभौ छंदसी मम त्रिकालदर्शकज्योतिःशास्त्रज्ञानप्राप्तये जपे विनियोगः ॥” ऐसा विनियोग पढके पीछे ऐं यह बीजसे अंगुष्ठादिक न्यास हृदयादि न्यास करना. हे मैत्रेय ! यह दोनों मंत्रोंके पुरश्चरण करनेसे निर्मल बुद्धि और ज्योतिषका यथार्थ ज्ञान प्रकाशित होवेगा ॥ ९ ॥ १० ॥ ११ ॥

उद्यानस्यैकवृक्षाधः परे हैमवते द्विज ॥ क्रीडंतीं भूषितां गौरीं शुक्लवस्त्रां शुचिस्मिताम् ॥ १२ ॥ देवदारुवने तत्र ध्यानस्तिमितलोचनम् ॥ चतुर्भुजं त्रिनेत्रं च जटिलं चंद्रशेखरम् ॥ १३ ॥

टीका-अथ ध्यानमाह-उद्यानस्येत्यादिसार्धद्वयेन । उद्यानस्य आरामस्यैकवृक्षाधः मुख्यवटवृक्षाधोभागे हैमवते हिमवत्पर्वतोद्भूते

परे उत्कृष्टे आसने इति शेषः । भूषितामलंकृतां शुक्लवस्त्रां शुचिस्मितां गौरीं क्रीडंतीं ध्यायेत् तत्रोपवने ध्यानास्तिमितलोचनं ध्यानेन निमीलितदृष्टिं त्रिनेत्रं चतुर्भुजं जटिलं जटाधारिणं चंद्रशेखरं भालचंद्रं शुक्लवर्णं परमं सर्वोत्तमं ईश्वरं सर्वनियंतारं महादेवं सर्वदेवश्रेष्ठं दीव्यति प्रकाशयाति सर्वेन्द्रियादीनिति देवः महांश्चासौ देवश्च महादेवः सर्वेषामपि श्रेष्ठः परब्रह्मेति भावः । एवं ध्यायेदिति ॥ १२ ॥ १३ ॥

भाषा—ऐसे न्यास करके पीछे शक्तिशिवका ध्यान करना सो कहते हैं. हिमालय पर्वतके उपर एक बडा बगीचा है. उसमें एक वटका झाड है. उसकी छायानीचे उत्तम आसनके ऊपर बैठे हुवे शोभायमान, सुफेद वस्त्र जिन्होंने पहिरे हैं, और पवित्र हास्यसहित जिनका मुख, क्रीडा कर रही हैं, ऐसी गौरीका ध्यान करना. और उसी बगीचेमें ध्यान करके जिन्होंने दृष्टि मीच ली है. तीन नेत्र चार भुजा हैं, जटा धारण किये हैं, जिनके भालमें चंद्र सुशोभित है, श्वेत जिनका वर्ण है, सबके नियंता, सर्वोत्तम, सर्वदेवमें श्रेष्ठ ऐसे सांक्षान्महादेव परब्रह्म हैं ऐसा ध्यान करना ॥ १२ ॥ १३ ॥

शुक्लवर्णं महादेवं ध्यायेत्परममीश्वरम् ॥ द्विविधं गणितं ज्ञात्वा शाखास्कंधं विमृश्य च ॥ १४ ॥ होरास्कंधस्य शकले श्रुत्वार्थमवधार्य च ॥ वाग्ग्मी द्विजवरो यः स्यान्न वंध्या तस्य भारती ॥ १५ ॥

टीका—अथ गणकाधिकारमाह—द्विविधमिति पंचदशश्लोकपर्यंतम् । यः द्विविधं खगोलभूगोलविषयं गणितं ज्ञात्वा शाखास्कंध विमृश्य विचार्य होरास्कंधस्य शकले द्विप्रकारके श्रुत्वा गुरोः सकाशादधीत्येत्यर्थः । अर्थमवधार्य । निश्चित्य वाग्ग्मी प्रशस्तवाग्द्विजवरो भवति न तु जैनशूद्रादिज्योंतिषिकः तस्य वाणी वंध्या विफला न भवति ॥ १४ ॥ १५ ॥

भाषा-अब ज्योतिषीके लक्षण कहते हैं, जो पुरुष भूगोल, खगोल, गणितको जानता है और जातकके दो भाग उत्तम रीतिसे गुरुमुखसे जानके विचार करके जो उत्तम वाणीसे बोलता है जो जातिका ब्राह्मणही है, जैन या शूद्रजातिका ज्योतिषी नहीं होना, वो उत्तम दैवज्ञ होता है. उसकी वाणी निष्फल नहीं होती ॥ १४ ॥ १५ ॥

अलुब्धो नैष्ठिकः शुद्धो विनयप्रश्रयान्वितः ॥ रत्नं स्वर्णं धनं वस्त्रं पुष्पमूलफलानि तु ॥ १६ ॥

टीका-अथ प्रष्टुर्लक्षणमाह-अलुब्ध इति सार्धेन । पृच्छकः नैष्ठिको निष्ठावाञ्छुद्धो निष्कपटः विनयप्रश्रयान्वितः विनयादियुक्तः अलुब्धो लोभरहितः सद्रत्नस्वर्णधनवस्त्रान्यतमं अशक्तश्चेत्पुष्पमूलफलान्यतमं वा दैवज्ञपुरतः ज्योतिषिकाग्रे दत्त्वा समर्प्य प्रियान्वितः प्रीतमनाः न तु दानेन खिन्नमानसः इष्टं मनीप्सितं पृच्छेदिति ॥ १६ ॥

भाषा-पृच्छक निष्ठावान्, निष्कपट, नम्रतादिगुणयुक्त, लोभरहित होके अपने हाथमें सुवर्ण रत्न वस्त्र धान्यमेंसे कोई पदार्थ लेवे. गरीब होवे तो पुष्प फल मूलमेंसे कोईभी पदार्थ लेके ज्योतिषीके सामने रखके प्रसन्नमन होके मनईप्सित प्रश्न पूछे ॥ १६ ॥

दैवज्ञपुरतो दत्त्वा पृच्छेदिष्टं प्रियान्वितः ॥ अथ प्राङ्मुख आसीनः शुचिर्दैवविदग्रतः ॥ १७ ॥ तिर्यगूर्ध्वाश्चतस्रस्तु रेखा रज्जुसमा लिखेत् ॥ एकीकुर्यात्तु चत्वारि मध्यस्थानि पदानि च ॥ १८ ॥ तत्र पद्मं लिखेद्रेखापद्ममध्यं सकर्णिकम् ॥ ईशान्यकोष्ठादारभ्य मीनाद्या राशयः क्रमात् ॥ १९ ॥ मेषवीथी

वृषाद्यास्तु कौर्प्याद्या मिथुनस्य तु ॥ वीथयो मीनमेषौ तु तुलाकन्ये वृषस्य तु ॥ २० ॥ आरूढाद्वीथिभं यावत्तावच्छत्रं तु लग्नतः ॥ आरूढराशिर्लग्नं चेच्छत्रं चाऽपि भवेत्तथा ॥ २१ ॥ जन्मलग्नं समासाद्य यद्यत्प्रोक्तं तु जातके ॥ तत्सर्वं प्रश्नलग्नेन प्रश्नकालाद्वदेद्बुधः ॥ २२ ॥

टीका–अथ दैवज्ञकर्तव्यमाह–अथेति द्वाविंशतिश्लोकपर्यंतम् ॥ अथ प्रश्नानंतरं दैवविद्दैवज्ञः शुचिः सन्प्राङ्मुख आसीनः प्राङ्मुखोपविष्टः अग्रतः पुरोभागे तिर्यगूर्ध्वाः प्राक्पश्चिमाः दाक्षिणोत्तराश्च रज्जुसमाश्चतस्रः चतस्रो रेखाः लिखेत् तत्र मध्यस्थानि चत्वारि पदानि एकीकुर्यात् तत्र पद्मं रेखापद्ममध्यस्थं सकर्णिकं लिखेत्। ततः ईशान्यकोष्ठात् आरभ्य मीनाद्याः राशयः क्रमाल्लिखेत् तत्र वृषाद्या वृश्चिकाद्याश्च मेषवीथयो भवंति मिथुनस्य वीथयः मीनमेषौ वृषस्य तु तुलाकन्ये आरूढाल्लग्नतः यावद्वीथिभं तावच्छत्रं लग्नमेव आरूढराशिश्चेत्तदेव छत्रं भवेत् एवं विचार्य जातके जन्मलग्नं समासाद्य यद्यत्प्रोक्तं तत्सर्वं प्रश्नकाललग्नाद्बुधो वदेदिति ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२॥

भाषा–अब ज्योतिषीका कर्तव्य कहते हैं. पृच्छकने प्रश्न किया पीछे ज्योतिषीने पवित्रतासे पूर्वाभिमुख बैठके राशिचक्र आगे लिखा है वैसा लिखना. बीचमें कमल लिखके आरूढ लग्नका विचार करना. पृच्छक जिस दिशामें बैठा होवे वो आरूढलग्न अथवा राशिको स्पर्श करे. बारहलग्नमें उसको आरूढ जानना. वृषादि चार राशिमें मेषवीथी जानना. वृश्चिकादि चार राशिमें मिथुनवीथी जानना. मेष, मीन, कन्या, तुला यह राशिमें

१२	१	२	३
११	अथ राशिचक्रम्.		४
१०			५
९	८	७	६

वीथीज्ञानचक्रम्.

१	१२	७	६	वृ.
८	९	१०	११	मि.
२	३	४	५	मे.

वृषभवीथी जानना. आरूढलग्नसे जहांतक वीथीकी राशि होवे उतनी संख्यातुल्य तत्काल लग्नसे, संख्याराशिको आवे वो छत्रराशि जानना ॥ १७ ॥ ॥१८॥१९॥२०॥२१॥२२॥

यत्कालावधि लग्नं तत्तत्कालावधि चेत्स्थिते ॥ तेषां बलवतां चैव निर्णयः स्वायुषः स्मृतः॥२३॥आद्यद्रेष्काणमंत्यं च मृत्युदं च क्रमाद्भवेत् ॥ मृगादिकर्कटानां च मीनस्यारूढलग्नतः ॥२४॥

टीका-अथारूढलग्नतः आयुर्निर्णयं द्रेष्काणफलं चाह-यदिति द्वाभ्याम् । अथ लग्नं यत्कालावधि यत्कालपर्यन्तं तत्कालावधि तत्कालपर्यन्तं इच्छिते आयुर्निर्णये पृष्टे सतीत्यर्थ । तेषां ग्रहाणां बलवतां सतां आयुषो निर्णयः स्मृतः ग्रहबलेनायुर्निर्णय इत्यर्थः ॥ अथ मृगालिकर्कटानां मकरवृश्चिककर्काणां मीनस्य च आरूढलग्नतः आद्यं तद्रेष्काणे सति लग्नं मृत्युदं भवेत् ॥ २३ ॥ २४ ॥

भाषा-अब आरूढलग्नसे आयुष्यनिर्णय और द्रेष्काणफल कहते हैं तत्काल लग्नकी जो कालावधि है वहांतक आयुष्यनिर्णय कहा है. मकर, वृश्चिक, कर्क, मीन इनका आरूढलग्नसे आद्यंत द्रेष्काण होवे तो वो लग्न मृत्युकारक जानना ॥२३॥२४॥

लग्ने पृष्ठोदये क्रूरवेश्मास्तव्ययगा यदि ॥ धने धर्मे कुजे मंदे चंद्रे रंध्रे मृतिर्भवेत् ॥ २५ ॥

टीका-अथ मृत्युलक्षणमाह-लग्ने पृष्ठोदय इति । पृष्ठोदये प्रश्नलग्ने सति तथा क्रूरा ग्रहा यदि वेश्मास्तव्ययगाः. प्रश्नलग्नाच्चतुर्थसप्तमव्ययस्थाः संति चेत् अथ धने धर्मे द्वितीयनवमे वा स्थाने कुजे मंदे मंगले शनौ वा सति रंध्रे अष्टमस्थाने चंद्रे सति मृतिर्भवेत् ॥ २५ ॥

भाषा—अब मृत्युका लक्षण कहते हैं. प्रश्नलग्नमें पृष्ठोदय लग्न होवे और लग्नसे पापग्रह ४।७।१२ होवे अथवा २।९ मंगल होवे और ८ स्थानमें चंद्र होवे तो मृत्यु होवे ॥ २५ ॥

पापैर्दुरुधरे जाते लग्नकामसुहृत्स्थिते ॥ चंद्रेऽर्कें च विलग्नस्थे म्रियते व्याधिना भृशम् ॥ २६ ॥

टीका—अथ पुनर्मरणयोगांतरमाह—पापैरिति सार्धेन । पापैः पापग्रहैः दुरुधरे योगे जाते सति अथवा जन्मलग्नेऽथवा कामसुहृत्स्थिते सप्तमचतुर्थस्थे चंद्रे सति अथवा प्रश्नलग्नस्थेऽर्के सति च व्याधिना भृशं म्रियते प्रश्नलग्ने राहुकालसमायोगे वा निश्चितं मरणं भवेत् ॥ २६ ॥

भाषा—अब और मरणका योगांतर कहते हैं. प्रश्नलग्नमें वा जन्मलग्नमें पापग्रहका दुरुधरा योग होवे अथवा ७।४ चंद्र होवे अथवा प्रश्नलग्नमें सूर्य होवे और प्रश्नसमयमें राहुकालसमायोग होवे तो व्याधिके निमित्तसे मृत्यु होवे ॥ २६ ॥

राहुकालसमायोगे मरणं निश्चितं भवेत् ॥ मेषाद्व्युत्क्रमतो राहुर्वृषात्कालः क्रमाच्चरेत् ॥ २७ ॥ राशौ राशौ तु पंचाशद्भोगकालो विनाडिकाः ॥ अर्कोदयादितश्चोभौ भुंजाते च पुनः पुनः ॥ २८ ॥ एकदृष्ट्यब्धिरामेषु षडष्टौ नाडिकाः क्रमात् ॥ अर्कवारादितो राहू रात्रावेवमुदीरितः ॥२९॥ राहुरुत्क्रमशः प्राच्याः कालश्च क्रमशश्चरेत् ॥ उभौ सार्धविनाड्येन राशिषु द्वादशस्वपि ॥ ३० ॥ इंद्रेंद्वग्निनिशाचरशमवारीशवायवः ॥ रुद्रचंद्रजलेशेशपापकेंद्रयमास्थितः ॥३१॥

रक्षो वायुस्ततोग्नीशयमवारुणराक्षसाः ॥ वायुसोमशनीनाथरक्षोग्निजलपेंदवः ॥ ३२ ॥ वाय्वीशेंद्रयमाः
पश्चाद्युग्मेंद्रौ च निशाचरः ॥ मरुद्वरुणचंद्रेशपावको
वरुणो यमः॥३३॥वायुरुद्रशशींद्राग्निराक्षसाश्च ततः
परम्॥वायुरक्षःशशींद्रेशपावकांतकवारुणाः ॥३४॥

टीका—अथ राहुकालयोगज्ञानमाह—मेषादीत्यादिसार्धचतुस्त्रिंशच्छ्लोकपर्यंतम् । राहुः मेषाद्व्युत्क्रमतः विलोमरीत्या क्रमाच्चरेत् कालः वृषात्क्रमात् द्वादशलग्नेषु चरेत् राशौ राशौ प्रतिराशि पंचाशद्विनाडिकाः भोगकालः अर्कोदयादितः सूर्योदयलग्नमारभ्य उभौ पुनः पुनः लग्नादि भुंजाते तत्राऽर्कवारादितः सप्तवारेषु क्रमात् एक १ द्वि २ अब्धि ४ राम ३ इषु ५ षट् ६ अष्ट ८ घटिका राहुः रात्रौ प्राच्याः दिशः सकाशादुत्क्रमशः विलोमगत्या दिक्षु उदीरितः कथितः तथा तेनैव मानेन कालः प्राच्या दिशः सकाशात्क्रमशः दिक्षु चरेत् संचरति उभौ द्वावपि सार्धद्विनाड्येन सार्धघटिकाद्वयेन द्वादशस्वपि राशिषु संचरेतां तत्र राहुः दिक्षु क्रमाद्वामं संचरति इति पंचत्रिंशत्तमश्लोकार्द्धेनान्वयः । तमेव क्रममाह । रविवारे इन्द्रः प्राक्, इंदुः सोम, उदक्ः अग्निः आग्नेयी, निशाचरः निर्ऋतिः, शमः शमनः दक्षिणः, वारीशः वरुणः पश्चिमः, वायुश्चैता दिशः क्रमेण संचरति इंदुवारे रुद्रः, चंद्रः, जलेशः, ईशः, पावकः, इंद्रः, यमः एषां दिक्षु. भौमवारे रक्षः, वायुः, अग्निः, ईशः, यमः, वरुणः, राक्षसः एषां दिक्षु. सौम्यवारे वायुः सोमः शचीनाथः, रक्षः, अग्निः, जलपः, इंदुः एषां दिक्षु. गुरुवारे वायुः, इशः, इंद्रः, यमः, पश्चात् युग्मः । पश्चिमायां इंद्रः, निशाचरः, एतद्दिक्षु. शुक्रवारे मरुत्, वरुणः चंद्रः, ईशः पावकः, वरुणः, यमः, एतद्दिक्षु. शनिवारे वायुः,

रुद्रः, शशी, इंद्रः, अग्निः. राक्षसः, वायुः, अथवा रक्षः, शशी, इंद्रः, ईशः,पावकः, अंतकः, वरुणः, एषां दिक्षु क्रमाद्रव्यादिसप्तवारेषु राहुः संचरतीति ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४॥

भाषा--अब राहुकालयोगका ज्ञान कहते हैं. राहु मेष, मीन, और कुंभ ऐसे क्रमसे चलता है. काल है वो वृषभ, मिथुन, कर्क ऐसे क्रमसे चलता है. एक राशिमें सूर्योदयसे लेके पचास पल भोगकाल है. इस रीतिसे राहु और काल यह दोनों वारंवार लग्नादिकको भोगते हैं. उससे सूर्यादि सात वारके विषे क्रमसे १।२।४।३।५।६।८ घडी राहु. रात्रीको पूर्व, ईशान, उत्तर, वायु यह क्रमसे भोगता है. वैसा काल पूर्व, अग्नि, दक्षिण, नैर्ऋत्य ऐसे क्रमसे चलता है. यह दोनोंका प्रत्येक दिशामें भोगकाल घटी २ पल ३० तक रहता है पहिले जो ५० पल भोगकाल कहा वो लग्न भोगका जानना. अब प्रत्येक वारमें दिशा भोगते हैं वो क्रम टीकामें स्पष्ट है ॥ २७ ॥ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

अर्कवारादितो वामं राहुः संचरति क्रमात् ॥ रुद्रः समीरः सोमाग्नी यमोऽथ निर्ऋतिर्जलम् ॥ नक्षत्रेपि च वारे च तिथौ चोत्क्रमतः क्रमात् ॥ ३५ ॥ अंतिमादादिमाद्राहुः कालश्च चरतस्तथा ॥ द्वयोर्योगे तु मरणमेकस्मिन्व्याधिरुच्यते ॥ ३६ ॥

टीका-अथ नक्षत्रतिथिवारेषु दिक्क्रममाह-रुद्र इति द्वयेन । अथ नक्षत्रे वारे तिथौ च रुद्रः ईशानी समीरः वायुदिक् सोमः उदक् अग्निः आग्नेयी यमो दक्षिणा निर्ऋतिः स्पष्टा जलं पश्चिमा आसु दिशासु अश्विनीनक्षत्ररविवारप्रातिपत्तिथीः आरभ्यांतिमाद्राहुरुत्क्रमतः आदिमात्कालः क्रमतः एवमुभावपि दिक्षु चरतः एवं संचारेणैकस्मिंस्तिथ्याद्यन्यतमयोगे व्याधिः द्वयोस्तिथ्याद्यन्यतमद्वियोगे मरणमित्युच्यते ॥ ३५ ॥ ३६ ॥

भाषा–अब नक्षत्रतिथिवारके क्रमसे राहु और कालका परिभ्रमण कहते हैं. दिशाक्रम ईशान १, वायु २, उत्तर ३, अग्नि ४, दक्षिण ५, नैर्ऋत्य ६, पश्चिम ७ यह ७ दिशामें अश्विनीसे वर्तमाननक्षत्रतक, रविवारसे वर्तमानवारतक प्रतिपदासे वर्तमानतिथितक, दिशामें फिरते हैं. सो ऐसा कि राहु अंतिमक्रमसे पश्चिम निर्ऋति ऐसा और काल आदिक्रमसे ईशान, वायु ऐसा पीछे यह दोनोंका संचार एक ठिकाने तिथ्यादिकका दो योग होवे तो मरण, एक होवे तो व्याधि जानना ॥ ३५ ॥ ३६ ॥

नृपा मूर्छा शरास्तत्त्वं तिथिषोडश पंच च ॥ द्वितीये त्वष्टमे भावस्त्वंतरे त्वनुपातत: ॥ ३७ ॥ नागाऽष्टेषु गुणा रुद्रा वाजिवेदांगपंक्तय: ॥ दशपंचाष्टका मेषाद्रश्मय: संप्रकीर्तिता: ॥ ३८ ॥ एकयोगे तु सर्वेषु व्याधिर्द्वाभ्यां भवेन्मृति: ॥ लक्ष्मीयोगेषु सर्वेषु व्याधिस्तस्य नवाऽपि वा ॥ ३९ ॥

टीका–अथ द्वितीयभावादष्टमभावपर्यंतं रश्मीनाह–नृपा इति। द्वितीयभावस्य नृपा: १६, तृतीयस्य मूर्च्छा: २१, चतुर्थस्य शरा: ५, पंचमस्य तत्त्वं २५, षष्ठस्य तिथि: १५, सप्तमस्य षोडश १६, अष्टमस्य पंच ५, तत: अंतरे ये भावा: संति तेषामंकास्तु अनुपाततो ग्राह्या: इति विषय: पूर्वं रश्मिप्रकरणे स्पष्टीकृतोऽस्त्येव ॥३७॥ अथ मेषादिराशिषु रश्मीनाह नागेत्यादिसार्धेन। नागा: ८, अष्ट ८, इषव: ५, गुणा: ३, रुद्रा: ११, वाजिन: ७, वेदा: ४, अंगानि ६, पंक्तय: १० दश १०, पंच ५, अष्ट ८, एते रश्मय: रश्म्यंका: मेषादिराशिषु क्रमात्संप्रकीर्तिता: एषु राहुकालयोर्द्वयोर्योगे व्याधितो मृत्यु: स्यात् तथा एषु सर्वेषु एकयोगे व्याधि: स्यादिति ॥ ३८ ॥ अथाऽस्यापवादमाह–लक्ष्मीत्यर्धेन। सर्वेषु पूर्वोक्तेषु लक्ष्मीयोगेषु पूर्वोक्ते एकयोगे सत्यपि तस्य व्याधि: कदाचित्स्यात्कदाचिन्नस्यादपि ॥३९॥

भाषा–अब भावके रश्मि कहते हैं. द्वि. १६, तृ. २१, च. ५, पं. २५, ष. १५, स. १६, अ. ५, शेषभावके अनुपातसे पूर्व कहे हैं. वे जानने ॥ ॥ ३७ ॥ अब मेषादिराशिके रश्मि कहते हैं. मेष ८ वृषभ ८, मिथुन ५, कर्क ३, सिंह ११, कन्या ७, तुला ४, वृश्चिक ६, धन १०, मकर १०, कुंभ ५, मीन ८, यह मेषादिराशिके रश्मि जानना ॥ ३८ ॥ अब पूर्वोक्तका अपवाद कहते हैं. पूर्वोक्त जो योग मरणके कहे हैं परंतु लक्ष्मीयोग होवे तो कभी व्याधि होवे कभी न होवे ॥ ३९ ॥

वैधृतौ च व्यतीपाते सार्पभेंतिमसंज्ञिते ॥ कुलीरे विषनाडीषु सूर्यदुष्टेषु पंचसु ॥ ४० ॥ पापयुक्ते च नक्षत्रे राशौ तत्संयुतेऽपि च ॥ संधौ च मासशून्यर्क्षं तिथिराशिषु जन्मभे ॥४१॥ व्ययाष्टमे च क्षीणेंदौ शत्रुग्रहनिरीक्षिते॥पादं पृष्ठं च जंघां च जानु नाभिं च गुल्फके ॥४२॥ कर्णौ च चक्षुषी भालमास्यं कंठं स्पृशेद्यदा॥ व्याधिर्वा म्रियते तद्वन्मूर्तिं राशिं स्पृशेत्तु वा॥ ४३॥ अष्टमर्क्षं स्पृशेद्यद्वा कलांशादिषु वा तथा॥ विपद्वधप्रत्यृक्षे च वैनाशं ऋक्षमेव वा ॥४४॥ संस्पृशेत्प्रश्नकाले तु व्याधिर्वा तस्य वा मृतिः ॥ ४५ ॥

टीका–अथ व्याधितस्य प्रश्नकालमरणसूचककालराहुविशेषयोगांतराण्याह–वैधृतौ चेत्यादिपंचचत्वारिंशच्छ्लोकपर्यंतम् । वैधृतौ व्यतीपाते सार्पभे आश्लेषानक्षत्रे अंतिमसंज्ञिते रेवत्यां कुलीरे कर्कांशे विषनाडीषु नक्षत्रोद्भूतासु पंचसु भौमबुधगुरुशुक्रशनिषु सूर्यदुष्टेषु सूर्यदोषसहितेषु पापग्रहयुक्ते नक्षत्रे तत्संयुते पापग्रहयुते राशावपि संधौ प्रातःसायंमध्याह्नादिषु यस्मिन्मासे शून्यर्क्षतिथिराशयः संति तस्मिञ्जन्मभे

जन्मनक्षत्रे प्रश्नलग्नाद्व्ययाष्टमे द्वादशाष्टमे क्षीणेन्दौ क्षीणचंद्रे सति अथ वा तस्मिँस्थानद्वये शत्रुग्रहानिरीक्षिते सति अथ वा कालराहुः पादं पृष्ठं जंघां जानु नाभिं गुलफं कर्णौ चक्षुषी भालमास्यं कंठं वा यदा स्पृशेत्तदा प्रश्ने व्याधिः मरणं वाऽथ वा राहुर्मूर्तिं राशिं अष्टमं राशिं स्पृशेच्चेत्तदापि मृतिः अथ वाऽष्टमर्क्षं अष्टमलग्नं राहुः स्पृशेत् अथ वा कलांशादिषु षोडशांशादिषु राहुः स्पृशेदथ वा विपत्तारां वधतारां प्रत्यरितारां वैनाशं ऋक्षं वा स्पृशेत्सचेत्प्रश्नकाले तर्हि तस्य व्याधिर्वा मृत्युर्वा भवेदिति ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

भाषा–अब रोगीका मरणजविनप्रश्न कहते हैं. प्रश्नकालमें वैधृति, व्यतीपात, आश्लेषा, रेवती, कर्कांश, विषघटिका, वार, मंगल, बुध, गुरु, शुक्र, शनि, पापग्रहयुक्त नक्षत्र, सायंकाल, प्रातःकाल, मध्याह्नकाल, मास शून्य तिथि वार नक्षत्र, जन्मनक्षत्र, प्रश्नलग्नसे १२।८।क्षीणचंद्र, अथ वा १२।८ शत्रुग्रहकी दृष्टि होवे, कालराहु अंगस्पर्श करे तो व्याधि अथवा मरण होवे अथवा राहु आठवीं राशिको स्पर्श करे तो मत्यु होवे अथवा राहु आठवें लग्नका वा षोडशांशको अथवा विपत्ताराको वा वैनाशनक्षत्रको स्पर्श करे तो व्याधि वा मृत्यु होवे ॥४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५॥

शिरोललाटभ्रूनेत्रनासाकर्णकपोलकाः ॥ ओष्ठं च
चिबुकं कंठमंसौ हृदयमेव च ॥४६॥ पार्श्वौ च वक्षः
कुक्षिश्च नाभिश्च कटिरेव च ॥ जघनं च नितंबं च
लिङ्गमंडं च बस्ति च ॥ ४७ ॥

टीका–अथाश्विनीक्रमान्नक्षत्रेष्ववयवानाह शिरइति सार्धद्वाभ्याम् । आश्विभात् अश्विनीनक्षत्रात्सकाशात्क्रमात् कालस्य शिरःप्रभृति अंघ्र्यन्तं सप्तविंशतिसंख्याका अवयवा ज्ञेयाः ॥ ४६ ॥ ४७ ॥

भाषा—अब नक्षत्रपरत्वकरके कालके अवयव कहते हैं. अश्विनीनक्षत्रसें लेके रेवतीपर्यंत क्रमसे कालके मस्तक आदि लेके चरणपर्यंत सत्तावीस अवयव जानना ॥ ४६ ॥ ४७ ॥

ऊरू च जानू जंघा च गुल्फांघ्री चाश्विभात्क्रमात् ॥
तैलाभ्यक्तोऽथ वा शुद्धो जलगर्तसमीपगः ॥ प्रष्टा
दैवविदे वाथ मरणं तस्य निर्दिशेत् ॥ ४८ ॥ लग्नात्रि-
सुतकामारिधर्मकर्मायगः शुभः ॥ रोगशांतिकरा नो-
चेद्रिपुनीचग्रहस्थिताः ॥ ४९ ॥

टीका—अथ प्रष्टुर्दुश्चिह्नज्ञानमाह—तैलाभ्यक्त इति । तैलाभ्यक्तः वा अशुद्धः सूतकी वा जलह्रदनिकटवर्ती एवं भूतः प्रश्नकाले प्रष्टा पृच्छकः अथवा दैवविज्ज्योतिषिको वापि चेत्तदा तस्य प्रष्टुर्मरणं निर्दिशेत्॥४८॥ अथ लग्ने शुभाशुभग्रहान्प्रश्नकाले आह—लग्नेति सार्धेन । अथ लग्ने तृतीये पंचमे सप्तमे षष्ठे नवमे दशमे लाभे वा शुभग्रहाश्चेद्रोगशांतिकरा भवंति किंतु उक्तस्थानगता अपि रिपुग्रहनीचग्रहवर्तमाना नोचेत्तथा एषु स्थानेषु पापाश्चेन्मृतिकराः मृत्युदाः तथापि यदि ते स्वर्क्षस्वोच्चस्वमित्रराशिवर्तमाना नोचेन्न संति चेदिति ॥ ४९ ॥

भाषा—अब पृच्छकके दुश्चिह्न कहते हैं. तैलसे स्नान किया होवे, सूतकी, जलके डोहके पांस वैठा हुवा प्रश्न करे, वा पूर्वोक्त लक्षणयुक्त ज्योतिषी प्रश्न कहे तो पृच्छकका मृत्यु जानना ॥ ४८ ॥ अब रोगप्रश्नका शुभाशुभ कहते हैं प्रश्नलग्नसे ३ । ५ । ६।९ । १० । ११ शुभग्रह होवे तो रोग शांत होवेगा, और यह ३ । ५ । ६ । ९ । १० । ११ स्थानोंमें पापग्रह होवे तो मृत्यु होवेगा. परंतु शुभग्रह नीचादिस्थानगत न होवे और पापग्रह उच्चादि स्थानगत न होवे तो पूर्वोक्त फल जानना ॥ ४९ ॥

एषु पापा मृतिकरा नोचेत्स्वर्क्षोच्चमित्रगाः ॥ यस्य
यस्य शुभं वाथ रिःफस्थानगताः शुभाः ॥ ५० ॥

टीका–अथान्यच्च शुभाशुभमाह–यस्येत्यर्धकद्वयेन । यस्य यस्य पुंसः रिःफस्थानगताः द्वादशभावस्थाः यद्वा त्रिकोणकेंद्रस्थाः ९ । ५ । १ । ४ । ७ । १० । एषु स्थिताः शुभाः शुभग्रहाः तस्य तस्य पुंसः शुभं भवति यतस्ते शुभप्रदाः शुभदायका इति ॥ ५० ॥

भाषा–१२ । ९ । ५ । १ । ७ । १० इन स्थानोंमें जन्मकालमें या प्रश्नकालमें शुभग्रह होवे तो शुभदायक फल है ॥ ५० ॥

यद्वा त्रिकोणकेंद्रस्थास्तस्य तस्य शुभप्रदाः ॥ मृगकर्क्यादितः सूर्यो राशिपूर्वापरार्धतः ॥ शनिशुक्रारचंद्रज्ञगुरवः शिशिरादिषु ॥ ५१ ॥

टीका–अथ प्रश्नकाले वाऽयनर्तुज्ञानमाह–मृगेति । मृगकर्क्यादितः मकरराशितः षड्राशिवर्तमानः सूर्यश्चेदुत्तरायणं तथा कर्कराशितः षड्राशिवर्तमानः सूर्यश्चेद्दक्षिणायनमिति प्रश्नलग्नजन्मभ्यामयनं ज्ञेयम् अथ राशिपूर्वार्धतः एतदुक्तं भवति मकरादिषड्राशिषु राशिपूर्वार्धे कर्कादिषड्राशिषु राश्यपरार्धे वर्तमानाः क्रमाच्छनिशुक्रारचंद्रज्ञगुरवः संति चेद्राशिपंचांशविभागेन शिशिरादिऋतुक्रमो जन्मनि ज्ञेयः तथा मकरकुंभमीनमेषवृषमिथुनराशिपूर्वार्धे शनिश्चेच्छिशिर ऋतुः तथा शुक्रश्चेद्वसंतः तथा भौमश्चेद्ग्रीष्मः तथा चंद्रश्चेद्वर्षा तथा बुधश्चेच्छरत् तथा गुरुश्चेद्धेमंतः एवं कर्कादिराशिषट्कोत्तरार्धे क्रमाच्छन्यादिषु स एव क्रमो ज्ञेयः इति अयं ग्रहाणां योगः प्रश्नजन्मलग्नयोरेव ऋतुसूचको ज्ञेयः यथा मकरं जन्मलग्नं प्रश्नलग्नं वा तत्र पूर्वार्धे शन्याद्यन्यतमे शिशिराद्यन्यतमः एवं कार्कादिषट्कान्यतमलग्ने साति तत्रोत्तरार्धे शन्याद्यन्यतमेऽपि शिशिराद्यन्यतम ऋतुर्ज्ञेय इति ॥ ५१ ॥

भाषा–अब प्रश्नकालमें जन्मकालमें अयनऋतुका ज्ञान कहते हैं. मकरराशिसे छः राशितक सूर्य होवे वो उत्तरायण. कर्कसे छः राशितक सूर्य

होवे तो दक्षिणायन जानना. अब ऋतुज्ञान कहते हैं प्रश्नलग्न जन्मलग्न मकर, कुंभ, मीन, मेष, वृषभ, मिथुन राशिके पूर्वार्धमें शनि होवे तो शिशिर ऋतु जानना वैसा शुक्र होवे तो वसंत जानना, मंगल होवे तो ग्रीष्म जानना, चंद्र होवे तो वर्षा जानना. बुध होवे तो शरत् जानना. गुरु होवे तो हेमंत जानना इस रीतिसे कर्क, सिंह, कन्या, तुला, वृश्चिक, धन इनके उत्तरार्धमें पूर्वसरीखे शनि आदि ग्रह होवें तो पूर्व कहे हुए ऋतु जानना. बहुधा यह नष्टपत्रिका करनेका विषय है ॥ ५१ ॥

अर्के ग्रीष्मस्ततोऽन्यैर्वा वाऽयनादृतुरेव च ॥ शुक्रा-
रमंदचंद्रज्ञजीवाश्च परिवर्तिताः ॥ ५२ ॥

टीका–अर्के इति सार्धेन । प्रश्नलग्नेऽर्के रवौ सति ग्रीष्मः ततोन्यैः क्रमशः ऋतव इति वा एतदुक्तं भवति । लग्ने रव्यादिशुक्रांतषड्ग्रहान्यतमः क्रमशो ग्रीष्माद्यन्यतमः क्रमादृतुः इति वेति अथ तत्रापि अयनादृतुः मृगकर्क्यादितः सूर्य इति पूर्वोक्तानयनवशादृतुज्ञानमिति । अथ च लग्ने ग्रहाभावे किमित्यत्राह शुक्रारेति । शुक्रारमंदचंद्रज्ञजीवाः लग्नद्रेष्काणपाः प्रवर्तिताः संतः द्रेष्काणदृष्ट्या ग्रीष्मादिऋतुग्रहणं अथवाऽपरे नवांशेन प्रश्नलग्ने यन्नवमांशतः ग्रहविहितः पूर्वोक्तरीत्या ऋतुग्रहणमिति मतांतरम् ॥ ५२ ॥

भाषा–प्रश्नलग्नमें सूर्य होवे तो ग्रीष्मऋतु, चंद्र होवे तो वर्षा, मंगल होवे तो शरत, बुध होवे तो हेमंत, गुरु होवे तो शिशिर, शुक्र होवे तो वसंत जानना. अथवा शुक्र, मंगल, शनि, चंद्र, बुध, गुरु ग्रह ग्रह लग्नके द्रेष्काणपति हैं इनके क्रमसे ग्रीष्मादि ऋतु जानना अथवा नवांशक्रमसे ऋतु जानना ॥ ५२ ॥

लग्नद्रेष्काणपाः प्रोक्ता नवांशेनैव चापरे ॥ तत्पूर्वप-
रतो मासौ तिथिः स्यादृतुपाततः ॥ ५३ ॥

टीका–अथ मासतिथिज्ञानमाह–तादित्यर्धेन । तत्पूर्वपरतो मासौ तस्य पूर्वोक्तरीत्या प्राप्तऋतौ पूर्वपरतो मासौ पूर्वार्धे एकमासः उत्तरार्धे द्वितीयमासः तादित्थं वृषभे मिथुने ग्रीष्मे इति न्यायेन पूर्वोक्तरीत्या ग्रीष्मर्तौ प्राप्तौ पूर्वार्धे वैशाख उत्तरार्धे ज्येष्ठः अथवा वसंतो मधुमाधवौ इति रीत्या ग्रीष्मर्तौ पूर्वार्धे ज्येष्ठः उत्तरार्धे आषाढ इति पक्षांतरम् । एवमेव तिथिस्तु अनुपाततः स्यात् ऋतोः भुक्तभोग्यानुपातेन तिथिर्ज्ञेयेति ॥ ५३ ॥

भाषा–अब मास तिथि ज्ञान कहते हैं. पूर्वमें जो ऋतु सिद्ध भया उसके पूर्वार्धमें पूर्व मास, उत्तरार्धमें उत्तर मास, जैसा ग्रीष्मऋतुमें वृषभ, मिथुन मास जानना। अथवा ग्रीष्मके पूर्वार्धमें ज्येष्ठ, उत्तरार्धमें आषाढ, यह मतांतर है ऐसी अनुपातसे तिथि जानना, ऋतुसे भुक्तभोग्यसे ॥ ५३ ॥

लग्नत्रिकोणगो जीवो नवांशस्थोऽथ वा भवेत् ॥
ज्ञात्वा वयोनुरूपेण ह्यनुमानवशात्समाः ॥ ५४ ॥
सूर्यास्थितांशतुल्यां वा तिथिं प्रोवाच भार्गवः ॥ राशौ
रात्रिदिवाख्ये च जन्म स्यात्तु विलोमतः ॥ ५५ ॥

टीका–अथ प्रश्नलग्नाद्वयोवर्षमाह–लग्नेति । लग्नात्प्रश्नलग्नात्सकाशात् त्रिकोणगो जीवश्चेत्तर्हि यस्मिन्राशौ वर्तमानस्तद्राशिस्थो यदा जीव आसीत्तस्मिन्वर्षे जन्म ज्ञेयम् । लग्नत्रिकोणगो न चेद्यत्र कुत्रापि राशौ यद्राशिनवांशे वर्तते तद्राशिस्थे जन्म बभूवेति ज्ञेयम् । ननु द्वादशवर्षवयोधिकस्य कथमिति चेदाह । वयोरूपेणानुमानवशात्समा ज्ञात्वा वदेत् यथा गुरुनवांशराशिर्मेषः तथा संप्राति वृषे गुरुर्वर्तमानः वयस्तु द्वादशवर्षाधिकः अनुमानतो ज्ञात्वा प्राक्तनाद्वितीयावृत्त्या मेषस्थे गुरौ वर्षे जन्म वक्तव्यं तथा चतुर्विंशाधिकेऽनुमानवयसि प्राक्तनतृतीयावृत्त्या मेषस्थे गुरौ जन्म ज्ञेयम् । एवमे-

वाग्रे षट्त्रिंशाऽधिकेऽनुमानवयसि प्राक्तनचतुर्थ्यावृत्त्या मेषार्के वर्षे जन्मेत्यादि वयोवर्षज्ञानम् ॥ ५४ ॥ अथ तिथिज्ञानं दिवारात्रिज्ञानं चाह–सूर्येति । सूर्यस्य स्थिता वर्तमाना येंऽशास्त्रिंशांशास्तत्तुल्यां तिथिं शुक्लप्रतिपदाद्यमांतान्यतमां भार्गवः प्रोवाच तथा प्रश्नलग्नराशौ रात्र्याख्ये दिवाजन्म तस्मिंश्च दिवाख्ये रात्रिजन्मेति विलोमतो ज्ञेयम् । अथ प्राणज्ञानमाह–गतेत्यर्धेन । गतप्राणैः जन्मकालात्प्राग्गतैरित्यर्थः । तैः करणभूतैः जन्मकाले ये प्राणा उपलभ्यंते ते एव जन्यकालीनाः प्राणा ज्ञेयाः ॥ ५५ ॥

भाषा–अब वर्षज्ञान कहते हैं, प्रश्न लग्नसे त्रिकोणस्थानमें गुरु होवे तो जिस राशिका गुरु है उस राशिका गुरु पहिले हो गया है, वो वर्षमें जन्मलग्न जानना. अवस्थाका अनुमान देखके वर्ष कहना. परंतु गुरु राशिका तो बारह बरसका परावर्तन है. और वयोमान बीचमें आता होवे तो गुरुनवांश राशि लेके वर्ष कहना ॥ ५४ ॥ अब तिथिका ज्ञान दिवारात्रिका ज्ञान कहते हैं. सूर्यके जितने अंश हैं उनके तुल्य तिथि शुक्राचार्य कहते आर प्रश्नलग्न रात्रिसंज्ञक होवे तो दिवा जन्म दिवस संज्ञक होवे तो रात्रि जन्म कहना ॥ ५५ ॥

गतप्राणैर्जन्मकाले ते च प्राणा भवंत्यथ ॥ यद्राशिगः शशी मासः समं वाऽस्पृशदंगकम् ॥५६॥ तत्रिकोणबलाधिक्यं राशिर्लग्नात्तु यावति ॥ चंद्रस्तावतिभं चापि जन्मलग्नं विनिर्दिशेत् ॥ ५७ ॥

टीका–अथ प्रश्नकालान्मासराशिलग्नज्ञानमाह–यादीति द्वाभ्याम् । प्रश्नकाले यद्राशिगः शशी स मासः मेषे चैत्र इत्यादिः । तथा शशी समं वा विषमं यदंगकं लग्नं अस्पृशत्तस्मात्त्रिकोणं पंचमनवमान्यतमं यद्बलाधिक्यं भवेत्स राशिर्ज्ञेयः । तथा लग्नात्प्रश्नलग्नाद्यावति

राशौ चंद्रस्तावति यद्भं राशिस्तज्जन्मलग्नं विनिर्दिशेत् मीने प्रश्नलग्ने मीन एव लग्नं एवमन्यैः प्रश्नलग्नैः अन्यल्लग्नभामिति वा प्रकारांतरम् ॥ ५६ ॥ ५७ ॥

भाषा—अब प्रश्नकालसे पूर्वमें जितने प्राण गये हों उतने प्राण जन्मकालमें जानना, अब प्रश्नकालसे मास, राशि लग्नज्ञान कहते हैं प्रश्नकालमें जिस राशिका चंद्र होवे वो महीना जानना, मेष राशिका होवे तो चैत्रमास जानना वैशाखचंद्रमा सम या विषम जिस लग्नको स्पर्श करे वहांसे नवम या पंचम घर बलवान् होवे वो राशि जानना. प्रश्नलग्नसे जितनी राशि ऊपर चंद्र होवे उतनी राशिका जन्मलग्न जानना. मीन प्रश्न लग्न होवे तो मीनलग्न अन्य लग्न होवे तो अन्य लग्न जानना ॥ ५६ ॥ ५७ ॥

मीने मीनं तु लग्नं वा तथान्यैस्त्वन्यलग्नभम् ॥ छायया
संयुता यामवारर्क्षतिथिराशयः ॥ ५८ ॥ यावंतस्तु
धनिष्ठादिजन्मर्क्षं तद्विनिर्दिशेत् ॥ कलांशादिषु
यत्प्रोक्तमृक्षं तद्वा भवेदिदम् ॥ ५९ ॥

टीका—अथ जन्मर्क्षज्ञानमाह—छाययेति । प्रश्नकाले छाया द्रष्टव्या तत्पदैः संयुता मिश्रिताः यामवारर्क्षतिथिराशयः प्रहरवारनक्षत्रतिथिराशयः यावंतो भविष्यंति तावत्संख्याकं धनिष्ठानक्षत्रादि गणनयोपलब्धं जन्मर्क्षं जन्मनक्षत्रं विनिर्दिशेत्कथयेत् ॥ ५८ ॥ अथ प्रकारांतरेण नक्षत्रज्ञानमाह—कलांशादिष्वित्यर्धेन । पूर्वकलांशादिषु यद्भं प्रोक्तं तदेवेदं जन्मर्क्षं वा भवेत् । तत्र विशेषप्रकारमाह कलांशेत्यर्धेन । कलांशेभ्यः सकाशादर्धहोरान्तं अर्धहोरापर्यंतं ये प्रोक्ता होराः तैः विभावयेज्जानीयादिति ॥ ५९ ॥

भाषा—अब जन्मनक्षत्र ज्ञान कहते हैं. प्रश्नकालमें पादछाया करके उसमें प्रहर, वार, तिथि नक्षत्रसंख्या मिलावे, सत्तावीससे ज्यादा होवे तो २७

का भाग लेवे जो संख्या है उतनी संख्यातुल्य धनिष्ठादि गणनासे जन्मनक्षत्र जानना ॥ ५८ ॥ अब प्रकारांतर कहते हैं. पूर्वमें कलांशादिकमें जो नक्षत्र कहा है वो नक्षत्र जानना, कलांशसे अर्ध होरापर्यंत जो कहे हैं उतनी होरा जानना ॥ ५९ ॥

कलांशाद्यर्धहोरांतं प्रोक्तहोरैर्विभावयेत् ॥ पृथग्लिप्तीकृतं लग्नं वर्गणाभिर्हतं पुनः ॥६०॥ आरूढच्छत्रयोर्वीर्यबलस्य वर्गणाहतम् ॥ ओजे योगः समे हानिरिति तस्य विधीयते ॥ ६१ ॥

टीका–अथ प्रकारांतरेण मासादीनाह–पृथगित्यादिसार्धैकषष्टिपर्यंतम् । लग्नं पृथग्विधा स्थापयित्वा कलीकृतं वर्गणाहतं कृत्वा पुनः आरूढच्छत्रयोर्मध्ये यो वीर्येण बलवान् तस्य वर्गणाभिः हतं ओजे विषमे सति पृथक्कृतस्य योगः कार्यः समे सति तु हानिः पृथक्कृतास्यज्जात् इत्येवं प्रकारं तस्य विधानं ततः तत् स्वैः स्वैः मासे द्वादशभिः दिवसे त्रिंशद्भिरित्यादिभागैर्भक्तं तत्तथा पूर्वोक्तरीत्या मासादयः स्मृताः ॥ ६० ॥ ६१ ॥

भाषा–अब प्रकारांतरसे मासादिज्ञान कहते हैं. लग्न दो ठिकाने मांडके कला करके स्ववर्गसे गुणन करके पुनः आरूढछत्रमें जो बलवान् होवे उसके वर्गसे गुणन करके विषम होवे तो पृथक्में मिलाना. सम होवे तो पृथक्मेंसे कमी करना पीछे १२ से भाग लेना तो मास जानना. तीससे भाग लिये तो दिवस जानना ॥ ६० ॥ ६१ ॥

स्वैः स्वैर्भागैश्च भक्तं तत्तथा मासादयः स्मृताः ॥ यद्वा कलीकृतं लग्नं तथा कुर्याद्विचक्षणः ॥ ६२ ॥ भावकस्य च शुद्धिं च योगं चैव करोत्यतः ॥ नव-

मिश्च कलांशाद्यैस्तथैवोच्चादिभिः क्रमात् ॥ ६३ ॥
एकाशीतिभिदाः संति नवकाद्यंगशोधनैः ॥ येषां
योगगते काले समांतेषु सतां यतः ॥ ६४ ॥

टीका-अथ प्रकारांतरेण मासाद्यानयनमाह-यद्वेति चतुःषष्टिपर्यंतम् । यद्वाथवा लग्नं कलीकृतं सत् तथा पूर्वोक्तवत्कुर्यात् ततः भावशुद्धिं कृत्वा प्राग्वत्पृथक्कृतस्य योगं कृत्वा नवभिः कलांशाद्यैः प्रकारैः तथोच्चत्रिकोणादिप्रकारैश्च क्रमादेकाशीतिभिदाः भवंति तासु नवकाद्यंगशोधनैर्येषां सतां योगगते काले समाप्तेषु तेषु तत्तन्यासादि बोद्धव्यामिति ॥ ६२ ॥ ६३ ॥ ६४ ॥

भाषा-अथवा लग्नकी कला करके पूर्वसरीखी सब गणितक्रिया करके भावशुद्धि करके पृथकूसे मिलायके नवकलांशसे और उच्चत्रिकोणादि प्रकारसे इक्यासी भेद होते हैं, उनमें नवकाद्यंगशोधनसे जहां अवसान आवे वहां मासादिक जानना ॥ ६२ ॥ ६३ ॥ ६४ ॥

राशिस्तु बलवान्स्वामिगुरुज्ञप्रेक्षणान्वितः ॥ अन्यैः
पापैरदृष्टः स्याच्छुभदृष्ट्या प्रयोजयेत् ॥ ६५ ॥

टीका-अथ लग्नस्य बलवत्त्वमाह-राशिरिति । राशिर्लग्नं स्वामिगुरुज्ञप्रेक्षणान्वितः पतिगुरुबुधानां पूर्णदृष्ट्या युतः बलवान् भवाति अन्यैः पापैः स्वामिभिन्नैः पापग्रहैः अदृष्टः सन् शुभदृष्ट्या गुरुबुधव्यतिरेकेणापि अन्यशुभग्रहदृष्टिवशेन च तस्य बलवत्त्वं प्रयोजयेदिति ॥ ६५ ॥

भाषा-अब लग्नका बल कहते हैं. जिस लग्नको अपना गुरु, बुध, पूर्णदृष्टिसे देखते होवें तो लग्न बलवान् जानना. परंतु अपने स्वामीविना अन्य पापग्रहसे दृष्ट न होवे और शुभ ग्रहसे दृष्ट होवे तो, बलवत्त्व जानना ॥ ६५ ॥

चंद्रार्काचार्यशुक्रज्ञाः पादं मित्रभकर्मणि॥ पश्यंति च शनिः पूर्णमथ धर्मसुतौ गुरुः ॥ ६६ ॥ सर्वेऽर्धंबंधुमृत्यू च पूर्णं पश्यति भूमिजः ॥ परे त्रिपादं पूर्णं च सर्वे पश्यंति सप्तमम् ॥ ६७ ॥

टीका-अथ ग्रहणां दृष्टिमाह-चंद्रेति द्वाभ्याम् । चंद्ररविगुरुशुक्रबुधाः भौमश्च मित्रभकर्मणि तृतीयदशमस्थाने पादं पाददृष्ट्या पश्यंति शनिस्तु तृतीयदशमस्थानद्वयं पूर्णं पश्यति एवं धर्मसुतौ नवमपंचमस्थाने सर्वे ग्रहा अर्धं गुरुस्तु ९ । ५ एतत्स्थानद्वयं पूर्णं पश्यति एवमेव बंधुमृत्यू चतुर्थाष्टमे भूमिजो भौमः पूर्णं पश्यति परे सर्वे ४।८ एतत्स्थानद्वयं त्रिपादं त्रिपाददृष्ट्या पश्यंति । अथ सर्वेऽपि रव्यादिशन्यंताः सप्तमं स्थानं पूर्णदृष्ट्या पश्यंतीति ॥ ६६ ॥ ६७ ॥

भाषा-अब ग्रहोंकी दृष्टि कहते हैं. सू० चं० मं० बु० गु० शुक्र ३ । १० वें घर ऊपर पाददृष्टिसे देखते हैं; शनि ३ । १० वें घर ऊपर पूर्णदृष्टिसे देखते हैं ९ । ५ वें घर ऊपर सब ग्रह द्विपाददृष्टिसे देखते हैं, परंतु गुरु पूर्ण दृष्टिसे देखता है, वैसा ४।८ वें घर ऊपर मंगल पूर्णदृष्टिसे देखता है. दूसरे सर्व ग्रह त्रिपाददृष्टिसे देखते हैं. और ७ घरमें सूर्यादि सात ग्रह पूर्ण दृष्टिसे देखते हैं ॥ ६६ ॥ ६७ ॥

उच्चमूलसुहृत्स्वर्क्षस्वद्रेष्काणनवांशके ॥ स्थितस्य स्थानवीर्यं स्यात्कुजार्कौ दशमे शनिः ॥ ६८॥ सप्तमे ज्ञगुरू लग्ने चन्द्रशुक्रौ तु वेश्मनि ॥ दिग्वीर्यसंयुता एते नाऽन्यत्र प्रश्नकर्मणि ॥ ६९ ॥

टीका-एवं ग्रहाणां दृग्बलमुक्त्वा स्थानबलं दिग्बलं चाह-उच्चेति द्वाभ्याम् । अथ स्वोच्चमूलत्रिकोणस्वसुहृत्स्वराशिस्वद्रेष्काणस्वनवां-

शके। समाहारे एकवचनम् एषु स्थानेषु स्थितस्य स्थानवीर्यं स्यादिति ज्ञेयम्। अथ लग्नाद्दशमस्थाने कुजार्कौ सप्तमे शनिः लग्ने ज्ञगुरू वेश्मनि चतुर्थे चंद्रशुक्रौ चेति ग्रहाः प्रश्नकर्मणि दृग्वीर्ययुता भवंति एतेऽन्यत्र विषये नेति ॥ ६८ ॥ ६९ ॥

भाषा—अब ग्रहोंका स्थानबल दिग्बल कहते हैं. जो ग्रह स्वक्षेत्र उच्च मूल त्रिकोण मित्र अधिमित्र राशिका होवे और स्वनवांश स्वद्रेष्काणमें होवे तो स्थानवीर्य जानना. अब दिग्बल कहते हैं. प्रश्नलग्नसे १० घर सूर्य, मंगल दिग्बली जानने. ७ वें घर शनि दिग्बली जानना. १ घरमें बुध गुरु दिग्बली जानने. ४ घरमें चंद्र शुक्र दिग्बली जानने. यह प्रश्नकर्ममें दिग्बल जानना. अन्य जातक मुहूर्तमें नहीं लेना ॥ ६८ ॥ ६९ ॥

मृगादिराशिषट्कस्थाश्चंद्रार्कज्ञार्यभार्गवाः ॥ बलवंतः कुजार्कौ तु कर्कटादिगतौ तथा ॥ ७० ॥

टीका—अथायनबलमाह—मृगेति। मृगादि मकरादि यन्मिथुनांतं राशिषट्कं तत्रस्थाः चंद्ररविबुधगुरुशुक्राः तथा कुजार्कौ भौमशनी तु कर्कटादिगतौ कर्कादिधनुर्मर्यादराशिषट्कगतौ च बलवंतः अयनबलिनो भवंति ॥ ७० ॥

भाषा—अब अयनबल कहते हैं. मकरसे मिथुनपर्यंत छः राशिमें सूर्य, चंद्र, बुध, गुरु, शुक्र यह पांच ग्रह होवें तो अयनबली जानने. और कर्कसे धनपर्यंत छः राशिमें मंगल, शनि, यह दोनों होवें तो अयनबली जानने ॥ ७० ॥

पूर्वपक्षे शुभे कृष्णे पापास्तु बलिनस्तथा ॥ वक्रिणो बलिनः खेटाश्चेष्टाबलसमन्विताः ॥ ७१ ॥ शुभाः पापा दिवा रात्रौ बलिनः स्युः क्रमात्स्मृताः ॥ निसर्गबलिनः प्राग्वदेवं स्युः प्रश्नकर्माणि ॥ ७२ ॥

टीका-अथ पक्षचेष्टादिवारात्रिनिसर्गबलान्याह-पूर्वेतिद्वाभ्याम् । शुभाः ग्रहाः पूर्वपक्षे शुक्लपक्षे तथा पापाः खलास्तु कृष्णपक्षे बलिन इति प्रश्ने पक्षबलं ज्ञेयम् । अथ वक्रिणः वक्रंगताः खेटाः चेष्टाबलसमन्विताः बलिनः नाम चेष्टाबलवंत इति चेष्टाबलम् अथ शुभाः दिवाबलिनः पापाः रात्रौ बलिनः क्रमात्स्मृताः इति दिनरात्रिबलम् । निसर्गबलिनः प्राग्वत्पूर्वोक्तरीत्या ज्ञेयाः एवं प्रश्नकर्मणि षड्बलं कथितमिति ॥ ७१ ॥ ७२ ॥

भाषा-अब पक्षबल कहते हैं. शुक्लपक्षमें शुभग्रह बलवान् जानने. कृष्णपक्षमें पापग्रह बलवान् जानने. अब चेष्टाबल कहते हैं. वक्री ग्रह चेष्टाबली जानने. अब दिवारात्रिबल कहते हैं शुभग्रह दिवाबली जानना. पापग्रह रात्रिबली जानना. निसर्ग बल पहिले सरीखा जानना इस तरह प्रश्नकालके षडबल कहै ॥ ७१ ॥ ७२ ॥

लग्नहोराद्रेष्काणार्कनवांशाः सप्तमांशकः ॥ कलांशः
कालहोरा च त्रिंशांशः षष्टिभाजकः ॥ ७३ ॥

टीका-अथ दशवर्गबलमाह-लग्नेति सार्धेन । लग्नं १ होरा २ द्रेष्काणः ३ अर्को द्वादशांशः ४ नवांशः ५ सप्तांशः ६ कलांशषोडशांशः ७ कालहोरांशः ८ त्रिंशांशः ९ षष्टिभागकः १० एवं दशवर्ग्यां पूर्वपूर्वः उत्तरापेक्षया पूर्वो बली प्रोक्तः उत्तरोत्तरः पूर्वापेक्षया न बली हीनबली इत्यर्थः । इति दशवर्गबलम् ॥ ७३ ॥

भाषा-अब दशवर्ग उत्तरोत्तरबली कहते हैं. लग्न १, होरा २, द्रेष्काण ३, द्वादशांश ४. नवांश ५, सप्तांश ६, षोडशांश ७, कालहोरांश ८, त्रिंशांश ९, षष्ट्यंश १०, यह उत्तरोत्तर हीनबली जानने ॥ ७३ ॥

पूर्वपूर्वो बली प्रोक्तो न बली चोत्तरोत्तरः ॥ प्रश्नलग्नं
कलीकृत्य नवघ्नं भेनभाजितम् ॥ ७४ ॥ लब्धं नवांशकं ज्ञेयं शिष्टमात्मकसंस्थिते ॥ लब्धं सप्तगुणं

वेदभक्तं शिष्टमिहांशकः ॥ ७५ ॥ नवांशसदृशं लग्नं यद्वा त्रिघ्नार्कभाजितम् ॥ सप्ताप्तशिष्टं लग्नं च सप्तमे मासि निश्चिते ॥ ७६ ॥

टीका-अथ प्रश्नलग्नाज्जन्मलग्नमाह-प्रश्नलग्नं कलीकृत्येत्यादिभिस्त्रिभिः श्लोकैः । प्रश्नलग्नस्य कलां कृत्वा नवसंख्यया गुणितं कृत्वा पश्चाद्नेन सप्तविंशतिसंख्यया भागः कार्यः ततश्च यल्लब्धं तन्नवमांशसंज्ञकं ज्ञेयम् ततश्च यच्छिष्टं तदेकत्र संस्थाप्य लग्नसंख्यां सप्तभिर्गुणितां कृत्वा चतुर्भिर्विभज्य च यल्लब्धं तन्नवमांशसंज्ञकं जातं तादृशनवमांशसंज्ञकसंख्या जन्मलग्नस्य बोद्धव्या अथवा पूर्वाऽवशिष्टसंख्यया त्रिगुणीकरणं कृत्वा द्वादशभिर्विभज्य यदवशिष्टं तज्जन्मलग्नं बोद्धव्यम् । अथवा शेषसंख्यां सप्तभिर्विभाज्य यल्लब्धं तत्सप्तममासस्य लग्नमवगंतव्यं स राशिः शुभग्रहयुक्तः स्याच्चेत्तदेव कर्मनक्षत्रं जन्मनक्षत्रं वा ज्ञातव्यम् ॥ ७४ ॥ ७५ ॥ ७६ ॥

भाषा-अब प्रश्नसे जन्मकाल कहते हैं प्रश्नलग्नकी कला करके नवसे गुणन करना पीछे सत्ताईससे भाग लेना. लब्ध जो आवे वो नवमांश जानने. शेषको एकतरफ रख छोडना. पीछे लब्धको सातगुणे करके चारसे भाग लेना. जो लब्ध है वो नवांश जानना वह नवांश सदृश लग्न जन्मका जानना. अथवा उसको त्रिगुणित करके बारहसे भाग लेना. वो शेष जन्मलग्न जानना. अथवा शेषको सातसे भाग लेके जो आवे वो लग्न सातवें महीने जानना. शुभग्रहकी राशि होवे तो वही कर्मनक्षत्र वा जन्मनक्षत्र जानना. ॥ ७४ ॥ ७५ ॥ ७६ ॥

सौम्ये तदेव कर्मर्क्षं जन्मर्क्षं वा भवेद्ध्रुवम् ॥ इदं शास्त्रं मया प्रोक्तमाद्यन्तं तव सुव्रत ॥ ७७ ॥ नाशिष्याय प्रदातव्यं नापुत्राय कदाचन ॥ गुणशीलयुतायैव

शिष्यायैव द्विजातये ॥ दातव्यं तु प्रयत्नेन वेदांगमिदमुच्यते ॥ ७८ ॥ इति श्रीबृहत्पाराशरहोरोत्तरभागे प्रश्नकरणंनामाऽष्टादशोऽध्यायः ॥ १८ ॥

टीका–अथास्य शास्त्रस्य वेदांगत्वं प्रतिपादयन्नध्याय्यधिकारं च प्रतिपादयन्नुपसंहरति–इदमिति द्वाभ्याम् । हे सुव्रत ! उत्तमाचारसंपन्न मैत्रेय ! इदमुक्तप्रकारकं शास्त्रं ज्योतिःशास्त्रं आद्यंतं समग्रमित्यर्थः । तव प्रोक्तम् अशिष्याय कुशिष्यायेत्यथः तथा पुत्राय कुपुत्रायेत्यर्थः । कदाचन न प्रदातव्यं यत इदं उत्तमं त्रिकालजनकत्वादुत्कृष्टं तथा वेदांगं वेदानामवयवीभूतं वेदमूलत्वात्सर्वमान्यमिति भावः ॥ ७७ ॥ ७८ ॥ इति होरागमे त्वार्षे पराशरगुरूदिते ॥ उत्तरार्धोऽष्टादशेत्राध्यायेव्याख्यापितं मया ॥ इति बृ० उत्तरभागे श्री० ज्योतिर्विच्छ्रीधरेण विरचितायां सुबोधिनीटीकायां प्रश्नकरणं नाम अष्टादशोध्यायः ॥ १८ ॥

भाषा–अब शास्त्रका वेदांगत्व प्रतिपादन करते हैं. हे मैत्रेय ! यह जो कहा आद्यन्त ज्योतिःशास्त्र सो कुपुत्रको और कुशिष्यको कदापि देना नहीं जो गुणवान् शीलवान् होवे, उसको प्रयत्न करके देना. यह शास्त्र त्रिकाल ज्ञानदायक है. उत्तम वेदांग वेदके नेत्र हैं. वेदमूल है इस वास्ते सर्वमान्य है ॥७७॥७८॥ इति बृ० भाषाटीकायामष्टादशोऽध्यायः ॥ १८ ॥

अध्यायानुक्रमं वक्ष्ये त्वादौ शास्त्रावतारणम् ॥ प्रादुर्भावो ग्रहाणां तु द्वितीये च प्रकीर्तितः ॥ १ ॥ ततो राशिस्वभावश्च चतुर्थे दृष्टिवर्णनम् ॥ गर्भाधानं ततः पश्चात्सूतिकाविधिरेव च ॥ २ ॥ अरिष्टं सप्तमाऽध्याये सुतस्य तदनंतरम् ॥ पित्रोश्च मातुलादीनां

तद्भंगो दशमात्स्मृतः ॥ ३ ॥ धूमाद्येकादशे मिश्रः पंचांगानां फलं तथा ॥ कारकादि फलं तद्वद्भावानां च फलं तथा ॥ ४ ॥ द्वादश द्वादशाऽध्याये द्विग्रहाद्याश्च षट् स्मृताः ॥ अष्टवर्गादि चैकस्मिन्नाभसादिस्तु चापरे ॥ ५ ॥ चिरायुषादियोगाश्च पंचाध्यायास्ततः परम् ॥ राजयोगास्तथावस्था अंतर्दायविधिस्ततः ॥ ६ ॥ दायानां च फलं सप्तस्वंतर्दायस्त्रयोदश ॥ लक्षणं भूपवर्गाणां योगादिषु बलं ततः ॥ ७ ॥

टीका-एकोनविंशेऽध्यायेस्मिन्ननुक्रम उदीर्यते ॥ श्रीगणेशः प्रेरयतु सम्यग्व्याख्याकृताविह ॥ १ ॥ अथ श्रीमहर्षिः उक्तशास्त्रानुक्रमं सुखेनेष्टविषयोपलब्धये कथयति-अध्यायेत्यादिसार्धसप्तभिः । हे मैत्रेय ! उक्ताध्यायानामनुक्रमं वक्ष्ये कथयिष्ये तत्रादौ प्रथमाध्याये शास्त्रावतारणं शास्त्रोत्पत्तिः ततः द्वितीये ग्रहाणां रव्यादीनां प्रादुर्भावः प्रकटीभावः तृतीये राशीनां मेषादीनां स्वभावश्चतुर्थे दृष्टिवर्णनं ततः पश्चात्पंचमे गर्भाधानं षष्ठे सूतिकाविधिः सप्तमेऽरिष्टं अनंतरमष्टमाध्याये सुतस्य पुत्रादिसंततेः पित्रोर्जननीजनकयोश्च विचारः नवमे मातुलादीनां विचारः दशमे तेषां पूर्वयोगानां भंगविचारः एकादशे धूमादिग्रहविचारः द्वादशमारभ्य त्रयोविंशत्यध्यायपर्यंतं द्वादशाध्यायेषु मिश्रफलं वा मिश्रफलाध्यायः पंचानां फलं च तथा कारकादिफलं द्वादशभावानां फलं च द्विग्रहाद्याः षट् योगास्तत्र षडध्यायाः स्मृताः एकस्मिन्नध्यायेऽष्टवर्गादि कथितम् अपरेषु विंशत्यध्यायेषु नाभसादियोगानाह ततः पंचाध्यायाः एषु चिरायुषादियोगः ततः राजयोगाः ततोऽवस्थाविचारः ततोंतर्दायाविधिः ततः दायानां फलं सप्तस्वध्यायेषु ततः

अंतर्दायास्त्रयोदशाध्यायाः ततः भूपवर्गाणां लक्षणं ततोवाशिष्टेषु योगादिषु यद्बलं तदुक्तमिति पूर्वभागेऽशीतिरध्याया उक्तविषयज्ञापकाः क्रमात्समीरिताः कथिताः । इति पूर्वार्धानुक्रमः ॥ १ ॥ २ ॥ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

भाषा—अब यह उन्नीसवें अध्यायमें पूर्व भाग और उत्तर भागका विषयानुक्रम कहते हैं. पहिले अध्यायमें शास्त्रोत्पत्ति कही. दूसरेमें सूर्यादिग्रहोंका प्रादुर्भाव कहा. तीसरेमें मेषादिराशिका स्वभाव कहा. चौथे अध्यायमें दृष्टिका वर्णन. पांचवें अध्यायमें गर्भाधाननिर्णय, छठे अध्यायमें सूतिकाविधान कहा- सातवें अध्यायमें अरिष्टयोग. आठवें अध्यायमें पुत्र, माता, पिता इनका विचार. नवमें मातुलादिकका विचार. दसवें अध्यायमें योगभंगविचार. ग्यारहवें अध्यायमें धूमादिग्रहोंका विचार. बारहवें अध्यायसे लेके तेईस अध्यायतक (बारह अध्यायमें) मिश्रफल. पचांगका फल. कारकादिग्रहोंका फल. बारह भावोंका फल कहे हैं. द्विग्रहादि छः योगोंके फलके छः अध्याय. अष्टकवर्गका वर्णन. २० अध्यायमें नाभसादियोगोंका वर्णन अनंतर चिरायुष्यका योगविचार उसके अध्याय ५, आगे राजयोगवर्णन फिर अवस्थाविचार १ अध्यायमें. पीछे अंतर्दायविधि एक अध्यायमें दायका फल सात अध्यायमें अंतर्दशाका विचार १३ अध्यायमें राजवर्गका लक्षण १ में फिर बाकी जो अध्याय रहे उनमें योगादिकके विषयमें जो बलाबल कहा है, उसका विचार ऐसा (८०) अध्याय पूर्वभागका विषयानुक्रम कहा ॥ १ ॥ २ ॥ ३ ॥ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

एवं त्वशीतिरध्यायाः पूर्वभागे समीरिताः ॥ कलौ युगे ततः प्रोक्तं प्रथमेऽष्टकवर्गकः ॥ ८ ॥ द्वितीये भावदृग्वीर्यमिष्टकष्टबलं ततः ॥ चतुर्थे रश्मिसंभूतिरिष्टकष्टं द्विजोत्तम ॥९॥ लोकयात्रैकदेशे च पंचमे

च ततः परम् ॥ भंगं च लोकयात्राणामेकदेशस्य चाष्टमे ॥ १० ॥ नवमे लोकयात्रा च दशमे दाय एव च ॥ अंतर्दायस्तथाऽध्याये दायानां विषयस्ततः ॥ ॥११॥ त्रयोदशे तथा भाग्यं कलांशादिफलं द्विज ॥ चतुर्दशेऽब्दचर्यां च विजानीहि ततः परम् ॥ १२ ॥ अब्दचर्याफलं पश्चान्मासचर्याफलं ततः ॥ दिनचर्यां ततः प्रश्नजातक प्रब्रवीति हि ॥ १३ ॥ अध्यायानुक्रमं पश्चाद्विंशे शास्त्रफलं द्विज ॥ एवं होराशताध्यायी सर्वपापप्रणाशिनी ॥ १४ ॥ युगेषु च चतुर्ष्वेव प्रत्यक्षफलदायिनी ॥ १५ ॥

इति श्रीबृ॰होरोत्तरभागेऽध्यायानुक्रमवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

टीका–अथोत्तरार्धानुक्रमणिकामाह–कलाविति सार्धसप्तभिः ततः पूर्वार्धकथनानंतरं उत्तरार्धे कलियुगे कलियुगनरविषये यत्प्रोक्तं तस्यानुक्रमो यथा–प्रथमेऽध्यायेऽष्टकवर्गः द्वितीये भावदृग्वीर्यं भावबल दृष्टिबलं च तृतीये इष्टकष्टबलं चतुर्थे रश्मिसंभूतिः रश्म्युत्पादितेष्टकष्टफलं पंचमे लोकयात्रैकदेशः षष्ठे सप्तमे च तद्भंगः अष्टम पुनर्लोकयात्रैकदेशः नवमे लोकयात्रा दशमे दायः एकादशेंऽतर्दायः ततः द्वादशाध्यायें दायानां विषयः त्रयोदशाध्याये भाग्यं कालांशादिफलं षोडशांशादिफलं हे द्विज ! चतुर्दशेऽब्दचर्यां विजानीहि ततः परं तदनंतरं पंचदशाध्याये उक्ताब्दचर्यायाः फलं पश्चात् षोडशाध्याये मासचर्याफलं ततः सप्तदशे दिनचर्या ततोष्टादशेऽध्याये प्रश्नजातकं ब्रवीति कथयाति हीति निश्चयेन पश्चादेको-

नविंशेऽध्यायानुक्रमं अनुक्रमाणिका हे द्विज ! विंशे शास्त्रफलं कथितम् । एवं होराशास्त्रे पूर्वार्धोत्तरार्धवर्तमानशताध्यायी सर्वपापप्रणाशिनी पठत श्रोतुश्चेति शेषः । चतुर्ष्वपि युगेषु प्रत्यक्षफलदायिनी परोक्षस्यापि प्रत्यक्षवज्ज्ञानरूपफलदायिनीति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ ॥ १३ ॥ १४ ॥ १५ ॥

एकोनविंशत्यध्याये कृता व्याख्या यथामति ॥ बुद्धिदाता गणेशोऽयं प्रसन्नोऽस्तु सदा मम ॥ १ ॥ इति श्रीमद्बृहत्पाराशरहोरोत्तरभागे श्रीमद्ध्यड्न्वयवेदशास्त्राद्यनवद्यविद्याविद्योतितदशदिङ्मण्डलजटाशंकरसूनुज्योतिर्विच्छ्रीधरेण धौरेयोपाभिधश्रीकृष्णसहायेन विरचितायां सुबोधिनीटीकायां अध्यायानुक्रमवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

भाषा—अब उत्तरभागका अनुक्रम कहते हैं. प्रथमाध्यायमें अष्टवर्गका विचार, दूसरेमें भावबल, दृष्टिबलविचार, तीसरे अध्यायमें इष्टकष्टका विचार, और चौथे अध्यायमें रश्मिकी संभूति, इष्टकष्टबल, पांचवें अध्यायमें लोकोंका सुखदुःखविचार, छठे, सातवेंमें उसका भंग, आठवेंमें लोकयात्रा, नवम अध्यायमें लोकयात्रा, दशवें अध्यायमें दायविचार, ग्यारहवें अध्यायमें अंतर्दायविचार, बारहवें अध्यायमें दायविषय, तेरहवें अध्यायमें भाग्यविचार, कलांशादिफल, षोडशांशादिफल, चौदहवें अध्यायमें वर्षचर्याविचार, पन्द्रहवें अध्यायमें वर्षचर्याफल, सोलहवें अध्यायमें मासचर्या, सतरहवेंमें दिनचर्या अठारहवें अध्यायमें प्रश्नविद्या, उन्नीसवें अध्यायमें ग्रंथानुक्रमणिका, बीसवें अध्यायमें शास्त्रफलादेश, ऐसा यह होराशास्त्र पूर्वार्द्ध उत्तरार्ध सहित सौ १०० अध्यायका जो कोई पठन करे, या श्रवण करे, उसके पापनाश करनेवाला चारों युगमें प्रत्यक्षफलदायक है. उसमें कलियुगमें विशेष करके है ॥ ८ ॥ ९ ॥ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

इति बृ० भाषा टीकायामेकोनविंशोऽध्यायः ॥ १९ ॥

होराशास्त्रमिदं सर्वं श्रद्धाविनयसंयुतः ॥ श्रुत्वा गुरुमुखादेव बुद्धिमानवलोक्य च ॥ १ ॥ यो जानाति स शास्त्रार्थं सर्वपापैः प्रमुच्यते ॥ श्रावयेद्दर्शयेद्विद्वानन्यो गर्गो द्विजोत्तमः ॥ २ ॥

टीका-श्रीगणेशमथो नत्वा विंशे टीकां यथामति ॥ कुर्वे शास्त्रफलं चाऽत्र शास्त्रस्यापि परंपराम् ॥ १ ॥ श्रीमन्महर्षिरस्मिन्विंशाऽध्याये शास्त्रफलं शास्त्रपरंपरां चाह-होरेति पंचश्लोकाध्यायेन । तत्राद्यसार्धद्वयेन फलं चाह । इदं मयोक्तं सर्वं होराशास्त्रं श्रद्धाविनयसंयुतः शास्त्रगुरुवचनविश्वासरूपा श्रद्धा विनयो गुर्वादिषु लीनत्वं ताभ्यां संयुतः गुरुमुखादेव न स्वयमेव एतच्छास्त्रं श्रुत्वा बुद्धिमान्सन्नवलोक्य स्वयं सम्यग्विचार्य य एतच्छास्त्रार्थं जानाति स गुरुशास्त्रप्रभावेण सर्वज्ञः स्यादेव किंतु फलांतरमपि सर्वपापैः प्रमुच्यते इति । ततोऽधिकारी सन्नन्याञ्छ्रावयेत् दर्शयेच्च । ननु नक्षत्रसूचकः श्राद्धप्रकरणे मन्वादिभिः सदोषत्वादग्राह्यः श्राद्धे उक्तः अतः अस्य पातके शंकेति चेत्सर्वोत्तमगतिमस्य ज्ञातुर्दर्शयति ब्रह्मलोकं स गच्छतीति ॥ १ ॥ २ ॥

भाषा-अब शास्त्रका फल और शास्त्रपरंपरा कहते हैं. यह जो होराशास्त्र मैंने कहा उसको गुरुमुखसे पढके.उसका विचार करना, तो ज्ञान होवेगा; पीछे गुरुशास्त्रके प्रभावसे सर्वज्ञ होवेगा, और पापसे मुक्त होवेगा, और दूसरे सज्जनको श्रवण करवाना, दिखलाना, और इस शास्त्रके सम्यग्ज्ञानसे ब्रह्मलोकको जाता है ॥ १ ॥ २ ॥

सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥ वेदेभ्यश्च समुद्धृत्य ब्रह्मा प्रोवाच विस्तृतम् ॥ ३ ॥

टीका-नन्वस्य शास्त्रस्य स्वीकाराद्ब्रह्मलोकावाप्तिवचनमर्थवादः वेदपठनवद्विशेषपुण्यदर्शनाभावात्कृतकत्वाच्चेति चेन्नेत्याह-वेदेभ्य इत्यर्धकद्वयेन । ब्रह्मा वेदेषु विस्तृतं विशेषेणोक्तं वेदेभ्यः समुद्धृत्यैतदाद्यं शास्त्रं प्रोवाच गर्गायेति शेषः । ननु पराशरकृतस्य कथमाद्यत्वं तदाह वेदांगमिति । नैवैतदन्यवत्कृतकमिति शंकनीयमिति ध्वनिः । ननु इति चेत्को वाऽयं वेदस्यावयव इति तत्राह वेदचक्षुषी ".ज्योतिषामयनं चक्षुः " इति शिक्षोक्तेः । वेदनयने सर्वाऽवयवेषु विशेषज्ञानशक्तिमान्नयनावयवः तत्स्थानापन्नत्वाद्विशेषज्ञानोत्पादकम् अतिश्रेष्ठमिति भावः । तस्मादेतत्पठनादिना वेदपठनादिवद्ब्रह्मलोकाप्तिफलैकवचनं यथार्थं नार्थवाद इति दिक् ॥ ३ ॥

भाषा-ब्रह्माजीने पूर्वकालमें वेदोंमेंसे उद्धार करके यह आद्य ज्योतिःशास्त्र गर्गमुनिको कहा. यह शास्त्र वेदका नेत्ररूपी अंग है ॥ ३ ॥

शास्त्रमाद्यं तदेवेदं वेदांगं वेदचक्षुषी ॥ गर्गस्तस्मादिदं प्राह मया तस्माद्यथा तथा ॥ ४ ॥ तदुक्तं तव
मैत्रेय शास्त्रमाद्यं तमेव हि ॥ ५ ॥

इति श्रीबृहत्पाराशरहोरायामुत्तरभागे फलश्रुतिकथनं नाम विंशोऽध्यायः ॥ २० ॥

टीका-अथास्य परंपरामाह-गर्ग इति । इदं शास्त्रं तस्माद्ब्रह्मणोऽवगम्य गर्गः प्राह । मामिति शेषः । अहमपि तस्माद्गर्गाद्यथा जानामि तथा तच्छास्त्रं आद्यंतम् आदितोऽन्तपर्यंतं सर्वमेव मया तवोक्तं हीति निश्चयेन इति ॥ ४ ॥ ५ ॥ बृहत्पाराशरे होराशास्त्रेऽस्मिन्नुत्तरार्धके ॥ यथामति कृता टीका गणेशायार्पिताऽस्त्वियम् ॥ १ ॥ आर्षमाद्यमिदं शास्त्रं सुबोधं बहुसंग्रहम् ॥ लुप्तीभूतं समालोक्यैतत्प्रवृत्तिधिया मया ॥ २ ॥ भ्रामंभ्रामं बहून्देशान्वर्षैः कतिपयैरयम् ॥ यतोयतो

यथा लब्धो यावान्यात्रांस्ततस्ततः ॥ ३ ॥ तथा तावान्समादाय ग्रंथः संपादितो मया ॥ अकारि टीकाऽपि बुधानाश्रित्येह यथामात ॥ ४ ॥ अनेकपुस्तकालाभात्प्रमादाल्लेखकस्य च ॥ अशुद्धे पुस्तकेऽप्यस्मिन्यावद्बुद्धिबलोदयम् ॥ ५ ॥ कृत्वा शोधं कृता टीका न्यूनमत्राऽधिकं च यत् ॥ क्षमाप्य सर्वं विद्वांसः कृपया शोधयंत्वपि ॥ ६ ॥ इति श्रीबृहत्पाराशरहोराशास्त्रे उत्तरार्धे श्रीमद्ध्यङ्कन्वयवेदशास्त्राद्यनवद्यविद्याविद्योतितदिङ्मंडलजटाशंकरसूनुना ज्योतिर्विच्छ्रीधरेण घोरेयोपाभिधश्रीकृष्णसहायेन विरचितायां सुबोधिनीटीकायां फलश्रुतिकथनं नाम विंशतितमोऽध्यायः ॥ २० ॥

भाषा—ऐसा यह शास्त्र गर्गमुनिने ब्रह्माजीके पाससे पढके पीछे मुझको कहा. हे मैत्रेय ! मैंने यह आद्यंत शास्त्र तुमको कहा ॥ ४ ॥ ५ ॥

इति 'श्रीबृहत्पाराशरहोराशास्त्रे उत्तरार्धे श्रीमद्ध्यङ्कन्वयवे० जटाशंकरसूनुज्यो-
तिर्विच्छ्रीधरेण ज्योतिर्विद्वेंकटरामतनयहरिकृष्णसहायेन' विरचितायां
भाषाटीकायां फलश्रुतिकथनं नाम विंशतितमोऽध्यायः" ॥ २० ॥

समाप्तश्चायं ग्रन्थाः ।

पुस्तक मिलनेका ठिकाना—

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम् प्रेस,
कल्याण-मुंबई.

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम् प्रेस,
खेतवाडी-मुंबई.